This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Digitized by Google

Ind L 300.2 Bd. May, 1888.

Harvard College Library

FROM THE

BRIGHT LEGACY.

Descendants of Henry Bright, jr., who died at Watertown, Mass., in 1686, are entitled to hold scholarships in Harvard College, established in 1880 under the will of

JONATHAN BROWN BRIGHT

of Waltham, Mass., with one half the income of this Legacy. Such descendants failing, other persons are eligible to the scholarships. The will requires that this announcement shall be made in every book added to the Library under its provisions.

Received 21 Feb. 1887 -
25 Jan. 1888.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

VOL. IX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Digitized by Google

~~IX 160~~
Ind L 350.2

Digitized by Google

INDEX TO VOLUME IX. NEW SERIES.

KHAṆḌANAKHAṆḌAKHÁDYAM, 1, 66, 154, 196, 233, 289, 356, 412, 499, 561, 621, 678.

SAMKSHEPAŚÁRÍRAKAM, 17, 75, 168, 177, 282, 329, 345, 401, 457, 513, 569, 625.

ŚÁSTRADÍPIKÁ, 33, 93, 121, 225, 277, 324, 375, 441, 466, 525, 615, 673.

ŚRÍBHÁSHYAM, 48, 107, 135, 209, 249, 305, 364, 425, 483, 533, 585, 657.

ŚRAUTAPADÁRTHANIRVACHANAM, 25, 83.

VEDÁNTATATTWASÁRAH, 185, 265, 336, 390.

Digitized by Google

Digitized by Google

FEB 21 1887

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 1.] JANUARY 1887. [Vol. IX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 679. Vol. VIII.)

मू॰ [a] "अथ मन्यसे, * यः साक्षात्कारित्वमन्यतो जानाति प्रत्यक्षव्यवहारनिदानतया च न जानातीति तं प्रति प्रत्यक्षव्यवहारनिदानत्वमस्य ज्ञाप्यते लक्षणवादिना, तच्चानुमानभावेनैव, नाप्तोपदेशतया, अत एव च लक्षणं केवलव्यतिरेक्यनुमानमाचक्ष्महे ; तद्यथा,—श्रावणादिप्रमितयः साक्षात्कारिप्रमितयो वा प्रत्यक्षत्वेन व्यवहर्त्तव्याः, साक्षात्कारिप्रमितित्वात्, न यत् प्रत्यक्षतया व्यवह्रियते न तत् साक्षात्कारि, यथाऽनुमितिः, तथा चैताः, तस्मात्तथा। एतदनुमानप्रतिपादकं च वाक्यं नाप्तवाक्यत्वेन प्रयुज्यते वादिना, किन्तु व्याप्त्यादेः प्रतिपन्नस्यैव स्मारकं, पूर्वाप्रतिपन्नस्य वा जिज्ञासोत्पादनद्वारेणेदानीमेव(१)वादिनि प्रमाणोत्पादकमित्युक्तदोषानवकाशः *,—इति । न । "प्रत्यक्षतया व्यवहर्त्तव्याः"—इति व्यवहारस्य किं [b] विषयभेदो विशेषः ? उत शब्दभेदः ?। आद्ये, [c] यद्यसौ विषयविशिष्टव्यवहारं नाज्ञासीत्, कथं साक्षात्कारिणि तस्य स्वकर्त्तव्यतां(२) लक्षणवाक्यादप्यवगच्छेत्, न ह्यविदिताग्निरनुमानादप्यग्निसंबन्धं बोधयितुं शक्यः । अथाऽज्ञासीत्, [d] तदा ज्ञातज्ञापनवैयर्थ्यात् लक्षणरूपमनुमानं नि-

(१) इदानीमेव=अनुमानवाक्यप्रयोगकाल एव । वादिनि=प्रतिवादिनि, श्रोतरीत्यावत् । प्रमाणोत्पादकम्=प्रमीयतेऽनेनेति प्रमाणं व्याप्तिज्ञानं तदुत्पादकमित्यर्थः ।

(२) स्वकर्त्तव्यताम्=स्वकृतिजनकेच्छाजनकज्ञानेन ज्ञेयताम्, ज्ञानस्य कृतिसाध्यत्वाभावात् ।

प्रयोजनम्। * अथ सामान्यतो जानात्यस्ति कश्चिद्विषयः प्रत्यक्षव्यवहारस्य, विशेषतस्तु न जानाति, तं प्रतीदमुच्यते? *। न। किं सामान्यतो निमित्तवत्तां व्यवहारमात्रस्य जानाति? उत व्यवहारविशेषस्य?। आद्ये [e]प्रकृतानुपयोगः, व्यवहारविशेषस्य चिन्त्यमानत्वात्। द्वितीये किंकृतोऽयं व्यवहारस्य विशेषः?—इति विकल्पितपक्षानुप्रवेशमन्तरेण न निस्तारः। एतेन सर्वस्यैव लक्षणस्य स्वीकारः परास्तनीयः। तथाहि,—

नात्यापत्त्या प्रमामात्रात्ते तेऽर्थाः स्वीक्रियोचिताः।
[f]तद्धियस्तदुरीकारे स्वाश्रयं कश्चिकित्सतु ॥ ३५ ॥

टी० ॥ ननु लक्षणवाक्यमाप्तवाक्यत्वेन नोपयुज्यते, किन्तु परार्थानुमानत्वेन, तस्य(१) च पूर्वानुभूतव्याप्तिस्मारकत्वं जिज्ञासोत्पादकत्वमात्रं वा फलं, तथा च नोक्तदोष इति शङ्कते—। [a]"अथे"ति ॥ [b]"विषयभेद" इति। प्रत्यक्षत्वलक्षणो व्यवहारविषयः? (२)प्रत्यक्षशब्दाभिधेयत्वमात्रं वा व्यवहारविशेषः? इति विकल्पार्थः॥ व्यवहर्तव्या इतिप्रैषात्(३) व्यवहारविशेषं तदा स्वकर्तव्यतयानुमापयेदसौ प्रतीतचरः स्यादन्यथा साध्याऽसिद्ध्या व्याप्त्यग्रह एवेत्याह—। [c]"यद्यसावि"ति॥ सिद्धसाधनमाह—। [d]"तद्धे"ति ॥ विषयविशेषाङ्कितव्यवहारकर्तव्यत्वे साध्ये सामान्यज्ञानमतन्त्रमित्याह—। [e]"प्रकृते"ति। अत्यापत्तिः=अतिप्रसङ्गः, पटप्रमातोऽपि घटप्रसिद्धिलक्षणः॥ घटविशेषितप्रमातो घटसिद्धौ विशिष्टप्रविष्टात् घटादपि घटसिद्धिरित्यात्माश्रय इत्याह—। [f]"तद्धिय" इति ॥

(१) तस्य=परार्थानुमानस्य।

(२) व्यवहारस्य ज्ञानात्मकत्वाभिवदनात्मकत्वाभ्यां द्वैविध्याद् "व्यवहर्तव्याः"—इत्यत्र ज्ञानात्मकं व्यवहारमादाय तस्य विषयः प्रत्यक्षत्वलक्षणो ग्राह्यः। अत्र प्रत्यक्षशब्दाभिधेयतामात्रमादायेत्यर्थः।

(३) प्रैषः=विधिः।

मू० [a] अथान्यः स विशेषश्चेत्तद्धीत्वं कश्चिदिष्यते ।
[b] दत्तः साकारवादाय विष्टरः(१) स्पष्टमेव तत् ॥ ३६ ॥
[c] अर्थादुत्थासवो(२) धर्मा नानुमात्वादयो यथा ।
तद्धीत्वमपि तद्वत् स्या(३)दित्यर्थोऽनर्थमाविशेत् ॥ ३७ ॥
[d] सोऽपि(४) वा धीविशेषः किं स्वीकार्य्यस्तद्धियं विना? ।
एवं च सोऽपि सोऽपीति नान्तः सोपानधावने ॥ ३८ ॥
[e] समस्त(५)लोकशास्त्रैकमत्यमाश्रित्य नृत्यतोः ।
का तदस्तु गतिस्तत्तद्वस्तुधीव्यवहारयोः? ॥ ३९ ॥
उपपादयितुं(६) तैस्तैर्मतैरशकनीययोः ।
अनिर्वक्तव्यतावादपादसेवागतिस्तयोः ॥ ४० ॥

नापि(७) द्वितीयः । तथाहि,—अयमनुमानार्थः स्यात्,—श्रावणादिप्रतिपत्तयः प्रत्यक्षशब्दाभिधेयाः, साक्षात्कारित्वादित्यादिः, सोऽपि न ।

टी० ॥ ननु घटधीत्वमित्यत्र घटो न विशेषणं येनात्माश्रयः स्यादपि तु घटेन्द्रियसन्निकर्षजे ज्ञाने घटधीत्वं नाम स कश्चिद्विशेषो येन घटसिद्धिरिति शङ्कते-। [a] "अथान्य" इति ॥ एवं सति घटोऽपि

(१) विष्टरः=आसनम् ।
(२) उत्थासवः=उत्थानशीलाः ।
(३) तद्वत्स्यात्,=अर्थादुत्थितं न स्यादित्यर्थः ।
(४) सोऽपि धीविशेषः=घटधीविशेषः, किं तद्धियं घटधीविषयकधियम्, विना स्वीकार्य्यः? "नैव स्वीकार्य्यः"-इत्यर्थः, एवं च सोऽपि सोऽपि घटधीधीगोचरधीविशेषादिरपि स्वस्वगोचरधियं विना नैव स्वीकार्य्य इति सोपानपरम्पराधावनेऽनवस्थेत्यर्थः ।
(५) पूर्ववादी शङ्कते-समस्तेति । तत्=तस्मात् समस्तलोकशास्त्रयोरैकमत्यमाश्रित्य नृत्यतोः=भासमानयोस्तत्तद्वस्तुव्यवहारतत्तद्धीव्यवहारयोः का गतिरस्तु?-इत्यर्थः ।
(६) सिद्धान्ती समाधत्ते-उपपादयितुमिति । तैस्तैर्मतैरुपपादयितुमशकनीययोस्तयोः (=तत्तद्वस्तुधीव्यवहारयोः) अनिर्वक्तव्यतावादपादसेवागतिः-इत्यन्वयः ।
(७) 'प्रत्यक्षतया व्यवहर्त्तव्याः'-इत्यत्र प्रत्यक्षशब्दाभिधेयत्वमात्रं व्यवहारविशेषो वाह्य इति द्वितीयं पक्षं खण्डयति-नापीति ।

Digitized by Google

ज्ञानाकारप्रविष्टः(१) स्यादिति वा, घटाकारकादाचित्कत्वाद्घटलक्षणविषयसिद्धिरिति वा, साकारवादाभ्युपगमः स्यादिति परिहरति—। [b] "इत्त"-इति । तथाचापसिद्धान्त इति भावः ॥ ननु नार्थाधीनं घटधीत्वं, किन्त्वनुमितित्वादिवत्कारणान्तराधीनं, तथाच नाकारकादाचित्कत्वात् घटसिद्धिरिति न साकारवाद इत्याह—। [c] "अर्थाद्धि" ति । इतिशब्दानन्तरं 'यदा, तदे'त्यध्याहार्य्यम् । अर्थो घटादिरनर्थे=सङ्कटं प्रविशेच सिद्ध्येदित्यर्थः । अर्थानधीनघटधीत्वस्यार्थे प्रत्यतन्त्रत्वा(२)दिति भावः । यद्यपि(३) घटप्रमातोऽन्या न घटसिद्धिः, किन्तु घटप्रमैव स्वरूपसती घटसिद्धिस्तथापि विशेषाभावात्सा पटसिद्धिरेव किं न स्यादिति हृदयम् ॥ यद्वा, अनेनैवाशयेनाह—। [d] "सोपी" ति । 'घटधीर्घटसिद्धिरि'ति तद्गोचर(४)ज्ञानान्तरनिर्वाह्यमिति तत्रतत्र प्रसङ्गेऽनवस्थेत्यर्थः ॥ वस्तुगोचरधीव्यवहारयोः सर्वेषां लोकानां शास्त्राणां च सम्प्रतिपत्तिमात्रं, विचारतस्तु तयोरुपपादनमशक्यमित्याह—। [e] "समस्तेति ॥

मू० यद्यसाक्षात्कारिण्यनुमानादौ तच्छब्दाप्रयोगमात्रात्(५) साक्षात्कारिणि तच्छब्दप्रयोगः क्रियते [a] तर्हि शशविषाणजवगडदशादिशब्दप्रयोगोपि साक्षात्कारिणि कर्त्तव्य

(१) यदि बाह्यार्थवादी नैयायिकादिरास्तिकः शङ्ककस्तदा तं प्रति "ज्ञानाकारप्रविष्टः स्यादि"ति प्रसञ्जनम्, यदि तु विज्ञानवादियोगाचारः शङ्ककस्तदा तं प्रति "घटलक्षणविषयसिद्धिरि"ति प्रसञ्जनमिति विभागः। तत्र घटधीत्वस्य घटधियां वृत्तित्ववत्तद्विशेषणीभूतघटेपि वृत्तित्वेन घटस्य घटधीरूपज्ञानरूपे प्रविष्टत्वम् । तथाघटाकारस्य घटधीत्वस्य कादाचित्कत्वेन घटात्मकविषयनियतत्वं वक्तव्यम् (अनियतत्वे हि घटधीत्वस्य सार्वदिकत्वप्रसङ्गः) इति घटाकारकादाचित्कत्वान्यथानुपपत्त्या तदतिरिक्तस्य घटरूपविषयस्य सिद्धिरिति द्रष्टव्यम् ।

(२) अर्थे प्रत्यतन्त्रत्वात्=अर्थाऽसाधकत्वात् ।

(३) ननु घटरूपाऽर्थानधीनत्वेपि घटधीत्वस्य घटधीरूपाऽर्थाधीनत्वमस्त्येव, घटधीरेव च घटसिद्धिः, तथाच तत्साधकत्वे कथं घटाऽसाधकत्वमित्याशङ्काह—यद्यपीति ।

(४) तद्गोचरेति, घटधीविषयकज्ञानान्तरेण ज्ञेयमित्यर्थः । एवं तत्रतत्र=घट, धीगोचरज्ञानादावपि, प्रसङ्गे=ज्ञानान्तरग्राह्यत्वप्रसङ्गेऽनवस्थेत्यर्थः ।

(५) तच्छब्दाऽप्रयोगमात्रात्=प्रत्यक्षशब्दाप्रयोगमात्रात् ।

Digitized by Google

ष्वाविशेषात्(१)। * अथ जबगडदशादिशब्दाः सामान्यतोऽर्थवत्तया न प्रसिद्धाः, क्वचिदप्रयोगात्; शशविषाणादिशब्दा असद्विषया एवेति प्रसिद्धाः, प्रत्यक्षादिशब्दास्तु सद्विषयवत्तया सामान्यतः सिद्धाः, प्रत्यक्षमस्तीत्यादिप्रयोगदर्शनाद्;—इत्यस्ति विशेषः *,—इति, मैवम्, [b] एतेनापि विशेषेण चाक्षुषादिशब्दानामव्यवच्छेदात् तेषामपि साक्षात्कारिप्रमाभावे प्रयोगप्रसङ्गः। * [c] 'साक्षात्कारित्वे सत्यपि श्रावणादौ चाक्षुषादिशब्दानामप्रयोगो, न त्वेवं प्रत्यक्षादिशब्दानामिति विशेषः * ?—इति चेत् [d] एवं तर्हि 'यत्र साक्षात्कारित्वं नास्ति तत्र प्रत्यक्षशब्दप्रयोगो नास्ति, यत्र साक्षात्कारित्वमस्ति तत्र सर्वत्रास्ती'ति यो जानीते तं प्रति लक्षणाभिधानमिति स्यात्,

टी० ॥ अनुमानाद्यवाचकत्वं यदि प्रत्यक्षवाचकत्वे तन्त्रं, तत्राह—। [a] "तर्ही"ति ॥ अथ सद्वाचकत्वे सत्यनुमानाद्यवाचकत्वं, तत्राह—। [b] "एतेनापी"ति । चाक्षुषादिशब्दानामनुमानाद्यवाचकत्वे सति सद्वाचकत्वमस्तीति तेषामपि साक्षात्कारित्वेन प्रवृत्तिनिमित्तेन प्रत्यक्षवाचकत्वं स्यादित्यर्थः ॥ चाक्षुषादिशब्दे साक्षात्त्वं न प्रवृत्तिनिमित्तं तस्मिन्सत्यपि श्रावणादिप्रतिपत्तौ तदप्रतिपत्तेरिति शङ्कते—। [c] "साक्षादि"ति ॥ एवं सत्यन्वयव्यतिरेकाभ्यामेव तत्पदाभिधेयत्वसिद्धिरिति लक्षणोपन्यासप्रयासवैफल्यमिति परिहरति [d] "एवमि"ति ॥

मू० स च व्यवहारान्तरवदन्वयव्यतिरेकाभ्यामेव वाच्यवाचकभावमवधारितवानिति व्यर्थं लक्षणम्। [a] एतेनानुमित्यादिव्यवच्छिन्नतया व्यवहर्त्तव्यमित्युक्तानुमानसाध्यतयाभिधी-

(१) अविशेषात्=अनुमानाद्यवाचकत्वस्य शशविषाणादिशब्देऽपि तुल्यत्वात्।

Digitized by Google

यमानमपास्तं वेदितव्यम्। *पूर्वप्रतिपन्नमेव(१)वाच्यवाचकभावं लक्षणाभिधानेन स्मार्यते? *—इति चेन्न, [b] अवगतसमयस्य(२)प्रत्यक्षशब्दादेव तत्स्मरणसम्भवात् व्यर्थता लक्षणाभिधानस्य स्यात्। [c] अवगतशब्दार्थसंबन्धः शब्दादेव स्मरन् यदि लक्षणेन स्मार्यते, तदा लक्षणवाक्यगतपदकदम्बार्थस्मरणार्थमपि लक्षणमभिधानीयमविशेषाद्, एवं तल्लक्षणवाक्येपीत्यपर्यवसानं स्यात्। * [d] ननु प्रतिवादिनं प्रति लक्षणाभिधानं नार्थवत्, तेन वाग्याप्तभावानङ्गीकारात्, किन्तु शिष्यार्थं लक्षणमुच्यते शास्त्रे, स(३) हि शास्त्रस्य कर्त्तारमाप्तमेव मन्यते, तस्माच्छिष्यं प्रत्याप्तवचनत्वेनैव लक्षणवाक्यमर्थं प्रतिपादयिष्यति गुरुणा गीयमानं,— [e] यस्त्वया साक्षात्कारिशब्दार्थः प्रतीतः स एव प्रत्यक्षशब्दार्थः(४)? *—इति चेन्नैवम्। यदि वादिनं प्रति न शास्त्रं [f] किन्तु शिष्यं प्रति, तदा प्रतिज्ञामात्रादेवाप्तवचनात् शिष्यस्यार्थनिश्चयोत्पत्तेर्हेत्वाद्यभिधानमनर्थकमापन्नं शास्त्रे। अथ *भवतु(५) तत्प्रतिवादिनमपि प्रति शास्त्रे वाक्यं यत्र हेत्वाद्युपात्तं, लक्षणवाक्यं तु शिष्यमेव प्रति प्रयोजकं, प्रतिपन्नशास्त्रकाराप्तभावम् -* इति मन्यसे,

---

(१) पूर्वं प्रतिपन्नो ज्ञातो वाच्यवाचकभावस्तं प्रत्येव पुरुषो लक्षणाभिधानेन लक्षणवादिना स्मार्यते इत्यर्थः।

(२) अवगतो ज्ञातः समयो=वाच्यवाचकतासम्बन्धो यस्य पुंसस्तस्येत्यर्थः।

(३) सः=शिष्यः।

(४) अत्रेकमन्यादितिपदमध्याहर्तव्यम्।

(५) अथ यत्र हेत्वाद्युपात्तं तद्वाक्यं प्रतिवादिनं प्रत्यपि शास्त्रे भवत्वित्यन्वयः।

Digitized by Google

टी० ॥ [a] "एतेने"ति । अन्वयव्यतिरेकसिद्धत्वेनेत्यर्थः ॥ [b] "अवगमे"ति । शब्दान्तरवदित्यर्थः ॥ ननु लक्षणाधीनं वाचकत्वस्मरणं प्रयोजकम्, नत्वन्यदित्यत आह–। [c] "अवगते"ति ॥ वादिनं प्रति भवत आप्तत्वासिद्धेरिति पूर्वोक्तं शङ्कते–। [d] "नन्वि"ति ॥ शिष्यं प्रति लक्षणाभिधानप्रकारमाह–। [e] "यस्त्वये"ति ॥ [f] "किन्त्वि"ति । उपनिबद्ध्यायेनो(१)पदेशमात्रं शास्त्रमस्तु, किं लिङ्गाद्युपदर्शनेनेत्यर्थः ॥

मू० तदप्यनुपपन्नम्, शास्त्रान्तरसाध्यत्वाद[a]स्यार्थस्य । [b] अस्ति शास्त्रं समयस्य ग्राहकं मुनिभिः प्रणीतं नामलिङ्गानुशासनव्याकरणादि । यदि च शास्त्रान्तरसाध्योऽर्थो भवदीयशास्त्रस्य विषय,स्तर्हि प्रकृतिप्रत्ययविभागेन साधनमपि शब्दानां कुतो न व्युत्पाद्य व्यवस्थाप्यते? लिङ्गं वा शब्दानां कुतो नाभिधीयते? तदज्ञानेऽपि पराजयो जायत एव । अथवाऽस्तु व्याकरणादिविषयं विहाय नामव्युत्पादनं कथमपि भवच्छास्त्रविषयः, तदापि न्यूनतरत्वमस्मिन्विषये भवदीयशास्त्रस्य । बहूनि नामानि विद्यन्ते कोशान्तरवर्तीनि,कुतो(२)न व्युत्पादितानीति । *अथास्मिन् शास्त्रे येषां शब्दानामुपयोगस्तेषामनेन व्युत्पादनं, न सर्वेषाम्*–इत्युच्यते तथापि यथैकवाक्यगतस्य पदस्य लक्षणव्युत्पादनमेवं तल्लक्षणवाक्यगतपदस्यापीत्यपर्यवसानमापततिं शास्त्रस्य, तत्तल्लक्षणवाक्यप्रयोगे एव तेषां तेषां पदानां शास्त्रे जातोपयोगत्वात् । *अथ नानालक्षणप्रणेतॄणां वादिनां विप्रतिपत्तेः प्रत्यक्षादिशब्दार्थ एव व्युत्पाद्यते संशयनिरासाय ना-

(१) उपनिबद्ध्यायेन =उपनिबद्धदृष्टान्तेनराजाज्ञाशब्दयुक्तिनिरपेक्षमित्यर्थः ।
(२) 'कुतः'–इत्यतः, प्राक्'तान्यपि'–इत्यध्याहरणीयम् ।

न्योऽसंशयत्वात् *—इति मन्यसे, तथाप्यनुपपत्तिः। अस्ति हि [c] वादीनामर्थे वाच्यताद्योत्यताविवादः(१), [d] अस्ति च छिदुरादिपदानामर्थे कर्मकर्तृत्वाकर्मकर्तृत्वे विवादः, अस्ति च भावशब्दस्य स्वरूपसत्त्वसत्तासामान्याद्यर्थत्वे(२), अस्ति चाऽधिकरणशब्दार्थस्य पतनप्रतिबन्धकत्वसमवायित्वादौ, एवमन्यस्मिन्नपि बहौ पदार्थे जाग्रति विप्रतिपत्तयः(३) तत्तल्लक्षणानि कस्मान्नोक्तानि।

टी०। [a] "अस्यार्थस्ये"ति। वाच्यवाचकत्वव्युत्पादनस्येत्यर्थः॥ तदेवाह—। [b] "अस्ती"ति॥ [c] "वादीनामि"ति। वाशब्दादीनामित्यर्थः॥ [d] "अस्ती"ति। "विदिभिदिच्छिदेः कुरच्" इतिसूत्रविहितकुरच्प्रत्ययस्य कर्मकर्तरि कर्तरि मात्रे वाऽनुशासनमिति सन्देहः, प्रयोगद्वैविध्यदर्शना(४)दित्यर्थः। यद्यपि यावतां पदार्थानां तत्त्वज्ञानं निःश्रेयसहेतुस्ते एव लक्षणतः परीक्षातश्च शास्त्रे निरूपणीयाः, इति नायमुपालम्भो(५)घटते, तथापि तदप्येतावतामेवेति न नियामकमिति भावः॥

ख० तदास्ताम् [a] एकत्र विस्तराभिनिवेशः। किञ्च तत्साक्षात्कारित्वम्?। * सविशेषार्थप्रकाशत्वम्? (६) *—इति चेन्न। [b] सविशेषत्वस्योपलक्षणत्वेऽनुमानादिव्याप्तिः। [c] विशेषण-

(१) निपातानां वाचकत्वं नैयायिकमते, द्योतकत्वं वैयाकरणमते ज्ञेयम्।

(२) भवन्तीति भावाः—इतिव्युत्पत्त्या तत्तद्वस्तुस्वरूपसत्त्वार्थत्वं; भवनं भाव इति व्युत्पत्त्या च सत्तासामान्यार्थत्वम्। भाव इति प्रयोगश्चोराधिकस्य।

(३) विप्रतिपत्तयो जाग्रतीत्यन्वयः, "जाग्रति"—इति बहुवचनान्तं क्रियापदम्।

(४) छिद्यते यत्तच्छिदुरमितिव्युत्पत्त्या काष्ठादौ, छिनत्तीतिव्युत्पत्त्या च पुरुषे, छिदुरपदप्रयोगदर्शनादित्यर्थः।

(५) अयमुपालम्भः="तत्तल्लक्षणानि कस्मान्नोक्तानि"—इत्युपालम्भ इत्यर्थः।

(६) विशेषेण वर्तुलत्वपृथुबुध्नोदरत्वादिना सहितो योऽर्थो घटादिस्तज्ज्ञानत्वं साक्षात्कारित्वमिति शङ्कते—सविशेषेति।

त्वे च यदि विशेषस्पृक्स्वतया [d]विश्रान्ति, स्तदा(१)शेषविशेषस्य बोधे प्रत्यक्षलक्षणक्षीणत्वेनाऽऽमूलमप्रत्यक्षत्वापातः । य[e]द्यविश्रान्ति, स्तदा तादृशस्यैव व्याप्तिग्रहादनुमायामपि तादृशसिद्धिरिति साक्षात्कारित्वापत्तिः । *[f]अथानुगमात्तत्र न तदनुमा *, [g]तर्हि तदनुगतप्रतीत्याद्यनुपपत्तिः ।

टी० ॥ [a]"एकत्रे"ति । प्रत्यक्षादिलक्षणमात्रे इत्यर्थः ॥ [b]"सविशेषत्वस्ये"ति । सह विशेषेण कपित्वादिना तार्क्ष्यत्वाऽऽतार्क्ष्यत्वादिना वा वर्त्तमानस्य वह्न्यादेरनुमानादिनापि प्रतीतेरतिव्याप्तिरित्यर्थः ॥ विशेषेण सहैव भानं यदि विवक्षितं, तत्राह—। [c]"विशेषणत्वे चे"ति । अनवस्थाभयेन यस्य विशेषस्य सविशेषत्वभानं नाभ्युपेयं तत्राप्रत्यक्षतया मूलपर्यन्तमप्रत्यक्षत्वं स्यात्, विशेषसाहित्येनाऽज्ञानादित्यर्थः ॥ [d]"विश्रान्तिरि"ति । कश्चिद्विशेषो विशेषं विनाकृतोऽपि गृह्यते इत्यर्थः ॥ [e]"अविश्रान्तिरि"ति । सर्वे विशेषाः स्वविशेषसाहित्येनैव भासन्ते इत्यभ्युपगमे व्याप्तिग्राहकेऽप्यक्षे यावद्विशेषभानम् इत्यनुमाने(२)पि तद्भानादनुमितेः प्रत्यक्षत्वापत्तिरित्यर्थः ॥ ननु तावतामनन्तविशेषाणां व्यापकतावच्छेदकैकरूपाभावादनुमितौ भानमनुपपन्नमिति न तत्रातिव्याप्तिरिति शङ्कते—। [f]"अथे"ति ॥ तर्हि तावतामनन्तविशेषाणामनुगतप्रतीतिव्यवहारौ न स्यातामेकरूपाभावादिति परिहरति—। [g]"तर्ही"ति ॥

मू० [a]व्यक्तेरनुमानादसिद्ध्यापत्तेश्च । [b]यथा हि व्यक्तिं विना सामान्यस्य, तथा तावन्तं विशेषं विना [c]व्यक्तेरप्यनुपपत्तावविशेषात् । [d]यदि च प्रतीत्यपर्यवसानाभावात्पक्षधर्मतया

(१) शेषविशेषस्य=चरमविशेषस्य, यद्विषयकं विशेषान्तरं नास्ति तस्येत्यर्थः ।

(२) अनुमाने=अनुमितौ । अत्रायमाशयः । व्याप्तिग्राहकप्रत्यक्षेऽवगाहित्वादनन्तविशेषवत्त एव व्यापकस्य भानात् तादृशविशेषभानधारायाः अविश्रान्तेश्च त्वयैवोक्तत्वादनुमितिपर्यन्तमपि विशेषभानं वक्तव्यमित्यनुमितेरपि प्रत्यक्षत्वप्रसङ्ग इति ।

नानन्तविशेषसिद्धिरिति मन्यसे, तदा प्रतीता(१)पर्य्यवसानात्तद्बुद्धिः साक्षात्प्रकाशः स्यात्। ᵉअप्रतीयमानानन्तविशेषप्रकाशकल्पनाच्चैकाकिसाक्षात्त्वनामकविशेषकल्पनैवाल्पत्वात् श्रेयसितरां, साक्षात्कारित्वव्यवहारानुपपत्तेः (कल्पनाबीजस्य) तावता(२)पि चरितार्थत्वात्, इति कृत्वा ᶠतत्कल्पनापि नाᵍऽस्त एव।

टी० ॥ किंच, सामान्योपग्रहेण व्याप्तिग्रह इत्यनुमितौ सामान्यं भासमानं व्यक्तिमादायैव यथा भासते तथा वह्निरप्यनुमितौ भासमानस्तावदनन्तविशेषमादायैव(३)भासते तत्समानसंवित्संवेद्यत्वाभ्युपगमात्, अन्यथा सामान्यमादायैवानुमितिः पर्य्यवस्येद्व्यक्तिभानं क्वापि न स्यादित्याह—। ᵃ"व्यक्तेरि"ति ॥ एतदेवाह—। ᵇ"यथा ही"ति। सामान्यस्यानुपपत्तिरिति संबन्धः(४) ॥ ᶜ"व्यक्तेरि"ति। अनुमितौ भासमानाया वह्न्यादिव्यक्तेरित्यर्थः ॥ ननु व्यक्तिमनादाय सामान्यबुद्धेर्यथाऽपर्य्यवसानं न तथा तावदनन्तविशेषमनादाय वह्न्यादिव्यक्तिबुद्धेरपर्य्यवसानं, तावद्विशेषमनादायापि व्यक्तिबुद्धेर्दर्शनादित्यत आह—। ᵈ"यदि चे"ति। एवमपि प्रतीता वह्निव्यक्तिस्तावदनन्तविशेषमन्तरेण न पर्य्यवस्यतीति तदनुमित्यनन्तरभाविन्यर्थबलायाते ज्ञानान्तरे(५) प्रत्यक्षलक्षणातिव्याप्तिः स्यादित्यर्थः ॥ किञ्च, तावदनन्तविशेषभानमनुपलब्धिबाधितमित्यवश्यनिर्वाह्यसाक्षात्त्वव्यवहारानुरोधाद्विषयगतं साक्षात्त्वसामान्यमभ्युपगम्यतां, यद्विषयीकुर्वद्वि-

(१) प्रतीतेति, प्रतीताया वह्निव्यक्तेस्तार्णत्वाऽतार्णत्वाद्यनन्तविशेषं विनाऽपर्यवसानात्=अनुपपद्यमानत्वात्तदुपपादकानामनन्तविशेषाणां बुद्धिः=कल्पनारूपार्थापत्तिः साक्षात्प्रकाशः=साक्षात्कारिज्ञानं स्यादित्यर्थः।

(२) तावता=अर्थगतानुगतसाक्षात्त्वकल्पनेनैव॥

(३) तावदनन्तविशेषमादाय=तार्णत्वाऽतार्णत्वादिलक्षणं विशेषमादायैव भासते इत्यर्थः। तत्र हेतुः—तत्समानेति, सामान्यग्राहकज्ञानग्राह्यत्वाभ्युपगमाद्विशेषस्येत्यर्थः।

(४) "अनुपपत्तौ"—इत्यस्यैव विभक्तिविपरिणामेनानुपपत्तिरिति प्रकृतस्य सम्बन्ध इत्युक्तम्।

(५) अनुपपद्यमानार्थदर्शनात्तदुपपादकीभूतार्थान्तरकल्पनारूपार्थापत्त्यात्मके ज्ञाने इत्यर्थः।

Digitized by Google

ज्ञानं साक्षात्कारि व्यवह्रियते इत्याह—। e "अप्रतिपद्यमाने"ति । एकाकित्वमल्पत्वं च लाघवानुरोधादुक्तम् ॥ नन्वस्तु तथा, को दोषः? इत्यत आह—f "तत्कल्पनाये"ति ॥ g "अत एवे"ति । विषयगतसाक्षात्त्वविषयकानुमितावतिव्याप्तिदोषादेवेत्यर्थः ॥

मू० a विस्तरस्त्वाग्रे वक्ष्यते । b विशेषस्य यदि व्यवच्छेदस्तदा निर्विकल्पकाऽव्याप्तिः । c यदि(1) च तदितरविशेषव्यावृत्तस्वरूपप्रकाशः, d सोऽपि तथा, e तदा दूरात्सामान्यप्रत्यक्षस्या(2)प्रत्यक्षत्वापत्तिः । तन्न, जगद्वैलक्षण्यप्रकाशे संशयाद्यनुपपत्तेः । f यदि च तथापि प्रतिपन्नादिव्यवच्छेदमात्रप्रकाशाद्विशेषप्रकाशत्वमेव, तदाऽनुमित्यादिव्याप्तिः । अर्थेन्द्रियकरणकानुभवत्वं(3), तन्न 'साक्षात्कारिधीकरणत्वस्यैवेन्द्रियत्वेनान्योन्याश्रयत्वापत्तेरि'ति केचित् । तन्न, अज्ञातप्रमाकरणत्वस्य(4) g भावत्वविशेषितस्य चेन्द्रियत्वनिरुक्तेः सम्भवात् । h विना कार्यगतविशेषसिद्धिं, किं प्रति करणत्वमेव ज्ञेयमि'ति तु बाधः साधीयान् । i एतेन 'ज्ञातता, काचिद्विलक्षणा, तज्जनकत्वं ज्ञानस्य साक्षात्त्वम्'—इत्यपि निरस्तम्,

(१) ननु स्वेतरविशेषव्यावृत्तं स्वरूपं विशेषः, तत्प्रकाशकं ज्ञानं प्रत्यक्षमित्युच्यते, तथा च सोऽपि=निर्विकल्पकज्ञानविषयोऽप्यस्ति तथा=स्वेतरविशेषव्यावृत्त इति न तद्विषयके निर्विकल्पकेऽव्याप्तिरित्यत आह—यदीति ।

(२) सामान्यप्रत्यक्षस्य=सामान्यतः स्थाण्वादेर्धर्मिणः प्रत्यक्षस्य, अप्रत्यक्षत्वापत्तिः, इतरव्यावृत्तस्वरूपस्य तत्राभानात्। तदभाने बाधकमाह—तन्नेति ।

(३) अत्र "साक्षात्त्वम्"—इति शेषः ।

(४) अज्ञातप्रमाकरणत्वस्य=अज्ञातत्वे सति प्रमाकरणत्वस्य ।

Digitized by Google

टी० ॥ ननु ज्ञानगतमेव साक्षात्त्वमस्तु, तदेव च लक्षणमित्यत आह—। [a]“विस्तरश्चे”ति ॥ ‘सविशेषार्थप्रकाशत्वमि’त्यत्र विशेषपदं विकल्प्य दोषमाह—। [b]“विशेषश्चे”ति । निर्विकल्पके विशेषस्यातद्व्यावृत्तेरभानात्तत्राव्याप्तिरित्यर्थः ॥ ननु व्यवच्छिन्नभानमभिमतं, न तु व्यवच्छित्तिभानमित्यत आह—। [c]“यदि चे”ति ॥ [d]“सोपीति । निर्विकल्पकविषयोपीत्यर्थः ॥ [e]“तदा दूरादि”ति । यदि धर्म्मिमात्रमपि विशेषो वस्तुमात्रं वा विशेषस्तदा धर्म्मिदर्शनं विशेषदर्शनम् अतस्तत्र संशयो न स्यादित्यर्थः ॥ ननु सकलव्यवच्छिन्नप्रकाशो न लक्षणं, किन्तु व्यवच्छिन्नप्रकाशमात्रं, तच्च दूरप्रत्यक्षेप्यस्तीत्याह—। [f]“यदि चे”ति ॥ भट्टमतेऽनुपलब्धिव्यावर्तनायाह—। [g]“भावत्वे”ति ॥ स्वयं खण्डनमाह—। [h]“विने”ति ॥ [i]“एतेने”ति । कारणत्वस्याशक्यग्रहत्वेनेत्यर्थः । ज्ञाततावैलक्षण्यं—यतः ‘साक्षात्कृतोयमि’ति व्यवहार इत्यर्थः ॥

मू० [a]ऐकरूप्याव्यवस्थितौ कारणत्वानवधारणात् । * नच ज्ञाततावैलक्षण्यान्यथानुपपत्तेरेव [b]तत्सिद्धिः, [c]कारणान्तरवैलक्षण्यादेव तदुपपत्तेः । नापि मेयजनितत्व,[d]मतिप्रसङ्गात् । [e]स्वमेयजन्यत्वं च स्वार्थव्यावृत्त्याननुगमात्, [f]पूर्वदोषानिवृत्तेश्च । [g]अथ * येन प्रमिते सति न प्रमित्सा पुनर्भवति तज्ज्ञानं साक्षात्कारि *—इति, तन्न, [h]प्रत्यक्षावगतेपीष्टे तनयादौ प्रमित्सादर्शनात् । * अथ यदनन्तरं न विजातीयप्रमित्सा तद्भावस्तथात्वं*, तन्न, तत्साजात्यानवगतौ तद्विजातीयत्वानवगतेः, अरिसम्पद्यनुमानादिविषयायां प्रत्यक्षयितुमनिष्टेश्च । प्रत्यक्षावगतेपि दहने रक्ताऽशोकस्तवकसन्देहे धूमदर्शनेन वह्नेरनुमीयमानत्वादित्य[i]प्येके । * अज्ञायमाना[j]ऽसाधारणकारणका[k]ऽनुभवत्वं,

Digitized by Google

टी० ॥ [a]"वेकरूप्ये"ति । साक्षात्कृतताऽऽधायकं किं ज्ञानम्? इति नाद्यापि निरूपितमित्यर्थः ॥ [b]"तत्सिद्धिरि"ति । ज्ञानगतैकरूपसिद्धिरित्यर्थः ॥ ज्ञानभिन्नकारणेनापि ज्ञाततावैलक्षण्यमन्यथोपपन्नमित्याह—। [c]"कारणान्तरे"ति ॥ [d]"अतिप्रसङ्गादि"ति । आत्मना मेयेन सर्वज्ञानजननादित्यर्थः ॥ प्रत्यक्षज्ञानस्य यन्मेयं (घटादि) तत्तज्जन्यत्वं न लक्षणं, स्वपदार्थाननुगमादित्याह—। [e]"स्वमेयजन्यत्वमि"ति ॥ आत्मप्रत्यक्षे भवत्यात्मा मेय इति तज्जनितत्वं सर्वज्ञानानामित्याह—। [f]"पूर्वे"ति । आत्मानुमितिस्मृत्याद्यतिव्याप्तिर्वा पूर्वदोषः ॥ अनुमानादनन्तरं प्रत्यक्षेण प्रमित्सादर्शनात्, प्रत्यक्षानन्तरं च तददर्शनात्, प्रमित्सागर्भं लक्षणमाशङ्कते—। [g]"अथे"ति ॥ अभीष्टविषयप्रत्यक्षाव्याप्तिमाह—। [h]"प्रत्यक्षे"ति । "अनुमानादिविषयायामि"ति प्रमादपाठः, "अनुमानादिविषये"—इति पाठः साधीयान् । यद्वा, अनुमानं विषयोऽतिव्याप्तिस्थलत्वेन यस्या अस्ति तस्यामरिसम्पदीत्यर्थः ॥ विशेषदर्शनात् प्रत्यक्षावगते कथं सन्देह इत्यनुशयेनाह—। [i]"एके" इति ॥ अज्ञायमानं मनःप्रभृति कारणमनुमितावपीत्यत उक्तम्—। [j]"असाधारणे"ति ॥ अज्ञायमानसंस्कारासाधारणकारणिका स्मृतिरपीत्यत उक्तम्—। [k]"अनुभवे"ति ॥

मू० [a]कारणविशेषणीकृतभावत्वं वा साक्षात्त्वम्?*—इति चेन्न, [b]दीर्घादिप्रत्यक्षाव्यापनात्; तत्रावधिप्रभृतेः(१)प्रतीयमानस्यापेक्षणात् ।* नावधिस्तत्र ज्ञायमानस्तथा(२),[c]ऽवधिज्ञानं तु स्यात्, अतीतादावप्यवधौ तथाप्रत्ययात्? *—इति चेत्,

(१) अवधिः=प्रतियोगी, (निरूपकः) प्रभृतिशब्देन चानुयोगी (निरूप्यः) ग्राह्यः। यदपेक्षया ह्रस्वो दीर्घो वा स प्रतियोगी, यश्च ह्रस्वो दीर्घो वा सोऽनुयोगी ।

(२) तथा=कारणम् । "अतीतादावप्यवधौ"—इति सतियोगे सप्तमी, तथा च ह्रस्वाद्यवधावतीतेऽनागते वा सत्यपि तथाप्रत्ययात्=तस्मादयं दीर्घ इति प्रत्यक्षसम्भवात्तेऽवधिज्ञानं कारणम् ।

[d]तुल्यं लिङ्गे धूमादावपि, [e]धूमदर्शनात्तचाग्निरासीदिति पश्चादप्यनुमानात्। [f]ज्ञानविशेषणतया तु ज्ञेयहेतुना तुल्यैवेति। [g]असाधारणकारणगिरा करणमभिमतम्? *—इति चेन्न, अनुमितभाविलिङ्गकभाविलिङ्ग्यनुमिता(१)वसतो लिङ्गस्य करणत्वाऽसम्भवेन ज्ञायमानकरणकत्वाभावात् * लिङ्गज्ञानं तावत्करणं, तच्च स्वप्रकाशवादिनो मम ज्ञायमानमेव तव? *—इति चेन्न, [h]तस्यापि(२)ज्ञायमानतया करणकोटिप्रवेशे प्रमाणाभावात् उक्तप्रत्ययानां तथात्वाभावात्।

टी० ॥ नन्वनुपलब्धिरज्ञायमानैवाभावानुभवासाधारणकारणम्? इति भट्टमते लक्षणान्तरमाह—। [a]"कारणे"ति। तथाचाज्ञायमानभावभूताऽसाधारणकारणकानुभवत्वं लक्षणमित्यर्थः ॥ [b]"दीर्घादी"ति। यद्यपीन्द्रियमादाय तत्राप्यज्ञायमानकरणत्वमस्त्येवेति नाव्याप्तिः, तथापि कार्यगतानुगतरूपाग्रहे कारणत्वमेव दुर्ग्रहमिति भावः ॥ [c]"अवधिज्ञानमि"ति। तच्चाज्ञायमानमेव करणमित्यर्थः ॥ [d]"तुल्यमि"ति। अज्ञायमानलिङ्गज्ञानकरणिकायामनुमितावतिव्याप्तिरित्यर्थः ॥ ननु धूमस्तत्र करणं, नतु तज्ज्ञानमत आह—। [e]"धूमे"ति। अतीतादिस्थले धूमस्यासत्त्वात्तज्ज्ञानमेव तदित्यर्थः ॥ ननु ज्ञानमात्रं न करणं, किंतु लिङ्गविषयकं तत्(३) तथेति

(१) इयं यज्ञशाला धूमवती भविष्यति सङ्गृहीतसकलधूमोपस्करवत्त्वादिति प्रथमतो भविष्यद्धूममनुमाय पश्चादियं यज्ञशाला वह्निमती भविष्यति भविष्यद्धूमादित्यादिरूपायामनुमितावित्यर्थः।

(२) "तस्यापीत्यत आरभ्य तथात्वाभावादि"त्यन्तमेकैव फक्किका। तथात्वाभावात्=करणत्वाभावात्। तत्र हेतुः—"तस्यापी"त्यादिः।

(३) तत्=ज्ञानम्। तथा=करणम्।

विशेषणतया लिङ्गस्यापि करणत्वमित्यत आह—। [f]"ज्ञाने"ति । तथा चावधावपि तुल्यमित्यर्थः। यद्यपि विशेष्यस्य ज्ञानस्य करणत्वेऽनुमिता-वज्ञायमानकरणत्वं गतमेव, तथापि तौल्यमेवेति भावः(१) ॥ ननु तत्र लिङ्गं करणं, तज्ज्ञानं तु व्यापारः, इति नाज्ञायमानकरणत्वमिति शङ्कते—। [g]"अ-साधारणे"ति। अवधिज्ञानस्य व्यापाराभावान्न करणत्वमिति वा शङ्कार्थः ॥ भाविनो व्यापारद्वारापि न लिङ्गस्य करणत्वमित्येतदर्थं भावी"ति ॥ स्वप्र-काशेन ज्ञायमानकरणत्वमनुमानेऽनुपपन्नं, तस्यान्यथासिद्धत्वादित्याह—। [h]"तस्यापी"ति ॥

मू० [a]"अन्यथासिद्धस्यापि ज्ञायमानत्वस्यावर्जने चक्षुराद्यनुमित्यनन्तरं दैवोपजातघटादिप्रत्यक्षाव्यापनात् । *[b]नियमेन? *—इति चेन्न, [c]विधौ वैयर्थ्यात् । नियमेन[d]निषेधस्य विशेषणे दैवावगतेन्द्रियज्ञानानन्तरजप्रत्यक्षसम्भवादसिद्धिः । *[e]विधौ करणत्वप्रविष्ट एवायं नियमो निरुच्यते? *—इति चेन्न, [f]तथापि वैयर्थ्यादेव । *[g]अन्यथातिप्रसक्तेर्वैयर्थ्यम् ? *—इति चेन्न, [h]तथाप्यतिप्रसक्तेरेव । [i]नहि रसादिसाक्षात्कारे रूपादिर्हेतुः । *[j]अन्यथासिद्धेर्न? *—इति चेन्न, [k]तुल्यत्वादनुमानेऽपि ।

(१) अवधिज्ञाने विशेष्यमात्रस्य ज्ञानस्यैव करणत्वं, न विशिष्टस्य, अनुमितौ तु विशिष्टस्य करणत्वाङ्गीकारेण विशेषणीभूतलिङ्गस्यापि करणत्वमित्यनुमितावज्ञायमान-करणत्वं मतम्=निरस्तमेवेत्याक्षेपग्रन्थार्थः; तथापि विनिगमनाविरहादनुमितावपि विशेष्यमात्रे करणत्वस्वीकारे साम्यमेवेति समाधानग्रन्थार्थः । यद्वा, यद्यप्यनुमितौ वि-शेष्यस्य ज्ञानस्य करत्वेऽनुमितावज्ञायमानकरणत्वलक्षणं गतं=स्थितमेव, तथापि प्रत्य-क्षेऽपीन्द्रियस्यावधिज्ञानस्य वाऽज्ञायमानस्यैव करणत्वात्तौल्यमित्यर्थः ।

टी० ॥ अवर्जनीयसिद्धस्य कारणकोटौ प्रवेशेऽनिष्टमाह । [a]"अन्यथे"ति । तथाचाज्ञायमानकरणकत्वं प्रत्यक्षेपि न स्यादित्यर्थः ॥ अनुमानं नियमेन ज्ञायमानकरणकं, नतु तथा प्रत्यक्षमित्याह—। [b]"नियमेने"ति ॥ नियमेन ज्ञायमानकरणकमनुमानमिति वा विवक्षितं? नियमेनाज्ञायमानकरणकं प्रत्यक्षमिति वा?। आद्ये आह—। [c]"विधावि"ति । नियमांशस्य कारणोक्तिलभ्यत्वात्, नियतपूर्ववर्तिन एव कारणत्वादित्यर्थः ॥ द्वितीये त्वाह—। [d]"निषेधस्ये"ति। नियमेनाज्ञायमानकरणकत्वस्य प्रत्यक्षविशेषाव्यापकत्वमित्यर्थः ॥ ज्ञायमानत्वं करणे विशेषणं, नतूपलक्षणमिति 'नियमेने'ति पूरणाल्लभ्यते, इत्याह—। [e]"विधौ करणत्वे"ति ॥ 'ज्ञायमानकरणकमि'त्यभिधानादेव ज्ञानस्य विशेषणत्वमपि लभ्यते(१)—इति 'नियमेने'त्यस्य वैयर्थ्यमेवेत्याह—। [f]"तथापी"ति ॥ ज्ञायमानकरणत्वं तु काकतालीयज्ञानमादाय प्रत्यक्षेऽतिप्रसक्तमिति तद्वारणार्थमयं प्राप्तानुवाद इत्याह —।[g]"अन्यथे"ति ॥ अवर्जनीयसिद्धमप्यादाय यद्यतिप्रसक्तिस्तदाऽन्यथासिद्धमन्यदपि(२) करणं स्यादिति सुतरामतिप्रसक्तिरित्याह—। [h]"तथापी"ति । "ईश्वरज्ञानमादाय ज्ञायमानकरणकत्वं प्रत्यक्षेपी"त्यपव्याख्यानम्, अग्रिमफक्किकाऽनन्वयात्(३) ॥ ननु भवत्वन्यथासिद्धमपि करणमित्यत आह—। [i]"नही"ति ॥ अन्यथासिद्धेन(४) ज्ञानेन ज्ञायमानकरणत्वं प्रत्यक्षे, नत्वेवमनुमाने, इत्यज्ञायमानकरणकानुभवत्वं नानुमानगामीत्याह—। [j]"अन्यथासिद्धेने"ति ॥ लिङ्गज्ञानमपि स्वप्रकाशतया स्वविषयेऽन्यथासिद्धमेव, इत्यनुमानेप्यज्ञायमानकरणकत्वमतिव्याप्तमेवेत्याह—। [k]"तुल्यत्वादि"ति ॥

(शेषमग्रे)

(१) लभ्यते, 'ज्ञायमाने'ति शानच्प्रत्ययबलादिति भावः ।

(२) अन्यद् रूपादिकं रसादिसाक्षात्कारे करणं स्यादित्यर्थः ।

(३) "नहि रसादिसाक्षात्कारे रूपादिर्हेतुः"—इत्यव्यवहिताग्रिमफक्किकाऽनन्वयापत्तेरित्यर्थः ।

(४) स्वप्रकाशविधया ज्ञानं ज्ञानप्रसाधनेऽन्यथासिद्धम् ।

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page* 662. VOL. VIII.)

टी० ॥ ननु पादोऽस्य विश्वा भूतानि, ममैवांशो जीवलोक इत्यादिश्रुतिस्मृतिभिर्जीवस्य परांशत्वप्रतीतेरग्निविस्फुलिङ्गादिदृष्टान्तश्रुत्या च तस्य परविकारत्वप्रतिपत्तेश्च तयोर्भेदाभेदावुपेयौ, अन्यथांऽशांशिभावाद्यनुपपत्तेरिति, नेत्याह । नांश इति । तृतीयपक्षनिषेधो दृष्टान्तार्थः । मतान्तरनिषेधार्थो वा । सर्वत्राकाङ्क्षितं हेतुमाह । कुत इत्यादिना । निष्कलं निष्क्रियं शान्तम्, अजो नित्यः शाश्वतोऽयं पुराण इत्यादिश्रुत्यांशिनो विकारस्य चानित्यत्वाद्यापादकयुक्त्यनुगृहीतया विरोधावर्षित्वादेः सत्यत्वायोगात् वचनान्तरस्य घटाकाशादिवदौपाधिकाल्पत्वाद्यनुवादेन ब्रह्मानन्यपरत्वात् तत्त्वमस्यादिवाक्यसमन्वयविरोधाच्च नैते पक्षा उपादेया इत्यर्थः ॥ १० ॥

मू० ॥ अपि च विश्वमनुप्रविवेश तत्
परममेव पदं परमात्मनः ॥
इति वदत्सु सुहृत्स्विव तत्पर-
श्रुतिवचःसु कथं स ततोऽधिकः ॥ ११ ॥

टी० ॥ इतोऽपि जीवस्य वस्तुतोंऽशत्वादिकल्पना न घटत इत्याह । अपि चेति । स एष इह प्रविष्ट आनखाग्रेभ्यः, तत् सृष्ट्वा तदेवानुप्राविशत्, अनेन जीवेनात्मनाऽनुप्रविश्येत्यादिश्रुतिवचनेषु सूर्यस्य स्वसृष्टजलभेदेष्विवाविकृतस्य प्रवेशवदविकृतपरमपुरुषार्थपरमात्मस्वरूपस्यैव स्वसृष्टव्यष्टिसमष्टिरूपसर्वोपाधिषु प्रविष्टस्य जीवभावमत्यन्तहितकारिमातृवत्तात्पर्येणोपदिशत्सु सत्सु कथं तस्य तद्विरुद्धविकारादिभावो भवेत् । न चान्तर्यामिभावेनैव परमात्मनः प्रवेशोऽभिहितो न जीवभावेनेति सांप्रतम् । प्रविष्टस्य प्राणन्नेव प्राणो नाम भवतीत्यादिश्रुत्या प्राणनादिव्यापारवत्त्वप्रतिपादनविरोधात् । अत एव चोपमा सूर्यकादिवदि-

Digitized by Google

त्याद्यधिकरणोक्तन्यायविरोधाच्च श्रुतितो जीवस्य परेणात्यन्ताभेद एव वास्तवो विपरीतं त्वाविद्यकमिति स्थितमित्यर्थः ॥ ११ ॥

मू० ॥ प्रत्यग्विवस्तु यदिहास्ति निजस्वरूपा-
दप्रच्युतैकरससंविदधीनमस्य ॥
प्रत्यग्वितास्फुरणमित्यवगत्य तच्च
तत् कल्पितं सकलमाकलयानुमानात् ॥ १२ ॥

टी० ॥ इदानीं युक्तितोऽपि जीवस्य ब्रह्मात्मतैव वास्तवीत्याह । प्रत्यगिति । भिन्नो जीवः किं स्वतो जडो विकारी च, किं वा कूटस्थचिदात्मा । आद्ये निजस्वरूपात् कूटस्थचैतन्यात् प्रत्यग्व्यतिरिक्तं जडं विकारि च यद् बुद्ध्यादि वस्त्विह व्यवहारदशायामस्ति तस्योक्तरूपस्य यत् प्रत्यग्वित्वस्फुरणं तत् कूटस्थैकरससंविद्रूपसाक्ष्यधीनमिति नियमावगमाज्जीवस्यापि तथात्वावगमेन दृश्यत्वमपरिहार्यं स्यात् । तथा च तस्य बुद्ध्यादिसहितस्य साक्षिणा वास्तवसंबन्धानिरूपणाद्रज्जुसर्पादिवत्तत्र साक्षिण्यविद्याकल्पितत्वमनुमानादापद्येत, न चेतदिष्टम् । न हि तत्त्वबोधाधीनमुक्तिभाजो जीवस्य स्वरूपं कल्पितमिति कैश्चिदुपेयते । द्वितीये तस्य कूटस्थचिद्रूपब्रह्मणो भेदे मानाभावादेको देव इत्यादिश्रुतिविरोधाच्च न सत्यभेदावकाश इति भावः ॥ १२ ॥

मू० ॥ चैतन्यवस्तुविषयाश्रय एव मोहो
नाद्वैतवस्तुविषयाश्रयकोऽप्रतीतेः ॥
बुद्ध्यादिवेष्टितचितो न तमस्वितेति
ब्रह्माश्रयत्वमुदितं तमसः पुरस्तात् ॥ १३ ॥

टी० ॥ ननु जीवब्रह्मणोरत्यन्ताभेदे ब्रह्मणोऽपि स्वगोचराज्ञानाश्रयतया संसारित्वं स्यादित्याशङ्क्य, किं ब्रह्मशब्देन चिन्मात्रं विवक्षितमुत जगदुपादानत्वादिविशिष्टं चैतन्यमिति विकल्पमभिप्रेत्याद्यमङ्गीकरोति । चैतन्येति । द्वितीये तस्य चिन्मात्रतया तदाश्रयत्वादिसंभवेऽपि जीवव्या-

कृताविद्याकेश्वरत्वरूपेण नाज्ञत्वादिसंभव इत्याह । नाद्वैतेति । तर्हि ब्रह्मैव संसरतीत्यादि कथमुक्तमित्याशङ्क्य, बुद्ध्याद्युपहितचैतन्यस्य तदनाश्रयत्वादित्यभिप्रायेणैतदुक्तमित्याह । बुद्ध्यादीति ॥ १३ ॥

मू० ॥ ब्रह्माश्रयं न हि तमोऽनुभवेन लभ्यं
नाप्यागमान्न च किमप्यपरं प्रमाणम् ॥
ब्रह्माश्रयत्वविषयं तमसस्ततश्च
प्रत्यक्प्रकाशविषयाश्रयमेतदस्तु ॥ १४ ॥

टी० ॥ जीवस्यात्मेश्वररूपेऽज्ञत्वाद्यभावं मानाभावेन प्रपञ्चयति । ब्रह्माश्रयमिति । अनुभवेन प्रत्यक्षेण । तमसो ब्रह्माश्रयत्वविषयमिति प्रमाणविशेषणम् । परिशेषात् स्वप्रकाशचिन्मात्राश्रयविषयत्वमज्ञानस्योपेयमित्याह । ततश्चेति ॥ १४ ॥

मू० ॥ जीवत्वमेव तु तदाश्रयमध्यपाति
नेच्छन्ति युक्तिकुशला न हि युज्यते तत् ॥
अज्ञानमेव खलु तत्र तमस्तमः स्या-
च्चैतन्यमस्तु पुनरस्तु न तद्विरोधः ॥ १५ ॥

टी० ॥ ननु जीवत्वमेवाज्ञानाश्रयतावच्छेदकमुपेयं न तु चिन्मात्रत्वं जीवश्चेश्वरस्यापीतरथाऽज्ञत्वादिदोषप्रसङ्गादतो जीवाश्रितैवाविद्या ब्रह्मविषयेति, नेत्याह । जीवत्वमेवेति । तदाश्रयमध्यपाति, अज्ञानाश्रयविशेषणमिति यावत् । न ह्यज्ञानाश्रयत्वमात्रमज्ञत्वं रज्जुतत्त्वबोधदशायां कालान्तरभाविसर्पादिभ्रमहेत्वज्ञानशालिनोऽपि चैत्रस्य तत्राज्ञत्वाभावात्, तदा तस्य रज्जुतत्त्वावारकत्वाभावात्, तदाश्रयस्यापि नाज्ञत्वमिति चेत्तर्हि ब्रह्मणश्चिद्रूपतयाऽविद्याश्रयत्वेऽपि सर्वज्ञत्वसर्वनियन्तृत्वादिरूपे श्रुत्यादिसिद्धत्वात्तत्प्रत्यज्ञानस्य वस्त्वावारकत्वायोगात्तत्राज्ञत्वभ्रान्तत्वादिशङ्का दूरापास्ता । जीवस्य तु स्वात्मानं प्रति वस्त्वावारकाऽविद्याभिमानित्वादज्ञत्वादिव्यवस्थाऽज्ञानस्य चिन्मात्राश्रयत्वपक्षेऽप्युपपद्यते, एतदभिप्रेत्योक्तं युक्तिकुशला इति । परमते जीवत्वस्याश्रयविशेषण-

Digitized by Google

त्वेऽनुपपत्तिं प्रतिज्ञापूर्वकमाह । न हीत्यादिना । तज्जीवत्वमज्ञानाधीनस- त्ताकत्वादज्ञानमेव, तथा चाज्ञानस्य तद्विशिष्टाश्रयत्वे स्वाश्रितत्वमपि स्यात् तच्च विरुद्धम् । न च जीवत्वस्याज्ञानाश्रयोपाधित्वाभावान्नदोष इति वाच्यम् । तस्य चिन्मात्रधर्मत्वे मतभेदयोगाद्विवादः, अतिरिक्तधर्मत्वे च तस्यातिरिक्तस्य मुक्त्यन्वयित्वमपि स्यात्, न च तदोपेयते, शुद्धचैतन्यस्य तु तदाश्रयत्वे न कोऽपि विरोध इत्यर्थः ॥ १५ ॥

मू० ॥ कर्मेन्द्रियाणि खलु पञ्च तथाऽपराणि
बुद्धीन्द्रियाणि मनआदिचतुष्टयं च ॥
प्राणादिपञ्चकमथो वियदादिकं च
कामश्च कर्म च तमः पुनरष्टमी पूः ॥ १६ ॥

टी० ॥ एवमविद्याश्रयचिन्मात्रस्याविद्याप्रतिबिम्बरूपेण तदाकृत- निरुपाधिस्वरूपत्वादस्य जीवत्वं चेत्युक्तम्, तस्यैव नानाविधदुःखादि- मत्त्वरूपसंसरणं तु मोहकल्पितपुर्यष्टकयोगादिति पुरोक्तम्, तत्र किं तत् पुर्यष्टकमिति वीक्षायामाह । कर्मेन्द्रियाणीति । वचनादानगमनविस- र्गानन्दरूपक्रियाऽसाधारणकारणानि कर्मेन्द्रियाणि पञ्च खलु प्रसिद्धानि, उक्तक्रियारूपकार्यलिङ्गानुमानैस्तेषां प्रसिद्धेः । सत्स्वपि तत्तदिन्द्रियाधाराव- यवेषु तेषामभावादेव मूकादिषु वचनादिक्रियाभावदर्शनात् । तानि च व्यष्टिसमष्ट्यात्मकान्येको गण एका पुरी, पुरवत् स्वामिनो भोगहेतुत्वात् । अपराणि शब्दस्पर्शरूपरसगन्धोपलब्ध्यसाधारणकारणानि श्रोत्रत्वक्चक्षूर- सनाघ्राणाख्यानि तथा पञ्च प्रसिद्धानि सोऽपि गणो द्वितीया पुरीत्येवम- ग्रेऽपि द्रष्टव्यम् । एकमप्यन्तःकरणं मनोबुद्धिरहंकारश्चित्तमिति संकल्पा- ध्यवसायाभिमानस्फूर्तिरूपवृत्तिभेदेनानेकधोच्यमानमेको गणः । एवमाध्या- त्मिक एकोऽपि वायुः श्वासप्रश्वासादिवृत्तिभेदेन प्राणापानव्यानोदानस- मानशब्दैः पञ्चधोच्यमान एको गणः । एवमपञ्चीकृतभूतकार्यं लिङ्गदेहं भोगोपकरणं गणचतुष्टयात्मना निर्दिश्य स्थूलभूतैः सह तत्कार्यं भोगायतनं भोग्यांश्च विषयानेकीकृत्यैकं गणमाह । अथो इति । वियदादेरुक्तवैलक्षण्या-

र्थोऽयं निपातः । इदानीं संसारे मुख्यं प्रयोजकं कार्यकारणरूपं गणद्वय-
माह । कामश्च कर्म चेति । उक्तप्रश्नपूरणीयां निदानमज्ञानमेवाष्टमपुराकाञ्-
क्षायां तत्त्वेन गृहाणेत्याह । तम इति । एवं च तत्त्वबोधादविद्यानिवृत्त्या
सर्वसंसारोपशम इति भावः ॥ १६ ॥

मू० ॥ विद्या च विश्वविषयाऽनुभवोत्थपूर्व-
प्रज्ञा च कर्मवचसैव तु संगृहीते ॥
बन्धप्रयोजकतया सदृशत्वहेतो-
रेकत्र च श्रुतवचस्युपसंग्रहेण ॥ १७ ॥

टी० ॥ ननु तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेतिश्रुतौ वि-
द्यापूर्वप्रज्ञयोरपि संसारहेतुत्वप्रतिपत्तेः कथं पुर्यष्टकस्यैवोक्तस्य तद्धेतुत्वम्,
कथं वा विद्याहेतुके तस्मिन्नविद्याया हेतुत्वमिति तत्राह । विद्या
चेति । द्वितीयाऽऽशङ्कानिराकरणाय विशिनष्टि । विश्वविषयेति । नात्र पर-
ब्रह्मविद्या विद्यापदेनोपात्ता, इति नु कामयमान इति संसारप्रकरणं
समाप्य, अथाकामयमान इत्यादिना प्रकरणान्तरेण परब्रह्मभावस्यैव पर-
ब्रह्मविद्याफलस्य वक्ष्यमाणत्वात् । किं तु वक्ष्यमाणचातुर्विध्यमाविद्यक-
प्रपञ्चगोचरज्ञानमिह विद्यापदेनोपात्तमिति तत्फलसंसारस्याविद्याहेतुत्वं
नानुपपन्नमित्यर्थः । पूर्वानेकजन्मसु संचितभोगवासना पूर्वप्रज्ञापदवाच्यानि-
विष्टकर्मपदेनोक्तविद्यापूर्वप्रज्ञयोरप्यजहल्लक्षणया संगृहीतत्वात् त्रयाणा-
मेकगणत्वस्य विवक्षितत्वान्नचोद्यावकाश इत्यर्थः । कर्मवचसा तयो
र्लक्षणायां मुख्यार्थसम्बन्धं स्वगतं प्रमाणद्वारकं चाह । बन्धप्रयोजकत-
येति ॥ १७ ॥

मू० ॥ तं विद्येति हि वाक्यमेकमिह च स्पष्टं त्रयं कीर्तितं
तस्मात् कर्मवचस्तयोरपि भवेत् संग्राहकं कारणात् ॥
विद्या चात्र चतुर्विधाप्यभिमतैवात्मिका कर्मवत्
संस्कारोऽपि तथा चतुर्विध इति ज्ञेयस्तथा संभवात् ॥ १८ ॥

टी० ॥ किं तदेकं श्रुतिवचो येन विद्यादित्रयं बन्धहेतुतयोक्त-मिति वीक्षायामाह । तं विद्येति । तस्मात् कारणादिति संबन्धः । ननु पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति शुभाशुभकर्मण एव संसार-हेतुत्वप्रतिपत्तेः कथं विद्यापूर्वप्रज्ञयोस्तद्धेतुत्वमित्याशङ्क्य तत्र कर्मैव तद्धे-तुरित्यश्रवणादेतद्वचनबलात् त्रयाणामपि संसारहेतुत्वमविशिष्टमिति वदन् तेषु चातुर्विध्यमाह । विद्या चेत्यादिना । का चन विद्या शास्त्रवि-हिता देवताद्युपासनरूपा, अपरा तन्निषिद्धाऽसच्छास्त्रविषया, अन्या विहि-तसमा विधिं विनापि यदृच्छयोपपन्ना गङ्गादिदर्शनरूपा श्रेयस्करी, का चिन्निषिद्धसमा बीभत्सितशवादिविषया सद्यो दुःखकरीति विद्यायाश्चा-तुर्विध्यम् । एवं कर्मणां यागवधाहारविहारादिरूपाणामपि विहितप्रतिषि-द्धाऽविहिताप्रतिषिद्धभेदेन चातुर्विध्यं द्रष्टव्यम् । एवं पूर्वप्रज्ञाख्यसंस्कारो-ऽपि मलानुभवाद्यनुरोधेन चतुर्विधो बन्धहेतुरित्यर्थः ॥ १८ ॥

मू० ॥ पुर्यष्टकं तदिदमप्यभवद्धि लिङ्गं
तेनोच्यते तदपि लिङ्गगिरा क्व चित्तु ॥
पुर्यष्टकं न खलु लिङ्गगिरोऽभिधेयं
मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम् ॥ १९ ॥

टी० ॥ ननु विद्यादीनां त्रयाणां संसारहेतुत्वेऽपि तद्द्वारा लिङ्ग-स्यैव तद्धेतुत्वमुपेयं न पुर्यष्टकस्य, तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्येत्यादौ लिङ्गस्यैव तद्धेतुत्वश्रुतेरित्याशङ्क्य स वा अयमात्मा ब्रह्म विज्ञानमय इत्यादिश्रुतौ भूतभौतिकादिसर्वमयत्वप्रतिपत्तेस्तदेकदेश-वाचिलिङ्गश्रुतिर्लक्षणया पुर्यष्टकविषया नेतव्येत्याह । पुर्यष्टकमिति । तु-शब्दः शङ्काव्यावृत्त्यर्थः । पुर्यष्टकमेव तदभिधेयं किं न स्यात् कृतं लक्ष-णयेत्याशङ्क्य, लिङ्गयति नियमेन स्वधर्मं ज्ञापयति तद्विलक्षणात्मनीति व्युत्पत्त्या तस्य लिङ्गपदाभिधेयत्वायोगाद् वक्ष्यमाणसप्तदशकगण एव तद-भिधेय इत्याह । पुर्यष्टकमिति ॥ १९ ॥

मू० ॥ इह तावदष्टदशकं मनसा

सह बुद्धितत्त्वमथ वायुगणः ॥

इति लिङ्गमेतदमुना पुरुषः

खलु संगतो भवति जीव इति ॥ २० ॥

टी० ॥ किं तत् सप्तदशात्मकं मुख्यं लिङ्गमिति वीक्षायामाह । इह तावदिति । इह पुर्यष्टके, तावत् प्रथमोक्तम् । कर्मबुद्धीन्द्रियदशकं चित्ताहंकारौ बुद्धावेकीकृत्य मनोबुद्धिरित्यन्तःकरणद्वयम् । प्राणादयो वायवः पञ्चेत्येतत् सप्तदशात्मकं मुख्यं लिङ्गम् । अमुना प्राणप्रधानेन लिङ्गेनावच्छिन्नश्चिदात्मा जीवपदवाच्य इत्यर्थः ॥ २० ॥

मू० ॥ न पुराष्टकेन रहितस्य तव

क्व चिदस्ति संसरणदुःखयुजा ॥

न पुराष्टकेन सहितस्य तथा

क्व चिदस्ति दुःखविगमश्च तव ॥ २१ ॥

टी० ॥ ननु हिरण्यगर्भादीनामधिकारिपुरुषाणां सत्यपि पुर्यष्टके दुःखस्वरूपसंसाराभावात् कथं तस्य तद्धेतुत्वमित्याशङ्क्य, तेषामपि सोऽबिभेत् स वै नैव रेमे, इन्द्रोऽप्याप्येव देवानेतद्भयं ददर्शेत्यादिश्रुतिभिर्भयाऽरत्यादिप्रतिपादनात्तस्य तद्धेतुत्वं निरपवादमित्यभिप्रेत्य सर्वेषामपि शरीरत्रयात्मकपुर्यष्टकाभावे संसाराभाव इत्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति श्रुत्युक्तं व्यतिरेकमाह । न पुराष्टकेनेति । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुत्या सति पुर्यष्टकात्मके शरीरयन्त्रे संसारो नास्तीति न किं त्वस्त्येवेत्यन्वयोऽप्युक्तः । ततोऽपि तस्य तद्धेतुत्वमुपेयमित्याह । न पुराष्टकेन सहितस्येति ॥ २१ ॥

मू० ॥ तव नित्यमुक्तसुखचिद्वपुषो

न कदा चिदस्ति पुरसंगमनम् ॥

तव मायया विरचितं सकलं

पुरसंगतिप्रभृतिकं वितथम् ॥ २२ ॥

Digitized by Google

टी० ॥ तर्हि पुर्यष्टकसंबन्धस्यात्मन्यनन्यप्रयुक्तत्वेन स्वाभाविकत्वात्तदधीनसंसारस्तत्र वास्तवः स्यादित्याशङ्क्याह। तवेति। स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्, स यत्तत्र किं चित् पश्यत्यनन्वागतस्तेन भवति, असंगो ह्ययं पुरुषः, अप्राणो ह्यमनाः शुभ्रः, स एष नेति नेत्यात्मेत्यादिश्रुतिभिर्नित्यमुक्तादिरूपात्मनो वस्तुतः सर्वोपाधिरहितत्वश्रवणात्तस्य पुर्यष्टकान्वयो वास्तवो न शङ्कनीयः। न चोक्तवाक्यजातं परमात्मविषयमिति वाच्यम्। तथापि ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा इमे त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिभिर्जीवस्यापि नित्यमुक्तादिरूपब्रह्ममात्रत्वप्रतिपत्तेस्तस्य पुर्यष्टकायोग उपेय इत्यर्थः। कथं तर्हि जीवे तदन्वयानुभवः, कथं वा पुराष्टकेन सहितस्येतिप्रागुक्तमित्याशङ्क्याह। तव माययेति। उक्तरूप आत्मनि स्थूलसूक्ष्मशरीरद्वयस्य भूतभौतिकात्मनोऽनिर्वचनीयमायाविलसितत्वात्तस्य तदन्वयो मिथ्यैवावभासते, असङ्गाद्वितीयस्वप्रकाशचिदात्मनि मायान्वयस्यापि वास्तवस्यायोगात् सोऽपि तदधीनसत्ताकतया तत्प्रयुक्तो न स्वाभाविक इत्यर्थः ॥ २२ ॥

मू० ॥ मलिनं नभो न हि कदा चिदभूद्
विमलं कदा चिदभवन्न नभः ॥
उभयं नभस्यभवदेवमिह
त्वयि नित्यमुक्तचितिसंसरणम् ॥ २३ ॥

टी० ॥ आत्मनो नित्यमुक्तत्वे यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः, न स तत् पदमाप्नोति संसारं चाधिगच्छति, यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः, स तु तत् पदमाप्नोति यस्माद् भूयो न जायत इति श्रुतिप्रतिपादितं बन्धमुक्तिकादाचित्कत्वं कथमित्याशङ्क्य, व्यावहारिकदृष्टिसिद्धबन्धमोक्षव्यवस्थाविषयेयं श्रुतिः, तत्त्वतस्तु न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः, न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेत्यादिश्रुतिपर्यालोचनया न बन्धो न वा मोक्षस्तस्यास्तीत्येतद् दृष्टा-

Digitized by Google

त्मेनाह । मलिनमिति । मालिन्यं वैमल्यं वा नभसि कदाचिदपि वस्तुतो नाभूत्तथापि व्यवहारदृष्ट्या दुर्दिनादावुभयमभूत् । एवं ब्रह्मभूते त्वयि संसरणं तन्निवृत्तिश्चेत्यर्थः ॥ २३ ॥

मू० ॥ न हि कल्पनाविरचितं वितथं
परमार्थवस्त्ववितथं स्पृशति ॥
परमार्थवस्तु च तथा तमसा
परिकल्पितं न किमपि स्पृशति ॥ २४ ॥

टी० ॥ नन्वाविद्यकोऽपि बन्धो यदाऽस्ति तदाऽऽत्मनो बन्धस्य च परस्परसंबन्धस्यावश्यकत्वेन तत्र बन्धाभावायोगात् कथं नित्यमुक्तता तस्येत्याशङ्क्याह । न हि कल्पनेति । कल्प्यतेऽनयेति कल्पनाऽनिर्वचनीयाऽविद्या तत्कार्यमिति यावत् । येन संबन्धेन यत्र यत् प्रतीयते तेन संबन्धेन तत्र तस्य त्रैकालिकनास्तिताया एव मिथ्यात्वलक्षणत्वाद् बन्धवैतथ्यस्य चोपपादितत्वादात्मनि बन्धदशायामपि बन्धात्मनोरितरेतरस्पर्शाभावात्तस्य नित्यमुक्ततोपपद्यत इत्यर्थः ॥ २४ ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकेन श्रीत्रिवेदहरिनाथशर्मणा ।

श्रौतपदार्थनिर्वचनम्

अथाग्निष्टोमसम्बन्धिपदार्थनामान्युच्यन्ते ।

(Continued from page 688. Vol. VIII.)

३०४ अध्वर्युः अग्निर्मूर्द्धादिव इत्येकामाहुतिं द्वे मिन्दाहुती व्याहृतीश्च हुत्वा ऽऽह । प्रशास्तः प्रसुहि । तेन सर्पतेत्युक्ते सर्वे यथाप्रवृत्तं निःसर्पन्ति । सन्निष्ठुते प्रातःसवनम् । अथ प्रातःसवनमित्यारभ्यैतदन्तं कर्म प्रातःसवनमित्युच्यते ॥

३०५ अथ माध्यन्दिनम् । उत्तरार्धे चषाल्ते । अध्वर्युः प्राङ्गाय-न्नाह । अभिषोतार एतदाहूयत ग्रावस्तुतमेहि यजमान । अयं ग्रावस्तुत्प्रेष उच्यते ॥

३०६ यजमानाभिषोतृभिश्च सह पूर्वया द्वारा हविर्धानं प्रविश्य होतृ-चमसे आधवनीयापोवनीय चर्मणि निधाय ताः प्रेक्षमाणं यज-मानं वाचयति । निग्राभ्यास्थेत्यादि पूर्ववत् । ता यजमानाय प्रदाय चतुर्णामन्यतमं ग्रावाणमादत्ते । देवस्य त्वेत्यादिमन्त्रेण ग्रावासीत्यादिमन्त्रेणाभिमन्त्रयते । इदं माध्यन्दिनसवनीय-प्रेक्षणवाचनादि ॥

३०७ ग्रावाणं चर्मणि प्राक्शिरसं निधाय ग्राव्ण उपरि राजानं विस्रस्य प्रातःसवनवन्निर्मिमीते । इन्द्राय त्वेति पञ्चभिः पञ्चकृत्वस्तू-ष्णीम् एकयैकयोत्सर्गं दशकृत्वो मिमानो राजानं सर्वं मिमीते । इदमवशिष्टसोमार्धमानम् ॥

३०८ अद्भिरभ्युक्ष्य ग्रावस्तुते राज्ञ उष्णीषं ददाति । इदं ग्रावस्तुते उष्णीषदानम् ॥

३०९ यजमानः अद्भिरभ्युक्ष्य राजशेषो ऽध्वर्यवे प्रयच्छति । अध्वर्युः पूर्ववदुपसृजति । सम्प्रयौति । तिरश्चर्मफलके अभिमृशति । यजमानं वृद्धीर्वाचयति । अभिषोतारः प्रातःसवनवत्पर्युप-विशन्ति । अध्वर्युः आहरोपसृज, इत्याह । उपर्यर्धे होतृ-चमसेंऽशून् परिप्लावयन्ति । प्रागपागित्यादिमन्त्रेण । अंशूंश्च-र्मणि निधाय होतृचमसस्था अपो राज्ञि प्रक्षिप्य राजानं विभज्याकृष्य । इहा३ इहा३ इहा३ इत्युक्त्वा यावद्रसनिस्रा-वमपरिमितमभिषुण्वन्ति । आहरोपसृजेत्यादि । उन्नेता आध-वनीयादुदञ्चनेन सम्भरणीये उपसृजति । प्रागपागित्यादिसम्भ-

रणीयेंऽशून् परिप्लावयन्ति । अंशून्निधाय सम्भरणीयजलेन राजानमुपसिच्य विभज्याऽऽकृष्याह । इहाऽ३ इहाऽ३ इहाऽ३ इत्युक्त्वा ग्रावाणमूर्ध्वमूत्क्षिप्य नीचैः पातयन्तीत्यादिक्रीडारूपेणाभिषुण्वन्ति अपरिमितं यावद्रसनिस्रावम् । पुनराहरोपसृजेत्यादि । होतृचमसे तूष्णीं अंशून् परिप्लावयन्ति । अभिषुत्य राजानं हस्तेन निष्पीड्य सम्भरणीये राजानं सम्भृत्यान्तरेणोषे उन्नेत्रे प्रयच्छति । उन्नेता आधवनीयापोसम्भरणान्तरे ऽवनीय ऽऽधवनीये पवित्रं वितत्य सम्भरणीमवनयति । एष एकः पर्यायः । अम्भृणान्तरस्था आधवनीयापो होतृचमसे ऽवनीय श्वात्रास्थेत्यादि । एवं द्वितीयमेवं तृतीयम् । तृतीयपर्यायस्य तृतीये ऽभिषवे इहाऽ३ इत्यस्य स्थाने बृहत् बृहत् बृहत् ऋजीषं चर्मणि निधाय सम्मुखान् ग्राव्णः कृत्वा ग्रावमुखे ऋजीषं चतुर्धा कृत्वा व्यपोहति । उद्गातृभ्यः प्राह । सोमोऽभिषुतः इति । अयं माध्यन्दिनसवनीयाभिषवः ॥

३८० तेऽद्रोणकलशे निहिते दशापवित्रे वितते । उन्नेतारमाह । अप्रमत्तः सन्ततमानयोपांशुग्रहान् ग्रहीष्यामि इति । उक्थ्यग्रहणपर्यन्तं स तथा करोति । अध्वर्युः शुक्रपात्रमादाय धारायां गृह्णाति । अयं वेन० रेहन्ति । उ०र्षण्डा०मि । इति । परिमृज्य सादयति । एष ते योनिर्वीरतां पाहि । इति । तथा मन्थिपात्रे पूर्ववत् । बर्हिषी अन्तधाय सक्तुभिः श्रीत्वा ऽपोद्धृत्य बर्हिषी परिमृज्य सादयति पूर्ववत् । दक्षिणातुपात्रे गृह्णाति । मरु० हुवेम । उप०मरुत्वते०मि, इति । सादयति । एष०निरिन्द्राय त्वा मरुत्वते । उत्तरतुपात्र०ति । इन्द्रम०सुयज्ञाः । उप०मि । इति । परि०यति । एष०त्वते । इति । आग्रयणस्थं

सोमं पात्रान्तरे ऽवनीय तेनोदश्चनेन चोपरिष्टाद्दशापवित्रे ऽवनीय तिसृणां धाराणामधस्तादाग्रयणं गृह्णाति । पूर्ववत् सादयति । इदं ग्रहेषु माध्यं०नीयसोमग्रहणम् ॥

३८१ द्रोणकलशमुपर्यद्रुं कृत्वा पयसा हिरण्येन सक्तुभिः क्रमेण श्रीत्वा परिप्लवाणां प्राश्य दृप्सानुमन्त्रणम् । उन्नेतारमाह । अरिक्तं पूतभृतं कुरु पवमानस्य ग्रहान् ग्रहीष्यामि । इति । उन्नेता पूतभृति पवित्रं वितत्याऽऽधवनीयाद् द्रो वा त्रीन्वोदश्चनानयति । अध्वर्युः । अरिक्तो पूतभृदाधवनीयो पयसा सक्तुभिर्घृतेन च श्रीत्वा द्रोणकलशमभिमृशति । उप०मीन्द्राय त्वा, इति । अनेनेव मन्त्रेणाधवनीयं पूतभृतं च । उन्नेतारमाह । उन्ने०न्यन्नुतात् । इति । उन्नेता ऽवकाशोपस्थानान्ते तथा करोति । अध्वर्युः अप उपस्पृश्य बर्हिषी आदाय निःसर्पति । उद्गात्रादिषु प्रातःसवनवत्समन्वारब्धेषु आहवनीये स्रुवाहुतिं जुहोति । विश्वे देवा मरुत०स्याम स्वाहा । इति । यथावेदमितरे । दृप्साहुती प्रातःसवनवद्यजमानः । एतयेव प्रतिप्रस्थाता । अध्वर्युः पूर्ववत्पवमानार्थे सदः सर्पति । इदं माध्यन्दिनपवमानार्थसदःप्रसर्पणम् ॥

३८२ पूर्ववत् बर्हिषी प्रयच्छति । पूर्ववदुपाकरणं जपति पवमानस्य पञ्चम्यामृचि प्रस्तुतायां यजमानं वाचयति । सुपर्णोऽसि०रय, इति । चतुर्होतारं व्याख्याय समाप्ते साम्नि सम्प्रैषमाह । अग्नीदग्नीन्विहर बर्हिस्तृणाहि पुरोडाशाँ२ अलङ्कुरु प्रतिप्रस्थातर्दधिघर्माय दध्याहर । इति । अयं दधिघर्मार्थदध्याहरणप्रैषः ॥

३८३ अथ उपसृश्य । एहि यजमान । तेन सह पूर्वया द्वारा हविर्धानं प्रविश्य समस्तं राजानं प्रातःसवनोक्तमन्त्रेणोपतिष्ठते । ततः प्रातःसवनवदवकाशैरुपतिष्ठेते अध्वर्युयजमानौ । उन्नेता प्रातःसवनवत्पूतभृति राजानमवनीयाधवनीयं न्युब्जति । प्रातःसवनवत् धिष्ण्यव्याघारणं पृष्ठ्यास्तरणं च । अध्वर्युः दधिघर्मस्यादौ घर्मोक्तां पूर्वां शान्तिं पठति । ततो हविर्धानयोर्मध्ये उपविश्य प्रतिप्रस्थाता दधिघर्मार्थमाहृतं दध्यवेक्षते ज्योति०दुग्धम् । इति । इदमाहृतदध्यवेक्षणम् ॥

३८४ चमसे बर्हिषी अन्तर्धाय दधि गृह्णाति । यावती०म्यस्तृतम् । इति । अपोद्धृत्य बर्हिषी दध्यवेक्ष्य मन्त्रं पठति । वाक् च त्वा० यतं कृणु । इति । होतारमाह । होतर्वदस्व यत्ते वाद्यम् । इति । अयं होतृवाद्यप्रैषः ॥

३८५ चमसमादाय उपोत्तिष्ठन्नाह । श्रातꣳहविः । इति । अत्याक्रम्याश्राव्याह । दधि घर्मस्य यज । इति । वषट्कृते जुहोति । यमिन्द्रमा०तेभ्यःस्वाहा । इति । अयं दधिघर्मप्रचारः ॥

३८६ अनुवषट्कारे हुत्वा चमसं होत्रे हरति । होत्रध्वर्युप्रतिप्रस्थात्राग्नीत्प्रस्तोतृयजमानाः क्रमेण परस्परमुपहूय प्राणभक्षं भक्षयन्ति । मयित्य०यामि । इति । यजमानः प्रत्यक्षम् । अयं दधिघर्मभक्षः ॥

३८७ निर्णिज्य पात्रं प्रयच्छति । तूष्णीं शाखां मेक्षणं च प्रहृत्योपवेषं निरस्यति । आग्नीध्रः भिन्नपात्र्यां पुरोडाशं पूर्ववत्सवनीयांश्चोद्वास्य खरे सादयति । अध्वर्युः यजमानेन । आसन्नाभिमर्शने कृते आग्नेयेन पशुपुरोडाशेन प्रचर्य जुहूपभृतोरुपस्तृणान

आह । माध्यन्दिनस्य सवनस्येन्द्राय पुरोडाशानामवदीयमाना-
नामनुब्रू३हि । इति । सवनीयानां द्विर्द्विरवद्यति । अभिघार-
यति । प्रत्यनक्ति । उपस्तृणाति पुरोडाशस्यावदाय सवनीयानाम-
वद्यति । द्विरभिघारयति । न प्रत्यनक्ति । प्रथमं जुहूपभृतो-
रुपस्तीर्य पुरोडाशस्योपभृत्यप्युपस्तीर्य नाभिघार्यैव तस्योपरि
सवनीयानामवदानं जुह्वामुपस्तरणं वा । माध्यं० डाशान्प्रस्थि-
तान् प्रेष्य इति प्रेष्यति । ततः स्विष्टकृतं हुत्वा प्रातः-
सवनवद्धोतुरग्रे इडायाश्च निदधाति । अयं माध्यन्दिनसवनीय-
प्रचारः ॥

३८८ सर्वेषां सवनीयानां प्रातःसवनएव निर्वापे पशुपुरोडाशेन-
प्राशित्रान्तेन प्रचर्य माध्यन्दिनीयैः प्रचर्य प्राडायन्नाह । उन्नी०
हि होतुश्चमसमनून्नयध्वमुभयतः शुक्रान् कुरुध्वमच्छावाकस्य
चमसाध्वर्योऽपि त्वं चमसमुन्नयस्व प्रतिप्रस्थातश्चतुर्भिर्मा शक-
लैः प्रोक्षिताऽप्रोक्षितैः प्रत्युपलम्बस्व । इति । अयं माध्यं०
नीयचमसोन्नयनप्रैषः ॥

३८९ पूर्ववच्छुक्रामन्थिप्रचारः । सर्वांश्चमसानुन्नयन्ति । आह ।
माध्यन्दिनस्य सवनस्य निष्केवल्यस्य भागस्य शुक्रवतो०प्रेष्य ।
इति । अयं माध्यं०नीयशुक्रामन्थिप्रैषः ॥

३९० नेष्टृचमसहोमानन्तरं अच्छावाकचमसहोमः । अयं माध्यं०नी-
यप्रस्थितयाज्याप्रचारः ॥

३९१ षड्ढोषाः संयाज्यायेण होतारमुपविश्याऽयाडग्नीदित्यादि । इडो-
पह्वानानन्तरं प्राशित्रहरणं तूष्णीमन्तर्वेदि प्रणीतानिनयनम् ।
इडोपहूतांश्चमसान् भक्षयन्ति । नेष्टुरनन्तरमच्छावाकः । प्रातः-
सवनवत् । भक्षेहीति मन्त्रे रुद्रवद्गणस्येति माध्यन्दिनस्य सव

नस्य त्रिष्टुप् छंदस इति यथास्थानमूहः । प्रातःसवनवन्नाराशंससादनं यजमानस्य हविःशेषप्राशनं पत्न्या हविष्यभोजनम् । अध्वर्युः सव्यवामपूर्वाज्यस्थों स्रुचं वाससस्तस्यान्तिमायां दशायां ग्रथितं हिरण्यशकलं चादाय यजमानमामन्त्र्य चात्वालोत्करयोर्मध्येन प्रविश्य यजमानेन सहेतरेणाग्नीध्रीयं सदश्च परीत्य पूर्वद्वारा शालां प्रविश्य शालामुखीयमाज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा ऋत्विक्षु समन्वारब्धेषु वाससा सम्प्रच्छन्नेषु वेसर्जनवद्वसनस्यान्तं स्रुग्दण्डे उपसङ्गृह्य हिरण्यं स्रुग्बिले धारयन् शालामुखीये जुहोति । उदुत्यमित्यृचा । पुनर्गृहीत्वा चित्रमित्यृचा । पुनर्गृहीत्वा ऽग्ने नयेत्यृचा आग्नीध्रीये । स्रुग्बिलाद्धिरण्यमुद्गृह्णाति । दिवं गच्छ सुवःपत । इति । अयं दक्षिणारम्भकहोम उच्यते ॥

३६२ पूर्वमेव चात्वालोत्करयोर्मध्येन प्रवेश्य सदो दक्षिणभागे दक्षिणास्थापिता भवन्ति । सदः शालामुखीययोः सद आग्नीध्रीययोश्चात्वालोत्करयोश्च मध्येनोदीचीं नीत्वा तत्रैकत्र स्थापयति । एतद्दक्षिणानयनमुच्यते ॥

३६३ ततो यजमानस्ताः प्रदक्षिणं पर्येति । रूपेणवो० वयः । इति । स्वीयकृष्णाजिनपुच्छेन दक्षिणाभूता गास्त्रासयित्वा विभजति । तुथोवो० अधिनाके । इति । तत्र वर्गप्रथमानामृत्विजां द्वादश द्वादश । द्वितीयानां षट् षट् । तृतीयानां चतस्रश्चतस्रः । तुरीयाणाम् । तिस्रस्तिस्रः । निष्क्रयस्याप्येवमेव विभागः । इदं दक्षिणाविभजनम् ॥

३६४ ततः सदसि गच्छति । एतत्ते अग्ने राध०नयन्तीः । इति ।

सदसः पुरस्तादासीनमात्रेयं ब्राह्मणं प्रत्येति । ब्राह्मणमद्य० सुधातु दक्षिणाम् । इति । किञ्चित् किञ्चिद्गृहीत्वा तं पृच्छति चि: । क आत्रेय इति । स द्विवारं अयमहमिति वदति । तृतीये त्वहमित्येव । यजमानस्तं सम्पूज्य हस्ते तस्मै हिरण्यं ददाति । चन्द्रमःऽहं । इति । यथासम्भवं वस्त्रादि च ददाति । आग्नीध्रीयं गत्वा ऽग्नीधे हिरण्यं दक्षिणाभागं ददाति । अग्नीद्यथाभागं दक्षिणां ते ददामि इति । एवं सदसि गत्वा ब्रह्मणे होत्रे उद्गात्रे च । हविर्धानं गत्वा ऽध्वर्यवे प्रतिप्रस्थात्रे च । चमसाध्वर्युभ्यस्तु क्रतुदक्षिणाभिन्नां यथासम्भवं दक्षिणां ददाति । पुनः सदो गत्वा प्रस्तोत्रे मैत्रा-वरुणाय ब्राह्मणाच्छंसिने ऽच्छावाकाय नेष्टृ उन्नेत्रे सुब्रह्मण्याय च दत्वा प्रसर्पकेभ्यो विद्याविशेषानुरूपं क्रतुदक्षिणाभिन्नां दक्षिणां दत्वा प्रतिहर्त्रे दक्षिणांशं तदीयं ददाति । प्रकृतिव-त्सर्वे प्रतिगृह्णन्ति । प्रतिग्रहमन्त्रे रुद्राय गा इत्यूहो विशेषः । इदं सौमिकदक्षिणादानमित्युच्यते ॥

३६५ अध्वर्युः यजमानमामन्त्र्य तेन सहाग्नीध्रीयं गत्वा चतुर्गृहीतेन स्रुचा आग्नीध्रीये जुहोति । यज्ञपतिमृषय० सृजतु विश्वकर्मा स्वाहा । इति । पुनस्तथैव जुहोति । घोरा ऋषयो०पा त्वस्मान् त्स्वाहा । इति । पुनर्जुहोति । अनन्यान् त्सो०-स्वस्तये स्वाहा । इति । ये भक्षयन्तो०विश्वकर्मा स्वाहा । इति । नमः पितृभ्यो०यिष्ट स्वाहा । इति अयं दक्षिणोत्तरवै-श्वकर्मणहोम उच्यते ॥

(शेषमग्रे)

॥ ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page* 652. Vol. VIII.)

स्मृतिप्रामाण्याधिकरणम् ।

सू० धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् ॥ १ ॥

कथंलक्षणो धर्म इत्येतदिह लक्षणार्थ इत्युक्तं, तत्र प्रथमे पादे चोदनाप्रामाण्यं सिद्धं, द्वितीये त्वर्थवादादेः, एवं कृत्स्नस्य वेदस्य प्रामाण्यमुक्तम्, इदानीं पौरुषेयीषु स्मृतिष्वाचारेषु च वैदिकपरिगृहीतेषु चिन्ता, यद्यपि चोदनाप्रामाण्यमप्रामाण्येऽपि स्मृतीनां न विहन्यते, तथाऽपि किंलक्षणो धर्म इति जिज्ञासाऽधिकारात् स्मृतिप्रामाण्यं लक्षणे संगतम्। नन्वप्रामाण्ये स्मृतीनां वेदस्यापि तत्सापेक्षत्वादप्रामाण्यं स्यात् "यां जनाः प्रतिनन्दन्ती"त्ययं मन्त्रो रात्रिदेवत्यकर्माङ्गत्वेन प्रतीयते, स्मार्त्ते च कर्मणि रात्रिर्देवतेति तदपेक्षस्य मन्त्रस्य तदप्रामाण्यादप्रामाण्येन तत्सामान्यादितरेषु तथात्वमिति सकलस्य वेदस्याप्रामाण्यं, तेन वेदप्रामाण्यसिद्ध्यर्थं स्मृतिप्रामाण्यमिति संगतिः। नैतदेवं, यदा हि स्मृतेरप्रामाण्यं तदा मन्त्रस्य स्मार्त्तकर्माङ्गत्वे किं प्रमाणं? न तावल्लिङ्गं, तस्य सामा[1]न्यसंबन्धप्रमाणसापेक्षत्वात्, नापि स्मृतिवाक्यं, तस्याप्रामाण्यात्, यद्यपि लिङ्गमात्रं विनियोजकं स्यात्, तथाऽपि फलवदङ्गत्वेनाफलस्य विनियोगात् स्मृत्यप्रामाण्ये च स्मार्त्तस्य कर्मणः फलवत्त्वाभावान्न तादर्थ्यं मन्त्रस्य येन सापेक्षता स्यात्, सत्यपि च मन्त्राप्रामाण्ये सकलस्याप्रामाण्यं कुतस्त्यं, न हि मन्त्रस्य स्वारसिकमप्रामाण्यं येन शब्दमात्रे स्यात्, अपि तु सापेक्षैकवाक्यताकृतम्।

१ तस्य सामान्यसंबन्धसापेक्षत्वादिति तु पुस्तकान्तरपाठः।

Digitized by Google

न च कृत्स्नस्य तदस्तीति कथमप्रामाण्यं, तस्माद्देवं संगतिः संभवतीति पूर्वोक्तैव संगतिर्ज्यायसी, धर्मप्रमाणचिन्ताऽधिकारात् स्मृतीनामपि तत्र प्रामाण्यं प्रतिपाद्यत इति, न चैवं चोदनैवेति प्रतिज्ञाव्याकोप, तन्मूलत्वेन तदन्तर्भावेन[1] चेतरेषां प्रामाण्यात्स्वातन्त्र्येण प्रामाण्याभावात्. तदिह किं स्मृत्याचाराणां धर्मे प्रामाण्यम्? उत ने? ति विचार्यते. तदर्थं च श्रुतिमूलत्वमेषां भ्रान्त्यादिमूलत्वं वेति विचारयितव्यं, तत्र 'प्रायेणानृतवादित्वात्पुंसां भ्रान्त्यादिसंभवात् । चोदनाऽनुपलब्धेश्च श्रद्धामात्रात्प्रमाणता" संभवद्भ्रमविप्रलम्भेषु पुरुषेषु न तावद्विचिकित्समेव प्रामाण्यं स्वध्यवसानम्, अतश्चाऽननुष्ठानात्फलतोऽप्रामाण्यमेव । किंच नैषां प्रत्यक्षादिमूलत्वेन प्रामाण्यं तेषां धर्माधर्मयोरप्रवृत्तेः, न च स्वातन्त्र्येण वेदवत् पौरुषेयत्वात्, न चोदनामूलत्वेन तदनुपलम्भात्, न ह्यनुपलभ्यमानाश्चोदनामूलत्वेन स्वप्रमेयं प्रतिपादयन्ति, न चासां प्रत्यक्षेणोपलम्भसंभवः, अनुच्चार्यमाणत्वात्. उच्चार्यमाणत्वे[2] च स्मृतिप्रणयनवैयर्थ्यं, प्राक् पठिता अपि संप्रति पुरुषक्षयादुत्सन्ना इति चेत् न, विकल्पासहत्वात्, यो ह्युत्सादं चोदनानां वदति स वक्तव्यः, किमेका काचिच्छाखा स्मार्त्तश्रुतिसंघातात्मिका पूर्वमासीत्सा चेदानीमध्येतृक्षयादुत्सन्नेति कल्प्यते? किंवा बह्वीषु शाखास्वितस्ततः श्रुतयः स्मृतिमूलभूताः पठिताः समुत्सन्नाः? इति, तत्र "सहस्रं सामशाखाः, एकशतमध्वर्युशाखाः, एकविंशतिशाखं बाह्वृच्यम्" इत्यादिशाखापरिमाणस्य परम्परया सर्वलोकस्मरणोत्रातोऽधिका शाखा संभावयितुं शक्यते, नापि पठ्यमानानामत्यन्ताऽवहिताध्येतृकाणां मध्ये कासांचिच्चोदनानामुत्सादसंभवः ।

न च संप्रत्यपि पठ्यन्त एव विप्रकीर्णाः स्मृतिमूलभूताः श्रुतय इति युक्तं, स्मृतिप्रणयनवैयर्थ्यादित्युक्तं, तस्य तावदिदानीमतीतकाले वा पठिताः श्रुतयः स्मृतीनां मूलं, नापि नित्यानुमेयाः, अन्धपरम्परान्यायात्, या हि चोदना न कदाचिदुच्चार्यते तस्याः सर्वपुरुषप्रत्यक्षादिप्रसराभावात् दुर्लभतरमस्तित्वम् ।

१ तदन्तर्भावेन वेति पाठान्तरम् ।

२ उच्चार्यमाणत्वे वेति पुस्तकान्तरपाठः ।

ननु स्मृतिलिङ्गवशेनानुमानं प्रसरत्येव सर्वेषां लिङ्गादिकल्प्यास्विव श्रुतिषु, विषम उपन्यासः, लिङ्गादयो हि सर्वपुरुषप्रत्यक्षविषयाः श्रुतिमन्तरेणानुपपद्यमाना युक्तं यत्तस्यां निश्चयमादधति. स्मृतिवाक्यरचना तु पौरुषेयी यदर्थविषयोपलभ्यते तद्विषयं[1] रचयितुर्ज्ञानं कल्पयति, अष्टकाकर्तव्यताविषयं च स्मृतिवाक्यमिति नूनमयमष्टकाकर्तव्यतां वेदेत्येतावन्मात्रं कल्प्यते न श्रुतिस्वरूपं, नापि श्रुतिज्ञानम्, एवमर्थज्ञाने स्मृतिकारस्य कल्पिते पश्चाद् ज्ञानलिङ्गात् ज्ञेयभूतार्थानुमानं, न श्रुतिकल्पनम् । एवं स्मृतिका[2]रान्तरस्यापि स्मृत्यन्तरलिङ्गादर्थ एवानुमानमिति नि[3]ष्प्रामाणिकी श्रुतिकल्पना स्यात् । उच्यते न खलु परकीयेण ज्ञानेन झटित्येवार्थे निर्णयः, मूलानुसंधानसापेक्षत्वात्, तत्र यदि स्मृतिकारस्यार्थविषयज्ञानमूलमनुसंदधानः स्मृत्यन्तरमेव संभावयेत् तदपि च ज्ञानस्यैव लिङ्गं, नार्थस्य, एवं ततः पूर्वतरमपि स्मरणं ज्ञानस्यैव लिङ्गं नार्थस्येति न क्वचिदर्थनिश्चयो लैङ्गिको लभ्यत इति श्रुतिरेव कल्पयितव्या । यद्येवं, श्रुतावपि तु[4]ल्यमेतत्, स्मृतिकारस्य मूलतया श्रुतिज्ञानमेव प्रथमं कल्प्यते न श्रुतिसद्भावः, श्रुतिविषयेण तु ज्ञानेन ज्ञेयभूतश्रुतिविनिश्चयः, परज्ञानेन च तद्विषयश्रुतिनिश्चयो मूलानुसंधानसापेक्षः, मूलं च स्मृतिकारस्य स्मृत्यन्तरमेव, तदपि चार्थज्ञानद्वारेण श्रुतिज्ञानस्यैव लिङ्गं, न श्रुतिसद्भावस्येति न क्वचित्कस्यचिदप्येवं श्रुतिसद्भावनिश्चयो लैङ्गिको लभ्यते, लिङ्गादीनि तु श्रुतिसद्भावं कल्पयन्तीत्युक्तो विशेषः, तेन यदि परकीयेण ज्ञानेन प्रागेवार्थनिश्चयः, ततोऽर्थस्मरणपरम्परयाऽर्थस्यैवानुमानाच्च श्रुतिसिद्धिः, अतः स्मृत्यन्तरमेव मूलं स्यात् अन्धपरम्परया च रूपनिश्चयस्तदा स्यात्, चैत्यवन्दनादीनामपि पुंवाक्यपरम्परया धर्मत्वा[5]नुमानं स्यात् । अथ मूलानुसंधानापेक्षं ततो यथैव वयं मानवीयात्स्म-

१ तद्विषयमेवेति पुस्तकान्तरपाठः ।
२ स्मृतिकारस्यापि इति पुस्तकान्तरपाठः ।
३ निष्प्रामाणिकीति तु युक्तः पाठः ।
४ तुल्यमेवेतदिति पाठान्तरम् ।
५ धर्मानुमानमिति पाठान्तरम् ।

Digitized by Google

रणान्मनोरर्थविषयं श्रुतिविषयं[1] च ज्ञानमात्रं कल्पयित्वा श्रुतिसद्भावमनिश्चित्य तन्निश्चयाय मनोः श्रुतिसद्भावमूलं प्रमाणं मृगयामहे, तथा मनुरप्यन्यस्य सोऽप्यन्यस्येति न श्रुतिसद्भावसिद्धिः । एवमुभयथाऽपि श्रुतिर्नित्यानुमेया न सिध्यतीति, न तन्मूलत्वेन प्रामाण्यं स्मृतीनाम् । अतः श्रद्धामात्रविजृम्भितं स्मृतिप्रामाण्यमिति प्राप्तेऽभिधीयते ।

वैदिकैः स्मर्यमाणत्वात्तत्परिग्रहदार्ढ्यतः ।
संभाव्यवेदमूलत्वात् स्मृतीनां वेदमूलता ॥

य एव हि वेदस्यैव धर्ममूलता नान्यस्येत्यास्थिता मन्वादयस्तेषामष्टकादिषु धर्मत्वस्मरणं न कथंचिदुपपद्यते न यदि वेदमूलता, तथा वैदिकानामेवाविगीतपरम्परया परिग्रहो, वैदिकत्वस्मरणं चैषु शिष्टानां नासति वेदमूलत्वेऽवकल्पते, संभवति च त्रैवर्णिकानां वेदसंयोग इति तन्मूलत्वमेवाध्यवसीयते, कथमनुच्चारितानां मूलत्वोपपत्तिः? इति चेत् समुच्चार्यन्त एव स्मृतिमूलभूताः श्रुतयः संप्रत्यपि विप्रकीर्णाः काश्चित् क्वचित्कस्यांचिच्छाखायां, विप्रकीर्णत्वात्तु शाखान्तराध्यायिभिः शाखान्तरगतानामनुपलम्भात्तादर्थ्येनार्थवन्निबन्धनम्, उपलम्भेऽपि वा मन्दधीभिरनुपसंहरणीयानामुपसंहारफलं स्मृतिप्रणयनमिति न वैयर्थ्यमतः स्मृतयः प्रमाणमिति सिद्धम् ।

श्रुतिप्राबल्याधिकरणम् ।

सू० विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् ॥ ३ ॥

उत्सृष्टस्य स्मृतिप्रामाण्यस्यापवादः क्रियते, अत्र प्रत्यक्षश्रुतिविरुद्धाः स्मृतीरुदाहृत्य[2] चिन्त्यते किं प्रमाणमप्रमाणं वा? इति, तदर्थं च पूर्ववदेव श्रुतिमूलत्वं भ्रान्त्यादिमूलत्वं वेति चिन्तनीयम्, तत्र पूर्वाधिकरणं समस्तमिह पूर्वपक्षः ।

न च प्रत्यक्षश्रुतिविरोधात् स्मार्तश्रुतिकल्पनाऽनवक्लृप्तिः, द्वयसंभवात् व्रीह्यादिश्रुतिवत्, यत्र हि द्वयोरसंभवस्तत्रैकविषये प्रत्यक्षेणेतरवि-

१ श्रुतिविषयं वेति पु० ।
२ स्मृतय उदाहृत्य चिन्त्यन्ते इति युक्तः पाठः ।

षयमनुमानं प्रमेयापहाराद्वनायासेन निराक्रियते वह्नाविव शैत्यानुमानं, यत्र तु द्वयसंभवस्तत्र शीघ्रप्रवृत्तमपीतरदितरस्य विषयमपहरतीति तद्विषयमनुमानं न शक्नोति प्रतिषेद्धुं, संभवति च युगपदनुपसंहरणीयार्थेऽपि श्रुतिद्वयं व्रीहियववृहद्रथन्तरग्रहणाग्रहणादिविषयश्रुतिवदिति प्रत्यक्षेणापि स्पर्शविधिना सर्ववेष्टनश्रुतिविषयमनुमानं न शक्यं निराकर्तुं, कथं तर्हि श्रुतिलिङ्गादिषु पूर्वपूर्वेणोत्तरोत्तरस्य बाधः, ? तत्रापि श्रुतिद्वयसंभवाच्च क्लृप्तया कल्प्या निराकर्तुं शक्यते । उच्यते नैव तत्र प्रमेयापहारनिबन्धनो बाधः, किंतु कल्पनामूलोच्छेदात्, यावद्धि मन्त्राम्नानमनवगतप्रयोजनं, प्रकरणी[1] वा क्रतुः, कृतार्थस्तावदेव तत्सिद्ध्यर्थं श्रुतिकल्पनं प्रमाणवत्, यदा तु क्लृप्तया श्रुत्या द्वयोरपि नैराकाङ्क्ष्यं, तदा मूलोच्छेदादाकाङ्क्षाऽधीना श्रुतिकल्पना नैवोन्मज्जति, अत्र तु प्रत्यक्षया श्रुत्या न स्मृतेर्मूलाकाङ्क्षा निवर्तते,[2] यतो मूलोच्छेदादनुमानविरोधः स्यात्. यदि परं प्रमेयापहारादग्नाविव शैत्यानुमानं प्रत्यक्षेण विरुध्येत, न चैवं संभवति, श्रुतिद्वयसंभवात् अग्नौ हि शैत्यौष्ण्ये न संभवतः परस्परोपमर्दकत्वात्तयोः, अतः प्रत्यक्षदृष्टौष्ण्येन शैत्यस्यापहृतत्वान्न तद्विषयमनुमानमुदेतुमुत्सहते, अत्र तु संभवति श्रुतिद्वयं व्रीहियवादिवदित्युक्तम् । अथवा श्रुतिस्मृतिप्रमेये न मिथो-विरुध्येते, न हि व्रीहिशक्त्या यवशक्तिर्विरुध्यते, सा वा तया, स्पर्शशक्त्या वा वेष्टनशक्तिः, सा वा तया, शक्तिमात्रं च विधेः प्रमेयम्, अतोऽत्रानुमानस्य प्रत्यक्षेणाविरोधात् विरुद्धानामपि प्रामाण्यमिति प्राप्तेऽभिधीयते । “अप्रामाण्यं विरुद्धानामशक्यार्थविधानतः । औदुम्बरीं न शक्नोति सर्वां वेष्टयितुं स्पृशन् । वेष्टितां वापि संस्प्रष्टुमतोऽन्योन्यविरोधतः । प्रमेयापहृतेरेव बाधः स्याद्वह्निशैत्यवत्” अशक्यार्थविषयता हि मूर्द्धाभिषिक्तमप्रामाण्यनिदानं विधीनां, सागरं तरेदित्यादिवत्, अशक्यं च संस्पृशता वेष्टयितुं, वेष्टयता स्प्रष्टुं वा, अतो वेष्टयेत्स्पृशेदिति अशक्यार्थविधानाच्च तावदुभयोरपि प्रामाण्यं संभवतीत्यवश्यमन्यतरद्बाधितव्यम् ।

१ प्रकरणी चाकृतार्थः इति पाठान्तरम् ।

२ निवर्त्यते इति पु० ।

ननु शक्तिमात्रं विधेः प्रमेयं, संभवति चाननुष्ठीयमानयोरपि शक्तिरिति सत्यप्यनुष्ठानविरोधे प्रमेयभूतशक्त्यविरोधादुभयोः प्रामाण्यमुपपन्नमिति नैकस्यापि बाधो युज्यते, किमिदानीं सागरं तरेदग्निना सिञ्चेदित्यादीनामपि प्रामाण्यम्? अननुष्ठीयमानस्यापि शक्तिसंभवात्, तथा सामान्यविशेषशास्त्रयोरपि न विरोधः स्यात्, आहवनीयपदयोरभेदेऽपि शक्तिसंभवात्, आहवनीयस्य न पदेन बाधः स्यात्, अविरुद्धस्य दुर्बलस्यापि बाधायोगात्, न चात्र श्रुत्यादिभिरिव लिङ्गादीनां मूलोच्छेदेन श्रुतिकल्पनाविरो[1]धाद्बाधसंभवः, सामान्यशास्त्रस्यापि प्रत्यक्षत्वात्तन्मात्रेण होमान्तरेष्विव पदहोमेऽप्याहवनीयसिद्धेः, अतोऽत्र सामर्थ्यविरोधासंभवात्प्रमेयविरोधादेव बाधोऽङ्गीकर्तव्यः शक्तिमात्रे च प्रमेये तद्विरोधाभावाच्च बाधः सिद्ध्येत्, एवमुत्पत्त्युत्पत्तिशिष्टनित्यनैमित्तिकादिषु प्रसङ्गा दर्शयितव्याः, तस्मादवश्यमनुष्ठानविरोधे शास्त्रविरोधोऽङ्गीकर्तव्यः, किं च न शक्तिमात्रं भूतार्थकथनवद् विधिना बोध्यते, प्रवर्त्तनारूपो हि विधिरर्थात्समीहितसाधनशक्तिं बोधयति, प्रवर्त्तना चाशक्यविषया न संभवतीति स्यादेवाप्रामाण्यं, यदा तु समीहितसाधनतैव विध्यर्थ इत्याश्रीयते तद[2]पि न तन्मात्रं विधिः, किंतु कर्त्तुं समीहितसाधनता, न चाशक्यार्थे कर्त्तृत्वं संभवतीत्यप्रामाण्यं, यथोक्तम् "आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी"ति तेनाशक्यानुष्ठानमर्थद्वयं बोधयतोः प्रमाणयोः प्रमेयविरोधादवश्यमन्यतरद्बाधितव्यं, तत्र प्रत्यक्षेणानुमानस्य बाधेऽग्नाविव शैत्यानुमानस्येति सिद्धमप्रामाण्यं स्मृतीनां श्रुतिविरुद्धानां, षोडश्यादिषु तु द्वयोरपि प्रत्यक्षत्वेनाप्रमाणविशेषत्वाच्चैकेनेतरस्य बाधः संभवति, विरुद्धार्थत्वाच्च न द्वयोराञ्जस्येन प्रामाण्यं, न चाप्रामाण्यमविद्यमानदोषयोः संभवतीति गत्यन्तराभावादुभयोरपि पाक्षिको बाधः कल्प्यते, न चैवं शास्त्रस्याप्रामाण्यं, यथा सामान्यशास्त्रस्य विशेषशास्त्रबाधितस्यापि नाप्रामाण्यं, तद्वदिहापि ।

ननु बाधितं भवत्यप्रमाणं च न भवतीति व्याहतमेतत्, सत्यमेतच्च

१ कल्पनाविरोधनाद्बाधसंभवः इति पु० ।
२ तथापि इति पाठान्तरम् ।

स्वत्र पारमार्थिकः शास्त्रार्थो बाध्यते येनाप्रामाण्यं शास्त्रस्य स्यात्, किंतु प्रतिपत्तमनालोचयतो यः शास्त्रस्य स्वरसतः सार्वत्रिकः प्रत्ययः सोऽत्र बाध्यते तद्बाधाच्च पाक्षिकानुष्ठानपरत्वं शास्त्रस्याध्यवसीयते सामान्यशास्त्रस्येव विशेषशास्त्रानाक्रान्तविषयपरत्वमिति नाप्रामाण्यं, न चैवं स्मृतिवशेन श्रुतिस्वरूपभङ्गेन स्पर्शनस्य पाक्षिकत्वं कल्पयितुं शक्यते, स्मृतेः स्वतोऽप्रमाणत्वेन श्रुतिबाधासामर्थ्यात्, श्रुतिकल्पनस्य च प्रत्यक्षश्रुतिविहितस्पर्शविरोधेन विरुद्धत्वात् ।

ननु पाक्षिकत्वेनापि प्रत्यक्षश्रुतेरुपपत्तेर्यस्मिन् पक्षे सा नास्ति तत्र स्पर्शाभावेन वेष्टनस्यापि शक्यानुष्ठानत्वात्तद्विषये श्रुतिकल्पनमुपपन्नमिति चेत् न इतरेतराश्रयात्, स्वरसतो हि श्रुतिवाक्यादपाक्षिकं स्पर्शनं गम्यते तस्मिंश्चापाक्षिके न स्मार्तश्रुतिकल्पनम् अशक्यत्वात्, न हि स्पृशता वेष्टयितुं शक्यते, तत्र स्पर्शनस्य पाक्षिकत्वे सति शक्यार्थतामासाद्य काल्पनिकी श्रुतिरात्मानं लभते, तस्यां च लब्धात्मिकायां तद्विरोधात्स्पर्शनस्य पाक्षिकत्वमितीतरेतराश्रयत्वं स्यात्, अतोऽत्र श्रुत्यसंभवाद्भ्रान्त्यादिमूलकत्वादप्रमाणमेवंजातीयकं स्मरणं, न ह्यसंभवद्भ्रान्त्यादिकं स्मरणं कस्यचिदपि शङ्कितुम[१]ध्यवसातुं, संभाव्यमाने तु भ्रान्त्यादौ दृष्टानुगुणाऽदृष्टकल्पना, असति तु विरोधे कर्तृसामान्यात् वैदिकपरिग्रहदार्ढ्याच्च श्रुत्यनुमानमिति न सर्वत्रैकरूप्यमिति,

दृष्टमूलकस्मृत्यप्रामाण्याधिकरणम् ।

सू· हेतुदर्शनाच्च ॥ ४ ॥

अधिकरणान्तरं वा यत्र दृश्यमानकारणं श्रुत्यविरुद्धस्मरणमुदाहरणं "वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाती"त्यादिकं तत्प्रमाणमप्रमाणं वेति विचारः, कर्तृसामान्यात्प्रत्यक्षश्रुतिविरोधाभावा[२]त्प्रामाण्यमिति प्राप्ते उच्यते, न दृष्टे हेतौ हेत्वन्तरानुमानं प्रक्रमते, दृष्टश्चात्र लोभ एव हेतुरिति, तत एव स्मृत्युपपत्तेर्नात्यन्तापरिदृष्टवैदिकवचनकल्पनोपपत्तिः, अतः

१ शक्यमध्यवसातुमिति पा· ।

२ श्रुतिविरोधाभावाच्चेति पाठान्तरम् ।

श्रुतिविरुद्धं दृष्टकारणं च स्मरणमप्रमाणम्, अतोऽन्यत्प्रमाणमिति, यदस्माचार्यैर[1]धिकरणभङ्गो दर्शितः, तत्रायमभिप्रायः, भवेदेवं स्मृतेर्बाधो यदि स्मृतिमूलं न कदाचिदपि केश्चित्कस्यांचिदपि शाखायां पठ्यत इत्यध्यवसातुं शक्यते, तदा हि तत्र सर्वपुरुषाणामेव प्रत्यक्षप्रसराभावात् केवलं स्मृत्यनुमानसमधिगम्यं श्रुतिवाक्यमनुमानस्य प्रत्यक्षविरोधादनुदयात्सकलजनसमस्तप्रमाणपथाऽननुवर्त्तिगगनकुसुमायमानं स्यात्, न चैवमध्यवसातुं शक्यम् अनन्तचरणाधारा[2]णामनेकसहस्राणां वेदशाखानां कार्त्स्न्येनोपलम्भासंभवात्, एवं चानध्यवसीयमाने सत्यपि विरोधे दुर्लभतरमप्रामाण्यं, नित्यानुमेयश्रुतिमूलतानिराकरणात्, यदा हि शाखान्तरगतानि पुरुषान्तरप्रत्यक्षाण्येव वेदवाक्यानि स्मृतीनां मूलं तदा वेष्टनवाक्यमपि पुरुषा[3]न्तरे प्रत्यक्षतया संभाव्यमानं कथमिव शक्यं नास्तीति वक्तुं, द्वेधा हि तस्याऽभावावधारणं बाधकप्रमाणसद्भावात्, साधकप्रमाणाभावाद्वा भवेत्, बाधकसद्भावोऽपि द्वेधा, दृश्यादर्शनाद्वा, तदभावनियतार्थान्तरदर्शनाद्वा, न तावद् दृश्यादर्शनं समस्तशाखोपलम्भाभावादित्युक्तम् ।

न च विरुद्धश्रुतिदर्शनं तदभावनियतं, येन तद्दर्शनात्तदभावोऽवधार्येत, विरुद्धानामपि यष्टव्यायष्टव्यादिश्रुतीनां सहस्रं द[4]र्शनात्, तेन न तावद्बाधकसद्भावो, नापि साधकाभावः, स खल्वात्मीयः सर्वेषां वा भवेत्, न तावत्स्वप्रमाणनिवृत्त्या परत्रभावनिश्चयोऽतिप्रसङ्गात् ।

न च समस्तपुरुषाणां तत्र प्रमाणं नास्तीति शक्यते निश्चेतुं, संभवति हि तस्य शाखान्तरे समाम्नानं, पुरुषान्तरेण प्रत्यक्षीकरणं च, नित्यानुमेयत्वे हि सर्वेषामिहानुमानमेव प्रमाणं स्यात्, तच्च प्रत्यक्षश्रुतिविरोधे नोदेतीति सर्वपुरुषाणां साधकप्रमाणाभावादीषत्करमभावावधारणं स्यात्

न च तदस्तीत्युक्तम् ग्रन्थपरम्परादोषात्, अतः पुरुषान्तराणामिह प्रत्यक्षसंभवात् तस्य चात्मप्रत्यक्षतुल्यत्वाच्च स्मार्त्तश्रुतिनिराकरणं, तदुक्तम्

---

१ अत्राचार्यपदेन शबरस्वामिन उच्यन्ते ।
२ पुरुषान्तरप्रत्यक्षतयेति पु० ।
३ पुरुषान्तरप्रत्यक्षतयेति पाठान्तरम् ।
४ सहस्रदर्शनादिति तु युक्तं स्यात् ।

‘आत्मीयात्परकीयस्य दौर्बल्यं न हि किंचन । प्रत्यक्षत्वाविशेषेण स्वप्रत्यक्ष-
समं हि तत्’’ । यदा चैवं स्वशाखापठितश्रु[1]तितुल्यप्रमाणकतया स्मार्त्तमपि
वेदवाक्यं संभाव्यते तदा स्मृतिलिङ्गकमनुमानं न केनचित्प्रतिबध्यत इति
न निर्मूलत्वं स्मृतेः शक्यते वक्तुं, ततश्च वेष्टनस्पर्शनयोरात्मीयपरकीयप्र-
त्यक्षश्रुतिविहितयोस्तुल्यकक्षप्रमाणतया विकल्पो न्याय्यः, यदि परमात्मी-
यस्य प्रत्ययस्य विश्र[2]म्भणीयतया तेनैव परप्रत्ययमनादृत्य व्यवहारः क्रियते
ततः क्रियताम्, अनादरणं च सहस्रतमेऽप्यंऽशे परप्रत्ययस्यादृष्टमूलस्य न्याया-
भासनिमित्तत्वसंभवाद्भ्रान्त्यादिमूलसंभवाद्वा “अक्तं वा समभिव्याहाराद-
विशेषादुभौ वे’’तिवत् न स्वप्रामाण्याध्यवसानं, व्यवहारविशेषौचित्यप्रतिपा-
दनार्थं चेदं सूत्रं, ‘विरोधे त्वनपेक्षं स्या’’दिति, श्रुतिस्मृतिविरोधे यत्प्रमा-
णान्तरानपेक्षश्रुतिवाक्यं तदेव ग्राह्यम्, असति ह्यात्मप्रत्यये परप्रत्य-
यानुमानं क्लेशाश्रयणमिति, यथाहुः “यावद्वेकं श्रुतौ कर्म स्मृतौ चान्यत्प्र-
तीयते । तावत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यत’’ इति, तेन फलतोऽप्रा-
माण्यं श्रुतिविरुद्धानां स्मृतीनामिति स्थितं, भाष्यमप्यननुष्ठानरूपाप्रामा-
ण्यपरं व्याख्येयम् । यद्वा यान्येतानि त्रयीविद्भिर्न परिगृहीतानि शाक्यादि-
भिर्निर्मितानि धर्मशास्त्राभासानि तेषामनेनाप्रामाण्यं, पूर्वसूत्रोक्तकर्तृसा-
मान्यप्रत्युदाहरणत्वेनोच्यते, तेषां हि प्रत्यक्षादिमूलत्वेन प्रामाण्यं प्रत्य-
क्षसूत्रे निराकृतं, मन्वादिवद्वेदमूलत्वेन प्रामाण्यमिह निराक्रियते, तेषां
ह्यसत्यपि प्रसिद्धवैदिकैरग्निहोत्रादिभिः कर्तृसामान्ये भिन्नप्रस्थाना वा वेदा
मूलं भविष्यन्ति, यथैवाथर्वणस्य त्रयीभिन्नरूपता, तथा चतुर्भ्योऽपि वेदेभ्यो-
भिन्नरूपा वेदाः संभवेयुः, ते चेदानीं प्रलीनाः मन्वादीनामपि हि केचि-
त्प्रलीनशाखामूलतामनुमन्यन्ते, तद्वदत्रापि भविष्यति, इत्थं च संभवति
प्रामाण्ये नाप्रामाण्यं युक्तमिति भवति केषांचिदाशङ्का, साऽपि [3]‘मन्दविष-
न्यायेन निराकर्तव्येत्येवमर्थमिदमधिकरणं, अतः पूर्वपक्षः, सिद्धान्तस्तु अवि-

१ स्वशाखापठितश्रुतितुल्यप्रमाणकमिति पाठान्तरम् ।
२ विश्रम्भणीयतयेति तु युक्तम् ।
३ सा च मन्दविषन्यायेनेति पु० ।

च्छिन्नवैदिकपरिग्रहानुपपत्त्या मन्वादिष्वनुपलभ्यमानोऽपि वेदः कल्पितः, शाक्यादिषु त्वत्यन्तं वैदिकविपरीतमवैदिकमप्रमाणं च तदित्येव शिष्टानां स्मरणं, वेददूषिण एव तेषां प्रामाण्यमनुमन्यन्ते, दृष्टानुसारिणी च कल्पना न तद्वैपरीत्येन, अतोऽत्र वेदकल्पना दवीयसीत्यप्रामाण्यमेव तेषामसन्मूलत्वादिति ।

पदार्थबलाबलाधिकरणम् ।

सू० शिष्टाकोपेऽविरुद्धमिति चेत् ॥ ५ ॥
न शास्त्रपरिमाणत्वात् ॥ ६ ॥

"आचान्तेन कर्त्तव्यम्" "यज्ञोपवीतिना कर्त्तव्यम्" "दक्षिणाचारेण कर्त्तव्य"मित्येवमादीनि क्रत्वङ्गस्म[1]रणान्युदाहरणं किं प्रमाणमप्रमाणं? वेति विचारः, तदर्थं च प्रत्यक्षश्रुत्या विरुध्यन्ते न वेति, तदर्थमप्येभिः किं क्रतुमध्येऽनुष्ठीयमानैः कस्यचित्क्रत्वर्थस्य क्रमादेर्भवति बाधो न वेति, अथवाऽभ्युपेत्यैव विरोधं प्रमाणमप्रमाणं वेति विचारः, तदर्थं च प्रमाणप्रमेयबलाबलविसंवादे किं व न्याय्य इति चिन्त्यते, तथा हि श्रुतिस्मृत्योः प्रमाणयोः श्रुतिर्बलीयसीति स्थितम्, अतः श्रौतत्वात् क्रमादयः स्मार्त्तेभ्य आचमनादिभ्यो बलीयांसो विज्ञायन्ते, प्रमेयस्वरूपालोचने पदार्थगुणत्वात्क्रमादेराचमनादयः पदार्था बलीयांसोऽवगम्यन्त इति बलाबलद्वयविसंवादात्कतरेण निर्णय इति संदेहः, तत्र पूर्वः पक्षः "श्रुत्युक्तानां क्रमादीनां स्मार्त्तैराचमनादिभिः । व्याकोपः स्यादतस्तावत् विस्पष्टैव विरोधिता । ततः श्रुतिबलीयस्त्वात्स्मृतेः स्यादप्रमाणता । पूर्वभाविप्रमाणस्थं प्रमेयस्याद् बलाबलात् । न्यायस्तेनैव निर्णीते न पश्चादितरादरः । नैराकाङ्क्ष्यात्प्रमातॄणामतः स्मृत्यर्थबाधनम्" ॥

"वेदं कृत्वा वेदिं कुर्यादि"ति क्रमः कालश्च यः प्रधानेनाङ्गानामविप्रकर्षः प्रयोगप्राशुभावश्च प्रयोगवचनावगतो यश्च दूर्वाहृतिः परिमाणं चाविस्मृतसमस्तपदार्थानुष्ठानसिद्ध्यर्थं प्रयोगविधिनैवाकाङ्क्षितं पदार्थविधिप्रत्ययावगतं, तदेतत्रयमपि क्रमकालपरिमाणात्मकमाचमनादिभिर-

[1] क्रत्वर्थाङ्गस्मरणानीत्यपि पाठः ।

न्यथात्वं प्रतिपद्यते तेन विरोधस्तावदस्त्येव, विरोधे च श्रुतेर्बलीयस्त्वात् स्मृत्यर्थस्याचमनादेर्बाधः ।

न च श्रुत्यर्थत्वेऽपि पदार्थगुणत्वात्क्रमादेर्दौर्बल्यमाचमनादेः स्मृत्यर्थस्यापि पदार्थत्वाद्बलीयस्त्वमिति वाच्यं प्रमाणपूर्वको हि प्रमेयावगमः तेन पूर्वभाविप्रमाणस्थं बलाबलं पूर्वमवगम्यते तेन चाचमनादिभ्यः क्रमादीनां बलीयस्त्वे निर्णीते निराकाङ्क्षत्वाच्च पश्चादवगतं प्रमेयबलाबलमादर्त्तव्यं, तस्मादाचमनादिस्मृतीनामप्रामाण्यम् सिद्धान्तस्तु “पदार्थप्राप्त्यपेक्षत्वात्क्रमादेरविरोधिता । विरोधेऽपि न दौर्बल्यं पदार्थेभ्यो गुणत्वतः ।” सर्वेषु हि पदार्थेषु प्राप्तेषु प्रयोगवेलायां तद्विशेषणतया क्रम आश्रीयत इति तेन पदार्थप्राप्त्यपेक्षत्वात्क्रमस्य अत्यन्तजघन्यप्रमाणकोऽपि पदार्थः पूर्वं प्राप्नोति पश्चात्क्रमः सर्वपदार्थप्रयोगाङ्गतयाऽवतरन्नपि न पदार्थैर्विरुध्यते कालोऽप्येवमेव प्रयोगाङ्गत्वात्, यावन्तः पदार्था अवधारितास्तेषां सर्वेषामेव पूर्वाह्णादिकालत्वं प्रधानसंनिकर्षः प्रयोगप्राशुभावश्च, परिमाणं तु न कस्यचित्क्लृप्तस्यार्थः, प्रयोगविधिरपि न तदाक्षिपति अन्यथाप्यविस्मरणसिद्धेः, अथापि शास्त्रार्थस्तथाऽपि प्रयोगोपयिकत्वात्प्रयोगस्य च प्रयोज्यपदार्थप्राप्त्यपेक्षत्वादविरोधित्वं. यद्यपि क्रमादीनामाचमनादिभिर्विरोधः स्यात्तथापि सर्वपदार्थगुणत्वाद्दौर्बल्यम्, आचमनादयस्तु पदार्थत्वाद् बलवन्तः ।

न च प्रमाणबलाबलस्य पूर्वभावित्वं, न हि प्रमाणयोः स्वरूपतो विरोधः, अपि तु प्रमेयविरोधनिमित्तः प्रमेयगतं हि विरोधमालोच्य प्रमाणविरोधबुद्धिर्भवति तद् यदैव प्रमेययोर्विरोधो गम्यते तदैव तयोर्बलाबलमपीति तत एव निर्णये कृते नैराकाङ्क्ष्यात्प्रमाणबलाबलमनादर्त्तव्यमिति न स्मृतेर्बाधः । यत्तु स्वभावात् एवाप्रमाणं शाक्यवाक्यं तत्सर्वदैवानादर्त्तव्यं यत्तु बलवद्विरोधापेक्षमप्रमाणं तत्तदभावापेक्षया प्रमाणमेवेत्यवगन्तव्यं, न चात्र बाधकमस्ति प्रमाणबलाबलस्याबाधकत्वात्, तस्मादाचमनादेर्बलीयस्त्वात् तदनुरोधेनैव श्रुत्युक्तक्रमादयो बाध्यन्त इत्याचमनादिस्मृतीनामबाधात्प्रामाण्यमिति । न त्विदमेवमधिकरणं पूर्वत्रस्यातिमन्दत्वात्प्रत्तो-

Digitized by Google

पवीतादेश्च प्रत्यक्षश्रुतिविहितत्वेनानुदाहरणत्वात् तस्मात्पूर्वं शाक्यादिशास्त्राभासानामप्रामाण्यमुक्तं तत्रैव चोक्तोत्तरत्वेनान्यं सूत्रद्वयं व्याख्येयम् । यत्तु तेष्वहिंसादिवचनं श्रुतिस्मृतिशिष्टं न कोपयति तत्प्रमाणं भवत्विति चेत्तत्रोत्तरं "न शास्त्रपरिमाणत्वात्" इति न खलु येन केनचित्प्रमितो धर्मः फलं साधयति तत्प्रमाणं भवति "स्वाध्यायोऽध्येतव्यः" "वेदोऽखिलो धर्ममूलं तद्विदां च स्मृतिशीले" "धर्मज्ञसमयः प्रमाणं वेदाश्च" "पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः वेदास्स्थानानि विद्यानां धर्मस्य च चतुर्दश" इत्येवमादिभिरेव धर्मप्रमितेर्नियमादन्यतः प्रमितस्य फलसाधनत्वाभावेन धर्मत्वाभावात्तेषामप्रामाण्यमिति ।

यत्तु तृतीयं सूत्रम् "अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् तेष्वदर्शनाद्विरोधस्ये"ति

तत्सदाचारप्रामाण्यप्रतिपादनार्थमधिकरणान्तरं व्याख्येयम् अत्रानिबन्धनाः सदाचाराः वसन्तोत्सवादिविषया उदाहरणम् प्रमाणमप्रमाणं वेति सन्देहः तदर्थं च श्रुत्यादिमूलत्वं भ्रान्त्यादिमूलत्वं वेति चिन्तनीयं तत्र स्मृत्यधिकरणे कर्तृसामान्यादाचाराणामपि स्मृतिवत्प्रतिपादितमपि प्रामाण्यं निर्निबन्धनतया व्यतिक्रमसाहससङ्कराद्वाक्षिप्य समाधीयते । यदि वसन्तोत्सवादयो ऽष्टकादिवद्वेदमूला भवेयुस्ततस्तद्वदेव मन्वादिभिरपि निबध्येरन् । अनिबन्धनात्तु नैषां मूलं केनचिद्दृष्टम् । आचारपरम्परामात्रमेव दृष्ट्वा मन्वादिभिरपि सदाचारः प्रमाणमित्येवं परोक्षरूपेणानभि[1]धानात्प्रामाण्यमनुमीयते इति मन्यामहे । तत्र सैवान्धपरम्परा स्यात् । धर्मव्यतिक्रमसाहसदर्शनाच्च नाचारमात्राच्छक्यं धर्मावसानमिति पूर्वपक्षः । सिद्धान्तस्तु धर्मबुद्ध्या वैदिकैरनुष्ठानमसति वैदिकत्वे ऽनुपपन्नं, व्यतिक्रमसाहसदर्शनं तु रागद्वेषादिनिबन्धनत्वान्न धर्मबुद्धिनिबन्धनं, धर्मबुद्धिनिबन्धनस्य चाचरितस्याप्रमाणकारणत्वाच्छ्रुतिस्मृतिविरोधादर्शनाच्च धर्मलिङ्गत्वाव्यभिचारः । मन्वादिभिस्तु लाघविकैर्यदि नाम स्वरूपेण निबध्य

१ परोक्षरूपेणाभिधानात्प्रामाण्यमनुमीयते इत्यपि पाठान्तरम् ।

सामान्यात्मना शिष्टाचारः प्रमाणमित्येवमुक्तं नैतावता कश्चिद्दोषः, तस्मा-त्स्मृतिवदाचाराणामपि धर्मे प्रामाण्यं सिद्धम् ।

शास्त्रप्रसिद्धपदार्थ-प्रामाण्याधिकरणम् ।

सू० तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् ॥ ८ ॥

आचारप्रसङ्गाच्छब्दार्थप्रयोगरूपाचारविप्रतिपत्तौ बलाबलं चिन्त्यते यत्र भाष्ये आर्यम्लेच्छविशेषानुपादानाद्वाक्यशेषेण सिद्धान्तकथनात् शिष्टा-चारस्य च पूर्वप्रकृतत्वात् यत्र शिष्टानामेव मिथोऽभिधानविप्रतिपत्तिः केषांचिद्वाक्यशेषानुगुणा केषांचिदननुगुणा तत्र तुल्यबलतामाशङ्क्य वाक्य-शेषानुगुणाया बलीयस्त्वं प्रतिपाद्यते इति लक्ष्यते, तत्तूदाहरणाभावाद् यवादिशब्दानां दीर्घशूकादिष्वेव सर्वशिष्टप्रयोगादन्यस्यापि शिष्टप्रयो-गस्य विप्रतिपत्तिविषयस्योदाहरणस्यादर्शना“त्संदिग्धेषु वाक्यशेषा”दित्य-नेन गतप्रायत्वाद्वाक्यशेषाच्चैवनिर्णयः, ततोऽसति वाक्यशेषेऽभियुक्तान-भियुक्तप्रसिद्ध्योश्च तुल्यबलत्वप्रसङ्गादयुक्तमिति मत्वा आचार्यैरन्यथा-ऽधिकरणं व्याख्यातं, यत्रार्यम्लेच्छयोरभिधानविप्रतिपत्तिः, यथा पीलुशब्द-मार्या वृक्षविशेषे प्रयुञ्जते, म्लेच्छास्तु हस्तिनि, तत्र चिन्त्यते, किं तुल्यब-लत्वं? मुतार्यप्रसिद्धिर्बलीयसीति? लोकप्रसिद्धिगम्यत्वाच्छब्दार्थस्योभयो-रपि समा विप्रतिपत्तिः स्याच्छास्त्रार्थे हि बलाबलं, यः शास्त्रप्रमाणको धर्मस्तत्र शास्त्राभियोगशून्येभ्यो म्लेच्छेभ्यस्तदभियोगशालिनामार्याणाम-स्ति बलीयस्त्वं व्यवहारगम्यस्तु शब्दार्थः, स च म्लेच्छानामप्यविशिष्ट इति प्रमाणाविशेषादविशिष्टो द्वयोरपि शब्दार्थः, यच्चार्येष्वनादित्वकारणमव-ध्यस्मरणं, तदपि समानं म्लेच्छेष्वपि, तस्मात्समेयमभिधानविप्रतिपत्तिः स्यात्, इति प्राप्ते ब्रूमः, “प्रतिपादकतामात्रं म्लेच्छेष्वप्यवगम्यते । अवि-प्लुतस्तु शब्दार्थः शिष्टेष्वेवावधार्यते,” न तावदेवं न्याय्यम् उभावपि शब्दा-र्थाविति, अनेकादृष्टशक्तिकल्पनाप्रसङ्गात्, शब्दप्रयोगे ऽपि चान्यतरस्या-प्यनवधारणात् व्यवहारानुपपत्तिप्रसङ्गात् कदाचित्कस्यचिदुपादानेऽप्यदो-षविकल्पापत्तेरेकत्र मुख्यत्वेनान्यत्र गौणत्वेनापि प्रयोगोपपत्तेर्गौणेऽपि प्रयोगे पार्श्वस्थानां मुख्याभिमानसंभवात्तैरेव चान्येभ्यो मुख्यत्वस्य कथ-

Digitized by Google

सोऽयमर्थेन तद्रागस्याभावाद् द्वयोरपि अभिधेयता स्यात्, अस्ति त्वभियुक्तानभियुक्तयोर्विशेषः, शास्त्रस्था हि शब्दैकसमधिगम्यधर्माऽविप्रतिलिप्सया शब्दार्थतत्त्वं विविच्य परिपालयन्ति, म्लेच्छास्तु दृष्टार्थमात्रव्यवहारस्य यथाकथंचित्सिद्धौ प्रयोजनाभावाच्चाविप्लुतिसिद्धौ यतन्ते, अतो यद्यपि प्रतिपादकतामात्रं म्लेच्छेष्वपि भिद्यते तथाऽपि विप्लुतिसंभवाच्च तेषु शब्दार्थतत्त्वसिद्धिरित्यार्यप्रसिद्ध्यैव निर्दोषया बलीयस्याऽर्थसिद्धिरिति पीलवादिशब्दा वृक्षाद्यर्थाभिधायिन इति स्थितम् । भाष्यमप्यार्यम्लेच्छविगानाभिप्रायं व्याख्येयं वाक्यशेषश्चाभ्युच्चयत्वेनोक्तः, न मूलहेतुतयेति ।

स्मृत्याचारविरोधे वा यत्र मन्वादिनिबन्धनानामनिबन्धनानां चाचाराणां विरोधो मातुलदुहितृपरिणयनादिषु तत्र किं तुल्यबलत्वम्? उत स्मृतीनां बलीयस्त्व?मिति चिन्त्यते, तत्र "बलाबलविशेषस्तु कक्षान्तरितकारितः । श्रुतिस्मृत्योरिह त्वेवं न द्वयोः श्रुतिमूलतः" श्रुत्या हि साक्षादर्थः प्रतीयते स्मृत्या तु श्रुतिकल्पनयेत्येकान्तरितप्रामाण्यत्वादव्यवहितप्रामाण्या श्रुतिर्बलीयसीति तेन तत्र युक्तं यत्स्मृतेरननुष्ठानलक्षणमप्रामाण्यम्, इह त्वेवं विशेषो नास्ति, द्वयोरपि श्रुतिमूलत्वेनैकान्तरितयोरविशेषात्तस्मात्समा विप्रतिपत्तिरिति । अत्रोच्यते "सप्रत्ययप्रणीता हि स्मृतिः सोपनिबन्धना । तस्या स्तेन बलीयस्त्वमाचाराच्चिर्निबन्धनात्" प्रत्ययिततरा हि मन्वादयः स्मर्तारः तत्स्मरणं गुणवत्तरकर्तृकत्वादितरजनचारित्र्याद्विश्रम्भणीयतरमिति व्यक्तमेतत्, अपि चाचारिणां जनानां स्वयमितस्ततो विप्रकीर्णपरप्रकरणादिगतश्रुत्युद्धरणेनार्थं प्रतिपत्तुमसामर्थ्यादवश्यमेते महर्षिभिरेव ज्ञात्वा स्मृत्वा समर्पितमर्थमनुतिष्ठन्तीत्यङ्गीकार्यम्, अत आचारस्य स्मृतिकल्पनेन श्रुतिकल्पकत्वमिति द्व्यन्तरितप्रमाणत्वाद्दुर्बलत्वम् । अपि चाचारेषु कर्मस्वरूपमात्रमेव प्रत्यक्षं, कर्तव्यता तु विमर्शपूर्वमर्थसुखहेत्वन्तरासंभवनिरूपणेन पारिशेष्यात्कल्पयितव्या, तां च कल्पयित्वा पश्चान्मूलकल्पनमिति विप्रकर्षः, सनिबन्धनासु तु स्मृतिषु द्रागेव वचनतः कर्तव्यता-

नान्मुख्याभिधारणानपरम्पराऽनुश्रुतिसम्भवात्, तत्र यदि न कथंचिदपि विशेषोऽवगम्यते, मूलमात्रं तु कल्प्यमिति सन्निकर्षः, सर्वेषां च स्मृतिविरुद्धाचाराणां मातुलदुहितृपरिणयनादिविषयाणां कामादिहेत्वन्तरं विस्पष्टमेव दृश्यत इति न कथंचिदपि श्रुतिमूलत्वं संभावनीयं, न चात्र विकल्पाभ्युपगमेनोभयोरपि प्रामाण्यं संभवति वस्तुनि विकल्पासंभवात्, न हि मातुलदुहितृपरिणयनात्प्रत्यवायोत्पत्तिरनुत्पत्तिश्च संभवतीत्यवश्यमन्यतरस्याप्रामाण्यमाश्रयणीयं तत्र दृष्टमात्रनिमित्तस्याचारस्याप्रामाण्यमिति सिद्धमेवंजातीयकानां दुराचारत्वम् ।

अथवा त्रिवृच्चर्वश्ववालादौ यत्र लौकिकवाक्यशेषयोरर्थविप्रतिपत्तिः यथा "त्रिवृद्बहिष्पवमान"मिति अत्र त्रिवृच्छब्दस्य त्रैगुण्यं लोकादर्थोऽवगम्यते वाक्यशेषात्तु स्तोत्रीयानवकम् आदित्यः प्रायणीयः पयसि चरुरिति चरुशब्दस्य स्थालीवाक्यशेषादोदनः आश्ववालः प्रस्तर इति अश्वस्य वालः वाक्यशेषात्तु काशः ऐक्षवी विधृती इति इक्षुपर्वात्मिकेति लोकात् वाक्यशेषात्काशमूलके किं तत्र लौकिकवाक्यशेषयोस्तुल्यबलवत्त्वम्? उत वाक्यशेषस्य प्रतीतिर्बलीयसीति संशयः तत्र "पदार्थपदसंबन्धे तुल्यत्वं लोकवेदयोः । अदृष्टसाधनत्वे हि लोकाद्वेदोऽतिरिच्यते" विध्युद्देशात्तावदेतावदवगम्यते यदिह त्रिवृदादिशब्दाभिधेयं तद्वाक्यार्थोऽन्वयीति किं तु तस्याभिधेयमित्यन्यतोऽवगन्तव्यं, तत्र लोकस्याप्यभिधेयनिर्णये वेदवाक्यशेषतुल्यत्वं, ततोऽधिकं वा सामर्थ्यमस्तीत्यर्थद्वयमपि तुल्यप्रमाणकत्वाद्विकल्पेन ग्रहीतव्यमिति पूर्वः पक्षः, सिद्धान्तस्तु "वाक्यैकत्वे विधिस्तुत्योर्विशेषव्याकृते न हि । तेनात्र वाक्यशेषस्य प्रतिपत्तिर्बलीयसी" यदि लौकिकोऽर्थो विध्युद्देशेनाश्रीयते ऽन्यार्थो वाक्यशेषोऽन्यार्थश्च विध्युद्देश इति न कथंचन संबन्धः स्यात् तस्मादत्र वाक्यशेषः त्रिवृद्बहिष्पवमानमित्यादिषु तत्र तावत्तदनुगुण एवार्थः समाश्रयणीय इत्येतावदिहाधिकरणे स्थितं यदा चैवं वाक्यशेषवशात् स्तोत्रीयानवकमपि वाच्यमित्यवधारितं तदा

१ लौकिकवाक्यशेषयोरिति पुस्तकान्तरपाठः ।

यत्र वाक्यशेषो नास्ति त्रिवृदग्निष्टुदग्निष्टोम इत्यादिषु तत्राप्यनेनै-वार्थेन भवितव्यं. इति वशादिति दशमे वक्ष्यते चरुशब्दोऽप्योदनस्थाल्योः परस्परसंबन्धित्वाद्वाक्यशेषावधारितौदनवचनत्वेन स्थाल्यामन्याय्यः चा-नेकार्थत्वमिति प्रतिवद्धशक्तित्वाल्लाक्षणिकः, तेनासत्यपि वाक्यशेषे सौर्यं चरुं निर्वपेदित्यादावप्योदनवचनत्वमेवेति दशमे वक्ष्यते आश्ववालेखवी-शब्दावपि काशतन्मूलयो रूढत्वादन्यत्रापि तदर्थावेव भवतः, न चाच "संदिग्धेषु वाक्यशेषादि"त्यनेन गतत्वम् असंदेहात्, इह हि वाक्यशेषा-त्प्रागर्थान्तरमेव निर्णीतं वाक्यशेषेण बाध्यते न तु प्रथमं संदिग्धत्वेन निर्णीयत इति ॥ (शेषमग्रे)

॥ श्रीः ॥

॥ ओं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(*Continued from page* 644. VOL. VIII.)

भू० प्रतिसंधाना[1]संभवस्तद्वस्थः, प्रतिसंधानं हि पूर्वापरका-लस्थायिनमनुभवितारमुपस्थापयति नानुभूतिमात्रम्, अ-हमेवेदं पूर्वमप्यन्वभूवमिति, भवतोप्यऽनुभूतेर्न ह्यनुभवितृ-त्वमिष्टम्, अनुभूतिरनुभूतिमात्रमेव, संविन्नामा काचिन्नि-राश्रया निर्विषया वाऽत्यन्तानुपलब्धेर्न संभवतीत्युक्तम् ।

टी० "प्रतिसंधान"मिति, तदुदाहरति "अहमि"ति, ततः किमिति शङ्कायां तस्य परानिष्टत्वमाह "भवत" इति, न केवलं भवदनभ्युपगमः, अनु-भूतेरनुभवितृत्वं गमनक्रियाया गन्तृत्ववदनुपपन्नं चेत्यभिप्रायेणाह "अनुभू-ति"रिति, मात्रचाऽनुभवितृत्वव्यावृत्तिः ।

१ प्रतिसंधानाभावस्तदवस्थ इति द्राविडपाठः ।

Digitized by Google

ननु धर्मत्वास्थिरत्वाप्रतिसंधातृत्वैः संविदो नात्मत्वं यदुक्तं तच वक्तव्यम्, अनुभवितृत्वस्यात्माऽऽकारत्वेनानभ्युपगमात् विषयाश्रयशून्यायाः संविदो गुणभावाभावात्तदुभयसंबन्धप्रयुक्तानित्यत्वप्रसङ्गाभावाच्चेत्यत्राह "संविचाम"ति,

ननु कथं विषयाश्रयशून्यज्ञानाभावः? स्वरूपभूतं ज्ञानं विषयाश्रयशून्यं त्वन्मते, उच्यते स्थविष्ठमिदं चोद्यं, किं त्वया ज्ञातुरेव ज्ञानशब्दवाच्यस्याजडत्वानित्यत्वादिकं विषयाश्रयशून्यत्वमात्मत्वं च साध्यते? तत्सिद्धसाधनं, यदि ज्ञातृव्यतिरिक्तस्य ज्ञानस्य,? तर्हि ज्ञातृव्यतिरिक्तं विषयाश्रयविरहितं ज्ञानं शून्यमिति ब्रूमः, ज्ञातृज्ञेयतदवच्छिन्नज्ञानस्वरूपत्रिकातिरिक्तं ज्ञानमनुपलम्भनिरस्तमित्यर्थः । बौद्धैकदेशिभि"र्धर्मिकल्पनातो वरं धर्मकल्पने"ति लाघवन्यायात् ज्ञात्रात्मवादिना ज्ञानात्मवादिना च संप्रतिपन्ना संविदेवात्मेत्युक्तं, तदाशङ्क्य परिहरति–

सू० उभयाभ्युपगता संविदेवात्मेत्युपलब्धिपराहतम् अनुभूतिमात्रमेव परमार्थ इति निष्कर्षकहेत्वाभासाश्च निराकृताः।

ननु चाहं जानामीत्यस्मत्प्रत्यये योऽनिदमंशः प्रकाशैकरसश्चित्पदार्थस्स आत्मा ।

टी० "उभये"ति, कल्पनायामेव लाघवन्यायः, न तूपलब्धौ, अन्यथा अत्यन्तलाघवार्थं माध्यमिकमतानुसारेण ज्ञानं च त्यज्येत, कल्पने तु लाघवन्यायः, संवित्तूपलभ्यत इति चेत् ज्ञाताऽपि तथोपलभ्यते अत उपलब्धिपराहतत्वात्संविदात्मत्वमनुपपन्नमित्यर्थः । साश्रयैव संविदुपलभ्यते तथाऽपि युक्तिभिर्निर्विशेषत्वं साधितमित्यत्राह "अनुभूतिमात्र"मिति। यद्वा संविदः परमार्थत्वेनोभयवादिसंमतत्वात्सै[1]वात्मेति युक्तमित्याशङ्क्य दूषयति "उभये"ति, उपलब्धिपराहतं–प्रत्यक्त्वलक्षणस्यात्मत्वस्याहं जानामीति ज्ञातृत्वसामानाधिकरण्येनोपलब्ध्या पराहतमित्यर्थः, ज्ञातुरेव प्रत्यगात्मत्वमुपलब्धिसिद्धमित्युक्तं, तस्या उपलब्धेर्निर्विशेषसंविदात्मात्वसा-

[1] दैवात्मेत्युक्तमिति द्राविडपाठः ।

Digitized by Google

बहुयुक्तिभिर्बाधितत्वमाशङ्क्याह "अनुभूतिमात्र"मिति, प्रत्यगर्थो ह्यात्मा प्रत्यक्त्वं चाहमर्थात्मत्वे तु न सिध्यति संविदात्मत्वपक्ष एव सेत्स्यतीति चोदयति–

"ननु चे"ति, अहं जानामीत्यस्मत्प्रत्ययेऽस्मत्प्रत्ययत्वेन पराभ्युपगते यश्चित्पदार्थः स आत्मा । कुत इत्यत्राह "अनिदमंश" इति, इदमंशव्यतिरिक्तः परागर्थव्यतिरिक्तः प्रत्यगर्थ इत्यर्थः, हेतुगर्भमिदं प्रत्यगर्थत्वादित्यर्थः प्रत्यक्त्वं च कुत इत्यत्राह "प्रकाशैकरस" इति, स्वयंप्रकाशत्वादित्यर्थः। हेत्वभिप्रायश्चिच्छब्दः, ज्ञानत्वात्स्वयंप्रकाशत्वमित्यर्थः प्रत्यक्त्वं स्वस्मै प्रकाशमानत्वं, स्वयं प्रकाशत्वमनन्याधीनप्रकाशत्वम् । अहमर्थस्तु युष्मदर्थलक्षणः, युष्मदर्थलक्षणत्वात्परागर्थविशेषोऽहमर्थ इत्यर्थः। युष्मदर्थलक्षणत्वं कुत इत्यत्राह–

सू० तस्मिंस्तद्बलनिर्भासिततया युष्मदर्थलक्षणोऽहं जानामीति सिद्ध्यन्नहमर्थश्चिन्मात्रातिरेकी युष्मदर्थ एव, नैतदेवम् ।

टी० "तद्बले"ति, तद्बलनिर्भासितत्वात्–ज्ञानाधीनप्रकाशत्वात्तच्च चिन्मात्रातिरेकित्वादित्यर्थः, अस्मिंश्चोक्तमन्ये संविदात्मत्वे व्यतिरेकित्रयम्, अहमर्थानात्मत्वे ऽन्वयित्रयं चाभिप्रेतं, तत्र व्यतिरेकिणां व्यतिरेकिदृष्टान्तोऽन्वयिनां सपक्षश्च युष्मदर्थ-शब्देन सूचितः, अनुभूतिरात्मा प्रत्यक्त्वात् यदनात्मा तन्न प्रत्यक्, यथा घटः। अनुभूतिः प्रत्यग्भूता स्वयंप्रकाशत्वात् यन्न प्रत्यक् तन्न स्वयंप्रकाशं, यथाघटः, अनुभूतिः स्वयंप्रकाशा अनुभूतित्वात् यन्न स्वतःसिद्धं न तदनुभूतिर्यथा घट इति व्यतिरेकित्रयम्, अहमर्थो ज्ञानाधीनप्रकाशः चिद्व्यतिरिक्तत्वात् घटवत्, अहमर्थः पराक् ज्ञानाधीनप्रकाशत्वात् घटवत्, अहमर्थो नात्मा पराक्त्वाद्घटवदित्यन्वयित्रयं, स्वयंप्रकाशत्वमेव संविदात्मत्वे साक्षाद्धेतुतया पूर्वमुक्तं पूर्वपक्षोपन्यासे, अत्र तु तेन प्रत्यक्त्वं साधयित्वा तेनात्मत्वं साधितम् । एतत्परिहरति "नैतदेवमि"ति, संवित्स्वयंप्रकाशत्वमिष्टं शिक्षणीयांशश्चोक्तः, अतः स्वतः सिद्धत्वसाधकहेतोः सिद्धसाध्यता ज्ञातुरस्वतःसिद्धत्वसाधकहेतोश्चिदन्यत्वस्यासिद्धिर्वक्ष्यते इतरानुमानचतुष्टयमिह निरस्यते । संविदात्मत्वादि किं

प्रतीत्याऽभ्युपगतम्? उत प्रत्यक्त्वासिद्ध्यनुपपत्त्या? उत श्रुत्यर्थापत्त्या? उत श्रुतिस्मृतिसूत्रस्वारस्या? दिति विकल्पमभिप्रेत्य प्रथमपक्षे प्रत्यक्षप्रतीतिविरोधमाह—

सू० अहं जानामीति धर्मधर्मितया प्रत्यक्षप्रतीतिविरोधादेव

किंच

अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत् ।
अहंबुद्ध्या परागर्थात्प्रत्यगर्थो हि भिद्यते ॥

टी० "अहं जानामी"ति, एतेन परोक्तानां ज्ञानप्रत्यक्त्वात्मत्वज्ञातृत्वपराक्त्वाऽनात्मत्वसाधकानामन्वयिव्यतिरेक्यनुमानानां कालात्ययापदेश उक्तः, अहं जानामीत्यत्राहमर्थः स्वावभासेऽपि घटावभावभास इव प्रतिसंबन्धितयाऽहमिति प्रतीयते धर्मितयाऽवभासादेव न ज्ञानशेषतावभासः, अतः स प्रत्यक् आत्मा च, ज्ञानं च धर्मतया प्रतीयमानं सुखादिवन्यस्मै भासत इति न प्रत्यक्, नाप्यात्मा, अपि तु परागनात्मा च, अतश्चतुर्णां हेतूनां प्रत्यक्षबाध उक्तो भवति । अथ प्रत्यक्त्वं विपरीतसाधकं चेत्याह, "किं चे"ति, स्वस्मै प्रकाशमानत्वरूपं प्रत्यक्त्वं, परस्मै प्रकाशमानत्वं पराक्त्वं चाहमिदंबुद्धिभ्यां हि विभज्यते तस्मादहंबुद्धिविगमे प्रत्यक्त्वमेव न सेत्स्यतीति प्रत्यक्त्वमेवाहमर्थस्यैवात्मत्वसाधकमित्यर्थः, संविदि प्रत्यक्त्वाभावादात्मत्वसाधकहेतोरसिद्धिश्च फलिता, अहमर्थस्य पराक्त्वाभावादनात्मत्वसाधकहेतोरसिद्धिश्च सिद्धा, अहंबुद्ध्येत्यनेन "युष्मदस्मत्प्रत्ययगोचरयो"रिति स्वोक्तिविरोधश्च, "कोऽहमित्येव निपुणः शब्दोऽहमिति दोषायनात्मन्येव" इत्याद्यागमविरोधश्च गर्भितः, हि—शब्दस्य प्रसिद्धिपरत्वाद्धेतौ वा, अनुभूतिः पराची अहमर्थव्यतिरिक्तत्वात् घटवदिति प्रत्यक्त्वहेतोरसिद्धिदार्ढ्यं, तत्प्रत्यक्त्वसाधकस्य स्वप्रकाशत्वहेतोश्च सत्प्रतिपक्षत्वं च, अनुभूतिरनात्मा अहमर्थव्यतिरिक्तत्वात् घटवदिति संविदात्मत्वसाधकस्य प्रत्यक्त्वहेतोश्च सत्प्रतिपक्षत्वं चाभिप्रेतमित्यवगम्यते अहंबुद्ध्या परागर्थात्प्रत्यगर्थस्य भेदसमर्थनात्, हि—शब्दाच्च संवित्प्रत्यक्त्वहेतोरसिद्धिश्च साधिता । श्रुत्यर्थापत्तिं वक्तुं मुमुक्षोरभिसंधिमाह—

Digitized by Google

मू० निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट् । भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्त्तते ॥ अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति । अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ॥ मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता । इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥ स्वसंबन्धितया ह्यस्याः सत्ताविज्ञप्तितादि च ।

टी० "निरस्ते"ति, ततः किमित्यत्राह "अहमर्थविनाश" इति, यत्संबन्धित्वेन दुःखज्ञानं यत्संबन्धिनी दुःखनिवृत्तिर्यत् संबन्धिनी सुखप्राप्तिश्चेष्यते तद्विनाशो मोक्षश्चेदधिकारिविरहादप्रामाण्यं भवेत्, प्रमितिजनकत्वं हि शास्त्रस्य प्रामाण्यं, बुभुत्सितयाऽस्य शास्त्रस्य पुरुषार्थपर्यवसायित्वाभावे श्रवणमननाद्यधिकारी न सिध्येत्, न हि शास्त्रं श्रवणादिनिरपेक्षं कस्यचित्प्रमितिं जनयति, अतोऽधिकारिविरहात्प्रामाण्यं न भवेदिति शास्त्रप्रामाण्यान्यथानुपपत्तिरूपश्रुत्यर्थापत्तिरुक्ता । अहमर्थे नष्टेऽपि ज्ञप्तिर्नित्या तिष्ठतीत्यत्राह "मयि नष्टेऽपी"ति, न हि मयि नष्टेऽपि स्तम्भस्तिष्ठतीति स्वशिरश्छेदः पुरुषार्थः स्यादिति भावः । न हि केवलसंविदः श्रवणादौ प्रवृत्तिः, अपि त्वहमर्थस्यैव, अतः प्रवर्तमानोऽयं स्वनाशाय न प्रवर्त्तते अहमर्थविगमे ज्ञप्त्यवस्थानमभ्युपगम्य दूषणमुक्तम् । अथ तदवस्थानमेव नास्तीत्याह 'स्वसंबन्धितये"ति, सामान्याकारः सत्ता, विज्ञप्तिता विषयप्रकाशत्वरूपविशेषाकारः आदि-शब्देन स्वयंप्रकाशत्वं विवक्षितं. सत्ताया आश्रयसंबन्धाधीनत्वात्स्वरूपलाभे सति ज्ञप्तित्वादिसंभवाच्च सर्वं तदधीनमित्यर्थः, अतो यत्संबन्धायत्ता सत्ता तत्संबन्धवियोगे ज्ञप्तिसत्तैव नेत्याह–

मू० स्वसंबन्धवियोगे तु ज्ञप्तिरेव न सिद्ध्यति ॥ छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत् ॥ अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम् । "विज्ञातारमरे केन[1] विजानीयादिति श्रुतिः"

१ विज्ञातारमरे केन जानात्येवेति च श्रुतिः इति द्राविडपाठः ।

"एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति च स्मृतिः" ॥ नात्मा श्रुतेरित्यारभ्य सूत्रकारोऽपि वक्ष्यति। ज्ञोऽत एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितम्" ।

टी० "स्वसंबन्धे"ति, घटकाकाशदृष्टान्तव्याहत्यर्थं विषयाश्रयसंबन्धस्य सत्ताहेतुत्वे दृष्टान्तमाह 'छेत्तुरि"ति. छेदनादेरित्यादि-शब्देन सत्ता तत्फलं द्वैधीभाव इत्यादि विवक्षितम्। एवं प्रत्यक्षविरोधादसिद्धत्वाद्विपरीतसाधकत्वात्सत्प्रतिपक्षत्वाच्च संविदात्मत्वानुपपत्तेः श्रुत्यर्थापत्त्या चाहमर्थात्मत्वमाह "अत"इति. पूर्वोक्तहेतूनामियं प्रतिज्ञा, श्रुतिस्मृतिसूत्राणि दर्शयति "विज्ञातारमि"ति, ज्ञातव्यस्यात्मनो ज्ञातृत्वमुक्तं विज्ञातारमरे केन विजानीयादिति, ज्ञातृत्वस्य स्वाभाविकतया मुक्तावपि ज्ञातृत्वमस्तीति दर्शयति "जानात्येवे"ति, "ज्ञोऽत एवे"त्यत्र ज्ञशब्दनिर्दिष्ट आत्मेति ज्ञापनार्थं "नात्मा श्रुतेरि"ति सूत्रमुपात्तं, त्वया अनित्यतया अभ्युपेतस्याहमर्थस्य नित्यत्वकथनमपि तस्यैवात्मत्वसाधकमिति च ज्ञापनार्थम्. अतो नात्मेति संविदात्मत्वप्रतिक्षेपनिगमनात् पूर्वोक्ताहमर्थात्मत्वप्रतिज्ञायां संविदात्मत्वप्रतिक्षेपे च यथायथमुक्तहेतवोऽनुसंधेयाः। दूषणान्तरं व्याहतिरप्यस्तीत्याह—

मू० अहंप्रत्ययसिद्धो ह्यस्मदर्थः, युष्मत्प्रत्ययविषयो युष्मदर्थः, तथाहं जानामीति सिद्धो ज्ञाता युष्मदर्थ इति वचनं जननी मे वन्ध्येतिवद्व्याहतार्थं च, न चासौ ज्ञाताहमर्थोऽन्याधीनप्रकाशः, स्वयंप्रकाशत्वात्, चैतन्यस्वभावता हि स्वयंप्रकाशता,

टी० "अहंप्रत्यये"त्यादिना, अहंप्रत्ययसिद्ध इति, सिद्ध-शब्देन स्वतःसिद्धिः सूचिता, अत एव ह्यन्यत्र युष्मत्प्रत्ययविषय इत्युक्तम्। अहंप्रत्ययसिद्धो हीति हि-शब्देनास्मदर्थयुष्मदर्थशब्दतश्च युष्मदस्मत्प्रत्ययगोचरयोरिति तद्व्यन्यप्रसिद्धिं दर्शयति, ज्ञानमेव स्वयंप्रकाशं तद्व्यतिरिक्तत्वादहम-

र्थोऽन्याधीनप्रकाशः, अतो नात्मेति शङ्कायां हेतोरसिद्धिमभिप्रयन्नहमर्थस्य प्रकाशान्तरनैरपेक्ष्यं प्रतिजानीते "न चासा" विति, कुत इत्यत्राह "स्वयंप्रकाशत्वा" दिति, प्रकाशो—व्यवहारानुगुण्यं, स्वत एव व्यवहारानुगुण्यशक्तियुक्तत्वादहमर्थः प्रकाशान्तरनिरपेक्ष इत्यर्थः, तच्च कथमित्यत्राह "चैतन्यस्वभावता हि स्वयंप्रकाशते" ति, चेतना ज्ञानं तद्भावश्चैतन्यं ज्ञानत्वं तत्स्वभावत्वं ज्ञानत्वगुणकतेत्यर्थः, ज्ञानत्वमेव हि ज्ञानस्य स्वयंप्रकाशत्वं, तद्वदत्रापि ज्ञानत्वं प्रामाणिकं चेत्तदेव स्वयंप्रकाशत्वं भवतीत्युक्तं भवति, । अहमर्थस्य चैतन्यस्वभावत्वे श्रुतिं प्रमाणं वक्ष्यंस्तदनुग्राहकतर्कमुपन्यस्यति "यः प्रकाशस्वभाव" इत्यादिना आत्मदीपधर्मभूतज्ञानप्रभयोः साक्षाद्वा प्रणाल्या वा यादृशस्वव्यवहारानुगुण्यं तादृशं व्यवहारानुगुण्यमिह प्रकाश—शब्देन विवक्षितं, दीपस्य तमोविरोधरूपमौज्ज्वल्यं प्रकाशः, ज्ञानस्य तु स्फुरणं यस्तत्स्वभावस्तद्धर्मकः स्वव्यवहारानुगुण्यापादानशक्तियुक्तः सोऽनन्याधीनप्रकाशः स्वधर्मनिरपेक्षप्रकाश इत्यर्थः ।

मू० यः प्रकाशस्वभावस्सोऽनन्याधीनप्रकाशः दीपवत्, न हि दीपादेः स्वप्र[१]काशवत्त्वनिर्भासित्वेनाप्रकाशितत्वमन्याधीनप्रकाशत्वं च, किं तर्हि दीपः प्रकाशस्वभावः स्वयमेव प्रकाशते अन्यानपि प्रकाशयति प्रभया ॥

टी० प्रकाशस्वभावत्वासिद्धिर्न शङ्कनीया यथा प्रभाश्रयस्य दीपस्यौज्ज्वल्यं प्रत्यक्षसिद्धं तथा ज्ञातुरपि स्वत एव स्वव्यवहारानुगुण्यस्य वक्ष्यमाणश्रुतिस्वारस्यावगतत्वात् प्रकाशस्वभावस्य स्वधर्मभूतप्रकाशानपेक्षप्रकाशत्वमुपपन्नमित्येतावदेव ह्युच्यते ऽनेन ग्रन्थेन अथ चक्षुर्ग्राह्यत्वे सति प्रभाव्यतिरिक्तत्वाद्दीपो घटादिवत्प्रभावत्त्वनिर्भास्य इति दृष्टान्तस्य साध्यवैकल्यमाशङ्क्याह "न ही" ति,

न च चक्षुर्ग्राह्यत्वे सति प्रभान्यत्वाद् घटादिरिव दीपः प्रभाऽवभास्यः, अन्धकारे व्यभिचारात्, अतो न दीपस्य प्रभापेक्षेत्यभिप्रायः, अप्रकाशत्वमन्याधीनप्रकाशत्वं चेति स्वयमौज्ज्वल्यधर्मकत्वाभावस्तत्कृतप्रकाशान्त-

१ स्वप्रभावत्त्वनिर्भासितत्वेनेति क्वचित्पाठः ।

रसापेक्षत्वं च नास्तीत्यर्थः। अर्थस्थि[1]तिं वक्तुमाकाङ्क्षां दर्शयति "किं तर्ही"-ति, उत्तरमाह "दीप" इति, दीपो न केवलं स्वात्मानमेव प्रकाशयति, अपि तु स्वपरिकरेणान्यानपि प्रकाशयतीत्यतिशयमाह "अन्यानपी"ति, एवं वार्थः, दीपः प्रभानिरपेक्षप्रकाशश्चेत्प्रभावद्विषयानपि प्रकाशयेदित्यत्राह "अन्यान-पी"ति, विषयप्रकाशनक्षमोऽपि स्वरूपस्य क्वाचित्कतया विषयसंबन्धाभावात् स्वरूपेण न प्रकाशयति किं तु विषयसंबन्धिन्या स्वपरिकरभूतया प्रभयेत्यर्थः, "यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रवि रि"त्यादिनिर्देशोऽभिप्रेतः। यद्वा-नुमानविवक्षयाह "चैतन्यस्वभावता ही"ति, चैतन्यस्वभावता—ज्ञानधर्मक-त्वम् एतदेव हि स्वयंप्रकाशत्वं ज्ञानधर्मकत्वात् स्वयंप्रकाशत्वम् इत्युक्तं भवति यथा धूमवत्त्वं ह्यग्निमत्त्वमित्युक्ते धूमवत्त्वादग्निमत्त्वमित्युक्तं स्यात् तद्वत् अयं चान्वयी हेतुः। व्याप्तिं दर्शयति "य" इति, प्रकाशस्वभावः प्रका-शधर्मकः, यो धर्म्यन्तरापरोक्षावभासे साक्षाद्वा परम्परया वा योऽभासमानत-येव हेतुस्स इह। नन्याधीनप्रकाशशब्दविवक्षितः, रूपितत्समवेतार्थचाक्षुषत्व-निमित्तस्य रूपस्य स्वाश्रयेतरद्रव्यानुमापकधूमादेश्च प्रकाशत्वव्युदासाय ध-र्म्यन्तरापरोक्षशब्दौ। इन्द्रियव्यवच्छेदार्थो भासमानशब्दः पक्षसपक्षयोरनुगत-त्वाय साक्षाद्वा परम्परया वेत्युक्तं ज्ञाता स्वधर्मभूतप्रकाशनिरपेक्षसिद्धिः प्रकाशधर्मकत्वाद्दीपवदित्यनुमानशरीरं, भासमानतया साक्षाद्वा परम्परया वा धर्म्यन्तरापरोक्षावभासहेतु धर्मकत्वादिति हेतुवाचिशब्दार्थः। दीपस्य स्वधर्मभूतप्रभानपेक्षप्रकाशत्ववत् ज्ञातुरपि स्वधर्मभूतज्ञाननिरपेक्षप्रकाशत्वं सिद्धमिति पक्षधर्मताबलात्स्वयंप्रकाशत्वसिद्धिः। दृष्टान्ते साध्यान्वयं दर्श-यति "न ही"ति, साधनान्वयं दर्शयति "अन्यानपी"ति, अनुमानपरत्वा-दपि ग्रन्थस्य श्रुत्यनुग्राहकतर्कपरत्वं युक्तम्, उत्तरत्र तथा हि श्रुतय इति वक्ष्य-माणत्वात् पूर्वमनुमानं विवक्षितं चेत् तथा चेति हि वक्तव्यं उपक्रमे चैतन्य-स्वभावता हि स्वयंप्रकाशतेति सामानाधिकरण्यनिर्देशस्वारस्याच्च। पञ्च-म्यर्थत्वे हि स्वारस्यं भज्यते निगमने च चिद्रूपता हि स्वप्रकाशतेत्युक्तं तत्र चिद्रूपशब्दो ज्ञानस्वरूपत्वपरः, न तु ज्ञानधर्मकत्वपरः, अनन्तपूर्वग्रन्थे चिद्रू-पश्च चैतन्यगुण इति ज्ञानधर्मकत्वस्य पृथगुक्तत्वात्, एवं निगमने स्वयंप्र-

१ अर्थसिद्धम् इति द्राविडपाठः।

काशतापदसमामाधिकरणस्य चिद्रूपताशब्दस्य ज्ञानस्वरूपतापरत्वदर्शनात् पूर्वमपि स्वयंप्रकाशतापदसामानाधिकरणस्य चैतन्यस्वभावता चेति पदस्य ज्ञानस्वरूपतापरत्वस्य समुचितत्वाच्च चैतन्यस्वभावतेत्यादिभाष्यं श्रुत्यनुग्राहकतर्कपरम्, एवमनुग्राहकतर्कस्य ज्ञातृत्वे सत्यनुमानपर्यवसितुं ज्ञानधर्मकत्वज्ञानस्वरूपतोक्तेः, एकजातीयद्रव्ययोर्नियतधर्मधर्मिभावे प्रभाप्रभावद्दृष्टान्तोक्तेश्च ज्ञानस्य द्रव्यत्वे द्वयोर्ज्ञानयोर्नियमेन धर्मधर्मिभावो नोपपद्यते अन्यत्रादर्शनात् गुणत्वे तु ज्ञानज्ञानाश्रयत्वसंभवः, गुणानामगुणत्वात् न च द्रव्यत्वेऽपि नियताश्रयाश्रयिभावः प्रभाप्रभावतोर्दृश्यत इति वाच्यं प्रभाया विशीर्णदीपावयवत्वादित्याशङ्क्याह—

मू० एतदुक्तं भवति, यथैकमेव तेजो द्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते यद्यपि प्रभा प्रभावद्द्रव्यगुणभूता तथाऽपि तेजोद्रव्यमेव न शौक्ल्यादिवद्गुणः, स्वाश्रयादन्यत्रापि वर्त्तमानत्वाद्रूपवत्त्वाच्च, शौक्ल्यादिधर्मवैधर्म्यात्प्रकाशवत्त्वाच्च तेजोद्रव्यमेव नार्थान्तरं, प्रकाशवत्त्वं च स्वस्वरूपस्यान्येषां च प्रकाशकत्वात् अस्यास्तु गुणत्वव्यवहारो नित्यतदाश्रयत्वतच्छेत्वनिबन्धनः ।

टी० "एतदुक्त"मिति, यथैकमेव तेजो द्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते एवमात्मा चिद्रूप एव चैतन्यगुण इति, यथा—शब्दस्योत्तरत्रान्वयः प्रथमं प्रभाया विशीर्णावयवान्यत्वं प्रतिजानीते "एकमेवे"ति, एकं सजातीयं, नियतधर्मस्य कथं द्रव्यत्वमित्यत्राह "यद्यपी"ति, गुणभूता—परतन्त्रभूता अयुतसिद्धविशेषणभूतेत्यर्थः, तेजो द्रव्यमेवेति प्रतिज्ञातद्रव्यविशेषत्वसिद्ध्यर्थं प्रथमं द्रव्यत्वमुपपादयति "स्वाश्रयादि"ति, द्रव्यत्वमस्तु तत्रापि तेजस्त्वे किं प्रमाणमि?त्यत्राह "प्रकाशवत्त्वादि"ति, प्रकाशस्तमोविरोध्याकारविशेषः औज्ज्वल्यं, प्रकाशवत्त्वमुपपादयति "प्रकाशवत्त्वं चे"ति, स्वविषयपरविषयज्ञानविरोधितमोनिरसनरूपकार्यदर्शनादित्यर्थः, तर्हि कथमस्या गुणत्वव्यवहार? इत्यत्राह "अस्या" इति, तु—शब्दः शौक्ल्यादिवैषम्यपरः । अथ विशीर्णाश्रयावयवानां प्रभावत्त्वं प्रतिक्षिपति—

Digitized by Google

सू० न चाश्रयावयवा एव विशीर्णाः प्रचरन्तः प्रभेत्युच्यन्ते मणि-
द्युमणिप्रभृतीनां विनाशप्रसङ्गात् ॥

टी० "न चे"ति, कुत इत्यत्राह "मणी"ति, प्रतिक्षणविनाशप्रसङ्गा-
दित्यर्थः, तदभ्युपगमे मण्याद्यनुपलम्भप्रसङ्गपरिहाराय प्रतिक्षणोत्पत्तिरभ्यु-
पेत्या प्रतिक्षणोत्पत्तिविनाशाभ्युपगमश्चानुपपन्नः, दीपस्येवोत्पत्तिविनाश-
सामग्र्यनुवृत्त्यभावात्तदभावेऽपि तैजसत्वसामान्याद्दीप इव प्रत्यभिज्ञाबा-
धेन प्रतिक्षणविनाशादिकल्पने सत्त्वद्रव्यत्वादिभिर्घटादावपि क्षणिकत्व-
प्रसङ्ग इति भावः । रत्नेषु क्षणिकत्वं रत्नशास्त्रविरुद्धं कालविशेषे तदुत्प-
त्त्याद्यवगतेः, आदित्यादिषु च क्षणिकत्वं श्रुतिविरुद्धं "सूर्याचन्द्रमसौ धाता
यथा पूर्वमकल्पयत्" "नाग्नीषोमौ न सूर्य" इति कालविशेषे तदुत्पत्तिवि-
नाशावगतेः ।

न च सूर्यादिसृष्टिप्रलयपरवाक्यानां संतत्युपक्रमोच्छेदपरत्वं वाच्यं
रत्नसूर्यादिमात्रक्षणिकत्वे प्रमाणाभावात् तैजसत्वं तु तेजः परमाणूनिच्छ-
द्भिर्न हेतुतया वाच्यं तेजः परमाणुषु व्यभिचारात्सत्त्वादिभिः क्षणिकत्व
जगत्क्षणिकत्वं स्यादित्युक्तम् ।

ननु कर्पूरादीनां दूरोपलब्धगन्धानां गन्धाश्रयभूतावयवविशरण-
स्यावर्जनीयत्वादुत्तरकालोपलम्भाच्च प्रतिक्षणोत्पत्तिविनाशावभ्युपगन्त-
व्यौ तद्वन्मण्यादिष्वपीति, नैवं समुद्गकसंपुटादिनिवातदेशनिहितकृतपि-
हितघनसारादेर्दूरे गन्धोपलम्भाभावादाश्रयावयवविशरणाभावेन यथापूर्वं
स्थित्युपलम्भोपपत्तेश्च प्रतिक्षणोत्पत्तिविनाशौ कल्प्यौ सवातदेशस्थघनसा-
रादीनां दूरोपलभ्यमानगन्धानामल्पावयवविशरणमस्त्येव, अवयविनि
च सूक्ष्मपरिक्षयो विद्यत एव, तुलया परीक्षणेऽप्यल्पाल्पपरिमाणापक-
र्षदर्शनात्, अतः प्रतिक्षणमवयवान्तरोपनिपातविश्लेषहेतुकोत्पत्तिविनाशौ
न कल्प्यौ, कल्पनेऽपि परितः केषांचिदवयवानामुपलभ्यमानगन्धाश्रय-
त्वेनोभयवादिसंप्रतिपन्नानामेव स्थितिमात्रं कल्प्यन्तावता गन्धोपलब्ध्यु-
पपत्तेः, अनेकधर्मितदुत्पत्तिनाशापरिदृष्टतदुभयसामग्रीकल्पने गौरवाच्च ।

यद्वा घ्राणस्यापि चक्षुष इव रश्मिद्वारसंबन्धाद्दूरस्थपदार्थगतगन्धग्राहित्वं कल्प्यं गौरवाभावात्, न केवलं कल्प्यं रश्मिमत्त्वम् ॥ उक्तं च भारते "न ह्यात्मा शक्यते द्रष्टुमिन्द्रियैः कामगोचरैः । प्रवर्तमानैरनयैर्दुर्धर्षैरकृतात्मभिः ॥ तेषां तु मनसा रश्मीन् यदा सम्यङ् नियच्छति । तदा प्रकाशते ह्यात्मा दीपो दीप्यन्निवाकृतिः" रिति इन्द्रियाणां पञ्चीकृतभूताऽऽप्यायनैर्वायुतेजःप्रभृतिभिः संबन्धाद्रश्मिमत्त्वं चोपपद्यते नन्वाग्न्यातपत[1]प्तसलिलशिलादेरौष्ण्यतारतम्योपलम्भोऽग्न्यातपावयवसंक्रान्तिं विना नोपपद्यते सलिलादेः स्वत औष्ण्याभावाद्विनाश्रयधर्मसंक्रमणायोगाच्च, औष्ण्याश्रयभूताग्न्यातपावयवस्य संक्रान्तिरभ्युपेत्या । एवम् अवयवसंक्रान्तिश्च विशरणेन विना नोपपद्यते गत्वराणां रश्मीनां चरणतलानामिव कथं विशरणेन विना क्वचित्संक्रमः, अवयवतारतम्याच्चौष्ण्यतारतम्यमिति, उच्यते अग्नितप्तेष्वग्न्यवयवसंक्रान्त्यैवौष्ण्योपलम्भः सलिलादौ । संक्रान्तिमन्तोऽग्न्यवयवा एव प्रभेति न वाच्य, प्रदीपप्रभया ऽहोरात्रसंवृतेऽपि सलिलभूतलादावौष्ण्यानुपलम्भात् आतपतप्तेष्वपि न किरणविशरणादवयवसंक्रमः, तुहिनकणानामिव रविकिरणोपात्तमुक्तानामब्न्यवयवानां संक्रमणादुष्णोपलम्भोपपत्तेः ।

न चात्र कल्पकमन्वेष्टव्यं, नापि कल्पनागौरवं प्रसज्जति, आगमसिद्धत्वादस्यार्थस्य तथाहि मात्स्ये पुराणे कथ्यते "वसन्ते ग्रीष्मके रश्मिशतैः संतपति त्रिभिः । शरद्यपि च वर्षासु चतुर्भिस्संप्रवर्षति ॥ हेमन्ते शिशिरे चैव हिममुत्सृजति त्रिभि"रिति यथा वर्षासु हेमन्ते च रविकिरणमुक्तास्सलिलकणास्तुहिनकणाश्च न विशीर्णकिरणावयवाः किंतु किरणोपात्तविमुक्ता आप्यावयवा एव, एवं ग्रीष्मेषु रविकिरणजन्यं संतापनं न तद्विशीर्णावयवकार्यं किंतु तदुपात्तमुक्तावयवकार्यमिति प्रतीयते तथा "ऽग्निं वा वाऽऽदित्यः सायं प्रविशति उद्यन्तं वा वाऽऽदित्यमग्निरनुसमारोहती"ति श्रूयते अत्र चादित्यतिरोधानदर्शनावच्छिन्नकालविशेषपरौ सायंप्रातःशब्दौ, अस्य सायंभावप्रातर्भावौ रविविप्रकृष्टसन्निकृष्टतत्तद्देशविशेषवर्तिपुरुषापेक्षया सर्वदा-

१ नान्वाग्न्यातपसंबन्धात्सलिलशिलादेरिति तु पाठान्तरम् ।

पपद्यते इत्ययमर्थो भुवनकोशे स्पष्टतरः. ततश्च प्रविशतीत्यनेनाग्नावादित्यस्य व्याप्तिरुच्यमाना दूरस्थितस्य स्वरूपेण नोपपद्येति किरणद्वारा भवति अग्निरनुसमारोहतीत्यनेन अग्न्यवयवानामादित्येनोपादीयमानत्वमुच्यते न चाग्न्याधिष्ठातृदेवतारोहणपरमिदं वाक्यं "तस्माद्धूम एवाग्नेर्दिवा ददृशे" इत्यनन्तरवाक्येनादित्योपसर्पणनिमित्ततेजोमात्रकथनात्, अन्यथा सायंप्रातस्समययोस्सर्वदा संभवेन अग्नेरादित्ये सर्वदा रोहणमग्नावादित्यस्य रोहणमग्नावादित्यस्य सर्वदावरोहणं च प्रसज्येत ततश्चाग्न्यादित्ययोः स्थानविनिमयेन सर्वदा स्थितिरुक्ता स्यात्, सा च प्रमाणान्तरविरुद्धा अतश्चादित्यस्याग्नौ किरणद्वारा व्याप्तिः किरणैरग्न्यवयवोपादानं च वाक्यद्वयोक्तम् । अतश्चोपात्ताग्न्यवयववर्षेण तापनं मास्योक्तम् उत्सर्जनप्रकरणस्वारस्यात्, अतस्तुहिनकणानामिव रविकिरणमुक्तानामाग्नेयावयवानां विशीर्णकिरणावयवत्वाभावाद्रविकिरणेषु तन्मण्डले च प्रतिक्षणं विनाशोत्पत्तिक्लृप्तिरनुपपन्ना अतो न विशीर्णावयवा प्रभा दूषणान्तरमाह—

सू० दीपेऽप्यवयविप्रतिपत्तिः कदाचिदपि न स्यात्, न हि विशरणस्वभावावयवा दीपाश्चतुरङ्गुलमात्रं नियमेन पिण्डीभूता ऊर्ध्वमुद्गम्य ततः पश्चाद्युगपदेव तिर्यगूर्ध्वमधश्च एकरूपा विशीर्णाः प्रचरन्तीति शक्यते वक्तुम् ।

टी० "दीपे"ति, अवयविप्रतिपत्त्यनुपपत्तिमुपपादयति "न ही"ति, दीपः किं विशरणस्वभावः? उत स्थिरस्वभावः? विशरणस्वभावत्वे पिण्डीभावो मूर्तद्रव्यप्रतिबन्धनिबन्धनः स्यात् । स्थिरस्वभावत्वे विशरणं मूर्तद्रव्यप्रतिहतिहेतुकं स्यात् अत्रोभयमनुपलम्भहतं विशरणस्वभावे पिण्डीभावो वायुनोपपद्य इति चेत्तर्हि निवाते पिण्डीभावो न स्यात् स्तिमितसूक्ष्मवायुना पिण्डीभावश्चेद्विशरणं न स्यात्, तच्च सूक्ष्मवायुना चेदेकस्य विरुद्धस्वभावद्वयायोगात् पिण्डीभावविशरणहेतुभूतवायुद्वयमभ्युपेत्यं, तयोर्मिथः प्रतिघातकत्वादन्यतरविगमे पिण्डीभाव एव वा विशर-

णामेव वा स्यात्, तत्परिहाराय परस्परान्तरितविरुद्धस्वभाववायुद्वयपरम्परया सन्निधिविगमकल्पने गौरवं स्यात् तत्परिकल्पनेऽपि तिर्यग्गगत्वराणां वाय्ववयवानां नोदनमात्रहेतूनां परितः प्रतिबन्धकत्वायोगात् पिण्डीभावो न स्यात् ।

ननु प्रोषणाद्रवीभूतपार्थिवावयवसंदंशात्पिण्डीभावः, ततस्तदवयवगतस्निग्धत्वापगमेन संदंशकत्वाभावाद्ग्न्यवयवविशरणमित्याह "न हि विशरण"ति, यद्यग्न्यवयवा ऊर्ध्वगमनस्वभावास्तर्हि विशरणे तिर्यग्गमनं न स्यात्, यदि ते तिर्यग्गमनस्वभावास्तर्हि प्रथममूर्ध्वगतिर्न स्यात् एकजातीयद्रव्यस्योपाधिना विना विरुद्धस्वभावत्वायोगात्, उपाधिश्च न दृश्यते प्रदीपप्रभयोर्द्भिन्नावयवित्वे तु विरुद्धस्वभावत्वमुपपद्यते । किंच चतुरङ्गुलादिपरिमाणतारतम्यनियामकोऽपि नास्ति, विशरणे च पार्श्वे ऽपि विशरणं संभवति समन्ततो युगपद्विशरणे नियामकाभावादित्यभिप्रायः । किंच विशीर्णानां चावयवानां पांशूनामिव ऋजुप्रसरणनियमे च न हेतुः प्रसरणस्यार्जवनियमश्च तिरोधायकं पदार्थं प्रति ऋजुदेश एव छायायोगादवगम्यते छायावैपुल्यं तु निवार्यमाणरश्मीनां पृथुयत्त्वकृतं, नाऽऽनार्जवकृतं छायाकौटिल्यं तु तिरोधायककौटिल्यकृतं न तु प्रसरानार्जवकृतं, तच्च ऋजुप्रसारित्वसाधकं, विशीर्णावयवत्वे रेणूनामिव पवनानुत्सार्यमाणत्वं च न घटते, प्राचीनजालकनिष्क्रान्ता हि प्रभा दक्षिणानिलेन नोत्सार्यते, अन्यथा रजसामपि तत्र नोदनं प्रसज्जेत् जालकनिष्क्रान्तप्रभायाः पवनानुत्सारितत्वं ततः परस्मिन् भित्त्यादौ प्रभासंसर्गादेव गम्यते अतो धनुष्याततायामौर्व्या इव प्रभाया न विशीर्णावयवत्वमिति, ततः किमित्यत्राह—

सू० अतः सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना विनश्यन्तीति पुष्कलकारणक्रमोपनिपातात्तद्विनाशे विनाशाच्चाऽवगम्यते ।

टी० "अतः सप्रभा एव दीपाः प्रतिक्षणमुत्पन्ना" इति, तैजसत्वेन मण्यादिविनाशाभ्युपगमेऽतिप्रसङ्गात्, विशरणस्वीकारे पिण्डीभावयुगप-

Digitized by Google

द्विष्वग्निविशरणर्जुप्रसरणाद्यनेकनियमव्यवस्थापकाभावाद्यथादृष्टाभ्युपगमे विरोधाभावाच्च सप्रभाका एव दीपाः प्रतिक्षणमुत्पद्यन्त इत्यर्थः । तर्हि कथं प्रतिक्षणोत्पत्तिविनाशोपपत्तिरित्यपेक्षायां यथा मण्यादीनां प्रतिक्षणविनाशो न प्रसजति तथा दीपक्षणिकत्वे हेतुद्वयमाह "पुष्कलकारणक्रमोपनिपातात्तद्विनाशे विनाशाच्चे"ति, पृथक्कास्थनदण्डचक्रादिव्याहृत्यर्थं पुष्कल-शब्दः वर्त्यवयवाग्निसंयोगस्य दीपसामर्थ्यं प्रथमवर्त्यवयवाग्निसंयोगदृष्टम् ।

न च प्रथमावयवाग्निसंयोगस्यैव कारणत्वं शङ्कनीयं चरममध्यावयवयोरप्यग्निसंयोगे सति दीपोत्पत्तिदर्शनादतः प्रत्यवयवमग्निसंयोगात्पुष्कलकारणपरम्परा दृष्टेति प्रत्यवयवमग्निसंयोगाद्दीप उत्पद्यत एव, तत्र प्रतिक्षणमुत्पत्तौ सत्यां युगपदनेकदीपानुपलम्भाद्विनाशोऽपि सिद्धः, प्रतिक्षणविनाशस्य पृथगनुमापकमुच्यते "तद्विनाशे विनाशाच्चे"ति, वर्त्यवयवविनाशस्य दीपविनाशसामर्थ्यं चरमवर्त्यवयवविनाशे दृष्टम् एवं विनाशकारणानुवृत्तिदर्शनात् प्रत्यवयवविनाशं दीपो विनश्यत्येव, एवमुत्पत्तिविनाशसामर्थ्यानुवृत्तिभ्यां प्रतिक्षणं तावदनुमीयत इत्यर्थः । प्रभा विशीर्णावयवा न चेद्दीपसमीपे तस्या औष्ण्याधिक्यादिकं कथं. विशरणपक्षे ह्यवयवाहुल्यवैरल्याभ्यामौष्ण्याधिक्यमान्द्यादिकमुपपद्यत इत्यत्राह–

सू० प्रभायाः स्वाश्रयसमीपे प्रकाशाधिक्यमौष्ण्याधिक्यमित्याद्युपलब्धिव्यवस्थाप्यम् अग्न्यादीनामौष्ण्यादिवत्, एवमात्मा चिद्रूप एव चैतन्यगुणक इति, चिद्रूपता हि स्वयंप्रकाशता ।

टी० "प्रभाया"इति, प्रकाशाधिक्यमौष्ण्याधिक्यमित्यादीत्यादिशब्देनाश्रयविप्रकृष्टदेशे प्रकाशमान्द्यमौष्ण्यमान्द्यं च विवक्षितम् । उपलब्धिव्यव[1]स्थापकत्वे दृष्टान्तमाह "अग्न्यादीना"मिति, उक्तं दार्ष्टान्तिकेऽ-

[1] उपलब्धिव्यवस्थाप्यत्वे इति पाठान्तरम् ।

निर्दिशति "एव"मिति, चिद्रूप एवेति रूप-शब्दो धर्मिस्वरूपपरः ननु किं स्वप्रकाशत्वमित्यपेक्षायां चिद्रूपत्वं विवृणोति । "चिद्रूपता ही"ति, अनेन वक्ष्यमाणश्रुतिवाक्ये ज्ञानादि-शब्दो व्याख्यातो भवति । एवमनुग्राहकतर्कमुपपन्यस्य प्रमाणमाह–

सू० तथा हि श्रुतयः "स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव, एवं वा अरे अयमात्माऽनन्तरो बाह्यः कृत्स्नः प्रज्ञानघन एव विज्ञानघन एव "अत्रायं पुरुषः स्वयंज्योतिर्भवति न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" "अथ यो वेदेदं जिघ्राणीति स आत्मा" "कतम आत्मा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः "एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः, "विज्ञातारमरे केन विजानीयात् ।

टी० "तथा हि श्रुतय" इति, "स यथा सैन्धवघन" इति, अनन्तरः अन्तर्व्यतिरिक्तः, अबाह्यः, बहिर्व्यतिरिक्तः, एवं व्यतिरेकनिर्देशेन निःशेषग्रहणं कृतं, तदेवाह "कृत्स्न" इति, दार्ष्टान्तिकविषयो ऽबाह्य-शब्दो धर्मिपरः, अनन्तर-शब्दो धर्मपरः कृत्स्नशब्दस्तयोरेकदेशजडत्वशङ्काव्युदासार्थः । अत्र सर्वत्रैकरूप्यमेव दृष्टान्तोपजीव्यं न त्वन्यत् । दृष्टान्तदार्ष्टान्तिकविषयवाक्यद्वयेऽप्यनन्तरो ऽबाह्य इत्युक्तम् । शरीरित्वावस्थायामपि ज्ञानात्मकत्वपरं वाक्यमुपादत्ते "विज्ञानघन एवे"ति, घन-शब्दोक्तनैरन्तर्यस्य जडांशमिश्रत्वं व्यावर्तयत्येवकारः, ज्ञानत्वं नाम स्वयंप्रकाशत्वमिति ज्ञापनार्थमत्रायमिति वाक्योपादानं धर्मधर्मिभावं ज्ञापयति "न विज्ञातु"रिति, ज्ञातृसंबन्धिज्ञानस्य नित्यत्वे कथिते ज्ञानमात्रस्य नित्यत्वशङ्काव्युदासार्थं ज्ञातुरेवात्मत्वं दर्शयति "अथ" य इति, ज्ञानगुणकत्वस्वयंप्रकाशत्वयोः सहप्रतिपादकं वाक्यमाह "कतमः" इति, ज्ञानगुणकत्वज्ञानस्व-

स्वरूपप्रतिपादकवाक्यमाह "एष ही"ति, ज्ञातव्यस्य निष्कृष्टात्मस्वरूपस्य ज्ञातृत्वमाह "विज्ञाताऽरमि"ति, अनेन ज्ञातृत्वं, स्वाभाविकमिति फलितं, न केवलं संसृतिदशायां मुक्तावपि ज्ञातृत्वं ज्ञापयति–

सू०. "जानात्येवाऽयं पुरुषः" न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्" "स उत्तमः पुरुषो नोपजनं स्मरन्निदं शरीरम् एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्याऽस्तं गच्छन्ति, तस्माद्वा एतस्मान्मनोमयाद्न्योऽन्तर आत्मा विज्ञानमय इत्याद्याः, वक्ष्यति च "ज्ञोऽत एवे"ति, अतः स्वयंप्रकाशोऽयमात्मा ज्ञातैव न प्रकाशमात्रम् ।

टी० "जानात्येवाय"मिति, अवधारणासंकोचान्मुक्तावपि ज्ञातृत्वं सिद्धं, मुक्तौ ज्ञाननिषेधश्रुतीनां विषयविभागं दर्शयति "न पश्य" इति "स उत्तम" इति च, पुरुषं प्राप्तस्य मुक्तस्य ज्ञातृत्वेऽनुवर्त्तमान एव देहेन्द्रियविगमं दर्शयति "एव"मिति, अन्तःकरणोत्तीर्णस्य ज्ञातृत्वमाह "तस्माद्वा इति, अस्यार्थस्य सूत्रकाराभिप्रेतत्वमाह "वक्ष्यति चे"ति, पूर्वं सूत्रोपादानमहमर्थात्मत्वं सूत्रकाराभिमतमिति ज्ञापनार्थम्, अत्रोपादानं ज्ञानगुणकत्वज्ञानस्वरूपत्ववादिनीनां श्रुतीनामविरोधः सूत्रकाराभिमत इति ज्ञापनार्थं, ज्ञानत्वान् ज्ञानं न ज्ञानान्तराश्रय इति चेद्यदि व्याप्त्यनुरोधेनैवमुच्यते तर्हि धर्मत्वेन स्वीकार्यं, यदि श्रुतिबलात् स्वातन्त्र्येण स्वीक्रियते तर्हि श्रुतिबलादेव ज्ञानाश्रयत्वमप्यङ्गीक्रियताम् ।

न च व्याप्तिविरोधः, धर्मभूतज्ञानत्वप्रयुक्तत्वात् ज्ञाने ज्ञानाश्रयत्वस्य । श्रुत्या ज्ञातृत्वस्वयंप्रकाशत्वसिद्धिं निगमयति "अत" इति,

ननु घटमहं जानामीत्यत्र ज्ञानस्य ज्ञातृसंबन्धः प्रतीयत इत्यभ्युपेत्यम्, अन्यथा स्वज्ञानपरज्ञानविभागस्य दुर्वहत्वप्रसङ्गात्स्वसंबन्धितया प्रतीतं ज्ञानं संबन्धाप्रतीतौ कथं स्वज्ञानमिति व्यवह्रियते, अतः स्वसंबन्धः

प्रतीयत एव, तत्प्रतीतिर्न तावदहमर्थाद्भवति अहमर्थः प्रत्यक्त्वेनानुकूलत्वेनैकत्वेन च स्वतो भाति, न ह्यर्थान्तरमहमर्थो विषयीकर्तुमलमिति भवतां प्रक्रिया, अतो धर्मभूतज्ञानेनैव संबन्धप्रतीतिः, संबन्धश्च संबन्धिभ्यां विना न प्रतीयत इति ज्ञातृत्वज्ञानयोरपि संबन्धप्रकाशकज्ञानान्तरवेद्यत्वं स्यात्, ततः स्वतोऽवभासो ज्ञानान्तरेणावभासश्चेत्यवभासद्वयाभावात् ज्ञानान्तरेणैव प्रकाश्यतया स्वप्रकाशत्वासिद्धेर्ज्ञातुश्च ज्ञानस्य च जडत्वं स्यात् । किंच ज्ञानान्तरेण संबन्धप्रतीतिरवश्यं भाविनी चेत्संबन्धविषयज्ञानेन सह ज्ञातृसंबन्धस्यापि ज्ञानान्तरेण प्रतीत्यवश्यं भावात् संबन्धज्ञानपरम्पराप्रसङ्गः, अवश्यंभावाभावे सर्वज्ञानेष्वहं जानामीति ज्ञानज्ञातृसंबन्धप्रतीतिर्न स्यात्, नैवं स्वयंप्रकाशप्रत्यक्षेणैव संबन्धप्रतीतेर्नियतविशेषणविशेष्यभावो हि संबन्धः, अहमर्थो विशेष्यतैकस्वभावं स्वात्मानं प्रकाशयति, धर्मभूतज्ञानं च विशेषणतैकस्वभावं स्वात्मानं प्रकाशयति, विशेषणविशेष्यभावस्य परस्परप्रतियोगिकत्वं च ज्ञातृज्ञानयोः सहावभासादेव प्रतीयते ।

ननु संबन्धप्रतीतौ संबन्धिनोः सहावभासश्चैकज्ञानगम्यतया विना नोपपद्यत इति ज्ञातृत्वज्ञानयोर्ज्ञानान्तरवेद्यत्वं स्यात्, सुरभि पुष्पमित्यादौ भिन्नसामग्रीवेद्ययोरपि गन्धपुष्पयोस्संबन्धप्रतीतिवेलायामेकज्ञानगम्यत्वं हि दृश्यत इति चेन्न, तत्र संबन्धिनोः संबन्धेन सहैकज्ञानगम्यत्वस्य सहावभासप्रयुक्तत्वाभावात्, संबन्धिनोर्जडत्वप्रयुक्तं हि तत्रैकज्ञानगम्यत्वम्, अत्र स्वयंप्रकाशत्वात्स्वयमेव सहावभासमानयोर्ज्ञातृज्ञानयोर्विशेषणविशेष्यतैकस्वभावत्वरूपसंबन्धग्रहो ज्ञानान्तरानपेक्ष उपपद्यते, अतः संबन्धाग्रहस्वपरज्ञानविभागाभावसंबन्धज्ञानपरम्पराप्रसङ्गा दूरोत्सारिताः । एवं ज्ञातृत्वस्वयंप्रकाशत्वोपपादनेन चिन्मात्रव्यतिरिक्तत्वादिति जडत्वसाधकहेतुर्निरस्तो भवति । ज्ञानव्यतिरिक्तत्वाज्जडत्वं वदता किं स्वप्रकाशवस्तुव्यतिरिक्तत्वं हेतुरुक्तः? उत विषयप्रकाशकादन्यत्वं? प्रथमे साध्याविशिष्टत्वं, द्वितीये ब्रह्मणि व्यभिचारः श्रुत्यादिबाधश्च । अथ साश्रयत्वे तर्कमाह—

(शेषमग्रे)

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्	
	रु०	आ०
१ काशिका पंडितवरवामनादित्यविरचिता		
पूर्वार्धम्	..	.. "
उत्तरार्धम्	१०	.. "
२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	.. "
३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	.. ।)
४ लघुकौमुदी वरदराजकृता	१	.. =)
५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८	.. "
६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४	.. "
८ मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	.. "
९ शाश्वतधर्मदीपिका	१	.. "
१० अमरकोश सटीक..	४	.. "
११ योगवार्तिकम्	३	.. ।)
१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	.. "
१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-देशाधिपति रचिता	४)	.. "

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 16. Vol. IX.)

मू० [a] "किञ्च, यत्र निषेधस्तत्रतमैकरूप्यं निरूप्यम्, अन्यथा किमादाय नियमो निरूप्येत, इति कार्यगतैकरूप्यमनभिधाय न निस्तारः। [b] विनापि च नियमपदप्रवेशं कार्यगतैकरूप्यमनिरूप्याऽनिस्तार एव। [c] 'ज्ञायमानं नाच करणमि'ति हि यदि कार्य्यव्यक्ति(१)मभिसन्धाय, तदा तत्पूर्वं प्रतीतानां तच्चाकरणत्वं दुरवधारणं, ततस्तज्जातीये तज्जातीयव्यभिचारप्रतिसन्धानेऽवश्यं यतनीयमिति। [d] अथाव्यवहितार्थप्रमात्वं तथा; [e] तर्हि किमपेक्ष्याव्यवधानं? किञ्च [f] तत्?—इति वाच्यम्। इन्द्रियमपेक्ष्य तत्(२)असन्निकर्षश्च तदि(३)ति चेत्, तर्हीन्द्रियसन्निकृष्टप्रकाशत्वमिति [g] कुटिलिकार्थः, स चानुपपन्नः, [h] स्वविलोचनगोलकानुमानव्याप्तेः। * ज्ञानाजन्यज्ञानत्वं तत्? *—इति चेन्न, [i] सविकल्पकविशेषाऽव्यापनात्।

टी० ॥ यज्जात्यवच्छेदेन नियमेन ज्ञायमानकरणकत्वं निषेध्यं तस्या(४)ऽप्रसिद्धौ नियमो दुर्ग्रहः, प्रसिद्धौ च तदेव लक्षणमित्याह—। [a] "किञ्चे"ति ॥ यज्ज्ञायमानकरणत्वमप्यवच्छेदकमन्तरेण प्रत्यक्षे दुर्ग्रहमित्याह—। [b] "विनापी"ति। यद्वा, ज्ञायमानकरणकत्वनिषेधो यत्र स्यात्तत्रानुगतरूपं

(१) कार्य्यव्यक्तिम्=देवाज्ञायमानचक्षुरादिकरणकप्रत्यक्षव्यक्तिम्। तज्जातीये=प्रत्यक्षत्वावच्छिन्ने, तज्जातीयस्य=ज्ञायमानकरणत्वावच्छिन्नस्य, यो व्यभिचारस्तत्प्रतिसन्धाने इत्यर्थः।

(२) तद्=अव्यवधानम्।

(३) तद्=व्यवधानम्।

(४) तस्य=जातिरूपस्यावच्छेदकस्य। नियमः=व्याप्तिः।

वक्तव्यमित्यर्थः ॥ व्यक्तिविशेषे(१) ज्ञायमानकरणकत्वं निषेद्धुं न शक्यते, यतो ज्ञायमानेनैव केनचित्करणेन तज्जननसम्भवात्, अत एतज्जातीयं न ज्ञायमानकरणकमेतज्जातीयं च तथा—इत्यन्वयव्यतिरेकाभ्यां ग्राह्य(२)मित्याह—[c]"ज्ञायमानमि"ति ॥ प्रत्यक्षलक्षणान्तरं शङ्कते—[d]"अर्थे"ति । इन्द्रियसन्निकृष्टार्थप्रकाशत्वं साक्षात्त्वमित्यर्थः ॥ एतदेव प्रश्नपूर्वकं विशदयति—[e]"तर्ही"ति ॥ [f]"तदि"ति । व्यवधानमित्यर्थः ॥ [g]"कुटिलिकार्थे"इति । वक्रगत्या पर्यवसन्नोऽर्थ इत्यर्थः ॥ [h]"स्वविलोचने"ति । इन्द्रियाधिष्ठानत्वेन गोलकस्येन्द्रियसन्निकृष्टत्वादित्यर्थः । स्वपदं स्पष्टार्थम् ॥ [i]"सविकल्पके"ति । ज्ञानपदं(३) यदि सामान्यपरं, तदा निर्विकल्पकानन्तरभाविसविकल्पकेऽभावादिसविकल्पके चाऽव्याप्तिः । अथ सविकल्पकपरं, तदाऽभावसमवायादिसविकल्पकाव्याप्तिरित्यर्थः ॥

मू० [a]एतेन 'विषयान्तरज्ञानाजन्यज्ञानत्वं तदि'ति प्रत्युक्तं, सविकल्पकस्याधिकव्यवच्छेदरूपविषयत्वात्,[b] तदवधिज्ञानजन्यत्वात्(४) । [c]* स्वविषयानन्तर्गतार्थज्ञानाजन्यधीत्वं तत् । नच सप्रतियोगिकार्थप्रत्यक्षाव्याप्तिः, [d]प्रतियोगिनोऽपि स्वविशिष्टार्थप्रविष्टस्य तत्तया इव प्रत्यभिज्ञायां प्रत्यक्षविषयत्वोपगमात्; [e]अप्रतियोगित्वेन विशेषणाद्वा(५) *—इति चेत्तन्न, [f]स्वपदेनैव न्यारीकृतत्वात् । [g]कार्यव्यक्त्यजन्यताया

(१) देवाज्ज्ञायमानकरणकप्रत्यक्षव्यक्तिविशेषे—इत्यर्थः ।

(२) ग्राह्यमिति, तथाचाऽवश्यमनुगताऽनतिप्रसक्तरूपग्रहणापेक्षया भाव्यमिति भावः ।

(३) ज्ञानपदम्=ज्ञानाऽजन्यज्ञानत्वमिति लक्षणस्यमाद्यं ज्ञानपदमित्यर्थः । सामान्यपरम्=साधारणज्ञानवाचकम् ।

(४) तस्यातद्व्यावृत्तिरूपवैशिष्ट्यावगाहिनः सामान्यसविकल्पस्य योऽवधिस्तद्वस्तु तज्ज्ञानजन्यत्वात्सविकल्पस्येत्यर्थः । यद्वा, तस्य दीर्घादिप्रत्यक्षात्मकसविकल्पविशेषस्य योऽवधिर्ह्रस्वादिस्तज्ज्ञानजन्यत्वाद्दीर्घादिसविकल्पकस्येत्यर्थः ।

(५) तथाच स्वविषयानन्तर्गतार्थज्ञानाजन्याऽप्रतियोगिकधीत्वं साक्षात्त्वमिति पर्य्यवसितं लक्षणम् ।

दुरवधारणत्वात्, तज्जातीये तज्जातीयव्यभिचारग्रस्तग्रहणे च कार्यैकजात्ये पूर्ववत्पतनमिति । * [h] स्वकालावच्छिन्नार्थबोधत्वं साधाच्चम् *—इत्यपि न, स्वार्थाविवेचनात् । कथं चानुमानादिव्यवच्छेदः? । * [i] तच व्याप्त्यादिप्रविष्टकालनियतार्थत्वं, यत्रापि(१) चन्द्रोदयसमुद्रवृद्ध्यादौ स्वकालार्थत्वं, तत्रापि व्याप्तिप्रविष्टतैव तादृशत्वस्य प्रयोजिका? *—इति चेन्न, कथमप्यस्तु [i] तथापि स्वकालावच्छिन्नार्थत्वस्य सम्भवात् ।

टी० ॥ [a] "एतेने"ति । सविकल्पकाव्यापकत्वेनेत्यर्थः । लिङ्गादिज्ञानेन विषयान्तरेऽनुमित्यादिजननं निर्विकल्पकेन तु स्वविषये एव सविकल्पकजननमिति लक्षणकर्त्तुरभिमानः । अतद्व्यावृत्तिस्वरूपस्य वैशिष्ट्यस्य निर्विकल्पकविषयापेक्षया विषयान्तरत्वादेतदनुपपन्न इत्यर्थः(२) । यद्वा, ऽवधिज्ञानजन्यदीर्घादिप्रत्यक्षे ह्रस्वादिव्यवच्छेद एवाधिको भासते इति तदनुपपन्न इत्यर्थः ॥ एतदेवाह—। [b] "तदवधी"ति ॥ [c] "स्वविषये"ति । प्रत्यक्षं प्रत्यक्षाविषयविषयकज्ञानेन न जन्यते लिङ्गानुपधानपक्षे(३)नुमित्यादिकं च तथे(४)ति तद्व्यवच्छेद इत्यर्थः ॥ प्रतियोगिनोऽप्यभावज्ञाने भानमस्त्येवेति नाभावप्रत्यक्षाव्याप्तिरित्याह—। [d] "प्रतियोगिनोपी"ति ॥ प्रतियोगिताटस्थ्यमते त्वाह—। [e] "अप्रतियोगित्वेने"ति ॥ [f] "स्वपदेने"ति । स्वपदार्थस्याननुगमादित्यर्थः ॥ वैजात्यमन्तरेण जन्यजनकभावो दुर्ग्रह इति पूर्वदूषणम-

(१) अयं पूर्णचन्द्रोदयः स्वकालीनसमुद्रवृद्धिमान् चन्द्रोदयत्वात् अपिमचन्द्रोदयवदित्यनुमानस्य स्वकालावच्छिन्नार्थबोधत्वमस्तीत्यतिव्याप्तिरित्याशङ्क्याह—यत्रापीति । आदिपदेनायं घटो वर्तत इत्याद्यनुमानं ग्राह्यम् । तत्रापि=पूर्णिमाचन्द्रोदयकालीनसमुद्रवृद्ध्याद्यनुमितावपि । तादृशत्वस्य=स्वकालावच्छिन्नार्थत्वस्य ।

(२) लक्षणस्यादूषणपरत्वान्यार्थं इत्यर्थः ।

(३) लिङ्गोपहितलैङ्गिकभानवादिमते नियमाद्यन्यानुमितिविषयीभूतेनैव लिङ्गज्ञानेन वह्न्यनुमितिर्जन्यते अत उक्तं—लिङ्गानुपधानपक्षे इति ।

(४) स्वात्मकानुमित्यविषयीभूतलिङ्गज्ञानेन जन्यते एवेत्यर्थः ।

तिदिशति— । [g]"कार्ये"ति ॥ [h]"स्वकाले"ति । बोधकालावच्छिन्नस्यार्थस्य प्रकाशत्वमित्यर्थः ॥ व्यवच्छेद्यप्रकारमाह—। [i]"तत्रे"ति । यदा धूमस्तदा वह्निरित्याकारव्याप्तिग्रहबलायातं स्वकालावच्छिन्नत्वं, नतु विषयस्वभावाधीनमित्यर्थः ॥ बोधकालावच्छिन्नार्थबोधत्वं चन्द्रोदयादिस्थले गतमेवेत्यतिव्याप्तिरित्याह—। [j]"तथापी"ति ॥

मू० *[a]नच यज्जातीयमेवमेवेति विशेषः*। साजात्यस्य वैलक्षण्यस्याग्रतः सिद्धौ किमनेन,(१) न च तदपीति वक्ष्यते। *[b]व्याप्त्यादिकमन्तरेण? *—इति चेन्न, [c]तस्यैव समर्थत्वेन स्वकालकथावैयर्थ्यात्। यथा च न तदपि तथा वक्ष्यते(२)। [d]यत्तु कश्चिदाह—"स्वप्रकाशनिषेधात्स्वकालावच्छिन्नार्थप्रकाशत्वासंभव" इति, तदयुक्तम्, [e]'वस्तुनो यः स्वकालस्तस्य विवक्षितत्वात्, वर्तमानप्रकाशस्तथेति निरुक्तिपर्यवसानात्(३), [f]वर्तमानार्थस्य च सर्वनिर्वचनीयत्वात्। तथाचोक्तं,—"सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना"। [g]तस्मादस्मदुक्तमेव युक्तम्। * [h]षोढासन्निकर्षतराऽप्रयुक्तविषयनियमजं ज्ञानं तथा?*—इति चेन्न, [i]दोषवशजातसाक्षाद्बोधे तदसम्भवात्। *प्रमासाक्षात्कारस्तथा? *—इति चेत् [j]न, साक्षात्त्वेन प्रमेतरयोरविशिष्टतया साक्षात्त्वस्य साधारणस्यैव निर्वक्तव्यत्वात्;

(१) अनेन (=जातिघटितलक्षणेन) किमित्यन्वयः। न च तदपि=साजात्यमपि सम्भवतीति वक्ष्यते—"अथ ज्ञानस्य जातिभेदः कश्चित् साक्षात्त्वं, तत्रे"त्यादिना ग्रन्थेन।

(२) वक्ष्यते 'अनुमानादिव्यवच्छेद्यतत्तदसाधारणकारणाऽजनितधीः साक्षादिति चेदे'त्यादिग्रन्थेन। व्याप्त्यादित्वखण्डनेन वक्ष्यत इतित्वन्ये।

(३) 'स्वकालावच्छिन्नार्थप्रकाशत्वमि'ति प्रत्यक्षत्वनिरुक्ते'र्वर्तमानार्थप्रकाशसत्ता' (=प्रत्यक्षम्)—इति निरुक्तिपर्य्यवसानादित्यर्थः।

टी० ॥ ननु तथाप्यनुमितिमात्रे न तथा, यथा प्रत्यक्षे, इत्यत आह—। [a] "नचे"ति ॥ व्याप्त्यादिव्यतिरेकेण बोधकालावच्छिन्नार्थबोधत्वं विवक्षितमिति शङ्कते—। [b] "व्याप्त्यादी"ति ॥ व्याप्त्यादिकमन्तरेण ज्ञायमानबोधत्वमेव तर्हि लक्षणमस्त्विति परिहरति—। [c] "तस्यैवे"ति ॥ प्रकृतलक्षणे खण्डनान्तरमुपन्यस्य दूषयति—। [d] "यस्त्वि"ति । स्वकालावच्छिन्नत्वेनार्थबोधत्वं स्वप्रकाशपक्षे(१) सम्भवति, तस्य च निषेधादित्यर्थः ॥ स्वकालावच्छेदोपि न प्रकारत्वेन(२) विवक्षित इत्याह—। [e] "वस्तुत" इति ॥ ननु वर्तमानत्वमपि दुर्वचमित्यत आह—। [f] "वर्तमाने"ति ॥ यत्तु लक्षितं मया तदेव युक्तमित्याह—। [g] "तस्मादि"ति ॥ [h] "षोढे"ति । षोढासन्निकर्षेतरेण व्याप्त्यादिना अप्रयुक्तो यो विषयनियमस्तज्ज्ञानमित्यर्थः ॥ [i] "दोषवशे"ति । साक्षात्कारिभ्रमे दोषस्यैव षोढासन्निकर्षेतरस्य विषयनियामकत्वेन तदव्याप्तिरित्यर्थः ॥ साक्षात्कारसामान्यस्यैव लक्षणमुपक्रान्तमित्याह—। [j] "ने"ति ॥

मू० [a] अनिष्टभ्रमबुद्धिमते(३) षोढासन्निकर्षस्य [b] प्रत्येकमिलितविकल्पानुपपत्तेः । *साक्षाद्धीः [c] स्वरूपधीः(४) ([d] स्वेन रूपेण वस्तुनो भानम्?) *—इति चेन्न, अनुमानादिव्यापनात् । *अनुमानादौ लिङ्गाद्यपेक्षत्वात् तदवच्छिन्नकालसम्बद्धबोधत्वं, नत्वध्यक्षे? *—इति चेन्न, व्यभिचारात् । [e] यच्च(५) लिङ्गादि भाव्यादिबोधकं तच्च तत्कालताव्यभिचारात् । [f] एतेन 'यदि न लिङ्गकालावच्छिन्नव्यापकप्रतिभासोऽनुमानं तदा कूट(६)व्याप्यानुमितस्य व्यापकस्य दैववशात्सत्यव्याप्य-

(१) स्वविशिष्टकालविशिष्टार्थप्रकाशकत्वे ज्ञानस्य कालविशेषणीभूतस्य स्वस्यापि प्रकाशकत्वमिति भावः ।

(२) न प्रकारत्वेन विवक्षितः किन्तूपाधितयोपलक्षणतया वेति भावः ।

(३) मीमांसकं प्रति तु दोषान्तरमाह—षोढेति । षोढासन्निकर्षस्य यः प्रत्येकमिलितयोर्विकल्पस्तदनुपपत्त्यानुपपत्तेरित्यर्थः ।

(४) स्वरूपधीः साक्षाद्धीरित्यन्वयः ।

(५) उक्तं व्यभिचारमेव स्फुटयति—यच्चेति ।

(६) कूटव्याप्येनासत्यव्याप्येनाऽनुमितस्येत्यर्थः ।

Digitized by Google

व्यक्त्यन्तरवत: प्राप्तौ [g] व्याप्तिकालावच्छिन्नव्यापकप्राप्त्या तावत्यंशे प्रमात्वं प्रमाविशेषान्तर्भावाऽनिर्वाह्यमापद्येते'ति निरस्तम्, [h] भूतादिव्यापकानुमाने व्याप्यकालत्वाऽसम्भवात् ।

टी० ॥ [a] "अनिष्टे"ति । अनिष्टा भ्रमबुद्धिर्यस्य मीमांसकस्य तन्मते इत्यर्थः ॥ [b] "प्रत्येकमि"ति । षण्णां सन्निकर्षाणां प्रत्येकमन्योन्याभावो विवक्षितो? मिलितान्योन्याभावो वा?। उभयथापि सन्निकर्षस्यापि कस्यचित् षोढासन्निकर्षेतरत्वं भवतीति तदप्रयुक्तविषयनियमजत्वं तज्जन्यसाक्षात्काराव्यापकमित्यर्थः । प्रत्यभिज्ञायां तत्तांशाव्याप्तिर्न दोषस्तन्मते तत्तांशस्य स्मृतित्वात् । नरसिंहाकारं हि तज्ज्ञानं मीमांसकमते ॥ [c] "स्वरूपधीरि"ति लक्षणम् ॥ तदेव विभजते(१)—। [d] "स्वेने"ति । ननु लिङ्गाद्युपधानेनेत्यर्थः ॥ [e] "यत्रे"ति । मेघोन्नत्यनुमितभाविवृष्टौ लिङ्गकालानुपधानात् स्वरूपेणैव भानमित्यतिव्याप्तिरित्यर्थः ॥ 'लिङ्गकालोपधानमावश्यकम्, अन्यथा धूलीपटलाद्धूमिमति वह्न्यनुमितिः प्रमा स्यात्तत्प्रमात्वे च प्रमाचतुष्टये क्व सान्तर्भवेल्लिङ्ग(२)कालोपधानांशस्यासत्यत्वात्तदप्रामाण्ये प्रमाचतुष्टयान्तर्भावव्यावृत्तिर्भवती'ति कस्यचिन्मतमुपन्यस्य दूषयति—। [f] "एतेने"ति ॥ [g] "व्याप्तिकाले"ति । व्याप्तिकालावच्छिन्नव्यापकप्राप्त्या तदुपधानस्य(३) नाप्रमात्वप्रयोजकत्वमित्यर्थः ॥ एतदनुरोधेन व्याप्यकालावच्छेदः स्वीक्रियेत, यदि तन्निर्वहेच्चत्वेवमित्याह—। [h] "भूतादी"ति । अतीतानागतस्थलेऽनुमितौ तत्कालोपधानासम्भवात्संभवे वा तदप्रमात्वं(४) स्यादित्यर्थः ॥

(१) विभजते=अलक्ष्यावृत्तित्वेन दर्शयति ।

(२) लिङ्गकालोपधानस्यावश्यकत्वे तु निरुक्तानुमितेरप्रामाण्यात्प्रमान्तर्भावव्यावृत्तिर्भवतीत्याह—लिङ्गे'ति ।

(३) तदुपधानस्य=व्याप्तिकालोपधानांशस्याऽप्रमात्वप्रयोजकत्वं तु न, तदंशस्यापि सत्यत्वात्, किन्तु लिङ्गकालोपधानांशस्यैव, असत्यत्वादित्यर्थः ।

(४) अप्रमात्वं स्यात्, लिङ्गकालाऽनुपहितस्य लिङ्गकालोपहितत्वेन विषयीकरणादिति भावः ।

Digitized by Google

मू० [a] तथापि(१) चाऽन्यादिमदंशमात्रे प्रमात्वापातस्य दुष्परिहरत्वस्योक्तत्वात् । * [b] अनुपहितप्रतीतिः साक्षाद्धीः ? *—इति चेन्न, [c] विशिष्टप्रविष्टविशेष्यप्रत्यक्षाव्यापनात्(२) । * [d] करणानुपहितत्वं विवक्षितम् ? *—इति चेन्न, [e] परकरणोपहिताऽव्यापनात् । स्वकरणोपहितत्वस्य च स्वपदकुक्षिनिक्षिप्तत्वात् (३) । * व्याप्त्याद्युपहितत्वानां व्यतिरेकस्य यत्र समुच्चयः सा धीः साक्षाद्धीः ? *—इति चेन्न, व्याप्त्यादिप्रत्यक्षाव्यापनात्, [f] असिद्धत्वाच्च, [g] पर्वतोऽग्निमानित्येव प्रतिज्ञानात्, [h] शब्देन च स्वाप्रतिपादनात्, साध्यादिमितेश्च(४) प्रत्यक्षत्वापादनात् । * अथाऽव्यवहितधीत्वं(५) साक्षाद्धीत्वम् ? *—इति चेन्न, व्यवधानविकल्पानुपपत्तेः(६) । [i] यदि द्रव्यविशेषान्तरस्थितिर्व्यवधिस्तदानीमप्रत्यक्षविभुक्रियां साक्षात्त्वापत्तिः । [j] अथ ज्ञापकज्ञानस्य पूर्वसत्ता व्यवधानं [k] तदा परत्वाद्यप्रत्यक्षतापत्तिरिति । * विशिष्टवैशिष्ट्यं व्यवधानम् *—इति चेन्न, [l] धूमविशिष्टे वह्निवैशिष्ट्य-(७)मिति स्वरूपस्थितौ तथात्वे कार्यकारणभावविरोधः ।

(१) तथापि=लिङ्गकालोपहितलिङ्गिभानस्वीकारेऽपि । उक्तत्वात्=प्रमाखण्डनावसरे "एवं लिङ्गाभासादिभ्योऽपि जातमि"त्यादिना ग्रन्थेन (२३२ पृष्ठे) ।

(२) विशेष्यस्य विशेषणोपहितस्य भानादिति भावः ।

(३) स्वपदं कुक्षिनिक्षिप्तं यस्य तत् स्वपदकुक्षिनिक्षिप्तं तस्य भावस्तत्त्वं तस्मादित्यर्थः ; "अव्यापनाद्"—इति अत्राप्यनुषञ्जनीयम् ।

(४) क्वचित् "शाब्दादिमितेश्च"इति पाठः ।

(५) अव्यवहितस्य धीत्वमिति षष्ठीतत्पुरुषसमासः ।

(६) अव्यवहितत्वं व्यवधानाऽभाववत्त्वं तच्च व्यवधानविकल्पानुपपत्त्याऽनुपपन्नमित्याह—व्यवधानेति । क्वचित्तु "अव्यवधाने"ति पाठः, तत्र व्यवधानविकल्पद्वारकाऽव्यवधानविकल्पानामप्यनुपपत्तेरित्यर्थः ।

(७) "उत्पद्यते"इति शेषः ।

Digitized by Google

टी० दोषान्तरमाह—। [a] "तथापी"ति ॥ [b] "अनुपहिते"ति । अनुमित्यादौ लिङ्गशब्दसादृश्योपधानात्तद्व्यवच्छेद इत्यर्थः ॥ अनुपहितत्वमात्रमादाय दूषयति—। [c] "निर्विशिष्टे"ति ॥ [d] "करणे"ति । प्रत्यक्षे तु नेन्द्रियोपधानमित्यर्थः ॥ 'दण्डी पुरुषः' इत्यत्र घटकारणदण्डोपधानादव्याप्तिरित्याह—। [e] "परे"ति ॥ अनुमित्यादावपि व्याप्तत्वाद्युपधानमसिद्धमित्याह—। [f] "असिद्धत्वादि"ति ॥ तत्रानुमितौ तावदाह—। [g] "पर्वत"इति ॥ शाब्दज्ञाने शब्दोपधानासिद्धत्वमाह—। [h] "शब्देने"ति ॥ विकल्पानुपपत्तिमेवाह—। [i] "यदी"ति। कालाकाशाद्यनुमितावतिव्याप्तिः,स्तेषां द्रव्यान्तरानवस्थितत्वेनाव्यवहितत्वादित्यर्थः ॥ [j] "अथे"ति ॥ ज्ञापकं यल्लिङ्गादि, तज्ज्ञानपूर्वकत्ता ; तथाच ज्ञानाजन्यं ज्ञानमित्यर्थः ॥ [k] "तदे"ति । परत्वादिज्ञानानामवधिज्ञानजन्यत्वादव्याप्तिरित्यर्थः ॥ धूमविशिष्टे वह्निवैशिष्ट्यमिति यदि वस्तुगतिस्तदा वह्नौ धूमस्य कारणत्वापत्तिरित्याह—। [l] "धूमे"ति ॥

ख० [a] प्रतीतौ(१) धूमवैशिष्ट्यस्य धर्मिविशेषणत्वे हेतोरंशतः स्वहत्तिः। [b] साध्यविशेषणत्वे व्याप्तिग्राहिप्रत्यक्षे व्यवधानान्न साक्षात्त्वं स्यात्। [c] अथ ज्ञानस्य जातिभेदः कश्चित्साक्षात्त्वं, तचा(२)नुभवत्वेन परापरभावानुपपत्तिः, [d] स्मृतेरपि साक्षात्कारित्वादिति केचित्। [e] तन्न, स्मृतेस्तथात्वानभ्युपगमात्, [f] स्वप्नस्य तावत्स्मृतित्वाऽसिद्धेः, [g] सिद्धौ(३)वा तत्र साक्षात्त्वारोपोपगमात्। [h] भावनाबलजस्य च क्वचिदा-

(१) प्रतीतौ विषयविधया वर्तमानस्य (प्रतीयमानस्येति यावत्)।

(२) तत्र केचिदित्यन्वयः। केचित्=प्राभाकराः। अनुभवत्वापेक्षया साक्षात्त्वस्य परत्वे व्यापकत्वेऽनुमित्याद्यनुभवेपि साक्षात्त्वं स्यात्, तदपेक्षया साक्षात्त्वस्याऽपरत्वे (व्याप्यत्वे) तु स्मृतिरूपसाक्षात्कारिणि ज्ञानेप्यनुभवत्वं स्यादिति भावः।

(३) प्रभाकरमतमाश्रित्याह—सिद्धौ वेति।

Digitized by Google

लोकादिधर्मिकप्रियाद्याश्रयधर्मो(१)रोपत्वं शुक्तिरजतश्च-मवत्, ⁱ निमीलितनयनादेश्च स्वप्नवदेव गतिरवगन्तव्येति ।

टी० ननु धूमविशिष्टो धर्मी वह्निविशिष्टत्वेन प्रतीयत इति क्व कार्यकारणविरोध इत्यत आह—। ᵃ"प्रतीताविति"ति । तर्हि धूमविशिष्टो धर्मी वह्निमान् धूमवत्त्वादित्यनुमानं स्यात्तथाच धूमविशिष्टस्य धूमवत्त्वे सत्यात्माश्रय इत्यर्थः ॥ अथ धूमविशिष्टस्य वह्नेर्धर्मिणा वैशिष्ट्यमिति विशिष्टवैशिष्ट्यं व्यवधानं, तदा व्याप्तिमत्यत्रेपि धूमविशिष्टवह्निज्ञानादव्यवहितधीत्वं लक्षणमव्यापकमित्याह—। ᵇ"साध्ये"ति ॥ ᶜ"अपे"ति ॥ ᵈ"स्मृतेरपी"ति । अज्ञातकरणजत्वादित्यर्थः ॥ ᵉ"तच्चे"ति । साक्षात्त्वजातिवादिना नैयायिकेन स्मृतिसाक्षात्त्वानभ्युपगमात्, ज्ञानाकरणकज्ञानत्वस्य साक्षात्त्वव्यवस्थापकस्यानुभवकरणिकायां स्मृतावभावादित्यर्थः ॥ ननु स्मृतिविपर्य्यासः(२) स्वप्नः, स च साक्षात्कारीति कथं न स्मृतौ साक्षात्त्वमित्यत आह—। ᶠ"स्वप्नस्ये"ति । स्मृतिविपर्य्यासो हि स्मृतिविषये विपर्यासो न तु स्मृतिर्विपर्यस्तेत्यर्थः ॥ ननु तथैव किं न स्यादत आह—। ᵍ"सिद्धो वे"ति । यदि स्वप्नस्य स्मृतित्वमेव, तदा न साक्षात्त्वं, रात्रौ मया कामिनी साक्षात्कृतेत्यनुव्यवसायस्य साक्षात्त्वारोपरूपत्वादित्यर्थः ॥ ननु कामातुरकामिनीसाक्षात्कारः स्मृतिरेव विषयासन्निकर्षेण तदनुभवत्वाभावादत आह—। ʰ"भावनाबलजस्ये"ति ॥ ननु निमीलितनयनस्य यः कामिनीसाक्षात्कारः स स्मृतिरेव धर्म्यवच्छेदेनारोपानुपपत्तेरतस्तत्र साङ्कर्य्यं स्यादित्यत आह—। ⁱ"निमीलिते"ति ॥

मू० ᵃ"इदं(३) तु स्यात्, ᵇ परमाण्वादिबुद्धावनुव्यवसीयमानायां परमाणुप्रतीत्यंशे(४)पि साक्षात्त्वमनुभूयते इत्यत्र ᶜन नः

(१) प्रियादिः कामिन्यादिराश्रयो येषां धर्माणां गौरवर्णमुखनासिकादीनां ते प्रियाद्याश्रयधर्माः, प्रियाद्याश्रयस्य धर्मा इति वा समासः । तथा च शुक्तिरजतवद्विपर्यासानुभवरूपत्वाद्भावनाबलजसाक्षात्कारस्य न स्मृतित्वम् ।

(२) स्मृतिविपर्य्यासः=विपर्यस्तस्मृतिरित्यर्थः ।

(३) परोक्तदूषणं दूषयित्वा स्वाभिमतं दूषणमाह—इदमिति ।

(४) अत्र मूलव्याख्यानयोः साकल्याय "परमाणुप्रतीत्यंशे"—इत्यस्य परमाण्वंशे—इत्यर्थो बोध्यः । तथाच परमाणुज्ञानवानहमित्यनुव्यवसायस्य परमाण्वंशेपरोक्षत्वात्तदंशे चापरोक्षत्वात्सङ्करः ।

Digitized by Google

सम्प्रतिपत्तिः । [d] अन्यथा लिङ्गबुद्धिलक्षणया प्रत्यासत्त्या वह्निरपि मानसप्रत्यक्ष एव, न लैङ्गिकः, इति परेण सुवचत्वात् । एवं प्रत्यभिज्ञायां पूर्वदेशकालस्थितिमस्य पश्यामीति कस्यानुभवो ? यद्बलात् [e] तथाभ्युपेयम् । [f] तस्मात्प्रतीतिकलङ्कोऽयम् । [g] यदि च साक्षात्त्वजातिरध्यक्षमानिका, तदा प्रतीतौ कस्याञ्चिदध्यक्षानध्यक्षविवादो न स्यात् । नहि घटादिप्रत्यक्षत्वे विवदन्ते । * क्वचिदस्फुटत्वाद्विवादः ? *—इति चेन्नैवम् ।

टी० तत्किं साक्षात्त्वं जातिरेव ? तथाच तदेव लक्षणं प्रत्यक्षस्येत्यत आह—। [a] "इदमि"ति ॥ साक्षात्त्वमिव परोक्षत्वमपि जातिः स्यात्तथाच तयोः सङ्करोऽत्र दोष इति वक्तुं पीठमारचयति—। [b] "परमाण्वादी"ति । "अनुव्यवस्यमानायामि"त्यत्रा"ऽनुव्यवसीयमानायामि"ति युक्तः पाठः, साधातोर्वा गणपाठसिद्धस्यायं प्रयोगः ॥ ननु तत्र परमाण्वंशेऽपि साक्षात्त्वमनुभूयत एवेत्यत आह—। [c] "न नः सम्प्रतिपत्तिरि"ति ॥ नन्वसम्प्रतिपत्तिमात्रेण न वस्तुनिवृत्तिरित्यत आह—। [d] "अन्यथे"ति । यद्यप्यन्यबुद्धिर्नान्यत्र प्रत्यासत्तिस्तथापि लक्षणादूषकस्य परस्यायमभिप्राय इत्यर्थः । यद्वा, लिङ्गबुद्धिपदेन व्याप्तिस्मृतिरुक्ता, तथाच स्मृत्युपनीत(१)वह्निर्वैशिष्ट्यं पर्वते प्रत्यक्षेणैव भासते इति सुवचमित्यर्थः ॥ [e] "तथाभ्युपेयमि"ति । प्रत्यभिज्ञायां तत्तांशस्य साक्षात्त्वमभ्युपेयमित्यर्थः ॥ [f] "तस्मादि"ति । प्रत्यभिज्ञायां तत्तांशे परोक्षत्वमिदन्तांशे साक्षात्त्वमिति साङ्कर्यम् । एवं(२)परमाण्वनुव्यवसायेऽपीत्यर्थः ॥ दूषणान्तरमाह—। [g] "यदि चे"ति । साक्षात्त्वसंशयः क्वापि न स्यादित्यर्थः । यद्वा, अभावज्ञाने भाट्टनैयायिकयोर्वाप्यादिज्ञाने वा साक्षात्त्वाऽसाक्षात्त्वविवादो न स्यादित्यर्थः ॥ (शेषमग्रे)

(१) व्याप्तिस्मृत्युपनीतेत्यर्थः ।
(२) सङ्करलक्ष्याभिधानार्थं पूर्वोक्तं पुनः स्मारति—एवमिति ।

Digitized by Google

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page 25. Vol. IX.*)

मू० ॥ न हि भूमिरूषरवती मृगतृड्-
जलवाहिनीं सरितमुद्वहति ॥
मृगवारिपूरपरिवारवती
न नदी तथोषरभुवं स्पृशति ॥ २५ ॥

टी० ॥ ननु यद्याऽऽत्मनि बन्धो वर्त्तते तदैव कथं तत्र तदभावो घटेत भावाभावयोरेकदैकत्र विरोधादित्याशङ्कां परिहरन् पूर्वपद्योक्तमर्थं दृष्टान्तेन स्पष्टयति । न हि भूमिरिति । मृगतृड्जलवाहिनीमिति । मृगैस्तृषावशादारोपितजलप्रापणीमित्यर्थः । अत्रोपाधिनात्मारोपितं बन्धनं न स्पृशतीत्यत्र दृष्टान्तः प्रथमेनार्द्धेन दर्शितः । द्वितीयेन त्वारोपितो बन्धस्तं न स्पृशतीत्यत्रेति द्रष्टव्यम् । इदमत्राभिप्रेतम् । मरुभूम्यादौ जलाद्यारोपदशायामप्यदुष्टाक्षाणां विशेषदर्शनवतां तदा तत्र जलाद्यभावस्य प्रमितत्वाद् भावाभावयोः समसत्ताकयोरेकदैकत्र विरोधो न विषमसत्ताकयोरित्यभ्युपेयम्, तथा चात्मनि बन्धस्य मिथ्यात्वात्तदभावस्य त्रैकालिकस्य वास्तवत्वात्तयोरेकदैकत्र न विरोध इति ॥ २५ ॥

मू० ॥ न तव क्व चिद् गमनमस्ति विभो-
र्न पुराष्टकस्य जडरूपभृतः ॥
न च मध्यवर्त्तिजडचिद्वपुषो-
र्गमनक्षमं किमपि संभवति ॥ २६ ॥

टी० ॥ नन्वेष आत्मा उत्क्रामतीत्यादिश्रुत्या जीवस्योत्क्रान्तिगत्यागतिभिः संसारप्रतिपादनात् कथं तस्य मृषात्वमित्याशङ्क्य युक्तिभिस्तावत्तदसंभवमाह । न तवेत्यादिना । किं चिदात्मनो गत्यादिरूपः संसारो वास्तवः, किं वा जडस्य देहस्य, उत तृतीयस्य चिज्जडात्मकस्य । नाद्यः, तस्याणुमध्यमपरिमाणायोगेनसर्वगतस्य वास्तवगत्यादेरसंभवात् । न द्वितीयः, तस्य पुर्यष्टकान्तःपातिनो घटकुड्यादिवज्जडस्याक्तसंसारायोगात् ।

Digitized by Google

न तृतीयः, चिज्जडात्मकस्यैकस्य वस्तुनो विरुद्धत्वेनासंभवात् कस्य गत्यादि स्यादित्यर्थः। जडचिद्रुपयोर्मध्यवर्तिताभ्यामन्यत् तृतीयं चिज्जडात्मकं वस्त्वस्ति यावत् ॥ २६ ॥

मू० ॥ पुरवेष्टितं न खलु चिद्वलयं
परलोकमार्गमनुसर्तुमलम् ॥
घटवेष्टितं न हि नभोवलयं
व्रजति व्रजत्यपि घटेऽविततेे ॥ २७ ॥

टी० ॥ जीवस्य ब्रह्मात्मना विभुत्वेऽपि लिङ्गावच्छिन्नतया परिच्छिन्नत्वाद् गत्याद्युपपत्तिरित्याशङ्क्य तथाप्युपाधेरेव गमनं स्यान्नात्मन इति दृष्टान्तेनाह। पुरवेष्टितमिति। चिद्वलयम्, चितः परिच्छिन्नरूपम्। घटस्याविततत्वमव्यापित्वम् ॥ २७ ॥

मू० ॥ घट एव गच्छति नभस्त्वचलं
व्रजता घटेन तु ततस्च ततः ॥
परिवेष्टनेन घटखं क्रियते
घटखानि तत्र सुबहूनि ततः ॥ २८ ॥

टी० ॥ दृष्टान्तासंप्रतिपत्तिमाशङ्क्याह। घट एवेति। ननु शुद्धस्य नभसोऽचलत्वेऽपि घटावच्छिन्ननभसो यत्रयत्र घटो गच्छति तत्रतत्र दर्शनात् तस्यापि गमनमुपेयमिति तत्राह। व्रजतेति। तुशब्दः शङ्कानिरासार्थः। घटतत्क्रियासंतत्या घटनभसोरन्योऽन्यसंयोगस्य जायमानत्वादवच्छेदकभेदेनावच्छिन्ननभसोऽपि नानाभूतस्य जायमानत्वात् सर्वत्र तस्यैकस्य दर्शनात्तद्गमनं मानहीनमित्यर्थः ॥ २८ ॥

मू० ॥ पुरमेव गच्छति चितिस्त्वचला
व्रजता पुरेण यदि सापि चितिः ॥
परिवेष्ट्यते तु सुबहूनि तदा
वलयानि पूर्ववदुपाश्रयसे ॥ २९ ॥

टी० ॥ तच्चैतदेवास्त्वात्मनः परलोकगमनं यल्लिङ्गगमनप्रयुक्तं तदवच्छिन्नचैतन्यस्य तत्र जन्मेति शङ्कते । पुरमेवेति । यद्युपाश्रयस इति संबन्धः । तुशब्दो मुख्यगमनाभावाङ्गीकारार्थः ॥ २९ ॥

मू० ॥ अकृतागमश्च कृतनिष्फलता
फलतः समापतति कर्मगतेः ॥
अपरस्य भोक्तुरुदयाच्च दिवि
व्यसनस्य संततिरहो विषमा ॥ ३० ॥

टी० ॥ दूषयति । अकृतागम इति । भूभागे ह्युपाधिपरिच्छिन्नचैतन्यस्य सुकृतादिकर्तृत्वम्, तस्यास्मिन् पक्षे परलोकगमनाभावाच्च तत्फलभोक्तृत्वम् । यच्च परलोकगाम्युपाध्यवच्छिन्नं चैतन्यं फलभोक्तृत्वेनाभिमतम्, न तस्य तत्कर्तृत्वमित्यकृताभ्यागमादि देहात्मवाद इवापद्येत । नन्विहलोकपरलोकयोश्चैतन्यस्य स्वरूपेणैकत्वात् कथं देहात्मवादसमदोषापत्तिरिति तत्राह । फलत इति । शुद्धचिदात्मनः कर्तृत्वायोगादुपाध्यवच्छिन्नस्य तदुपेयम्, तस्य चेह कर्मकर्तुः परलोकगमनादेरुक्तरीत्याऽसंभवादकृताभ्यागमादेर्दुष्परिहरत्वात् फलतो देहात्मवादसमतेत्यर्थः । नन्ववच्छिन्नचैतन्यानामन्यत्वेऽपि संतानैक्यादुक्तदोषानवकाश इत्याशङ्क्य, तर्हि बौद्धमतापात इत्यभिप्रेत्याह । व्यसनस्येति ॥ ३० ॥

मू० ॥ चलने ह्युपाध्यभिमतस्य भवे-
ज्जनितस्य तेन विगमः सुदृढम् ॥
ननु कुण्डलापसरणे पुरुषा-
दथ न प्रणश्यति न कुण्डलिता ॥ ३१ ॥

टी० ॥ ननु घटे चलति तदवच्छिन्नाकाशस्य तत्संनिहितद्रव्यस्येव सर्वत्र प्रत्यभिज्ञायमानत्वादबाधितप्रत्यभिज्ञया तस्यैकत्वे सत्यवश्यमुपेयमन्यत्र गमनम्, एवं पुरोपहितचैतन्यस्यापि परलोकगमनमित्याशङ्क्य, उपाधिसंयोगस्य नानात्वेन तद्घटितोपहितनानात्वस्योभयत्रापरिहार्यत्वादुत्तरजन्मसमये पूर्वनाशस्यावश्यकत्वात्तत्प्रत्यभिज्ञाप्रामाण्यायोगाद् वास्तवगम-

नायोग इत्याह । चलन इति । उपाध्यभिमतस्य, उपाधित्वेनाभिमतस्य । तत्र विशेषणसंबन्धापगमे विशिष्टापगमं दृष्टान्तयति । ननु कुण्डलेति । न प्रणश्यतीति न किं तु प्रणश्यतीत्यर्थः ॥ ३१ ॥

मू० ॥ न पुरान्वयश्च तव चिद्वपुषः
परमार्थतो भवति तर्कसहः ॥
नभसो यथा घटसमागमनं
न ततोऽपि लिङ्गघटितो व्रजसि ॥ ३२ ॥

टी० ॥ चिदात्मनः परसंबन्धमङ्गीकृत्य तद्गमनाद् वास्तवं गमनं ने-त्युक्तम्, इदानीं तस्य तत्संबन्ध एव विभोर्दुर्निरूपः कुतस्तदधीनं गमनमि-त्याह । न पुरान्वय इति । चोऽवधारणे । नभसो निरवयवत्वमतेनोदाहरण-माह । नभस इति । समागमनं संयोगो यथा न तर्कसह इत्यनुषङ्गः ॥ ३२ ॥

मू० ॥ नभसः प्रदेशविरहान्नभसो
न घटः प्रदेशपरिवेष्टनकृत् ॥
न नभः समस्तमपि वेष्टयते
नभसोऽवशेषविरहापतनात् ॥ ३३ ॥

टी० ॥ विभुद्रव्यस्य सकलमूर्त्तद्रव्यसंयोगित्वाद् घटसंयुक्तस्य नभस-स्तदवच्छिन्नत्वोपपत्तेर्दृष्टान्तोऽसंमत इत्याशङ्क्याह । नभस इति । घटसंयोगः किं नभसः प्रदेशसमवायो तमवच्छिनत्ति, किं वा नभोव्यापी सन् कृत्स्नं नभोऽवच्छिनत्ति । नाद्यः, तस्य परमतेऽवयवपर्यायप्रदेशस्याभावात् । घटा-वच्छिन्नभाग एव तत्प्रदेश इति चेन्न । परस्पराश्रयापत्तेः । तत्संयोगे सति नभसस्तदवच्छिन्नभागसिद्धिस्तत्सिद्धौ च तदाश्रितसंयोगसिद्धिरित्यन्योऽ-न्यापेक्षणात् । न द्वितीयः, परिच्छिन्नद्रव्यसंयोगस्य विभुद्रव्यव्यापित्वासंभवेन नभोमात्रस्य तदवच्छिन्नत्वायोगात् । इतरथा घटाद्यनवच्छिन्नाकाशाद्यभा-वापातात्, तथा चालोकानवच्छिन्ननभसोऽसत्त्वेन नभसि तमः कदाऽपि न स्यात् । स्याच्च देहसंयोगस्यात्मव्यापित्वात्तदधीनदुःखादेरपि तद्व्यापित्वम् । न चैतदिष्यते, इति नभसो घटावच्छिन्नत्वं वास्तवं न घटत इत्यर्थः ॥ ३३ ॥

मू० ॥ परमात्मभागपरिवेष्टनकृ-
न्न पुरं तथाऽनवयवो हि परः ॥
न च कृत्स्नमेव परमं पुरुषं
पुरवस्तु वेष्टयितुमुत्सहते ॥ ३४ ॥

टी० ॥ तथापि स समानः सन्नुभौ लोकावनुसंचरति, स धीः स्वप्नो भूत्वेत्यादिश्रुतिसिद्धत्वादात्मनः पुरावच्छिन्नत्वं वस्तुसदेवेत्याशङ्क्य, पूर्वोक्तविकल्पदोषयोरत्रापि तुल्यत्वादाविद्यकावच्छिन्नत्वावनुवादिनीयं श्रुतिरिति वक्ष्यते, ततो नैतद् वस्तुसदित्यभिप्रेत्याह । परमात्मेति । पूर्वपक्षोक्तविकल्पदूषणातिदेशार्थस्तथाशब्दः । आत्मानवयवत्वस्य श्रुतियुक्तिभ्यां प्रसिद्धिर्हिशब्दार्थः ॥ ३४ ॥

मू० ॥ यदि कृत्स्न एव परमः पुरुषः
पुरवेष्टितो भवति जीवतया ॥
न तदेश्वरो भवितुमुत्सहते
न च जीवजातमपरं सकलम् ॥ ३५ ॥

टी० ॥ नन्वव्याकृताकाशाद्युपाधेर्व्यापित्वात्तदवच्छिन्नत्वं विभोरपि चिदात्मनः सर्वात्मना घटत इत्याशङ्क्य, तथापि तदवच्छिन्नः किं जीव उतेश्वरः, आद्ये सर्वज्ञादिरूप ईश्वरो न लभ्येत, तथा च यः सर्वज्ञः स सर्ववित्, य आत्मनि तिष्ठन्नित्यादिश्रुतिविरोध, इत्यभिप्रेत्याद्यपक्षमनुवदन्नाह । यदि कृत्स्न इति । द्वितीय ईश्वरादपकृष्टजीवाभावो जीवतारतम्याभावश्च स्यादित्याह । न च जीवजातमिति ॥ ३५ ॥

मू० ॥ गुरुशिष्यसङ्गतिरतो न भवे-
न्न च बन्धमोक्षनियमो घटते ॥
विषयं विना सकलमापतति
स्फुटमेव वेदवचनं च वृथा ॥ ३६ ॥

टी० ॥ ईश्वरासत्त्वे दोषान्तरमाह । गुरुशिष्येति । न च जीवस्यैव हिरण्यगर्भादेः सर्वज्ञत्वाद् गुरुत्वमिति वाच्यम् । यो ब्रह्माणं विदधाति

पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इत्यादिश्रुतिभिः तद्विद्याया अपीश्वराधीनत्वप्रतीतेस्तस्यापि स्वतस्तदसंभवादिति भावः । जीवभेदाभावे दोषमाह । न च अन्येति । किं च ज्ञानकर्मणोरीश्वरस्यानधिकारात्तदतिरिक्तजीवाभावेऽधिकार्यभावात् कर्मज्ञानकाण्डात्मकः सकलो वेदो व्यर्थः स्यादित्याह । विषयं विनेति ॥ ३६ ॥

मू० ॥ न पुरान्वयोऽत्र उपपत्तिसहः

परमार्थतोऽस्ति परमार्थदृशेः ॥

वियतो घटान्वयवदेव ततः

परिकल्पितं पुरसमागमनम् ॥ ३७ ॥

टी० ॥ दृष्टान्तदार्ष्टान्तिकयोरुपाध्यवच्छिन्नत्वं वास्तवं दुर्निरूपमित्युक्तमुपसंहरति । न पुरान्वय इति । कथं तर्ह्युभयत्र तत्परिच्छिन्नत्वधीरित्याशङ्क्य, असंभावितस्यानुभूयमानस्यापि नभोनैल्यादिवत् कल्पितत्वमुपेयमित्याह । तत इति ॥ ३७ ॥

मू० ॥ यत एवमेतदुपपत्तिपथं

न तव प्रयाति विरहय्य तमः ॥

परलोकमार्गगमनं स्वतमः-

परिकल्पितं चलनवन्नभसः ॥ ३८ ॥

टी० ॥ ननु तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यामित्यादिना सूत्रकारेणैव जीवस्य भूतपरिष्वक्तस्तदधीनगत्यादेः श्रुतिप्रतिपन्नस्य न्यायैरुपपादितत्वात् कथं तदपह्नव इत्याशङ्क्य, घटाकाशस्येव तस्योक्तविधया वस्तुतो गत्यादेरसंभवात्तस्योपाधिकत्वनिरूपणेन मिथ्यात्वमेव तदभिप्रेतं न सत्यत्वमित्यभिप्रेत्याह । यत एवमिति । एतत्, पुरसमागमनम् । परलोकपदात् प्राक् तत इति पूरणीयम् ॥ ३८ ॥

मू० ॥ पुरधर्ममात्मनि विकल्प्य तथा

स्वचिदात्मनां च पुरधर्मतया ॥

स्वपुरं स्वयं च दृढमेकतया

परिकल्पयन् व्रजसि मूढमतिः ॥ ३९ ॥

टी० ॥ ननु घटाकाशदृष्टान्तेनात्मनः पुरोपाधिकाऽलीकसंसाराङ्गीकारे कथमहङ्कारादिरूपे पुरे चैतन्यानन्दादिरूपात्मस्वभावप्रतिभासः स्यात्, न ह्याकाशोपाधौ घटे तत्स्वभावो नीरूपत्वामूर्त्तत्वादिः प्रतिभासत इत्याशङ्क्य अहङ्कारादेरात्मनश्च परस्पराभेदाध्यासाधीनः परस्परस्वभावव्यत्यासः, घटाकाशयोस्तु परस्पराभेदाध्यासाभावात्तदभाव इत्यभिप्रेत्याह । पुरधर्ममिति । जाड्यगतिदुःखादिसंसारमित्यर्थः । चशब्द आनन्दादेः समुच्चयार्थः । पुरधर्मतया, विकल्प्येत्यनुषज्य व्रजसीति योजनीयम् । धर्मव्यत्यासकल्पनायां धर्म्यभेदाध्यासहेतुमाह । स्वपुरमिति । तत्रापि हेतुमाह । मूढमतिरिति । मोहावृतस्वयाथात्म्यानुभव इत्यर्थः ॥ ३९ ॥

मू० ॥ परिपूर्णचिद्घन: सततं

स्वमहिम्नि तिष्ठसि निरस्तमले ॥

न तथापि तत्त्वमिति वाक्यकृतां

मतिमन्तरेण तव केवलता ॥ ४० ॥

टी० ॥ कल्पितस्यापि संसारस्यानादित्वादात्मनो न नित्यमुक्ततेत्याशङ्क्य, कल्पितराहित्यस्य वास्तवस्याधिष्ठाने तत्कालेऽप्युपपादितत्वात् सदा नित्यशुद्धादिरूप आत्मेति फलितमाह । परिपूर्णेति । तर्हि मुमुक्षूणां शमादिपूर्वकश्रवणाद्यायासो वृथेत्याशङ्क्य, अविद्यादशायामनर्थस्यैव तत्र प्रतिभासात् तत्प्रतिभासशून्यनिरतिशयानन्दमात्रानुभवरूपकैवल्याप्रतिभासादज्ञानस्य तस्य विस्मृतकण्ठमणिवत् प्रेप्साविरोधित्वाभावादतथाविदानाज्ञाननिवर्त्तकज्ञानाय मुमुक्षुव्यापारोऽर्थवानित्यभिप्रेत्याह । न तथापीति ॥ ४० ॥

मू० ॥ न तव प्रतीचि करणानि बहि-

र्विषयाणि येन करणानि सदा ॥

सहजं च गाढमतिमूढतमं

तम इत्यतः पुरमनुव्रजसि ॥ ४१ ॥

टी० ॥ ननु वाक्यकृतामिति विशेषणमयुक्तम्, अविद्यादिनिवर्त्तकसाक्षात्कारस्यात्मन्यन्यथैव संभवादित्याशङ्क्याह । न तवेति । किं वा बाह्याभ्यन्तरकरणानामन्यतमजन्यो ब्रह्मात्मसाक्षात्कारस्तदज्ञाननिवर्त्तक इत्युच्यते, किं वा स्वरूपसाक्षात्कार एव । नाद्यः । पराञ्चि खानि व्यतृणत् स्वयंभूरितिश्रुतेरनुभवाच्च येन स्वभावतोऽज्ञस्य तव सर्वाणि करणानि पराग्विषयाणि तेनाविषयस्वप्रकाशचिद्रूपे प्रतीचि तानि न प्रवर्त्तितुं समर्थानीत्यर्थः । द्वितीये स्वरूपचैतन्याज्ञानयोः सहभावस्यानादिकालेऽविरलमनुवर्तमानत्वाच्च स्वरूपचैतन्यस्य तन्निवर्त्तकत्वोपपत्तिः । तस्मात्तत्र वाक्यकृत एव साक्षात्कारोऽभ्युपेय इत्यभिप्रेत्याह । सहजमिति । एवं प्रासङ्गिकं चोद्यं निरस्य, कल्पितपुरोपाधिनात्मनि कल्पितं संसरणमिति प्रकृतमुपसंहरति । इत्यत इति ॥ ४१ ॥

मू० ॥ स समान इत्युपनिषद्वचनं
प्रतिपादयत्युदितमर्थमतः ॥
स्वमनीषिकेति न कदा चिदपि
प्रतिपत्तिरत्र भवतो भवतु ॥ ४२ ॥

टी० ॥ नन्वविद्यकोपाधिकल्पितमात्मनः संसरणमिति स्वकपोलकल्पितयुक्तिभिर्मां प्र॰ारयसि, न त्वत्र किं चिन्मानमस्तीति तत्राह । स समान इति । सः, योऽयं विज्ञानमय इत्यादिना बुद्ध्यादिभ्यो विवेचितश्चिदात्मा स समानः सन्माध्यन्दिनशाखायां वाक्यशेषे स धीरिति श्रवणाद् बुद्ध्यैक्यमापन्नः सन्नुभौ लोकौ इहलोकपरलोकौ बुद्धिमनुसंचरति । एतच्च तदीयसकलव्यापारानुकरणोपलक्षणार्थम् । तस्य मिथ्यात्वमाह । ध्यायतीव लेलायतीव चलतीव । वस्तुतो न ध्यानादि करोति किं तु तत् करोतीव भ्रान्त्या भातीतीवशब्दात् प्रतीतेरात्मनि संसरणं कल्पितमितीदं वचनं प्रतिपादयतीत्यर्थः । तत्कल्पितत्वस्य प्रामाणिकत्वे फलितमाह । अत इति । अत्र, संसारमिथ्यात्वे ॥ ४२ ॥ (शेषमग्रे)

काशीस्थ राजकीयप्रधानपाठालयाध्यापकेन श्रीद्विवेदहरिनाथशर्मणा ।

श्रौतपदार्थनिर्वचनम्

अथाग्निष्टोमसम्बन्धिपदार्थनामान्युच्यन्ते ।

(*Continued from page* 32. VOL. IX.)

३६६ शालामुखीयं गत्वा यजमाने ऽन्वारब्धे तथैव जुहोति । ये देवा यज्ञहनों० गच्छेम सुकृतो वयं स्वाहा । इति । ये देवा यज्ञमुषों०वयं स्वाहा । इति । तत आग्नीध्रीयं गच्छति । आगन्म मित्रावरुणा०रोचने दिवः । इति तत्र ये देवा इत्यादि होमद्वयं तत्र पृथिव्यामित्यस्य स्थानेन्तरिक्ष इत्यूहः । तत आहवनीयसमीपं गच्छति । यास्ते रात्रीः० स्तरतारआंसि । इति । तत्रापि ये देवा इति होमद्वयं भवति । मन्त्रे पृथिव्यामित्यस्य स्थाने दिवीत्यूहः । तत आहवनीयमुपतिष्ठते । येनेन्द्राय० आधेह्येनम् । इति । इदं दक्षिणोत्तराङ्गहोमोपस्थानमित्युच्यते ॥

३६७ अध्वर्युर्यजमानं प्राङ्नमीनयति । विसुवः पश्य व्यन्तरिक्षम् । इति सदस्युपवेशयति । यतस्वसदस्यैः । इति यजमानो दक्षिणाः समनुदिशति । अस्मद्राता देवत्रा० तन्नः सꣳस्कृतम् । इति । अयं दक्षिणासमनुदेशः ॥

३६८ अध्वर्युः प्राञ्चायन्नाह । इन्द्राय मरुत्वते ऽनुब्रूहि । इति । प्रतिप्रस्थाता मरुत्वतीयौ ग्रहावादाय निष्क्रामति । अध्वर्युर्दक्षिणेन प्रथमं सव्येन द्वितीयं ग्रहमादायोत्तरतस्तिष्ठते प्रति प्रस्थात्रे द्वितीयं प्रदायाऽऽश्राव्याऽऽह । इन्द्राय मरुत्वते प्रेष्य । इति । वषट्कारे ऽनुवषट्कारे चोभौ जुहुतः । प्रतिप्रस्थाता ऽध्वर्युपात्रे ग्रहस्य संस्रावमवनयति । अयं मरुत्वतीयग्रहद्वयप्रचारः ॥

३९९ अध्वर्युस्तमाह । प्रतिप्रस्थातरेतेन पात्रेण तृतीयं मरुत्वतीयं ग्रहं गृहाण । इति । प्रतिप्रस्थाता तस्मिन् द्रोणकलशात्परिप्लु-पात्रेण गृह्णाति । मरुत्वा२ इन्द्रवृ०प्रदिवः सुतानाम् । उप०-मरुत्वते०मि । इति । पूर्ववत्सादयति । इदं तृतीयमरुत्व-तीयपात्रे सोमग्रहणम् ॥

४०० द्विदेवत्यवद्धोमगमने पात्रपरिहरणम् । अध्वर्युर्होत्रे पात्रं प्रदाय तेन भक्षिते तं प्रतिप्रस्थातारं चो०हूय भक्षयति । भक्षणमन्त्रे रुद्रवद्गणस्येति वसुमद्गणस्येत्यस्य स्थाने । एवं तावुपहूय प्रति-प्रस्थाता । अध्वर्युः पात्रं निगृह्याऽऽवृत्येडाजपं कृत्वा शस्त्रं प्रतिगीर्य शस्त्रसमाप्तौ माध्यन्दिनसवने सर्वेषाकुथं वाचीति वदति । तत्रैव पात्रं निधाय शस्त्रप्रायश्चित्तानि हुत्वा तृतीयं मरुत्वतीयमुपोद्यच्छते । चमसाध्वर्यवो नाराशंसान् । आश्रा-व्याह । उक्थशा यज सोमस्य । इति वषट्कारेऽनुवषट्-कारे च जुहोति । चमसाध्वर्यवश्चमसाननुप्रकम्पयन्ति । अयं मरुत्वतीयग्रहप्रचारः ॥

४०१ अध्वर्युः होत्रे पात्रं प्रदाय तेन भक्षिते उक्तमन्त्रेण भक्षयति । होतृचमसं होत्रध्वर्युप्रतिप्रस्थातारो नराशंसपीतेन भक्षयन्ति । ब्रह्मादयो होतारमुपहूय नराशंसपीतेन स्वस्वचमसम् । आत्मानमभिमृश्याऽऽप्याय्य नाराशंसान् सादयन्ति । इदं माध्यन्दिनसवनीयनाराशंससादनम् ॥

४०२ अध्वर्युः तत्रैव पात्रं निधाय प्राक्केत्य शुक्रपात्रमाददान आह । उन्नेतर्यदेमं माहेन्द्रं ग्रहं गृह्णाम्यथोदञ्च२ राजानं पूतभृतमभि-संपवयताद्दशाभिर्द्रोणकलशं मृष्ट्वा न्युब्जतात् । इति । द्रोणक-

लशात्परिप्लुपात्रेण शुक्रपात्रे माहेन्द्रं गृह्णाति । महां२ इन्द्रो० वावृधे । उप०महेन्द्राय०मि । इति । परिमृज्य सादयति । एष ते योनिर्महेन्द्राय त्वा । इति । इदं माहेन्द्रग्रहग्रहणम् ॥

४०३ उन्नेता पूतभृति पवित्रं वितत्य द्रोणकलशमवनीय मृष्ट्वा न्युब्जति । अध्वर्युः अप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ्ङुद्रुत्य स्तोत्रमुपाकरोति । इदं माध्यन्दिनपवमानस्तोत्रोपाकरणम् ॥

४०४ समाप्ते साम्नि सम्प्रेषमाह । अभिषोतारो ऽभिषुणुताग्नीदाशिरं विनयोलूखलमुद्वारय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सोम्यस्य विद्धि ॥ अयमभिषवप्रैष उच्यते ॥

४०५ प्रतिप्रस्थातृनेष्ट्रादयो ऽभिषोतारश्चर्मणि ग्रावभिः शुष्काभिषवं कुर्वन्ति स्तोत्रसमाप्तिपर्यन्तम् । तथा आग्नीध्रो मुसलेनोलूखलमुच्चैर्वादयति । अध्वर्युः । अग्नी सवनीयान्निर्वप । इत्याह । स्तोत्रसमाप्त्यनन्तरं आग्नीध्रः प्रातःसवनवदामिक्षावर्जं सवनीयान्निर्वपति । अध्वर्युः इडाजपं कृत्वा शस्त्रं प्रतिगीर्य प्राङेत्य माहेन्द्रं ग्रहमुद्यच्छते । चमसाध्वर्यवो नाराशंसान् । पूर्ववदाश्रावणाद्यं वषट्कारहोमान्तम् । अयं माहेन्द्रग्रहप्रचारः ।

४०६ प्रतिप्रस्थाता आग्नेयमतिग्राह्यं होष्यन्नवेक्षते । अग्ने तेजस्विन् तेजस्वी०मनुष्येषु कुरु । इति । जुहोति । दीक्षायै च त्वा० ॥

४०७ तेजसे जुहोमि स्वाहा । इति । यजमानं वाचयति । तेजोविदसि०तेजोहासीत् । इति । अयमाग्नेयातिग्राह्यग्रहप्रचारः ॥

४०८ नेष्टा ऐन्द्रमादायावेक्षते । इन्द्रौजस्वि०कुरु । इति । जुहोति ब्रह्मणश्च त्वा०स्वाहा । इति वाचयति । ओजो विद०मोजो हासीत् । इति । अयमैन्द्रातिग्राह्यप्रचारः ॥

४०९ उन्नेता सौर्यमादायावेक्षते । सूर्यभ्राजस्वि०कुरु । इति । जुहो-
ति । वायोश्चत्वा०स्वाहा । इति । वाचयति । सुर्वाविदसि०-
सुवर्हासीत् । इति । अयं सौर्यातिग्राह्यग्रहप्रचारः ॥

४१० अध्वर्युः अनुवषट्कृते पुनर्माहेन्द्रं जुहोति । चमसाध्वर्यवश्च-
मसाननुप्रकम्पयन्ति । एतत्पात्रं नाराशंसा अतिग्राह्याश्चान्वा-
यन्ति । अध्वर्युः होत्रे पात्रं प्रदाय तेन भक्षिते मन्त्रेणोक्तेन
भक्षयति । होतृचमसं नराशंसपीतेन चयः । ब्रह्मादयो होता-
रमुपहूय नराशंसपीतेन स्वस्वचमसान् । यजमानोऽध्वर्युमुप-
हूय आग्नेयं भक्षयति । मयि मेधां मयि० स्तेजो दधातु ।
इति । तथैवैन्द्रम् । मयि० यीन्द्र इन्द्रियं०तु । इति । तथा
सौरम् । मयि०सूर्यो भ्राजो०तु । इति । इदमतिग्राह्यभक्षणा-
मुच्यते ॥

४११ आत्मानमभिमृशते । चमसाप्यायनं न भवति । तान् प्रक्षाल्य
स्रुचां पश्चात् मैत्रावरुणचमसप्रमुखान् सादयन्ति । अध्वर्युः ।
प्रतिप्रस्थातरिमे चतु०पात्रेष्वपि सृज । इति वदति । प्रतिप्रस्था-
ता ऋतुपात्रे शुक्रपात्रमतिग्राह्यांश्च मार्जालीये प्रक्षाल्य स्वस्थाने
सादयति । मैत्रावरुणचमसमित्यादिषु उक्थ्यपर्यायाः प्रातः-
सवनवत् । सर्वत्र ग्रहेषु सोमग्रहणे मन्त्रे इन्द्राय त्वा जुष्टं
गृह्णामि । इति । सादनमन्त्रः एष ते योनिरिन्द्राय त्वा । इति ।
भक्षणमन्त्रे इन्द्रेण पीतस्येति । यजमानेन सह हविर्धानं
गत्वा आधवनीयमुत्तानं कृत्वा तस्मिन् सर्वा वसतीवरीरेकध-
नाश्चाधवनीय मृष्ट्वा यथास्थानं न्युब्जति । सवनप्रायश्चित्ते अग्नि-
र्मूर्धेत्यस्य स्थाने भुवो यज्ञस्य रजसश्च नेतेत्यृचा होमः ।

प्रयास्त:प्रसुहीत्युक्ते यदुक्तं तत् पूर्ववत् । अथ माध्यन्दिनं सवनमित्यारभ्य एतदन्तं कर्म माध्यन्दिनं सवनमित्युच्यते ।

४१२ अथ तृतीयसवनम् । देवीर्द्वारावित्याद्युत्तराधैवणान्तं पूर्ववत् । अध्वर्यु: प्राज्ञायन्नाह । अग्नीत्परिग्रयणमाहर प्रतिप्रस्थातराशिरमानय श्रतातङ्क्यमादित्यग्रहाय दध्याहरेहि यजमान । इति । अयं तृतीयसवनारम्भकप्रैष: ॥

४१३ यथासम्प्रैषं ते कुर्वन्ति । यजमानेन सह हविर्धानं प्रविश्योपांशुपात्रस्थमंशुं माध्यन्दिनीयऋजीषे प्रक्षिप्य होतृचमसे आधवनीयात्पात्रवनीय चर्मणि निधाय निग्राभ्यास्थेत्यादिमन्त्रेण यजमानाय दत्वा देवस्य त्वेत्यादिमन्त्रेण क्रमपि ग्रावाणमादायाऽभिमन्त्र्य श्वात्रास्थेत्यादिमन्त्रेण ऋजीषं होतृचमसीयाभिरुपसृज्य यत्ते सोमेत्यादिमन्त्रेण संप्रयुत्य, धिषणेवीडू इत्यादिमन्त्रेण चर्मान्तर्हिते फलके अभिमृश्य वृद्धीर्वोत्रयित्वा आहरोपसृजेत्यादि । उपर्यर्धे होतृचमसे ऋजीषं परिप्लावयति । प्रागपागित्यादिमन्त्रेण । ऋजीषं चर्मणि निधायाध्वर्युरेव यावद्रसनिस्रावमभिषुणोति । आहरोपसृजेत्यादि । एवं द्वितीयमेवं तृतीयम् । निग्राभवर्जं चतुर्थम् । राजानं हस्तेन निष्पीड्य सम्भरणीये सम्भृत्य पूर्ववदुन्नेत्रे प्रयच्छति । उन्नेता पूर्ववदवनयति । एष एक: पर्याय: । एवं द्वितीयमेवं तृतीयम् । पूर्ववद्धोतृचमसे ऽवनीय श्वात्रा इत्यादि । ऋजीषं दशापवित्रेण परिवेष्ट्यान्तरेणेषे उन्नेत्रे प्रयच्छति । उन्नेता तदाधवनीये विक्षाल्य प्रपीड्यान्तरेणेषे उपरि नीत्वा प्रात:सवनीयऋजीषे निक्षिपति । अयं तृतीयसवनसम्बन्ध्यभिषव: ॥

Digitized by Google

४१४ अध्वर्युः परिश्रयणीयवासोभ्यां हविर्धानद्वारौ परिश्रित्यादित्यस्थाल्या श्रोपशयपात्रे तस्याः सकाशात्तृतीयांशं गृह्णाति कदाचनस्त०पृच्यते । उप०स्यादित्येभ्य०मि । इति । बर्हिषी अन्तर्धाय शतातङ्क्यमानयति । कदाचन प्र०तं दिवि । इय०मि । इति । अपोद्धृत्य बर्हिषी आदित्यस्थाल्या अर्धं गृह्णाति । यज्ञो देवानां०रासत । उप०मि । इति । इदमादित्यग्रहे शतातङ्क्यग्रहणम् ॥

४१५ उपांशुसवनस्य स्थूलप्रदेशेन ग्रहमालोडयति । विवस्वन्नादित्यै० श्रीणामि । इति । उपांशुसवनमुद्गृह्णाति । तस्य यदि शीघ्रं सोमबिन्दुः प्रस्कन्देद्दुर्षुकः पर्जन्यः स्याद्यदि चिरं तर्ह्यवर्षुकः । ग्रहमनासादयन् उपांशुसवनं दशापवित्रेण परिवेष्ट्य यथा सोमस्योर्मिर्भवति तथा पात्रस्याधस्तात् द्विश्चतुर्वा सोमं पातयन्नुद्धन्ति । आसमुद्रादान्तरिक्षा०तिम् । इति । उपांशुसवनं दशापवित्रेण परिमृज्य ग्रावसु प्रक्षिप्य द्वारौ विवृत्य बर्हिर्मुष्टिना ग्रहमपिधायोन्निष्क्रम्नाह । आदित्येभ्यः प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो महस्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्योनुब्रूहि । इति । अयमादित्यग्रहप्रचारप्रैषः ॥

४१६ अत्याक्रम्याश्राव्याह । आदित्येभ्यः प्रेष्य । इति । वषट्कृते बर्हिर्मुष्टिमग्नौ प्रक्षिप्यादित्यं जुहोति । नान्वीक्षते । पर्यावृत्तस्य प्रतिप्रस्थाता पात्रमादत्ते । उपवेषनिरसनान्ते प्रतिहर्त्रा पूतभृति पवित्रे वितते उन्नेता आधवनीयात् द्वौ चीन्वोदञ्चनान् तस्मिन्नवनयति । अध्वर्युः आग्रयणस्थं सोमं पात्रान्तरे ऽवनीय तदादत्ते । प्रतिप्रस्थाता सोपशयामादित्यस्थालीम् । उन्नेता

उदञ्चनादिचतुष्टयमुपर्यवनीय चतसृणां धाराणामधस्तादाग्रयणं प्रातःसवनवद्गृहीत्वा ऽभिहिङ्कृत्याधिवदनं कृत्वा परिमृज्य सादयति । इदमाग्रयणो तृतीयसवनीयसोमग्रहणम् ॥

४१७ पूतभृतो बिलाद्दृशापवित्रमपनीय बर्हिषी अन्तर्धायाग्नीध्रा विलोडितं ससोममाशिरं पूतभृत्यवनयति । अन्वारब्धायां पत्न्यां प्रत्यृचं सर्वान्ते वा । ताश्चर्चः अस्मे देवासो वपुषे चिकित्सते-त्यादयस्त्र्यवनम्नः । ततो बर्हिषी अपोद्धृत्य परिप्लुपात्रं पूतभृति प्रास्य पूर्ववत् द्रप्सानमन्त्रयते । तत आधवनीयाभिमर्शनादि उन्नेतृप्रैषान्तम् । अध्वर्युर्बर्हिषी आदायोपनिःसृप्य प्रातःसवनवत्समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति । इदं तृतीयꣳ सवनम्मन्नु स्वाहा । इति । अयं तृतीयसवनीयहोमः ॥

४१८ अध्वर्युर्माध्यन्दिनसवनवत् स्तोत्रमुपाकृत्य पवमानस्य नवम्यां प्रस्तुतायां वाचयति । सघासि०पारय । इति । पञ्चहोतारं व्याख्याय समाप्ते साग्नि सम्प्रैषमाह । अग्नीच्छालाकान् विहर० पशो संवदस्व । इति । पूर्ववद्धविर्धान प्रविश्य समस्तसोममुपतिष्ठते । विष्णो त्वन्न इत्यादिना । प्रातःसवनवच्छालाकान्विहृत्य धिष्ण्यव्याघारणं पृष्ठ्यास्तरणं च । अध्वर्युः अग्नीदुत्तरं बर्हिरित्यादि अग्नीषोमीयवद्धवःपरिहरणान्तम् । आग्नीध्रः प्रातःसवनवदामिक्षारहितान् सवनीयान् सादयति । अध्वर्युस्तैः प्रचरति । अयं तृतीयसवनीयप्रचारः ॥

४१९ होतृसकाशे इडापात्रं निधाय प्राशित्रन्नाह । उन्नीयमानेभ्यो०यध्वं तीव्राꣳआशीर्वतः कुरुध्वमुन्नेत:०य । इति । चमसाध्वर्यवः पूर्ववच्चमसानुन्नीय तेषु किंचित्किंचिदाशिरमवनीयोत्तरवेद्यां

सादयन्ति । अध्वर्युर्होतृचमसमादायाऽऽश्राव्याऽऽह । तृतीयस्य सवनस्यर्भुमतो विभुमतः प्रभुमतो वाजवतः सवितृवतो बृहस्पतिवतो विश्वदेव्यावतस्तीव्राꣳ आशीर्वत इन्द्राय सोमा०ष्य । इति । वषट्कृते जुहोति । श्येनाय पत्वने स्वाहा । इति । अनुवषट्कृते होमः । तृप्यं०स्वाहा । इति । द्विः सर्वांश्चमसान् जुह्वति । अयं तृतीयसवनीग्रहोतृचमसप्रचारः ॥

४२० अध्वर्युः सम्प्रेषमाह । प्रेतु होतु०त्सकृदाग्नीध्रतो भ्युन्नीयोपावर्तेध्वम् । इति । यन्ति होत्रादिचमसाः । चमसाध्वर्यवो होत्रकचमसान् सर्वेषान्पूतभृतोऽभ्युन्नीयोपावर्तन्ते । अध्वर्युमैत्रावरुणचमसादीन् क्रमेणाऽऽदाय पूर्ववत्प्रस्थितयाज्याभिर्यजति । प्रशास्त्रा वषट्कृते । विष्णु०हा । इति जुहोति । अनुवषट्कृते तृप्यन्त्वामित्यादिमन्त्रेण सगणामपि । ब्राह्मणाच्छंसिचमसे । परिधये०हा । इति । पोतृचमसे । ऊर्जे०हा । इति । नेष्टृचमसे । पयसे०हा । इति । अच्छावाकचमसे । प्रजा०हा । इति । आग्नीध्रचमसे । ऋतमृ०हा । इति । अयं तृतीयसवनीयप्रस्थितयाज्याप्रचारः ॥

४२१ प्रदक्षिणमावृत्य होतुरग्रे उपवेशनादि इडोपहूतचमसभक्षान्तम् । भक्षमन्त्रे आदित्यवद्गणस्येति तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्येत्यूहः । नाराशंससादनानन्तरं ब्रह्मादयः सर्वे प्राचीनावीतं कृत्वा स्वस्वचमससमीपे त्रींस्त्रीन्पुरोडाशशकलान्निक्षिपन्ति । अध्वर्युप्रतिप्रस्थातारौ होतृचमससमीपे । स्वस्थाने उपविश्यानुमन्त्रयन्ते । अत्र पितरो यथाभागं मन्दध्वम् । इति । अध्वर्युश्चमस्य एव । इदं सौमिकपुरोडाशशकलदानम् ॥

४२२ यजमानो हविःशेषं पत्नी हविष्यं चाश्नाति । अध्वर्युर्हविर्धाना-त्प्राङायन्नाह । देवाय सवित्रे ऽनुब्रूहीति प्रतिप्रस्थातरन्तर्यामपा-त्रेण सावित्रमाग्रयणाद्गृहं गृहीत्वोपास्य मासीषदः । इति । प्रति-प्रस्थाता तथा गृह्णाति वाम०स्याम । उप०सि देवाय त्वा सवित्रे । इति । हुत्वा सशेषे वैश्वदेवं पूतभृतः परिप्लुना गृह्णाति । सुश०मि । इति । सदो गत्वा होत्रा समीक्ष्य शस्त्रं प्रतिगृणाति । प्रतिप्रस्थाता होतुरेकया च दशभिश्चेति श्रुत्वा द्विदेवत्यपात्राणि मार्जालीये प्रक्षाल्य निदधाति । अध्वर्युः प्रद्यावा यज्ञैरित्यादि-यावदाहावं अवसाने ओथामो दैवेति प्रणवे मदामो दैवेति । तद्राधो अद्येत्यादियावदाहावं अवसाने प्रणवे च मदामो दैवेति । शस्त्रान्ते तृतीयसवने उक्थं वाचीन्द्रायेत्याह । शस्त्र-प्रायश्चित्तान्ते वैश्वदेवमादायाह । उक्थशा यज सोमस्य इति । वषट्कृते ऽनुवषट्कृते च जुहोति । अयं वैश्वदेव-ग्रहप्रचारः ॥

४२३ चमसाननुप्रकम्पयन्ति । एतत्पात्रं नाराशंसा अन्वायन्ति । पूर्व-वत् भक्षः । स्रुचां पश्चाच्चमसादनानन्तरं प्रतिप्रस्थाता तूष्णीं समन्त्रकं वा शालामुखीये निरुप्य सौम्यं चरुं शृतमिदानीम-भिघार्योद्वास्य सादयति । यन्मे अग्न इत्यादिमन्त्रेण यजमाने-नाभिमन्त्रिते ऽध्वर्युर्होतारं पृच्छति । पर्यक्ष्यसि सौम्याम्३ । न पर्यक्ष्यसी३ । इति । सन्नं सौम्यमागत्य ध्रुवाज्याच्चतुर्गृहीत्वा ऽऽश्राव्याह । घृतस्य यज । इति । वषट्कृते जुहोति । पुन-रुपस्तीर्य द्विश्चरोरवदायाभिघार्य न प्रत्यनक्ति । पूर्ववदाश्रा-व्याऽऽह । सौम्यस्य यज । इति । वषट्कृते प्राचीनावीत्या-ग्नेय्यां जुहोति । अयं घृतयाज्यासम्पटितसौम्यचरुयागः ॥

४२४ मेक्षणानुप्रहरणान्ते पुनश्चतुर्गृहीतं गृहीत्वा ऽऽह । घृत०आ-
इति । पूर्ववज्जुहोति । अपर्याणे स्रुवाहुत्याभिजुहोति ।
विष्णो त्वं न इत्यृचा । ततश्चरुमध्ये गर्तं कृत्वा प्रभूतमाज्यं
लेपिकमानीयोद्गातृव्यतिरिक्ताः स्वशरीरच्छायां तस्मिन्नवेक्षन्ते ।
यन्मे मनः०मसि । इति । चरुमुद्गातृभ्यो दत्वा प्राशयन्नाह ।
प्रतिप्रस्थातरुपांशुपात्रेण पात्नीवतमाग्रयणाद्गृहं गृही०षदः ।
इति । प्रतिप्रस्थाता तथा गृह्णाति । उप०सि बृहस्पतिसुतस्य-
त इन्दो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णाम्यग्ना३इ पत्नीवा:३ ।
बर्हिषी अन्तर्धाय घृतेन श्रीणाति । अहं पुर०सनानाम् ।
इति । इदं पात्नीवतग्रहणम् ॥

४२५ बर्हिषी अपोद्धृत्य परिमृज्यानासादितमेवादायाऽऽह । अग्नीन्ने
ष्टुरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा सङ्ख्याप्याप उपप्रव०मान ।
इति । पूर्वद्वारा हविर्धानं प्रपाद्य यजमानं ध्रुवमुपस्थापयति ।
भूत०व्यासम् । इति । चम०र्व: सर्वेण सोमेन होतृचमसादी-
श्चमसान् अभ्युन्नीय सादयन्ति । होतृचमसेल्पमुन्नयन्ति ।
अध्वर्युः स्तोत्रोपाकरणादि कृत्वा सप्रहोतारं व्याचष्टे । नेष्टा
पत्नीमुद्गात्रा लक्षयित्वा वाचयति । विश्वस्यते०ईडिता: ।
इति । यदोद्गाता संज्ञां करोति तदा पत्नी ईषद्वस्त्रमपसार्योरु-
मूलात्पन्नेजनीः स्रावयति । इदं पन्नेजनीजलस्रावणम् ॥

४२६ आपोहिष्ठीयशंसनान्तमास्ते । अध्वर्युः स्वादुष्किलायमिति
चतस्र उभयतोमोदं प्रतिगृणाति । तदीयाहावे मोदामो दैवों-
शोंसामोदैवेति । प्रति०ता तन्तुं तन्वन्निति श्रुत्वा ध्रुवं हस्ताभ्यां
सुष्ठु गृह्णाति । द्यावा०मि । इति । स्थानाच्चालयति विश्वे०

यन्तु इति । आहरति । दिवि०पार्थिवान् । इति । होतृचमसे ऽव-नयति । ध्रुवं०रसन् । इति । अध्वर्युः पूर्ववद्धोतृचमसमादा-याऽऽह । उक्थ०सोमानां इति । पूर्ववज्जुहोति । चमसानपि । पूर्ववच्चमसभक्षणम् । मन्त्रे अग्निना वैश्वानरेण मरुद्भिरित्यूहः । आहवनीयस्योत्तरतः पूर्ववच्चमससादनम् । आग्निरोपवेशनिर-सनान्ते अध्वर्युः जुहोति । जनस्य गोपा०शुचिः स्वाहा । इति । यन्मआत्मन इत्यादि समानम् । सर्वेषु चमसेषु त्रींस्त्रीन् दूर्वा-ग्रन्थीनेकैकं दर्भपिञ्जूलं च प्रास्य प्रशास्तः प्रसुहीति प्रेष्य प्रसर्पतेत्युक्ते सर्वे यथाप्रसृप्तं निःसर्पन्ति । अथ तृतीयसवनमि-त्यारभ्यैतदन्तं कर्म तृतीयसवनमुच्यते ॥

४९० सङ्कल्पप्रभृति सर्वं कर्म अग्निष्टोम इत्युच्यते ॥

समाप्तोऽयङ्ग्रन्थः शुभम्भूयात् ।

॥ ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या
विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(Continued from page 48. Vol. IX.)

सू० चोदितं तु प्रतीयेताविरोधात्प्रमाणेन ॥ १० ॥

आर्यप्रसिद्धिविरोधे म्लेच्छप्रसिद्धेरप्रामाण्यमुक्तम्, इदानीं किं म्लेच्छ-प्रसिद्धिरित्येवाप्रमाणम्? उत बलवद्विरोधादेवाप्रमाणम्? अविरोधे तु तस्या अपि भवत्यवाभिधेयनिर्णये प्रामाण्यमिति चिन्त्यते पिकनेमसततामरसा-दिशब्दा न क्वचिदार्याणां प्रसिद्धाः, म्लेच्छानां तु कोकिलादिषु प्रसिद्धाः, तत्र

यदप्रमाणमेव म्लेच्छप्रसिद्धिः, ततस्तेषां निरुक्तादिवशेनार्थकल्पनम् । अथ तु सा प्रमाणं, ततः सैवाश्रयिष्यते, तदत्र म्लेच्छप्रसिद्धिः प्रामाण्ययोग्या न वेत्येतावदधिकरणशरीरं, सत्यपि तु प्रामाण्ये किं म्लेच्छगतत्वाद्दुर्बला निरुक्तादिद्वारा शास्त्रस्थत्वाद्बलीयसी? उतैयमेव दुर्बला? कल्प्यत्वात्, म्ले-च्छप्रसिद्धिस्तु क्लृप्तत्वाद्बलीयसीत्येतत्प्रासङ्गिकं, शिष्टाकोपे ह्येतदवस्थितं, स्वरूपगतमेव बलाबलं प्रमाणद्वारकाज्ज्याय इति तेनैव न्यायेनात्रापि प्रयोक्तृद्वारा बलाबलात् क्लृप्तकल्प्यत्वेन स्वरूपगतमेव ज्यायो भवति तेन गतप्रायमिह प्रसङ्गेन उक्तं भाष्यकारेण, प्रामाण्यसंभवासंभवमात्रं तु म्लेच्छ-प्रसिद्धेश्चिन्त्यते, तत्र पूर्वः पक्षः, "म्लेच्छेषु हि पदार्थानां विप्लुतिर्भूयसी यतः । ततस्तेषु प्रसिद्धेऽर्थे न विश्रम्भः कथंचन" पदानि पदार्थाश्चापभ्रंशप्राया एव म्लेच्छेषु बाहुल्येन, तेषु कथमविप्लुतपदार्थावधारणम् । अतोऽप्रमाणं म्लेच्छप्रसिद्धिः, न हि ते दृष्टार्थव्यवहारित्वाच्छब्दार्थाविप्लवे यत्नं कुर्वते तस्माद्विप्लुतिसंभवात्तेषु प्रसिद्धोऽर्थो न विश्रम्भणीयः, निरुक्तादिद्वारेण त्वर्थकल्पनं पिकादीनामिति ॥ * ॥ सिद्धान्तस्तु "पदानि तावदेतानि वेदादिष्वेव दर्शनात् । अविप्लुतानि तेषां च भाव्यमर्थेन केनचित् ॥ नित्ये ना-र्थध्वंसो नास्ति यतो म्लेच्छेषु विप्लुतिः । म्लेच्छप्रसिद्ध एवार्थस्तेषामिति हि निर्णयः ॥" पिकादिपदानि तावद्वेदादिषु दृष्टत्वादविप्लुतानि नित्यानि तदेषां नित्येनैव केनचिदर्थेन भवितव्यं, न चामीषामर्थध्वंसः कश्चिदस्ति यत्र मुख्यानि भूत्वा म्लेच्छप्रसिद्धेऽर्थे गौणभान्त्यादिनिमित्तप्रयोगभाञ्जि वि-प्लुतिं गच्छेयुः, न ह्यसति मुख्ये गौणादिसंभवः, तस्मात् म्लेच्छप्रसिद्ध एवा-र्थोऽमीषामित्यध्यवसीयते, अतः सिद्धमविरुद्धेषु प्रसिद्धवाचकत्वेषु म्लेच्छाना-मभिधेयनिर्णये प्रामाण्यम् ॥

सू० प्रयोगशास्त्रमिति चेत् ॥ ११ ॥

अत्र कल्पसूत्राण्युदाहृत्य किं प्रमाणमप्रमाणमिति भाष्ये विचारितम्

ननु स्मृत्यधिकरण एव सर्वेषां वेदातिरिक्तानां प्रामाण्याप्रामाण्यचि-न्ता कृता, तत्र केचिदाहुः तत्रा¹शब्दतया पूर्वपक्षमुक्त्वा शब्दानुमानेन सिद्धा-

१ तत्रावेदत्वेनेति तु पा० ।

न्तितम् । एतानि वैदिकार्थनिबन्धनत्वात्प्रत्यक्षशब्दार्थानीति न तत्रोदाहरणं, स्मृतयो हि प्रायेणेतस्ततो विप्रकीर्णपरप्रकरणपठितवाक्यशेषानुप्रसिद्धवन्निर्देशानुपपत्तिकल्पिततिरोहितप्रायविधिमूलाः, तद्यथा "नयनं दक्षिणं दीक्षितः पूर्वमङ्क्ते सव्यं हि मनुष्याः पूर्वमञ्जत" इति प्रसिद्धवत्सव्यस्य पूर्वाञ्जनं निर्दिष्टं, तच्च दृष्टप्रयोजनाभावात्प्रमाणान्तरेणाप्राप्तमित्यनुपपत्त्या विधिः कल्प्यते, तथा "तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति तस्माद्गर्भेणाविज्ञातेन ब्रह्महे"त्येवंविधं स्मृतीनां मूलम्, अत एव चैषु स्मार्तत्वप्रसिद्धिः प्रत्यक्षश्रुतावविहितत्वात्, दर्शपूर्णमासादिषु तु प्रत्यक्षविधिसद्भावाच्छ्रौतत्वम्, इममेव च विशेषमभिप्रेत्य गौतमेनोक्तं "प्रत्यक्षश्रुतिविधानात् गार्हस्थ्यस्ये"ति न तु स्मृतिपरम्परयैवानुमेयत्वम् अन्धपरम्परादोषात्, अत एव प्रत्यक्षश्रुतिविरोधे स्मृतेरननुष्ठानं, स्मृतयो हि सिद्धवन्निर्देशानुपपत्तिकल्पितविधिमूलतयाऽपि संभाव्यन्ते, कल्पना च प्रत्यक्षश्रुतिविरोधेऽनुपपन्ना, तेनाविरुद्धविषयवद्विरोधविषयेऽपि न्यायाभासेन विधिं कल्पयित्वा किमियं स्मृतिः प्रवृत्ता ? किं वा "ऽग्निहोत्रं जुहुयादाद्यन्ते द्युनिशोः सदे"त्यादिवत्प्रत्यक्षमेव विधिं दृष्ट्वेति विचिकित्सोपजननाभावात्तद्विषयप्रत्यक्षविधिर्नोपलभ्यते तात्रत्तदनादरेण प्रत्यक्षोपलब्ध एवानुष्ठेय इति, तेन स्मृतय एव तत्रोदाहरणं न कल्पसूत्राणि । किंच नैषामिह प्रामाण्याप्रामाण्यचिन्ता किंतु स्वतन्त्राणामेव वेदवत् प्रामाण्य ? मुत स्मृतिवत्परतन्त्राणा ? मिति । यद्वा भवतु नामैषामपि मत्र विचारस्तेषामपि तु मन्वादीनामिह स्वातन्त्र्यनिराकरणम्, अथवाऽङ्गान्यत्रोदाहरणं, तेषां हि "षडङ्गमेक" इति वेदत्वस्मरणात्स्वातन्त्र्याशङ्का जायते । अथवा शाक्यादिग्रन्थानां श्रुतिमूलत्वेन प्रामाण्ये निरस्ते संप्रति श्रुतिवदेव तत्प्रामाण्यमाशङ्क्य निराक्रियते, तदेतानि चत्वार्यपि विचारस्थानानि समानन्यायानि सह विचार्यन्ते, किमेषां स्वातन्त्र्येण प्रामाण्यं न वे?ति, तदर्थं च किमेषां पौरुषेयत्वमपौरुषेयत्वं वे?ति चिन्तनीयम्, तत्रावगतिस्तावद्वेदेभ्यो धर्माधर्मविषया समुपजायते, सा च स्वतःप्रमाणं, तद्यदि पौरुषेयत्वं शाक्यादिग्रन्थानां ततः पुरुषदोषादप्रामाण्यापत्तेर्दृष्टप्रामाण्यहानिः स्यात्, अतो दृष्टानुगुण्यादपौरुषेयत्वं, मन्वादीनां त्वविगी-

तमेव प्रामाण्यं, तत् किमेषामेवापौरुषेयत्वं कल्प्यताम्? उत प्रमाणान्तरं कल्पयित्वा तस्य नित्यत्वमिति दृष्टानुसारित्वान्नित्यत्वकल्पनं न्याय्यः, अङ्गानां तु "मन्त्रब्राह्मणयोर्वेदनामधेयं षडङ्गमेके" इति स्मरणाद् दृढमेवापौरुषेयत्वं, कल्पसूत्राणां तु पठितपाठप्रत्यक्षवेदार्थोपनिबन्धनाच्छाखान्तरतुल्यत्वादपौरुषेयत्वं, न हि सकलजनप्रत्यक्षवेदवाक्यविषयमर्थं वदतामेषां पुरुषैः प्रणयनं संभवति, बुद्धबोधायन[1]मशकादिभिस्तु समाख्या काठकादिवत्प्रवचननिमित्तत्वेनोपपन्ना, तन्निमित्ता च एषु लौकिकानां कर्तृस्मृतिः, भवति चात्र प्रयोगः, "बौद्धाद्यध्ययनं सर्वं गुर्वध्ययनपूर्वकम्। बौद्धाध्ययनसामान्यादधुनाऽध्ययनं यथा॥" कल्पानां तु नित्यब्रह्मयज्ञविधिविषयत्वादपि नित्यता, श्रूयते हि "यद्ब्राह्मणानीतिहासान्पुराणानि कल्पा"निति, कथमनित्यानां नित्यविधिविषयत्वं, तस्मादेषां नित्यविधिविषयत्वात्स्वातन्त्र्यमिति प्राप्ते ब्रूमः, "नैतेषां पौरुषेयाणां स्वातन्त्र्यमुपपद्यते। विस्पष्टं च पौरुषेयत्वं दृढकर्तृस्मृतेर्वशात्" पुरुषपरम्परयैव ह्येषु कर्तारः स्मर्यन्ते न काठकादिवत्प्रवचनेन परिहर्तुं शक्यन्ते, तत्र हि समाख्यानमात्रम्। अत्र तु पारम्पर्येण सर्वेषामविगीतस्मरणाच्च नित्यत्वसंभवः, षडङ्गमेक इति परमतोपन्यासात्पूर्वपक्षोक्तिमात्रं, नानाशाखागतलिङ्गादिकल्पितश्रुत्यर्थोपसंहारस्य कल्पसूत्रानपेक्षैः कर्तुमशक्यत्वात्तादर्थ्येनार्थवच्चिबन्धनं नानर्थकम्", एवंविधाश्च ग्रन्थाः प्रतिमन्वन्तरं क्रियमाणाः केचित्सर्वकालमविच्छिन्नपारम्पर्येण प्रवर्त्तन्ते, ते च वेदार्थकल्पनात्कल्पा इति नित्ययैव समाख्यया ब्रह्मयज्ञाङ्गतया विधीयन्त इत्यनित्यत्वेऽपि ग्रन्थव्यक्तीनां नित्यविधिविषयत्वोपपत्तिः, तस्मान्नैषां स्वातन्त्र्येण प्रामाण्यमिति शाक्यादिनिबन्धनानां सिद्धं धर्मे प्रमाणाभासत्वं, कल्पादिषु तु यानि प्रत्यक्षश्रुतिन्यायविरुद्धानि वचनानि तेषाम् अप्रामाण्यं, यथा "अविशेषादुभौ"वेति सर्वपुरोडाशचतुर्द्धाकरणवचनं, सन्निहितं च शास्त्रमा'ग्नेयं चतुर्द्धा करोती'ति, तथा स हुताहुत इति सवनीयपुरोडाशस्य विकल्पवचनं पूर्वपक्षमूलं न वचनमूलम् "अन्यच्च तदर्थवादवचना"दित्याश्वलायनवचनात्

१ बुद्धबोधायनमनुमशकादिभिरिति तु पुस्तकान्तरपाठः।

तथा "यावद्रूपं वेदिं मुहरन्ती"ति वेदेयूपाद्रूत्यवचनं "आघनोभिश्च पशोः संयाजयन्तीति आघनीनां समुच्चयवचनं द्वादशाधिकरणपूर्वपक्षमूलं न वचनमूलं, तत्रापि संनिहितं शास्त्रं "आघन्या पत्नीः संयाजयन्ती"ति, विवक्षितं चैकत्वमुपादेयगतत्वादिति द्वादशे वक्ष्यते, तथा "पुरोडाशं पर्यग्नि करोती"ति संनिहिते शास्त्रे "सर्वाणि हवींषी"ति वचनं च द्वादशाधिकरणपूर्वपक्षमूलं न वचनमूलं, पशुः पुरोडाशविकारः स्यात् पर्यग्निकरणदर्शनादित्यष्टमेऽभिधानात्, तदिदमुक्तं "सर्वत्र च प्रयुक्तत्वात्संनिधानशास्त्राच्चे"ति

सू॰ अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात् ॥ १५ ॥

स्मृतीनामाचाराणां चाविरोधविरोधयोः प्रामाण्याप्रामाण्ये प्रतिपादिते, स्वातन्त्र्यं च स्मृतीनां निरस्तम्, इदानीं केषांचिदाचाराणां स्मृतीनां च व्यवस्था अव्यवस्था वेति चिन्त्यते होला[२]कादयो हि केश्चिदेव प्राच्यःअभिमानिभिरनुष्ठीयन्ते न सर्वैः, शूद्रादिमानवातिरिक्तस्मृतयश्च केश्चिदेव काश्चित्पठ्यन्ते न सर्वैः, तदेतान् स्मृत्याचारानुदाहृत्य चिन्त्यते किमेते तेषामेव धर्माः? किं वा सर्वेषामिति, तदर्थं च किमेतेषां मूलभूता श्रुतिर्व्यवस्थितविषया शक्यते कल्पयितुम्? उत सर्वसाधारणैवेत्ये? ति तत्र "लिङ्गव्यवस्थया लिङ्गी व्यवस्थां प्रतिपद्यते। धूमो हि यत्र तत्रैव वह्निर्नान्यत्र मीयते" स्मृत्याचारलिङ्गगम्या श्रुतिर्न प्रत्यक्षा तच्च लिङ्गं केषुचिदेवोपलभ्यते अतस्तद्विषयतयैव श्रुतिरनुमातुं शक्यते न हि तस्याः सर्वविषयत्वे प्रमाणमस्ति, व्यवस्थितविषयत्वेऽपि स्मृत्याचारयोरुपपत्तेः। यदि च साधारणी श्रुतिः स्यात्ततस्तन्मूलौ स्मृत्याचारावपि सर्वपुरुषगामिनौ स्यातां, यदि ह्यालस्यादिनिमित्तमितरेषामनाचरणं तदा स्यादपि साधारणानुमानम्। यत्तु नियमेन प्राच्याद्यभिमानिनामाचरणमितरेषां चानाचरणं न तत्साधारणानुमानेऽवकल्पते तदा तस्माद्व्यवस्थितमेषां धर्मत्वमिति प्राप्ते ऽभिधीयते ॥ * ॥

"विशेषाभावमात्रेण प्रसिद्ध्येत् सर्वधर्मता। विशेषणाद्व्यवस्था स्यात्तच्च नेहो

---

१ वेदिमुद्धरन्तीति पुस्तकान्तरपाठः।

२ होलाका होलका होलिका इति त्रयोऽपि साधवः शब्दाः।

पपद्यते" यदुक्तं सर्वधर्मत्वे प्रमाणं नास्तीति तदयुक्तं न हि सर्वधर्मत्ववादिना प्रमाणमुपन्यसितव्यम् उभयवादिसिद्धेन विधिनैवासति विशेषोपादाने सर्वधर्मत्वसिद्धेः, व्यवस्थावादिना तु वक्तव्यं प्रमाणं तच्च नास्ति, तथाहि स्मृतयस्तावत्साधारण्येनैव विदधतीति न तेषु चरणविशेषोपादानमस्तीति स्मृत्यनुसारेणैव श्रुतिकल्पनमिति सापि साधारणी न्याय्या, पठनव्यवस्था तु कर्तुस्तच्चरणत्वात् । कर्ता हि छन्दोगः स्वशिष्यान् छन्दोगान् स्वग्रन्थमध्यापयामास तेऽप्यन्यांश्छन्दोगानित्येवं गौतमीयस्य छन्दोगैः पाठः, तथाऽऽपस्तम्बादिग्रन्थस्य तैत्तिरीयैरेवं गृह्यग्रन्थानामपीति व्यवस्थितधर्मविषयत्वमप्रमाणकम्, आचाराणां तु सर्वाचरितृष्वनुगतमनाचरितृभ्यश्च व्यावृत्तमाकृतिव्यक्तिगुणसंस्थानादिकं न किंचिद्विशेषणं संभवति यदुपादाय होलाद्यधिकारं विशिंष्यात् प्राच्यादिसमाख्याऽपि व्यभिचारिणी तद्देशगतानामपि केषांचिदनाचरणात् चिरविनिर्गतपुत्रपौत्राणामपि चाऽसत्यां समाख्यायां समाचारात् तस्मादसति विशेषणे सर्वधर्मत्वमाचाराणां स्मृतीनां चेति

सू० प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् ॥ २४ ॥

स्मृत्याचारविरोधे स्मृतेर्बलीयस्त्वमाचारेष्वप्यभियुक्ताचारस्य बलीयस्त्वं स्थितम् । इदानीं शब्दापशब्दविभागेऽपि किं व्याकरणस्मृतेस्तदभियुक्तानामाचारस्य चेतरलोकव्यवहाराद्बलीयस्त्वं संभवति नेति वचार्यते तदिहैकस्मिन्नर्थे प्रयुज्यमानान्गोगाव्यादिशब्दान् व्याकरणानुगताननुगतांश्चोदाहृत्य चिन्त्यते किमेते सर्वे तस्मिन्नर्थे प्रयोक्तव्याः साधवः? किं वा व्याकरणानुगता एव साधवः? अन्ये त्वसाधवो न प्रयोक्तव्या इति, तदर्थं च किं सर्वे अविच्छिन्नपारम्पर्यप्रयोगजाः? उत केचिदशक्तिजाः? अपभ्रंशा इत्यर्थः, तदर्थं च किं व्याकरणं प्रमाणमप्रमाणं? मिति चिन्त्यते, तत्सिद्धये किं तस्य मूलं संभवति ने ति, मूलसंभवे प्रमाणभूतव्याकरणबलीयस्त्वेन तदभियुक्तपुरुषाचारबलेन च पृथग्जनाचारबाधात् गाव्यादीनामसाधुत्वं निर्मूलत्वे, तु तदप्रामाण्याल्लौकिकप्रयोगावि-

१ प्रयोगप्रत्ययानुपपत्त्या इति पाठान्तरम् ।

शेषात् सर्वेषां साधुत्वेन प्रयोज्यतेति, तेन व्याकरणे प्रामाण्याप्रामाण्यमेवात्र चिन्तयितव्यं, तत्र "निर्मूलत्वाद्विगीतत्वाद्वैफल्याद्दृढबाधनात् । पूर्वापरविरोधाच्च नास्ति प्रामाण्यसंभवः" । "तस्मादेतेन शब्दानां प्रयोगो न नियम्यते । तेनार्थप्रत्ययात्सर्वे प्रयोज्या न व्यवस्थया" नियमद्वयार्थं हि व्याकरणं साधूनेव प्रयुञ्जीत नासाधून् इत्येकः प्रयोगनियमः, गवादय एव साधवो न गाव्यादय इति साधुत्वस्वरूपनियमोऽपरः, न चैतद् द्वयमप्यनेन नियन्तुं शक्यते तथा हि न तावत्साधूनेव प्रयुञ्जीतेति नियमसंभवः, अर्थावगमाय हि शब्दोच्चारणं न धर्माय, अर्थश्च यद्यसाधुभ्यो ऽपि गम्यते तर्हि साधुनियमोऽनर्थकः । अथ न गम्यते ततः सुतरां नियमशास्त्रानर्थक्यमर्थवशादेव नियमद्वयप्रसिद्धेः । अथ गम्यमानेऽप्यसाधुभ्योऽर्थे दृष्टार्थमपि शब्दप्रयोगमाश्रित्य धर्माय साधुनियमः शास्त्रेण क्रियत इत्युच्यते, तच्च मूलासंभवात् न तावदत्र प्रत्यक्षादीनां मूलत्वं तेषां धर्माधर्मयोरप्रवृत्तेः ।

न च वेदवाक्यानि गवादिषु प्रतिपदं कल्पयितुं शक्यन्ते अनन्तवाक्यपाठासंभवात् अपठितानां च मूलत्वानुपपत्तेः

न च सुशब्दमेव प्रयुञ्जीत नापशब्दमित्येकोपलक्षणेन सर्वेषामुपसंग्रहः, गाव्यादीनामपि श्रोत्रग्रहणत्वेन सुशब्दत्वाद्व्यवस्थानुपपत्तेः, न चावान्तरसामान्यं गवादिष्वनुगतं गाव्यादिभ्यश्च व्यावृत्तं किंचिदस्ति येन व्यवस्था स्यात्, साधुत्वमिति चेत् किं पुनरिदं साधुत्वं यद्गवादिष्वेव व्यवस्थितमित्युच्यते न हि इदं प्रत्यक्षादिभिर्गम्यते, वाचकत्वमिति चेत् तद्गाव्यादिष्वप्यविशिष्टं तेषामपि हि प्रयोगप्रत्ययानुपपत्त्या वाचकत्वं लोके गम्यते, न ह्यवाचकानां प्रयोगः प्रत्यायकत्वं वा घटते ।

न च यवादीनामिव प्रियङ्ग्वादिषु गुणात्प्रयोगसंभवः, मुख्याभावात् मुख्यपूर्वा गौणः, नासावत्यन्तावाचकस्य गाव्यादेरवकल्पते एतेन लक्षणा प्रत्यूढा तेन गाव्यादीनामवाचकत्वं लोकाविरुद्धमिति न साधुरूपं शास्त्रेण नियन्तुं शक्यते, अनादित्वं साधुत्वमिति चेत् एतदपि गाव्यादिष्वविशिष्टं

तत्रापि संबद्धुरस्मरणाददृष्टसाधनत्वमिति चेत् न तस्य प्रत्यक्षाद्यविषय-त्वात् वेदवाक्यानां च प्रतिपदमसंभवादुपलक्षणानुपपत्तेश्च तत्र साधुत्वमे-वोपलक्षणं तदेव च प्रमेयमित्यात्माश्रयदोषापत्तिः, तस्मान्मूलाभावादप्रमाणं व्याकरणं परस्परविगानाच्च सूत्रकारो ह्यवश्यवक्तव्यं प्रयोजनमनभिदधानो निष्प्रयोजनतामेव शास्त्रस्य मन्यते, भाष्यवार्त्तिककारौ तु धर्मप्रयोजनता-मिति विगीतत्वं, तयोरपि मिथोज्ञानतत्पूर्वप्रयोगधर्मत्ववचनाद्विगीतत्वं, निष्फलं चेदं शास्त्रं न ह्यनेन धर्मार्थकाममोक्षाणां कश्चिदवाप्यते धर्म-इति चेत् न तत्रापि पूर्वोक्तनिर्मूलत्वेनाप्रमाणत्वात्

न च रक्षोहादीनामपि प्रयोजनत्वं, तेषामन्यत एव शिष्याचार्यसं-बन्धलोकमीमांसादिभ्यः सिद्धिरिति वार्त्तिक एव प्रपञ्चितं, वेदविरुद्धं चेदं व्याकरणं "दृष्टं साम"त्यधिकृत्य "कलेर्ढक्" "वामदेवाड्ड्यड्ड्यौ" इत्युक्तं, वेदे च "यदकालयत्तत्कालेयस्य कालेयत्वं ततो वामं वसु समभवदित्युपन्यस्य "वामं वा इदं देवेभ्योऽजनि तस्माद्वामदेव्यमिति वेदबाधादप्रामाण्यं, पूर्वा-परविरोधाच्च अर्थप्रयुक्तानां हि शब्दानां व्याकरणं प्रतिज्ञातं वाक्यमेव च तथेष्टं न पदानि अनर्थकत्वात्, यथोक्तं "ब्राह्मणार्थो यथा नास्ति कश्चि-द्ब्राह्मणकम्बले देवदत्तादयो वाक्ये तथैव स्युरनर्थका" इति, ततश्च यथा-प्रतिज्ञं वाक्यमेव व्याकरणेन संस्कर्त्तव्यं तदव्याकरणात्पदव्याकरणाच्च पूर्वापरविरोधः, पदद्वारेण वाक्यमेव व्याकरणेन संस्क्रियते इति चेत् अत्यन्ताविद्यमानत्वाद्वाक्ये पदानां तद्द्वारेण वाक्यस्य विवरणद्वारेणैव शब्दस्य संस्काराभावात्तस्मादप्रमाणं व्याकरणं सर्वं भाषितव्या इति प्राप्तेऽभिधीयते "प्रयोगप्रत्ययौ तावद्वाचकत्वाकृतेऽपि हि । युक्तावेकस्य चार्थस्य न्याय्या नानेकशब्दता । अभियुक्तस्मृतेश्चात्र स्याद्विशेषावधारणं स्मृतेः स्मृत्यन्तरं मूलं साधुरूपनिरूपणे । प्रत्यक्षव्यव[1]धानाच्च नान्यवाक्यस-मानता । प्रयोगनियमे मूलं वेदस्तस्मात्प्रमाणता" गवादय एव साधवो न गाव्यादय इति साधुस्वरूपनियमः । साधव एव प्रयोज्या नासाधव इति धर्माय प्रयोगनियम इति द्वौ नियमौ व्याकरणे प्रतिपाद्येते द्वयोरपि च

१ प्रत्यक्षवचनाच्चैवेति पुस्तकान्तरपाठोयुक्तः ।

मूलसंभवादुपपन्नं प्रामाण्यं तथा हि । प्रयोगनियमे मन्वादिवत्सप्रत्ययप्रणीतत्वाद्वेदमूलत्वं न हि पाणिनिकात्यायनपतञ्जलिभ्योऽन्यः कश्चित्प्रत्ययिततरोऽस्ति तेन तत्प्रत्ययात्स्वनुमानं वेदवाक्यं, प्रत्यक्षमेव च वाजसनेयादिषु वचनं "तस्माद्ब्राह्मणेन न म्लेच्छितवै म्लेच्छो ह वा एष यदपशब्दः" इति, "आहिताग्निरपशब्दं प्रयुज्य सारस्वतीमिष्टि"मित्यादिषु च प्रायश्चित्तविधानम् । "उत त्वः पश्यन्नित्यादयश्च बहवो मन्त्रवर्णाः शब्दापशब्दविभागाभिज्ञतदनभिज्ञस्तुतिनिन्दारूपा', दृष्टार्थेऽपि च शब्दप्रयोगे तदाश्रितः साधुनियमो भोजनाद्याश्रित इवादिङ्नियम. शास्त्रेण विधीयत इति न प्रयोगोत्पत्त्यशास्त्रत्वादव्यवस्था सत्यानृतवदनवर्जनयोश्चावगीतमेव शास्त्रार्थत्वम् । तच्च शब्दार्थभेदेन द्विविधम् । तत्र यथैवार्थसत्यं यथावस्थितार्थकथनं धर्माय, तथा शब्दसत्यमपि यथावस्थिताविप्लुतशब्दोच्चारण मित्यर्थः । यथा चार्थानृतमन्यथावस्थितस्यान्यथा वचनं प्रत्यवायाय, तथा शब्दानृतमप्यन्यरूपे वाचके सत्यन्यरूपोच्चारणमिति न प्रयोगोत्पत्त्यशास्त्रत्वम् । द्वाभ्यामेव च वाक्याभ्यां साधूनेव प्रयुञ्जीत सुशब्दपर्यायाच्चासाधूनपशब्दपर्यायानिति समस्तशब्दापशब्दविधिप्रतिषेधसिद्धेर्नानन्तवाक्यकल्पनापत्तिः । साधुत्वासाधुत्वे एव च शब्दापशब्दसत्यानृतपर्याये उपलक्षणमनादिवाचकत्वमेव साधुत्वं तद्विपर्ययश्चासाधुत्वम् । यत्तु प्रयोगप्रत्ययानुपपत्त्या गाव्यादीनामपि वाचकत्वाद्व्यवस्थानुपपत्तिरित्युक्तं, तत्रोच्यते यद्यप्यमीषामवाचकत्वं, यद्यपि च मुख्याभावे गौणलक्षणयोरसंभवस्तथाऽपि वा वक्त्राशक्तिजतया मूलशब्दोपस्थानेन प्रत्यायकत्वं भविष्यति अशक्तिजत्वापरिज्ञानाच्चोपशृण्वन्तो बालास्तथैव संज्ञासंज्ञिसंबन्धं शिक्षित्वा तथैव स्वयं व्यवहरन्ति । तेभ्यश्च शिक्षित्वाऽन्येऽपीत्येवं प्रयोगप्रत्यययोरुपपत्तौ नैकान्ततः सर्वेषामविच्छिन्नवाचकत्वम् अध्यवसातुं शक्यते । संभवति चैवं नानेकशब्दत्वमेकस्यार्थस्याभ्युपगन्तुं न्याय्यम् अनेकशक्तिकल्पनाप्रसङ्गात् । प्रयोगवेलायां चाष्टविधदोषनिदानविकल्पापत्तेः । वाच्यवाचकयोश्चैकैकधाऽवधारितस्य नियमस्यानेकत्वे बाधप्रसङ्गात् । सास्नादिमान् हि यस्याभिधानक्रियायां कर्म तस्यां गोशब्दः करणमित्यनयोः संबन्धः ।

Digitized by Google

तद्यदि गाव्यादिभिरपि सास्नादिमानभिधीयते ततस्तस्यां वेलायां सास्नादिमत्कर्मिकायामप्यभिधानक्रियायां गोशब्दस्य करणत्वाभावात्प्रतीतबाधः । तस्मादेकैकस्यैव वाचकत्वमितरे तदशक्तिजा इति न्याय्यं, करहस्तादिषु च विशेषानवधारणादन्याय्याऽप्यनेकशब्दता गत्यन्तराभावादङ्गीक्रियते गवादिगाव्यादिषु त्वभियुक्तस्मरणास्मरणाद्विशेषोऽस्तीति न तावत्सर्वेषां वाचकत्वं वाचकरूपनियमेऽपि स्मृतेः स्मृत्यन्तरं मूलं तस्याऽप्यन्यदित्येवमनादिरेव स्मृतिपरम्परा, न चान्धपरम्परान्यायः शब्दस्वरूपस्य शब्दान्तराद्विविक्तस्य प्रत्यक्षत्वात् । सर्वे हि स्वे स्वे काले गवादिशब्दान्प्रत्यक्षत एवोपलभन्ते अतीतकाले च सत्तां पूर्वेभ्यो वृद्धेभ्यः श्रुत्वाऽवधारयन्ति सर्वकालमपि च केचन वृद्धाः सन्तीति तत्प्रत्यक्षसंभवात् न कदाचिदपि प्रत्यक्षविच्छेदः, सर्वकालवर्तित्वमेवानादित्वं साधुत्वं तच्चाविच्छिन्नपारम्पर्याभियुक्तस्मरणेन सुलभमिति न निर्मूलत्वम् ।

न च विगानादप्रामाण्यं श्रुतीनामपि ग्रहणाग्रहणादिविगानदर्शनात् । फलं चास्य शब्दापशब्दविभागज्ञानमुपादानपरित्यागोपयोगिधर्माधर्मप्राप्तिपरिहारार्थं रक्षोहादि च वेदविरुद्धं कामं भवतु अप्रमाणं सर्ववेष्टनादिस्मरणवत् न तावता सर्वाप्रामाण्यम्, एवं पदानर्थक्यवाक्यस्फोटाद्यभ्युपगमोऽपि न न्यायमूल इति न्यायाभावादप्रमाणं धर्माधर्मसिद्ध्यर्थे शब्दापशब्दविभागकथनमभियुक्तप्रणीतत्वात्प्रमाणमेवेति प्रमाणं व्याकरणं तदनुगता एव गवादयो वाचका इति स्थितम् ।

सू० प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥ ३० ॥

इदानीं वाचकप्रसङ्गाद्वाच्यविशेषश्चिन्त्यते किमाकृतिः? उत व्यक्तिरिति । तत्र यदि लोकवेदयोः शब्दार्थानामन्यत्वं भवेत्तत इदमनारम्भणीयम् । तथा हि लौकिकशब्दविषयं तावदिदमधिकरणमनर्थकं वैदिकविषयं तु भवत्यर्थवत् न तु तत्र व्यवहारानुपातिनां शब्दानामर्थनिर्णयः शक्यते कर्तुम् । उपायाभावात्तेनोभयस्मिन्नपि विषयेऽनारम्भ एवाधिकरणस्यान्य-

त्वपक्षे स्यात्। एकत्वपक्षे तु लोके वृद्धव्यवहारानुसारेण शब्दार्थनिर्णयः कृतः, तत्रानुपयुक्तोऽपि वेदे फलिष्यति तेनाकृत्यधिकरणोपोद्घातः तथा लोकवेदयोः पदपदार्थानामन्यानन्यत्वे विचार्यते तत्र सत्यपि वर्णाभेदे केनचित्स्वरच्छान्दसवर्णागमलोपविकारविपर्ययाध्यायानध्यायादिधर्मभेदेन जरराजपदयोरिव क्रमभेदेन व्यपदेशभेदात्स्पष्टभेदस्वरूपादिशब्दसाहचर्याच्च लोकवेदयोः पदानामन्यत्वम्। अर्थोऽपि च पदान्यत्वादेव "उस्राना वै देवगवा वहन्ती"ति दर्शनाच्च अश्ववालादिशब्दानां च स्पष्टार्थान्तरदर्शनादन्य इति प्राप्तेऽभिधीयते। "प्रत्यक्षप्रत्यभिज्ञानाद्वर्णैकत्वं प्रतिष्ठितं वर्णात्मकं पदं तच्च तदभेदान्न भिद्यते"।

ननु वर्णाभेदेऽपि स्वरादिभेदात्पदभेदो वाक्याधिकरणे दर्शितः। "पदावधारणोपायान् बहूनिच्छन्ति सूरयः। क्रमन्यूनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृती"रिति, सत्यं, योऽर्थप्रतीत्यौपयिको धर्मस्तद्भेदे भिद्यत एव पदं यथा पूर्वपदप्रकृतिस्वरत्वे बहुव्रीह्यर्थत्वम्। अन्तोदात्तत्वे स्वार्थवृत्तितास्मरणादवगम्यते ब्रह्मब्राह्मणादिषु तु न्यूनातिरिक्तवशादर्थभेदो लोकत एवावगतः, जरराजादिषु क्रमान्यत्वादर्थान्यत्वाध्यवसायः। नैवं, लोकवेदयोरर्थौपयिकधर्मभेदोऽस्ति। यदि ह्यनियतस्वराणामन्यो ऽर्थो नियतस्वराणामन्योऽर्थ इति स्मृतितोलोकतो वा ऽवगतं स्यात्ततो नियतानियतस्वरतया लोकवेदयोः पदभेदोभवेत् न चैवमतो नास्ति पदभेदः। पद्यते गम्यते ऽनेनेति हि पदम्, अतो गमकस्वरूपस्य कियताऽपि रूपेण सति भेदे भिन्नं पदं, तदभावे तु धर्ममात्रभेदान्न तद् भिद्यते। एवं देवासः, [१]त्मनेत्यादिषु लौकिकेभ्यो न्यूनातिरेककृतस्वरूपभेदे सत्यपि तद्रूपस्यार्थान्तरानवगमात्किंचिद्रूपभेदेऽपि लौकिकपदप्रत्यभिज्ञानात् सत्यपि च केषांचिद्भेदे सर्वेषां भेदस्याप्रामाणिकत्वात्, पदैक्ये च तदर्थावगमादुस्रानादिवचनस्यान्यपरत्वादश्ववालाद्यर्थभेदेऽपि सर्वेषां तदभावात्सिद्धमेकत्वं लोकवेदयोः पदपदार्थानाम्॥

१ आत्मना इत्यस्य शब्दसंक्षेपः।

एवं सिद्धे विचार्यते किमाकृतिः शब्दार्थे? उत व्यक्तिराकृतिविशिष्टव्यक्ति रिति त्रयः पक्षाः प्राधान्येन चिन्त्यन्ते ॥

अन्ये तु विकल्पसमुच्चयसंबन्धसमुदायादयः सर्वे पक्षा आकृतिविशिष्टव्यक्तिपक्षनिराकरणेन निराकृता एव भवन्तीति न पृथक् विचार्यन्ते तत्र "प्रयोगचोदनाभावाद्व्यक्तेरेवाभिधेयता । न ह्याकृतिरमूर्तत्वाद्व्यवहारोपयोगिनी ॥ लिङ्गकारकसंख्याभिः संबन्धोऽस्या न कल्पते । सामानाधिकरण्यं च न जातिगुणशब्दयोः ॥ व्यक्तिवाचित्वपक्षे तु सर्वमेतत्समञ्जसम् । तेन शुद्धा विशिष्टा वा व्यक्तिः शब्दस्य गोचरः" ॥ "व्रीहीनवहन्ति" "पशुमालभेत" "गामानय ब्राह्मणो न हन्तव्य" इति यावन्त एवमादयो विनाशिमूर्तिमद्द्रव्यगोचराः प्रयोगविधयः प्रतिषेधा वा ते सर्वे व्यक्तावेव संभवन्ति नाकृतौ । न ह्याकृतिरवहन्तुमालब्धुमानेतुं वा शक्यते नित्यत्वादमूर्तत्वाच्च तेनानर्थकं तद्विधानं, प्रतिषेधश्च, प्राप्त्यभावाद्व्यक्तिपक्षे तूपपद्यते । तस्माद्व्यक्तिः शब्दार्थः, एवं च वृत्तौ वृक्षाभ्यामिति व्यक्तौ प्रातिपदिकार्थे प्रत्ययाभिहितानि लिङ्गसंख्याकारकाणि तया संबध्यन्ते । जातेरलिङ्गत्वादसंख्यात्वादमूर्तत्वेन चाकारकत्वादसंबन्धः स्यात् । सामानाधिकरण्यं च गौः शुक्ल इति शुद्धव्यक्तिवचनयोरेकार्थत्वादुपपद्यते जातिगुणविशिष्टद्रव्यवचनत्वे ऽपि विशेषणभेदे सत्यपि विशेष्याभेदादुपपन्नम् । इतरपक्षे तु जातिगुणमात्रवृत्तित्वादर्थभेदे दुर्लभं सामानाधिकरण्यम् । एवं पुरुषो देवदत्त इति जातिद्रव्यवचनयोर्दर्शयितव्यम् । तस्माद्व्यक्तिरेवार्थः, कथं तर्हि व्यक्त्यन्तरे प्रयोगो यत्र न दृष्टः शब्दः? सामान्यस्योपलक्षणत्वाददोषः । यैवमाकृतिका सा गौरिति सामान्यमुपलक्षणीकृत्य शब्दार्थेषिता योऽयं शुक्लवासाः स देवदत्त इतिवत् । यथा च तत्रोपलक्षणभूतं वासोऽनभिधाय देवदत्त एवाभिधीयते तथेहाप्युपलक्षणमात्रत्वात् सामान्यस्यानभिधाने व्यक्तय एव शुद्धा अभिधीयन्ते । एकोपलक्षणलाभादेव नानेकशक्तिकल्पनापत्तिः । आकृतिविशिष्टव्यक्त्यभिधाने तु न कश्चिद्दोषः । तस्माद्व्यक्तिरेव शुद्धा विशिष्टा वा शब्दार्थ इति, नैतद्युक्तं, कुतः? "आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः । संदेहाच्चरमज्ञानाच्च-

अबुद्धरभावतः ॥ अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः । आकृतेः प्रथमज्ञा-
नात्तस्या एवाभिधेयता ॥ व्यक्त्याकृत्योरभेदाच्च व्यवहारोपयोगिता । लि-
ङ्गसंख्यादिसंबन्धः सामानाधिकरण्यधीः । सर्वं समञ्जसं ह्येतद्वस्त्वनेका-
न्तवादिनः लक्षणा वाऽभ्युपेतव्या जातेस्तेनाभिधेयता' । न ह्यनन्तासु
व्यक्तिषु संज्ञित्वं शक्यते ऽवगन्तुम्, व्यभिचाराच्च व्यक्तीनामशब्दार्थत्वं
नियमलक्षणत्वात्संबन्धस्यानियमे तदयोगात्, अनन्ताश्च शब्दव्यक्तयो ऽन-
न्तासु व्यक्तिषु कल्प्याः, जात्युपलक्षणत्वेऽप्यभिधेयानामनन्तत्वाच्छक्त्यान
न्त्यमस्त्येव । व्युत्पत्तिकाले हि जातिरुपलक्षणं न त्वभिधानसमये, अभि-
धानं हि प्रातिस्विकेनैव रूपेण व्यक्तीनां, यथाऽत्रत्रयमेकापवरकस्थ-
मेकापवरकस्थित्यैवोपलक्ष्य कश्चित्कंचिदाह य एतस्मिन्नपवरकेऽधुना आस-
ते ते त्रयोऽत्रशब्दाभिधेया इति । तत्र यद्यपि व्युत्पत्तिसमयेऽपवरकस्थिति
र्नामैकमुपलक्षणं लभ्यते तथाऽपि शब्दस्तदनादरेण व्यक्तित्रयमेव स्वरूपे-
णाभिधत्त इति भवति शक्तित्रयम् । एवमिहापि यद्यपि व्युत्पत्तिसमये
जातिरेकोपलक्षणमासीत्तथाऽपि शब्दस्तामस्पृशन्नेव नानारूपा व्यक्तीः स्वेन
रूपेणाभिधत्त इति स्यादेव शक्त्यानन्त्यम्, अपि च यद्यव्यपदेश्यं धर्मिरूपम-
भिधेयं ततो गोशब्दोच्चारणाद्गोव्यक्तिः प्रतीयमानाऽपि नाश्वादिव्यक्तिभ्यो
व्यवच्छिन्ना प्रतीता स्यात् न ह्यसाधारणमाकारमन्तरेण द्रव्यं द्रव्यान्तर-
व्यवच्छिन्नं प्रतीयते तत्र गौरित्युक्ते सर्वत्राविशिष्टा प्रतीतिः स्यात् यथा-
ऽऽह "अव्यपदेश्यत्वेन सर्वत्राविशेषणप्रसङ्गा"दिति अथाभिधानसमय एव
जातिरुपलक्षणमित्यभिदधदेव हि व्यक्तिं शब्दो जातिमुपलक्षणमादाय
तज्जातीयरूपेणाभिधत्ते गोजातीयमिति । ततः प्रथमं जातिरभिधातव्या
न ह्यनभिधाय जातिं तज्जातीयत्वेन रूपेण व्यक्तिरभिधातुं शक्यते ।
ततश्च विशिष्टाभिधानमेव वाचोयुक्त्यन्तरेणापन्नं न शुद्धाभिधानम् ।
तदाह "सामान्याकारेण निरूपणे विकल्पादि"ति विशेषणादित्यर्थः ।
विशिष्टाभिधाने च पूर्वतरं विशेषणमभिधातव्यम् । तदभिधाने च तत एवा-
त्यन्ताविनाभूतव्यक्तिप्रतिपत्तिसिद्धेर्न तत्राभिधानशक्तिकल्पनावसरः । किंच
गोशब्द उच्चरिते व्यक्तिषु संशयो भवति न कस्यांचिन्निर्णयः । यत्र च संश

यो न तस्यामभिधेयता शब्दस्य निश्चायकत्वात्सामान्यं तु निर्णीयत इति भवत्यभिधेयम् । ननु असत्यपि व्यक्तिविशेषनिर्णये व्यक्तिमात्रं निर्णीयत-एव, किमिदं व्यक्तिमात्रं ? सामान्यं विशेषो वा द्व्याकारैव हि वस्तुषु बुद्धि-र्व्यावृत्त्यनुगतरूपा तत्र विलक्षणबुद्ध्यालम्बनं व्यक्तिः समानबुद्ध्यालम्बनं च सामान्यम् न तदुभयातिरिक्तं व्यक्तिमात्रं नाम किंचिदस्ति वस्तुनो रूप-म् । सामान्यमेव त्वनेन मात्रशब्देनाभिधीयत इति तदेवाभिधेयम् । प्रथमं च सामान्यमेव शब्दाद्गम्यते पश्चाच्च व्यक्तिष्वाकाङ्क्षामात्रं जायते ततस्तदेवाभिधेयं न व्यक्तिविशेषः । विचित्राश्च अखण्डमुण्डादिरूपा व्यक्तय इति विचित्रा गोशब्दोच्चारणे बुद्धिः स्यात् एकाकारा तूत्पद्यते । अतो-ऽभिधेया जातिः, अन्वयव्यतिरेकाभ्यां चैवमेव युक्तम् । व्यवहाराङ्गता च जातेर्व्यक्त्यनतिरेकादुपपद्यते अतोऽभिधेया जातिः, न हि जातिर्नाम व्यक्तेरर्थान्तरभूतं किमपि तत्त्वम्, अपि तु वस्त्वेव ह्येकमुभयात्मकं व्यावृत्त्यनुगतरूपतया बुध्यते । तत्र सामान्यं शब्दार्थ इति अयमर्थः सामान्यात्मना वस्तुशब्दाद्गम्यते न विशेषात्मनेति । यच्च सामान्यात्म-ना शब्देन बोधितं तस्य क्रियासंबन्धश्चोद्यते । शक्नोति च तत्क्रियां सा-धयितुम्, अतस्तदेव क्रियाश्रयविशेषरूपमपि लिङ्गसंख्याकारकसंबन्धः सा-मानाधिकरण्यं च सर्वमनेकान्ताश्रयणेनैव सुपरिहारम् । यदा तु भेद एव जातिव्यक्त्योस्तदा सर्वमिदं लाक्षणिकव्यक्त्याश्रयणेनोपपद्यते । यत्र तु "पशुना यजेत" "अरुणया क्रीणाती"त्येवमादौ करणत्वश्रवणं तत्र जातिगु-णयोरेवामूर्त्तयोरपि द्रव्यपरिच्छेदेन मुख्यमेव करणत्वमुपपन्नम् । अधिक-रणसंप्रदानादिरूपत्वं मूर्त्तस्यासंभवादभेदं लक्षणां वाऽऽश्रित्य समर्थनी यम् । आह च "तेन तल्लक्षितव्यक्तेः क्रियासंबन्धचोदना । जातिव्यक्त्योर-भेदो वा वाक्यार्थेषु विवक्षित" इति तस्मात्सामान्यमेवाभिधेयं न व्यक्ति-रिति सिद्धम् ॥ इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां

प्रथमस्याध्यायस्य तृतीयः पादः ॥

(शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(Continued from page 64. Vol. IX.)

मू० प्रकाशत्वादेव कस्यचिदेव भवेत्प्रकाशः प्रदीपादिप्रकाशवत्, तस्मान्नात्मा भवितुमर्हति संवित्। संविदनुभूतिज्ञानादिशब्दाः संबन्धिशब्दा इति च शब्दार्थविदः, न हि लोकवेदयोर्जानातीत्यादेरकर्मकस्याकर्तृकस्य च प्रयोगो दृष्टचरः ।

टी० "प्रकाशत्वादेवे"ति, प्रकाशत्वात्—विषयेण सा[1]क्षात्संबन्धस्य साक्षाद्वा परम्परया वा ज्ञायमानत्वेनापरोक्षव्यवहारानुगुण्यहेतुत्वादित्यर्थः। अनेन स्वरूपभूतज्ञानेन्द्रियलिङ्गादिव्यावृत्तिः। हेत्वन्तरमप्याह "संविदनुभूती"ति, संबन्धिशब्दत्वं शब्दस्वभावायत्तमित्याशङ्क्याह "न हि लोकवेदयो"रिति, यत्रार्थस्वरूपस्यान्यथात्वं दृश्यते तत्र शब्दस्वभावायत्तत्वमाश्रयणीयं, यथा दारा इत्यादिषु बहुत्वादेः, यत्र नान्यथात्वं तत्रार्थस्वभावायत्तत्वमेव, यथा भार्येत्यादावेकत्वादेः, तथा लोकवेदयोः सकर्मकर्तृत्वदर्शनात् अर्थस्वभायत्तमेव संबन्धिशब्दत्वमित्यभिप्रायः। यद्वा कर्मकर्तृसंबन्धित्वं व्युत्पत्तिनिमित्तमस्तु न प्रवृत्तिनिमित्तं तत्तु ज्ञप्तिमात्रमित्यत्राह "न हि लोके"ति, प्रयोगाधीनं हि प्रवृत्तिनिमित्तान्तरकल्पनं, प्रयोगश्च संबन्धिन्येवार्थे इति नार्थान्तरकल्पना स्यात्, स्वरूपभूतज्ञानवाचिशब्दानां संबन्धिशब्दत्वं त्वन्मतेऽप्यनुपपन्नमिति चेत् न; स्वरूपगोचराणां स्वयंप्रकाशत्वरूढानां ज्ञानादिशब्दानामनुभूत्यादिशब्देभ्यः शब्दान्तरत्वात्, अतः संबन्धिशब्दत्वोपदेशस्तु धर्मभूतज्ञाने सावकाशोऽस्मन्मते विषयाश्रयसंबन्धि-

१ साक्षात्परम्परया इत्यत्र वाकारद्वयरहितं पाठान्तरम् ।

ज्ञानस्यैव विषयाश्रयसंबन्धबाधेन निराश्रयत्वनिर्विषयत्वाभ्युपगमात्त्वन्मते संबन्धिशब्दतोपदेशो निरर्थक इति भावः। यथाजडत्वात्संविदात्मत्व-समर्थनं दूषयितुमनुवदति–

सू० यच्चोक्तम् अजडत्वात्संविदेवात्मेति, तत्रेदं प्रष्टव्यम् अजडत्वमिति किमभिप्रेतं? स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत् तथा सति दीपादिष्वनैकान्त्यं संविदतिरिक्तप्रका-शधर्मानभ्युपगमेनासिद्धि[1]रिति विरोधश्च।

टी० "यच्चोक्त"मिति, अजडत्वं नाम किं स्वसत्ताप्रयुक्तप्रकाश-त्वम्? उताव्यभिचरितप्रकाशसत्ताकत्वम्? उत स्वस्मै प्रकाशमानत्वम्? उत स्वस्मै स्वयंप्रकाशत्वम्? उत स्वयंप्रकाशत्व? मिति पञ्चधा विकल्पम-भिप्रेत्याह "अजडत्व"मिति, किमभिप्रेतमिति अहं जानामीति प्रत्यक्ष-बाधः सर्वसाधारणं दूषणं, प्रथमं स्वसत्ताप्रयुक्तप्रकाशत्वपक्षं दूषयितुमाह 'स्वसत्ते''ति, स्वसत्ताप्रयुक्तः प्रकाशो यस्येति बहुव्रीहिः, वक्ष्यमाणासिद्धि-दूषणोपयोगिभेदज्ञापनार्थं स्वसत्ताप्रयुक्तशब्दः। अनैकान्त्यमाह "तथा-सती"ति, स्वपक्षे ज्ञातुरात्मत्वात्सपक्षभूते तस्मिन् विपक्षे ज्ञातुरनात्मनि-दीपे च वृत्त्याऽनैकान्त्यं पक्षत्रयवृत्तित्वलक्षणमुक्तं, परपक्षे त्वनियतत्वमेवा-नैकान्त्यं सपक्षाभावात्। दूषणान्तरद्वयमाह "संविदतिरिक्ते"ति, संवि-त्प्रयोजिका प्रकाशः प्रयोज्य इति तदतिरेकेणानभ्युपगमादसिद्धिः, अभ्यु-पगमे निर्विशेषत्वविरोधः, इमाबसिद्धिविरोधौ विकल्पितसर्वशिरःसाधार-णावनुसंधेयौ। यद्वा विरोधः पक्षविपक्षयोरेव वर्तमानत्वं पक्षभूतसंविदि विपक्षे दीपादौ च वृत्तेः। परमतमात्रपर्यालोचनायां विरोध उक्तः, अत्र स्वसत्ताप्रयुक्तप्रकाशत्वमित्यत्र प्रकाश–शब्देन किं साक्षाद्वा परम्परया व्यव-हारानुगुण्यं विवक्षितम्? उत परम्परयैव? उत साक्षादेवे? ति विकल्पो-ऽभिप्रेतः प्रथमं शिरःस्वपरदर्शनपर्यालोचनया ऽभिहितयोरनैकान्त्यविरो-

१ असिद्धिर्विरोधश्चेति पाठान्तरम्।

भयोरन्यतरेण निरस्तं भवति, द्वितीये त्वसिद्धिः परम्परयैव व्यवहारानुगुणत्वस्य ज्ञप्त्युभयवाद्यनभिमतत्वात्, तृतीये सत्तारिक्तप्रकाशानभ्युपगमनिबन्धनासिद्धिर्निर्विशेषत्वविरोधैः स्यातामित्यभिप्रायः । द्वितीयपक्षं प्रतिविपत्ति—

सू० अव्यभिचरितप्रकाशसत्ताकत्वमपि सुखादिषु व्यभिचारान्निरस्तं, यद्युच्येत सुखादिरव्यभिचरितप्रकाशोऽपि अन्यस्मै प्रकाशमानतया घटादिरिव जडत्वेनानात्मेति ज्ञानं वा किं स्वस्मै प्रकाशते? तदपि ह्यन्यस्यैवाऽहमर्थस्य ज्ञातुरवभासते अहं सुखीति वत् जानाम्यहमिति, अतः स्वस्मै प्रकाशमानत्वरूपमजडत्वं संविदसिद्धं तस्मात्स्वात्मानं प्रति स्वसत्तयैव सिद्ध्यन्नजडोऽहमर्थ एवात्मा ।

टी० "अव्यभिचरिते"ति, न व्यभिचरति प्रकाशो[1] यस्य स तादृशोऽव्यभिचरितप्रकाशसत्ताकः प्रयोज्यप्रयोजकत्वाभावेऽपि विद्यमानदशायां सर्वदा प्रकाशमानत्वमित्यर्थः, तस्यानात्मत्वेन संप्रतिपन्नेषु सुखदुःखादिषु व्यभिचार उक्तः । अथ तत्परिहारमुखेन स्वस्मै प्रकाशमानत्वपक्षमुपक्षिपति "यद्युच्येते"ति, परिहरति "ज्ञानं चे"ति, कस्येत्यत्राह "तद्पी"ति, परस्मै भासमानत्वमुपपादयति "अह"मिति, तस्मादेवंरूपाजडत्वमसिद्धमित्याह "अत"इति, अथ चतुर्थं शिरोदूषयत्सिद्धिमाह "तस्मा"दिति, स्वयंप्रकाशत्वपक्षेऽपि स्वयंप्रकाशत्वनाम किं ज्ञानकर्मतामन्तरेण व्यवहारानुगुणत्वं? मुत ज्ञानान्तरनिरपेक्षप्रकाशत्वं? मित्यऽभिप्रेते विकल्पे प्रथमशिरस्तस्मादिति ग्रन्थेन दूषितम्, इह स्वात्मव्यावृत्त्यर्थं स्वात्मानमित्युक्तं स्वसत्तयैव सिध्यन्नित्यनेन स्वयंप्रकाशत्वमुक्तं स्वस्मै स्वयंभासमानत्वमहमर्थस्याधिकं स्वस्मै स्वयंभासमानस्य स्वयंभासमानत्वम-

१ न व्यभिचरति प्रकाशो यस्य सत्तायां सोऽव्यभिचरितप्रकाशसत्ताकः इति च पाठान्तरम् ।

Digitized by Google

प्यस्तीत्यभिप्रायेण स्वात्मानं प्रति स्वसत्तयैवेत्युक्तं, तेन ज्ञानकर्मतामन्तरेण व्यवहारानुगुणत्वं ज्ञातर्यप्यस्तीति तद्व्यभिचरितं स्वपक्षेऽनात्मनि ज्ञातर्यपि विपक्षभूते वृत्तेरिति दर्शितं ज्ञानान्तरनिरपेक्षप्रकाशत्वं संविद्व्यासिद्धं तस्याः स्वरूपभूतज्ञानाधीनत्वात् अहमर्थस्येव तदित्यभिप्रायः स्व[1]सत्तयैवेत्यनेन सूचितः, तमेव विवृणोति–

मू० ज्ञानस्यापि प्रकाशता तत्संबन्धायत्ता, तत्कृतमेव हि ज्ञानस्य सुखा[2]देरपि स्वाश्रयचेतनं प्रति प्रकटत्वमितरं प्रति अप्रकटत्वं च, अतो न ज्ञप्तिमात्रमात्मा, अपि तु ज्ञातैवाहमर्थः। अथ यदुक्तमनुभूतिः परमार्थतो निर्विषया निराश्रया च सती भ्रान्त्या ज्ञातृतया ऽवभासते रजततयेव शुक्तिर्निरधिष्ठानभ्रमानुपपत्तेरिति।

टी० "ज्ञानस्यापी"ति, तत्संबन्धायत्तत्वमुपपादयति "तत्कृतमेव ही"ति, ज्ञानस्फुरणस्याश्रयसंबन्धोऽपि सामग्र्यन्तर्भूत इति भावः। अज्ञत्वात्संविदात्मत्वासिद्धिं निगमयति "अत" इति, अथाहमर्थस्य भ्रान्तिसिद्धत्वं दूषयितुमनुवदति अथ यदुक्तमित्यादिना, संविदपि मिथ्या किन्न स्यादित्यत्राह "निरधिष्ठाने"ति, अनुभूतिव्यतिरिक्तापारमार्थ्यसिद्धवत्कारेणायं हेतुरुक्तः, दूषयति तदयुक्तमित्यादिना, अधिष्ठानसामानाधिकरण्येनाध्यस्तप्रतीतिं दृष्टान्तेनोपपादयति "पुरोऽवस्थितेति", पक्षे तद्विपर्ययं दर्शयति "अत्र त्वि"ति, पृथगवभासमाना व्यधिकरणतया ऽवभासमाना तथा प्रतीतिं दर्शयति "तथा ही"ति, ततः किमित्यत्राह–

मू० तदयुक्तं तथा सत्यनुभवसामानाधिकरण्येनानुभविताऽहमर्थः प्रतीयेत अनुभूतिरहमिति पुरोऽवस्थितभास्वरद्रव्याद्याकारतया रजतादिरिव, अत्र तु पृथगवभासमाने-

१ सत्तयैवेति पुस्तकान्तरपाठः।

२ सुखादेरिवेति पुस्तकान्तरपाठः।

वेयमनुभूतिरर्थान्तरमहमर्थं विशिनष्टि दण्ड इव देवदत्तं, तथा ह्यनुभवाम्यहमिति प्रतीतिस्तदेवमस्मदर्थमनुभूतिविशिष्टं प्रकाशयन्ननुभवाम्यहमिति प्रत्ययो दण्डमात्रे दण्डी देवदत्त इति प्रत्ययवद्विशेषणभूतानुभूतिमात्रावलम्बनः कथमिव प्रतिज्ञायेत । यदप्युक्तं स्थूलोऽहमित्यादिदेहात्माभिमानवत एव ज्ञातृत्वप्रतिभासनात् ज्ञातृत्वमपि मिथ्येति तदयुक्तम् आत्मतयाऽभिमताया अनुभूतेरपि मिथ्यात्वं स्यात् तद्वत एव प्रतीतेः सकलेतरोपमर्दितत्त्वज्ञानाबाधितत्वेनानुभूतेर्न मिथ्यात्वमिति चेत् हन्तैवं सति तदबाधादेव ज्ञातृत्वमपि न मिथ्या । यदप्युक्तम् अविक्रियस्यात्मनो ज्ञानक्रियाकर्तृत्वरूपं ज्ञातृत्वं न संभवति अतो ज्ञातृत्वं विक्रियात्मकं जडं विकारास्पदाव्यक्तपरिणामाहङ्कारग्रन्थिस्थमिति न ज्ञातृत्वमात्मनः, अपि त्वन्तःकरणरूपाहङ्कारस्य, कर्त्तृत्वादिर्हि रूपादिवत् दृश्यधर्मः कर्तृत्वेऽहंप्रत्ययगोचरत्वे चात्मनोऽभ्युपगम्यमाने देहस्येवानात्मत्वपराक्जडत्वादिप्रसङ्गश्चेति, नैतदुपपद्यते देहस्येवाचेतनत्वप्रकृतिपरिणामित्वदृश्यत्वपराक्परार्थत्वादियोगादन्तःकरणरूपस्याहङ्कारस्य, चेतनासाधारणस्वभावत्वाच्च ज्ञातृत्वस्य,

टी० "तदेव"मिति, तदेवमुक्तप्रकारेण धर्मिधर्मभावप्रतीतौ विशेषणतया प्रतिपन्ने तद्विशेषणविशिष्टाध्यासोऽनुपपन्न इत्यर्थः । तच्च न संबन्धमात्राध्यासः, तथा सति संबन्धिनो ज्ञातुः पारमार्थ्यप्रसङ्गात्

न च तथाभ्युपेतम्। ननु विशेषणे विशिष्टाध्यासो दृश्यते यथा प्रभायां मण्यध्यास इति, इदं चोद्यं चोक्तं पृथगवभासमानेष्वनेन परिहृतं, न हि तथा वैयधिकरण्येन विशेषणभूता प्रभा भाति, किंतु अयम्मणिरिति मण्यध्यासाधिष्ठानभूता प्रभा मणिसामानाधिकरण्येनैव हि भाति ननु अनुभवसामानाधिकरण्येन प्रतीतिप्रसञ्जनमयुक्तं दिक्षु मालिन्यं नभसि राग इति वैयधिकरण्येनाप्यध्यासदर्शनात्, नैवं पदद्वयप्रवृत्तिनिमित्तयोरेकाश्रयवृत्तित्वं हि सामानाधिकरण्यम् इह च दिक्त्वमालिन्ययोर्नभस्त्वारुण्ययोश्चैकाश्रयवृत्तित्वादर्थतः सामानाधिकरण्यमस्ति, वैयधिकरण्यं तु शब्दगतं दिशो मलिना दिक्षु मालिन्यमित्यत्र कोऽर्थभेदः, अध्यासेषु धर्म्यैक्यप्रतीतिरवर्जनीया अतः सैवात्रापाद्यते अनुभूतिरहमिति प्रतीयेतेति। नन्वनुभूतिरहमितिप्रतीतिप्रसङ्गो दुर्वचः, अनुभूतित्वं, ह्यधिष्ठानासाधारणाकारः, तदस्फुरणं भ्रमानुगुणमेव, न हि शुक्तीरजतमिति प्रतीयते इति एवं तर्ह्यनुभूतेर्निर्विशेषाया रूपान्तरेण स्फुरणाभावादनुभूतितया स्फुरणे विरोधाच्च तदधिकरणाध्यासानुदयः, अविरोधेन अहन्त्वाध्यासे अन्योन्यसामानाधिकरण्यप्रतीतिप्रसङ्गो दुर्वारः एतदभिप्रायेण हि पुरोऽवस्थितभास्वरद्रव्याकारतया रजतादिरिवेत्युक्तम्। ननु संविदध्यासानुदयो दुर्वचः, विषयोपश्लिष्टानुभूतिरहं जानामीत्यत्र ज्ञात्रध्यासे प्रतीयते सा तु नाधिष्ठानं निर्विषया निराश्रयानुभूतिरेवाधिष्ठानं तदप्रकाशादध्यासोदय इति, उच्यते तत्र प्रतिपन्नस्याधिष्ठानत्वायोगात् विषयाश्रयशून्यसंविदो योग्यानुपलब्धिनिरस्तत्वाद्विषयप्रकाशकसंविद एवात्मत्वाभ्युपगमेन त्वया स्वयंप्रकाशत्वसमर्थनाच्च सैवाधिष्ठानमिति तदवभासे तस्याश्च शुक्तित्ववद्भ्रमविरोधित्वेऽध्यासानुदय इति देहात्माभिमानवतो ज्ञातृत्वप्रतिभासात्तन्निष्ठेति यदुक्तं तदनूद्य दूषयति यदप्युक्तमित्यादिना, "तदबाधादेवे"ति, ज्ञातृत्वस्याबाधितत्वं मुक्तावपि ज्ञातृत्वपरश्रुतिवाक्यात्, ज्ञातृत्वस्य विक्रियात्मकत्वं निराकर्तुं तदनुवदति "यदप्युक्तमविक्रियस्ये"ति, ज्ञानस्य धात्वर्थतया क्रियात्वं तत्कर्तृत्वं च विकाररूपम् अत एव जडमविक्रियस्यात्मनो न संभवति विक्रियात्मकत्वाज्जडत्वाच्च तादृशाहङ्कारान्यस्य-

मित्यर्थः । सर्वाध्यासमूलत्वात् ग्रन्थित्वम् । अथ हेत्वन्तरेण च ज्ञातृत्वस्यान्तःकरणधर्मत्वमुपपादयति “कर्तृत्वादि”रिति, दृश्यत्वादित्यर्थः । आत्मनो ज्ञातृत्वेऽनिष्टं प्रसञ्जयति “कर्तृत्व”इति, अत्र व्यतिरेक्यनुमानान्यभिप्रेतानीति पूर्वमेवोक्तं परिहरति “नैतदि”ति, देहस्येवेत्यादिना अन्तःकरणस्य ज्ञातृत्वाभावोपपादनम् आदिशब्दादन्तवत्त्वकृदयं चेतनासाधारणेत्यादिना आत्मनो ज्ञातृतोपपादनं ज्ञातृत्वाभावः साध्योऽभिप्रेतः, अन्तःकरणं धर्मि अचेतनत्वादयो हेतवः, देहस्येवेति सपक्षोदर्शितः, ज्ञातृत्वस्य चेतनासाधारणत्वकथनाद् व्यतिरेकव्याप्तिश्च दर्शिता एवं परोक्तव्यतिरेकिणां प्रत्यनुमानान्युक्तानि भवन्ति अन्तःकरणं न ज्ञातृ अचेतनत्वात् प्रकृतिपरिणामत्वात् दृश्यत्वात् पराक्त्वात् परार्थत्वात् देहवदिति । ननु अचेतनत्वादज्ञातृत्वे साध्ये साध्याविशिष्टता, नैवम् अचेतनशब्देनानात्मत्वस्य विवक्षितत्वात् पुरुषार्थप्रतिसंबन्धित्वं वा देहं प्रति नियन्तृतया अन्तःप्रविष्टत्वं वा आत्मत्वं तदभावोऽनात्मत्वं प्रकृतिपरिणामत्वं प्रकृतिकार्यत्वं दृश्यत्वं नियमेन ज्ञानान्तराधीनसिद्धित्वं पराक्त्वं परस्मै भासमानत्वं परार्थत्वं परप्रयोजनैकफलत्वं जीवोपकरणत्वमित्यर्थः । आत्मनो ज्ञातृत्वे साध्येऽमी हेतवः, यथासंभवं तर्का योजनीयाः । आत्मनो ज्ञातृत्वाभावे देहस्येवानात्मत्वप्रसङ्गः परार्थत्वप्रसङ्ग इति । ननु यथा घटदेहयोरचेतनत्वादिके तुल्येऽपि इन्द्रियाश्रयत्वादिकं देहासाधारणं भवति तथा देहान्तःकरणयोरप्यचेतनत्वादिके तुल्येऽपि ज्ञातृत्वमन्तःकरणासाधारणधर्मः स्यात् अत इन्द्रियाश्रयत्वाभावस्येव ज्ञातृत्वाभावस्याप्यचेतनत्वादिकमप्रयोजकम् अर्चिद्विशेषत्वमेव प्रयोजकं तथाऽऽत्मनो ज्ञातृत्वाभावेऽपि प्रत्यक्त्वादिरुपपद्यतामित्युभयत्रापि विपक्षे बाधकाभावमाशङ्क्य परिहरति—

सू० एतदुक्तं भवति यथा देहादिर्दृश्यत्वपराक्त्वादिभिर्हेतुभिस्तत्प्रत्यनीकद्रष्टृत्वप्रत्यक्त्वादेर्विविच्यते एवमन्तःकरणरूपाहङ्कारोऽपि तद्दृश्यत्वादेव तैरेव हेतुभिस्तस्मादिविच्यत इति ।

टी० "एतदुक्त"मिति, येन दृश्यत्वादिविरुद्धधर्मेण देहस्य द्रष्टृत्वाद्यनुपपत्तिस्तेनान्तःकरणस्यापि तद्दृश्यत्वाद् द्रष्टृत्वानुपपत्तिरित्यर्थः, ज्ञातृत्वाभावं प्रत्यचेतनत्वादिकमप्रयोजकं चेत् देहस्य ज्ञातृत्वप्रसङ्गः, ततश्चार्वाकं प्रति देहात्मभेदस्त्वयाऽपि दुरुपपादः । न च देहस्य देहत्वादज्ञातृत्वं घटादौ देहत्वाभावेऽपि ज्ञातृत्वाभावात् अतस्तत्राचित्त्वादिकस्य ज्ञातृत्वाभावप्रयोजकत्वमभ्युपगन्तव्यमिति क्वचित् ज्ञातृत्वाभावप्रयोजकस्य तस्याचित्त्वादेः क्वचिदप्रयोजकत्वमयुक्तम्, अतोऽचित्त्वादिभिर्देहस्येवान्तःकरणस्य द्रष्टृत्वाद्यनुपपत्तिरित्यर्थः, प्रत्यक्त्वादेरित्यादि—शब्दादजडत्वपरत्वं विविच्यते—प्रत्यक्त्वादिधर्मैः संबन्धरहितोऽवगम्यते इत्यर्थः "तैरेव हेतुभिस्तस्माद्विविच्यत" इति पराक्त्वादिभिर्देहस्य ज्ञातृत्वाभाव उक्ते पराक्त्वं व्याप्यं ज्ञातृत्वाभावो व्यापक इति सिध्यति, ततश्च स्वाभाव्याप्तेषु पराक्षु निरवकाशं ज्ञातृत्वं यदि प्रत्यग्वस्तुन्यपि न स्यात्तदा निराश्रयं प्रसज्येदिति पूर्वोक्तव्याप्तिस्थापनाय विपक्षे बाधकस्तर्कोऽत्राप्यभिप्रेतः, तस्माद्विविच्यत इत्येतदुक्तमित्यन्वयः । अतोऽचेतनत्वजडत्वादिस्वभावविरोधान्नाहङ्कारस्य ज्ञातृत्वमित्याह—

सू० अतो विरोधादेव न ज्ञातृत्वमहङ्कारस्य दृशित्ववत्, यथा दृशित्वं तत्कर्मणोऽहङ्कारस्य नाभ्युपगम्यते तथा ज्ञातृत्वमपि न तत्कर्मणोऽभ्युपगन्तव्यम् ।

टी० "अत" इति, न हि वयं द्रष्टृत्वाद्यनुपपत्त्या देहात्मविवेकं ब्रूमः स तु परमतानुसारात्कृतः, वयं तु दृशित्वानुपपत्त्येति शङ्कायां द्रष्टृत्वाभावस्याचेतनत्वादिप्रयोज्यत्वे मृषावाद्यसाधारणप्रतिबन्दीमाह "दृशित्वव"दिति, तदेव विवृणोति "यथे"ति, दृश्यत्वाद्यविशेषेऽपि देहस्य घटादिविलक्षणस्येन्द्रियाश्रयत्ववदन्तःकरणस्य दृशित्वमुपपद्यताम् अन्तःकरणस्यापि दृश्यत्वादिना देहस्येव दृशित्वं नोपपद्यत इति चेत्तथा दृश्यस्यान्तःकरणस्य दृश्यत्वादिनैव देहस्येव द्रष्टृत्वमपि नोपपद्यते अतो दृशित्वाभाव इव द्रष्टृत्वाभावेऽपि अचेतनत्वादिकं प्रयोजकम् अन्वयव्यति-

Digitized by Google

रेकयोस्तुल्यत्वादुपाध्यन्तरादर्शनाच्चेति भावः । अहंप्रत्ययगोचरत्वमनात्मत्वसाधकं देहस्यैवेति यदुक्तं तदयुक्तं बाधिताहंप्रत्ययगोचरत्वस्य पक्षे वृत्त्यभावादबाधिताहंप्रत्ययगोचरत्वस्य सपक्षे देहादावभावाच्च यद्यहंप्रत्ययगोचरत्वमात्रेणात्मन्यनात्मत्वादिप्रसङ्गः, तर्हि रजतप्रत्ययगोचरत्वमात्रेण भ्रान्तवत् सम्यग्रजतेऽप्यरजतत्वाङ्गुलीयकनिर्माणानर्हत्वप्रसङ्गः स्यादित्यप्रसङ्गः, श्रुतिभिः प्रत्यक्षेण च कालात्ययापदेशश्च । अनात्मत्वादिप्रसञ्जकं कर्तृत्वं किं प्रयत्नाधारत्वम्? उत स्पन्दनरूपक्रियाश्रयत्वम्? उत धात्वर्थमात्राश्रयत्वं? प्रथमे व्याप्त्यभावः प्रयत्नाधारत्वानात्मत्वयोः क्वचित्सहदर्शनाभावात् परमात्मन्यनात्मत्वादिप्रसङ्गश्चेत्यकर्तारमीशं पुरुषमित्यादिभिः कालात्ययापदेशश्च जीवे च"स्साधुकारी साधुर्भवति" "कर्ता शास्त्रार्थवत्त्वात्" "यतः स्वकृतभुक् पुमान्" इत्यादिभिः प्रत्यक्षेण च कालात्ययापदेशश्च, द्वितीये परमात्मन्यसिद्धिः जीवे तूत्क्रान्त्यादिश्रुतिभिः कालात्ययापदेशः, तृतीये भ्रमाश्रतया स्वाभिमतात्मन्यनात्मत्वप्रसङ्गः, भेददर्शनं तदाश्रयत्वं चापारमार्थिकमिति चेत्किं परमार्थभूतधात्वर्थाश्रयत्वमनात्मत्वसाधकम्? उतापरमार्थभूतधात्वर्थाश्रयत्वं? प्रथमे घटादावपि परमार्थभूतधात्वर्थान्वयानभ्युपगमाद्व्याप्त्यभावः, द्वितीये तु त्वदभिमतस्य भ्रमाश्रयस्यात्मनोऽप्यनात्मत्वप्रसङ्गः । अथ विक्रियात्मत्वञ्चेत्याह—

मू० न च ज्ञातृत्वं विक्रियात्मकं, ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वं ज्ञानं चास्य नित्यस्य स्वाभाविकधर्मत्वेन नित्यं, नित्यत्वं चात्मनो "नात्मा श्रुते"रित्यादिषु वक्ष्यति "ज्ञात एवे"त्यत्र च इति व्यपदेशेन ज्ञानाश्रयत्वं च स्वाभाविकमिति वक्ष्यति अस्य ज्ञानस्वरूपस्यैव मणिप्रभृतीनां प्रभाश्रयत्वमिव ज्ञानाश्रयत्वमप्यविरुद्धमित्युक्तम् ।

टी० "न चे"ति, तदुपपादयति "ज्ञातृत्वं ही"ति, गुणक्रियाश्रयत्वेऽपि तत्कादाचित्कं चेत् क्रियाश्रयत्ववत् विक्रियात्मकं स्यात् इत्यत्राह "ज्ञानं चास्ये"ति, धर्मस्य स्वाभाविकत्वे ऽपि धर्मी अनित्यश्चेद्धर्मो-

ऽप्यनित्यः स्यात् धर्मिनित्यत्वेऽपि धर्म औपाधिकश्चेत् उपाधिविगमे धर्मो नश्यतीत्यनित्यः स्यात् तदुभयव्याशृत्यर्थं नित्यस्वाभाविकशब्दौ। अवस्थाविशेषेण कादाचित्कत्वं तु प्रामाणिकत्वादिष्टम् अनेन पदद्वयेन "न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" अविनाशित्वाद्वात्मन" इति श्रुत्यर्थ उक्तो भवति, अस्याः श्रुतेरयमर्थः ज्ञातृसंबन्धिज्ञानं नित्यं, कुतः अविनाशित्वात् आत्मनः, विशिष्टस्य नित्यत्वेन विशेषणभूतज्ञानस्यापि नित्यत्वात्। यद्वा धर्मिनित्यत्वेन तत्स्वाभाविकधर्मस्यापि नित्यत्वादिति आत्मनो-नित्यत्वे ज्ञानस्य तत्स्वाभाविकधर्मत्वे च प्रमाणं स्मारयन् पूर्वमेव श्रुति-वाक्यस्योपादानात् सूत्रमुदाहरति "नित्यत्वं चे"ति, सूत्रोदाहरणेन तद्वि-षयभूता श्रुतिरपि अर्थतो दर्शिता स्यात् सूत्रं च पूर्वं ज्ञानगुणकत्वप्रदर्श-नायोपात्तम् इदानीं नित्यत्वज्ञापनायोपात्तम्। "ज्ञोऽत" एवेत्यत्र ज्ञ इति व्यपदेशस्य विवरणं "यावदात्मभावित्वाच्च न दोषः" इति सूत्रम् अत्र स्वाभाविकत्वसिद्धिरिति भावः। ज्ञानस्वरूपस्य ज्ञानाश्रयत्वं कथमित्यत्राह "अस्ये"ति, ज्ञानं स्वाभाविकनित्यधर्मश्चेत्सर्वदा सर्वज्ञत्वप्रसङ्ग इत्यत्राह—

भा० स्वयमपरिच्छिन्नमेव ज्ञानं संकोचविकासार्हमित्युपपाद-यिष्यामः, अतः क्षेत्रज्ञाऽवस्थायां कर्मणा संकुचितस्वरूपं तत्तत्कर्मानुगुणतरतमभावेन वर्तते तच्चेन्द्रियद्वारेण व्यव-स्थितं तमिममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्योदयास्तमय-व्यपदेशः प्रवर्तते ज्ञानप्रसरे तु कर्तृत्वमस्त्येव।

टी० "स्वय"मिति, स्वयं—स्वतः "संपद्याविर्भाव" इत्यादिसूत्रे उपपादयिष्याम इत्यर्थः। अनन्तरमेवेति वार्थः। तर्हीदानीमपि कदाचित्स-र्वज्ञत्वं मुक्तौ च कदाचिज् ज्ञानसंकोचः किं न स्यात्, यदि क्षेत्रज्ञावस्थायां संकोचः तर्हि सर्वेऽप्यज्ञाः स्युरित्यत्राह "अतः क्षेत्रज्ञे"ति, अतः संकोचवि-कासार्हत्वात् कर्मणेति संकोचकोपाधिः क्षेत्रज्ञावस्थायामिति तदानीमेव संकोच इत्यर्थः सर्वेषामज्ञत्वप्रसक्तिश्च कर्मतारतम्यात्परिहृता तारतम्य-

Digitized by Google

शब्देन "तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते" इति वचनं स्मारितं भवति कर्मणेति पदेन तयेति पदं श्लोकस्थं व्याख्यातं भवति तया—कर्मरूपाविद्ययेत्यर्थः "अविद्या-कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते यया क्षेत्रशक्तिः सा वेष्टिता नृप सर्वगा संसारतापानखिलानवाप्नोत्यतिसंततानिति हि प्रकृतं, ज्ञानस्य नित्यत्वेनानुत्पत्तिकत्वादिन्द्रियनैरपेक्ष्यं स्यादित्यत्राह "तच्चेति", यद्वा स्थावरादिष्वपि ज्ञानविकासः स्यादित्यत्राह "तच्चे"ति, इन्द्रियद्वारकत्वं संकोचविकासार्थमित्यर्थः तदुत्पत्तिविनाशव्यपदेशो न स्यादित्यत्राह "तमिम"-मिति, प्रसरान्वयव्यतिरेकावपेक्ष्य उदयास्तमयव्यपदेश इत्यर्थः । यद्वा प्रसृतांशः प्रसरः तस्य प्रसरणसंकोचावुदयास्तमयावित्यर्थः संकोचविकासाभ्युपगमे विक्रियात्मकत्वं स्यादित्यत्राह "ज्ञानप्रसरे" त्विति तादृशविक्रियात्मकत्वं प्रामाणिकत्वादिष्टमित्यर्थः अचेतनवत्परिणामो ह्यनभ्युपगत इत्येवकाराभिप्रायः । अनेनाविकारश्रुतीनां विषयो दर्शितः मुखान्तरेणाप्यविकारश्रुतिनिर्वाहं दर्शयति—

सू० तच्च न स्वाभाविकम्, अपि तु कर्मकृतमित्यविक्रियस्वरूप एवात्मा, एवंरूपाविक्रियात्मकं ज्ञातृत्वं ज्ञानस्वरूपस्यात्मन एवेति न कदाचिदपि जडस्याहङ्कारस्य ज्ञातृत्वसंभवः, जडस्वभा[1]वस्याहङ्कारस्य चित्सन्निधानेन तच्छायापत्त्या तत्संभव इतिचेत् कथं चिच्छायापत्तिः? किमहङ्कारच्छायापत्तिः संविदः? उत संविच्छायापत्तिरहङ्कारस्य? ।

टी० "तच्चे"ति, स्वाभाविकविकारनिषेधपरा अविकारश्रुतय इत्यर्थः स्वाभाविकं रूपं कथमित्यत्राह "अविक्रिये"ति, स्वरूपं स्वाभाविकं रूपम् अविकारित्ववाक्यान्युपाधिविमुक्तस्वाभाविकरूपपराणीत्यर्थः प्रसरणकर्तृत्वमपि विकाररूपत्वादन्तःकरणस्यैवेत्यत्राह "एवंरूपविक्रियात्मक"मिति,

१ जडस्वरूपस्येति पाठान्तरम् ।

स्वधर्मभूतज्ञानप्रसरणोकर्तृत्वलक्षणविकारित्वमेवंरूपशब्देनाभिप्रेतं ज्ञानस्वरूपस्य ज्ञानमेव स्वाभाविको धर्मो यस्य सः ज्ञानस्वरूपः स्वधर्मभूतज्ञानप्रसरणकर्तृत्वलक्षणविकारस्तद्धर्मकस्यात्मन एव संभवति न तु जडस्वरूपत्वात् अतद्धर्मकस्याहङ्कारस्येत्यर्थः। यद्वा स्वरूपशब्दो धर्मिपरः, ज्ञानस्वरूपस्यैव ज्ञानधर्मकत्वं संभवति न तु जडस्वरूपस्य यथा घटादेरिति ज्ञानस्वरूपत्वात् ज्ञानधर्मकस्यैव स्वधर्मभूतज्ञानप्रसरकर्तृत्वरूपविकारसंभवः न तु जडस्वरूपत्वात् अतद्धर्मकस्याहङ्कारस्येत्यर्थः। एवं विक्रियात्मकत्वात् ज्ञातृत्वस्य आत्मधर्मत्वानुपपत्तिर्निरस्ता। अथ परोक्तान् ज्ञातृत्वनिर्वाहप्रकारान्निरस्यति विज्ञातृत्वं चिच्छायापत्तिकृतं चित्संपर्ककृतं चिदभिव्यञ्जकत्वकृतमिति त्रयः पक्षाः, तत्र प्रथमं चिच्छायापत्तिपक्षमाशङ्कते "जडे"ति, दूषयति "केयमि"ति, केयं दुर्निरूपेत्यर्थः, विकल्पयति "किमि"ति, चिच्छायाशब्दयोः समासान्तर्गता विभक्तिः षष्ठी वा सप्तमी वेति भावः अहङ्कारच्छायापत्तिसंविदः अहङ्कारे संविद्गतज्ञातृत्वच्छायापत्तिरित्यर्थः संविच्छायापत्तिरहङ्कारस्येति संविदहङ्कारगतज्ञातृत्वच्छायापत्तिरित्यर्थः प्रथमं दूषयति—

मू० न तावत्संविदः, संविदि ज्ञातृत्वानभ्युपगमात्, नाप्यहङ्कारस्य, तस्य जडस्य उक्तरीत्या ज्ञातृत्वायोगात् द्वयोरप्यचाक्षुषत्वाच्च, न ह्यचाक्षुषाणां छाया दृष्टा। अथाग्निसंपर्कादयःपिण्डोष्णत्ववच्चित्संपर्काद् ज्ञातृत्वोपलब्धिरिति, नैतत्संविदि वास्तवज्ञातृत्वानभ्युपगमादेव न तत्संपर्कादहङ्कारे ज्ञातृत्वं तदुपलब्धिर्वा, अहङ्कारस्य त्वचेतनस्य ज्ञातृत्वासंभवादेव सुतराम्—

टी० "न ताव"दिति, शिरोऽन्तरं दूषयति "नापी"ति, पूर्वमचेतनस्वप्रकृतिपरिणामित्वादिभिरहङ्कारस्य ज्ञातृत्वव्युदासमभिप्रेत्याह "उक्तरीत्ये"ति, दूषणान्तरमाह "द्वयोरपी"ति, तद्विवृणोति "न ही"ति,

चित्संपर्कपक्षं शङ्कते "अथे"ति, पूर्वपक्षविकल्पस्य दूषयति "नैतदि"ति, इयं साधारणी प्रतिज्ञा अहङ्कारे संवित्संपर्कात् ज्ञातृत्वं व्युदस्यति "संविदो"ति, अहङ्कारसंपर्कात्संविदि ज्ञातृत्वं दूषयति "अहङ्कारस्य त्वि"ति, सुतरामिति ज्ञानस्य जडत्वात् ज्ञानाश्रयत्वं स्वमते न संभवति अहङ्कारस्य जडत्वेन वस्तुतो ज्ञानाश्रयत्वस्य स्वपरपक्षयोरुभयोरप्यसम्भवात् न तत्संपर्कात्संविदि ज्ञातृत्वमिति भावः ।

सू० न तत्संपर्कात्संविदि ज्ञातृत्वं तदुपलब्धिर्वा । यदप्युक्तम्

टी० क्रमागतकाष्ठादीनां लवणसंबन्धाल्लवणत्वोत्पत्तिर्दृश्यते अयःपिण्डेऽग्निसंपर्कादुष्णत्वमुपलभ्यते अतो ज्ञातृत्वं तदुपलब्धिर्वेति पृथगुक्तम्

ननु पूर्वोक्ते पक्षद्वयेऽपि ज्ञातृत्वस्य छायापत्तिसंपर्कौ निरस्तौ ज्ञानच्छायापत्तिसंपर्कौ कस्मादनिरस्तौ वक्ष्यमाणाभिव्यक्तिपक्षान्तर्भावादिति ब्रूमः । ज्ञानस्याहङ्कारेच्छायापत्तिर्नाम दर्पणे मुखस्येव तदाधेयतया अभिव्यक्तता संपर्कपक्षेऽप्यधिष्ठानतया संपर्को ज्ञातृत्वप्रतीत्यनुपयुक्तः अत आधेयतया संपर्को वक्तव्यः स च तत्स्थतयाऽभिव्यक्तावन्तर्गतः, अतस्तन्नानुपन्यासः । किंच छायापत्तिस्संविदोऽचाक्षुषत्वेनैव निरस्ता संपर्कश्चोपलम्भानुगुण्येन वक्तव्यत्वादपृथक्सिद्धधर्मधर्मिभावेन वक्तव्यस्स च नोपपन्नः, अचेतनस्य चैतन्यस्य च तथाविधधर्मधर्मिभावायोगात् दण्डदेवदत्तयोरिव ज्ञानज्ञात्रोः पृथगवस्थानादर्शनादपृथगवस्थितयोस्संपर्कश्चानुपपन्न इत्यनुसंधेयम् । अथाभिव्यक्तिपक्षमनुभाषितुं छायापत्तिसंपर्कपक्षयोरभिव्यक्तिपक्षस्य चान्योन्यवैषम्यं दर्शयति—,

सू० उभयत्र वस्तुतो न ज्ञातृत्वमस्ति अहङ्कारस्त्वनुभूतेरभिव्यञ्जकः स्वात्मस्थामेवानुभूतिमभिव्यनक्ति आदर्शादिवदिति तदयुक्तम् आत्मनः स्वयंज्योतिषो जडस्वरूपाहङ्काराभिव्यञ्ज्यत्वायोगात् तदुक्तं "शान्ताङ्गार इवादित्यमह-

ङ्कारो जडात्मकः । स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमदि"ति, स्वयंप्रकाशानुभवाधीनसिद्धयो हि सर्वे पदार्थास्तत्र तदायत्तप्रकाशोऽचिदहङ्कारोऽनुदितानस्तमितस्वरूपप्रकाशमशेषार्थसिद्धिहेतुभूतमनुभवमभिव्यनक्तीत्यात्मविदः परिहसन्ति ।

टी० "उभयत्रे"ति, वस्तुत इति छायापत्त्यादिना आपाद्यमानादध्यासात्पूर्वमेव सिद्धत्वं विवक्षितं न तु पारमार्थिकत्वम् अलातचक्रादेरपि प्रतिबिम्बदर्शनादुष्णजलसंपर्कादनुष्णेऽप्यौष्ण्योपलम्भाच्च एकत्र पूर्वसिद्धज्ञातृत्वाध्यासादन्यत्र ज्ञातृत्वनिर्वाहः पूर्वस्मिन् पक्षद्वये, अभिव्यक्तिपक्षे तु ज्ञातृत्वस्य पूर्वसिद्धिमनपेक्ष्य ज्ञानाध्यासात् ज्ञातृत्वनिर्वाह इति वैषम्यम् अभिव्यक्तिपक्षमाह "अहङ्कारस्त्वि"ति, दूषयति "तदयुक्त"मिति, कुत इत्यपेक्षायामात्मनोऽभिव्यञ्जकापेक्षा च नास्ति अहङ्कारस्याभिव्यञ्जकत्वशक्तिरपि नास्तीत्याह "आत्मत इत्यादिना, स्वोक्तार्थस्य सांप्रदायिकत्वदर्शनार्थं दृष्टान्तेन तद्विशदीकरणार्थं चात्मसिद्धियन्यमाह "तदुक्त"मिति, शान्ताङ्गार इत्यादिकं श्लोकं विवृणोति "स्वय"मिति, स्वयंप्रकाश–शब्देनाभिव्यञ्जकापेक्षया अभाव उक्तः, अनुभवाधीनसिद्धय इत्यनेन अहङ्कारस्याभिव्यञ्जकत्वाभाव उक्तः, अचिदहङ्कार इत्यनेन चिन्मात्रातिरेकित्वात्तदायत्तप्रकाशइति परोक्तहेतुस्सूचितः । अनुदितानस्तमितस्वरूपप्रकाशं कदाचिदप्रकाशं चेत्तदाऽभिव्यञ्जकापेक्षा स्यात्तदभावात्कदाचिदप्यभिव्यञ्जकापेक्षा नास्तीत्यर्थः । अशेषार्थसिद्धिहेतुभूतं त्वयाऽपि विषयप्रकाशत्वं समर्थितमिति भावः । परिहसन्तीति ईदृशमनुभवमीदृशोऽहङ्कारोऽभिव्यनक्तीति त्वदीया एव हसन्तीति भावः । अहङ्कारानुभवयोरभिव्यञ्जकत्वाभिव्यङ्ग्यत्वानभ्युपगमेन दूषणमुक्तं तयोरभिव्यञ्जकत्वमभिव्यङ्ग्यत्वं वास्तु तत्परस्परं नोपपद्यत इत्याह–

(शेषमग्रे)

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्	
	रु०	आ०
१ काशिका पंडितवरवामनादित्यविरचिता		
पूर्वार्धम्	..	॥
उत्तरार्धम्	१०	.. ॥
२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	.. ॥
३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	.. ।)
४ लघुकौमुदी वरदराजकृता	१	.. =)
५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८	.. ॥
६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४	.. ॥
८ मानवधर्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	.. ॥
९ शाश्वतधर्मदीपिका	१	.. ॥
१० अमरकोश सटीक	४	.. ॥
११ योगवार्तिकम्	३	.. ।)
१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	.. ॥
१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-देशाधिपति रचिता	४)	.. ॥

Digitized by Google

CONTENTS.

		Page.
Khaṇḍanakhaṇḍakhádyam	...	66
Saṃkshepaśárírakam	...	75
Śrautapadárthanirvachanam	...	83
Śástradípiká	..	93
Śríbháshyam	...	107

Digitized by Google

HARVARD COLLEGE
MAY 17 1887

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 3.] MARCH 1887. [Vol. IX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

MAY 17

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या

विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page* 106. Vol. IX.)

उद्भिदादिशब्दानां यागनामताधिकरणम् ।

सू० उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ॥ १ ॥

उद्भिदादिशब्दानुदाहृत्य गुणविधिर्नामधेयमिति भाष्ये विचार्य "उक्तं समाम्नायैदमर्थ्य"मित्यनेन सूत्रेण पूर्वपक्षमभिधाय "अपि वा नामधेयं स्या"दित्यनेन सिद्धान्तितं, तत्तु प्रमाणलक्षणासङ्गतमिति वार्त्तिककारेणाधिकरणभेदमाश्रित्य प्रथममुद्भिदादिशब्दानां धर्मे प्रामाण्यमस्ति न वेति विचार्य पश्चाद्गुणविधिनामधेयविचारो दर्शितः । तदनेन ये शास्त्रारम्भप्रयोजनसमर्थनावसरे "पूर्वं प्रमाणरूपाभ्यां पादेनाद्यस्य निर्णय" इति वार्त्तिकं दृष्ट्वा प्रथमपाद एव प्रामाण्याप्रामाण्यचिन्ता समाप्ता त्रिपाद्यां तु कथंलक्षणो धर्म इति अमुना प्रतिज्ञातप्रामाण्यप्रकारो निरूप्यते विध्यर्थवादमन्त्रनामधेयस्वरूपैर्धर्मे प्रामाण्यं वेदस्येति प्रकारतद्गतावान्तरभेदात्समस्तोऽध्यायः प्रमाणलक्षणमाख्यायत इति मन्यन्ते ते निराकृताः । तथा सति हि नामधेयस्वरूपप्रकारचिन्तनाद् यथाभाष्यमेवाधिकरणं सङ्गतं स्यात्तस्मान्न तावदयं पक्षो वार्त्तिककारस्य संमतः

न च युक्तः, स्मृतिपादस्य त्रिपाद्यामसङ्गतिप्रसङ्गात् । न हि तत्र वेदप्रामाण्यप्रकारनिरूपणम्, तस्मात्सर्वस्मिन्नध्याये धर्मे प्रमाणतदाभासनिरूपणमेव क्रियत इति वक्तव्यम् । तत्र च चोदनैव साक्षात्प्रमाणम्, अर्थवादमन्त्रस्मृतिनामधेयानि तच्छेषत्वेन तन्मूलत्वेन च प्रमाणं भवन्तीति

धर्मप्रमितेरितिकर्त्तव्यतास्थाने नियतं निपतन्ति, चोदना तु प्रधानं प्रमाणं तस्याश्च प्रथमपाद एव समाप्तं प्रामाण्यमित्यभिप्रायेणोक्तं पादेनाऽस्य निर्णय इति, चोदनैव हि साक्षात्प्रमाणं तच्च प्रथमपादेनैव निर्णीतमित्यभिप्रायः, त्रिपाद्यां त्वप्रधानप्रमाणनिरूपणमित्येतावान् भेदः। प्रमाणचिन्तात्मकत्वं तु सकलस्याविशिष्टमिति स एवैकोऽध्यायार्थः। तदिह संभवदाख्यातसामानाधिकरण्यानुद्भिदभिजिच्चित्राज्यपृष्ठवहिष्पवमानाग्निहोत्राऽऽघारश्येनादिशब्दानुदाहृत्य चिन्त्यते किमेते धर्मे प्रमाणं न वेति। "तत्र विध्यर्थवादमन्त्रांशैर्वेदाद् धर्मः प्रतीयते। न चोद्भिदादिशब्दानां तेष्वन्तर्भावसंभवः॥ न तावदर्थवादत्वं स्तुतिबुद्धेरभावतः। उत्तमामन्त्रणास्वन्तत्वान्तरूपाद्यभावतः॥ मन्त्रप्रसिद्ध्यभावाच्च मन्त्रतैषां न युज्यते। न च विध्यन्तपातित्वं साध्याद्यनभिधानतः"॥ न तावदेते साध्यमभिदधत्यफलवचनत्वात् न साधनम्। समानपदोपात्तधात्वर्थसाधनाऽवरोधात् भावनायाः

न च गुणविधानेनेतिकर्त्तव्यतान्तर्भावः, उद्भिदादिरूपस्य लोके गुणत्वेनाप्रसिद्धत्वात् मत्वर्थलक्षणादोषाच्च चित्रादिषु वाक्यभेदप्रसङ्गात् अग्निहोत्रादिषु तत्प्रख्यशास्त्रान्तरसद्भावात् श्येनादिषु उपमानानुपपत्तेः

न च नाम्न इतिकर्त्तव्यतान्तर्भावः, नाम्नोऽनितिकर्त्तव्यतारूपत्वात् अप्रवृत्तिविशेषकरत्वेन च नाम्नोऽनर्थकत्वादप्रसिद्धत्वाच्च। तस्मादप्रमाणमेवंजातीयकं धर्म इति पूर्वपक्षः। सिद्धान्तस्तु "सकलस्यैव वेदस्य स्वाध्यायविधिवाक्यतः। विज्ञातं पुरुषार्थत्वमुद्भिदादेरपि ध्रुवम्"॥ तत्र त्वदुक्तेनैव मार्गेण मन्त्रार्थवादत्वासंभवाद्विध्युद्देशान्तर्भावस्य च प्रत्यक्षत्वात् तत्रैव गुणत्वेन नामधेयत्वेन वा प्रामाण्यं स्वाध्यायविध्यापितस्यानर्थक्यासंभवात्सर्वानुपपत्तिपरिहारेणाऽध्यवसातव्यम्। एतावदिहाधिकरणे स्थितं भाव्यं तावत्प्रामाण्येनेति, तदेतदर्थवादप्रस्तावेऽभिहितमप्यनेकविचारान्तर्हितमिति कृत्वा विशेषविचारायानेन सूत्रेणोपस्थाप्यते

सू॰ अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात्॥ २॥

विधित्वेन प्रामाण्यमित्येतावदवस्थितम् । तच्च द्वेधा संभवति गुणविधानेन नामधेयत्वेन वा यावदन्यतरचोपपाद्यते तावत्पूर्वावगतमपि प्रामाण्यं न प्रतितिष्ठतीति तत्प्रतितिष्ठापयिषया गुणविधिनामधेयचिन्ता प्रस्तूयते । तत्र प्रथमं तावदुद्भिदादिषु यौगिकेषु चिन्त्यते किं गुणविधिः? कर्मनामधेयमिति तदर्थं किमेषां वैयधिकरण्येनाख्यातसंबन्धः? उत सामानाधिकरण्येने - ति, "तत्रावयवयोगेन खनित्रादौ प्रसिद्धितः । प्रकृत्योपयिकत्वाच्च गुणो यागे विधीयते" ॥ यद्यपि व्रीह्यादिवदेते न क्वचित्समुदायरूपेण निरूढास्तथाऽप्यवयवद्वारेण उद्भेदनसाधनेषु प्रसिद्धिसंभवात्कर्मणि कथंचिदप्यप्रसिद्धेर्नामधेयत्वेऽपि च यजितः प्रकृत्यन्तरानुपदेशाद्दानार्थस्यापत्तेर्गुणविधिपक्षे तु गुणे प्रकृत्योपयिकत्वेन प्रयोजनवत्त्वाद्गुणविधानमेव युक्तम् ।

न च मत्वर्थलक्षणा यागानुवादात् । यदि ह्यत्र यागो विधीयेत ततस्तस्य करणत्वादुद्भिदाऽपि करणमिति करणस्य करणान्तरेण संबन्धायोगाद्भिन्नार्थयोश्च श्रुत्या सामानाधिकरण्याभावादुद्भिच्छब्देन तद्वन्तं यागं लक्षयित्वोद्भिद्वता यागेनेति सामानाधिकरण्येन गुणो विधातव्य इति भवेन्मत्वर्थलक्षणा, यदा तु प्रकृतज्योतिष्टोमयागाऽनुवादेन गुणमात्रमनेन विधीयते तदा विधिवाक्ये करणत्वेनोपदिष्टस्यापि यागस्यासाधितस्य करणत्वानुपपत्तेर्यदर्थोत्पन्नं साध्यत्वं तदनुवादेन तदर्थतया तदाश्रित्य वा वाक्यान्तरेण फलाय गुणे विधीयमाने नाऽस्ति मत्वर्थलक्षणा उद्भिदा यागः कर्त्तव्य इति यागसाधनेनोद्भिदा पशून् भावयेदिति वा । नन्वेवं ज्योतिष्टोमवाक्येऽपि ज्योतिष्टोमगुणविधानात्र यागविधिरस्ति । तथाऽन्यत्रापि सर्वत्रोपपदश्रवणात्तद्विधिरेवेति क्वचिदपि कर्मविध्यभावाल्लौकिककर्माश्रयणेन गुणविधीनां सापेक्षत्वेनाप्रामाण्यप्रसङ्गः, नैष दोषः प्रकृतकर्माभावेन गत्यभावाज्ज्योतिष्टोमवाक्ये कर्मविधानं, तस्मिंश्च विधीयमानेऽनेकविधिदोषान्मत्वर्थलक्षणादोषाच्च ज्योतिष्टोमपदमेकं कर्मनामधेयं भविष्यति । यद्वा तदेकं मत्वर्थलक्षणामाश्रित्य गुणविशिष्टकर्मविधानम् । उद्भिदादयस्तु तत्प्रकृते कर्मणि गुणविधयः, वरं हि लक्षणाश्रयणमप्रामाण्यात् ।

न च लक्षणायाः प्रमाणान्तरापेक्षणेनाप्रामाण्यम्, पदसमभिव्याहारादेव लक्षणासिद्धेः, इतिकर्तव्यतासर्वविधिविशेषाच्च "भूयस्त्वेनोभयश्रुती"त्यनेन न्यायेन ज्योतिष्टोमवाक्य एव कर्मविधानं नेतरेषु । भवतु वा ज्योतिष्टोमवाक्येऽपि गुणविधानमेवमपि नाप्रामाण्यं यद्वाऽग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति विश्वजित्सर्वपृष्ठोऽति रात्रो भवतीत्येवमादिषु अनेकगुणोपादानेन कर्मणोऽवश्यविधातव्यत्वात्तत्रैव ज्योतिष्टोमोद्भिदादिगुणविधिसंभवाच्च लौकिककर्माश्रयणादप्रामाण्यम् । कथमप्रकृतेषु गुणविधिरिति चेत् लौकिकं वा किं प्रकृतं येन तत्र गुणो विधीयेत तेन यदि तावदप्रकृतेऽपि विधिः स्यात्ततो विश्वजिदादिष्वेव विधानाचाप्रामाण्यम् । अथ तु न ततो लौकिकेऽप्यविधानाद्विशिष्टविधिरित्युभयथाऽपि नाप्रामाण्यम्, न चौत्पत्तिकज्योतिष्टोमादिगुणावरोधादुद्भिदादिगुणानामविधानम् काम्यत्वेन तेषां नित्यगुणबाधकत्वात् । "उद्भिदा यजेत पशुकाम"इति हि प्रकृतं ज्योतिष्टोममाश्रित्य उद्भिद्गुणः पश्वर्थेन विधीयते । तस्माद्गुणविधिरिति प्राप्तेऽभिधीयते "धातोरत्यन्तपारार्थ्याद्विप्रकृष्टविधेस्तथा । फले कर्मणि वा नेह गुणो वाक्ये विधीयते" । फले तावद् विधीयमाने गुणे परपदसंबन्धविधानाद्धातोरत्यन्तपारार्थ्यं विप्रकृष्टार्थविधिश्चापद्यते । अथ तु कर्मण्येव गुणो विधीयते तथाऽपि विप्रकृष्टार्थविधानं, धातोश्च किंचित्पारार्थ्यमस्त्येव फलपदं चानर्थकं स्यात् । "दध्यादौ गत्यभावेन सर्वमेतत्समञ्जसम् । उद्भिदादिषु तत्वेवं नामधेयत्वसंभवात्" । "दध्नेन्द्रियकामस्य जुहुयात्" "व्रीहिभिर्यजेते"त्येवमादिषु दधिव्रीह्यादिपदानामर्थान्तरेऽत्यन्तनिरूढत्वाच्च सामानाधिकरण्येन यज्ञिनामत्वं शक्यते कल्पयितुमप्रसिद्धार्थो हि प्रसिद्धपदसामानाधिकरण्येन निर्णीयते । दध्यादयस्तु निरूढत्वाच्च कथंचिदपि धातुसामानाधिकरण्यं प्रतिपद्यन्त इति गत्यभावात्तत्र धातुपारार्थ्यं विप्रकृष्टार्थविधानं श्रितम् । उद्भिदादयस्तु यथैवावयवद्वारेण खनित्रादौ वर्तन्ते तथैव स्वफलोद्भेदनकारित्वाद्यागेऽपीति नात्र धात्वर्थविधानं बाधितव्यम् ॥ "विशिष्टविधिपक्षे तु भवेन्मत्वर्थलक्षणा । सोमादौ

गत्यभावात्सा न त्वत्र मतिसंभवात्" । उद्भिदादयो हि करणत्वेन श्रूयन्ते करणं च कारकत्वात्क्रिययैव संबध्यते नान्येन । क्रिया चात्र प्रत्ययवाच्या फलभावनैव

न च तस्यामुद्भिदादीनां करणत्वं संभवति समानपदोपात्तधात्वर्थावरोधादिति भावाधिकरणे वक्ष्यामः । न च धात्वर्थेनोद्भिदादीनां संबन्धः संभवति तस्य धातुना प्रत्ययार्थं प्रति करणत्वेनोपादानात् क्रियारूपतयाऽनवगमात्क्रियारूपत्वे वा धात्वर्थस्य प्रत्ययार्थं प्रति करणत्वानुपपत्तेः

न च सत्यपि प्रत्ययवाच्यायाः फलभावनाया धात्वर्थावरोधेऽर्थाक्षिप्तया धात्वर्थभावनयोद्भिदादीनां संबन्ध इति वक्तव्यम् । तस्या इहाश्रुतत्वात्, अश्रुतया च तया शब्दान्तरस्यान्वयायोगात् । फलभावना ह्यत्र श्रुता, न च धात्वर्थभावना, न चाध्याहृत्य धात्वर्थभावनां तया सम्बन्धः । उद्भिदा भाव्यमानेन यागेन पशून् भावयेदिति विनाऽप्यध्याहारेण वाक्यसमन्वयोपपत्तेः, तदवश्यं यदत्र प्रत्ययार्थे करणं यागस्तत्रैव तृतीयान्तैरुद्भिदादिपदैर्वर्तितव्यं नान्या गतिरस्ति । तत्र गुणविधिपरत्वेऽर्थान्तरवाचिनामुद्भिदादिपदानामर्थान्तरे यागे वृत्तिर्मत्वर्थलक्षणया स्यात् उद्भिद्वता यागेनेति । नामधेयत्वे तु श्रुत्या, सोमेन यजेतेत्येवमादिषु तु सोमादिशब्दानामर्थान्तरेऽत्यन्तनिरूढत्वाद्यागे च कथंचिदप्यप्रसिद्धेरप्रसिद्धकल्पनातो वरं प्रसिद्धार्थद्वारेण लक्षणाश्रयणमेवेति मत्वर्थलक्षणया गुणविशिष्टयागविधानमङ्गीकृतं सोमवता यागेन समीहितं कुर्यादिति । उद्भिदादीनां त्ववयवद्वारेण कर्मण्यपि प्रसिद्धिरस्तीति श्रुत्या नामधेयत्वं युक्तम् । प्रयोजनं च नाम्नां सर्वत्र व्यवहार एव । न ह्यन्तरेण नामधेयमुत्विग्वरणादिष्वनेनाहं यक्ष्ये इति लघुराख्यानोपायः स्यात् । क्वचिच्च गुणफलोपबन्धेनार्थवत्ता दर्शपूर्णमासावारप्स्यमानोऽन्वारम्भणीयामिष्टिं निर्वपेदिति गुणोपबन्धः । "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"ति फलोपबन्धः । क्वचिच्च भेदकतयाऽर्थवत्त्वं यथा "अथैष ज्योतिरित्यादिषु वक्ष्यते । यथा चात्रैवो"द्भिदा यजेत पशुकाम" इति नामधेयत्वाभावे हि प्रकृतस्ये-

च ज्योतिष्टोमस्य फलविधिरयं स्यात् नामधेयत्वे तु यागान्तरविधानात्सिद्धमर्थवत्त्वम् ॥

चित्रादिशब्दानां यागनामधेयताऽधिकरणम् ।

सू० यस्मिन् गुणोपदेशः प्रधानतोऽभिसंबन्धः ॥ ३ ॥

इह लोके जातिगुणवचनतया निरूढा गुणफलोपबद्धेषु वाक्येषु श्रुताः कर्मण्यपि योगवशेन संभवद्वृत्तय उत्पत्तिवाक्ये फलवाक्ये गुणवाक्ये वा तृतीयानिर्देशेन कर्मसमभिव्याहृताः शब्दास्ते सर्वे उदाहरणं यथा "चित्रया यजेत पशुकामः पञ्चदशान्याज्यानि सप्तदशानि पृष्ठानि त्रिवृद्बहिष्पवमानमिति चित्राज्यपृष्ठबहिष्पवमानशब्दास्ते गुणविधयः कर्मनामधेयानि वेति संशयः । तदर्थं च किं गुणविधौ वाक्यभेदो न वेति चिन्तयितव्यम् । कस्मात्पुनरुत्पत्तिवाक्यमेषाज्यैः स्तुवत इत्यादिकं नोदाह्रियते । एतद्द्वयेऽपि निर्णयकारणाभावात् गुणवाक्याधीन एव निर्णय इति तदेवोदाहृतम् । तथा हि न तावदाज्यैः स्तुवत इति गुणविधिरध्यवसातुं शक्यते । घृतस्य स्तुतौ करणत्वा[1]संभवात् तत्र लक्षणया घृतसंबन्धिभिर्मन्त्रैरिति वक्तव्यम् ।

न च घृतसंबन्धिनः केचिन्मन्त्राः प्रसिद्धा ये लक्ष्येरन् । तत्रानेनैव वाक्येन लक्षणया घृतसंबन्धं मन्त्राणां विधाय तैश्च स्तोत्रे विधीयमाने अत्यन्तगौरवं, विधौ च लक्षणाऽत्यन्तक्लिष्टा समाश्रिता स्यात् । तद्वरं "यदा जिमीयुस्तदाज्यानामाज्यत्वम्" इत्यादिवाक्यशेषावगतयोगाश्रयणेन नामधेयत्वमङ्गीकृतमिति न गुणविधित्वाध्यवसानं, रूढत्वाच्च नामधेयत्वमपि न स्वध्यवसानम् । यदा तु पञ्चदशान्याज्यानीति संख्याविशिष्टान्याज्यान्यवान्तरप्रकरणेन स्तोत्रगुणतया विधीयन्ते तदा तेनैव प्राप्तमाज्यसंबन्धं लक्षणया मन्त्राणामनूद्य स्तुतिमात्रमुत्पत्तिवाक्ये विधीयते । अनुवादत्वाच्च लक्षणा न दोषः स्तुतिमात्रविधानाच्च लाघवं विधेर्विनैव नामत्वेन लभ्यत इति प्रसिद्ध्यादिभिर्गुणवचनतैवाऽध्यवसीयते । यदा तु नात्रसंख्याविशिष्टाज्यऽऽविधानं संभवति किंतु आज्यानुवादेन संख्यामात्रविधानं तदा स्तोत्रे घृतस्याप्राप्तत्वात्तदनुवादासंभवात्स्तोत्रानुवादेनैव

---

१ कारकत्वासंभवादिति पाठान्तरम् ।

संख्या विधातव्या तच्चाऽऽज्यशब्दस्य स्तोत्रवाचित्वेऽवकल्पते नान्यथेति गुणवाक्यालोचनेनैवाज्यादिपदमुत्पत्तिवाक्यगतं नामधेयत्वेनाध्यवसीयत इति पक्षद्वयेऽपि गुणवाक्याधीनत्वान्निर्णयस्य तत्रैव कथा प्रवर्त्तते। पञ्चदशान्याज्यानीति किं संख्यायुक्तं घृतं स्तोत्राङ्गतया विधीयते? किं वाऽऽज्यशब्देन स्तोत्रमुद्दिश्य संख्यामात्रं विधीयत? इति। एवं सप्तदशानि पृष्ठानीत्यादिषु द्रष्टव्यम्। एवं चित्रयेत्यग्नीषोमीययागानुवादेन चित्राशब्देन चित्रत्वस्त्रीत्वे विधीयेते? उत दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमिति प्रकृतो यागः फले विधीयते? चित्राशब्दस्य चित्रद्रव्यवाचकत्वात्तत्रैव नामधेयत्वमिति। तत्र प्रसिद्ध्यादिभिर्गुणविधिः कृतत्वाच्च नोद्भिदादिन्यायः उत्पत्तिवाक्यावगतकरणेनार्थाक्षिप्तं यद् यागस्य यत्साधत्वं तदनुवादेन वैयधिकरण्येन गुणविधानाच्च मत्वर्थलक्षणेत्युक्तम्

न च वाक्यभेदः, एकपदोपात्तत्वाच्चित्रत्वस्त्रीत्वयोरुभयविशिष्टैककारकविधानात्पशुकामपदमपि पशुसाधनकत्वादग्नीषोमीयस्य यागस्याज्ञ्जनाङ्गतया प्राप्तसाधनकामनोऽनुवादः। अस्ति हि पशुयागं कुर्वतः पशौ कामना, पञ्चदशान्याज्यानीत्यत्रापि संख्याविशिष्टाज्यविधानात् न वाक्यभेदः, तस्माद्गुणविधिः। एवं चाज्यैः स्तुवत इत्याद्युत्पत्तिवाक्येऽप्याज्यादिपदं गुणवाक्यप्राप्तगुणानुवादकं न नामधेयमिति प्राप्तेऽभिधीयते"। "वाक्यभेदप्रसङ्गेन सामानाधिकरण्यतः। अन्वाख्यानार्थवादाच्च नामतैवोपपद्यते। चित्रत्वं स्त्रीत्वं च नैकेन विधातुं शक्यं वाक्यभेदप्रसङ्गात्। उभयविशिष्टकारकविधानेऽपि गौरवम्। कामपदं च फले मुख्यं साधने गौणम्। प्रकृतफलाकाङ्क्षदध्यादियागादिक्रमश्च न न्याय्यः, तस्मात्तस्यैव फलमात्रविधानम्। चित्रापदं च सामानाधिकरण्येन नामधेयम्। पञ्चदशान्याज्यानीत्यत्रापि समासाभावाच्च संख्याविशिष्टद्रव्यप्रतिपत्तिरस्ति तत्रोभयोर्द्रव्यसंख्ययोर्विधानाद्वाक्यभेदः। तस्मादाज्यानुवादेन संख्यामात्रं विधेयं, तच्च यद्युत्पत्ताबाज्यपदं नामधेयं ततो घटते नान्यथेति गुणवाक्यवशादेवोत्पत्तौ नामत्वं विज्ञायते। सामानाधिकरण्याच्चाज्यैः स्तुवत इति वाक्यशेषाच्च

Digitized by Google

यदाजिमीयुरित्यादेर्नामत्वमेव युक्तम् । यत्तु वार्तिके पृष्ठैः स्तुवत इत्युत्पत्तिवाक्यमुदाहृतं तत्र चोदयन्ति यद्येतदुत्पत्तिवाक्यं तथा सति उत्पत्तौ बहुत्वयोगाद्बहूनि मुख्यानि पृष्ठानि भवेयुः । तत्र यत्सप्तमे वक्ष्यते ज्योतिष्टोमे पृष्ठबहुत्वाभावाद्वैकल्पिके द्वे पृष्ठे न बहूनीति मैत्रावरुणसामादिषु पृष्ठशब्दो गौणः, तेन विश्वजिति सर्वपृष्ठशब्दो बहुत्वापेक्षत्वाच्च चोदकप्राप्तानुवाद इति तद्विरुध्यते । तेन रथन्तरं पृष्ठं भवति बृहत्पृष्ठं भवतीत्युत्पत्तिवाक्यं वक्तव्यम् । तथा च स्वयमेव वार्तिककारो नवमे वक्ष्यतीति सत्यमेवम् । अनादरादिदमुक्तम् एतदुक्तं भवति सर्वथा सप्तदशानि पृष्ठानीत्येतदत्रोदाहरणम्, यदेव तूत्पत्तिवाक्यं पृष्ठैः स्तुवत इति वा रथन्तरं पृष्ठं भवतीति वा न तदेवोदाहर्तव्यमित्यभिप्रायः ।

अग्निहोत्रादिशब्दानां यागनामधेयताऽधिकरणम् । अयमेव च तत्प्रख्यन्यायः ।

सू० तत्प्रख्यं चान्यशास्त्रम् ॥ ४ ॥

"आघारमाघारयति" "अग्निहोत्रं जुहोती"त्याघारशब्दोऽग्निहोत्रशब्दश्च गुणविधिः कर्मनामधेयं वेति विचारः प्रसिद्ध्यादिभिर्गुणविधिः ।

न च मत्वर्थलक्षणा अग्निहोत्रे बहुव्रीहिणैवाग्नये होत्रमस्मिन्निति मत्वर्थस्योक्तत्वात् उपसर्जनार्थोऽग्निर्देवता विधीयते नामधेयत्वे चारूपत्वं स्यात् । यद्यपि च दध्यादिवाक्यैर्द्रव्यं लभ्यते तथाऽपि देवताभावादरूपत्वं "यदग्नये च प्रजापतये च सायं जुहोति" "यत्सूर्याय च प्रजापतये च प्रात"रित्यनयोरनेकगुणोपपादनेन विशिष्टकर्मविशिष्टत्वदेवताविधौ वाक्यभेदादसामर्थ्यं न चैककारकविधानाद्विभक्तिपृथक्त्वेन कारकनानात्वात् । यदि त्वग्नीषोमीयवदग्निप्रजापतिभ्यां समस्ताभ्यामेका विभक्तिरश्रोष्यत तत उभयविशिष्टैकदेवताकारकविधानाच्च वाक्यं भेत्स्यते, यद्यपि क्रीणातिवत्पृथक्पदं विभक्तिः स्यात् तथापि तया वाक्येनाऽरुणैकहायनीवदग्निप्रजापत्योर्युगपत्संबन्धात्स्यादुभयविशिष्टमेकं कारकम् । यदा तु यजतिददातिजुहोतिभ्य इव भावनाविभक्तिः प्रत्येकमग्निप्रजापतिभ्यामुच्चरन्ती देवताविभक्तिः प्रकृत्यर्थभेदभिन्नामेव देवतां भावनामिव प्रतिपादयति तदा कुतो देवतैक्यम्? । देवतासामान्येन त्वेकत्वं भावनासा-

मान्त्वेन तुल्यमिति समस्तो वेद एकं वाक्यं स्यात् । अतो नामत्वे देवताविधानासंभवादरूपत्वमिति गुणविधित्वमेव युक्तम् । अविहित-देवताकेषु वा दर्विहोमेषु गुणविधानाच्च तत्प्रख्यत्वम् । आघारशब्दे-नापि क्षरणसमर्थद्रव्यमाज्यपयः प्रभृत्यभिधीयते । तच्च द्वितीयानिर्दे-शादाघारणसंस्कार्यत्वेन गम्यते निष्प्रयोजनस्य संस्कारासंभवात्प्रयोजना-पेक्षायां प्रकृतद्रव्यापेक्षाउपांशुत्वार्थता विज्ञायते प्रकरणेन च गुणे विधी-यमाने नास्ति मत्वर्थलक्षणा मतुप्प्रत्यययुक्तस्यैव वाक्यस्य प्रकरणेन कल्पनात्, न चात्र यागो विधीयते संस्कारमात्रश्रवणात् ।

न च संस्कारकर्माणि क्वचिन्नामवन्ति तस्माद्गुणविधिः, एवं च द्वितीयानिर्द्देशो युक्तो भवति आघारस्य संस्कार्यत्वात् अग्निहोत्रे चा-र्थोसाध्यत्वानुवादेनोपसर्ज्जनार्थविधानात् । नामधेयत्वे तु तस्याविधे-यत्वात्कर्मैव विधेयं, तच्च करणमिति नामधेयं तृतीयान्तं स्यादनुपपन्ना द्वितीया स्यात् ।

न च फलवाक्य एव कर्मणः करणत्वम् । उत्पत्तिवाक्ये तु फल-वाक्यापेक्षितकर्मस्वरूपकर्त्तव्यतैव प्रतिपाद्यत इति वाच्यम् । विधेः कर-णत्वावगमात् कर्मत्वासंभवात्साध्यत्वे च तस्य साध्यान्तरानपेक्षत्वाच्च फलवाक्येनापि फले विधातुं शक्यत इति कर्मान्तरमेव फलवाक्ये स्यात् । तथा चाघाराग्निहोत्राधिकरणे वक्ष्यते न ह्यकरणभूतोऽसौ साध्यान्तरानपेक्ष-त्वाद्वाक्यान्तरेणापि फले विधातुं शक्यत इति तस्मादुत्पत्तावपि कर्मणः करणत्वात् द्वितीयानुपपत्तितो गुणविधिः, अत्रोच्यते "वाक्यार्थो न विधा-तव्यो धात्वर्थविधिसंभवे । पदान्तरं न चानन्यगतिनामत्वसंभवात्" । श्रुत्या हि धात्वर्थविधानं वाक्येनोपपदार्थस्य तत्र यद्युपपदमनन्यगति स्यात् स्याद्वाक्यार्थविधानम् । तत्तु शास्त्रान्तरप्रख्यापितं गुणं निमित्ती-कृत्य नामधेयत्वेन संभवतीति न धात्वर्थविधानं बाधितव्यम् । किं पुनः शास्त्रान्तरं यदस्य गुणस्य प्रख्यापकम् ? । अग्नेस्तावदग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहे"ति प्रातरिति वाच-निकमन्त्रवर्णात्प्राप्तिः "यदग्नये च प्रजापतये च सायं जुहोतीत्येतत्तु मन्त्र-

वर्णाप्राप्ताग्निसूर्यानुवादेन प्रजापतिसमुच्चयविधानमतो न वाक्यभेदः, आघारवाक्येऽप्याघारसंज्ञके कर्ममात्रे विहिते चतुर्गृहीतं वा एतदभूतस्याघारमाघार्येत्यनेनैवाज्यप्राप्तेः क्षरणात्मकत्वं प्राप्तमिति तन्निमित्तनामधेयत्वसंभवात्कर्मविधानमेव युक्तम्। दृष्टं च संस्काराणामपि नामधेयम्। "उपांशुं गृह्णानीत्यन्तर्यामं गृह्णातीति न चास्य संस्कारत्वम् "इन्द्र ऊर्ध्वो ऽध्वरइत्याघारमाघारयती"ति मान्त्रवर्णिकेन्द्रदेवतावत्वाद्यागत्वसिद्धेः अतोनामत्वम् । अर्थाक्षिप्तसाध्यांशाभिप्रायकश्च द्वितीयानिर्देशः । कथं पुनरशाब्देनाभ्याहृतेन च शाब्दस्यान्वयः । न हि श्रुत्या लक्षणया वा विधिवाक्ये साध्यत्वं शाब्दं, नाप्यध्याहृतं वाक्यभेदप्रसङ्गादग्निहोत्रहोमं कुर्याद्धोमेन च फलमिति अर्थाक्षिप्तेनापि यद्यन्वयः स्यात्तथा सति गुणोऽप्युद्भिदादिरर्थाक्षिप्तसाध्यांशाभिप्रायेण करणभूतेऽपि कर्मणि विधीयमानः श्रुत्यैव शक्यो विधातुमिति मत्वर्थलक्षणा दत्तजलाञ्जलिः स्यात् । एतेन ये धात्वर्थस्य विषयतया करणत्वेन चान्वयं मन्यन्ते ते निरस्ता वेदितव्याः । विषयभूतेन हि कथं करणवाचिनां नामधेयानां सामानाधिकरण्यम्?। आर्थिकेन करणत्वेन सामानाधिकरण्यमिति चेत् साध्यत्वमपि तर्ह्यार्थिकमस्तीति गुणविधिरपि विनैव मत्वर्थलक्षणया विना च वैरूप्येण स्यादिति समस्तमेव नामधेयप्रतिपादनमनुपपन्नं स्यात् । अथ विषयत्वद्वारेण करणत्वपर एव शब्दस्ततोऽन्यपरेण शास्त्रेणोपायमात्रत्वेनोपात्तं विषयत्वं न शास्त्रार्थः स्यादतत्परत्वात् । अथ शब्द एव प्रथमं विषयतयाऽभिधाय पुनःकरणतयाऽप्यभिधत्ते कथं सकृदुच्चरितो द्विरभिदध्यादभिदधानो वा साध्यत्वमपि पुनरभिदधीत न हि नियामकमस्ति द्विरेवाभिधत्ते. न त्रिरिति । "सकृत्प्रवृत्तायाः किमवगुण्ठनेने"ति न्यायात् । अतश्च गुणविधिरपि स्यादित्युक्तम् । अतः करणत्वेनैवान्वयो वाच्यो न विषयत्वेनेत्यास्तां तावत् । अतः कथं द्वितीयाश्रुतिनिर्देश इति वक्तव्यम् । तदुच्यते अस्ति तावदार्थिकं धात्वर्थस्य साध्यत्वमसाधितस्य करणत्वानुपपत्तेरतः साध्यसाधनयोर्द्वयोरेकार्थसमवायात् साध्याभिधायिनी द्वितीया साधनत्वमेव लक्षयन्ती धातुसामानाधिकरण्यं प्रतिपद्यत इत्यविरोधः ।

श्येनादिशब्दानां यागनामधेयताऽधिकरणम् ।
प्रथमेन तद्व्यपदेशन्यायः ।

सू० तद्व्यपदेशं च ॥ ५ ॥

इह रूढिशब्दा एव वाक्यभेदरहितास्तद्व्यपदेशवन्त उदाहरणम् । यथा "श्येनेनाभिचरन् यजेते"त्यादिषु श्येनादिशब्दाः तेषु गुणविधिः कर्मनामधेयं वेति संशयः । अत्यन्तनिरूढत्वाद्गुणविधिर्ज्योतिष्टोमादिषु काम्यत्वाच्च नित्यमुत्पत्तिशिष्टमपि सोमं बाधते । यद्वा गुणविशिष्टकर्मविधानम् अप्रसिद्धार्थकल्पनातो वरं मत्वर्थलक्षणा सोमादिवत् ।

न च यथा वै श्येन इत्यादि वाक्यशेषदर्शितक्रियासामान्येन कर्मणि गौणत्वेन कर्मवचनत्वं युक्तम् । अत्यन्तविप्रकृष्टत्वात् गौणत्वस्य लक्ष्यमाणगुणैर्योगाद्वृत्तिर्गौणीति वक्ष्यते । तदुरं लक्षणैवाश्रिता गौणत्वे वार्थान्तरपरत्वाच्छ्रुतिबाधः । लक्षणायां तु तद्वृत्त्यपि वर्त्तमानः श्येनशब्दो लोहितोष्णीषादिवदुपसर्जनार्थश्येनविधिपर एव करणीभूतेन तु यागेन करणीभूतस्यैकवाक्यता नान्तरेण मत्वर्थलक्षणां लभ्यत इत्येकवाक्यत्वार्थे लक्षणाश्रयणं, तात्पर्यं तु श्रुत्यर्थे एवेति न श्रुतिबाधः, उच्यते गुणविधौ तावत्स एव स्तोतव्यः । तस्य चात्मनैवोपमानमनुपपन्नमिति तद्व्यपदेशात्मकवाक्यशेषानुपपत्तिर्विशिष्टविधिस्तु गौरवादेवायुक्तः ।

न च सोमादिवत्पदान्तरस्यानन्यगतित्वं यथा वै श्येन इति वाक्यशेषानुसाराद्गौणत्वेन नामत्वसंभवात् । अवश्यं हि वाक्यशेषस्यैतदेव प्रयोजनं, कथं नाम श्येनशब्दस्य यागनामधेयता विज्ञायेतेति तस्मान्नामधेयम् । एवं यौगिकवाक्यभेदतत्प्रख्यतद्व्यपदेशैश्चतुर्भिर्नामत्वं साधितम् एतैरेव च सर्वत्र नामधेयत्वमिति द्रष्टव्यम् ।

वाजपेयादिशब्दानां नामधेयताऽधिकरणम् ।

सू० नामधेये गुणश्रुतेः स्याद्विधानमिति चेत् ॥ ६ ॥

"वाजपेयेन स्वाराज्यकामो यजेते"ति वाजपेयशब्दः किं गुणविधि? उत कर्मनामधेय? मिति चिन्त्यते । तदर्थमिदं विचार्यते किं यजेतेत्याख्यातं गुणफलाभ्यां तन्त्रेण संबद्धुं क्षमते न वेति सर्वाणि चोद्भिदादीनि प्रत्युदाहर्त्तव्यानि ।

Digitized by Google

सर्वेष्वाख्यातशब्देषु तन्त्रसंबन्धसंभवात् ।
मत्वर्थलक्षणा दोषो नास्तीत्याशिष्यतेऽधुना ॥
कर्मत्वं करणत्वं वा नाख्यातेनाभिधीयते ।
यागादेः किं तु संबन्धमात्रं साधारणं च तत् ॥

यदि हि यजेतेति यागस्य कर्मत्वमुच्येत ततः साध्यद्वयासमवायान्न फलं संबध्येत गुण एव तु साधनतया संबध्येत। अथ तु करणत्वमेव यागस्य ततोऽपि करणद्वयासमवायान्न गुणः संबध्येत फलमेव संबध्येतेति न स्यात्तन्त्रत्वम्, न त्वेतदन्यतरदाख्यातेनोच्यते तद्वाचकशब्दाभावात् । प्रकृत्या हि क्रियामात्रमुक्तं प्रत्ययेन तु भावना तयोस्तु समभिव्याहारात्संबन्धमात्रं गम्यते । तच्च कर्मत्वकरणत्वयोः साधारणम् । अतश्चोभयरूपसाधारणत्वाद्यागस्य तद्विषयाऽपि भावना यागकर्मिका यागकरणिका चेति द्विरूपा भवति । तत्र यागकर्मिकांशेन गुणसंबन्धं तत्करणिकांशेन फलसंबन्धं भावना लभते तन्त्रेणेति विनैव मत्वर्थलक्षणया यागे गुणविधानमुपपन्नं वाजपेयेन यागं कुर्याद्यागेन च स्वाराज्यमिति, अत्रोच्यते,

"संबन्धमात्रतात्पर्ये नैकस्याप्यन्वयो भवेत् तद्विशेषपरत्वे तु स्यादन्यतरसंगतिः ।
रूपद्वयपरत्वं तु विना वृत्त्या न लभ्यते ।
तस्मादाख्यातशब्दस्य तन्त्रसंबन्धसंभवः" ॥

श्रुत्या लक्षणया वा यत्परः शब्दः स एव शब्दान्तरार्थेन संबध्यते। तद्यद्याख्यातात्संबन्धमात्रं धात्वर्थभावनयोरवगतं ततो नैकस्यापि फलगुणयोस्तदन्वयः स्यात् । फलस्य साधनापेक्षत्वाद्यागकरणिकैव भावना फलसंबन्धमर्हति, तथा गुणस्य साध्यापेक्षत्वाद्यागकर्मिकयैव भावनया संबन्धः । अनिर्द्धारितोभयरूपा तु नैकेनाप्यन्वीयते अयोग्यत्वात्तत्रावश्यं विशेषपरताऽभ्युपगन्तव्या । कथमसत्योः कर्मकरणविभक्त्योस्तत्परता शब्दस्येति चेत् । सामान्यवाचिनो वा षष्ठी किमत्रास्ति ये तु संबन्धमात्रमवगम्येत समभिव्याहारादेव लक्षणया संबन्धावगतिरिति चेत् । तत एव समभिव्याहारात्पदान्तरान्वयपर्यालोचनया संबन्धविशेषस्यैव लक्षणया सिद्धेः ।

न ह्यसति विशेषपरत्वे पदान्तरान्वयो घटत इत्युक्तम्, तस्माद्विशेषपरता । तत्र कर्मपरत्वे गुणस्यैव संबन्धो न फलस्य, करणपरत्वे तु फलस्यैव न गुणस्येत्यन्यतरविशेषपरत्वेऽन्यतरस्यैव संबन्धात् न तन्त्रेणोभयसंबन्धः, उभयपरत्वं तु नावृत्तिमन्तरेण लभ्यते । न खलु यस्मिन्नेव क्षणे यागं करणाऽऽत्मनावबुध्यामहे तस्मिन्नेव कर्मात्मनाऽवबोद्धुमीश्महे इति स्वानुभवसिद्धमेतत् । एवं गुणप्रधानतोद्देशोपादेयत्वविध्यनुवादत्वकृतमपि वैरूप्यम् अतो न तन्त्रत्वं भावनावदिति चेत् । यथा खलु भावना कर्मकरणत्वोद्देश्योपादेयत्वादिरूपभेदमन्तरेणैवाख्याताभिधेयेनैवात्मना साध्यादिभिः संबध्यते इदमनेनेत्थं कुर्यादिति तथा यागोऽपि कर्मकरणत्वरूपमनादृत्य धात्वभिहितेनैव यागरूपेण गुणफलाभ्यां संबध्यत इति न वैरूप्यमिति नाक्रियात्वात् । भावना हि क्रियारूपा सर्वकारकसाधारणरूपेणेति युक्तं पदवैरूप्येणानेकसंबन्धं लभते, यागस्त्वक्रियारूपः कथमिव कारकरूपेण गुणादिभिः संबध्यते । तदसौ भावनाद्वारेणैवारुणैकहायनीवत् गुणफलाभ्यां संबध्यत इति युक्तम्, भावनासंबन्धोऽपि चास्य न स्वरूपेण संभवति । कारकं हि क्रियया संबध्यते न वस्तुरूपमतोऽवश्यं कर्मात्मना करणात्मना वा धातुना यागः प्रतिपादनीयः । तत्रान्यतररूपप्रतिपादने अन्यतरेणैव गुणेन फलेन वा संबन्धान्नोभयसंबन्धसिद्धिः । उभयरूपप्रतिपादने वा द्विरुच्चारणे वाक्यभेदः, तस्मान्न तन्त्रसंबन्धः, तेन गुणविधिपक्षे सैव मत्वर्थलक्षणा सोमेन यजेत अरुणया क्रीणातीत्यादि तदाश्रयितव्या वरं वाजपेयं सुराद्रव्यमस्मिन्निति सुराग्रहविधानात् तत्प्रख्यतया नामधेयत्वम् । ये तु कार्याभिधायिनामेव भावनाऽभिधेया न सर्वाख्यातानामित्याहुस्तेषां काष्ठैः पचतीत्यादिषु भावनाभावाद्धात्वर्थेनैव कारकाणां संबन्धात् क्रियारूपत्वं धात्वर्थस्याभ्युपगन्तव्यम् । अतश्च स्वरूपेणैव धात्वर्थः कारकसंबन्धमर्हतीति विनैवावृत्त्या धात्वभिहितेनैव रूपेण साध्यसाधनाभ्यां संबध्यत इत्यविकरणमिदमनुपपन्नं स्यात् । न चोद्देश्योपादेयत्वादिकृतमपि वैरूप्यम् गुणविशिष्टयागविधानात् ।

न च मत्वर्थलक्षणा कारकविभक्त्यैव श्रुत्या क्रियारूपधात्वर्थसंबन्धसिद्धेः । अतोऽक्रियारूप एव धात्वर्थ इत्याश्रयणीयं, युक्तं चैतत् अन्यथा हि काष्ठैः पचतीतिवत्काष्ठैः पाक इत्यपिसंबन्धः स्यात् । तेन यद्यपि धात्वर्थानामेवान्योत्पादानुकूलतया क्रियारूपत्वमस्ति तथाऽपि धातुभिस्तद्रूपमभिधीयते प्रतीत्यभावादिति न तत्संबन्धः कारकाणाम् । यथा हि वस्त्वादिशब्दाभिहिताऽपि क्रिया न कारकैः संबध्यते तथा न धात्वभिहिताऽपि। भावनादिशब्दा अपि न तद्रूपस्याभिधायकाः अङ्कुरविप्रकर्षमात्रेण तेषामाख्यातपर्यायत्वम् । आख्यातमेव तद्रूपाभिधायीति तेनैव कारकाणामन्वयः । तेन लडादिष्वपि कारकसंबन्धसिद्ध्यर्थमाख्यातस्य भावनार्थत्वमङ्गीकर्त्तव्यम् । अन्यथा धात्वर्थस्य क्रियात्वापत्तेरधिकरणमिदमनुपपन्नं स्यात् । भवन्मते चासत्यपि प्रत्ययार्थस्य क्रियात्वे धात्वर्थसंबन्धित्वाभ्युपगमात् कारकाणां सुतरां गुणविधित्वमेव स्यात् । अपि च लडादिभिरपि कर्मनामधेयानां करणार्थतया समभिव्याहारोऽनुवादवाक्ये दृश्यते "वाजं वा एषोऽवरुन्धे योऽन्नमत्ति वाजपेयेन यजेत यद्दर्भमयं परिधापयति वाजस्यावरुध्या" इति तद्यदि लडादिषु धात्वर्थ एव क्रिया स्यात् कथं तृतीयान्तनामधेयसंबन्धः, न ह्यात्मैवात्मनः करणं भवति तथा यो राजसूयेन यजते योऽश्वमेधेन यजेत इति तथा तमालभत तेनायजत इति लङन्तप्रयोगेऽपि दर्शयितव्यम्, अतो यथा वैदिकवाक्यालोचनेनापूर्वे शब्दार्थे भवन्तोऽनुमन्यन्ते तथा सर्वाख्यातानां करोत्यर्थवचनत्वं विमुक्तलज्जैरनुमन्तव्यम् । तथा हि तत्रैव तृतीयान्तानां नामधेयानां करणसमर्पकतयाऽन्वयो घटते अन्यथा दुर्घटं स्यादित्यास्तां तावत्, तस्मात्सिद्धं नामधेयत्वम् ।

आग्नेयादीमनामताऽधिकरणम् ।

सू० तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः ॥ ६ ॥

"यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवती"त्यत्राग्नेयशब्दो गुणविधिः कर्मनामधेयमिति विचारः, तदर्थं च किम-

Digitized by Google

च तत्प्रख्यन्यायोऽस्ति न वेति । तत्रानेकगुणविधाने वाक्यभेदादष्टाकपालद्रव्यकं कर्ममात्रं विधीयते । तस्य तु स्थानक्रमादग्निदैवत्यं याज्यानुवाक्यायुगलमङ्गं संभवति यतो मान्त्रवर्णिकोऽग्निरग्निहोत्रवत्प्राप्त इति तद्वदेव नामधेयत्वम् । उच्यते

"मन्त्राकाङ्क्षा न चात्रास्ति सत्यामपि न योग्यता ।
मन्त्रस्य नास्ति वचनमग्निहोत्रेऽस्ति तत् त्रयम् ॥

न ह्यष्टाकपालो भवतीत्येतावता पुरुषव्यापारः कश्चिदुक्तो योऽनुष्ठानाय स्मारकं मन्त्रमपेक्षेत सत्यामपि तु मन्त्राकाङ्क्षायां पुरोडाशमात्रविषयस्य व्यापारस्य देवतावाचिमन्त्रसंबन्धायोग्यत्वाच्च संबन्धः । यदि यागत्वं मन्त्रसंबन्धात्प्रागेवावगतं स्यात् ततो भवेद्देवतावाचिमन्त्राऽभिधायिना मन्त्रेण संबन्धः, न तु तदस्ति देवतासंबन्धात्प्राक् प्रत्यक्षयागाश्रवणात् । (शेषमग्रे)

॥ श्रीः ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(Continued from page 120. Vol. IX.*)*

श्रु० किं चाहङ्कारानुभवयोः स्वभावविरोधादनुभूतेरननुभूतित्वप्रसङ्गाच्च न व्यङ्ग्यव्यञ्जकभावः, यथोक्तं "व्यङ्ग्यव्यञ्जकत्वमन्योन्यं न च स्यात्प्रातिकूल्यतः। व्यञ्जकत्वेऽननुभूतित्वमात्मनि स्यात् यथा घटे" ॥ इति,

न च रविकरनिकराणां स्वाभिव्यञ्जकरतलाभिव्यञ्जकत्ववत्संविदभिव्यञ्जकाहङ्काराभिव्यञ्जकत्वं संविदः साधीयः,

नचापि रविकरनिकराणां करतलाभिव्यङ्ग्यत्वाभावात् करतलप्रतिहतगतयो हि रश्मयो बहुलाः स्वयमेव स्फुटतरमुपलभ्यन्ते इति तद्बाहुल्यमात्रहेतुत्वात्करतलस्य नाभिव्यञ्जकत्वम् ।

टी० "किं चे"ति, स्वभावविरोधात् अनुभवस्याशेषार्थसिद्धिहेतुत्वं तद्व्यतिरिक्तत्वेनाहङ्कारस्यास्य तदधीनसिद्धित्वं च विरोधः, अतो यथा पितापुत्रयोरन्यं प्रति पुत्रत्वे पितृत्वे च सत्यपि परस्परं पितृत्वपुत्रत्वव्यत्ययो नोपपद्यते, एवमन्यापेक्षया तयोर्व्यङ्ग्यव्यञ्जकभावसंभवेऽपि परस्परं नोपपद्यत इत्यर्थः । दूषणान्तरं चाह "अनुभूतेरननुभूतित्वप्रसङ्गाच्चे"ति, अस्मिन्नर्थे ऽप्यात्मसिद्धिग्रन्थं दर्शयति "यथोक्त"मिति, प्रातिकूल्यतः पूर्वोक्तस्वभावविरोधशब्देन प्रातिकूल्यशब्दो व्याख्यातः, तद्व्यङ्ग्यस्यैव तद्व्यञ्जकत्वे परोक्तदृष्टान्तं दूषयिष्यन्नाह "न चे"ति, दृष्टान्तस्य साध्यविकलत्वमाह "तत्रापी"ति, तत्र तथात्वस्यान्यथासिद्धिं दर्शयति "करतले"ति, न हि अत्र प्रसरणस्वभावं द्रव्यम् अतस्तद्बाहुल्यहेतुत्वमहङ्कारस्यानुपपन्नमित्यर्थः । तथा अहङ्कारेणास्याभिव्यक्तिं त्रिधा विकल्प्य दूषयति—

सू० किंचास्य संविद्रूपस्यात्मनोऽहङ्कारनिर्वर्त्याभिव्यक्तिः किंरूपा ? न तावदुत्पत्तिः स्वतःसिद्धतया अनन्योत्पाद्यत्वाभ्युपगमात्, नापि तत्प्रकाशनं तस्या अनुभवान्तराननुभाव्यत्वात् तत एव च न तदनुभवसाधनानुग्रहः ।

टी० "किंचे"त्यादिना, किंरूपा—किं—शब्दः क्षेपार्थः, दुर्निरूपेत्यर्थः कुत ? इत्यत्रापेक्षायामभिव्यक्तिर्नाम किमुत्पत्तिः ? उत प्रकाशनम् ? उतानुभवसाधनानुग्रह ? इति त्रिधा विकल्पमभिप्रेत्योत्पत्तिपक्षं दूषयति "न तावदि"ति, अनुत्पन्नस्य घटादेरभिव्यक्त्यसंभवादुत्पादकस्यापि दण्डचक्रादेरुत्पादनद्वारा अभिव्यक्तिहेतुत्वादुत्पत्तिरपि विकल्पशिरसि निवेशिता । किंच व्यङ्ग्यप्रकाशोत्पादनं व्यञ्जनं संविदः स्वयमेव प्रकाशरूपत्वात्तदुत्पत्तिरेव

तत्प्रकाशोत्पत्तिरूपाऽभिव्यक्तिरिति विकल्पशिरस्युत्पत्तिनिवेशः । "स्वत-स्सिद्धतये"ति, स्वतस्सिद्धतया हि प्रागभावाभाव उक्तः, अनादित्वादिति वाऽर्थः, अथ द्वितीयं व्युदस्यति "नापी"ति, प्रकाशनम् अनुभवविषयप्रकाशोत्पत्तिः । अथ तृतीयं प्रतिवक्ति "तत"इति, तत एव प्रकाशनानुपपत्तेरेव न चानन्तरग्रन्थोत्थानमनुपपन्नम् अनुग्राहकद्वैविध्यस्य तन्निरासानुपयोगात् उक्तश्चात्मसिद्धिग्रन्थोदाहरणं च न सङ्गतम् इन्द्रियासम्बन्धवाचित्वेनानुग्रहद्वैविध्यानुपयोगात् अत्रोच्यते पूर्वमनुग्राह्यजन्यप्रकाशविषयानुभूतिपर्यालोचनया तदनुभवसाधनानुग्रहो दूषितः, इदानीमनुग्रहप्रकारविशेषपर्यालोचनया दूषणमाह—

मू० स हि द्विधा ज्ञेयस्येन्द्रियसंबन्धहेतुत्वेन वा यथा जातिनिजमुखादिग्रहणे व्यक्तिदर्पणादीनां नयनादीन्द्रियसंबन्धहेतुत्वेन, बोद्धृगतकल्मषापनयनेन वा यथा परतत्त्वावबोधनसाधनस्य शास्त्रस्य शमदमादिना, यथोक्तं "करणानामभूमित्वान्न तत्संबन्धहेतुते"ति,

टी० "स ही"ति, द्विविधस्याप्यनुपपत्तिं दर्शयितुं प्रथमं द्वैविध्यमाह "ज्ञेयस्ये"ति, शमदमादेः शास्त्रानुग्राहकत्वोक्तिः परमतेन तद्धि उपासनानुग्राहकम् । ननु स हि द्विधेति वक्तुमयुक्तम् अनुग्रहस्य कोटिद्वयेऽप्यनन्तर्भावात् अनुमानादेर्व्याप्तिग्रहादिरनुग्रहोऽप्यस्ति इति, उच्यते करणानुग्रहः कर्त्रनुग्रहश्चेति कोटिद्वयमेव व्याप्तिग्रहणमपि करणानुग्रहान्तर्भूतम् । यद्वा दृष्टमुखेनानुग्रहो ऽदृष्टमुखेन चेति द्विधा व्याप्तिग्रहणमपि दृष्टमुखेनानुग्रहः, तस्मादिन्द्रियसंबन्धहेतुत्वेनेत्येतत्करणानुग्रहस्य दृष्टमुखेनानुग्रहस्य चोपलक्षणं, तत्राहङ्काराभिव्यङ्ग्यायास्संविदोऽनुमानविषयत्वासंभवादिन्द्रियसंबन्धहेतुत्वेनेत्युक्तं "बोद्धृगतकल्मषापनयने"ति च कर्त्रनुग्रहस्यादृष्टमुखेनानुग्रहस्य चोपलक्षणमुक्तम् । आत्मसिद्धिग्रन्थेऽप्ययमेव भावः । एवं द्वैविध्यदर्शनेन द्विधाभूतोऽप्यनुग्रहोऽहङ्कारस्य न सुवच इत्यनुषङ्गेण योजना । कथमत्र द्विविधस्याप्यनुग्रहस्यानुपपत्तिरिति शङ्कायां

मात्मसिद्धिरित्यन्यमाह "यथोक्त"मिति करणानामभूमित्वान्न तत्संबन्धहेतुत्ते"ति, हेतुत्वलक्षणानुग्रहोऽनुपपन्न इति दर्शितः, बोद्धृगतकल्मषापनयनलक्षणानुग्रहानुपपत्तिर्न ग्रन्थस्था । अत्र केचिदाचार्या एवं व्याचक्षते शमादेरनुग्राहकत्वं शास्त्रसिद्धं न तथाऽहङ्कारस्यानुग्राहकत्वं शास्त्रसिद्धमिति स्फुटत्वान्न ग्रन्थे कण्ठोक्त्या निरास इति । पूर्वोद्धृतोदाहरणेन श्लोकस्योत्तरार्धे बोद्धृगतकल्मषापनयनलक्षणानुग्रहानुपपत्तिर्द्रष्टव्येति चाचार्याः । तदिदमुक्तरार्धम् "अहमर्थस्य बोद्धृत्वान्न स तेनैव शोध्यत" इति, एकस्यैव स्वप्रतियोगितया शोध्यत्वं शोधकत्वं चानुपपन्नमित्यर्थः । अयन्तु भाष्याभिप्रायः—अहमर्थस्य बोद्धृगतकल्मषापनयने कर्तृत्वं किं स्वरूपेण ? उतादृष्टकिंचित्कारमुखेन ? प्रथमे कर्मकर्तृविरोधः, एकस्यैव स्वापेक्षया शोध्यशोधकत्वानुपपत्तेः, द्वितीये निष्प्रमाणकत्वं, न ह्यन्तःकरणस्यादृष्टवशादन्तःकरणशुद्धिरित्यत्र प्रमाणमस्तीति पूर्वमिन्द्रियगोचरत्वानभ्युपगमेन दूषणमुक्तम् । अथानुभाव्यत्वाभ्युपगमेन दूषणमाह "किं चे"ति, अनुग्रहस्वरूपं शिक्षयति—

मू० किंचानुभूतेरनुभाव्यत्वाभ्युपगमेऽप्यहमर्थेन न तदनुभवसाधनानुग्रहः सुवचः, स ह्यनुभाव्यानुभवोत्पत्तिप्रतिबन्धकनिरसनेन भवेत्, यथा रूपादिग्रहणोत्पत्तिविरोधि[1]सन्तमसनिरसनेन चक्षुषो दीपादिना, न चेह तथाविधं निरसनीयं संभाव्यते

टी० "स ही"ति, व्यक्तिदर्पणादावनुग्रहप्रकारान्तरे दृष्टे ऽपि कथं प्रतिबन्धनिरसनरूपानुग्रह एव परिशेषितः ? उच्यते जातिव्यक्त्योर्नियतधर्मिधर्मभावेन व्यक्तिर्ज्जातेरभिव्यञ्जिका न तथा अहङ्कारानुभवयोर्नियतधर्मधर्मिभावोऽस्ति स तु परेणैव निरस्तः । मूर्तद्रव्यभूतश्चाक्षुषरश्मिप्रतिहतिहेतुर्दर्पणो मूर्तद्रव्यभूतचाक्षुषरश्मीन्मुखेन संबन्धयति न तथाऽहङ्कारो-

---

१ निरोधिसंतमसनिरसनेनेति पाठान्तरम् ।

Digitized by Google

मूर्तद्रव्यं कस्य चित्प्रतिहतिहेतुरिति वक्ष्यमाणामिहानुग्रहप्रकारान्तरानुपपत्तिमभिप्रेत्य प्रतिबन्धनिरसनरूपानुग्रह एव परिशेषितः । ईदृशानुग्रहे दृष्टान्तमाह "यथा रूपादौ"ति, ततः किमित्यत्राह "न चेहे"ति, तदुपपादयति "न तावदि"ति, किं प्रागभावरूपमज्ञानं? किं वा भावरूपम्? उतान्यविरसनीयमुच्यत इति शिरस्त्रयमभिप्रेत्य तावच्छब्दः प्रयुक्तः "न तावदि"ति ग्रन्थेनान्यविरसनीयं निरस्तम् । यद्वाऽहङ्कारस्याज्ञाननिरासकत्वमज्ञानस्य संवित्संबन्धित्वं चोभयमनुपपन्नमित्यभिप्रेत्य प्रथममहङ्कारापनेयत्वमज्ञानस्य प्रतिक्षिपति–

मू० न तावत्संविदाऽऽत्मगतं तज्ज्ञानोत्पत्तिविरो[१]धि किंचिदप्यहङ्कारापनेयमस्ति, अस्ति ह्यज्ञानमिति चेन्न अज्ञानस्याहङ्कारापनोद्यत्वा[२]नभ्युपगमात् ज्ञानमेव ह्यज्ञानस्य निवर्तकम्

न च संविदाश्रयत्वमज्ञानस्य संभवति ज्ञानसमानाश्रयत्वात्तत्समानविषयत्वाच्च ज्ञातृभावविषयभावविरहिते ज्ञानमात्रे साक्षिणि नाज्ञानं भवितुमर्हति

टी० "न ताव"दिति, । अहङ्कारापनेयमज्ञानमस्तीति शङ्कते "अस्ति ही"ति, दूषयति, "ने"ति, अज्ञान–शब्दोभावरूपस्याभावरूपस्य च साधारणः, दूषणमपि साधारणं, द्विविधस्याप्यज्ञानस्य अहङ्कारापनोद्यत्वाभावात् किं निवर्तकमित्यत्राह "ज्ञानमेव ही"ति, प्रागभावस्यापि ज्ञानोत्पत्तिनिवर्तिका भावरूपस्यापि ज्ञाननिवर्त्यत्वं पराऽभ्युपेतं "[३]"द्विविध[३]स्यापि ज्ञानोत्पत्तिर्निवर्तिका भावरूपस्यापि ज्ञाननिवर्त्तित्वं पराभ्युपेतम्"" एवमज्ञानस्यापि संविदाश्रयत्वे सत्यप्यहङ्कारापनोद्यत्वायोगात्तन्निरसनरूपानुग्रहो न संभवतीत्युक्तम् । अथाज्ञानस्य संविदाश्रयत्वं चानुपपन्नमित्याह "न चे"ति,

---

१ निरोधीति पाठान्तरम् ।

२ अहङ्कारापोद्यत्वानभ्युपगमर्गदिति पाठान्तरं तु न साधु प्रतीमः ।

३ रेखात्रयमध्यस्थः पाठोऽसङ्गत इति प्रतीमः, न चाप्येव पुस्तकान्तरे उपलभ्यते ।

संविदाश्रयत्वं संवित्संबन्धित्वमित्यर्थः। आश्रयणं संबन्धः, संबन्धश्च कर्मत्वेनाश्रयत्वेन चेत्युभयविधसंबन्धिपर आश्रय–शब्दः, आश्रयश्चेतसो ब्रह्मेत्यादिप्रयोगाच्चाश्रय–शब्देन विषयस्याप्युपस्थापनं युक्तं, संविदो ऽज्ञानसंबन्धः किमाश्रयतया? उत विषयतया? उभयथाऽपि संबन्धोऽनुपपन्न इत्यर्थः। कुत इत्यत्राह "ज्ञाने"ति, ततः किमित्यत्राह "ज्ञातृभावे"ति, साक्षिणि द्रष्टुरेव साक्षित्वं ज्ञप्तेः साक्षित्वमपि व्याहतं भवतीत्यभिप्रायः। भवितुमर्हतीति निर्देशेनाश्रयतया विषयतया वा संबन्धमात्रं विवक्षितम्, अनेन व्यतिरेकव्याप्तिर्दर्शिता भवति संविदाश्रयत्वाभावे अन्वयव्याप्तिं दर्शयति-

मू० यथा ज्ञानाश्रयत्वप्रसक्तिशून्यत्वेन घटादेर्नाज्ञानाश्रयत्वं तथा ज्ञानमात्रेऽपि ज्ञानाश्रयत्वाभावेन नाज्ञानाश्रयत्वं स्यात् संविदोऽज्ञानाश्रयत्वाभ्युपगमेऽप्यात्मतयाऽभ्युपेतायास्तस्या ज्ञानविषयत्वाभावेन ज्ञानेन न तद्गताज्ञाननिवृत्तिः, ज्ञानं हि स्वविषय एवाज्ञानं निवर्तयति यथा रज्ज्वादौ, अतो न केनापि कदाचित्संविदाश्रयमज्ञानमुच्छि[1]द्येत अस्य च सदसदनिर्वचनीयस्याज्ञानस्य स्वरूपमेव दुर्निरूपमित्युपरिष्टाद्वक्ष्यते ज्ञानप्रागभावरूपस्य चाज्ञानस्य ज्ञानोत्पत्तिविरोधित्वाभावेन न तन्निरसनेन तज्ज्ञानसाधनानुग्रहः

टी० "यथे"ति, अज्ञानाश्रयत्वं हि ज्ञानप्रागभावाश्रयत्वमनिर्वचनीयाज्ञानाश्रयत्वं वा तद् घटादिषु नास्तीत्यर्थः, "ज्ञानाश्रयत्वप्रसक्ती"ति, ज्ञातुरप्यज्ञानाश्रयत्वं ज्ञानाश्रयत्वं च कालभेदादविरुद्धमिति भावः। ज्ञानात्यन्ताभावाश्रयत्वं हि घटादेः, ज्ञानं नाज्ञानाश्रयः, न चाज्ञानविषयः अज्ञानाश्रयत्वे तद्विषयत्वे चोपगम्यमाने ज्ञातृत्वज्ञेयत्वप्रसङ्ग इति प्रतिकूलतर्क उक्तो भवति। एवमज्ञानाश्रयत्वाऽनभ्युपगमेन दूषणमुक्तं तदभ्युपगमेन

१ उच्छिद्यते इति पाठान्तरम्।

दूषणमाह "संविद"इति, अवच्छिन्नज्ञानस्यानुभाव्यत्वेऽङ्गीकृतेऽप्यनवच्छिन्नस्यात्मभूतस्य ज्ञानस्यानुभाव्यत्वानभ्युपगमादित्यभिप्रायेणाह "आत्मतऽाऽभ्युपेतायां" इति, ज्ञानविषयस्यैवाज्ञाननिवृत्तिं सदृष्टान्तमाह "ज्ञानं ही"ति, यद्यविषयेऽप्यज्ञाननिवृत्तिस्तर्हि शुक्तिज्ञानेन सर्पभ्रमनिवृत्तिः[1] स्यादित्यभिप्रायः, एवं ज्ञाननिवर्त्याज्ञानाश्रयत्वे ज्ञानविषयत्वप्रसङ्ग इत्युक्तं भवति । आश्रयत्वाभ्युपमेनोक्तं दूषणं निगमयति "अत"इति, त्वयाऽहङ्कारापनोद्यत्वेनोक्तं ज्ञानं किं सदसदनिर्वचनीयम्? उत ज्ञानप्रागभावरूपमिति विकल्प्याऽऽह "अस्य चे"ति, द्वितीयं प्रतिवक्ति "ज्ञानप्रागभावे"ति, विरोधि-शब्देन प्रतिबन्धकत्वं विवक्षितम् न सहानवस्थानमात्रम् । अभिव्यक्तेर्दुर्निरूपत्वं निगमयति-

सू० अतो न केनापि प्रकारेणाहङ्कारेणानुभूतेरभिव्यक्तिः । न च स्वाश्रयतयाऽभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः प्रदीपादिष्वदर्शनात् यथाऽवस्थितपदार्थप्रतीत्यनुगुणस्वाभाव्याच्च ज्ञानतत्साधनयोरनुग्राहकस्य च, तच्च स्वतः प्रामाण्यन्यायसिद्धम् ।

टी० "अत"इति, केनापि प्रकारेण-उत्पादकत्वेन वा प्रकाशकत्वेन वा तदनुभवसाधनानुग्राहकत्वेन वेत्यर्थः । अथ स्वात्मस्थतयाऽभिव्यक्तिं दूषयति "न चे"ति, व्यभिचारमाह "प्रदीपादिष्वि"ति, हेत्वन्तरं चाह "यथाऽवस्थिते"ति, प्रतीतिव्यवहारानुगुण्यं तदनुगुणाज्ञानादीनां स्वभावादित्यर्थः । तदेवोपपादयति "तच्चे"ति, प्रामाण्याप्रामाण्यविषयाश्चत्वारः पक्षाः प्रामाण्याप्रामाण्ये द्वे च परतः, द्वे च स्वतः, प्रामाण्यं परतो ऽन्यत्स्वतः प्रामाण्यं स्वतोऽन्यत्परत इति प्रथममनुपपन्नं निःस्वभावत्वादिप्रसङ्गात्[2] प्रामाण्याप्रामाण्ये द्वे च अन्यत्र विद्येते चेत् तत्संबन्धात् ज्ञाने तथात्वं तत्संबन्धाभावेऽनुभयत्वं च युक्तम् अनुष्णाशीतवत्,

१ सर्पभ्रमनिवृत्तिरिति पाठोऽपि पुस्तकान्तरस्थो योजयितुं शक्यः ।
२ निःस्वभावत्वादिति ।

ऽन्यत्र तयोरविद्यमानत्वात्परतस्त्वमनुपपन्नं प्रामाण्यप्रभृत्साप्रामाण्ययोऽ-
नवस्थाप्रसङ्गाच्च द्वयोरपि स्वतस्त्वमनुपपन्नं विरुद्धधर्मत्वेन व्याघातात्

न च व्यक्तिभेदादविरोधः, इयं प्रामाण्याश्रयव्यक्तिरियचेति नि-
यामकाभावात् अप्रामाण्यस्यैव स्वतस्त्वमनुपपन्नं प्रामाण्यस्यैव भूयस्त्वा-
दन्यस्याभूयस्त्वाच्च भूयसां स्वतस्त्वमल्पीयस औपाधिकत्वं च युक्तं घट-
पटादिज्ञानेषु शुक्तिरजतादिज्ञानानामिदमंशेष्वपि प्रामाण्यदर्शनात्तस्य भूय-
स्त्वम् अतः स्वतःप्रामाण्यं परतोऽप्रामाण्यमिति क्वचिद्रात्मस्थतयाऽभि-
व्यञ्जनमभ्युपेत्य व्यभिचार उक्तः । अथ क्वचिदपि तत्रास्तीत्याह—

मू० न च दर्पणादिर्मुखादेरभिव्यञ्जकः, अपि तु चाक्षुषतेजः-
प्रतिफलनरूपदोषहेतुः, तद्दोषकृतश्च तत्रान्यथाऽवभासः,
अभिव्यञ्जकस्त्वालोकादिरेव, न चेह तथाऽहङ्कारेण सं-
विदि स्वप्रकाशायां तादृशदोषापादनं संभवति, व्यक्तेस्तु
जातिराकार इति तदाश्रयतया प्रतीतिः, न तु व्यक्तिव्य-
ङ्ग्यत्वात्, अतोऽन्तःकरणभूताहङ्कारस्थतया संविदुपलब्धे-
र्वस्तुतो दोषतो वा न किंचिदिह कारणमिति नाहङ्का-
रस्य ज्ञातृत्वं तथोपलब्धिर्वा, तस्मात्स्वत एव ज्ञातृतया
सिद्ध्यन्नहमर्थ एव प्रत्यगात्मा न ज्ञप्तिमात्रम् ॥

टी० "न चे"ति, तर्हि मुखदर्शनाय दर्पणादिकं नोपादीयेतेत्य-
त्राह "अपि त्वि"ति, प्रतिफलनस्य दोषत्वमन्यथाज्ञानहेतुत्वादित्याह "त-
द्दोषे"ति, कस्तर्ह्यभिव्यञ्जकः ? इत्यत्राह "अभिव्यञ्जकस्त्वि"ति, अहङ्का-
रस्य मूर्तत्वस्थूलत्वद्रव्यत्वाभावात्संविदो ज्ञेयत्वाभावादचाक्षुषत्वाच्चाह-
ङ्कारेण संविदविषयभूतायां तद्गाहकवस्तुप्रतिफलनदोषो न संभवतीत्याह
"न चेहे"ति, व्यक्तौ जातिप्रतीतिर्नियतधर्मधर्मिभावाच्च तु व्यङ्ग्यत्वादि-
त्याह "व्यक्ते"रिति, एवं द[1]र्पणव्यक्तिनिर्वाहद्वयं हृदि निधाय पूर्वं प्रति-

१ यतक्षर्पणव्यक्तिनिर्वाहद्वयमिति द्राविडपाठः ।

कश्चनिरसनरूपानुग्रहो दूषितः, धर्मधर्मिभावेन वस्तुतस्तात्स्थ्येनोपलब्धि-र्युक्ता, दर्पणे तु प्रतिफलनरूपदोषादेवं परपक्षे न संभवतीत्याह "अत"-इति, वस्तुतः कारणं धर्मधर्मिभावः, दोषस्तु तात्स्थ्येनोपलब्धिकारणं मूर्तस्वच्छस्थूलद्रव्यत्वम् उभयमप्यहङ्कारे नास्तीत्यर्थः, वस्तुतः कारणाभा-वाच ज्ञातृत्वं विद्यते दोषरूपकारणाभावाचोपलभ्यते चेत्यभिप्रायेणाह "नाहङ्कारस्य ज्ञातृत्वं तथोपलब्धिर्वे"ति, ज्ञातुरात्मत्वं निगमयति "त-स्मा"दिति, ज्ञप्तेरात्मत्वमयुक्तम् अहंत्वाभावे प्रत्यक्त्वायोगादित्याह—

सू० अहंभावविगमे तु ज्ञप्तेरपि न प्रत्यक्त्वसिद्धिरित्युक्तं, तमोगुणाभिभवात्परागर्थानुभवाभावाच्चाहमर्थस्य विवि-क्तस्फुटप्रतिभासाभावेऽप्याप्रबोधादहमित्येकाकारेणात्म-नः स्फुरणात्सुषुप्तावपि नाहंभावविगमः

टी० "अहंभावविगम"इति, अहमिति व्यवहारानुगुणभासनवि-रहे स्वस्मै भासमानत्वं न स्यात् अतः प्रत्यक्त्वमप्यहमर्थस्यैवात्मत्वसा-धकमित्यर्थः । अथ सुषुप्तावहमर्थस्फुरणमस्तीति साधयितुं वेदान्तावलम्बि-भिः सर्वैः स्वयंज्योतिष्ट्वश्रुत्यनुसारात् सुषुप्तावात्मस्फुरणमभ्युपेत्यं, तत्र नाहं खल्वयमेवं संप्रत्यात्मानं जानाति "अयमहमस्मीति श्रुत्या मामप्यहव ज्ञात-वानिति परामर्शाच्च नाहमर्थानुभवः, अतोऽनुभूतिस्फुरणमेव तदानीमिति शङ्कायामहमर्थस्याविशदस्फुरणमस्तीति सोपपत्तिकं प्रतिजानीते तम इत्या-दिना तस्त्वर्थः शङ्कानिवृत्तौ, तमोगुणाभिभवहेतुकात् परागर्थानुभवाभा-वात् स्फुटावभासाभावः, विविक्तप्रतिभासः व्यावृत्तप्रतिभासः, अनेकवि-शेषणविशिष्टावभासः स्फुटावभासः, व्यावर्तकग्राहकत्वादिबाह्यधर्मवि-शिष्टत्वेन बुद्धिसुखाद्यान्तरधर्मविशिष्टत्वेन च प्रतिभासाभावात् सकलेतर-व्यावृत्ततया स्फुटतया च प्रतिभासाभावः । केनाकारेण स्फुरतीत्यत्राह "अहमित्येकाकारेण स्फुरणा"दिति, अहमिति न शब्दानुकारः, अपि त्वे-तद्वाच्यार्थानुकारः प्रत्यक्त्वाकारेण स्फुरणादित्यर्थः, एकशब्देनाहंभावावि-

गमो विवक्षितः। यद्वा एकाकारेण सर्वात्मसाधारणाकारेणेत्यर्थः, प्रत्यक्त्वादिको हि सर्वात्मसाधारणः सुखदुःखादयो देवत्वादयश्च न हि सर्वात्मसाधारणाः सुषुप्तौ भासमान आत्मन्यहंभावस्साध्यः, तथा स्फुरणं हेतुः। विशदावभासाभावादहमर्थस्फुरणमेवास्तीत्यत्राह—

मू॰ भवदभिमताया अनुभूतेरपि तथैव प्रथेति वक्तव्यम् न हि सुप्तोत्थितः कश्चिदहंभावियुक्तार्थान्तरप्रत्यनीकाकारा ज्ञप्तिरहमज्ञानसाक्षितयाऽवतिष्ठे इत्येवंविधां स्वापसमकालामनुभूतिं परामृशति [1] एवं तर्हि सुप्तोत्थितस्य परामर्शः सुखमहमस्वाप्समिति

टी॰ "भवदभिमताया अनुभूतेरपी"ति, न केवलमहमर्थस्फुरण एवावैशद्यदोषः, अनुभूतिस्फुरणेऽपि स तुल्यस्त्वया वाच्यः, अतो विशदावभासाभावादास्तित्वं चेत् ज्ञप्त्यात्मनोऽपि तदानीं स्फुरणमेव स्यात् ज्ञातृज्ञेयोपश्लेषविरहात् स्फुटानवभास इति हि तदभ्युपगमः इत्यभिप्रायः। मृषावादिभिर्वाद्यन्तरैरपि जागरितावस्थायामेवाविशदावभासो निर्विकल्पकेऽङ्गीकृतः, ते यदि विशदावभासाभावादहमर्थास्फुरणं ब्रूयुः, तत्रापि निर्विकल्पके पृथक्पृथग्वस्तुमात्रावभासाभ्युपमो नोपपद्यते अविशदवस्तुमात्रावभासः परैरप्रामाणिको निर्विकल्पके स्वीकृतः अत्र तु "अत्रायं पुरुषः स्वयंज्योतिर्भवतीत्यादिश्रुत्यनुसारादविशदावभासः प्रामाणिकः स्वीकृत इति भेदः, अतः सुषुप्तावात्मस्फुरणाभ्युपगमे अविशदावभासाभ्युपगमे च तुल्येऽपि मृषावादिमतादपि स्वपक्षे प्रमाणानुगुण्यं विवक्षुः परपक्षे प्रमाणाननुगुणत्वं दर्शयति "न ही"ति, अहंभाववियुक्तार्थान्तरप्रत्यनीकाकारा ज्ञातृज्ञेयादिसमस्तविशेषरहितेत्यर्थः प्रत्यक्त्वसिद्ध्यर्थं ज्ञप्तिरहमित्यत्राहंशब्दोपादानम्। स्वपक्षे परामर्शानुगुण्यमाह "एवं ही"ति, अयं परामर्शः सुषुप्तिकाले सुखरूपतयाऽनुभूतात्मगोचरः अतीतकालसंबन्धस्वापो तु

[1] एवं हि सुप्तोत्थितस्येति पुस्तकान्तरपाठः।

पूर्वकालानुभूतार्थप्रत्यभिज्ञानयोग्यानुपलब्धिभ्यामनुमेयौ स्वतोऽनुकूलतयाऽवभासमानस्याहमर्थस्यानुमानिककालस्वापवैशिष्ट्यगोचरप्रत्यभिज्ञाविशेषोऽयं परामर्शः—

सू० अनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च ज्ञायते

न च वाच्यं, यथेदानीं सुखं भवति,तथा तदानीमप्यस्वाप्समित्येषा प्रतिपत्तिरिति

टी० "सुखमहमस्वाप्समिति, एवं स्वपरमतयोः परामर्शानुगुण्यतदभावरूपवैषम्यमुक्तं श्रुतिस्वारस्यं च अस्मन्मते "अत्रायं पुरुषः स्वयंज्योतिर्भवतीति पुरुषशब्दश्रवणात् पुरुषशब्दो न संविन्मात्रपरः, एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष"इति ज्ञातुरेव पुरुषत्वश्रवणाल्लोके ज्ञातरि पुरुषशब्दप्रसिद्धेश्च प्रत्यक्त्वसिद्धिश्चास्मन्मत एवेति वक्ष्यते । उक्तपरामर्शफलितमर्थमाह "अनेने"ति, सुखमहमस्वाप्समिति परामर्शे सुखमित्यनेन तदानीमनुकूलतया भासमानत्वमनुसंहितं भवति, अहमित्यनेन स्वस्मै भासमानत्वरूपप्रत्यक्त्वं चानुसंहितं भवति यथा मन्दमगच्छं मधुरमगायमिति परामर्शेन पूर्वं गमनगानाभ्यां सह तत्कालीनं मान्द्यं माधुर्यं चानुसंहितं भवति तद्वदित्यर्थः । स्वस्मै स्वयमनुकूलमित्यानुकूल्यप्रतियोगित्वाभिप्रायेण सुखित्वमित्युक्तं स्वस्मै भासत इति ज्ञानप्रतिसम्बन्धित्वरूपप्रत्यक्त्वाभिप्रायेण ज्ञातृत्वमित्युक्तं न तु धर्मभूतज्ञानस्फुरणात्, तस्य विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव न सर्वेषां सर्वदा तथैवेति भाष्यस्वारस्यविरुद्धं "पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगा"दिति सूत्रस्वारस्यविरुद्धं च अस्मरणनियमाद्युपपत्तिविरुद्धं च संसारदशायां मनोव्यापारविरहेऽपि ज्ञानस्यात्मविषयत्वं, तच्चेन्द्रियद्वारेण व्यवस्थितमिति भाष्यस्वारस्यविरुद्धं च अन्यथा एषां सूत्रभाष्यवचसां संकोचः स्यात् स च संकोचकाभावादनुपपन्नः, तस्मात्तदानीमात्मा प्रत्यक्त्वेनानुकूलत्वेनानुसंहित इति परामर्शफलितार्थः सुखमहमस्वाप्समिति सुखस्य स्वापक्रियाविशेष-

यात्वे प्रतीयमाने कथमात्मविशेषणत्वमुच्यते? इति चेत् नैवं क्रियायाः सुखाश्रयत्वायोगेन पुरुषद्वारा क्रियाविशेषणत्वस्य युक्तत्वादिति आत्मनस्तदानीं न किंचिदवेदिषमित्यज्ञानसाक्षित्वेन स्थितिं वदता अज्ञानाश्रयभूताहमर्थानुभवोऽभ्युपगन्तव्यः, यथा प्रातश्चत्वरे गजो नास्तीति परामर्शे पूर्वं गजाभावाश्रयभूतं चत्वरमेनुसंहितं भवति तद्वत् सुखमस्वाप्समिति परामर्शेन मन्दमगच्छमित्यत्र गमनवत्स्वापोऽपि तदाऽनुसंहितः स्यादिति चेन्न यथा प्रातश्चत्वरे गजो नास्तीत्यत्र पूर्वं गजाभावाननुसंधानेऽपि एवं परामर्शोपपत्तिः तद्वत्सकलज्ञाननिवृत्तिरूपस्वापस्य तदानीमननुसंहितत्वेऽप्येवं परामर्शोपपत्तेः, तत्र हि प्रातश्चत्वरमेवानुभूतं न गजाभावः प्रतियोगिभूतगजास्मरणात् पश्चाद् गजः किं स्थित इति पृष्टेन योग्यार्थाननुस्मरणलिङ्गेनाभावोऽनुमीयते तद्वत्सकलज्ञाननिवृत्तिरूपस्वापोऽपि योग्याननुस्मरणलिङ्गेनानुमीयते

ननु सुखमहमस्वाप्समिति परामर्शस्वरूपे सति स्वापादेस्तदानीमननुभवः सुखित्वादेरनुभवश्च कथमुच्यते सर्वमप्यनुभूतं स्यात् न वा स्यात् नैतत् सुखमहमस्वाप्समित्यत्र यस्मिन्नंशे प्रतीतिस्वारस्यापवादकमस्ति तद्विषयप्रतिपत्तिस्वारस्यभङ्गेऽप्यनपोढितांशविषयप्रतिपत्तिस्वारस्याभङ्गात्, तत्र स्वापदशायां योऽर्थोनानुभवितुं शक्यः तद्विषयप्रतिपत्तिस्वारस्यं भज्यते यस्तु तदानीमनुभवयोग्यः तद्विषयप्रतिपत्तिस्वारस्यं तिष्ठत्येव बाह्यान्तःकरणजन्यसमस्तज्ञानाभावरूपत्वात् नस्वापस्तदाऽनुसंधातुं शक्यते अनुसंधानमस्ति चेत् स्वाप एव न स्यात् ऐन्द्रियकसमस्तज्ञाननिवृत्त्यभावात्, नैवं सुखादेः प्रतिपत्त्यनुपपत्तिरिति यथोक्त एवार्थः । अथाऽस्य परामर्शस्य परोक्तान्यथासिद्धिमनूद्य परिहरति "न चेत्यादिना,

मू॰ अतद्रूपत्वात्प्रतिपत्तेर्न चाहमर्थस्यात्मनोऽस्थिरत्वेन तदानीमहमर्थस्य सुखित्वानुसंधानानुपपत्तिः, यतः सुषुप्तिदशायां प्रागनुभूतं वस्तु सुप्तोत्थितोमयेदं कृतं मयेदमनुभू-

तम[१]हमेवेदमवोचमिति परामृशति एतावन्तं कालं न किञ्चिदहमज्ञासिषमिति च परामृशति इति चेत् ततः किं न किंचिदिति कृत्स्नप्रतिषेध इति चेन्न अहमवेदिषमिति वेदितुरहमर्थस्यानुवृत्ते वेद्यविषयो हि स प्रतिषेधः, न किञ्चिदिति निषेधस्य कृत्स्नविषयत्वे भवदभिमतानुभूतिरपि प्रतिषिद्धा स्यात् ॥

टी० "अतद्रूपत्वादि"ति, एवमर्थः किं प्रतिपत्तिस्वारस्यादुतानुपपत्त्याऽभ्युपगम्यत इति विकल्प्य अतद्रूपत्वात्प्रतिपत्तिरिति प्रतिपत्तिस्वारस्यं परिहृतं, यथा मन्दमगच्छम्मधुरमगायमिति परामर्शवचनस्य, न हि तत्र यथेदानीं मान्द्यं माधुर्यं च भवति तथा अगच्छमगायमित्यर्थः, अपि तु गतिगानसमकालत्वमेव मान्द्यमाधुर्ययोरुपपन्नं तद्वत् प्रत्यक्त्वसुखित्वे अपि स्वापसमकालीने इत्यर्थः । अथानुपपत्तिं परिहरति "न चेत्यादिना, अनुपपत्तिश्चात्मनोऽस्थिरत्वमनुभवाभावो वा । तत्र परामर्शेन स्थिरत्वमाह "यत" इति, मयेदं कृतमित्यादयो मानसवाचिककायिकत्रिविधव्यापारविषयपरामर्शपराः। अथाहमर्थाननुभवसाधकनिषेधसामान्यविषयं परामर्शं शङ्कते "एतावन्त"मिति, अहमर्थस्य निषेधविषयत्वाभावाभिप्रायेणाह "ततः किमि"ति, परविवक्षितं शङ्कते "न किंचिदि"ति, परिहरति "ने"ति, वेद्यविषयः—वेद्यप्रतिभासविषयः। कृत्स्नविषयत्वेऽनिष्टमाह "न किं चिदि"ति, मानुभूतिनिषेधस्तस्या अनुवृत्तेरित्याशङ्क्याह—

सू० सुषुप्तिसमयेऽप्यनुसंधीयमानमहमर्थमात्मानं ज्ञातारमहमिति परामृश्य न किंचिद्वेदिषमिति वेदने तस्य प्रतिषिध्यमाने तस्मिन्काले निषिद्ध्यमानाया वित्तेः सिद्धिमनुवर्त्तमानस्य ज्ञातुरहमर्थस्य चासिद्धिमनेनैव न किंचिदहमवेदिषमिति परामर्शेन साधयंस्तमिममर्थं देवानामेव सा-

१ अहमेतदवोचमिति पुस्तकान्तरम् ।

ध्यतु मामप्यहं न ज्ञातवानित्यहमर्थस्यापि तदानी-
मननुसंधानं प्रतीयत इति चेत्स्वानुभवस्ववचनयोर्विरोध-
मपि जानन्ति भवन्तः, अहं मां न ज्ञातवानिति ह्यनुभ-
ववचने मामिति किं निषिध्यत इति चेत् ॥

टी० "सुषुप्तिसमये त्वि"ति, भवत्पक्षस्य विपरीतोऽयं परामर्श इत्यर्थः, यथा प्रातश्चत्वरे गजानुभवं पृष्टेन पश्चाद्ग्राम्याननुस्मरणलिङ्गेन चत्वरे गजाभावं वदता पुरुषेण पूर्वकालीनचत्वरानुभवेन विना गजाभावो वक्तुं न शक्यते तथा अज्ञानाश्रयमहमर्थं वदता स्वापदशायामहमर्थानुभवोऽभ्युपगन्तव्यः। अथाप्यहमर्थनिवृत्तिज्ञानानुवृत्तिकथनं चत्वरनिवृत्तिगजाव-स्थानवचनतुल्यमिति भावः। देवानामेव साधयतु—अर्चारूपा हि देवताः प्रतिवचनमकुर्वतामित्यर्थः। क्षमावतामिति वा प्रतिवाक्यसविधाविति वा उल्लोकमुक्तमिति वाऽर्थः। अथ निषेधविशेषविषयं परामर्शमाह "मामपी"ति, परिहरति "स्वानुभवे"ति, स्वानुभववचनयोर्नान्योन्यं विरोधः किंतूभयोरप्यहमर्थानुवृत्तिनिषेधशब्देन विरोध इत्यर्थः। अनुभवैकदेशयोर्वचनैकदेशयोश्च मिथो विरोध इति वाऽर्थः। मिथो विरोधं दर्शयति "अहमि"ति, अहं न ज्ञातवानित्यत्र अज्ञानसाक्षित्वेनाहमर्थानुवृत्तेः स्वानुभवसिद्धौ वचनमपि तदनुगुणमित्यनुभववचनाभ्यामहर्थानुवृत्तिनिषेधवाक्यविरोध इत्यर्थः। निषेधशब्दतदर्थानुभवयोर्विरोध इति वाऽर्थः, तत्र मामिति पदस्यार्थं वक्तुं परप्रश्नमनुभाषते "मामिती"ति, पूर्वं विरुद्धार्थकथनमसाधु अथैतत्स्वप्रश्नस्साधुरित्यभिप्रायेणाह—

भा० साधु पृष्टं त्वया, तदुच्यते अहमर्थस्य ज्ञातुरनुवृत्तेर्न स्वरूपं
निषिध्यते अपि तु प्रबोधसमये ऽनुसंधीयमानस्याहमर्थस्य
वर्णाश्रमादिविशिष्टता, अहं मां न ज्ञातवानित्युक्तेर्वि-
षयो विवेचनीयः, जागरितावस्थानुसंहितजात्यादिविशि

ष्टोऽस्मदर्थो मामित्यंशस्य विषयः स्वापाव(¹)स्थाप्रसिद्धो ऽविशदस्यानुभवैकतानस्याहमर्थोऽहमित्यंशस्य विषयः, अत्र सुप्तोऽहमीदृशो ऽहमिति च मामपि न ज्ञातवानहमित्येव खल्वनुभवप्रकारः किंच सुषुप्तावात्मा ऽज्ञानसाक्षित्वेनास्ते इति हि भवदीया प्रक्रिया ॥

टी० "साक्षि"ति, निषेधानुवृत्त्योर्विषयभागं दर्शयति "तदुच्यत" इत्यादिना, अहम्मामित्युभयोरपि पदयोर्श्लिष्टविषयतैवोचिता नीतिभेदप्रसङ्गादित्यत्राह "अहम्मामिति, विधिनिषेधयोरेकविषयत्वे व्याघातः स्यादिति तन्निवृत्त्यर्थं विषयविषयिविभागः कार्य इत्यर्थः । विषयविभागविपर्यासशङ्कायां विषयविभागमुचितं दर्शयति "जागरिते"ति, यत्सामग्र्याभावात्तदानीव प्रकाशते तदेव निषेधविषयः, यदन्या²नपेक्षं स्वयं प्रकाशते देवानुवर्त्तन इति अप्रकाशमानस्यानुवृत्तिः प्रकाशमानस्य निषेधश्चानुपपन्नावित्यर्थः । एवं विषयविभागानुगुणमनुभवं दर्शयति "अत्रे"ति, शब्दप्रयोगो विवक्षावशादीदृशं सर्वं वदति वा? तदेकदेशं वदति वा? न किंचिदपि वदति वा? अतः शब्दप्रयोगे वैचित्र्येऽप्यनुभव एकरूपः स पुनरेवंविषयविभागानुगुण एवेत्यर्थः । अनेनाहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति श्रुतिवाक्यस्थोऽयंशब्दो व्याख्यातः । परमतेनेममर्थमुपपादयति किंचेत्यादिना साक्षित्वेनात्माऽभ्युपगम्येत ततः किमित्यत्राह

सू० साक्षित्वं च साक्षाज्ज्ञातृत्वमेव, न ह्यजानतः साक्षित्वं, ज्ञातैव लोकवेदयोः साक्षीति व्यपदिश्यते न ज्ञानमात्रं स्मरति च भगवान् पाणिनिः "साक्षाद् द्रष्टरि संज्ञाया"मिति साक्षाज् ज्ञातर्येव साक्षिशब्दं, स चायं साक्षी जानामीति प्रतीयमानो ऽस्मदर्थ एवेति कुतस्तदानीमहमर्थो न प्रती-

१ स्वाप्यावस्थाप्रसिद्धइतिद्राविडपाठः ।
२ यदनन्यापेक्षमिति द्राविडपाठः ।

येत आत्मने स्वयमवभासमानो ऽहमित्येवावभासते इति स्वापाद्यवस्थास्वप्यात्मा प्रकाशमानो ऽहमित्येवावभासत इति सिद्धम्। यत्तु मोक्षदशायामहमर्थो नानुवर्त्तत इति तदपेशलम् ॥

टी० "साक्षित्वं चे"ति, साक्षात् ज्ञातृत्वं साक्षात्काररूपज्ञानाश्रयत्वम् असाक्षात्कर्त्तरि साक्षिशब्दः प्रयुक्तश्चेदौपचारिकः। उपपादयति "न ह्री"ति, अजानतः—अज्ञातुरित्यर्थः। कुत इत्यत्राह "ज्ञातैव ह्री"ति, शब्दप्रयोगनियामकं लक्षणमाह "स्मरती"ति, साक्षिशब्दं स्मरतीत्यन्वयः। ततः किमहमर्थस्यात्मत्व? इत्यत्राह "स चे"ति, अस्मिन्नर्थे अनुमानमुत्तरत्र विस्तरेण विवक्षितम्। अत्र सङ्ग्रहेणाह "आत्मने स्वयमि"ति, आत्मने स्वयमेव भासमानोऽहमित्येवावभासत इति व्याप्तिवचनं, जाग्रदात्मा सपक्षः स्वस्मै प्रकाशमानत्वादिति हेतुः। निगमयति "स्वापादौ"ति, अविशदावभासस्य सर्वाभ्युपगतत्वाच्छ्रुतिस्वारस्यात्परामर्शस्वारस्यात्साक्षित्वोपपत्तेः प्रत्यक्त्वसिद्धेश्च सुषुप्तावात्मा अहमिति स्फुरतीत्युक्तं भवति। अथ मुक्तावहमर्थाननुवृत्तिमनूद्य दूषयति यत्त्वित्यादिना, तुरप्येगौरवविशेषे अपेशलम्। असाध्वित्यर्थः। कुत इत्यत्राह—

मू० तथा सत्यात्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात्, न चाहमर्थो धर्ममात्रं येन तद्विगमे ऽप्यविद्यानिवृत्ताविव स्वरूपमवतिष्ठेत प्रत्युत स्वरूपमेवाहमर्थ आत्मनः, ज्ञानं तु तस्य धर्मः, अहं जानामि ज्ञानं मे जातमिति चाहमर्थधर्मतया ज्ञानप्रतीतेरेव, अपि च यः परमार्थतो भ्रान्त्या वा ऽऽध्यात्मिकादिदुःखैर्दुःखितयाऽऽत्मानमनुसंधत्ते अहं दुःखीति,

टी० "मया सती"ति, सौगतान् ज्ञानसंतत्युच्छेदम्मोक्षं वदतः स्वरूपनाशस्यापुरुषार्थत्वेन दूषयता त्वया शब्दान्तरेण स्वरूपनाश एवोक्तः स्यादित्यर्थः, नैयायिकाद्युक्ते मोक्षेऽप्यपुरुषार्थत्वं तुल्यं दुःखनिवृत्तिः सुखप्राप्तिश्चोभयं पुरुषार्थः, अत्रापुरुषार्थभूत दुःखाभावात्पुरुषार्थान्वयः सुखाभावादपुरुषार्थान्वयश्चेति मुक्तेः पुरुषार्थापुरुषार्थमिश्रत्वं हि स्यात् अहमर्थो ह्यारोपितः अतस्तद्विगमे स्वरूपनाशो न प्रसजेदित्यत्राह "न चे"ति, कुत इत्यत्राह "अहमि"ति, अहमर्थधर्मतया ज्ञानप्रतीतेरेव पूर्वोक्तहेतोरेवेत्यर्थः। अहमर्थात्मत्वसमर्थनोपजीवनेन स्वरूपनाशप्रसङ्ग उक्तः। एवं धर्मधर्मिभावेन प्रतीत्या अनुवृत्तिरुपपादिता । अथ श्रुत्यर्थापत्तिमाह "अपि चेत्यादिना, पूर्वमहमर्थस्यात्मत्वसमर्थनाय श्रुत्यर्थापत्तिरुक्ता इदानीमहमर्थस्य मुक्तावनुवृत्त्युपपादनाय तामेव श्रुत्यार्थापत्तिं विस्तरेणाह यः स्वात्मानं दुःखिनमनुसंधत्ते स एव तन्निवृत्तिसाधने प्रवर्तते स चाहमर्थ एव दुःखित्वं भ्रान्तसिद्धमिति चेत् यः स्वात्मानं भ्रमवन्तमनुसंधत्ते स एव भ्रमनिवृत्तिसाधने प्रवर्तते स चाहमर्थः, द्विचन्द्रज्ञानादिभ्रान्तिमतोऽपि स्वभ्रमनिवृत्तिरेवापेक्षिता न तु स्वविनाशः, अतोऽहमर्थविनाशोऽपुरुषार्थ इत्यभिप्रायेण परमार्थतो भ्रान्त्या वेत्युक्तम् । अनुसंधत्त इत्यनेन निरस्ताखिलदुःखोऽहमित्यत्राप्येक्षितं वक्तव्यमुक्तं निरस्तेत्यादिश्लोकं विवृणोति—

मू० सर्वमेतत् दुःखजातमपुनर्भवमपोह्य कथमहमनाकुलः स्वस्थो भवेयमित्युत्पन्नमोक्षरागः स एव तत्साधने प्रवर्तते, स साधनानुष्ठानेन यद्यहमेव न भविष्यामीत्यवगच्छेदपसर्पेदेवासौ मोक्षकथाप्रस्तावात् ततश्चाधिकारिविरहादेव सर्वं मोक्षशास्त्रमप्रमाणं स्यात्, अहमुपलक्षितं प्रकाशमात्रमपवर्गेऽवतिष्ठत इति चेत् किमनेन मयि विनष्टेऽपि किमपि प्रकाशमात्रमवतिष्ठत इति मत्वा न

च्चि कश्चिद्बुद्धिपूर्वकारी प्रयतते अतोऽहमर्थस्यैव आन्तरतया सिद्धः प्रत्यगात्मत्वम् ॥

टी० सर्वमेतदित्यादिना, अनाकुलः स्वस्थो भवेयमिति अपुनर्भवमयोक्षेति तत्फलितमुक्तम् अनाकुल इति आगामिदुःखशङ्कया मनःक्षोभ आकुलत्वं तदभावो ऽनाकुलत्वंस्वस्थः स्वस्मिन् स्थितः—यथावस्थितस्वात्मानुभववः अनन्तानन्दभागिति फलितं स एव पूर्वं दुःखित एव उत्पन्नानिवृत्तीष्टप्राप्त्यभिलाषस्स एवेत्यर्थः श्रवणादाविति पूर्वमुक्तत्वादिहतत्साधनत्वेोक्तादुक्तम् अपवर्ग्यदसावित्यदिवन्येन फलितमर्थमाह "तत्तश्चाधिकारी"ति' श्रवणाद्यायामसाध्यस्य शास्त्रस्यापुरुषार्थपर्यवसायित्वे श्रवणाद्यधिकारिविरहात् श्रवणादिसापेक्षस्य शास्त्रस्यप्रमिति जनकत्वलक्षणं प्रामाण्यं न स्यादित्यर्थः मयिनष्टेपीत्येतद्विवृणोति अहमुपलक्षितमित्यादिना बुद्धिपूर्वकात्यनेन कस्यापीति पदं विवृतं श्रुत्यार्थापत्तिं निगमयति "अत" इति, अहमर्थविगमे ज्ञप्तिसिद्धिरप्यनुसंधेया अनुमानह

मू० स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते स्वस्मै प्रकाशमानत्वात् यो यः स्वस्मै प्रकाशते स सर्वो ऽहमित्येव प्रकाशते यथा तथा ऽवभासमानत्वेन उभयवादिसिद्धः संसार्यात्मा, यः पुनरहमिति न चकास्ति नासौ स्वस्मै प्रकाशते यथा घटादिः, स्वस्मै प्रकाशते तथा चायं मुक्तात्मा स तस्मादहमित्येव प्रकाशते न चाहमिति प्रकाशमानत्वेन तस्याज्ञत्वसंसारित्वादिप्रसङ्गः, मोक्षविरोधादज्ञत्वाद्यहेतुत्वाच्चाहंप्रत्ययस्य ॥

टी० 'न चे'ति, किंचानुमान मप्यस्तीति चार्थः। अन्वयव्याप्तिमाह "यो य" इति, तथाऽवभासमानत्वेन स्वस्मै प्रकाशमानत्वेन व्यतिरेकव्याप्तिं दर्शयति 'पुनरि'ति, उपनयमाह "स्वस्मा" इति, निगमनमाह "तस्मादि"ति, स्वस्मै प्रकाशमानत्वं हेतुः, अहमिति व्यवहारार्हत्वं साध्यमिति न साध्याविशिष्टिता, अहमित्येव प्रकाशते अहमिति व्यवहारार्हं प्रकाशत इत्यर्थः। साध्यविपरीतविशेषसाधकतया विशेषविरुद्धत्वं शङ्कते "न चे"ति, आदिशब्दाद्रागद्वेषदुःखादि विवक्षितम्।

ननु व्यापकं हि प्रसञ्जनीयम्

न च कार्यं कारणस्य व्यापकं, सत्यं कारणसजातीयस्य तु कदाचित्कार्यप्रसक्तिर्व्यापिका अतोऽहं प्रत्ययेनात्मनोऽज्ञत्वादिप्रसञ्जनमज्ञत्वादिप्रसक्तिः श्रुतिविरुद्धेत्याह 'मोक्ष'ति, "न पश्यो मृत्युं पश्यति न रोगं नोत दुःखता"मिति हि श्रुतिः, अतो यथा सहदर्शनमात्रेण पर्वते भाष्कादिप्रसक्तिः प्रत्यक्षबाधाद्वार्यते तद्वत्कालात्ययापदेश इत्यर्थः। सोपाधिकत्वमाह 'अज्ञत्वादौ'ति, संसारित्वाहमर्थत्वयोः सहदर्शनमात्रेण मुक्तावपि संसारित्वादिप्रसङ्गश्चेदनुभवस्यापि तत्सहभावदर्शनात्त्वत्पक्षेऽपि मुक्तौ संसारित्वप्रसङ्गः तन्मोक्षयाहिप्रमाणविरोधात्कालात्ययापदिष्टः संसारित्वादेरनुभवप्रयुक्तत्वाभावात् सोपाधिकत्वं चेति चेत्तदस्मत्पक्षेऽपि समानमित्यभिप्रायः अनेनाहमिति भासमानत्वं स्वस्मै भासमात्वप्रयुक्तमपित्वप्रयुक्तमिति हेतोस्सोपाधिकत्वञ्च श्रुतिबलेन व्याप्तेर्भग्नतया सहदर्शनमात्रमेवेति परिहृतं भवति। एवं कालात्ययापदेशसोपाधिकत्वे उक्ते तत्र सोपाधिकत्वमुपपादयितुमज्ञानत्वेन संभावितशिरांसि विकल्पयति—

(शेषमग्रे)

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 74. Vol. IX.)

मू॰ [a] निरंशे वस्तुनि कः स्फुटत्वावभासः ? (१)। यद्येकार्थ(२)समवायिभिर्भूयोभिः सहोपलम्भः, स ज्ञानत्वादिवत्साक्षात्त्वेऽपि तर्ह्यस्ति। ज्ञानादित्वे न विवादः साक्षात्त्वे त्व(३)ति विशेषो वाच्यः। [b] दर्शनकृतो हि विवादो न मात्सर्येण वाङ्मात्रेण वा, किन्तु तत्त्वाभिमानादेव। [c] प्रत्यक्षार्थधर्म्मिकायां चाऽनुमायां साक्षात्त्वपरोक्षत्वसङ्करो दुर्वारः। * परोक्षत्वं न जातिः किन्तु साक्षात्त्वमेव तथा(४), केवलं साक्षात्त्वाभावः परोक्षत्वम् ? *—इति चेन्न, अस्यार्थस्य विनिगन्तव्यत्वापत्तेः(५), [d] सर्वज्ञमनुमन्यमानस्य च मते दृष्टलिङ्गादेरीशस्य लिङ्गादिकतद्भावपरोक्षत्वेनापि विरोधः(६)। * लिङ्गादिधीजन्यत्वमनुमित्यादौ प्रयोजकम् ? *—इति चेन्न, साक्षात्त्वेऽपि तर्हीन्द्रियसन्निकर्षादिजत्वमिति साक्षादपि(७). सा न स्यात्। व्यञ्जकोपाधिनियता च जातिर-

(१) "स्फुटावभासः"—इति तु विद्यासागरसंमतः पाठः।

(२) एकस्मिन् ज्ञानरूपेऽर्थेऽपरोक्षत्वेन सह समवायिनो ये ज्ञानत्वानुभवत्वप्रमात्वादयो भूयांसो धर्मास्तैस्सहोपलम्भ इत्यर्थः।

(३) "साक्षात्त्वे तु"—इत्यतोऽपि विवाद इत्यध्याहरणीयम्।

(४) तथा=जातित्वेन संमतम्।

(५) साक्षात्त्वं न जातिः किन्तु परोक्षत्वमेव, केवलं परोक्षत्वाभावः साक्षात्त्वमिति वैपरीत्येनापि वक्तुं शक्यत्वादयमर्थस्तावद्विनिगमनाविरहितत्वेनास्यविनिगतः, स च विनिगमनां प्रदर्श्यत्वया विनिगन्तव्य इत्यर्थः।

(६) विरोधः=साङ्कर्य्यम्। तथाहि ईश्वरज्ञानीयत्वेनेश्वरज्ञानेऽपरोक्षत्वं लिङ्गादिप्रयुक्तत्वेन च परोक्षत्वमिति।

(७) साक्षादपि=साक्षात्कारिज्ञानात्मिकापि।

ष्यते, न च तद्वच, [e] उक्तप्रकारबाधात् । * [f] न च व्यञ्जकानियमानभ्युपगत्या न तद्वचोपगम्यमिति वाच्यम् *,

टी० ॥ "[a] निरंशे" इति । अखण्डजाताविन्यर्थः । उपाधौ घटकाद्यनिश्चये क्वचिदस्फुटत्वमपि संभाव्यते इति भावः । गोत्वादेर्दूरत्वादिदोषादग्रहे सन्देहोऽपि स्याद्दान्तरे तु ज्ञाने सोऽपि नास्तीति हृदयम् ॥ [b] "दर्शनकृत" इति । शास्त्रकृतोऽनुभवकृतो वा । तथाच शास्त्रकाराणां साक्षात्त्वे न वैमत्यं(१) प्रतीतिकलहो वेत्यर्थः ॥ साक्षात्त्वपरोक्षत्वयोः साङ्कर्य्यं स्यान्नान्तरमाह—। [c] "प्रत्यक्ष" ति । "परोक्षत्वसङ्कर"—इत्युपलक्षणम्, अनुमितित्वसङ्करोऽपि द्रष्टव्यः ॥ दृष्टलिङ्गस्येश्वरस्य ज्ञानं परोक्षं भवितुमर्हति नत्वपरोक्षमिति तत्र परोक्षापरोक्षत्वविरोध इत्याह—। [d] "सर्वज्ञमि" ति । धर्मि (२)ग्राहकमानाद्यदि तत्र साक्षात्त्वं तदा तत एवानुमितित्वमपि किं न स्यात्? प्रवृत्तेरुपादानगोचरापरोक्षज्ञानजन्यत्ववदिष्टसाधनतानुमितिजन्यत्वव्याप्तत्वादिति भावः ॥ [e] "उक्तप्रकार" ति । इन्द्रियजत्वादिप्रकारेत्यर्थः ॥ [f] "नचे" ति । जातौ व्यञ्जकानियमानभ्युपगमात्प्रकृतेपि स नाभ्युपगम्यते इति नच वाच्यमित्यर्थः ॥

मू० [a] किं मया दृष्टं तथा किं वा केनचित्कथितमिति संशयानुपपत्तेः । [b] प्राग्भूतायां स्मर्य्यमाणायां तद्बुद्धौ त्वन्मते मनसा ज्ञानरूपया प्रत्यासत्त्या प्रत्यक्षीक्रियमाणायां साक्षात्त्वाऽग्रहो विना व्यञ्जकाभावं कथं स्यात्? । [c] अर्थधर्मस्य साक्षात्त्वमिति स्वप्रकाशवादे निरास्यम्(३) । * [d] तथाप्यवा-

(१) 'स्यादि'ति शेषः । यद्वा साक्षात्कारित्वेन रूपेण साक्षात्कारिणि ज्ञाने वैमत्यं भवति स च विशेषाभावान्न स्यादित्यर्थः ।

(२) धर्मि=ईश्वरज्ञानम् । तद्ग्राहकं मानं च—ईश्वरस्य कार्य्यानुकूला प्रवृत्तिर्ज्ञानसाध्या प्रवृत्तित्वादस्मत्प्रवृत्तिवदिति ।

(३) ईश्वराभिसन्धेः स्वप्रकाशवादे निरास्यमिति त्वहं सम्भावयामि, अत एव च कर्तृकर्मविरोधखण्डनवेलायामिहैव मूले उक्तं "शेषं चेश्वराभिसन्धौ स्वप्रकाशवादे निर्वक्ष्याम इति । विद्यासागरास्तु कर्मलक्षणखण्डनेन तत्खण्डितमित्येव व्याचक्षते तदनु-

धितसाक्षात्त्वबुद्धिव्यवहारबलादन्ततः पदार्थान्तर(१)मपि साक्षात्त्वमननुमत्य न निस्तारोऽस्ति, भ्रान्ते(२)रप्यभ्रान्तिपूर्वकत्वात्? *—इति चेन्न, [e] तस्या(३)पि साक्षाद्ग्रहे क्वचिदपि तद्विवादो न स्यादित्यादिदोषसाम्यात्। अनुमानादिवेद्यत्वे च लिङ्गाद्यनुपपत्तिः; [f] क्व च व्याप्त्यादिग्रह इत्यादिदुरुत्तरपरम्परैव(४) स्यात्। [g] सप्तपदार्थी(५)नियमसाधनानि च कथं परिपन्थीनि न स्फुरन्ति। *[h] लिङ्गादिजत्वाभावसमुदायवती धीः साक्षात्? *—इति चेन्न, परोक्षविषयसंशयादावतिव्याप्तेः। * [i] ईदृशी प्रमा तथा? *—इति चेत्, [j] प्रत्यक्षभ्रमाऽव्याप्तेः। * अनुमानादिव्यवच्छेद्यतत्तदसाधारणकारणाऽजनितधीः साक्षात्? *—इति चेन्न।

टी० ॥ [a] "किं मये"ति। धर्मिदर्शनमात्रादेव साक्षात्त्वदर्शनात्संशयो न स्यादुत्पन्नो वा संशयो न निवर्त्तेतेत्यर्थः ॥ एतदेव स्पष्टयति—। [b] "प्रागि"ति ॥ "अनुगतसाक्षात्त्वकल्पनैव श्रेयसितरे"ति यदुक्तं तत्राह—। [c] "अर्थधर्म" इति ॥ [d] "तथापी"ति। नहि वस्त्वन्तरेण प्रतीतिव्यवहारावित्यर्थः ॥ प्रतीतिबलायातस्यापि दोषदर्शनात्त्याग एवेत्याह—। [e] "तस्यापी"ति।

सार्थ्यपि एव केषुचित्पुस्तकेषु निरस्तमिति पाठो दृश्यते। यद्वा, विद्यासागरस्यापि मदुक्तार्थे तात्पर्यम्।

(१) पदार्थान्तरम्=द्रव्यादिसप्तपदार्थातिरिक्तपदार्थम्।

(२) ननु भ्रान्तिसिद्धं साक्षात्त्वमित्यत आह—भ्रान्तेरिति।

(३) तस्य=अवश्याभ्युपगम्यस्याऽनिर्णीतस्य साक्षात्त्वस्य। साक्षाद्ग्रहे=साक्षात्कारिज्ञानेन ग्रहे इत्यर्थः।

(४) प्रथमतः साक्षात्त्वे मानाभावदोषो दुरुत्तरोऽनुमानप्रामाण्याङ्गीकारेऽपि लिङ्गानुपपत्तिर्दुरुत्तरा, इन्द्रियार्थसन्निकर्षजत्वादिलिङ्गस्वीकारेऽपि लिङ्गलिङ्गिनोर्व्याप्तिग्रहस्थलाभावो दुरुत्तर इति दुरुत्तरदोषपरम्परैव स्यादित्यर्थः।

(५) सप्तपदार्थानां समाहारः सप्तपदार्थी तन्नियमसाधकानीत्यर्थः।

"लिङ्गाऽऽदी"त्यादिपदात्सङ्केता(१)दिसङ्ग्रहः ॥ [f] "क्व चे"ति । अनिर्णीताश्रयत्वात्साक्षात्त्वस्येत्यर्थः ॥ साक्षात्त्वस्य परिगणितपदार्थानन्तर्भावे दोषमाह—। [g] "सप्ते"ति । नियमसाधनानि परिशेषानुमानानि ॥ [h] "लिङ्गादी"ति । यत्र लिङ्गशब्दसादृश्यजन्यत्वं नास्ति तज्ज्ञानं प्रत्यक्षमित्यर्थः ॥ अपरोक्षे दृष्टापत्तिमाशङ्क्य "परोक्षे"ति ॥ [i] "इंदृशी"ति । लिङ्गादिजन्यत्वाभाववतीत्यर्थः ॥ साक्षात्कारिज्ञानलक्षणमभिप्रेत्याह—। [j] "प्रत्यक्षे"ति । अनुमानादि च तद्व्यवच्छेद्यं चेति कर्मधारयः । तेनानुमानादेर्व्यवच्छेद्यस्य यदसाधारणं लिङ्गादि कारणं तदजनिता धीः साक्षाद्धीरित्यर्थः ॥

मू० [a] एवं हि प्रत्यक्षतत्तदपरव्यतिरिक्ता(२)धीरनुमानादिरिति वैपरीत्यमेव कुतो न स्यादित्यविनिगम्यत्वं स्यात् । [b] तेषु व्यवच्छेद्येषेकद्व्यादिपरिहाराय व्यवच्छेद्यहेत्वजनितत्वेनापि साक्षात्त्ववक्तव्यतयानुगतबुद्ध्यन्तरापत्तेः । * [c] व्यवहारे सति निमित्तानुसरणं, नतु निमित्तानुसारेण व्यवहारः? *—इति चेन्न, [d] निमित्तस्या(३)नत्यापत्तिद्वारस्यैव कल्प्यत्वात् । [e] तज्जनितत्वाभावो हि तेनैव रूपेणानुगतव्यवहारानुगतप्रत्ययावाद्ध्यान्न त्वन्येनापि । [f] तथात्वे यावत्परिदृष्टव्यक्तिविशेषान्यत्वेन व्यवहारोपपत्तौ गोत्वाद्युच्छेदप्रसङ्गः । तस्मात्—

[g] विधिजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थनः ।
[h] नैवं चेदपराद्धं ते किमन्यापोहवादिना ॥ ४१ ॥

(१) सङ्केतः=अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केताधुनिकसङ्केतयोरन्यतरः सङ्केतः शक्तिरिति यावत् ।

(२) प्रत्यक्षं च तत्तद् (शब्दोपमानादि) अपरं च तद्व्यतिरिक्ता धीरित्यर्थः ।

(३) "निमित्तस्यानत्यापत्तिद्वारस्ये"ति व्यधिकरणे षष्ठी । तथाचायमर्थः—निमित्तं चेदनतिप्रसक्तमस्ति तर्ह्यतिप्रसङ्गाऽनापादकस्य तस्य द्वारस्य (कारणस्या)ऽपि कस्यचित् कल्पनाऽऽवश्यकीति । यद्वा कल्प्यत्वात्=व्यवहारहेतुत्वेन कल्पयितुमुचितत्वादित्यर्थः । केषुचित्पुस्तकेषु तु "कल्प्यमानत्वादि"ति पाठस्तदपेक्षया "कल्प्यत्वादि"ति वरः पाठः ।

Digitized by Google

टी० ॥ [a] "एवं ही"ति । प्रकारान्तरेण तदशक्यनिर्वचनमनुमानाद्यपि प्रत्यक्षादिकारणाजन्यत्वेन निर्वाच्यमित्यन्योन्याश्रय(१) इत्यर्थः ॥ दोषान्तरमाह—। [b] "तेष्वि"ति । इन्द्रियाद्यजन्यतयानुमित्यादिषु लिङ्गाद्यजन्यतयोपमित्यादिषु साक्षात्त्वव(२)त्तत्तदुपाधिकल्पनाप्रसङ्ग इत्यर्थः ॥ ननु यथा साक्षात्त्वं व्यवह्रियते तथैव नानुमानादिगत एको धर्मस्तत्कथं कल्पनीयः स्यादित्याह—। [c] "व्यवहारे" इति ॥ यथा साक्षात्त्वकल्पनानिमित्तमनुमानादिकारणाजन्यत्वमनतिप्रसक्तं तथानुमानादावपीन्द्रियाद्यजन्यत्वमपीति निमित्तसाम्यात्कल्पना स्यादेवेत्याह—। [d] "निमित्तस्ये"ति ॥ दोषान्तरमाह—। [e] "तज्जनितत्वे"ति । लिङ्गाद्यजन्यत्वेनैव साक्षात्कारिविज्ञानेष्वनुगतप्रत्ययः स्यान्न तु साक्षात्त्वेनापीत्यर्थः ॥ [f] "तथात्वे" इति । गवाकारानुगतप्रत्ययोपि केसरादिमद्व्यक्तिविशेषान्यत्वेनैव स्यादित्यर्थः । यद्यपीत एवानिष्टप्रसङ्गात्साक्षात्त्वमनुभूयमानं दुरपलापं तथापि व्यतिरेकस्य न विधिव्यवहारनिर्वाहकत्वमिति भावः ॥ एतदेवाह—। [g] "विधिज" इति । व्यतिरेकेणासमर्थनं यस्येत्यर्थः ॥ [h] "नैवमि"ति । तथाचाऽगोव्यावृत्त्यैव गवाकारानुगतधीरस्तु किं गोत्वेनेत्यर्थः ॥

मू० [a] शब्दानुमानोपमानजप्रमितिव्यतिरिक्तत्वे सति प्रमितित्वं प्रत्यक्षलक्षणमभिधाय यः कोपि न त्रपते(३) स प्रष्टव्यः, किं प्रत्येकमिदं लक्षणं? मिलितं वा?। नाद्यः, [b] प्रत्येकं व्यभिचारात्। द्वितीये, किं मिलितानां निषेधः? उत निषेधानां मिलितत्वम्?। नाद्यः, प्रत्येकमेव व्यभिचारात्। [c] नहि

(१) यद्यपि मूले न प्रत्यक्षादिकारणाजन्यत्वमुक्तं किन्तु प्रत्यक्षादिव्यतिरिक्तधीत्वमेव, न वाऽन्योन्याश्रयो दोष उक्तः किन्त्वर्थाविनियम्यत्वमेव, तथापि मूलस्य पर्यवसितार्थमादायेत्थं व्याख्यानं द्रष्टव्यम् ।

(२) प्रत्यक्षे साक्षात्त्वमखण्डोपाधिरनुमित्यादौ त्वनुमितित्वादि नाखण्डोपाधिः किन्त्विन्द्रियाद्यजन्यत्वमात्रं सखण्डोपाधिरिति सिद्धान्तः. तत्रैवं साक्षात्त्वनिरुक्तौ तत्राप्यनुमितित्वाद्यखण्डोपाधिकल्पना प्रसज्येत, साम्यादित्यर्थः ।

(३) न त्रपते=न लज्जते ।

प्रत्येकमनुमित्यादौ मिलितत्वरूपसम्भवः। नापि द्वितीयः, [d] मिलितास्वनुमित्यादिषु निषेधमेलक(१)संभवेऽपि प्रत्यक्षत्वानभ्युपगमात्। *[e] न बह्वाश्रयाणामुक्तनिषेधानां लक्षणत्वमपि त्वेकाश्रयाणाम्? *—इति चेन्न, [f] समुदायिभेदेऽपि समुदायस्यानुमित्यादिवदेकत्वोपचारबीजाविशेषाभ्युपगम इति चि वक्ष्यते(२)। *[g] असमुदायत्वे(३) सतीत्यपि विवक्षितम्? *—इति चेन्न, [h] समुदायत्वविशिष्टे एवांशतः स्वात्मनि वृत्तिविरोधभयेनासमुदायत्वस्यै(४)ष्टव्यत्वेन तादृशि प्रसङ्गो दुर्वारः। *[i] ज्ञानस्यैवं विवक्षितम्? *—इति चेन्न, [j] विशिष्टस्यापि ज्ञानस्य ज्ञानत्वादेव।

टी० ॥ ननु प्रतीतित्वं प्रतीत्यन्तरभिन्नत्वविशिष्टं साक्षात्त्वव्यवहारहेतुरिति विधित्वमेवेत्याशङ्क्याह—। [a] "शब्दे"ति। प्रत्येकमिलितदोषाऽज्ञानमेव त्रपाहेतुः, व्यतिरेकविशिष्टस्योपाधेर्विधित्वाभिमानो (५)वा ॥ [b] "प्रत्येकमि"ति। अनुमित्यादिप्रत्येकान्योन्याभाववत्त्वे सति प्रतीतित्वस्यानुमित्यादिप्रत्येकातिव्यापकत्वमित्यर्थः ॥ [c] "नह्यो"ति अनुमित्यादिसमुदायान्योन्याभावस्य प्रत्येकगतत्वेनातिव्याप्तिरित्यर्थः ॥ [d] "मिलिते"ति। अनुमित्यादित्रयमेलके त्रितयान्योन्याभावमेलकसत्त्वे नातिव्याप्तिरित्यर्थः ॥ [e] "न बह्वाश्रयाणामि"ति। मिलिता अप्यनुमित्यादयो बहवः प्रत्यक्षं त्वेकोपाधिसङ्गृहीतमेकम्, एकनिष्ठत्वं लक्षणस्य विवक्षितमित्यर्थः ॥ [f] "समुदायी"-

---

(१) मेलकम्=मेलनम्।

(२) प[illegible]प्रमितित्वस्यानुमित्यादिषु मिलितास्वपि भावादित्यग्रिमग्रन्थेन वक्ष्यते इत्यर्थः।

(३) असमुदायत्वे सति=समुदायत्वानाश्रयत्वे सति।

(४) असमुदायत्वस्य=समुदायत्वानाश्रयत्वस्य।

(५) वस्तुतो व्यतिरेकविशिष्टस्योपाधेरप्यंशतो व्यतिरेकरूपतैवेत्यत उक्तमभिमान इति।

ति । समुदायिनोऽनुमित्यादयो यद्यपि बहवस्तथापि तत्समुदाय एक एवेत्येकाश्रयत्वादतिव्याप्तिरित्यर्थः । अनुमितिषु यथा लिङ्गादिजत्वमेकमु(१)पचारबीजमेवमनुमित्यादित्रये प्रत्यक्षभिन्नत्वमैक्यनिबन्धनमस्त्येवेति भावः ॥ [g] "असमुदायत्वे" इति । तथाच नानुमित्यादिमेलकेऽतिव्याप्ति,स्तस्य समुदायत्वादित्यर्थः ॥ [h] "समुदायत्वे"ति । एवमप्यनुमित्यादिमेलकेऽतिव्याप्तिस्तस्य समुदायत्वविशिष्टस्यासमुदायस्यात्माश्रयभयेन स्वीकार्यत्वादित्यर्थः ॥ [i] "ज्ञानस्ये"ति । अनुमित्यादिमेलकस्य ज्ञानत्वाभावान्नातिव्याप्तिरित्यर्थः ॥ [j] "विशिष्टस्ये"ति । समुदायत्वविशिष्टानुमित्यादेरपि ज्ञानत्वादतिव्याप्तिरेवेत्यर्थः ॥

मू० [a] 'एके' त च किमाश्रयव्यक्त्यभेदो विवक्षितः ?–१ उताऽभिन्नजातीयता ?–२ उतैकोपाधिकता ?–३ उतैक(२)सङ्ख्यायोगिता ?–४ उत द्व्यादिसङ्ख्यायोगाभावः ?–५ । [b] आद्ये तद्विशिष्टस्या(३)व्यापकतादोषः, [c] व्यक्त्यात्मनोऽभेदस्य व्यावृत्तत्वात् । [d] धर्मिणा च लक्षणस्य विशेषणेऽलक्ष्यधर्मत्वं धर्मस्य स्यात्, स्वस्यैव(४)स्वधर्मत्वानुपपत्तेः । [e] आश्रयाभेदस्योपलक्षणत्वे प्रागुक्तदोषः । द्वितीये तदेवाभिन्नजातीयत्वं लक्षणमस्तु, अवश्यन्तया प्राथम्येन प्रतीयमानत्वात् । न तृतीयः, [f] परोक्षप्रमितित्वस्यानुमित्यादिषु मिलितेष्वपि भावात् । नापि चतुर्थः, वैशेषिकपक्षे [g] गुणतया तदभावात् ।

(१) "एकतोपचारबीजमि"ति तु चित्तः पाठः ।

(२) एकत्वादिशब्दा भावप्रधाननिर्देशस्त्वेनैकत्वद्वित्वादिसङ्ख्यापराः ।

(३) तद्विशिष्टस्य=आश्रयव्यक्त्यभेदघटितलक्षणस्येत्यर्थः ।

(४) एकलक्ष्याश्रयत्वमित्यत्र विशेषणविधयैकव्यक्तिरूपलक्ष्यस्यापि लक्षणे प्रवेशात्पुनस्तस्य लक्षणात्मकधर्मस्य लक्ष्यवृत्तिता न स्यात्, स्वस्य स्ववृत्तितानुपपत्तेरित्यर्थः क्वचित्"धर्मस्ये"त्यस्य स्थाने लक्षणस्येत्येव पाठः ।

Digitized by Google

टी० ॥ एकाश्रितानुमित्यादिनिषेधमेलको लक्षणमिति यदुक्तं तत्रैकत्वं विकल्पयति—। [a]"एकेति चे"ति ॥ [b]"आद्ये" इति । एवं सत्येकस्या एव प्रत्यक्षव्यक्तेः सङ्ग्रहे लक्षणस्य व्यक्त्यन्तराव्यापकत्वमित्यर्थः ॥ [c]"व्यक्त्यात्मन" इति । एकत्वस्य व्यक्तिस्वरूपाभेदस्य व्यावृत्तत्वादित्यर्थः ॥ एकलक्ष्याश्रयत्वं च लक्षणविशेषणं चेत्तदा लक्ष्यवृत्तिता लक्षणस्य न स्यादित्याह—। [d]"धर्मिणे"ति । एकाश्रयत्वं लक्षणे न विशेषणं येनालक्ष्यधर्मता स्यात् किन्तूपलक्षणमिति न स्ववृत्तितेत्याशङ्क्याह—। [e]"आश्रये"ति । अनुमित्याद्ययोप्याश्रयाभेदोपलक्षिता इति प्रागुक्तातिव्याप्तिरित्यर्थः ॥ एकोपाध्यवच्छिन्नाश्रयत्वं यदि लक्षणे विशेषणं तदा परोक्षप्रमितित्वरूपैकोपाध्यवच्छिन्नानुमित्यादिमेलकातिव्याप्तिरेवेत्याह—। [f]"परोक्षे"ति । प्रत्यक्षमात्रवृत्त्युपाधिविवक्षायां तेनैवान्यथा(¹)सिद्धिरिति भावः ॥ [g]"गुणतये"ति । अनुमित्यादिव्यतिरेकमेलकस्यैकत्वसङ्ख्यासामानाधिकरण्यं प्रत्यक्षे गुणे न सम्भवतीत्यर्थः ॥

मू० [a]भावे वाऽनुमित्यादित्रयवृत्तीनां त्रयाणामप्यभावानामेकत्वसङ्ख्यासामानाधिकरण्यसम्भवात्, मिलितानां(²)मेकसमुदायापेक्षया तथात्वात् । नापि पञ्चमः, [b]वैशेषिकमतानुसारेणानुमित्यादित्रयेपि तदभावस्य तुल्यत्वात् । [c]अतदनुसारेण (³)प्रत्यक्षव्यक्तिष्वपि द्व्यादिसङ्ख्यायोगात् । * [d]तथापि नैकस्यां प्रत्यक्षव्यक्तौ द्व्यादिसङ्ख्यापरिसमाप्तिः(⁴), द्व्यादिसङ्ख्यापरिसमाप्त्यभावश्च तदभावशब्देन विवक्षितः ? *— इति चेन्न, का हि परिसमाप्तिर्यैकस्यां व्यक्तौ नास्ती-

(१) प्रत्यक्षगणस्येति शेषः ।

(२) मिलितानां त्रयाणामभावानामेकसमुदायापेक्षया तथात्वात्=एकत्वसङ्ख्यासमानाधिकरणत्वादित्यर्थः ।

(३) अतदनुसारेण=वैशेषिकमताननुसारेण । "द्व्यादिसङ्ख्यायोगात्"—इत्यतोऽग्रे 'न तदभावः इत्यव्याप्तिरसम्भवो वा'—इति शेषः ।

(४) परिसमाप्तिः=पर्य्याप्तिः सर्वत्र प्रकृते ग्राह्या ।

त्युच्यते [a]। * तत्रैव वृत्तिर्द्व्यादेः परिसमाप्तिः, सैकस्यां व्यक्तौ नास्ति ? *—इति चेन्न, [e] एवमेकत्वस्यापि न क्वचित्परिसमाप्तिः स्यात् । नहि तस्य तत्रैव वृत्तिरन्यस्यैकत्वाभावप्रसङ्गात् । [f] अत एकत्वसङ्ख्यावत्यामेव व्यक्तौ द्व्यादिपरिसमाप्तिरित्यविशेष एव । * एकव्यक्तिगतैकत्वसङ्ख्याव्यक्तेर्नान्यत्र ? *—इति चेन्न, सत्ताव्यक्तेरप्येवम्भावप्रसङ्गात्, [g] अननुगतत्वापत्तेश्च([1]) ।* सत्तैव जातिरूपा, एकत्वं तु प्रतिव्यक्ति भिन्नं गुणपदार्थः ? *—इति चेन्नूनं वैशेषिकैर्विप्रलब्धोसि । कथमन्यथा सदेकप्रत्यययोरनुभवव्यवहारविशेषमपश्यन्नपि कानिचित्कानिचिदसम्बद्धान्यक्षराणि प्रलपसि । * सत्तैकत्वयोः परापरत्वानुपपत्तेर्नैवं ([2]) स्यात् *—इति चेन्न,

टी० ॥ अभ्युपेत्याह—। [a] "भावेवे"ति । अनुमित्यादिसमुदायस्यैकतया तत्राप्यभावमेलकसत्त्वाल्लक्षणमतिव्यापकमेवेत्यर्थः ॥ [b] "वैशेषिके"ति । द्व्यादिसङ्ख्याविरहेप्यनुमित्यादावतिव्याप्तितादवस्थ्यादित्यर्थः ॥ [c] "अतदि"ति । सङ्ख्यायाः पदार्थान्तरत्वाभ्युपगमे इत्यर्थः । यथाऽनुमानादित्रये द्वित्वं त्रित्वं वा परिसमाप्यते तथा नैकस्यां प्रत्यक्षव्यक्तावित्यपरिसमाप्तद्वित्वादिप्रत्यक्ष([3])मेकमेवेत्याशङ्कते—। [d] "तथापी"ति । धीव्यवहारयोस्तन्मात्रगतत्वं तत्र परिसमाप्तिः, तच्च नैकत्वस्यापीत्याह—। [e] "एवमि"ति ॥ [f] "अत" इति । यदेकं तद्वयमपीत्यविशेषाल्लक्षणे विशेषणोपादानमनर्थक-

(१) 'लक्षणस्ये'ति शेषः ।

(२) यद्येकत्वं जातिस्तर्हि सत्ताद्रव्यत्वयोरिव परापरभावो वाच्यस्तत्र सम्भवति सत्तायां सत्तावैधुर्य्येप्येकत्वभावेन न सत्तापरं नाप्येकत्वं परमेकत्व एकत्वाभावेपि सत्ताभावाद्रव्यादौ च तयोः साङ्कर्यादेकत्वं गुण एवेत्यर्थः नैवं स्याद्, एकत्वं जातिर्नस्यादित्यर्थः ।

(३) अपरिसमाप्तं द्वित्वादि यत्र प्रत्यक्षे तदित्यर्थः ।

मेवेत्यर्थः ॥ [g] "अननुगतत्वे"ति । एवं सत्येकव्यक्तिमात्रवृत्तिता लक्षणस्य स्यादित्यर्थः ॥

मू० [a] साम्यात् । [b] जातिपरापरत्वभ्रौव्यमेव च क्वाप्येकस्य न्यूनवृत्तित्वे प्रमाणं स्यात् । * क्व तथा ? *—इति चेन्न, शैलेऽनलस्यानुमायामपि क्व वस्तवितस्थ्यादौ तद्देशे इत्यनिश्चयवद्दोषत्वात् । * अथास्तु मा(१) वासीदेकत्वमनुगतं किमनेनाच निरूपितेन द्वित्वादिर्येच न समाप्यतेऽभिद्वितानाभावत्रयं चास्ति तत्प्रत्यक्षमिति * । मैवम्, अनुमित्यादित्रयेऽपि न त्रित्वं परिसमाप्तम् । एवं (२)सत्यन्यानि त्रीणि न स्युः । * अन्या सा त्रित्वव्यक्तिर्याऽन्यत्र ? *—इति चेन्न, [d] त्रित्वव्यक्तेः कस्याश्चिदनुमित्यादित्रये परिसमाप्त्यभावात् । * काचिदपि त्रित्वव्यक्तिर्यत्र न समाप्यते ? *—इति चेन्न, अव्यापकत्वात् । प्रत्यक्षत्वस्य त्रित्वव्यक्तेश्चावश्यं सामानाधिकरण्यस्य वैशेषिकमताभ्युपगतेन भवताऽभ्युपगन्तव्यत्वात् । [f] अन्यथा प्रत्यक्षव्यक्तयस्त्रिस्त्रो न स्युः । तदेव हि त्रिरित्यभिधीयते यत्र त्रित्वं परिसमाप्यते ।

टी० ॥ [a] "साम्यादि"ति । सत्ताया एव गुणत्वमुभयोर्वा गुणत्वं स्याद्विनिगमनाऽभावादित्यर्थः । एकस्यां कस्याञ्चिद्व्यक्तौ सत्तापरिहारेणैक-

(१) मावासीदित्यत्रमावा आसीदिति च्छेदः । नायं माङ्शब्दः किन्तुमाशब्दः, माङ्ङ्गीकारे "माङ्लुङि"ति सर्वलकारापवादभूते लुङ्सति "अस्तेर्भू"रिति प्रकृतेर्भूभावेन मावाभूदित्यापद्येत । माशब्दयोगेतु न तथा माङ्योगे एव तथाविधानात् इतरथामेत्येवसूचयेत अतएव "कथन्तर्हिंमाभवतु, माभविष्यतीति ऽनायं माङ्किन्तु माशब्दः" इतिसमाधाधुक्तद्विदः । तथा च मावासीदित्यस्य न वास्थितः स्यादित्यर्थोद्रष्टव्यः ।

(२) अनुमित्यादित्रये एव त्रित्वसमाप्त्यङ्गीकारे दोषमाह-एवमिति ।

त्ववृत्तो स्यादेव पराऽपरभाव इत्याह—। [b] "जाती"ति । विशेषानिश्चयस्य प्रमाणादोषत्वमाह—। [c] "शैले" इति ॥ [d] "त्रित्वव्यक्तेरि"ति । एकस्या अपि त्रित्वव्यक्तेरपरिसमाप्तौ त्रित्वापरिसमाप्तेः सत्त्वादित्यर्थः । अव्याप्ति-मुपपादयति—। [e] "प्रत्यक्षत्वस्ये"ति । वैशेषिकमतमुपेत्य प्रतीतिबलात्प्र-त्यक्षप्रतीतिषु गुणभूतास्वपि त्रित्वमभ्युपेयमित्यर्थः ॥ प्रतीतिमेवाह—। [f] "अन्यथे"ति ॥

मू० [a] किञ्च, तथापि स एवातिव्यापकतादोषः । त्रित्वेनावच्छि-न्नाऽन्नुमित्यादिव्यक्तिषु त्वदभिमतमभावत्रयमस्तीति तच्च प्रत्यक्षलक्षणं गतमित्यतिव्याप्तिरुक्ता, तद्व्यावर्तनाय भवताऽभिधीयते काचिदपि त्रित्वव्यक्तिर्यत्र न समाप्यते इति, न चैवमुक्तेऽसावतिव्याप्तिर्निवर्तते तत्राप्युक्तविशेष-णस्य विद्यमानत्वात् । न हि त्रित्वावच्छिन्ने तस्मिंस्त्रित्व-व्यक्तिः काचिदपि समाप्यते । त्रित्वलक्षणैकोपाध्यवच्छिन्ने तस्मिंस्त्रित्वव्यक्त्यन्तरं(१)भवदप्याश्रयान्तरमादाय वर्तते, न तु तत्रैव परिसमाप्यते । [b] यच्च चोक्तमुपाधिभूतं त्रित्वं, तेषु यदि त्रित्वसमाप्तिर्धर्मिषु दृश्यते, तदा तद्दर्शनेन तत्र धर्मिमात्रे लक्षणाऽव्यावृत्तिः सिध्येत्, न तु त्रित्ववि-शिष्टे धर्मिणि । तस्मादतिव्यापकत्वं तदवस्थमेव । [c] अभाव-त्रयं च त्रित्वोपाध्यवच्छेदेन समुदिततामुपगतवति विशिष्टे धर्मिणि वर्तते, न त्वविशिष्टे, [d] प्रत्येकमभावत्रयावस्थानस्य तेषु वक्तुमशक्यत्वात् ।

(१) त्रित्वावच्छिन्न-घट-पटैतत्त्रितये वर्तमानं यत्त्रित्वं तद् यद्यपि त्रित्वाव-च्छिन्नेऽपि वर्तते तथापि घटपटलक्षणमाश्रयान्तरमादायैव, न तु केवले त्रित्वावच्छिन्ने वर्तते—इत्यर्थः ।

टी० ॥ 'क्वाचिदपि त्रित्वव्यक्तिर्यत्र न परिसमाप्यते'–इति विशेषणदानेऽप्यनुमित्यादित्रये त्रित्वावच्छिन्ने स्वविशिष्टे स्ववृत्तिभयात्प्रथमत्रित्वविशिष्टे ([1])त्रित्वान्तरस्य च त्रित्वत्वेनैकीकृते परिसमाप्त्यनुपपत्तेरतिव्यापकत्वं तदवस्थमेवेति "किञ्चे"त्यादिना "ऽतिव्यापकत्वं तदवस्थमेवे"त्यन्तेन विशदयन्नाह ॥ [a] "किंचे"ति । नन्वनुमित्यादिषु परिसमाप्तमेव प्रथमत्रित्वमिति कुतोऽतिव्याप्तिरित्यत आह–। [b] "यत्र चे"ति । धर्मिमात्रेतिव्याप्तिर्नोक्ता, किन्तु त्रित्वावच्छिन्ने, तत्र च त्रित्वापरिसमाप्तिरेवेत्यर्थः ॥ प्रत्येकं धर्मिणि नानुमित्याद्यन्योन्याभावत्रयमिति विशिष्टे तत्सत्त्वेन प्रागपि तत्रैवातिव्याप्तिरुक्ता, सा चात्रापि न परिहृतेत्याह–। [c] "अभावे"ति ॥ [d] "प्रत्येकमि"ति । अनुमितावनुमित्यन्योन्याभावाभावादित्यर्थः ॥

मू० [a] अथ मन्यसे–* तादृशस्य विशिष्टस्य प्रमितित्वेनैव व्यवच्छेदः, न ह्यभावत्रयवत्त्रित्वं([2]) विशेषणमाश्रयकोटावन्तर्भाव्य तासु व्यक्तिषु प्रमितित्वं वर्तते([3]) किंतु तेषां धर्मिणां स्वरूपमात्रे, उक्ताभावत्रयं प्रमितित्वं चेत्येतद्व्याप्तिस्तत्र प्रत्यक्षमिति हि भ्रमः? *–इति, न, [b] भवतापि भिन्नधर्मावच्छिन्नस्यैव ([4])धर्मिणः प्रमितित्वमभावत्रयवत्त्वं चावश्यमभ्युपगन्तव्यम् । तथाहि,–यदि प्रमितित्वस्य क्वाचित्कत्वे नियामकं नोच्यते तदा सर्वा प्रमितिः स्यात्, न वा क्वाचिदपि ।

---

(१) अत्र "प्रथमत्रित्वस्य" इति शेषो द्रष्टव्यः ।

(२) अभावत्रयवत्त्रित्वम्=सामानाधिकरण्यसम्बन्धेनाऽभावत्रयविशिष्टं त्रित्वमित्यर्थः । तासु=अनुमित्यादिषु ।

(३) नहि वर्तते–इति सम्बन्धः, विशेषणीभूते त्रित्वेऽपि प्रमितित्वप्रसङ्गादिति तत्र हेतुः पूरणीयः ।

(४) भिन्नधर्मावच्छिन्नस्य=अन्यान्यधर्मावच्छिन्नस्य । तथाहि प्रत्यक्षे यथार्थानुभवत्वाद्यवच्छेदेन प्रमितित्वं प्रत्यक्षत्वावच्छेदेनाभावत्रयवत्त्वं च वाच्यम् । तथाचाभावत्रयप्रमितित्वयोर्वैयधिकरण्यात्तदव्याप्तिसिद्धिरिति भावः ।

सर्वत्र सत्ताऽसत्ता वा नियमेऽन्यानपेक्षया । (१)
नियामकाद्धि भावानां क्वाचित्कत्वस्य सम्भवः ॥ ४२ ॥

तन्नियामक(२)माश्रये विशेषणीभूतं वक्तव्यमुपलक्षणीभूतं वा ? । आद्ये (३)यदैव प्रमितित्वस्याऽऽश्रये विशेषणं तदैव यद्यभावत्रयस्यापि तदा त्रित्वावच्छिन्नेनुमित्यादा(४)वभावत्रयस्य दर्शितत्वात्तत्र प्रमितित्वेनापि त्रित्वावच्छिन्ने भवितव्यमिति प्रमितित्वान्न तद्व्यवच्छेदः ।

टी० ॥ विशिष्टे चेदतिव्याप्तिस्तदा प्रमितित्वेनैव तद्व्यवच्छेदः, नहि विशिष्टे प्रमितित्वमित्याशङ्कते-। [a]"अथे"ति । प्रमितित्वमपि यथार्थानुभवत्वादिविशिष्टे वक्तव्यमन्यथातिप्रसङ्ग इति प्रकृतेपि त्रित्वविशिष्टे प्रमितित्वं नानुपपन्नमिति परिहरति-। [b]"भवतापी"ति । यदवच्छिन्ने प्रमितित्वं तदवच्छिन्ने एवाभावत्रयं चेन्न वाच्यं तदा त्वत्पक्षे लक्षणस्यासम्भव एवेत्यये भावाभिव्यक्तिः ॥

मू० [a]अथान्यावच्छिन्ने प्रमितित्वमन्यधर्मावच्छिन्ने चाऽभावत्रयसम्बन्ध,स्तदा (५)नास्ति त्वत्पक्षेपि प्रमितित्वस्यैकधर्मविशिष्टाश्रयत्वलक्षणमेकाश्रयत्वम् । विशिष्टेपि धर्मिण्याश्रितो(६)धर्म्याश्रित एवेति कृत्वा प्रमितित्वस्याभावत्र-

(१) अन्यानपेक्षया नियमे (स्वीक्रियमाणे) सर्वत्रसत्ताऽसत्ता वा स्यादिति सम्बन्धः ।

(२) प्रमितित्वस्य यद्यथार्थानुभवत्वादिरूपं नियामकमवश्यं वक्तव्यं तन्नियामकमित्यर्थः ।

(३) यदि विशेषणं तदापि प्रमितित्वाश्रयविशेषणमेवाभावत्रयस्यापि नियामकतयाऽऽश्रयविशेषणमुतान्यदिति तत्र प्रथममनुवदति आद्ये इति । द्वितीयमनुवदति अथेति ।

(४) अनुमित्यादौ=अनुमित्यादिसमुदाये ।

(५) एवं सति प्रमितित्वाभावत्रयवत्त्वयोर्वैयधिकरण्यादसम्भव एव लक्षणस्येत्याह-तदेति । अभावत्रयेण सहेति शेषः ।

(६) यथा शाखावच्छिन्नसंयोगविशिष्टे वृक्षे धर्मिण्याश्रितो मूलावच्छिन्नस्तदाभावोपि धर्म्याश्रित एव तथाऽन्यधर्मावच्छिन्नप्रमितित्वविशिष्टे प्रत्यक्षे धर्मिण्याश्रिते-

Digitized by Google

यसमानाश्रयत्वेऽनुमित्यादित्रयेपि प्रसङ्गस्तदवस्थः। नापि द्वितीयः, उपलक्षणीभूतेन केनचिद्धर्मेण (१)योऽसावुपलक्षितो धर्मी स एव खलु चित्वविशिष्टः, विशेषणवतोपि यावद्विशेष्यवस्तुनो विशेष्यवस्त्वात्मकत्वात्; यथा दण्ड्यपि पुरुषः पुरुष एव। एवं च सत्युपलक्षितादनन्यभूते चित्वविशिष्टेप्यनुमित्यादौ प्रमितित्वमाश्रितं, नियामकेनोपलक्षणेनोपलक्ष्याभेदव्यवस्थिततया तस्याप्यवच्छिन्नत्वात्। [b]तथा चातिव्याप्तिर्वज्रलेपायिता। *[c]तथाप्युपलक्षकेण चित्वविशिष्टतया नोपलक्षितोऽसौ धर्मी, किन्तु स्वरूपेण *—इति चेन्न, उक्तमत्र यदेव तदुपलक्षितं तदेव विशिष्टमपि। *तथापि विशिष्टेन रूपेण तावन्नोपलक्षितम् * ?—इति चेत्, [d]सोपलक्षि, अविशिष्टेनापि तन्नोपलक्षितमेव। [e]अन्यथा प्रकृतेपि वैयधिकरण्यापत्तेः। तदास्तामुल्लसत्पल्लववचनविलसितेनेति। तदेवं लक्षणान्तरेपि प्रतिपादितोयं दूषणसमूहः स्वयमूहनीयः।

टी० ॥ भावमेवाभिव्यनक्ति—। [a]"अथे"ति ॥ [b]"तथाचे"ति। चित्वविशिष्टप्रमितित्वमभावत्रयवत्त्वं चानुमित्यादित्रयेपीत्यतिव्याप्तिरेवेत्यर्थः ॥ [c]"तथापी"ति। उपलक्षणतायां वैशिष्ट्यमपि नावच्छेदकमित्यर्थः। अवैशिष्ट्यमपि न तथेत्याह—। [d]"सोपलक्षी"ति ॥ [e]"अन्यथे"ति। प्रमितित्वस्याभावत्रयस्य च नानाधर्मावच्छेद्यत्वेन वृत्तावित्यर्थः ॥

(शेषमग्रे)

ऽन्यधर्मावच्छिन्नाभावत्रयसम्बन्धोपि धर्म्याश्रित एनियामकधर्मविशिष्टयोर्भेदेपि प्रत्यक्षस्य धर्मिण एकत्वादित्यर्थः।

(१) केनाचिद्धर्मेण=यथार्थानुभवत्वादुष्टकारणोद्भूतत्वादिना।

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(Continued from page 82. VOL. IX.)

मू० ॥ पुरहेतुकं यदभवच्च विभोः
परिकल्पितं किमपि चित्सदृशम् ॥
जलपात्रहेतुकमिव द्युमणे-
स्तदसंततं भवति तद् व्रजति ॥ ४३ ॥

टी० ॥ एवं घटाकाशदृष्टान्तेनात्मनो गमनादि कल्पितमित्युक्तम् । इदानीं रूपं रूपं प्रति रूपो बभूवेत्यादिवचनाज्जलसूर्यादिप्रतिबिम्बदृष्टान्तेनाऽपि तदुपपादयति । पुरहेतुकमिति । तदधीनसत्ताकमिति यावत् । विभोः शुद्धचिदात्मनोऽपरिच्छिन्नस्य । किमपि केवलजडरूपेण केवलचिद्रूपेण वा दुर्निरूपमत एव चित्सदृशमुपाध्युपरागतद्धर्मविशेषविशिष्टं चिदाभासाख्यं जीवपदवाच्यं यद्रूपं परिकल्पितमभवत्तदसंततमध्यापि भवति, ततस्तदेव मिथ्यागमनादिमद् भवति, तत्तादात्म्याच्चिदात्मन्यपि तद्भ्रान्तिरित्यर्थः । प्रतिबिम्बस्य कल्पितेऽपि बिम्बविपरीतरूपे दृष्टान्तमाह । जलपात्रेति । एवं च चित्प्रतिबिम्बस्य चिज्जडात्मत्वेऽपि चित्प्राधान्येन प्रतिबिम्बव्यवहारः, कल्पितजडप्राधान्येनाभासव्यवहारश्चेति प्रतिबिम्बस्य बिम्बाभेदाभिधानम्, आभासस्य तु मिथ्यात्वाभिधानं सर्वत्रोपपद्यत इति ॥ ४३ ॥

मू० ॥ जडशक्तिरस्ति च परस्य विभोः
परमात्मनस्तम इति प्रथिता ॥
पुरमष्टकं तव यथा भवति
श्रुतितः प्रसिद्धमिदमप्यखिलम् ॥ ४४ ॥

ननूक्तोपाधेरेव परलोकगमनमनुपपन्नं कुतस्तदुपाधिकं तदात्मनि स्यात्, बुद्ध्यादेर्जडस्य चेतनानधिष्ठितस्य स्वतो गमनादिप्रवृत्त्ययोगात्, जीवस्य चोत्क्रान्तिकाले संपिण्डितकरणत्वेन विशेषबोधरहितस्य तत्प्रेरक-

त्वायोगात्, परमात्मनोऽपि कूटस्थचिन्मात्रतया तत्प्रेरणायोगादित्या-शङ्क्य परमेश्वरस्य मायाशक्तिमतस्तदधीनव्यापारेण पुरतदवच्छिन्नजीवा-धिष्ठातृत्वसंभवात् पुराविगमनोपपत्तिरिति वक्तुं तस्य तच्छक्तिमत्त्वमाह। जडशक्तिरिति। चशब्दस्तदधीनप्रेरणाव्यापारसमुच्चयार्थः। सा च जीवं प्रति तमोवद् वस्तुतत्त्वावरकत्वेनाविद्याया मन्तरे वर्तमानाऽहमज्ञ इत्यादिश्रु-त्यनुभवसिद्धेत्याह। तम इति। अस्तीत्यभिधानात् परशक्तिसंबन्धवास्तवत्व-शङ्कां दृष्टान्तोक्त्याऽपाकरोति। पुरमष्टकमिति। अष्टकमष्टसंख्याकम्। परस्य तच्छक्तिमत्त्वे किं मानम्, संबन्धे सति सा तमपि जीववत् किमिति न व्यामोहयेत्, तस्य तन्नियन्तृत्वेन तत्कूटाभिज्ञत्वान्न व्यामोह इति चेत्, तत्रापि किं मानमित्याशङ्क्याह। श्रुतित इति। मायिनं तु महेश्वरम्, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, योनिंयो-निमधितिष्ठत्येक इत्यादिश्रुतिभ्य उक्तार्थसिद्धिरित्यर्थः॥ ४४॥

मू०॥ पुरहेतुकं तव यथा च वपु-
र्भवतीह जीववचसो विषयः॥
जडशक्त्युपाधिकममुष्य तथा
परमेश्वरत्ववपुरुद्भवति॥ ४५॥

टी०॥ ननु न तस्य कार्यं करणं च विद्यत इत्यादिश्रुतेः परमा-त्मनः कृतिकर्तव्याभावप्रतीतेः कथं माययापि तस्य पुराद्यधिष्ठातृत्वसं-भव इत्याशङ्क्य तस्य स्वरूपेण वस्तुतस्तदभावेऽपि कल्पितरूपेण तदु-पपत्तिरित्यभिप्रेत्य पुरहेतुकं यदभवदित्युक्तसंसारयोग्यजीवरूपदृष्टान्तेन सर्वाधिष्ठातृत्वादियोग्यमीश्वरपदवाच्यं सर्वज्ञत्वसर्वशक्तित्वादिविशिष्टा-त्मकं परमात्मनो मायिकमीश्वरत्वाख्यं रूपमाह। पुरहेतुकमिति। स्वरूपा-वरकाज्ञानप्रयुक्तमिति यावत्। चशब्दोऽवधारणे, स च पश्चाद्यपदेन संबध्य-ते। इहाविद्यादशायाम्। जडशक्त्युपाधिकमिति। स्वरूपानावरकेश्वरपर-तन्त्रमायाप्रयुक्तमित्यर्थः। अमुष्य कल्पितपारोक्ष्यपरमात्मन इति यावत्। उद्भवति प्रकटीभवति, जगत्स्रष्ट्रादिनेत्यर्थः॥ ४५॥

मू० ॥ पुरुहेतुरूपघटितस्य दृशो-
ऽनुग्रहत्युपाधिपरमेश्वरतः ॥
भयमुद्भवत्यनवबोधवशा-
द्विति च श्रुतीशिरसि राजपथः ॥ ४६ ॥

टी० ॥ ईश्वरस्य मायिकोक्तरूपवत्त्वेऽपि जीवस्य तदभिन्नत्वात् कथं तदधिष्ठेयत्वमित्याशङ्क्य तदज्ञानाद् विपरीतरूपाभिमानित्वाच्च तदधिष्ठेयतया जीवस्य कर्माधीनसंसारानर्थसिद्धिरिति फलितमाह । पुरुहेतुरूपेति । ईश्वरप्रेरितो जीवः संसरतीत्यत्र य आत्मनि तिष्ठन्नात्मानमन्तरोऽयमयति, एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत इत्यादिश्रुतिर्मानमित्याह । इति चेति । बहुवेदान्तवाक्यसिद्धत्वाद्राजमार्गवदसंदिग्धोऽयमर्थ इत्यर्थः ॥ ४६ ॥

मू० ॥ परमेश्वरेण विभुना रणयन्
परिबृंहितः शकटवद् व्रजसि ॥
शकटं हि शाकटिकयोगवशाद्
व्रजति स्वयं न परतन्त्रतया ॥ ४७ ॥

टी० ॥ जीवस्यैहिकामुष्मिकः कर्मफलभोगः पमेश्वरदातृक इत्येतावद् न तु जीवस्तदधिष्ठितो गच्छतीति केचित्, तान् प्रबोधयन् तद्यथाऽनः सुसमाहितमुत्सर्जद् यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् यातीति श्रुत्यर्थं दर्शयति । परमेश्वरेणेति । विभुना प्रभुणा, रणयन्नूर्ध्वोच्छ्वासदशायां दुःसहवेदनावशाच्छब्दं कुर्वन्, एतच्च उत्सर्जन्निति श्रुतिपदोक्तम्, तदुक्तिश्च वैराग्यार्थम्, परिबृंहितोऽधिष्ठितः । शकटस्य परमेश्वराधिष्ठितत्वमप्रसिद्धमित्याशङ्क्य दृष्टान्तं विवृणोति । शकटं हीति । स्वयं न व्रजतीत्यनुषङ्गः । परतन्त्रतयेति हेतुर्व्रजसीत्यत्रापि योजनीयः ॥ ४७ ॥

मू० ॥ पुरवेष्टितः पुरवशानुगतः
पुरतन्त्रचिन्निभविभिन्नवपुः ॥
दिवि यातनां भुवि च कर्मफला-
न्यनुभूय भूप इह संभवति ॥ ४८ ॥

टी० ॥ ननु शकटस्याचेतनतया पारतन्त्र्यं युक्तं चेतनस्य तु जीवस्य तदयुक्तमित्याशङ्क्य चेतनस्याप्यज्ञस्य दुर्बलस्य च बहुशःप्रबलपारतन्त्र्यदर्शनाज्जीवस्याप्यज्ञत्वाद्यभिमानित्वात्सर्वज्ञादिरूपेश्वरपारतन्त्र्यं युक्तमित्यभिप्रेत्याह । पुरवेष्टित इति । तमसावृतस्वरूप इत्यर्थः । पुरवशानुगतः बुद्ध्यादिगतकतिपयशक्तियुक्तः । बुद्ध्यादौ चित्प्रतिबिम्बोऽपि जीव इति मतेनापि तदाह । पुरतन्त्रेति । चिन्निभोऽंशत्वादिविशिष्टरूपश्चिदाभासस्तदभिन्नस्वरूपो जीवोऽतः पारतन्त्र्यमित्यर्थः । ईश्वरप्रेरणया जीवस्य स्वर्गनरकयोर्गमनसंभवेऽपि तत्र सुखदुःखभोगाभ्यां पुण्यपापयोः क्षीणत्वात्तावताऽज्ञस्यापि संसारोपरमः स्यादित्याशङ्क्यानादिभवपरंपरासंचितकर्मणां बहुत्वादभुक्तफलपुण्यपापाभ्यां पुनर्मनुष्यदेहप्राप्तेस्तदधीनकर्मणामप्यवश्यंभावित्वान्नैवमित्यभिप्रेत्याह । दिवि यातनामिति । एवं पदद्वयं संयमिन्याः सुखस्य चोपलक्षणम् । भुवि भारतवर्षातिरिक्तेलावृतादिवर्षेषु । पश्वादिजातिसमुच्चयार्थश्चशब्दः । इह भारतवर्षे मनुष्यजातौ ॥ ४८ ॥

मू० ॥ सुकृतदुष्कृतकर्मवशादयं
दिवमथो यमसादनमेव वा ॥
अनुभवेन समाप्य पुनर्महीतलमबोधवशादवरोहति ॥ ४९ ॥

टी० ॥ स्वर्गनरकादिशब्दानां सुखदुःखमात्रवाचित्वात्तदनुभवस्य चेहैव संभवात् कर्मवशाद् गन्तव्यदेशविशेष एव नास्ति, तत्प्रमाणाभावात्, धूमादिमार्गश्रुतेरर्थवादत्वादर्थवादानां च विधिनिषेधापेक्षितस्तुतिनिन्दामात्रपरतया स्वार्थे प्रामाण्याभावादिति केचित्, तान् प्रत्याह । सुकृतदुष्कृतेति । पदव्याख्यानानि स्पष्टार्थानि । अयं भावः । मन्त्रार्थवादेतिहासपुरा-

णानां स्वार्थे प्रामाण्यस्यौत्सर्गिकस्य देवताधिकरणोक्तन्यायैर्बाधाभावेनाव-श्यमभ्युपेयत्वात्तेषु च कर्मभोगापेक्षितदेशोपकरणादिविशेषप्रतिपादनादि-तरथा पुण्यपापतारतम्याधीनसुखदुःखतारतम्यानुपपत्तेः, ततश्च गत्यादि-पूर्विका तत्प्राप्तिरिति तद्रूपसंसारस्येश्वराधीनत्वं युक्तमिति ॥ ४९ ॥

मू० ॥ यदि वा समुच्चयवशात् पुरुषः

कमलासनं व्रजति कामुकधीः ॥

पुनरेव मानवमिमं तु विना

परिवर्त्तमाव्रजति मूढमतिः ॥ ५० ॥

टी० ॥ ननु केवलेष्टादिकारिणामनिष्टादिकारिणां चाऽज्ञानां चन्द्रलोकं संयमिनीं वा गत्वा कर्मफलं भुक्तवताम् अथैतमेवाध्वानं पुन-र्निवर्त्तन्ते इत्यादिवचनादिहावरोहादुक्तविधया संसारानुपरमेऽपीष्टा-दिसमुच्चितसूत्राद्युपासनावशादर्चिरादिमार्गेणापरं ब्रह्म प्राप्तानां विना-ऽऽत्मतत्त्वानुभवं न तेषामिह पुनरावृत्तिः, एतेन प्रतिपद्यमाना इमं मान-वमावर्त्तं नावर्त्तन्त इति वचनादिहावरोहाभावात् संसारोपरमसिद्धिरिति नेत्याह । यदि वेति । कामुकधीः केवलब्रह्मलोककामो मानवं मनुवंशगं मनुष्यदेहम् इमं वर्त्तमानं विना परिवर्त्तं पुनःपुनः परिवर्त्तमानं जन्मादि निरन्तरं व्रजति यतो मूढमतिरज्ञानी, क्रममुक्तिप्रापकदहराद्युपासनारहि-तानां पुण्यविशेषाद् ब्रह्मलोकं गतानामिह नावृत्तिः, इमं नावर्तन्त इति चैतत्कल्पविशेषितावृत्तिनिषेधात् कल्पान्तरीयावृत्तिः सूच्यते । इतरथा तेषामावर्त्तं नावर्तन्त इत्येतावतैवात्यन्तिकानावृत्तिसिद्धेर्विशेषणवैयर्थ्यापा-तात्, तत्त्वबोधं विना संचितसर्वकर्मक्षयायोगेन कर्मान्तराधीनावृत्तेराव-श्यकत्वाच्च । ब्रह्मलोकगतानां न नियताऽनावृत्तिरित्यर्थः ॥ ५० ॥

मू० ॥ अथ वा स तत्र परमात्ममतिः

परिमुच्यते सकलबन्धनतः ॥

क्रमयोगमुक्तिरुदिता श्रुतिषु

प्रतिशाखमेवमुपपन्नतरा ॥ ५१ ॥

Digitized by Google

टी० ॥ ब्रह्मलोकगतानां पुनरावृत्ताधनावृत्तिः शब्दादित्यधिकरणविरोध इत्याशङ्क्य क्रममुक्तिफलकोपासनाभिर्ब्रह्मलोकं गतानां कार्यात्यये तदध्यक्षेण सहातः परमभिधानादित्यत्रोक्तन्यायेन तत्रैवोत्पन्नविवेकवैराग्यादिमतां तदध्यक्षोपदेशलब्धतत्त्वबोधानां तद्बलान्मुक्तिरित्यनन्याधिकरणं ज्ञानादेव कैवल्यमित्येतद्विषयमिदमभिप्रेत्याह । अथ वेति । परम आत्मेति मतिर्यस्य स परमात्ममतिः । तत्र मानमाह । क्रमयोगेति । कार्यब्रह्मप्राप्तिपूर्वकपरब्रह्मप्राप्तिरूपा मुक्तिर्ब्रह्मलोकमभिसंपद्यते न स पुनरावर्तत इत्यादिश्रुतिषु योदिता सैवमुपपद्यतरेत्यर्थः ॥ ५१ ॥

मू० ॥ देवयानपितृयाणयोः पथो-
श्चानकर्मरहितत्वकारणात् ॥
नैकमप्यनुसरन्ति ये पुनः
क्षुद्रजन्तव इहोद्भवन्ति ते ॥ ५२ ॥

टी० ॥ एवं केवलेष्टादिकारिणां समुच्चयकारिणां चोत्कृष्टलोकप्राप्तावपि जन्ममरणादिसंसारानुपरम इत्युक्तम्, इदानीं मनुष्येषु प्राक्तनजन्मबाहुल्यादिष्टादिकर्मानुष्ठानमेव दुर्लभं तदभावे तदधीनदेवयानपितृयाणमार्गद्वयप्राप्तिरहितानां तेषां रागादिपरवशानां दुरितबाहुल्यसंभवासद्भावात् पुनःपुनः कीटपतङ्गादिक्षुद्रजन्तुभावरूपतृतीयपथप्राप्तानामत्यन्तं कष्टप्राप्तिरपरिहार्येति वैराग्यार्थं वदन् अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानमिति श्रुत्यर्थं दर्शयति । देवयानेति । स्पष्टार्थः श्लोकः ॥ ५२ ॥

मू० ॥ इति कामुकस्य तव संसरणं
शतशो बभूव बत मूढमतेः ॥
इह विप्रजन्मनि विरक्तमतिः
कुरु साधनं यदपवर्गकरम् ॥ ५३ ॥

टी० ॥ एवं पुण्यपापफले संसारे वैराग्यार्थे मिथ्यात्वानित्यत्वजन्ममरणानुपरमदुःखबाहुल्यादिदोषं प्रदर्श्य पुण्यादेरपि प्रयोजकं कामात् यः

Digitized by Google

कामयते मन्यमान इत्यादि श्रुत्युक्तं दर्शयन्नुपसंहरति । इति कामुकस्येति । यथा संसारहेतुप्रयोजको रागस्तथा मुक्तिहेतुप्रयोजकं वैराग्यम् । परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायादित्यादिश्रुत्योक्तं वदन् विरक्तस्यापि न कर्मत्यागमात्रादभीष्टसिद्धिरित्यभिप्रेत्याह । इहेति ॥ ५३ ॥

मू० ॥ श्रवणादिकं शमदमादिपरः
परमात्मनः परमभागवतः ॥
कुरु तावता परममेव पदं
परमात्मनस्त्वमवलोकयसि ॥ ५४ ॥

टी० ॥ अपवर्गस्य ब्रह्मभावस्यासाध्यत्वात्तत्साधनमेव नास्तीत्याशङ्क्य तद्ब्रह्मज्ञानान्तरङ्गसाधनानि मुमुक्षुणानुष्ठेयानीत्याह । श्रवणादिकमिति । कस्य श्रवणादीति वीक्षायामुक्तम् । परमात्मन इति । यस्य देवे परा भक्तिरित्यादिवचनात् सगुणपरमात्मभक्तिरप्यन्तरङ्गसाधनमित्यभिप्रेत्याह । परमभागवत इति । श्रवणादीनामप्रमाणत्वात्ततः कथं तत्त्वसाक्षात्कारोदय इत्याशङ्क्य श्रवणपदार्थस्य वेदान्तघटितत्वात्तत्प्रमाणात्तदुपपत्तिरित्यभिप्रेत्याह । तावतेति । आत्मनस्तव परमविज्ञातत्कार्यातीतं स्वरूपं परमं निरतिशयानन्दं ब्रह्मैवावलोकयसि साक्षात्करोषीति सम्बन्धः । उक्तविशिष्टाधिकारिणो ब्रह्मसाक्षात्कारे विलम्बाभावपरो वर्तमानत्वव्यपदेशः ॥ ५४ ॥

मू० ॥ यदि तन्न पश्यसि हरेः परमं
पदमम्बुशीतलमिवेद्धशिराः ॥
न खलु प्रदीप्तशिरसोऽस्ति सुखं
तव दुःखपावकशिखाभिरहो ॥ ५५ ॥

टी० ॥ परमपदावलोकनेऽपि किं स्यादित्याशङ्क्य य एतद्विदुरमृतास्ते भवन्ति, एतावदरे खल्वमृतत्वमिति श्रुतेः सर्वदुःखरहितसुखात्मकब्रह्मभावरूपाऽमृतत्वं ततो भवतीत्यभिप्रेत्य तदभावे दुःसहदुःखानुपरममथेतरे दुःखमेवापियन्तीत्यादिश्रुत्युक्तं सदृष्टान्तमाह । यदि तन्न पश्य-

सीति। प्रदीप्तशिराः प्रदीप्तशिराः। दुःखसंभिन्नसुखस्यापि दुःखत्वात्सुखं नास्तीत्युक्तम्। दुःखसामान्यात्मकपावकस्य आध्यात्मिकादितापविशेषाः शिखाः ताभिः प्रदीप्तशिरसो व्याप्तसर्वाङ्गस्य। शिरोग्रहणमितराङ्गोपलक्षणार्थम्। तत्त्वविदामप्युक्तसंसारिदर्शनाधीनं खेदं द्योतयति। अहो इति॥ ५५॥

मू० ॥ एवं विज्ञाय तापत्रयमतिगहनं मोहमूलं परस्मि-
न्नात्मन्यात्मप्रकाशे त्वयि परमसुखे निष्कले निष्कलङ्के ॥
सत्ये नित्यस्वभावे परिहृतसकलद्वैतकूटानुषङ्गे
सम्यग्ज्ञानानुरागं कुरु विषयगतं भिन्द्धि निर्बन्धमेनम् ॥ ५६॥

टी० ॥ ननु प्रदीप्तशिरसोऽपि शीतलाम्बुदर्शनमात्रेण तत्तापानिवृत्तिवदनादिकालप्रवृत्तसंसारतापस्याप्यात्मदर्शनमात्रेण निवृत्त्ययोगादुपायान्तरस्यापि तत्राभावाद्यथाशक्ति दुःखं परिहृत्य दुःखेऽपि संसारे वैषयिकसुखमेव विवेकवताऽपि प्रार्थनीयमिति कुतस्ततो वैराग्यमित्याशङ्क्य शिरस्यग्निदाहस्य जलाज्ञानविलसितत्वाभावात्तद्दर्शननिवर्त्यत्वाभावेऽपि संसारतापस्य नित्यशुद्धाद्विरूपात्माज्ञानविलसितत्वस्य बहुधोपपादनात्तद्दर्शनात्तस्यात्यन्तिकनिवृत्त्युपपत्तेः नित्यनिरतिशयसुखब्रह्मभावानुभवलक्षणमोक्षस्य ज्ञानमात्रायत्तत्वात्तदर्थिनो विषयवैराग्यदार्ढ्यमावश्यकमित्यभिप्रेत्योपसंहरति एवं विज्ञायेति। अतिगहनमतिनिबिडम्। आत्मनि तापत्रयस्य मोहविलसितत्वे हेतुः। परिहृतेति। तत्र वस्तुतो द्वैतानुषङ्गपरिहारहेतुत्वेनात्मानं विशिनष्टि। आत्मप्रकाश इत्यादिना। सत्ये बाधायोग्यस्वरूपे। नित्यस्वभावे कूटस्थस्वभावे। स्वभावपदं विपरीतप्रतीतिविरोधपरिहाराय सर्वविशेषणेषु योजनीयम्। निर्बन्धं नितरां बन्धकम्। एनमनुरागम्॥ ५६॥

मू० ॥ इत्युक्तोपरते गुरौ पुनरयं जिज्ञासया प्रेरित-
स्तत्त्वंशब्दनिगद्यलक्ष्यविषयं शिष्यो गुरुं पृच्छति ॥
वैराग्येऽतिदृढीकृते सति यतः प्राज्ञो यतिर्मन्यते
संदीप्तं शिरसीव पावकमिदं संसारदुःखं महत् ॥ ५७॥

टी० ॥ एवं रंहतिपादार्थं वैराग्यस्य दृढत्वमेकमिति संगृहीतं शिष्यवैराग्यदार्ढ्यं सोपपत्तिकमुपपाद्यानन्तरपादार्थमपरं तत्त्वंपदार्थज्ञप्तीति संगृहीतं प्रपञ्चयिष्यन्नापृष्टः कस्य चिद्ब्रूयादिति शास्त्रार्थं शिक्षयन् प्रथमं गुरूपरमं शिष्यप्रश्नं चावतारयति । इत्युक्त्वेति । अत्यन्तं विरक्तस्य कुतः प्रश्नोद्यम इति वीक्षायामाह । जिज्ञासयेति । तत्त्वमिति । तत्त्वंपदयोर्वाच्यलक्ष्यात्मको यो विषयस्तमित्यर्थः । तत्त्वंशब्दवाच्याभ्यां लक्ष्यं विषयमिति वा । जिज्ञासोरप्यविलम्बेन प्रश्नोद्यमे हेतुमाह । वैराग्य इति । शिरसि संदीप्तं पावकमिव महत्संसारदुःखं यतो मन्यतेऽतो गुरुं पृच्छतीति योजना ॥ ५७ ॥

मू० ॥ वैराग्यं विषयेषु पूर्वमपि मे जातं हरेरर्चनात्
यज्ञादिक्रियया निरस्तफलया किं त्वद्य दार्ढ्यं गतम् ॥
संसारस्य निरूपणेन धिगिदं कर्मादिजन्यं फलम्
विश्वं नश्वरमम्बुबुद्बुदसमं पद्मासनान्तं जगत् ॥ ५८ ॥

टी० ॥ उक्तं रंहतिपादार्थं श्रुतवन्तोऽपि के चित्संसाराद्वैराग्यं तद्दार्ढ्यं वा न लभन्ते तथा किमयमपि तथा च तत्त्वोपदेशानर्ह इति शङ्कां निराकुर्वन् स्वस्यात्यन्तिकं वैराग्यं सामग्रीप्रदर्शनपूर्वकं शिष्यो ज्ञापयति । वैराग्यं विषयेष्विति । निरस्तमनर्पेक्षितं फलं यस्याः सा तथोक्ता तयेत्यर्थः । यज्ञाद्यनुष्ठायिनामपि केषां चिद्वैराग्यादर्शनादीश्वरार्पणबुद्ध्यैव तदनुष्ठानं तत्साधनमित्यभिप्रायेण हरेरर्चनादित्युक्तम् । तेनापि पूर्वं ब्रह्मलोकावधिककर्मफलेष्वनिच्छात्मकमेव वैराग्यं जातम्, इदानीं तु तेष्वतितरां जिहासालक्षणं तद्दार्ढ्यं प्राप्तमित्याह । किं त्विति । तद्दार्ढ्यमेवाभिनयेन दर्शयति । धिगिति ॥ ५८ ॥

(शेषमग्रे)

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

		मूल्यम्	
		रु०	आ०
१	काशिका पंडितवरवामनादित्यविरचिता		
	पूर्वार्धम्	..	॥
	उत्तरार्धम्	१० ..	॥
२	बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२ ..	॥
३	प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१ ..	।)
४	लघुकौमुदी वरदराजकृता	१ ..	=)
५	लघुकौमुदी श्रीयुतडाक्तरबालयटेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८ ..	॥
६	श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७	वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४ ..	॥
८	मानवधर्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४ ..	॥
९	शाश्वतधर्मदीपिका	१ ..	॥
१०	अमरकोश सटीक..	४ ..	॥
११	योगवार्तिकम्	३ ..	।)
१२	वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१) ..	॥
१३	गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्विजनगा-देशाधिपति रचिता	४) ..	॥

Digitized by Google

CONTENTS.

		Page.
Śástradípiká	...	121
Śríbháshyam	...	135
Khaṇḍanakhaṇḍakhádyam	..	154
Saṃkshepaśáríirakam	...	168

Digitized by Google

JUN 7 1887

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 4.] APRIL 1887. [Vol. IX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page* 176. Vol. IX.)

मू० ॥ किं तु त्वंपदलक्ष्यमर्थमधुना कर्तृत्वभोक्तृत्वयो-
र्जाग्रद्भूगतयोरपोहमुखतो वाञ्छाऽवगन्तुं मम ॥
कर्तृत्वादिकमस्य किं निजमभूत् स्वाभाविकं जाग्रतः
किं वा तत् परतः कुतश्चिदभवच्चैतन्यधातोरिति ॥ ५८ ॥

टी० ॥ तर्हि सर्वतो विरक्तस्य संन्यासिनः कृतकृत्यस्य तवेदानीं कुत्र वाञ्छेत्याशङ्क्य त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणामिति वचनात् त्वंपदवाच्यस्य लोकत एवावगतत्वात् सर्वानर्थशून्यतल्लक्ष्यज्ञाने मम वाञ्छेत्याह । किं त्विति । स्वप्नभूगतकर्तृत्वादेर्मिथ्यात्वेन तदपोहस्यात्मनि निश्चितत्वाज्जाग्रद्भूगतयोरित्युक्तम् । तामेव वाञ्छां सप्रकारां दर्शयति । कर्तृत्वादिकमिति । प्रमातृत्वभोक्तृत्वादिकमादिपदार्थः । निजमित्यनेन स्वरूपेणानादीति पृष्टमिति शङ्क्येत, तन्निवारणाय स्वाभाविकमित्युक्तम् । अनन्यप्रयुक्तमित्यर्थः । परतः स्फटिकलौहित्यादिवदुपाधित इत्यर्थः । चैतन्यधातोरिति । चैतन्यैकरसस्येति द्वितीयकोटौ बीजम् । कर्तृत्वादिमद्वस्त्वन्तरादर्शनमाद्यकोटौ बीजमिति द्रष्टव्यम् ॥ ५९ ॥

मू० ॥ यावत्त्वंपदलक्ष्यवस्तुविषयो बोधो न मे वर्तते
तावन् मे बधिरेषु गीतमिव तच्छ्रोतं वचोऽनर्थकम् ॥
तस्मात्त्वंपदलक्ष्यवस्तुविषयः कर्तृत्वभोक्तृत्वयो-
र्जाग्रद्भूगतयोरपोहमुखतो बोधो ममोत्पाद्यताम् ॥ ६० ॥

टी० ॥ ननु तत्त्वमादिमहावाक्यैरेवाकर्त्रादिरूपब्रह्माभेदप्रतिपादनाज्जीवस्य कर्तृत्वादि न स्वाभाविकमिति गम्यते, तथा स यत्तत्र किं चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्याद्यवान्तरवाक्यैरपि कर्तृत्वादिसंसर्गरहिततया स्पष्टं जीवस्वरूपप्रतिपादनात् कथं तत्र जिज्ञासा

तवेति तत्राह। यावदिति। इदमहं करोम्यद्याऽकरवम् श्वे च करिष्यामी-
त्याद्यनुभवैः प्रत्यक्षादिप्रमाणाधीनैः, शास्त्रफलं प्रयोक्तरीतिन्यायानुगृही-
तया स्वर्गकामो यजेतेत्यादिश्रुत्या चात्मनि त्रैकालिककर्तृत्वादिसंसारसं-
बन्धनिश्चयात्तस्यासंसारित्वविषयश्रुतिशतेनापि वह्निरनुष्ण इति वाक्येने-
वायोग्यतानिश्चयान्निर्विचिकित्सो बोध एव न जायते, तेनात्मनोऽसङ्ग-
त्वादिप्रतिपादकं श्रुतिवचो बधिरेषु श्रोतृषु सङ्गीतमिवानर्थकं प्रतिभाति,
ततस्तत्र जिज्ञासा मम समुल्लसतीत्यर्थः। तर्हि तव चित्तदोषात्तद्बाधानुदये
श्रुत्या मया वा किं कर्तव्यमित्याशङ्क्य त्वयैव युक्तितस्तद्दोषापनयेन स
बोधः सम्पादनीय इत्याह। तस्मादिति॥ ६०॥

मू० ॥ कर्त्रादेरवभासकत्वमगमः शुद्धः स्वयंभास्वर-
श्चैतन्येन निजेन तेन भवतः कर्त्रादिबुद्धिर्भ्रमः॥
कूटस्थस्य चिदात्मनस्तव कुतः कर्तृत्वभोक्तृत्वयोः
शङ्का जागरितेऽपि कारकगणं कर्त्रादिकं पश्यतः॥ ६१॥

टी० ॥ एवं शिष्येण प्रार्थितो गुरुः प्रत्यगात्मनि संसारित्वप्रमि-
तिविरोधादसंसारित्वं दुरवगममित्युक्तं निराकुर्वन्नात्मनि कर्तृत्वादिबुद्धेर्दे-
हतादात्म्यादिबुद्धेरिव प्रबलानुमानविरोधाद्भ्रान्तित्वं तावदाह। कर्त्रादेरि-
ति। आत्मा कर्त्रादिरूपो वस्तुतो न भवति तदवभासकत्वाद् यो यदभा-
सकः स तदात्मा न भवति यथा घटद्रष्टा घटानात्मा, कर्त्रादिः स्वव्य-
तिरिक्तद्रष्टृको दृश्यत्वाज्जडत्वादित्यादिप्रयोगाणां प्रबलत्वात्तद्विरोधात्त-
वाहं कर्ता भोक्तेत्यादिबुद्धिर्भ्रमस्ततस्त्वं शुद्धः नित्यमुक्तः। नन्ववभासक-
त्वमवभासक्रियाकर्तृत्वमेव ततश्च प्रतिज्ञाहेतुवचनयोर्व्याघात इति चेत्त-
त्राह। चैतन्येन निजेनेति। अस्य कर्त्रादेरवभासकत्वमित्यनेन संबन्धः। नि-
जेन स्वरूपतया नित्येनेत्यर्थः। तथा चात्मनस्तत्र कर्तृत्वासंभवात्तद्बले-
नात्मनः कर्त्रादिसत्ताप्रकारकसंशयादिविरोधित्वमेव तदवभासकत्वमिति
नोक्तव्याघातः। तर्ह्यात्मनो ज्ञानगुणकत्वात्तस्य तद्रूपत्वमेव नेत्याशङ्क्याह।
स्वयंभास्वर इति। आत्मनः स्वयंप्रकाशचिद्रूपत्वस्य पूर्वमुपपादितत्वादेव

वत्यमाणत्वाच्च चैतन्यं तदात्मकमेवेत्यर्थः । एतेनात्मन्येव दृश्यत्वहेतोरनैकान्तिकतेति निरस्तम्, चिदात्मनि तस्मिंश्चैतन्यविषयत्वरूपदृश्यत्वस्यैवाभावादिति भावः । चिद्रूपस्यात्मनः कादाचित्कक्रियाकर्तृत्वं तदधीनभोक्तृत्वं च स्यादित्याशङ्क्याह । कूटस्थस्येति । न तस्य कार्यं करणं च विद्यते कूटस्थमचलं ध्रुवमित्यादिवचनैरात्मनि सर्वव्यापारप्रतिषेधाद् विज्ञानं यज्ञं तनुत इत्यादिना सर्वव्यापारस्य बुद्धिकर्तृकत्वाभिधानात् साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः कर्त्रादिसाक्षिणस्तदात्म्यायोगादात्मनः स्वतःकर्तृत्वादिशङ्का कदापि न कार्येत्यर्थः ॥ ६१ ॥

मू० ॥ व्यापारं सकलस्य भासयति यो भास्वत्करो भास्करो
नासौ कर्तृतया जनस्य विदितो भूमौ द्युलोकस्थितः ॥
एवं स्वे महिमन्यवस्थितवतः संघातमुत्पश्यतः
स्वव्यापारसमन्वितं तव कुतः कर्तृत्वमुत्प्रेक्ष्यते ॥ ६२ ॥

टी० ॥ किं च योऽयं व्यापारमवभासयति स तत्र न कर्ता यथा दिविष्ठो भास्करो भूमिष्ठसकलजनवर्तिगमनादिव्यापारावभासको न तत्कर्तेति व्याप्तिः प्राकृतानामपि सुप्रसिद्धा, ततश्च चिदात्मापि पूर्वोक्तविधया सव्यापारकार्यकरणसंघातावभासकत्वात्तद्व्यापारे न कर्तेति निष्प्रत्यूहमनुमानोदयात्तस्य स्वतःकर्तृत्वमेवासंभावितमित्याह । व्यापारमिति । सकलस्य जनस्येति संबन्धः । भास्करस्य द्युलोकस्थित इति विशेषणमतिव्यवधानेन तस्य भूमिष्ठजनव्यापारे कर्तृत्वसंभावनैव नेति वक्तुम् । एवं पक्षेऽपि । स्वे महिमन्यवस्थितवत इति कूटस्थासङ्गानतिशयानन्दस्वरूपभूते महिमनि स्थित्युक्त्या नैकत्रापि व्यापारे कर्तृत्वसंभावनेत्युक्तम् ॥ ६२ ॥

मू० ॥ भूतानि पञ्च तव मोहसमुद्भवानि
संघातरूपपरिणाममुपागतानि ॥
कुर्वन्ति कर्मफलमश्नुवते च तेषां
साक्षी त्वमन्तरविलुप्तचिदेकरूपः ॥ ६३ ॥

Digitized by Google

टी० ॥ नन्वात्मनः स्वतःकर्तृत्वाद्यभावे यथाकारी यथाचारी तथा भवतीत्यादिश्रुतेः, कर्त्ता शास्त्रार्थवत्त्वादिति सूत्रस्य च पीडा स्यादित्याशङ्क्य, श्रुतेरेवंजातीयकाया औपाधिककर्तृत्वाद्यनुवादत्वादात्मन्यौपाधिकमपि कर्तृत्वं नेत्येतन्मतनिराकरणपरत्वाच्च सूत्रस्य नोक्तदोष इत्यभिप्रेत्य, तर्हि कोऽयं कर्तृत्वादिमानुपाधिरिति वीक्षायाम् "एतेभ्यो भूतेभ्यः समुत्थाय" "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः" "प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः" इत्यादिवचनात् कार्यकरणसंघाताकारपरिणताविद्यकभूतसंघात एव कर्तृत्वादिमानुपाधिरित्याह। भूतानीति। कर्तृसंघातमध्यप्रवेशमात्मनो वारयति। तेषामिति। अन्तःसाक्षीति संबन्धः। तत्र हेतुरविलुप्तेति ॥ ६३ ॥

मू० ॥ क्षीरस्य पूर्णे चषके निरस्तो
मणिर्यथा मारकतो महार्हः ॥
क्षीरं समस्तं तणमाषतस्तात्
करोति तच्छायमनूनतेजाः ॥ ६४ ॥

टी० ॥ ननु स्फटिके लौहित्यवच्चिदात्मनि कर्तृत्वादेरौपाधिकत्वे लोहितद्वयवत् कर्तृद्वयं विविक्तमेकदेहे प्रतीयेत, तथाऽलक्तकादौ स्फटिकत्वादिवत् कार्यकरणसंघाते चेतनत्वादि न प्रतीयेतेत्याशङ्क्य चिच्छायाग्राहिणि संघाते चिदभेदारोपान्नोक्तदोषद्वयमित्यभिप्रेत्य तच्छायाग्राहिणि तदाकारारोपे दृष्टान्तमाह। क्षीरस्येति। क्षीरेणेति यावत्। निरस्तः परीक्षाय प्रक्षिप्तः। तत्समस्तं क्षीरमिति संबन्धः। अनूनतेजा अनभिभूतप्रभायुक्त इत्यर्थः ॥ ६४ ॥

मू० ॥ तथा तमःसंभवमच्छमन्त-
र्बहिर्जडिम्नाऽन्वितमन्तरात्मा ॥
जगच्चिदेकच्छवि चित्स्वरूपः
करोति सान्निध्यवशेन विश्वम् ॥ ६५ ॥

Digitized by Google

टी० ॥ दार्ष्टान्तिकमाह । तथेति । चित्स्वरूपोऽन्तरात्मा तमस्तत्संभवं विश्वं जगच्च साविध्यवशेन व्यापाररहितस्वसत्तामात्रेण चिदेकरूपि चिदविविक्तच्छायाकारं करोतीति संबन्धः । ननु सात्त्विकस्य स्वच्छस्यान्तःकरणादेश्चिच्छायाग्राहित्वेऽपि भूतभौतिकात्मकस्य तामसस्य जगतोऽस्वच्छस्य कथं तच्छायाग्राहिता तदभावे वा चित्संबन्धाऽयोगात् कथं तत्स्फुरणं कथं वा तस्य तत्र स्थूलदेहे आत्मत्वाभिमान इत्याशङ्क्य जगद् विशिनष्टि । अच्छमन्तरित्यादिना । बहिः बुद्धेर्बहिर्भूतं बुद्ध्युपरागरहितं जडिम्ना तमसाऽस्वच्छभावेनान्वितमावृतमपि अन्तरच्छबुद्धितादात्म्यादभिभूतपराभावमभिभूतजाड्यं चेत्यर्थः । इदमत्राभिप्रेतम् । तत्तद्देहस्य तत्तदन्तःकरणसंपिण्डितचिदात्मन्यध्यासात् सात्त्विकान्तःकरणसंबन्धादभिभूतजाड्यस्य तस्य तद्वदेव स्वच्छत्वेन चैतन्यबिम्बोद्ग्राहितया तदात्मना प्रतीतिः क्षीरदृष्टान्तेनोपपद्यते, ततो बहिर्भूतघटादेरपि प्रमाणाधीनचिच्छायावदन्तःकरणोपरागादभिभूतजाड्यस्य चिच्छायावतस्तदधीनस्फुरणं चोपपद्यते, एवं पृथिव्यादिष्वपि तत्तद्देवतान्तःकरणतादात्म्यवत्सु तत्तद्देवतानामात्मत्वाभिमानः, एवं विराजोऽपि व्यापिसमस्तान्तःकरणतादात्म्यवति सर्वस्थूलप्रपञ्चेऽहमभिमान उपपद्यत इति सर्वमवदातमिति ॥ ६५ ॥

मू० ॥ तान्येव कार्यकरणानि बहुप्रकारं
भेदं च बिभ्रति भवानपि तत्र लग्नः ॥
भेदेन भाति जलपात्रनिविष्टमूर्ति-
मार्त्तण्डमण्डलवदन्वयमन्तरेण ॥ ६६ ॥

टी० ॥ ननु नानात्मानो व्यवस्था त इत्यक्षपादसूत्रवचनादात्मनि वस्तुतो नानात्वस्य तल्लिङ्गभूतकर्तृत्वादिव्यवस्थाया न्यायतः सिद्धत्वात् पूर्वोक्तं सर्वमनुपादेयमिति चेन्न, "एको देवः सर्वभूतेषु गूढः" "इन्द्रो मायाभिः पुरुरूप ईयते" "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्" "उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मे"-त्याद्यैकात्म्यपरश्रुतिविरोधाविर्मूलत्वात् सौत्रस्य हेतोर्व्यधिकरणासिद्धत्वा-

च्च तदेव सूत्रं सुगतादिसूत्रवदनुपादेयमित्यभिप्रेत्य कथं तर्ह्यात्मनि देवमनुष्यतिर्यगादिभेदप्रतिभास इति वीक्षायां तस्यौपाधिकत्वमुपाधिनिर्दुष्टपुरःसरं सदृष्टान्तमाह । तान्येवेति । कर्तृत्वाद्युपाधितयोक्तान्येवेत्यर्थः । बहुप्रकारं देवमनुष्यादिलक्षणम् । चशब्दः कर्तृत्वसमुच्चयार्थः । तत्र कार्यकरणसंघाते । लग्नो मिथ्यातादात्म्यमुपगतः । अन्वयं वास्तवसंबन्धम् । अन्तरेण विना । भिन्नोपाधिपरामर्शमन्तरेणाप्रतीयमानत्वाद् भेदानां मिथ्यात्वम्, जलपात्रेषु रविभेदवत्, इतरथा रवेरपि स्वतो नानात्वं स्यादिति भावः ॥ ६६ ॥

मू० ॥ अध्यात्ममेवमधिभूतमथाधिदैवं
सूत्रं विराजमपि पश्यसि साक्षिभूतः ॥
साक्षित्वकारणमशेषजगन्निदान-
मज्ञानमात्मचिदवज्वलितं सदैव ॥ ६७ ॥

टी० ॥ तर्हि चिदात्मनः प्रमातृत्वं स्वाभाविकमन्यस्याचेतनस्य तदसंभवादिति शङ्कां निराकुर्वन् सर्वशरीरेष्वात्मभेदस्यौपाधिकतया मिथ्यात्वप्रतिपादनफलं तदैक्यसिद्धिमाह । अध्यात्ममिति । अहमित्यात्मतया भासमानं शरीरादिकं तद्धर्मश्चेत्यर्थः । अधिभूतम् इदन्तया पराक्त्वेन भासमानानि सविकाराणि आकाशादिभूतानीति यावत्, अधिदैवम् आध्यात्मिककरणानुग्राहकं सपरिकरमादित्यादिदेवताजातम्, सूत्रं प्राणप्रधानसमष्टिलिङ्गोपाधिकम्, विराजं स्थूलसमष्ट्युपाधिकं च त्वमेव साक्षिभूतः पश्यसि कूटस्थस्वरूपचैतन्येनैव तद्गोचराभिज्ञादिव्यवहारं प्रवर्तयसि न तु प्रमातृतया, मातृमानादिसाक्षिणि तदसंभवात्तस्याः कर्तृत्वादिसमानयोगक्षेमतया साभासबुद्धिधर्मत्वोपपत्तेश्च, आत्मनि तदवभासस्तदुपाधिनिबन्धन इति न तस्य स्वतः प्रमातृतापीति भावः । ननु कूटस्थासङ्गचैतन्यात्मनः केनापि संबन्धाभावात् कथं सापेक्षप्रतियोगिकं सर्वसाक्षित्वमित्याशङ्क्य, अघटितघटकाज्ञानप्रयुक्तानिर्वचनीयसंबन्धादेव तस्य सर्वसाक्षितोपपत्तिरित्यभिप्रेत्याह । साक्षित्वकारणमिति । सदैवात्मचिदवज्वलितं यावत्सत्त्वमात्मचैतन्यावभासितमित्यर्थः ॥ ६७ ॥

Digitized by Google

मू० ॥ देहव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
देहव्यक्तिर्देहताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ६८ ॥

टी० ॥ नन्वज्ञानादप्येकस्मिन्नेव देहेऽहंममाभिमानात् मम तेनैव संबन्धो न देहान्तरैस्तत्र तदननुभवान्मानान्तराऽभावाच्च ततो न युक्तं सर्वदेहसाक्षित्वं ममेत्याशङ्क्य तत्तत्समस्तदेहाभिमानिनस्त्वदभिन्नत्वा-न्मैवमित्यभिप्रेत्य सर्वशरीरेषु तत्त्वतो जीवाभेदेऽनुमानान्याह । देहव्यक्तिरि-त्यारभ्य सप्तभिः श्लोकैः । विप्रतीतिः विप्रतिपत्तिः । तदास्पदत्वं तद्गोचरः । तावकी । त्वदीया त्वया ममायं देह इति निश्चितदेहातिरिक्ताः सर्वे देहास्त्वदात्मना सात्मकाः, तवैव भोगायतनानीति वा देहत्वात् त्वया तथानिश्चितस्वदेहवदित्यर्थः । तर्हि मम सर्वदेहवर्त्तिभोगानुसंधानं स्या-दित्याशङ्क्यैतदन्तःकरणविशिष्टस्य तव परिच्छिन्नत्वेन सर्वभोगसंबन्धा-भावाद् न तदनुसंधानम्, तदुपलक्षितचिन्मात्ररूपस्य तव सर्वसाक्षितया सर्वानुसंधानमिष्टमेव, ततस्तस्य सर्वशरीरेष्वैक्ये न किं चिद् बाधकमित्य-भिप्रेत्य तदुपसंहरति । तस्मादिति । एवमुत्तरत्रापि योज्यम् ॥ ६८ ॥

मू० ॥ संविद्व्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
संविद्व्यक्तिः संविदात्मत्वहेतो-
स्तस्मादात्मा सर्वभूतस्थ एकः ॥ ६९ ॥

टी० ॥ एवं देहवद्देवैकात्मसंबन्धित्वेनाविप्रतिपन्नैकव्यक्तिदृष्टान्तेन तदितरेषु तज्जातीयेष्वनेकात्मसंबन्धित्वेन विप्रतिपन्नेषु वस्तुषु तज्जातीय-त्वहेतुना तदेकात्मसंबन्धित्वमनुमेयम्, ततश्च सर्वेष्वात्मीयेषु विप्रतिपद्य-मानैरैक्यं वास्तवमवश्यमुपेयमित्यभिप्रेत्य धर्म्युपस्थितिक्रमेण कतिपयानुमा-

नानि दर्शयति । संविद्व्यक्तिरित्यादिना । वैदिकाभिमतस्वप्रकाशस्फुरणं संविच्छब्दार्थः । अन्यत् समानम् ॥ ६९ ॥

मू० ॥ बुद्धिव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
बुद्धिव्यक्तिर्बुद्धितात्कारयोगेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७० ॥

टी० ॥ साङ्ख्ययोगवेदान्त्यभिमता बुद्धिर्बुद्धिशब्दार्थः ॥ ७० ॥

मू० ॥ अक्षव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
अक्षव्यक्तिस्त्वक्षतात्कारयोगेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७१ ॥

टी० ॥ विप्रतिपन्नमिन्द्रियसमुदायमेकैकं चक्षुरादिकं वाऽभिप्रेत्याक्षव्यक्तिरित्युक्तम् ॥ ७१ ॥

मू० ॥ ज्ञानव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव
ज्ञानव्यक्तिर्ज्ञानतात्कारयोगेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७२ ॥

टी० ॥ जडज्ञानं ज्ञानशब्दार्थः ॥ ७२ ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालयाध्यापकेन श्रीद्विवेदहरिनाथशर्मणा ।

Digitized by Google

॥ श्रीः ॥

श्रीमद्रामानुजाचार्यप्रणीत इति प्रसिद्धो

वेदान्ततत्त्वसारः ॥

श्रीमते रामानुजाय नमः ॥

"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मे"त्यत्राद्वितीयशब्देन सजातीयादिभेदशून्याङ्गीकारे कथं तादृशस्य जगद्व्यापारः। मायाङ्गीकारेणेति चेत् किं तदानीं निर्विशेषज्ञानमात्रस्वरूपं ब्रह्म माया तिष्ठतीति जानाति न वा, जानाति चेत् ज्ञानमात्रस्य कथं ज्ञातृत्वम्। न जानाति चेत् अज्ञत्वात्कथमङ्गीकरोति। अपि च यत्किञ्चिच्छक्तियोगेन मायाङ्गीकारानन्तरमभ्युपेयते भवद्भिः तत्पूर्वं

In the text "Truly (1) existent, my dear child, was this in the beginning, one only without a second, Brahma", since by the words "without a second" that (2) is affirmed which is devoid of difference belonging to the same class etc.. how is such a being capable of mundane activity? (How can he engage in the creation, sustentation, and retractation of the universe?). If you say that this takes place by the appropriation of Māyā, then, we ask, does Brahma, whose essence is undifferenced (3)

1. Chhāndogya Upanishad VI. 2. 1

2. Brahma is said by the Śānkara Vedāntins to be devoid of difference inherent in the same class of things, in a different class, and in an individual of a class. These differences are, respectively, what distinguishes one piece of cloth from another, a piece of cloth from a water pot, and the top of a tree from its root. See also Pañchadaśī, *Pandit* Vol. V. p. 667.

3. The idea is that before the (illusory) creation of the universe Brahma is not differentiated, *i. e.* is pure knowledge, or intelligence, without any distinction in itself, or in relation to objects; and that in order to this creation he admits (angīkaroti) Māyā to association and union with himself, and, thus associated and united with Māyā, becomes

Digitized by Google

मायाङ्गीकारानुगुणशक्त्यभ्युपगमे निर्विशेषत्वहानिः । किञ्च तदानीं किं मायाविलक्षणं ब्रह्म उताविलक्षण्येन मायात्मकम् । यदि विलक्षणं वस्तुतःपरिच्छेदादनंतत्वं ब्रह्मणो न स्यात् । अथ मायात्मकम् तद्यङ्गीकारवचनं निरर्थकं, "सत्यं ज्ञानमनन्तं ब्रह्मे"तिलक्षणवाक्यमप्यपार्थं स्यात्, सजातीयविजातीयव्यावृत्त्यर्थं हि लक्षणम्,

knowledge only, (4) then know that Māyā exists, or does he not? If you say that he knows, how can that which is pure knowledge only be a knower? If you say that he does not know, then since he is without knowledge (is not a knower,) how can be appropriate Māyā? (5) Moreover, as regards what you acknowledge after the appropriation of Māyā by means of a certain capacity possessed by Brahma, there must be prior to this a loss of undifferencedness, seeing that you acknowledge a capacity conducive to the appropriation of Māyā.

Again, Is Brahma at that time different from Māyā in qualities and nature, or is he, as not so differing, identical with

---

differenced and capable of creation etc. According to the Śānkaras Brahma is impersonal, while the Rāmānujīyas hold that he is a personal and conscious being. The pronoun he used in the translation seems necessary in English, but it is not intended to imply personality, for it is the Śānkara doctrine that is under discussion.

4. At the time of the appropriation of Māyā, and before the (illusory) creation of the universe.

5. Even prior to the creation etc. acknowledged after the appropriation of Māyā, Brahma cannot be wholly undifferenced, from the very fact that you must admit that he is capable of appropriating Māyā. Two other readings of the first clause do not seem of much value. They are "Apicha Yatkiñchichchhaktiyogam Māyāngīkārartham abhyupeyate bhavadbhiḥ "and "Apicha Yatkiñchichchhaktiyogam Māyāngīkārānantaram abhyupeyate bhavadbhiḥ." They may be translated thus,—"Moreover, as, in order to establish this appropriation of Māyā, you acknowledge that (Brahma) is possessed of a certain capacity (for that appropriation)" And "Moreover, as you acknowledge that (Brahma) is possessed of a certain capacity (for creation etc.,) after the appropriation of Māyā."

तदन्यानिष्ठतन्निष्ठधर्मबोधो हि नान्यथा । ननु शिष्योपदेशार्थमध्यारोपापवादन्यायेनेदमुच्यते, "असर्पभूतायां रज्जौसर्पारोपवद् वस्तुन्यवस्त्वारोपोऽध्यारोपः, वस्तु सच्चिदानन्दाद्वयं ब्रह्म, अज्ञानादिसकलजड़समूहोऽवस्तु, अज्ञानन्तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्ति, अहमज्ञ इत्यनुभवात्", अन्यथा निर्विशेषस्य कथं जगत्कारणत्वमिति चेत् । तर्ह्येवं जगन्मिथ्यात्ववादे शिष्याचार्ययोः तदुपदिष्टज्ञानस्यापि तदन्तर्गतत्वा-

Māyā? If (6) Brahma does so differ, then by reason of limitation by substance he is no longer infinite. And if he is identical with Māyā, then the declaration that Brahma appropriates Māyā would be meaningless and absurd. The defining sentence (7) "Brahma is real, knowledge, infinite" would also be (8) inapplicable, for a definition is intended to exclude what belongs to the same class and to other classes; for knowledge of a property which inheres in some particular thing, and does not inhere in what is other than that thing, is not otherwise conveyed than by such a defining sentence.

---

6. If Brahma does differ in nature and qualities from Māyā, then Brahma and Māyā form two distinct substances, and Brahma must be limited by Māyā as a separate substance, and so is not the great whole. This objection is urged in accordance with the doctrine of the Śānkaras, who hold that kālato deśato vastutaścha parichchhedo nāsti (Brahma is not limited by time, space, and substance). On the other hand, the Rāmānujīyas hold that though Brahma is thus limited by the existence of another substance, viz, achit (matter) he is still infinite (that is, all-pervasive). Vide Taittirīya Upanishad II. 1. Bhāshya, in loco, and Pañchadaśī, Paṇdit vol VI. p. 104.

7. Taittirīya Upanishad II. 1.

8. If Brahma is identical with Māyā, then, according to the Śānkara's view of Māyā, he ought to be described as,—"Unreal, ignorance, and finite." Hence this special lakshaṇa would not apply, and lakshaṇa in general would also have no place; for difference inherent in the same class of things, and in a different class, would not exist in such a case, there being only one substance—Brahma.

च्छिष्योपदेशार्थं कल्पितमित्यपि न शक्यते वक्तुम्, कल्पिताचार्य्योपदिष्टेन कल्पितज्ञानेन कल्पितस्य शिष्यस्य का वार्थसिद्धिः । निर्विशेषचिन्मात्रातिरेकि सर्वं मिथ्येतिवदतो मोक्षार्थश्रवणादिप्रयत्नो निष्फलोऽविद्याकार्यत्वात्, शुक्तिकारजतादिषु रजताद्युपादानादिप्रयत्नवत् । मोक्षार्थप्रयत्नोऽपि व्यर्थः कल्पिताचार्यायत्तज्ञानकार्यत्वात्, शुकप्रह्लादवामदेवादिप्रयत्नवत् । "तत्त्वमस्या"दिवाक्यजन्यज्ञानं न बन्धनिवर्तकं अविद्याकल्पितवाक्यजन्यत्वात्, स्वयमविद्यात्मकत्वात्, अविद्याकल्पितज्ञानाश्रयत्वात्, कल्पिताचार्य्यायत्तश्रवणजन्य-

But you will say that this (9) is asserted for the instruction of the student according to the rule of (10) ascription and negation—"(11) Ascription is the imagining of the unreal in the real, like that of the snake in the rope which is not really a snake (but a rope only)—The real is Brahma, the existent, intelligence, joy, and secondless; the unreal is the whole assemblage of insentient objects, viz., (12) ignorance etc. As for

9. The appropriation of Māyā, and the consequent creation etc., of the world, omniscience as Īśvara, etc.

10. The Śānkara will say that all this is ascribed to Brahma, (*i. e.* Brahma is imagined as the subject of the appropriation of Māyā, and the illusory generation etc. of the universe) by the teacher in order not to shock the student's prepossessions about the reality of the universe, etc. But the teacher only ascribes this, in order, step by step in his teaching, to advance to a complete negation of the reality of the world, the bondage of the individual soul, and the difference between that and Brahma.

11. Śānkara Vedāntasāra, p. 5. Calcutta printed edition. This quotation gives in a nutshell the Śānkara's notion of the world as an unreal substance erroneously superposed on, or imagined to exist in, Brahma as its substratum, and the only real substance; just as when on a dark night a rope mistaken for a snake is the real substance, and the substratum, so to say, of the imaginary snake.

12. *i. e.* the conditioning adjunct of jiva, original ignorance, and its effects jagadjanmādi.

Digitized by Google

त्वाद्वा, स्वप्नबन्धनिवर्तकवाक्यजन्यज्ञानवत् । नन्वाचार्यतज्ज्ञानयोः कल्पितत्वेपि स्वप्नदृष्टसिंहभयेन प्रबोधवज्ज्ञानोत्पत्तिः सम्भवतीति चेन्नैवं दृष्टान्ते परमार्थदोषस्य स्वप्नस्य सिंहरूपासदर्थावलंबि ज्ञानं प्रति कारणत्वं ज्ञानस्य भयं प्रति भयस्य प्रबोधं प्रति, प्रबुद्धोपि देवदत्तः परमार्थः । दार्ष्टान्ते तु सर्वस्य मिथ्यात्वेन दृष्टान्तानुपपत्तिः । अपिचास्मिन् सिद्धान्ते "नारायणः परं ब्रह्म आत्मा नारायणः पर"

ignorance, they declare it to be something that cannot be described either as existent or non-existent, constituted of the three qualities, adverse to knowledge, having (13) the form of an entity, as attested by the cognition I am ignorant,"—and you will ask how (14) in any other way could the undifferenced be the cause of the world? We reply, Then if you thus affirm the falsity of, the universe, you cannot also affirm that it (the universe) is feigned by the teacher to assist in the instruction of the student, because the teacher and the knowledge imparted by him would be included (as false)—what benefit would be obtained by a feigned student by means of feigned knowledge taught by a feigned teacher? And in the case of one who alleges that everything except pure undifferenced knowledge is false, the effort of (15) reading etc., in order to attain liberation is futile, because it (the effort) is an effect of ignorance; like the effort to acquire nacrine silver etc. The effort to attain liberation is also nugatory, because it is the effect of knowledge resting (for its impartation) on the agency

13. The Śānkaras suppose that such cognitions denote that ignorance is a real entity (or, a something positive), for when, they would ask, self-knowledge (*i. e.* consciousness) exists, how can we cognise at the same time a (mere) negation of that knowledge?

14. How can we suppose the undifferenced Brahma to engage in real creation etc.,? It is only by the aforementioned attribution of ignorance, or illusion, to Brahma that he can be regarded as the cause of the illusory universe.

15. Reading and study of the Vedānta with the teacher in order to obtain true knowledge of the self.

Digitized by Google

इत्यादिश्रुतिप्रतिपादितो नारायणः प्रथमगुरुर्ब्रह्मणा कल्पितः पूर्णं ब्रह्म सनातनः पुरुषोत्तमोऽर्जुनेनकल्पितः कल्पिता च तदुपदिष्टा सर्व्वशास्त्रमयी गीतेत्येवं दुःसिद्धान्तापत्तिदोषः प्रज्ञामानिभिः कथं न विचारणीयः । अथ चेतत्सिद्धान्तनिष्ठैरपि स्वस्वगुरुविषये मायाकल्पित इत्येवंवक्तव्यत्वे "गुरुरेव परं ब्रह्म गुरुरेव परागतिः" "सहि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म तस्मै न द्रुह्येत कदाचन" "आ-

of a feigned teacher; like (16) the effort of Śuka, Prahlāda, Vāmadeva, etc. The knowledge derived from texts like "That (17) thou art" does not put an end to bondage, because (18) it originates from a sentence feigned by nescience, because it is itself of the nature of nescience, because it rests on knowledge feigned by nescience; or because it originates from hearing (the teaching of the Vedānta) which is dependent on a feigned teacher, just as in sleep knowledge (19) derived from a sentence (heard therein) does [not] put an end to bondage (experienced in the waking state).

But it may be asserted that although the teacher and the knowledge inculcated by him are both feigned, yet it is possible that knowledge may be produced in the student, like the waking

16. For according to the system of the Śaṅkaras everything but Brahma is unreal; hence the endeavours of the unreal Śuka, etc., were unreal and nugatory.

17. Chhāndogya Upanishad VI. 8. 7.

18. As the world and all its conditions are illusory, so the Veda, also, as belonging to the mundane state, is feigned and unreal, the knowledge derived from it is of like character, and also the intelligence which in the form of teacher and student is its recipient.

19. The knowledge derived from such texts is according to you purely illusory, *i. e.* has no real existence, being itself part of this illusory world, and its effect, therefore, is just as unreal as that of knowledge derived from a sentence heard in sleep would be, which knowledge only seems to put an end to bondage, but does not do so in reality, for the unreal knowledge attained in sleep cannot have a real effect.

Digitized by Google

चार्य्यं मां विजानीयादि"त्यादिश्रुतिस्मृतिविरोधः कथं न परामर्श-नीयः । नन्वतत्त्वज्ञानदशायामुपदेशादयः सत्या एव जाते तु ज्ञाने "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदि"त्यादिश्रुतेर्न द्वैतदर्शनमिति चेत् तर्ह्यद्वितीयात्मसाक्षात्काराद्विनष्टमूलाज्ञानतत्कार्य्यस्य कथं द्वैतदर्शनपूर्वकोपदेशादिव्यवहाराः । बाधितानुवृत्त्येति चेत् सम्य-

consciousness produced by fear of a lion seen in a dream. To this we reply, not so—in the illustration the dream, although a (20) defect, is a real thing, and is the cause in relation to the knowledge which is dependent on the non-existent object, viz., the lion—knowledge is the cause in relation to fear—fear in relation to waking, and moreover the awakened Devadatta has a real existence. On the other hand, in the subject of the illustration, (viz., the manifested universe) everything is unreal, and therefore the illustration is inapposite. Besides, according to this doctrine (of the falsity of the universe), the Nārāyaṇa (Vishṇu) described in,—"Nārāyaṇa (21) is the supreme Brahma, the supreme spirit is Nārāyaṇa,"—and other passages of the Śruti, is feigned as the first teacher by Brahmā, and is feigned as the perfect Brahma, the Eternal, the Best of Beings, by Arjuna (22); and the song which he (Kṛishṇa) taught, containing the essence of all the Śāstras, is also feigned. That such an evil conclusion should follow is surely a fault which ought to be well considered by those who pride themselves on their wisdom. Besides, as those who hold this doctrine must also say in the case of their own teachers, that they are feigned by Māyā, they ought to take into account how this opposed to the following passages of the Śruti and

20. Avidyā is the supreme original defect, and all others proceed from it. A defect is defined as that by what a thing appears as other than it really is. For instance, by the power of Māyā the world appears real, but Brahma its substratum is alone real, and the world false.

21. Probably a quotation from the Nārāyaṇa Upanishad.

22. In the Bhagavadgitā.

Digitized by Google

ज्ञानप्रवृत्तिवेलायां बाधितानुवृत्तिः तिष्ठति न वा, तिष्ठति चेत् "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन" इत्यादिप्रमाणविरोधः अनुभवविरोधश्च, रज्जुसाक्षात्कारदशायां सर्पभ्रमानुपलम्भात् । न तिष्ठति चेत् उपदेशसमये सम्यग्ज्ञानप्रवृत्तत्वेन बाधितानुवृत्त्यसम्भवात्कथं द्वैतदर्शनं तत्कृतोपदेशश्च । अथ च "विद्वाविता मोहमहान्धकारो य आश्रितो मे तव सन्निधानात्, विभावसोः किन्नु समीप-

Smriti,—"The teacher is verily the supreme Brahma, the teacher is the highest refuge." "For he begets him (the student) by means of knowledge, that is the best birth; let him (the student) never bear ill-will against him (the teacher.)" "Let him know the teacher to be me (Brahma.)"

Again, if it be said that in the absence of true knowledge instruction and other usages are indeed (23) real, but when knowledge is gained, there remains no perception of duality; according to the Śruti,—"But (24) when to him (the wise) all has become spirit only, then what should he perceive by means of what,"—we ask, How can there exist the practice of instruction etc., accompanied by the perception of duality, in the case of one (25) whose (26) original ignorance and its effects have been destroyed by the intuition of the secondless spirit? If you say that this is owing to the persistence of the negated, (27)

23. *I. e.*, seems to be real.

24. Bṛihad Āraṇyaka Upanishad II. 4. 14.

25. Viz. the teacher, who must have attained to true knowledge in order to teach others.

26. Original ignorance is that by which the whole world seems to him to exist.

27. Viz. ignorance and its effects. The world, transmigration etc., have been shown to be false, and exploded, but ignorance and its influence still remain, like the odour which remains in a pot of garlic after it has been washed, or like the ashes of a piece of cloth consumed by fire (Siddhāntaleśa, Parichchheda 4.)

Digitized by Google

गस्य शीतं तमो भीः प्रभवन्त्यजाद्य" इति वादिन उद्धवस्य स्वतत्त्वज्ञानस्फूर्त्तिप्रकाशनवेलायां बाधितानुवृत्त्यसम्भवे "नमोऽस्तु ते महायोगिन् प्रपन्नमनुशाधि मां यथा त्वच्चरणाम्भोजे रतिः स्यादनपायिनी"तिभेददर्शनमूलविज्ञापनं कथं सम्भवति । रज्जुसाक्षात्कारदशायां सर्पभ्रमानुपपत्तिवदुपदिश्यमानतत्त्वज्ञानानुसन्धानेनाद्वितीयात्मसाक्षात्कारे सति बाधितानुवृत्त्यनुपपत्त्या उपदेशानुपपत्तिस्तदवस्था ।

then, we ask, does this persistence of the negated exist at the time when right knowledge obtains, or does it not? If it does, then this would be opposed to "But (28) in the case of those whose ignorance has been destroyed by knowledge of the self" and similar authorities, and also opposed to the evidence of consciousness, seeing that the mistake of there being a snake (imagined as existing in the rope) is not to be found when there is immediate perception of the rope (as a rope.) If it does not exist, then we reply that as right knowledge obtains at the time of instruction, and the persistence of the negated is there fore impossible, how can there remain a perception of duality, and the teachings resulting (29) therefrom? Moreover, the persistence of the negated being impossible at the time when Uddhava thus declared the revelation to him of true knowledge,—"By (30) thy approach the delusion and great darkness which abode in me have been dispelled. How, indeed, can cold, darkness and fear prevail over one who has drawn nigh the sun, O first of the unborn (gods),"—how could he make the following request founded on the perception of difference—"Salutation to thee, O great Yogī: Instruct me who have taken refuge in thee, so that my devotion to thy lotus feet may be unfailing." Just as when there is

28. Bhagavadgītā V. 16.
29. *I. e.*, as before stated, in the case of the teacher.
30. Bhāgavata Purāṇa

तथा भगवदुपदिष्टतत्त्वज्ञानावधारणानन्तरं "नष्टोमोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत" इत्यादिना तत्त्वसाक्षात्काराविष्कारदशायां बाधितानुवृत्त्यसम्भवात्, तव प्रसादात् "स्थितोऽस्मिगतसन्देहः" दुर्य्योधनादीन् प्रति युद्धविषयं "तव वचनं करिष्य" इतिद्वैतदर्शनमूलमर्ज्जुनवाक्यं कथं सङ्गच्छेत । किञ्च परमार्थदोषमूलकेरज्जुसर्पादिदृष्टान्तैरपरमार्थदोषमूलेयं बाधितानुवृत्तिर्दुःसाध्यापि यत्कथञ्चिदुच्यते तद्द्विचन्द्रस्यैवोच्यताम् । आदावज्ञत्वं पश्चा-

direct apprehension of the rope the erroneous notion of there being a snake can no longer hold, so on the immediate intuition of the secondless spirit by means of reflection on the true knowledge which is being taught (by the teacher,) the persistent influence of the negated becomes impossible; and hence the impossibility of instruction remains the same as (31) before. In like manner, after (Arjuna's) full apprehension of the true knowledge taught by the Blessed One (Krishna,) inasmuch as the persistent influence of the negated was impossible when he manifested his intuition of the truth in the words,—"Delusion (32) is destroyed, and I have attained (33) recollection by thy favour undecaying One,"—how does Arjuna's (further) declaration founded on a perception of duality harmonize therewith, viz., "By thy favour I stand freed from doubts, I will do thy bidding with reference to fighting against Duryodhana and the others?"

Moreover, although you will find it hard to establish the persistent influence of the negated, which is produced by the unreal, by means of such illustrations as that of the rope and the snake, which (illustrations) have as their foundation really

31. In the case of the student.

32. Bhagavadgitā XVIII. 73.

33. Recollection is the uninterrupted abiding knowledge of the truth of things.

गुरूपदेशादिभिरधिगतज्ञानत्वं तेषामेव सम्भवति । ईश्वरस्य तु "यः सर्वज्ञः सर्ववित्" "परा ऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः" इत्यादिश्रुतिविरोधात्कथञ्चिदपि वक्तुं न शक्यते । कथं तर्हि तस्य द्वैतदर्शनमुपदेशादिव्यवहाराश्चेतिनिरूपणीयम् ।

(शेषमग्रे)

existing defects, (of error etc,) still if it (34) be affirmed at all, it should be affirmed of the embodied soul only—in the case of such souls alone is it possible that they should at first be ignorant, and afterwards experience accession of knowledge by means of the teacher's instruction, etc. But this (persistence of the negated) can nowise be asserted of the Divine Ruler, for it would be opposed to the following, and like passages of the Sruti.—"He (35) who knows all things (in general) and knows every thing (in particular"; "Transcendent (36) is his power it is revealed as truly manifold and essential, and also the operation of his knowledge and might"; "Who of himself, always, at one and the same time, knows all things by immediate perception." Therefore (37) it is to be considered how the perception of duality and usages of instruction can possibly pertain to him.

J. J. Johnson.

34. Viz. persistence of the negated.

35. Muṇḍaka Upanishad I. 1. 9.

36. Śvetāśvatara Upanishad VI. 8.

37. Íśvara is described as being a teacher; for example in the Mahābhārata as Vishṇu he teaches Brahmā, and in the Bhagavadgitā as Kṛishṇa he teaches Arjuna; hence persistence of the negated must pertain to him also, but this is opposed to all sacred authority. If perception of duality etc., are all products of nescience, then how can they pertain to the infinitely wise ?

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 167. Vol. IX.)

मू० एतदेव परामृश्य भट्टैरिदमुदाहृतं लक्षणस्याभिधानं तु केनांशेनोपयुज्यते [a] अन्याभिप्रायोक्तमपि हि तत्सामान्यतोऽप्युपपद्यमानमेवेति(१) अनुमानमपि(२) किमुच्यते [b] करणपक्षे लिङ्गपरामर्शोऽनुमानमिति चेत् किं लिङ्गत्वं व्याप्तस्य पक्षधर्मत्वमिति चेत् संशयस्योपलक्षणत्वे तच्च दृष्ट्वापि व्यापकं तत्परामर्शातिप्रसङ्गात् [d] अत एव न तस्य वर्तमानस्य [e] अतत्कालेऽप्युपलक्षणत्वात् [f] विशेषणत्वे चानुमाय व्यापकं धर्मिणाशवद्प्रवृत्त्यापत्तेः(३) * [g] पक्षधर्मोद्धतोः पक्षांशे विशेष्ये साध्यसिद्धिरीदृशं च वैयधिकरण्यमिष्टमेवेत्यतो नैवम्? *—इति चेन्न, ।

टी० ॥ ननु चोदनैव प्रमाणमेवेति च प्रतिज्ञाद्वयं निर्वाह्यं तत्र च पदार्थानां लक्षणमनुपपन्नमिति भट्टतात्पर्येण तु लक्षणानां समानासमानजातीयव्यवच्छेदो न फलमिति तदभिप्रायस्तथाच प्रकृतासङ्गतमिदमत आह—। [a] "अन्ये"ति । [b] "करणपक्ष" इति । भावसाधनत्वनिवृत्त्यै(४) पक्षधर्मत्वमिति हि सन्दिग्धसाध्यधर्मा धर्मी पक्षस्तद्धर्मत्वं तच्च सन्देहस्योपलक्षणतां दूषयति—। "संशयस्ये"ति । वह्निज्ञाने वृत्तेऽपि धूमपरामर्शः करणं स्यादित्यर्थः लिङ्गपरामर्शस्तत्र करणमेवानुमित्यनुत्पादस्तु सिद्धसाधनादिति न वाच्यम् लिङ्गपरामर्शस्य चरमकारणत्वोपगमादिति भावः

(१) { प्रत्यक्षं खण्डितं प्रागनन्ताभिरुपपत्तिभिः । सुदृढं खण्ड्यतेऽथानुमानं परिकरान्वितम् ॥ }

(२) अनुमानं दूषयितुं पृच्छति किमिति ।

(३) धर्मीति, धर्मी पर्वतादिर्निष्ठो यस्य वह्न्यादेः साध्यस्य तत्र धर्मिणाशवद्धह्वादेः वह्न्यार्थिप्रवृत्त्यनुपपत्तेरित्यर्थः ।

(४) भावसाधनत्वनिवृत्त्यै=अनुमितिरनुमानमिति भावव्युत्पत्तिकत्वनिवृत्त्यै ।

Digitized by Google

ननु व्यापकनिश्चयेन विरोधिना तत्र संशयस्य नाशाच्च तस्योपलक्षणत्वं यत्र स वर्तमानस्तत्रोपलक्षणं भवत्येवेत्यत आह–[d]"अत एवे"ति । वर्तमानस्योपलक्षणत्वमितिशेषः ॥ "अत एवे"ति । वक्ष्यमाणहेत्वतिदेशः तमेवाह–। [e]"अतत्काले" इति । [f]"(१)विशेषणत्वे" इति । सन्देहविशिष्टो धर्मी यदि पक्षस्तदा सन्देहनाशे विशिष्टस्य पक्षस्यापि नाशादनुमायां जातायामपि साध्यं कुत्र वर्ततेत्यर्थः ननु विशिष्टस्य पक्षत्वेपि तद्धर्माद्धर्माद्विशेष्यमात्रे साध्यसिद्धिरिति तस्यावस्थानादनुमितवह्निस्तत्रैव प्रवर्तते नचान्यधर्मादन्यत्र साध्यसिद्धावतिप्रसङ्गो विशिष्टधर्मस्य विशेष्ये साधकत्वनियमाभ्युपगमादित्याशङ्कते–। [g]"पक्षे"ति ।

मू॰ [a]पक्षमादायैव वैयधिकरण्ये नियतसामानाधिकरण्यलक्षणव्याप्तिलोपापत्तेः * [b]तथापि विशेष्यमादाय साऽस्ति ? * –इति चेन्न, [c]साध्यविशेषसिद्धिरपि यच्च व्याप्तिबलायातं सामान्यं तच्च सामान्यप्रतीत्यपर्यवसानबलादेवेति सामान्यविशेषसिद्ध्यनुपयोगिनी पक्षधर्मता त्वदिष्टा केवलं सिद्धसाधनपरिहारायानुमितिकारणत्वेनेष्टव्या सिद्धसाधनं च न स्वार्थानुमाने दोष इति नानुमितिमात्रहेतुनिवेशनी(२)सेति [d]मोक्षमाणैर्हि "(३)आगमेनानुमानेन ध्या-

---

(१) अथाज्ञातसतस्सन्देहस्य विशेषणत्वमाहोस्विज्ज्ञातसतः नाद्यः अज्ञातसतस्तस्य विशिष्टबुद्ध्यनियामकत्वेन विशिष्टबुद्धिविषयतामन्तरेण पर्वतादेः पक्षत्वानुपपत्तेरतएव नाज्ञातस्य विशेषणत्वमपीतराव्यावर्तकत्वात्–नहि स्वरूपसत्त्वमात्रेण विशेषणं सम्भवति येनाज्ञातस्यापि विशेषणत्वमङ्गीक्रियेत तदेव हि विशेषणं यद्व्यावर्त्तयतीतरस्माद्विशेष्यमज्ञातस्य च विशेष्या व्यावर्त्तकत्वादिति नाज्ञातस्य विशेषणत्वम् । नापि द्वितीयः ज्ञातस्य व्यावर्त्तकत्वेपि ज्ञानस्य स्वोत्पत्तितृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेनेति सन्देहनाशानन्तरं विशिष्टस्य पक्षस्यापि नाशाज्जातायामनुमितौ साध्यं निराश्रयं स्यादित्याह–विशेषणत्वे–इतीति–

(२) सेति–पक्षधर्मतेतीत्यर्थः ।

(३) अत्रागमेत्यादिना न शब्दादिप्रमाणमभिप्रेतमपि तु श्रवणादित्रयम् । प्रगल्भाचार्यास्तु "आगमेनानुमानेने"त्यादिपद्येन न श्रवणादि त्रयमभिहितमपि तु "ध्यानाभ्यासरसेन चे"ति द्वितीयपादेनानुमानानन्तरं प्रत्यक्षवदागमानन्तरमनुमानभिधीयतइत्यर्थं

नात्र(१)त्यक्षणे न च चिदात्मनि प्रमाणानां (२)सम्प्लवः स्वार्थमुच्यते" इति '(३)एतेन संशययोग्यतापि निरस्ता ।

टी० ॥ एवं सति लिङ्गलिङ्गिनोः सामानाधिकरण्यं व्याप्तिरिति यदुच्यते तद्भज्यतेति परिहरति ॥ [a]"पक्षमादाये"ति । ननु विशिष्टे सामानाधिकरण्याभावेपि विशेष्ये तदुभयसामानाधिकरण्यसत्वान्न व्याप्तिलोप इत्याशङ्क्‌ते–। [b]"तथापी"ति । एवं सति पक्षधर्मता नानुमित्यङ्गं स्याद् व्याप्तिबलादेव सामान्यं सिध्यद्विशेषमादायैव सेत्स्यतीति विशेषसिद्धावपि तदनुपयोगादिति परिहरति–। [c]"साध्यविशेषे"ति । स्वार्थानुमाने सिद्धसाधनस्यादोषत्वमाह–। [d]"मोक्षमार्गेरि"ति । मुचोऽकर्मकस्य सनि रूपं तथाच मुमुक्षुभिरित्यर्थः आगमावगतात्मनि मननबोधनात् सिद्धसाधनं न दोषः श्रुतिबोधितेष्टसाधनताकस्य मननस्यानुमित्साहेतुकत्वेन तत्र संशयस्यानपेक्षणात् प्रकारान्तरेण श्रवणं तदन्यप्रकारेण संशयान्मननमित्यसारं श्रवणमननयोः समानप्रकारकत्वावगमादिति भावः ॥ [e]"एतेने"ति । पक्षधर्मताया अनङ्गत्वप्रदर्शनेन साधकबाधकमानाभावलक्षणसंशययोग्यताघटितं पक्षत्वं निरस्तमित्यर्थः यद्वा साधकमाने सत्यपि मननप्रवृत्तिदर्शनेनेत्यर्थः ।

मू० [a]व्याप्यत्वमिति चेत् किं वस्तुगत्या व्याप्यस्य स्वरूपेण परामर्शोऽनुमानं व्याप्यतया वा नाद्यः [b]अगृहीतव्याप्तिनापि धूमादिपरामर्शस्यानुमानताप्रसङ्गात् नापि द्वितीयः

ब्रुवते तथा चैतन्मतेप्यागमिकात्मावगमान्तरमनुमानविधानाच्च पक्षतायास्तवंत्र हेतुत्वं तत्र प्रगल्भाचार्य्यकृत एवार्थस्समर्थितोऽति मन्ये तत्र सिद्धिसत्वेप्यनुमिति दर्शनेन न पक्षतायास्सर्वत्रकारणत्वमिति पक्षधर्म्मताहेतुत्वनिरासकप्रकृतग्रन्थोपयोगित्वात्तद्दर्शस्य श्रवणानन्तरंमननबोधने तु मननस्यापि साक्षात्काररूपत्वेन सिद्ध्यनन्तरमनुमितेरबोधनाच्च तद्ग्रन्थस्य पक्षधर्मताहेतुत्वनिरासकत्वं सम्भवति श्रवणादि त्रितयविधानवादिमत इति ।

(१) प्रत्यक्षणेनेति प्रत्येकागमाद्यन्यपि ।

(२) सङ्करः । एकधर्मिगोचरत्वमिति यावत् ।

(३) ननु तत्र साधकमानाभावरूपायाः पक्षधर्मताया असत्त्वेपि संशययोग्यत्वरूपापक्षधर्म्मतास्त्येवेति न पक्षतायामनुमितिमात्रहेतुत्वनिरास इत्यत आह-एतेनेति ।

Digitized by Google

[c] व्याप्युल्लेखिनः प्रमाणस्यानुमानत्वप्रसङ्गात् तस्यापि (१)व्याप्यत्वग्राहितया अवश्यं वक्तव्यत्वात् [d] अत एव द्वितीयतृतीयविशेषणे अपि निरस्ते [e] धारावाहिनि तथात्वापत्तेः [f] गृहीतव्याप्तिना च युगपदुभयग्रहणे द्वावेतौ व्याप्यव्यापकाविति परामर्शस्यानुमानत्वप्रसङ्गात् * नच तदनुमानमेव*, असन्दिग्धतया पक्षत्वाभावेन तद्धर्मस्य हेतोः सिद्धसाधनव(२)दपक्षधर्मत्वात् * स्वार्थानुमाने नायं दोष ?*—इति चेन्न, [g] प्रत्यक्षलक्षणोपपत्त्या साक्षात्त्वासाक्षात्त्व विरोधापत्तेः ।

टी० ॥ पक्षधर्मता चेदनङ्गमस्तुर्तहि व्याप्यत्वमेव लिङ्गत्वमित्याह—। [a] "व्याप्यत्वमि"ति । वस्तुगत्या यद्व्याप्यं तस्य परामर्शो व्याप्यत्वेन वा परामर्शोऽनुमानमाद्यं दूषयति—। [b] "अगृहीते"ति ॥ द्वितीये त्वाह—। [c] "व्याप्ती"ति । व्याप्तिज्ञानमप्यनुमानं स्यादित्यर्थः तस्यापि व्याप्यत्वग्राहित्वादन्यथा व्याप्तिग्रहत्वमेव तस्य न स्यादिति भावः (३)उक्तदोषादेव द्वितीयलिङ्गपरामर्शस्तृतीयलिङ्गपरामर्शो वानुमानमिति निरस्तमित्याह—। [d] "अत एवे"ति ॥ दोषान्तरमाह—। [e] "धारे"ति । धारावाहिद्वितीयतृतीयलिङ्गपरामर्शेऽनुमानत्वापत्तेः व्याप्यत्वव्यापकत्वप्रकारकधूमवह्निसमूहालम्बनेऽनुमानत्वप्रसङ्गमाह—। [f] "गृहीते"ति । व्याप्यत्वपरामर्शरूपतया समूहालम्बनप्रत्यक्षमपि यद्यनुमानमङ्गीकार्य्यं तदा तदनन्तरोत्पन्नव्यापकप्रत्यक्षस्येन्द्रियजत्वेन साक्षात्त्वं लिङ्गजत्वेन चासाक्षात्त्वमिति विरोधः स्यादित्याह—। [g] "प्रत्यक्षे"ति ।

(१) व्याप्येत्यपि क्वाचित्कः पाठः ।

(२) सिद्धसाधनस्य हेतोर्यथापक्षधर्मत्वं नास्तिसन्दिग्धसाध्यवत्त्वाभावा-त्तद्वदित्यर्थः ।

(३) स्वरूपेणाद्वितीयलिङ्गस्य तृतीयलिङ्गस्य वा परामर्शोऽनुमानं व्याप्यतया वा-नाद्यः । धूमादिमात्र परामर्शस्याप्यनुमानत्वापत्तेर्नापि द्वितीयः । व्याप्तिग्रहस्यापि व्याप्यत्वविषयकत्वेनानुमानत्वप्रसङ्गादिति ।

मू० [a] * अव्यापकविषयत्वे सति ? *—इति चेन्न, [b] व्याप्यत्वविषयत्वाभावप्रसङ्गात् [c] व्याप्यत्वं हि सप्रतियोगिकग्रहणम् तथाचैतस्य व्याप्यमिदमिति गृह्यते तथाच सति व्यापकस्यापि विशेषणस्य ग्रहणमवश्यं वक्तव्यम् अन्यथा विशिष्टग्रहणस्य वक्तुमशक्यत्वात् * विशेषतो व्यापकाविषयत्वे सति ? *—इति चेन्न, अग्निधूमौ व्याप्तावित्याप्तोपदेशाद्वा पूर्वं भूयो गृहीतवह्निधूमसाहचर्य्यस्य वह्निधूमाग्रहणकाले विमर्शवशाद्वा जायमानव्याप्तिग्रहणस्य [d] व्याप्यपरामर्शानुमानं स्यात् [e] * न परामर्शः प्रत्ययमात्रं येन प्रथमग्रहणे प्रसङ्गः स्यात् किं नाम प्र(१)त्यभिज्ञानम् ? *—इति चेन्न, [f] विचाराद्वाप्तोपदेशाद्वा प्रतीत्य व्याप्तिं पुनराप्तोपदेशाद्विचारान्तराद्वा यैव मया व्याप्तिर्गृहीता सैवेयमिति प्रत्यभिज्ञानानस्य व्याप्तिज्ञानमनुमानं स्यात् [g] * विशेषतो व्याप्यविषयत्वे सति ? *—इति चेन्न, [h] अव्यापकत्वप्रसङ्गात् [i] एकव्यक्तिविषयत्वस्य व्यक्त्यन्तरेऽसम्भवात् [j] सामान्यतो व्यक्तिविषयत्वस्य चातिप्रसञ्जकत्वात् [k] किञ्च धूमवत्त्वादेर्यदा कदाचिदग्निमत्त्वं वा प्रतीयते तदानीं वाग्निमत्त्वं पर्वतादेर्नाद्यः ॥

टी० ॥ [a] "अव्यापके"ति । व्यापकास्फुरणे व्याप्यत्वस्फुरणमनुपपन्नमेवेति व्याप्यनुमानं न स्यादित्याह—। "व्याप्यत्वविषयत्वे"ति । एतदेवोपपादयति—। [c] "व्याप्यत्वं ही"ति । [d] "व्याप्यपरामर्श" इति । मानस इत्यर्थः साहचर्यमात्रग्रहादयं मानसो व्याप्यपरामर्शः प्राथमिक एव स न

(१) वह्निव्याप्योऽयमिति ।

विवक्षितः किन्तु व्याप्योयमित्यनुसन्धानमनुमानमिति शङ्कते—। [e] "न परामर्श" इति ॥ [f] "विचारादि"ति । अनुकूलतर्कोपगृहीतसहचारदर्शनादित्यर्थः ॥ [g] "विशेषत" इति । अयं धूमो वह्निव्याप्य इत्याकारपरामर्शोनुमानमित्यर्थः । [h] "अव्यापकत्वे"ति । अनित्यत्वव्याप्यं कृतकत्वमित्याकारः परामर्शोनुमानं न स्यादित्यर्थः एतदेव स्पष्टयति—। [i] "एके"ति । ननु व्यक्तिमात्रविषयत्वं विशेषतो व्याप्यविषयत्वमभिमतं नतु धूमैकव्यक्तिविषयत्वं येनाव्यापकता स्यादित्यत आह—। [j] "सामान्यत" इति । प्रकारान्तरेणानुमानं खण्डयति—। [k] "किन्त्वे"ति ॥

सू० [a] तदानीमिवा[b]न्यदाप्यग्न्यर्थिप्रवृत्तेस्तत्र प्रसङ्गात् नापि द्वितीयः [c]तदानीमग्निमत्तया व्याप्तत्वानवगमात् * [d] तदेति धूमकालो पेक्षित ?—* इति चेन्न, [e] क्वचिद्देशेऽन्यदापि धूमस्यावस्थानमस्तीति कालान्तरस्यापि धूमकालत्वात्(१) * [f]तद्धूमकालोपेक्षित ?—* इति चेन्न, [g] तच्छब्दस्य व्यक्तिविशेषवचनत्वेऽप्रतीतव्याप्तिकत्वं [h] यत्किञ्चिद्व्यक्तिवचनत्वे चो(२)क्तदोषापत्तिः [i] हेतोः पक्षधर्मतयाप्यपर्वतादिधर्मः साध्यो माभूत्ततस्तु कालान्तरे किं न स्यात् [j] तं कालमन्तर्भाव्य पक्षत्वे कथमुत्तरं निष्कम्पं प्रवर्तते [k] धूमकालमन्तर्भाव्य चे[l]दुक्तमावर्त्तेत [m] तद्धूमकालं चेद् ॥

टी० ॥ [a] "तदानीमि"ति । लिङ्गकाले इत्यर्थः ॥ [b] "अन्यदापी"ति । अतीतानागतलिङ्गस्थलेपि पर्वते वह्निमनुमाय प्रवृत्तिः स्यात् तत्कालीनवह्निभानस्यापि सम्भवादित्यर्थः ॥ [c] "तदानीमि"ति । वह्निमात्रेण धूमस्य व्याप्तिर्नतु धूमकालीनवह्नित्वं व्यापकतावच्छेदकमित्यर्थः ननु

(१) धूमकालादित्यस्यानन्तरं तथा च कालान्तरेपि वह्न्यर्थिनः प्रवृत्तिस्स्यादित्ये तदध्याहार्य्यम् ।

(२) क्वचिद्देशेऽन्यदापीत्यादिपूर्वग्रन्थोक्तदोषस्यापत्तिरित्यर्थः ।

यदा धूमस्तदा वह्निरिति कालगर्भव्याप्तिग्रहबलादेव लिङ्गकालीनलैङ्गिक-
सिद्धिरिति शङ्कते—। [d]"तद्देती"ति । एवमपि धूमकाले वह्नौ भासेत
स च नानेति तस्य न विनिगमकत्वमित्याह—। [e]"क्वचिदि"ति ॥ [f]"त-
द्धूमकाल" इति । परामृश्यमाणधूमकाल इत्यर्थः यदि विशिष्य तेन
धूमविशेषेण व्याप्तिग्रहो भवेत्तदा तत्कालस्फुरणं स्यान्नचैव मित्या-
ह—। [g]"तच्छब्दस्ये"ति । ननु यस्यामेव व्यक्तौ विशिष्य व्याप्तिर्गृहीता
सैव तत्पदार्थ इत्यत आह—। [h]"यत्किञ्चिदि"ति । एवं सति यत् किञ्चि-
द्धूमकालीनवह्निभाने प्रवृत्तिर्नियतकाला न स्यादित्यर्थः पक्षधर्मताब-
लादपि पर्वतीयवह्निसिद्धिर्न तु नियतकालीनतयापि तत्रास्या अतन्त्रत्वा-
दित्याह—। [i]"हेतोरि"ति । नन्वनुमितिकालविशिष्टो लिङ्गकालविशिष्टो
वा धर्मी पक्षस्तेन पक्षधर्मताबलात्तदन्यतरकालसिद्धिरित्यत आह—।
[j]"तमि"ति । तत्कालनाशे पक्षनाशाच्च तत्र प्रवृत्तिः स्यादित्यर्थः ननु
धूमसामान्यकालान्तर्भावेण पक्षता स च कालो धूमानुवृत्त्या प्रवृत्तिकाले-
ऽप्यस्त्येवेत्यत आह—। [k]"धूमे"ति । एवं सति यत्किञ्चिद्धूमकालीनव-
ह्निसिद्धिरित्यनियम इत्याह—। [l]"उक्तमि"ति । परामृश्यमाणधूमकालान्त
र्भावं शङ्कते—। [m]"तदि"ति ॥

मू० [a]अंशतः स्ववृत्तिः कश्च व्याप्तिशब्दार्थ इति वक्तव्यं
अविनाभावः इति चेत्किमेकस्याऽव्यतिरेकेऽपरस्य भावोऽ
विनाभावपदार्थः उत एकस्य व्यतिरेकेऽपरस्य व्यतिरेकः-
यद्याद्यः तदाऽव्यतिरेकोऽन्वयार्थ इत्येकस्यान्वयेऽपरस्यान्व-
य इत्युक्तं स्यात् एवं च सति पार्थिवत्वलोहलेख्यत्वयोर-
प्यन्वयो व्याप्तिः स्यात् * न क्वाचित्कः सम्बन्धो व्याप्तिः
[b]सार्वत्रिकस्य तथात्वेन विवक्षितत्वात्? *—इति चेत्कि-
मिदं सार्वत्रिकत्वं सम्बन्धस्य सर्वासु तज्जातीयव्यक्तिषु विद्य-
मानतेति चेन्नैवं सर्वतज्जातीयव्यक्त्यपरिज्ञाने शक्यावधा-

रणा न च सर्वास्ता व्यक्तयो विशेषतो ज्ञातुं शक्याः तत्तत्प्र(१)मितिकरणासम्भवात् इन्द्रियेण सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिग्रहणकाले सर्वास्तज्जातीयव्यक्तयो गृह्यन्ते '(२)यदनभ्युपगमे(३) षण्डकमुद्वाह्यमुग्धायाः पुत्रप्रार्थनमिवेति वाचस्पतिरुपालम्भमवादीदिति चेन्नैवम् [d]सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिग्रहणकाले सर्वतज्जातीयव्यक्तिग्रहणे(४) प्रमेयत्वादिव्याप्तिग्रहतः सार्वज्ञ्यप्रसङ्गात् 'क्वचिदप्यज्ञानं ते न स्यादिति च सार्वज्ञ्यापादनमिति न(५) प्रतिहत्यापि ॥

टी० ॥ तथाच परामृश्यमाणधूमकालविशिष्टः पक्षस्तद्धर्मश्च परामृश्यमाणो धूम इत्यंशत आत्माश्रय इत्याह–। [a]"अंशत" इति । [b]"सार्वत्रिकस्ये"ति । पार्थिवत्वलोहलेख्यत्वयोश्च वज्रे व्यभिचाराच्च तथात्वमित्यर्थः ॥ [c]"यदनभ्युपगमे" इति । यदि पक्षीयधूमेपि व्याप्तिग्रहो न वाच्यस्तदा ततोनुमितिर्न स्यादिति तदर्थं सामान्यलक्षणाप्रत्यासत्तिरभ्युपगन्तव्येत्यर्थः एवं सति यत्प्रमेयं तदभिधेयमिति व्याप्तिग्रहकाले सर्वज्ञः स्यादित्याह–। [d]"सामान्ये"ति । ननु सार्वज्ञ्यमापाद्यतस्तवैव सार्वज्ञ्यमापन्नमित्यत आह–। [e]"क्वचिदि"ति । यद्यपि क्वचिदप्यज्ञानं न स्यादित्यस्य सर्वत्र ज्ञानं स्यादित्यर्थ इति प्रतिज्ञात्येव तथापि स्वत्साक्षात्कारविषयत्वं यदि वस्तुत्वव्यापकं तदा प्रमेयत्ववन्मदीयचित्तवर्तिविषयवृत्तिः स्यादिति भावः ॥

---

(१) प्रमितिकरणेति भावप्रधाननिर्देशस्तथा च प्रमितिकरणत्वस्यैकस्याननुगतस्यासम्भवादित्यर्थः ।

(२) सर्वोपसंहारवद्व्याप्त्यनङ्गीकारे ।

(३) नपुंसकम् ।

(४) प्रमेयत्वादिनिरूपिताभिधेयत्वादिनिष्ठामित्यर्थः ।

(५) कल्याणामाणिष्टोत्पादिका काचिद्देवता तद्द्वारकं देवतान्तरं प्रतिबध्नाति प्रतिबध्नातीति तात्पर्यार्थः ।

मू० [a] *प्रमेयतया सर्वं तदा ज्ञायते एव ननु रूपान्तरेण?*— इति चेन्न, [b] यदि रूपान्तरेण तत्प्रमेयं तदा रूपान्तरवतोऽपि प्रमेयत्वाधारतया कथमग्रहणम् अथ न प्रमेयं नास्त्येव रूपान्तरेण तत् येन तु रूपान्तरेणास्ति तेन सर्वेण प्रमेयमिति यावद्विद्यमानाकारेण ज्ञातत्वप्रसङ्गः [c] तथात्वस्वीकारे च ज्ञायतां प्रमेयत्वदर्शिना भवता मामकी चित्तवृत्तिः ततः अज्ञास्ये [d] *स्यादेतत् यथा भेदोऽन्योन्याभाववैधर्म्यादिः पृथक् तथैक्यमपि वस्तूनां ततः प्रमेयत्वाद्यपि धर्मिणामेकत्वमेव ततः प्रमेयत्वेन ज्ञायमानं तत्सर्वमपि तेनैक्येन प्रतीयमानैकव्यक्त्यात्मकमेव ज्ञातं भवतीति कथं तदेकत्ववेदिनः सार्वज्ञ्यं* (१)नच वाच्यं नानात्वमपि व्यक्तीनां प्रमेयमिति तदपि धर्मितया ग्राह्यमेवेति?*— यतस्तदपि(२) प्रमेयत्वादिना गृह्यमाणमेकमेव गृहीतं भवतीति ॥

टी० ॥ इष्टापादनमाह—। [a] "प्रमेयतये"ति । रूपान्तरविशिष्टमपि प्रमेयमेवेति तादूप्येणापि ग्रहणं स्यादित्याह—। [b] "यदी"ति । अत्रापीष्टापादने बाधमाह—। [c] "तथात्वे"ति । यद्यपि प्रमेयत्वप्रकारेण तदपि ज्ञायते एव यत्सामान्यं प्रत्यासत्तिस्तया तत् प्रकारकज्ञानस्यैव जननात् तथैव सामर्थ्यावधारणादिति घटत्वादिनापि प्रकारेण तज्ज्ञानापादनमनुपपन्नं तथापि तन्नैव न नियामकमिति भावः प्रमेयत्वेन सर्वमभिन्नमेव कथमन्यथा इदं प्रमेयमिदमपि तदेवेत्यभेदप्रतिसन्धानमिति तेनाकारेण ज्ञानमभिन्नविषयकमेवेति न सार्वज्ञ्यापादनमित्याह—। [d] "स्यादेतदि"ति ॥

(१) अथ व्यक्तीनामिव तद्वृत्तिनानात्वस्यापि प्रमेयस्वरूपत्वात्तद्ग्रहणं धर्मितयावश्यंग्राह्यमन्यथा सामान्यप्रत्यासत्तेस्स्वाश्रयसर्वधर्मिग्राहकत्वं त्वदभ्युपगतं व्याहन्येतेति नानात्वस्यापि धर्मितया गृहीतत्वेन तदवस्थं सार्वज्ञ्यमिति शङ्कामपाकुर्वन्नाह—नच वाच्यमिति ।

(२) नानात्वमपीत्यर्थः ।

Digitized by Google

मू० तस्मादे [a]को भावस्तत्वतो येन दृष्टः सर्वे भावास्तत्वतस्तेन दृष्टा इति [b]तत्वत स्तादूप्येण एकीभूता इति भावः? *—(१)तदेतदपि नोपपन्नम् [c]नानैकमिति(२) व्याहतप्रतीत्यापत्तेः * (३)अथ रूपान्तरेण नानात्वं प्रमेयत्वादिना चैक्यमिति व्यवस्थित्या न व्याघातः स्यात्? *—त [d]र्हि प्रमेयत्वाधारस्य व्यक्ति भेदस्य कृत्स्नस्य ग्रहणात् सार्वज्ञ्यापत्तिस्तादवस्थ्येवेति [e]किं च सामान्यलक्षणया प्रत्यासत्त्या तज्जातीयविशेषग्रहणे तासु सर्वासु व्यक्तिषु सम्बन्धास्तित्वे(४)किं प्रमाणं * सर्वव्यक्तिग्रहवत्तत्सम्बन्धग्रहेऽपि व्याप्तिग्राहकमिन्द्रियमेव प्रमाणमिति चेत्? *—त [f]र्हि क्वचिदेवमवधारितस्य यद्व्यभिचारोदृश्यते तन्न स्यात् इन्द्रियेण तत्सम्बन्धस्य प्रमितत्वात् * भ्रान्तिस्तत्र सम्बन्धप्रतीतिः पश्चाद्बाधात्? *—इति चेन्न, सामग्र्यभेदे काचिद्भ्रान्तिः काचिद्भ्रान्तिरिति विभागानुपपत्तेर्दोषादोषवैचित्र्यविवेचनस्य दुष्करत्वात् कार्यभेदादेव सामग्रीभेदोप्युन्नेय इति चेत् उन्नीयतां(५) स एव कीदृगुन्नेय इति वाच्यम् ॥

(१) अथ किमिदं नानात्वं धर्म्मिषु त्वदभिमतमिति वाच्यम्—ऐकरूप्याभावः। उत संख्यारूपैकत्वाभावः। आहोस्विद्रूपभेदः न प्रथमः प्रमेयत्वादिनैकरूप्यस्य त्वयैव धर्म्मिषु स्वीकारेण तत्र तदभावरूपनानात्वस्यासम्भवात् नापि द्वितीयस्तदभावस्य संख्यारूपैकत्वात्मकतया प्रतिव्यक्तिविश्रान्तत्वात्तेन सर्वव्यक्तिपक्षस्यानुत्पत्तेः नापि तृतीयस्तदङ्गीकारेऽपि तद्वतः प्रमेयत्वादिना गृहीतत्वेन सार्वज्ञ्यापत्तेस्तादवस्थ्याच्चानैकत्वप्रतीत्योर्विरोधाच्चेत्याह—तदेतदपीति ।

(२) नाना—एकमिति छेदः । बहूनामेकत्वमिति तु तदर्थः ।

(३) घटपटाद्यात्मना ।

(४) सम्बन्धो=व्याप्तिः ।

(५) अनुमीयताम् ।

टी० ॥ एक[a] "इति । येन भावो धर्मो द्रव्यत्वप्रमेयत्वादिर्दृष्टस्तेन ताद्रूप्येण तदालिङ्गितधर्मिणो(१) भावाः सर्वे एवैक्यमापन्ना दृष्टा इत्यर्थः कारिकाया उक्तार्थासमर्पकत्वं मत्वा व्याचष्टे–। [b]"तस्यत" इति ॥ [c]"नाने"ति । बहूनामेकत्वमिति व्याघात इत्यर्थः बहूनामेकधर्मावच्छेदमात्रं चेदेकत्वं तत्राह–। [d]"तर्ही"ति । सामान्य(२)विशेषणीभूतयावद्व्यक्तिग्रहेऽपि तद्गतव्याप्तिग्रहे न प्रमाणमित्याह–। [e]"किंचे"ति । सर्वासु व्यक्तिषु सम्बन्धश्चेदिन्द्रियेण प्रमितस्तदा पार्थिवत्वलोहलेख्यत्वयोः क्वाचित्कः सम्बन्ध बाधो न स्यादित्याह–। [f]तर्ही"ति ॥

मू० न तावत्सार्वत्रिकसम्बन्धभावाऽभावात्मकस्तदानीं [a]भाविनां सम्बन्धानामसत्त्वेनाकारणत्वात् [b]सामान्यतश्च तज्जातीययोः सम्बन्धस्य प्रतीतेः पूर्वसत्त्वं भ्रान्त्यभ्रान्तिसाधारणम् क्वचिदपि सम्बन्धाभावे भ्रान्तेरनुदयात् [c]*किमेतावता अन्य एव तर्हि कार्यभेदात्कारणभेदः कल्पयिष्यते इति चेत्? *–स किमिन्द्रियसहकारिभूतः करणान्तरमेव वा कल्पनीयमिति वाच्यम् नाद्यः इन्द्रियस्य भूतभाविसम्बन्धांशे प्रमाणत्वकल्पनायां प्रमाणाभावात् [d]प्रत्युत व्युपरतेन्द्रियव्यापारस्यापि [e](३)भावयतः पूर्वप्रतीतसम्बद्धधर्मिद्वयव्याप्त्यवधारणदर्शनात् [f](४)तदापि मनोऽस्तीन्द्रियमिति चेत् ॥

(१) तद्रूपमालिङ्गितं येषु धर्मिषु ते तदा लिङ्गितधर्मिणः ।

(२) सामान्यं विशेषणीभूतं यस्या यावत्या व्यक्तेस्तद्ग्रहे–इत्यर्थः । यद्वा, यथा व्यक्तिव्यवच्छेदकतया सामान्यं व्यक्तेर्विशेषणं तथा व्यक्तेरपि सामान्यव्यवच्छेदकत्वात्सामान्यविशेषणत्वम् ।

(३) विचारयत इत्यपि पाठान्तरम् ।

(४) ननु तदानीमिन्द्रियान्तराणां व्युपरमेऽपि न मनोरूपेन्द्रियस्य व्युपरतत्वमस्तीत्याह–तदापीति ।

Digitized by Google

टी० ॥ सम्बन्धानामपि सामग्र्यन्तर्भावे भाविनामसत्त्वात्तद्वृत्ते न स्यादित्याह–। [a]"भाविनामि"ति । ननु यद्यपि भाविनां विशेषाणां सम्बन्धा न सन्ति तथापि सामान्ययोर्धूमत्वावच्छिन्नवह्नित्वावच्छिन्नयोः सम्बन्धप्रतीतिः पूर्वमस्त्येव स एव कारणं स्यादित्यत आह–। [b]"सामान्यत" इति । पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तिप्रतीतिरेवं स्यादित्यर्थः व्याप्तिप्रतीतिलक्षणकार्यानुरोधात्कारणं कल्पनीयमित्याह–। [c]"किमि"ति । असम्बद्धावर्तमानग्रहं प्रतीन्द्रियाणामकारणत्वादित्याह–। [d]"इन्द्रियस्ये"ति । व्याप्तिप्रतीतिं प्रतीन्द्रियस्य व्यभिचारमाह–। [e]"प्रत्युते"ति । भावयतश्चिन्तयतः । [f]"तदापी"ति । इन्द्रियान्तरव्यापारव्युपरमकाले इत्यर्थः ॥

सू० [a]अस्तु तस्मिन्कार्ये मनसः करणत्वे तु प्रमाणाभावः अवश्यं परिकल्पनीयेनान्येनैव सर्वानुपपत्त्युपशान्तेः कारणत्वमात्रं तु चक्षुरादिजज्ञानवन्मनसस्तत्र स्यात् चक्षुरादिवत्करणमन्यदेव तत्कल्पनीयमिति तत्सप्तममिन्द्रियं प्रमाणान्तरं वा प्रसज्येत अन्यथा चाक्षुषादिप्रतीतावपि चक्षुरादेः करणत्वं न स्यात् शक्यते तत्रापि वक्तुं मन एव तत्सुखादि प्रतीतिवत्करणं चक्षुरादयस्तु सहकारिमात्रं नापि द्वितीयः इन्द्रियान्तरप्रसङ्गात् प्रमाणान्तरप्रसङ्गाद्वा नापि विनाभावः(१) एकस्य व्यतिरेकेणापरस्याव्यतिरेकः तन्निषेधोऽविनाभाव इति द्वितीयः पक्षः एवं हि लोहलेख्यत्वव्यतिरेकस्य पार्थिवत्वव्यतिरेकस्य [b]क्वचिदस्तीति

(१) एकस्य साध्यत्वेनाभिमतस्य व्यतिरेकेणाभावेनापरस्य साधनत्वेनाभिमतस्याव्यतिरेकोऽभावस्तन्निषेधोऽविनाभाव इत्यर्थः ।

पार्थिवत्वलोहलेख्यत्वयोरप्यविनाभावः प्रसज्येत [c] *सार्वत्रिकं व्यतिरेकयौगपद्यं विवक्षितं नतु क्वाचित्कं अत एवोच्यते अविनाभावनियम?*—इति चेन्न, सार्वत्रिकान्वयावधारणनिरासन्यायेन सार्वत्रिकव्यतिरेकावधारणस्याप्यशक्यत्वात् शक्यत्वे चान्वयावधारणमेवास्तु सार्वत्रिकं कृतं व्यतिरेकावधारणकुटिलिकया यच्च विपक्षे वृत्तौ हेतौ +बाधकमस्ति तयोरन्वये व्याप्तिरिति केचित्तन्न यत्तु विपक्षे वृत्तौ हेतौ +बाधकं तत्प्रमाणं वा तर्को वा स्यात् आद्ये न तावदिन्द्रियम् ।

टी० ॥ इन्द्रियसहकारितया यत्कल्पनीयं तदेव तत्रासाधारणं कारणमस्तु मनस्त्वनुमित्यादिवत्साधारणमेव तत्रेत्याह—। [a]“अस्त्वि”ति । व्याप्तिज्ञानस्य साक्षात्कारित्वे सप्तममिन्द्रियमसाक्षात्कारित्वे प्रमाणान्तरमिति विकल्पे तात्पर्यम् एवमग्रेपि एकस्य व्यतिरेकेणेति साध्यसाधनयोरन्यतरस्य व्यतिरेकेऽन्यतरव्यतिरेक इत्यर्थः ॥ [b]“क्वचिदि”ति । आकाशादावित्यर्थः ॥ सार्वत्रिकमिति पार्थिवत्वलोहलेख्यत्वव्यतिरेकयौगपद्यस्य वज्रेऽभावादित्यर्थः अविनेति अविनाभावयो(३)र्व्यतिरेकयोर्नियम इत्यर्थः दुरवधारणत्वमाह—। [c]“सार्वत्रिके”ति। कुटिलिका प्रतिपत्तिगौरवम् ॥

(शेषमग्रे)

+ क्वचित् हेताविति पाठो नास्ति ।

(२) तर्कादि ।

(३) अविनाभावयोः=अविनाभाविनोरित्यर्थः ।

॥ श्रीः ॥

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(Continued from page 153. Vol. IX.)

भू० अज्ञानं नाम स्वरूपाज्ञानमन्यथा ज्ञानं विपरीतज्ञानं वा अहमित्येवात्मनः स्वरूपमिति स्वरूपज्ञानरूपोऽहंप्रत्ययो-नाज्ञत्वमापादयति कुतः संसारित्वम्, अपि तु तद्विरो-धित्वान्नाशयत्येव, ब्रह्मात्मभावापरोक्षनिर्धूतनिरवशेषा-विद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च, श्रूयते हि "तद्धैतत्पश्यन्नृषिर्वामदेवः[1] प्रतिपेदे अहं मनुरभवं सूर्यश्चे"ति "अहमेव च संवर्तामि भविष्यामी-त्यादि सकलेतराज्ञानविरोधिनः:–

टी० "अज्ञाननामे"ति, धर्म्यैक्ये सति प्रकारान्तरारोपणेन ज्ञान-मन्यथाज्ञानं यथा पीतः शङ्ख इति, इदं रजःकार्यं, धर्म्यन्तरस्य धर्म्यन्तरत्वेन ज्ञानं विपरीतज्ञानं यथा शुक्ताविदं रजतमिति इदं तमःकार्यम् "अयथाव-त्प्रजानाति बुद्धिस्सा पार्थ राजसी अधर्मं धर्ममिति या मन्यते तमसा वृता सर्वार्थान् विपरीतांश्च बुद्धिस्सा पार्थ तामसीति स्मृतेः, अहंप्रत्ययस्य स्वरू-पज्ञानरूपत्वात् स्वात्मप्रागभावान्यथाज्ञानविपरीतज्ञानानि विरोधादेवापग-तानीत्याह "अहमित्येवे"ति, अहमित्येवात्मनः स्वरूपम्–अहमिति व्यव-हारानुगुणाहंत्वमेवात्मनः स्वरूपमित्यर्थः । अहंप्रत्ययस्याज्ञत्वादिप्रयोजकत्व-रूपणेनाज्ञत्वादेरविद्यान्वय एवोपाधिरित्यर्थादुक्तं भवति । अथवा कार्य-कारणभावेन व्याप्तिमङ्गीकृत्य परेणाज्ञत्वादिप्रसङ्ग उक्त इति व्याप्तिप्रतिषे-

[1] अहमर्थस्यैव पाठः सांप्रदायिकः ।

Digitized by Google

पाय कार्यकारणभावं प्रतिक्षिपति अज्ञत्वादहेतुत्वाच्चेत्यादिना । अज्ञत्वफलमपि नास्तीत्याह "कुतः संसारित्व"मिति, निवृत्ताविद्यानामप्यहमित्यात्मप्रतिपत्तिदर्शनेनाहंप्रत्ययस्य मुक्तावनुपपत्तिमाह "ब्रह्मात्मभावे"ति, तद्धेतत्पश्यन्निति ब्रह्मात्मकत्वसाक्षात्कारकथनेन निर्धूतनिरवशेषाविद्यत्वं गम्यते ब्रह्मणोऽपि तथा प्रतिपत्तिमाह "सकलेतरे"ति, सकलेतराज्ञानविरोधिन इति न हि सकलेतरविषहरणनिपुणस्य वैनतेयस्य विषवश्यत्वसंभव इति भावः ॥

सू० सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणो व्यवहारोऽप्येवमेव "हन्ताऽहमिमास्तिस्रो देवताः" "बहु स्यां प्रजायेय" "स ऐक्षत[1] लोकान्नु सृजा" इति, तथा "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" "अहमात्मा गुडाकेश" "न त्वेवाहं जातु नासम्" "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते" ॥

टी० सच्छब्दप्रत्ययमात्रभाजः—सच्छब्दस्य सदिति प्रत्ययस्य च विषयभूतस्य मात्रया पाश्चात्यनामरूपभाक्त्वव्यावृत्तिः, अनेनाहङ्कारसृष्टेः पूर्वमप्यहंप्रत्ययं ज्ञापयति, अहंप्रत्ययस्फुटीकरणाय अहमिमा इति वाक्यं पूर्वमुपादत्ते, बहु स्यामिति वाक्ये अस्मदुत्तम इत्युत्तमपुरुषबलादहमिति प्रत्ययसिद्धिः, अहमिमास्तिस्र इत्यत्राहंशब्दः कण्ठोक्तः, न ह्यहङ्कारस्य नामरूपव्याकर्तृत्वमिति भावः । बहुरूपनिषत्स्वहमिति निर्देशज्ञापनायोपादत्ते "स ऐक्षतेति," प्रजायेय[2] इत्युत्तमपुरुषेणाहंशब्दाकर्षसिद्धिरिति भावः । स्मृतिं दर्शयति "तथा यस्मादि"ति, यस्मादिति वचनं क्षराक्षरातीतस्वाभाविकरूपेऽहंप्रत्ययज्ञापनार्थमुपात्तं, न ह्यहङ्कारः क्षराक्षरातीतः अतोऽस्मीत्युत्तमपुरुषेणाप्यहमर्थसिद्धिः । आत्मनोऽहंप्रत्ययं ज्ञापयति "अ-

१ ईक्षत इति द्राविडपाठः ।
२ सृजा इत्युत्तमपुरुषेण इति पुस्तकान्तरपाठः ।

हमात्मे"ति, न ह्यहङ्कारश्चिद्दचिदन्तरात्मा । स्वाभाविकनित्यरूपे ऽहंप्रत्ययं दर्शयति "न त्वेवाहमि"ति, न ह्यहङ्कारो नित्यः । मृत्युविरोधिमुक्तिप्रदो ऽप्यहंप्रत्ययविषय इत्याह–

सू० "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्" "अहं बीजप्रदः पिता" "वेदाहं समतीतानीत्यादिषु यद्यहमित्येवात्मनः स्वरूपं कथं तर्ह्यहङ्कारस्य क्षेत्रान्तर्भावो भगवतोपदिश्यते "महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव चे"ति उच्यते स्वरूपोपदेशेषु सर्वेष्वहमित्येवोपदेशात्तथैवात्मस्वरूपप्रतिपत्तेश्चाहमित्येव प्रत्यगात्मनः स्वरूपम् ॥

टी० "तेषामि"ति, न ह्यहङ्कारो मुक्तिप्रदः, एवमनेकश्रुतिस्मृतिवचनोपादानं परविवक्षितद्विवचनादृशवचनापनोदनार्थम् । एभिरहंशब्दैश्चिन्मात्रमुपलक्ष्यते चेदनेकवाक्यस्याहं–शब्दलक्षणैकदोषः, महाभूतान्यहङ्कार इति क्षेत्रान्तर्भाववचनमेकम् "अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते" इति त्याज्यत्वपरं वचनं द्वितीयम् अहङ्कारविमूढात्मेत्यपरमेतत्त्रयमनुदाहृतमभिप्रेतम् उत्तरत्रयपरिहारात् पूर्वमेतद्वचनाभिप्रायेण सुषुप्तिमुक्त्योर्नान्वेतीत्युक्तम् । इममर्थमवलम्ब्य चोदयति "कथं तर्ही"ति, परिहरति "उच्यत" इति, अहमर्थाहङ्कारयोरभेदबुद्ध्या परेण चोदिते प्रकृतिप्रत्यययोरर्थविभागव्युत्पादनाय प्रकृत्यर्थभूत आत्मन्यहंबुद्धेः प्रामाणिकत्वेन स्थैर्यं दर्शयति "स्वरूपोपदेशेष्वि"ति, अथान्यथा सिद्धं दर्शयंस्तत्राहङ्कारशब्दविवक्षितमाह–

सू० अव्यक्तपरिणामभेदस्याहङ्कारस्य क्षेत्रान्तर्भावो भगवतो[1]पदिश्यते स त्वनात्मनि देहेऽहंभावकरणहेतुत्वेनाहङ्कार इत्युच्यते, अस्य त्वहङ्कारशब्दस्याभूततद्भावे ऽर्थे च्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या ॥

१ भगवतैवोपदिश्यत इति पुस्तकान्तरम् ।

टी० "अव्यक्ते"ति, अव्यक्तपरिणामभेदस्येति न त्वहमर्थस्येत्यर्थः अथातोऽहङ्कारादेश इत्यादिषु शुद्धस्वरूपस्याहङ्कारशब्देनाभिधानाभ्युपगमेऽपि न विरोधः। स त्वहङ्कारशब्दोऽहमर्थविषयबुद्धिपरः। यद्यहङ्कारशब्दवाच्यत्वमात्रात् प्रत्यगात्माऽपि[1] जडः स्यात्तर्हि हरिशब्दवाच्यत्वसाम्यात्सिंहो मण्डूकः स्यात् अतोऽनेकार्थाभिधायिशब्दैकत्वमर्थभेदादविरोधीति भावः। यथाऽऽगमप्रामाण्ये "तथा च हरिशब्दस्य दृष्टा मण्डूकवाचिता। इति तच्छब्दवाच्यत्वात्सिंहो मण्डूक एव किम्॥ तथा गोशब्दवाच्यत्वाच्छब्दश्चापि विषाणवा"निति। अथाहङ्कारशब्दस्याव्यक्तपरिणामविशेषवाचकत्वप्रकारं दर्शयति "स त्वि"ति, अहंभावः—अहमिति बुद्धिः, भाव—शब्दस्य बुद्धिवाचकत्वमभिप्रायपरतया प्रयोगादवगम्यते सर्वत्राहंशब्दार्थमेकरूपमङ्गीकृत्याहङ्कारशब्दस्याव्यक्तपरिणामवाचित्वं शब्दानुशासनप्रक्रिययोपपादयति "अस्य त्वि"ति, क्विप्रत्ययस्य सर्वलोपः, कृञः करणे घञ् तेनात्मभावोपदेशस्य निर्वाहः कृतः। अहङ्कारं बलं दर्पमिति त्याज्यतयोपदेशस्य निर्वाहः क्रियते—

भा० अयमेव त्वहङ्कार उत्कृष्टजनावमानहेतुर्गर्वापरनामा शास्त्रेषु बहुशो हेयतया प्रतिपाद्यते तस्माद्बाधकाऽपेताहंबुद्धिः साक्षादात्मगोचरैव, शरीरगोचरा त्वहंबुद्धिरविद्यैव।

टी० "अयमेव त्वि"ति, अयं—शब्देन प्रस्तुताहंभावो विवक्षितः न त्वहंभावकरणहेतुगर्वापरनामेति वचनात्, न हि महदहङ्कारयोरन्यतरोऽहङ्कारो गर्वापरपर्यायः अतोऽत्राहंभाव एवायं—शब्दविवक्षितः प्रशस्तदेहेऽहंबुद्धिरुत्कृष्टजनावमानहेतुरहङ्कारः—अहंबुद्धिः मानसव्यापारवाचिनः करोतेर्बुद्धिपरत्व युज्यते यथा "तदेकावयवं देवं चेतसा हि पुनर्बुधः कुर्या- दि"ति मनसा करणं हि वेदनम् अतोऽहंबुद्धिरहङ्कारः, च्विप्रत्ययार्थगर्भत्वादनहम्यहंबुद्धिगर्भाविमाहंभावाहङ्कारशब्दो अत्र भावे व्युत्पत्तिः पूर्वत्र करणे व्युत्पत्तिः, गर्वोऽभिमानोऽहङ्कार इति नैघण्टुकाः

1 देहभेदः स्यादि ति पुस्तकान्तरपाठः।

ननु कथं भावे व्युत्पन्नस्याहङ्कारशब्दस्योपादेयगोचरतया प्रयोगः अथातोऽहङ्कारादेश इति, उच्यते स त्वहङ्कारशब्दः साक्षादहमर्थबुद्धिवाची न त्वनात्मन्यात्मबुद्धिपरच्छिन्नप्रत्ययार्थगर्भः, हेयोपादेयरूपेण शब्दप्रतिपन्नयोरहंबुद्ध्योर्विषयविभागं नियमयति "तस्मादि"ति, अस्मिन्नर्थे प्रमाणमाह–

मू० यथोक्तं भगवता पराशरेण "श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन ? अनात्मन्यात्मबुद्धिर्ये"ति, यदि ज्ञप्तिमात्रमेवात्मा तदाऽनात्मन्यात्माऽभिमाने शरीरे ज्ञप्तिमात्रप्रतिभासः स्यान्न ज्ञातृत्वप्रतिभासस्तस्माद् ज्ञाताऽहमर्थ एवात्मा, तदुक्तम् "अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात् । अविद्यायोगतश्चात्मा ज्ञाताऽहमिति भासते" इति, तथा च, "देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः । नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी"ति,

टी० "यथोक्त"मिति, तत्रैव पुराणे अनात्मविषयाहंबुद्धिवचनयोर्भ्रान्तत्वमात्मविषयत्वभ्रान्तत्वं च स्पष्टं, यथा "आकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थिते । अनात्मन्यात्ममयं भावं कः करोति कलेवरे ॥ पञ्चभूतात्मके देहे देही मोहतमोवृतः । अहं ममेति चेत्युच्चैः कुरुते कुमतिर्मति"मिति, आदिभरतचरिते "आत्मन्येव न दोषाय शब्दोऽहमिति यो द्विज । अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः ॥ इति एतद्वचनार्थमप्यहमर्थात्महेतुत्वेनाह "यदी"ति, अनात्मनीति अनात्मन्यहं प्रतीतिः कथमात्माभिमान इत्यर्थः । अहमर्थात्मत्वं निगमयति "तस्मादि"ति, अस्मिन्नर्थे आत्मसिद्धिग्रन्थमुदाहरति "तदुक्तमि"ति. धर्मधर्मिभावेन प्रतीतिः प्रत्यक्षसिद्धिः स्थिरत्वास्थिरत्वादिवैषम्यं श्रुत्यर्थापत्तिश्च न्यायः, आगम उदाहृतोपनिषद्वाक्यानि अविद्यायोगोऽनन्तरोक्तभ्रान्तियोगः । अहमर्थस्यानात्मत्वे स्थूलोऽहमिति भ्रान्तेरयोग इति भावः । ज्ञातुरात्मत्वे संवादिग्रन्थो दर्शित

Digitized by Google

ज्ञप्तेरनात्मत्वे चात्मसिद्ध्यन्यमाह "तथा चे"ति, धीभ्योऽन्य इत्येतद-चोपयुक्तं, साधनशब्दस्योत्पादकज्ञापकसाधारणत्वात्तद्व्याचष्टे-

मू० अनन्यसाधनः-स्वप्रकाशः, व्यापी-अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः । यदुक्तं

टी० "अनन्ये"ति, जीवस्वरूपविभुत्वशङ्काव्युदासार्थं व्याप्तिशब्दं व्याचष्टे "अती"ति, पुराणादिषु व्याप्तिशब्दप्रयोगात्स एवात्र श्लोके प्रयुक्तः यत्र यत्र जीवस्य व्याप्तिवाचिनः शब्दास्तत्र तत्रायमेवार्थो द्रष्टव्य इति भावः । जीवस्य धर्मभूतज्ञानेन व्याप्तिरात्मसिद्धावेवोच्यते व्याप्तिरपि चैतन्यमात्रेण न स्वरूपेणेति अतो यथोक्त एवार्थः । अथ शास्त्रप्रत्यक्ष-विरोधे [1]'शास्त्रप्राबल्यमनूद्य निरस्यति यदुक्तमित्यादि वाक्येन पूर्वमूलि-मूलभावपरोक्षापरोक्षरूपत्वादिर्न बाध्यबाधकभावे कारणं ज्वालाभेदानु-मानेन व्यभिचारात् आदित्यो यूप इत्यादावपि यूपादित्यैक्याप्रतिपादनं न दौर्बल्यात् अपि तु यूपाञ्जनविधिशेषत्वेनैक्यतात्पर्याभावादित्युक्तं, तत्र ज्वा-लाभेदानुमानात् शास्त्रे त्रिधा वैषम्यमस्ति प्रमाणान्तरेण दोषमूलत्वानिश्च-यादन्योन्याश्रयः, बाध्यबाधकयोस्तुल्यदोषत्वं मूलोच्छेदित्वं चेति एतत्त्रयं ज्वालाभेदानुमाने नास्ति तथा हि एकवर्तिकावर्तित्वनिबन्धनसादृश्याख्य-दोषस्यासत्यप्यैक्ये ऐक्यप्रतीतिहेतुत्वम् अचिरनिर्वापितारोपितप्रदीपे दृष्ट-मिति चक्षुषा ज्वालैक्यप्रतिपत्तेः क्वचिद्दोषमूलत्वनिश्चयादन्यत्रैक्यप्रतिपत्ता-वपि दोषमूलत्वसंभवज्ज्वालैक्यप्रत्यक्षं शङ्कितं न निश्चयाजननक्षमं परीक्ष-कस्य भवेत् ज्वालायां सादृश्यरूपदोषस्यासत्यप्यैक्ये ऐक्यप्रतीतिहेतुत्वं प्रमा-णान्तरेण न दृष्टं चेत् अन्योन्याश्रयः स्यात् अनुमानप्राबल्यात् प्रत्यक्षस्यान्य-थासिद्धिः, तदन्यथासिद्ध्याऽनुमानप्राबल्यमित्यैक्यप्रतीतेरन्यथासिद्धिसंभवः प्रमाणान्तरदृष्ट इति नान्योन्याश्रयः । अत्र न तथा प्रमाणान्तरेण भेदवा-सनाया दोषत्वं दृष्टं किंच दीपे बाध्यस्य ज्वालैक्यज्ञानस्य सादृश्याख्य-

१ शास्त्रप्रत्यक्षयोर्विरोधे शास्त्रं बलीय इति शाङ्कराः । निर्णीतप्रामाण्यकं प्रत्यक्षं शास्त्रापेक्षया बलवदिति भाभवताः, एतदधिकरण पूर्वमेव निरूपितमस्माभिरिति तत्रैव द्रष्टव्यम् ।

दोषमूलत्वेऽपि बाधकस्य ज्वालाभेदानुमानस्य न सादृश्यदोषमूलत्वं दृष्टमत्र तु बाध्यस्य प्रत्यक्षस्य बाधकस्य शास्त्रस्य चोभयोः पराभ्युपेतं दोषमूलत्वम् अविशिष्टं विद्यत इति तुल्यदोषत्वं, किंच तत्र ज्वालाख्यधर्मिग्राहिणः प्रत्यक्षस्य प्रथमवर्त्यवयवाग्निसंयोगे चरमवर्त्यवयवविनाशे चोत्पत्तिविनाशयोर्व्याप्तिग्राहिणः प्रत्यक्षस्य प्रत्यवयवमग्निसंयोगवर्त्यवयवविनाशाख्यलिङ्गग्राहिणः प्रत्यक्षस्य च न भेदानुमानबाध्यविषयत्वमैक्यप्रतिपत्तेरेव तत् अत्र तु शब्दाख्यधर्मिग्राहिणस्तस्य निर्दोषत्वसाधकलिङ्गग्राहिणः षड्विधतात्पर्यलिङ्गग्राहिणश्च प्रत्यक्षस्य तेषां तात्पर्यलिङ्गानां च शास्त्रेणैव बाधोपगमान्मूलोच्छेदित्वमिति त्रिधा वैषम्यम् । एतद्वैषम्यत्रयमुपपादयिष्यन् पूर्वपक्षमनुवदति—

सू० दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदावलम्बिप्रत्यक्षस्य शास्त्रबाध्यत्वमिति कोऽयं दोष इति वक्तव्यं यन्मूलतया प्रत्यक्षस्यान्यथासिद्धिः ॥

टी० "दोषमूलत्वेने"ति, सकलभेदावलम्बिप्रत्यक्षस्येति, अत्रायं भावः तत्त्वशुद्धिकारादिभिः कैश्चित्काचतिमिरादिरेव प्रत्यक्षस्य दोष उक्तः स नोपपद्यते काचतिमिरादेः काचित्कत्वात् । एतेन प्रत्यक्षान्तराणां दोषमूलत्वमनुमीयते चेच्छब्दत्वाच्छास्त्रस्यापि दोषमूलत्वमनुमीयतां शास्त्रे दोषस्य योग्यानुपलम्भनिरासश्चेत्प्रत्यक्षेऽपि तथैव स्यात् । किंच आयुर्वेदे दोषाणां स्वरूपतश्चिकित्स्युपायादिकं च निरूपितं सर्वप्रत्यक्षस्य दोषमूलत्वानुमानं तद्विरुद्धं च । किंच सर्वप्रत्यक्षस्य दोषमूलत्वे सन्मात्रग्राहिणः प्रत्यक्षस्य च दोषमूलत्वात् सन्मात्रमपि मिथ्या स्यादिति दूषयति कोऽयमित्यादिना "कोऽयं दोष इति वक्तव्यमि"ति, कोऽयं दोष इत्यनया वचनव्यक्त्या दोषरूपमूलं यदुक्तं तत्किमिति पृष्टे दोष इति दोष इति वक्तव्यमित्यर्थः । यद्वा यच्छब्दसामर्थ्यात्तत्रेत्याक्षेपसिद्धं दोषमूलत्वेनेत्यादिना यदर्थजातमुक्तं तत्र कोऽयं दोष इति पृष्टे वक्तव्यमित्यर्थः । कुतो वक्तव्यमित्यत्राह "यन्मूलतये"ति, न हि दोषमनुक्त्वाऽन्यथासिद्धिः सुवचेत्यर्थः । दोषमाह—

भू० अनादिभेदवासनैव हि दोष इति चेत् भेदवासनायास्तिमिरादिवत् यथावस्थितवस्तुविपरीतज्ञानहेतुत्वं किमन्यत्र ज्ञातपूर्वम्?। अनेनैव शास्त्रविरोधेन ज्ञायत इति चेन्न अन्योन्याश्रयणात् शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चये सति भेदवासनाया दोषत्वनिश्चयो भेदवासनाया दोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चय इति। किंच यदि भेदवासनामूलत्वेन प्रत्यक्षस्य विपरीतार्थत्वं शास्त्रमपि तन्मूलत्वेन तथैव स्यात्। अथोच्यते दोषमूलत्वेऽपि शास्त्रस्य प्रत्यक्षावगतसकलभेदनिरसनज्ञानहेतुत्वेन परत्वात् तत्प्रत्यक्षस्य बाधकमिति।

टी० "अनादी"ति, स्वरूपसंप्रतिपत्तिपर एवकारः, हि-शब्देन दोषान्तरासंभवसिद्धवत्कारः, स्वमते दोषत्वे संप्रतिपत्त्यभिमानाद्वा हि-शब्दः, दोषत्वं हि विपरीतज्ञानहेतुत्वमतो विपरीतज्ञानहेतुत्वेन व्याप्तेरदृष्टतया भेदवासनास्वरूपसंप्रतिपत्तावपि दोषत्वासंप्रतिपत्तेः। पृच्छति "भेदवासनाया"इति, तिमिरादिवदित्यादिशब्देन सादृश्यादि विवक्षितं, तद्धि ज्वालायामैक्यभ्रमहेतुः, अन्यच ज्ञातपूर्वत्वस्य दुर्वचत्वात् शङ्कते "अनेनैवे"ति, दूषयति "ने"ति, एवं प्रमाणान्तरेण दोषत्वानिश्चयेनान्योन्याश्रयणापत्तिरूपवैषम्यमुक्तम्। अथ तुल्यदोषत्वं बाध्यबाधकयोराह "किंचे"ति, अथ दोषमूलत्वे तुल्येऽपि परत्वाद्बाधकत्वं शङ्कते "अथे"ति, अपच्छेदादिष्विदं रजतं नेदं रजतमित्यादिषु परं च बाधकं दृष्टम् अतो निषेध्योपस्थापकमानापेक्षया निषेधकस्य परत्वात् बलीयस्त्वमित्यर्थः। एवं ब्रह्मप्रतिपादकशास्त्रस्यापि व्युत्पत्त्यादेः प्रत्यक्षादिमूलतया तत्पूर्वकस्य तस्य प्रत्यक्षाद्यपेक्षया परत्वात्तत्प्रतिपाद्ये निर्विशेषवस्तुसत्यत्वमपि तुल्यन्यायतया सिद्धं तद्दूषयति—

मू० नच, दोषमूलत्वे ज्ञाते सति परत्वमकिंचित्करं रज्जुसर्पभ्रान्तिनिमित्तभये सति भ्रान्तोऽयमिति परिज्ञानेन केनचिन्नायं सर्पो मा भैषीरित्युक्तेऽपि भयानिवृत्तिदर्शनात् शास्त्रस्य च दोषमूलत्वं श्रवणवेलायामेव ज्ञातं श्रवणावगतनिखिलभेदोपमर्दिब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः, अपि चेदं [1] शास्त्रमसंभाव्यमानदोषं, प्रत्यक्षं तु संभाव्यमानदोषमिति केनावगतं त्वया ॥

टी० "नचे"ति, परत्वस्याकिंचित्करत्वमुपपादयति "रज्जुसर्पे"ति, उत्तरज्ञानस्य दोषमूलत्वेन प्रामाण्यानिश्चयाद्भयानिवृत्तिः

ननु भ्रान्तत्वे ज्ञाते परत्वमकिंचित्करमस्तु, अत्र तु भ्रान्तत्वज्ञानमेवास्तीत्यत्राह "शास्त्रस्य चे"ति, ज्ञातत्वमुपपादयति "श्रवणावगते"ति, शास्त्रस्य भेदवासनामूलत्वं हि तावत्संप्रतिपन्नं तस्याश्च दोषत्वं भेदमिथ्यात्वज्ञानादवगम्यते तन्मिथ्यावगतिर्ज्ञाननिवर्त्यत्वावगमात् ज्ञाननिवर्त्यत्वावगमश्च ब्रह्मात्मैकत्वज्ञानस्य निखिलभेदोपमर्दित्वावगतेः, अत इत्थं दृढनिवर्तकज्ञानाभ्यासरूपमननं कुर्वता शास्त्रस्य दोषमूलत्वमवगतमित्यर्थः । एवं बाध्यबाधकयोस्तुल्यदोषत्वरूपवैषम्यमुक्तम्

अथ मूलोच्छेदित्वमाह "अपि चे"ति, इदं शास्त्रमिति शब्दराशिव्यावृत्तिः । असंभाव्यमानदोषमिति बुद्धागमादिव्यावृत्तिः त्वया प्रमाणप्रमेयादिकं तात्त्विकत्वेनानभ्युपगच्छता

मू० न तावत्त्वतःसिद्धान्तिकृतनिखिलभेदविशेषानुभूतिरिममर्थमवगमयति तस्याः सर्वविषयविरक्तत्वाच्छास्त्रपक्षपातविरहाच्च, नाप्यैन्द्रियकं प्रत्यक्षं दोषमूलत्वेन विपरीतार्थत्वात्तन्मूलत्वादेव नान्यान्यपि प्रमाणानि, अतः स्वपक्षसाधनप्रमाणानभ्युपगमान्न स्वाभिमतार्थसिद्धिः ॥

---

[1] अपि चेदं शास्त्रम् एतच्चासंभाव्यमानदोषमिति द्राविडपाठः ।

टी० "न तावदि"ति, स्वतःसिद्धत्वेन निर्धूतनिखिलविशेषत्वमेतद्विशेषणं निर्विषयत्वप्रदर्शनार्थं, कुतो नावगम्यत इत्यत्राह "तस्या"इति, सर्वविषयविरक्तत्वात् निर्विषयत्वादित्यर्थः । न हि ज्ञानमसंबन्ध्य[1] विषयं प्रकाशयति वस्तुतो निर्विषयापि भ्रान्त्यविद्यमानमपि शास्त्रप्राबल्यमवगमयतीत्यत्राह "शास्त्रपक्षपातविरहाच्चे"ति, असंबद्धाविद्यमानत्वाविशेषात्सौगतादिशास्त्रान्तरप्रामाण्यमप्यवगमयेदित्यर्थः । प्रत्यक्षादिकमवगमयतीत्याह । "नापी"ति, योगिप्रत्यक्षादेरप्यैन्द्रियकप्रत्यक्षमूलशास्त्रजन्यज्ञानहेतुकादृष्टकार्यत्वादैन्द्रियकप्रत्यक्षं प्रथममुपात्तं तन्मूलत्वाद्वेदवासनामूलप्रत्यक्षत्वादेवं प्रकृतगोचरतयोक्तं प्रमाणाभावं पराभिमतसर्वेश्वरपरत्वेनोपसंहरति "अत"इति, न स्वाभिमतार्थसिद्धिः स्वाभिमतं प्रत्यक्षदौर्बल्यशास्त्रसमूलप्राबल्यादिकम् । एतत्स्व[2]षडुभकारात्मकुतर्कनिरसनोपलक्षणार्थत्वमुक्तं तत्र प्रमाणव्याप्त्यादिभङ्गः क्रियते तत्रेदं प्रष्टव्यं स्वाभिमतव्यतिरिक्तार्थपरं शास्त्रान्तरमपरमार्थार्थकमित्यस्मिन्पक्षे किं तव प्रमितिस्तत्साधनं वास्ति? उत नास्ति? अस्ति चेन्न प्रमाणादिभङ्गः चेतनरात्रनप्रमाणादिभङ्गः प्रमितितत्साधनादिकमस्त्येव तद्व्यावहारिकमिति चेत् किमिदं व्यावहारिकत्वं? किं परमार्थत्वमुतापरमार्थत्वम्? अपरमार्थभूतम् प्रमाणं किं साधकमुतासाधकं? साधकं चेदपरमार्थसंज्ञितमन्येषां च प्रमाणं तत्पक्षसाधकमेव स्यात् अथासाधकं ततो नितरां वाद्यन्तराभ्युपगतप्रमाणादिकं साधकं भवेत् त्वदुक्तं प्रमाणादिकं परमार्थभूतं चेत् द्वैती विजयी स्यादिति स्वपक्षपरपक्षभेदः किं परमार्थः? उतापरमार्थः? परमार्थश्चेच्च भेदमिथ्यात्वम् अपरमार्थश्चेत्परपक्ष एव त्वयाऽङ्गीकृतः स्यादिति भेदपारमार्थ्यं त्वयैवोक्तं स्यादिति एवमादिव्याघाताः सर्वत्रानुसंधेया इत्यभिप्रायः । अथ स्वपक्षसाधनप्रमाणाभावं प्रतिविवक्षुश्चोदयति—

श्रु० ननु व्यावहारिकप्रमाणप्रमेयव्यवहारोऽस्माकमस्त्येव । को-

१ असंबन्ध्येति तु युक्तः पाठः प्रत्ययस्य क्त्वेन नञो पारवश्यंभावात् ।

२ श्रीभाष्याचार्याः श्रीहर्षात्खण्डनकर्तोऽनन्तरमवर्ततेत्यनया पङ्क्त्या स्फुटतीति मन्ये ।

ऽयं व्यावहारिको नाम। आपातप्रतीतिसिद्धो युक्तिभिर्निरूपितो न तथाऽवस्थित इति चेत् किं तेन प्रयोजनं? प्रमाणतया प्रतिपन्नेऽपि यौक्तिकबाधादेव प्रमाणकार्याभावात्। अथोच्येत शास्त्रप्रत्यक्षयोर्द्वयोरप्यविद्यामूलत्वेऽपि प्रत्यक्षविषयस्य शास्त्रेण बाधो दृश्यते

टी० "नन्वि"ति, कोऽयमित्याक्षिपति। व्यावहारिकस्वरूपं दर्शयति, "आपाते"ति, दूषयति "किं तेने"ति, साध्यनिश्चयरूपप्रयोजनस्येत्यर्थः। कुत इत्यत्राह, "प्रमाणतये"ति, युक्त्या बाधो यौक्तिकबाधः धूमबुद्ध्या गृहीतबाष्पादेः साध्यनिश्चयाहेतुत्वादर्शनादित्यर्थः। एवं मूलोक्तेद्वित्वं वैषम्यमुपपादितं पूर्वपरोक्तं परत्वाद्वैषम्यं दूषितम्। अथास्मात्परस्य कस्यचिद्बाधकस्याभावं वक्तुं ब्रह्मप्रतिपादकशास्त्रस्य प्रत्यक्षाद्वैषम्यं शङ्कते, "अथोच्ये"तेत्यादिना, बाधदर्शनाभावरूपवैषम्यं शास्त्रस्य वक्तव्यं प्रत्यक्षस्य विषयस्य बाधदर्शनमाह "शास्त्रे"ति, प्रत्यक्षविषयबाच्छास्त्रविषयस्य वैषम्यमाह—

मू० शास्त्रविषयस्य सद्द्वितीयस्य ब्रह्मणः पश्चात्तनबाधादर्शनेनैव निर्विशेषानुभूतिमात्रं ब्रह्मैव परमार्थ इति तदयुक्तं अबाधितस्यापि दोषमूलस्यापारमार्थ्यनिश्चयात् एतदुक्तं भवति यथा सकलेतरकाचादिदोषरहितपुरुषागोचरगिरिगुहासु वसतस्तैमिरिकजनस्याज्ञानस्य तिमिरस्य सर्वस्यापि तिमिरदोषाविशेषेण द्विचन्द्रज्ञानमविशिष्टं जायते तत्र न बाधकप्रत्ययोऽस्तीति न तन्मिथ्या न भवतीति तद्विषयभूतं चन्द्रद्वित्वमपि मिथ्यैव दोषो ह्ययथार्थज्ञानहेतुः॥

टी० "शास्त्रविषयस्ये"ति, पाश्चात्यबाधादर्शनाभ्युपगमेन दूषयति "तदयुक्त"मिति, कुत इत्यत्राह, "अबाधितस्येति,"यस्य च दुष्टं कारणं यस्य च मिथ्येति प्रत्ययः स एवासमीचीनप्रत्यय इति हि नीतिविदः

अतो दोषमूलत्वबाधकप्रत्ययौ प्रत्येकं मिथ्यात्वसाधकौ व्याहतमिदं यदबाधितस्याप्यपारमार्थ्यनिश्चय इत्यपरमार्थत्वेन निश्चितत्वं हि बाधितत्वमित्यत्राह, "एतदुक्त"मिति, अज्ञातस्वतिमिरस्येति पदं क्वचिद्दृश्यते दोषज्ञाननिबन्धनस्य परोक्षबाधकज्ञानोदयव्युदासः प्रयोजनं ज्ञातस्वतिमिरस्येति पाठो लेखकस्खलनकृतः स हि पुरुषान्तरागोचरस्योक्तिविरुद्धः बाधकाभावे कथं मिथ्यात्वमित्यत्राह "दोषो ही"ति, भ्रान्तिसमानाश्रयबाधकज्ञानाभावेऽपि पुरुषान्तरज्ञानेन मिथ्यात्वनिश्चयो न व्याहत इत्यर्थः । तिरश्चां यावज्जीवं बाधोदयाभावेऽपि देहात्मधीर्मिथ्यार्थविषया तस्याः संसर्गरूपदोषमूलत्वात् बाह्यभ्रमेषु स्पष्टोदाहरणस्य विवक्षितत्वादेतदनुक्तिः

ननु तिरश्चां देहात्मभ्रमो नास्माकं प्रत्यक्षः कार्यानवगमात् भ्रमकारणदोषोऽपि दुरवगमः, तत्कथं दोषमूलत्वसंभावनाज्ञानमात्रेण मिथ्यात्वनिश्चयः, उच्यते अस्मदादेः शास्त्रश्रवणात्पूर्वं देहात्मभ्रमदर्शनात्तेषां च शास्त्राधिकाराभावात् देहात्मभ्रमस्तन्मूलं देहसंसर्गरूपदोषवत्त्वं च अनुमीयते दोषमूलत्वनिश्चयान्मिथ्यात्वनिश्चयः, एवं तैमिरिकजनकस्य तिमिरान्वये आप्तवाक्यादिकमन्वेष्टव्यं ततो मिथ्यात्वनिश्चयः, एवं सपदे शिक्षितमर्थं दार्ष्टान्तिके निगमयति—

मू० तथा ब्रह्मज्ञानमविद्यामूलत्वेन बाधकज्ञानरहितमपि स्वविषयेण ब्रह्मणा सह मिथ्यैवेति। भवन्ति चात्र प्रयोगाः: विवादाध्यासितं ब्रह्म मिथ्या अविद्यावदुत्पन्नज्ञानविषयत्वात् प्रपञ्चवत्। ब्रह्म मिथ्या ज्ञानविषयत्वात् प्रपञ्चवत्। ब्रह्म मिथ्या असत्यहेतुजन्यज्ञानविषयत्वात् प्रपञ्चवदेव

न च वाच्यं स्वाप्नस्य हस्त्यादिज्ञानस्य असत्यस्य परमार्थशुभाशुभप्रतिपत्तिहेतुभाववदविद्यामूलत्वेनासत्यस्यापि शास्त्रस्य परमार्थभूतब्रह्मविषयप्रपत्तिहेतुभावो न विरुद्ध इति, स्वाप्नज्ञानस्यासत्यत्वाभावात्॥

टी० "तथे"ति, ज्ञानमिथ्यात्वं परमताभ्युपगमादुक्तं पाश्चात्यबाधादर्शनमुत्तरत्र निरसिष्यते शास्त्रस्याविद्यामूलत्वाभ्युपगमेऽनिष्टं प्रसज्यते"भवन्तीत्यादिना, व्याप्तिप्रदर्शनवचनस्यात्मयोगा इत्युक्तं प्रतिज्ञादृष्टान्तहेतुरूपेण कथमनिष्टप्रसङ्गः । एवमपि न्याय्य इति ज्ञापनार्थं ज्ञानविषयत्वमात्रमेको हेतुः, एको दुष्टपुरुषज्ञानविषयत्वम् एको मिथ्याभूतसामग्रीजन्यज्ञानविषयत्वमिति भिदा । पूर्वं सपक्षीभूत एवात्र सपक्ष इत्येवकारार्थः । नन्वसत्यहेतुजन्यधीविषयत्वमन्यतरासिद्धं प्रपञ्चवदिति दृष्टान्तश्च साध्यविकलः कथमेव प्रसङ्गश्च उच्यते ब्रह्मणोऽननुभूतित्वं त्वदुक्त्यैव प्रसज्यत इति तत्प्रसञ्जकप्रसञ्जनीयधर्मव्याप्तिं परमतेनाभ्युपगम्य दूषणमुक्तमिति न विरोधः, नासत्यहेतुजन्यज्ञानविषयत्वादसत्यत्वं ब्रह्मणः असत्यादपि सत्यप्रतिपत्तिर्दृश्यत इति शङ्कामनूद्य, परिहरति "न चेत्यादिना" किमसत्यस्य सत्योत्पत्तिहेतुत्वानुपपत्तिरुत तज्ज्ञप्तिहेतुत्वानुपपत्तिरिति विकल्पमभिप्रेत्य उत्पत्तिहेतुत्वे ज्ञप्तिहेतुत्वे चोदाहरणानि दर्शितानि तत्र स्वाप्नविषयाणां सत्यत्वेऽभिमतेऽपि विषयासत्यत्वमभ्युपगम्य परिहरति, "स्वाप्नेति,"ज्ञानस्य सत्यत्वमुपपादयति–

मू० तत्र हि विषयाणामेव मिथ्यात्वं, तेषामेव हि बाधो दृश्यते न ज्ञानस्य न हि मया स्वप्नवेलायामनुभूतं ज्ञानमिह न विद्यते इति कस्य चिदपि प्रत्ययो जायते, दर्शनं तु विद्यते अर्था न सन्तीति बाधकसंप्रत्ययः मायाविनो मन्त्रौषधादिप्रभवं मायामयं ज्ञानं सत्यमेव प्रीतेर्भयस्य च हेतुः, तत्रापि ज्ञानस्याबाधितत्वाद्विषयेन्द्रियादिदोषजन्यं रज्ज्वादौ सर्पादिविज्ञानं सत्यमेव भयादिहेतुः सत्यैवाहष्टेऽपि स्वात्मनि सर्पसंनिधानात् दष्टबुद्धिःसत्यैव शङ्काविषबुद्धिः स्मरणहेतुभूता वस्तुभूत एव जलादौ मुखादिप्रतिभासो वस्तुभूतमुखगतविशेषनिश्चयहेतुः ॥

टी० "तत्र ही"ति, अवधारणं कथमित्यत्राह, "तेषामेवे"ति, ज्ञानाबाध्यं दर्शयति, "न ही"ति, कथं बाध्यते, इत्यत्राह, "दर्शनं त्वि"ति, अन्यविषयो बाधो नान्यत्र संचारयितुं युक्त इत्यर्थः। अत्रेदमेकोदाहरणप्रदर्शनं तत्तज्ज्ञानसामग्रीविशेषाणां सत्यत्वज्ञापनार्थं तच्च ज्ञानसत्यत्वनिर्वहणार्थस्वप्रकाराणां पूर्वानुभवसंस्कारसत्यप्रसिद्धत्वादनुक्तिः मायाश्चेत् इत्यत्राह, मन्त्रौषधादिप्रभवमित्यनेन कारणस्य सत्यत्वमुक्तं मायामयं मिथ्याविषयमित्यर्थः, विचित्रविषयं वा विषयेत्यादि विषयदोषः सादृश्यादिः, इन्द्रियदोषः काचादिः, आदिशब्देन देशगतदूरत्वादिदोष उच्यते दोषश्च सत्यः सत्यत्वेवेति सर्पसंनिधानं कारणं सत्यं दुष्टबुद्धिश्च सत्याशङ्काविषयबुद्धावपि सामग्री सत्या निर्विषोरगदंशनं वा अन्धकारे इमलोष्टादिनिपीडनं वा सत्यं हि भवति जलादि सत्यं तत्कृतचाक्षुषतेजःप्रतिहतिश्च सत्या संवेदनानां सत्यत्वे निश्चिते शुक्त्युदाहरणेषु सत्यात्सत्यता प्रतिपत्तव्या

मू० एतेषां संवेदनानामुत्पत्तिमत्त्वादर्थक्रियाकारित्वाच्च सत्यत्वमवसीयते हस्त्यादीनामभावेऽपि कथं तद्बुद्धयः सत्या भवन्तीति चेत् नैतद्बुद्धीनां सावलम्बनत्वमात्रनियमात् अर्थस्य प्रतिभासमानत्वमेव ह्यालम्बनत्वेऽपेक्षितं प्रतिभासमानता चास्त्येव दोषवशात्

टी० "एतेषामि"ति, उत्पत्तिमत्त्वमर्थक्रियाकारित्वं च द्वयमपि प्रत्येकं सत्यत्वे साधकं न च शुक्तौ रजतमुत्पत्तिमत्

न च कार्यकरम्। अथ ज्ञानसत्यत्वं विषयसत्यत्वात्प्राप्तं तन्निवृत्त्या ज्ञानसत्यत्वनिवृत्तिरिति शङ्कते, "हस्त्यादीनामि"ति, अभावं प्रतिपद्यापाद्य तथात्वाभावे ज्ञानासत्यत्वं सालम्बनमात्रव्याप्तम् अबाधितत्वादिति परिहरति "नैतदि"ति, सालम्बनत्वमात्रशब्देन सत्यालम्बनत्वव्यावृत्तिः मिथ्याभूतस्यालम्बनत्वं कथमित्यत्राह "अर्थस्ये"ति, आलम्बनं विषयप्रतिभासमानत्वमेव ह्यालम्बनत्वेऽपेक्षितमिति प्रतिभासमानत्वमेव विषयत्वमित्यर्थः। अविद्यमानस्याप्यतीतानागतादेः प्रतिभासमानस्यालम्बनत्व-

Digitized by Google

दर्शनाद्विद्यमानस्याप्यप्रतिभासमानस्य तदभावाच्चेति भावः । पक्षे प्रतिभासमानत्वमप्यस्तीत्याह, "प्रतिभासे"ति, प्रतिभासमानता संविदपेक्षया प्रतिसंबन्धित्वम् अविद्यमानस्य विद्यमानतया भासनात्तेन रूपेणासत्यता तथा साक्षादवभासमानो विषयो विज्ञानहेतुः स्यात् संप्रतिपन्नविद्यमानविषयवत् विद्यमानतया भासमानत्वाविशेषात् तथा सत्यसत्यात्सत्योत्पत्तिरित्यत्राह, "दोषवशादि"ति, अविद्यमानस्य विद्यमानतया भासनहेतुर्दोष एव न त्वविद्यमानो विषयः अविद्यमानो विषयो न ज्ञानस्य हेतुतयाऽपेक्षितः केवलविषयतया विद्यमानस्तु तथात्वेन भासमानो विषयतया हेतुतया चापेक्षितः अतो वस्तुतो विद्यमानत्वमेव विषयस्य ज्ञानहेतुत्व उपाधिः नियतपूर्वकालवर्त्तिनो हि हेतुत्वं दृष्टं तस्मादविद्यमानस्य हेतुत्वायोगात् दोष एव हेतुरिति नासत्यात्सत्योत्पत्तिरित्यर्थः प्रतिभासमानत्वे द्वयोरविशिष्टे कथमन्यतरस्यासत्यत्वनिश्चय इत्यत्राह ॥

सू० स तु बाधितोऽसत्य इत्यवसीयते अबाधिता हि बुद्धिः सत्यैवेत्युक्तं रेखया वर्णप्रतिपत्तावपि नासत्यात्सत्यबुद्धी रेखायाः सत्यत्वात् ॥

टी० "स त्वि"ति, बुद्धिरप्यसत्या किन्न स्यादित्यत्राह, "अबाधिते"ति, विषयासद्भावेन ज्ञानस्यासत्यताकथनं कालात्ययापदिष्टमित्यर्थः ।

ननु स्वाप्नादिविषयज्ञाने किं ज्ञानमात्रं शुभाशुभप्रतिपत्तिहेतुरुत ज्ञानविशेषः ज्ञानमात्रपक्षेऽतिप्रसङ्गः, ज्ञानविशेषश्चेत् कस्तस्यावच्छेदकः विषयश्चेत्किं विषय उपलक्षणतयावच्छेदक उत विशेषणतया? यदि विशेषणतया तदा विशेषेण सहकार्यत्वमिह विशेषणमतो हस्त्यादेरपि शुभाशुभप्रतिपत्तिहेतुत्वादसत्यात्सत्यप्रतिपत्तिः, यद्युपलक्षणतया उपलक्ष्यबहिर्भूत उपलक्ष्यप्रतिपत्त्युपायो ह्युपलक्षणम् अतो विषयस्य ज्ञानप्रतिपत्तिहेतुत्वादसत्यात्सत्यप्रतिपत्तिः ज्ञानानां तत्तद्व्यवहारानुगुण्यलक्षणस्वभावविशेषैर्व्यावृत्तत्वान्नातिप्रसङ्गः इति वाच्यं व्यवहारानुगुण्यमात्रस्य व्यावर्त्तकत्वेऽतिप्रसङ्गाद्व्यवहारविशेषानुगुण्यविशेषस्य व्यावर्त्तकत्वे तद्विशेषणसङ्ग्राहकविषया-

धीन इति व्यवहारावच्छेदकतया अनृतस्य सत्यहेतुत्वमिति अत्रोच्यते व्यावृत्तमेव ज्ञानं शुभाशुभाद्यनुमापकं, व्यावृत्तिश्च स्वालम्बनेन अविद्यमानस्याप्यालम्बनत्वं दोषवशादित्युक्तम् अन्यथाख्यातिपक्षेऽप्यालम्बनसत्यता सर्वज्ञानानामिष्यत एव विशेषणविशेष्यतया संसर्गाणां क्वचित्सत्यत्वात् विशेष्ययोस्तथात्वनिर्वाहकसंसर्गः स्वस्य तदीयत्वे संसर्गान्तरानिरपेक्षः स तु संसर्गः पुरोवर्तिनि भ्रमाधिष्ठाने प्रतीयमानः पुरोवर्त्यपेक्षया स्वयं स्वस्य संसर्गरूपत्वनिर्वहणासामर्थ्यात् पुरोवर्तिनि नास्तीति पुरोवर्त्यपेक्षया संसर्गो, ऽपरमार्थः, न तु स्वरूपेण आलम्बनत्वे च सन्निहितत्वरूपमनपेक्षितम् असन्निहितस्याप्यालम्बनत्वदर्शनात् अतः सत्येन रूपेणालम्बनत्वमिति हस्त्यारोहणादिज्ञानान्यपि सत्यभूतहस्त्याद्यालम्बनावच्छिन्नानि परमार्थभूतया स्वप्नावस्थयावच्छिन्नत्वाज्जाग्रदवस्थाज्ञानविलक्षणानि शुभाशुभप्रतिपत्तिनिमित्तानि अतो नातिप्रसङ्गः। नासत्यात्सत्योत्पत्तिश्च

न च प्रतिबिम्बाद्बिम्बानुमितावसत्यात्सत्यप्रतिपत्तिः प्रतिबिम्बप्रतिभासस्य सत्यस्यैवानुमापकत्वात् परमार्थतस्तु तत्र नानुमापकानुमेयविभागः, दर्पणादिप्रतिपत्तेश्चानुषतेजोभिर्बिम्बस्यैव दर्पणस्थतया ग्रहणमाणत्वादतः क्वचिदर्थाप्रतिपत्तिः क्वचित्प्रतिभासात्तदर्थप्रतिपत्तिरिति नासत्यस्य लिङ्गत्वं वासत्यप्रतिपत्तिः किंचासत्यात्सत्यप्रतिपत्तिः भवत्पक्षेणोच्यते उतास्मत्पक्षेण न तावद्भवत्पक्षेण सा सिध्यति शुभाशुभयोरपि मिथ्यात्वेनासत्यादसत्यप्रतिपत्तिरेव हि तस्मात् न चास्मत्पक्षेण यथार्थख्यात्यभ्युपगमात् सत्यादेव सत्यप्रतिपत्तेः एषां स्वाप्नहस्त्यादिज्ञानादीनां शुभाशुभप्रतिपत्त्यादिहेतुभूतानां अयथामुदाहरणज्ञानानां संस्कारादिसत्यसामग्रीकत्वं स्पष्टं ज्ञानानां सत्यत्वमुपपादितम् अत उत्पत्तौ ज्ञप्तौ च हेतुसत्त्वं सिद्धम् अथ ज्ञानव्यतिरिक्तासत्यहेतुना सत्यप्रतिपत्तौ हेतुसत्यत्वमुपपाद्यते रेखयेत्यादिना हेतोरसत्यत्वं दर्शयंश्चोदयति

(शेषमग्रे)

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(Continued from page 135. VOL. IX.*)*

न च वार्त्रघ्निको मन्त्रो नाघारवल्लाभान्मान्त्रवर्णिकी देवता स्यात् अग्निहोत्रे तु होमस्य पुरुषव्यापारस्य श्रवणादस्ति मन्त्राकाङ्क्षा योग्यश्च होमो देवताऽभिधायिना मन्त्रेण संबन्धुं वार्त्रघ्निकश्च तत्र मन्त्रः तेन युक्तं मान्त्रवर्णिकदेवताकल्पनम् । इह तु मन्त्रसंबन्धस्याकाङ्क्षायोग्यत्ववशेन कल्प्यत्वात् न प्राग्यागात्सिद्धिरस्तीति देवतासम्बन्धेनैव यागो लब्धव्य इत्याग्नेयशब्देन देवता विधातव्या विशिष्टकर्मविधानाच्चार्थादनेकेषामपि गुणानां विधिः सिद्ध्यतीति न वाक्यभेदः ॥

बर्हिरादिशब्दानां जातिवाचिताऽधिकरणम् ।

सू० बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः ॥ ७ ॥

कर्मनामप्रसङ्गात् द्रव्यनाम्नां बर्हिराज्यपुरोडाशशब्दानां संस्कृतेषु शास्त्रस्थैः सर्वैः प्रयुज्यमानानामसंस्कृतेऽपि जातिमात्रे कैश्चिदशास्त्रस्थैः प्रयुक्तानां किं संस्कारनिमित्तता यूपादिवत् ? उत जातिवाचिते ? ति चिन्त्यते तत्र पील्वादिवदश्वबालादिवच्च शास्त्रस्थयाज्ञिकप्रसिद्धिः सार्वत्रिकी अशास्त्रस्थम्लेच्छकतिपयप्रसिद्धेर्बलीयसीति संस्कारनिमित्ततेति प्राप्ते ब्रूमः । "अन्वयव्यतिरेकाभ्यामेतेषां जातिवाचिता । व्यभिचाराच्च संस्कारनिमित्तत्वं प्रकल्प्यते" । न हि शास्त्रस्थाः सर्वलोकस्थाश्च जातिमपहाय प्रयुञ्जते । संस्कारस्त्वमपहाय जातिमात्रे केचित्प्रयुञ्जते तेन जातिमेते न व्यभिचरन्ति, व्यभिचरन्ति तु संस्कारम् अतो जातिवाचिता ।

न च शास्त्रस्थसर्वलोकविरोधः, तत्रापि जातेरनपगमादित्युक्तम् ।

न च जातिमात्रे शास्त्रस्थानामप्रयोगादतद्वचनत्वं, न हि यो यत्र शक्तः स तत्र सर्वैः प्रयोक्तव्यः, तस्मात् जातिवचनाः ॥

प्रोक्षण्यादिपदानां यौगिकताऽधिकरणम् ।

सू० प्रोक्षणीष्वर्थसंयोगात् ॥ ८ ॥

प्रोक्षणी—शब्दस्यापि पूर्ववत्सर्वलोकशास्त्रस्थप्रयोगात्संस्कारनिमित्तत्वं प्राप्तमपोह्यासंस्कृतेऽपि क्वचित्प्रयोगादव्यभिचाराज् जातिनिमित्तता प्राप्ता, न चावयवार्थता युक्ता समुदायप्रसिद्धेर्बलीयस्त्वात् । अवयवद्वारेण हि विशिष्टार्थप्रतीतिर्वाक्यादिव वाक्यार्थप्रतीतिः पदार्थनिमित्ता लाक्षणिकी, समुदायप्रसिद्धा तु श्रुत्या प्रतीतिरिति सैव बलीयसी । उच्यते ।

"रूढिर्लब्धात्मिका योगं बाधते न त्वलब्धिका ।
तत्रैव चात्मलाभोऽस्या यत्र नावयवार्थता" ॥

यथा वृकेऽश्वकर्णस्य सत्सु त्ववयवार्थेषु तत एवोपपन्नत्वादर्थोपपत्तिः परिक्षीणा नादृष्टां समुदायस्य शक्तिं कल्पयितुं क्षमा, सन्ति त्ववयवार्थाः । प्रकृष्टोक्षणहेतुत्वात् स्त्रीलिङ्गत्वाच्च तेनात्र नात्मानं लभते रूढिर्वाक्यार्थे वाक्यवत् तस्माद्यौगिकः प्रोक्षणीशब्दः ॥

निर्मन्थ्यशब्दस्य यौगिकत्वाधिकरणम् ।

तथा निर्मन्थ्ये ॥ ९ ॥

टी० निर्मन्थ्येनेष्टकाः पचन्तीति विषयवाक्यान्निर्मन्थ्यशब्दस्यापि शास्त्रस्य सार्वलौकिकप्रयोगात्संस्कारवाचित्वमव्यभिचाराद्वा जातिनिमित्तत्वमुद्भाव्य प्रसिद्धावयवार्थत्वात्पूर्ववद्यौगिकत्वं साधनीयं विशेषस्त्वेतावान् प्रोक्षणीशब्दो हि सेचनसाधनत्वनिमित्तः । अस्ति चासेचनसाधनत्वं सर्वदेति युक्तं यौगिकत्वं निर्मन्थ्यशब्दस्तु मन्थनकर्मत्वनिमित्तः ।

न च निष्पन्नस्याग्नेर्मन्थनकर्मत्वयोग्यताऽस्ति निष्पन्ने चाग्नावयं शब्दो लोके प्रयुज्यते निर्मन्थ्यमानय पचामह इति ।

न च भूतपूर्वया योगेन प्रवृत्तिः प्रतिक्षणमग्निभेदात् अन्यो ह्यग्निर्मन्थननिष्पन्नः स तदैव नष्टः, अन्यश्चायं पाकाय नीयते सोऽयमसत्यवयवार्थे प्रयुज्यमानं संस्कारमिव योगमपि व्यभिचरतीति न तन्निमित्तः,

Digitized by Google

प्ताप्तिं तु न व्यभिचरतीति तद्वाचित्वमेव युक्तमिति इमां[1] विशेषां शङ्कां निवर्तयितुमतिदेशः क्रियते । भूतपूर्वमपि योगं निमित्तीकृत्य संतानाभिप्रायेण प्रयोगोपपत्तेर्नैरूढिरत्यन्तापरिदृष्टा कल्पयितुं शक्यते तस्माद्यौगिकः ॥

अथ वैश्वदेवादिशब्दानां नामधेयत्वाधिकरणम् ।

सू॰ वैश्वदेवविकल्प इति चेत् ॥ १० ॥

चातुर्मास्येषु प्रथमे पर्वण्यष्टौ यागाः समाम्नाताः आग्नेयमष्टाकपालं निर्वपति[2] सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमिति । तत्संनिधाविदमाम्नायते "वैश्वदेवेन यजेते"ति । तत्र संशयः किं यजेतेत्यनूदितानां यागानां वैश्वदेवशब्देन गुणविधिः विश्वेदेवा देवता विधीयन्ते किं वा तेषामेव नामधेयमिति तत्र नामत्वपक्षे स्याद्वाक्यमेतदनर्थकं देवतातो विधेया स्याद् गत्यभावाद्विकल्पते । नामत्वपक्षे हि तस्याविधेयत्वाद्यागस्य चारूपत्वेनाविधेयत्वात्समस्तवाक्यानर्थक्यप्रसङ्गः, तस्माद्गुणविधिः, अन्यासु अवरुद्धेषु यागेषु देवतान्तरमनवकाशमिति चेत् न विकल्पसंभवात् न ह्यत्रापि सूत्रभाष्यकाराभ्यामुत्पत्तिशिष्टप्राबल्यं कथितमिति तुल्यबलतां मन्यते ।

ननु च गुणाधिकरणे बलाबलं वक्ष्यते तेन गतार्थमिति चेत् न । आनर्थक्याधिक्यात् वक्ष्यति हि श्रुतिलिङ्गाधिकरणे दुर्बलस्यापि प्रमाणस्य बाधे यदि किंचिदनर्थकं भवति ततो विपरीतोबाधो भवतीति तदिहाप्यविधीयमाने गुणे समस्तस्यैव वाक्यस्यानर्थक्यप्रसङ्गाद्दैवतैव विधातव्या सा च गत्यभावात्तुल्यत्वशिष्टाऽप्युत्पत्तिशिष्टैरग्न्यादिभिर्विकल्पयिष्यते, स्यादेतदेवं यदि वाक्यानर्थक्यं स्यात् तत्त्वनुवादत्वेऽपि समुदायीकरणेनार्थवत् । न हि नानावाक्यचोदितानाम् आग्नेयादीनामेकशब्दोपादानादृते समुदायभावापत्तिरेकसंज्ञासंबन्धो वा लभ्यते । सति त्वनुवादे तेनैव निमित्तेनैकप्रतीत्यारूढानामेकसमुदायत्वमेकनामधेयत्वं च लभ्यते । ततश्च

१ विशेषशङ्कां निवर्तयितुमतिदेश इति युक्तः पाठः ।
२ निर्वपेदिति पुस्तकान्तरपाठः ।

प्राचीनप्रवणे वैश्वदेवेन यजेतेत्येवमादिषु वैश्वदेवनामकस्याग्नेयादिसमुदायस्य ग्रहणं सिद्धं भवति। इतरथा ह्यामिक्षायागस्यैव वैश्वदेवत्वप्रत्यभिज्ञानात्प्राचीनप्रवणादिसंबन्धः स्यात्। नन्वनुवादेऽपि श्रुत्यर्थबलादामिक्षायागस्यैव स्यात्। इतरथा हि वैश्वदेवावैश्वदेवेषु वैश्वदेवशब्दः छत्रिन्यायेन कल्प्यः स्यात्, न चानर्थक्यात्। आमिक्षायागस्यैव देशादिसंबन्धोऽसत्यप्यनुवादे लभ्यते ततश्च तद्वचस्यानर्थक्यं स्यात्। वरं चानर्थक्याल्लक्षणाश्रयणं, न चावश्यं लक्षणा। वाक्यशेषदर्शितयोगवशेन श्रुत्यैवाष्टानामपि यागानां नामत्वसंभवात्। एवं हि श्रूयते "यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्"। तदनेन योगेनाष्टानां नामत्वव्युत्पादनार्थोऽयमनुवादः, सति चानुवादत्वेनाप्यर्थवत्त्वेन देवताविशिष्टयागान्तरमपि शङ्कनीयम्। गौरवात् प्रकृतप्रत्ययबाधाच्च। अष्टौ हवींषीति चात्यन्तानन्यगतिलिङ्गविरोधात् तस्मात्समुदायानुवादः। तत्र च षष्ठ्त्वयोगेन वैकदेशदेवतात्वेन वा विश्वेषां देवानां समवायात्तत्प्रख्यन्यायेन नामधेयं वैश्वदेवशब्दः॥

वैश्वानरेऽष्टत्वाद्यर्थवादताधिकरणम्।

सू॰ पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये॥ ११॥

"वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते" इत्युक्त्वा "यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन्" इत्येवमादि श्रूयते तत्र विचारः। किमष्टाकपालादिशब्दाः प्रकृतवैश्वानरयागस्य नामधेयमुत तत्रैव गुणविधिः? अथ फले गुणविधिः? किं वाऽर्थवाद? इति, तदर्थं च गुणविधिपक्षे सर्वेषामष्टाकपालादीनामुत्पत्तिशिष्टता संभवति? किं वा सर्वेषामुत्पन्नशिष्टता?। अथ वा द्वादशकपाल उत्पत्तिशिष्टः अन्ये तूत्पन्नशिष्टाः? इति। तत्र वैश्वानरसामानाधिकरण्यादष्टत्वादीनां द्वादशसु प्राप्तेस्तत्प्रख्यन्यायेन नामधेयत्वमाशङ्क्य द्रव्यवचनत्वाद्यागसामानाधिकरण्याभावात्तत्प्रख्यत्वाभावाच्च गुणविधिः। तथा हि यद्यपि द्वादशस्वष्टौ विद्यन्ते तथापि न द्वादशकपालेऽष्टाकपालः समस्ति। योऽष्टसु कपालेषु संस्कृतः पुरोडाशः सोऽष्टाकपालः।

न च पुरोडाशेषु पुरोडाशान्तरमस्ति ।

न च द्वादशकपाल एवाष्टसु संस्कृत इति शक्यते वक्तुम् । अष्टानां तत्र सापेक्षत्वात् अष्टभिश्चतुर्भिश्चासौ संस्कृतो न केवलैरष्टभिः, ततश्चासामर्थ्यात्तद्धितानुपपत्तिः । तस्मात्स्तुत्यभावाच तत्प्रशस्यत्वम् । अत एव नार्थवादत्वं, न ह्यविहितस्याष्टाकपालस्य स्तुतिः संभवति तस्माद्गुणविधिः । अष्टाकपालद्रव्यमष्टत्वसंख्या वा विधीयते वैश्वानरयागेन चोत्पत्तिशिष्टद्वादशकपालाविरोधादविधानम् सर्वेषामुत्पत्तिशिष्टत्वात् । एकं हीदं वाक्यं वैश्वानरं द्वादशकपालमित्यादि यस्मिञ्जात इत्येवमन्तम् । एकोपक्रमावसानत्वात्तन्मध्ये चाष्टत्वादयः श्रुताः सर्वे एवोत्पत्तिशिष्टाः संभवन्ति । यद्वा सर्वे एवोत्पत्तिशिष्टा वैश्वानरं द्वादशकपालमिति देवताविशिष्टयागविधानात् । तत्र यदष्टाकपाल इत्यादिभिर्वाक्यान्तरैर्वैकल्पिकद्रव्यविधानम् । उपक्रमे तु द्वादशकपालशब्दो गुणवाक्यप्राप्तद्रव्योपलक्षणार्थो न विवक्षितः । विवक्षितत्वेऽष्टाकपालादीनामानर्थक्यं स्यात् तस्माद्गुणविधिः । उच्यते "उत्पत्तिवाक्यशिष्टत्वं न तावदुपपद्यते । सर्वेषामर्थभेदेन वाक्यं तत्र हि भिद्यते" । अर्थवादत्वे ह्येकवाक्यत्वं सिद्ध्यति । त्वत्पक्षे तु नानागुणविधानेनार्थभेदाद्वाक्यभेदः स्यात् । किंच निर्वपति नाऽत्र कर्मविधानम् स च द्वितीयान्तेन द्वादशकपालेनैव संबद्ध्यते न च प्रथमान्तैरष्टाकपालादिभिः, ततश्च द्वादशत्वमुत्पत्तिवाक्यगतत्वादितरेभ्यो वाक्यान्तरविहितेभ्यो बलवत्स्यात्, न चाप्युत्पत्तिशिष्टत्वं सर्वेषामुपपत्तिमत् । न द्वादशकपालस्य ह्यविवक्षोपपद्यते वैश्वानरसमानाधिकरणं द्वितीयान्तं द्वादशकपालपदं निर्वपतिसंयुक्तं नाविवक्षितं विना कारणं कल्पयितव्यम् । अष्टत्वादीनामन्यथाऽप्युपपत्तेः । तस्मादुत्पत्तिशिष्टं द्वादशत्वमितीतरेषां कर्मणि विधानासंभवात् ब्रह्मवर्चसादिफलार्थेन वैश्वानरयागमाश्रित्याष्टत्वादिविधानम् । काम्यो हि गुण उत्पत्तिशिष्टबाधेनापि शक्यते विधातुमिति प्राप्तेऽभिधीयते । "फलार्थेषु गुणेषु स्याद्वाक्यभेदोऽर्थभेदतः । उपक्रमोपसंहारसाम्याच्चात्रैकवाक्यता" । "वैश्वानरं द्वादशकपाल"मिति यैवेष्टिरुपक्रान्ता तामेव यस्मिन् जात एतामिष्टिं

निर्वपतीत्युपसंगृह्यमाणामन्ते पश्यन्तो न तन्मध्ये वाक्यान्तरमवगन्तुमो श्महे । फलेभ्यश्च गुणेषु विधीयमानेषु स्फुट एव वाक्यभेदोऽर्थभेदात् त-स्मादर्थवादत्वम् । अवयवद्वारेणावयविस्तुतिः द्वादशकपालावयवो हि योऽष्टसु कपालेषु श्रुतः सोऽष्टाकपालपुरोडाशसादृश्याद् गौण्या वृत्त्या-ऽष्टाकपाल इत्युच्यते स्तोतुं तस्मादर्थवादः ॥

अथ यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थताधिकरणम् ।

सू० तत्सिद्धिः ॥ १२ ॥

"यजमानः प्रस्तरो यजमान एककपाल" इत्यत्र गुणविधिनामधेयार्थ-वादसंदेहे सामानाधिकरण्यादेकमितरस्य नामधेयं प्रस्तरशब्दो वा यज-मानस्य यजमानशब्दो वा प्रस्तरस्येति शङ्का, भिन्नार्थत्वेन तु प्रसिद्धत्वा-न्नैकमपीतरस्य नामधेयम् । न चार्थान्तरवचनेनार्थान्तरस्य स्तुतिर्भवति अष्टाकपालादिभिस्त्ववयवद्वारेण स्तुतिरुक्ता द्वादशकपालस्य

न च प्रस्तरावयववचनो यजमानशब्दः, येन स्तुतिः स्यात् । तस्मादन्यतरकार्येऽन्यतरविधानाद् गुणविधिः, तत्रापि यजमानस्य मुख्य-त्वाच्छ्रुतिवृत्तो यजमानः प्रस्तरशब्दलक्षिते स्रुग्धारणादौ कार्ये विधीयते-तस्माद् गुणविधिः । नैतदेवं यजमानस्य स्रुग्धारणादौ विनियुक्तस्य स्वप-दार्थकरणविरोधात्प्रस्तरवच्च सूक्तवाकेन प्रहरणादेककपालवच्च सर्वहुत-करणात्सर्वतन्त्रपरिलोपः स्यात् तस्मादर्थवादः । कथं परशब्देन परस्य स्तवनं सामानाधिकरण्यं वा गुणादिति ब्रूमः । कथमगुणवचनो गुणमभि-दध्यात् । नाभिदधाति किं तु स्वार्थसंबन्धेन बोधयति । यजमानशब्दो-हि स्वार्थमभिधत्ते स चाभिहितः स्वसमवेतं स्वकार्यकारत्वं संबन्धाद्बो-धयति । तच्च प्रस्तरेऽप्यस्तीति प्रस्तरबोधः । एवं स्वार्थसदृशे तद्गुणशा-लिनि तात्पर्यमयजमानेयजमान शब्दो गौणः संपद्यते यथा लोके सिंहो देवदत्त इति । न चाध्यारोपितार्थत्वं लोके गौणत्वं तत्संबन्धिनि अर्थान्तरे तदभावात् न सिंहो देवदत्त इति प्रयुञ्जानस्य सिंहत्वाध्यारोपोऽस्ति । शौर्यादिगुणविवक्षयैव प्रयुङ्क्ते । प्रतिपत्तारोऽपि सादृश्यमेव प्रतिपद्यन्ते नाध्यारोपम् । तस्मादभिधेयसदृशे वृत्तिर्गौणत्वं नाध्यारोपितवचनत्वम् ।

कथं तर्हि खपुष्पशशविषाणादिशब्दानां गौणत्वं खपुष्पं भवत्सिद्धान्त इत्यादिषु । न हि तेषां मुख्यमभिधेयमस्ति येन सादृश्यात् गौणत्वं स्यात् । उच्यते । यद्येषामभिधेयं नास्ति कथं तस्यान्यत्र तद्रूपारोपः । न हि स्वरूपेणाविद्यमानमन्यत्रारोपयितुं शक्यते तेन तद्रूपमेवारोपितमङ्गीकर्त्तव्यम् । ततश्चारोपितस्यापि तस्य मुख्यत्वाद्युक्तमन्यत्र गौणत्वम् । त्वत्पक्षे तु खपुष्प एव खपुष्पशब्दो गौणः स्यात् आरोपितवचनत्वात्, भवत्विति चेत् न सर्वलौकिकविरोधात् । तत्राध्यारोपो गौणलक्षणम्, स्वार्थसादृश्यं तु भवति खपुष्पादीनामपि मुख्यसादृश्यविवक्षयैव लौकिका गौणं प्रयोगं प्रयुञ्जते । यथा ऽऽकाशस्य पुष्पात्मना शशमूर्द्धवर्त्तिनां चावयवानां च विषाणात्मना विकारोऽत्यन्ताप्रसिद्धो निष्प्रमाणकः तथा भवत्सिद्धान्त इति । तस्माद्यजमानवत्कार्यसिद्धावभ्यर्हितत्त्वात्प्रस्तरस्य प्रशंसेयमित्यर्थवादत्वम्

अथाग्नेयादीनां ब्राह्मणस्तुत्यर्थताऽधिकरणम् ।

सू° जातिः ॥ १३ ॥

"अग्निर्वै ब्राह्मण" इत्यादिष्वपि पूर्ववद् गुणविधित्वं नामधेयत्वं चोद्भाव्यार्थवादत्वं साधनीयम् । निमित्तान्तरकथनार्थं तु सूत्रान्तरम् । एवमुत्तरसूत्राण्यपि द्रष्टव्यानि । पूर्वत्र हि परशब्दस्य परत्र वृत्तौ तत्सिद्धिकरत्वं निमित्तमिह तु जातिजननमित्यर्थः । द्वावपि ह्यग्निब्राह्मणौ सृष्टिकाले ब्रह्मणो मुखाज्जाताविन्यर्थवादे संकीर्त्तितौ । अनेन निमित्तेनाग्निशब्दो ब्राह्मणे प्रवर्त्तते स्तोतुम् ।

अथ यूपादिशब्दानां यजमानस्तुत्यर्थताधिकरणम् ।

सू° सारूप्यात् ॥ १४ ॥

आदित्यो यूपो यजमानो यूप इत्यत्रापि त एव पक्षाः । सारूप्यं त्वत्र प्रवृत्तिनिमित्तम् ।

ननु सर्वत्र सारूप्यं गौणत्वनिमित्तं कोऽत्र विशेषः, सत्यम्, इह तु चतुर्थांशत्वसारूप्यं विवक्षितं चाक्षुषं हि यूपस्य यजमानसारूप्यमूर्द्ध्वत्वम् । आदित्यसारूप्यमञ्जननिमित्तं तेजस्वित्वम् । अतस्तद्द्वारेण यजमानादित्यशब्दाभ्यां यूपः स्तूयते ।

अथापश्वादिशब्दानां गवादिप्रशंसार्थगताऽधिकरणम् ।

सू० प्रशंसा ॥ १५ ॥

अपशवो वा अन्ये गोअश्वेभ्यः पशवो गो अश्वा इत्यत्र नामधेयत्वमनाशङ्क्यमिति गुणविधित्वेन पूर्वः पक्षः पशुकार्ये गवाश्वव्यतिरिक्तानां प्रतिषेधः प्रतीयते तस्मादर्थवादः प्रशंसानिमित्तस्तु परशब्दस्य पशुव्यतिरिक्तघटादिवचनस्य अपशुशब्दस्य पश्वाजादिषुपशुषु प्रयोगः ।

ननु सर्व एव प्रशंसानिमित्तोऽर्थवादः किमत्र विशेषेणोपन्यस्यते सत्यम्, । फलमन्यत्र गुणवादस्य प्रशंसा तत्सिद्ध्यादिना गुणेन शब्दः प्रवृत्तः प्रशंसाफलो भवति इह तु शब्दप्रवृत्तिनिमित्तमपि गुणः प्रशंसैव तथा हि अयमत्रावयवार्थः "अपशवो वाअन्ये गोअश्वेभ्य" इत्यत्रापशव इति नञ्समासगतेन पशुशब्देन प्रथमं गवाश्वगतं प्राशस्त्यमुपादाय पश्चात्तदभावो नञा पश्वन्तरेषु कथ्यते न हि पशुत्वं शक्यं प्रतिषेद्धुम् । अवश्यं च पशुशब्दोपात्तोऽर्थो नञा पश्वन्तरेषु पर्युदसितव्यः । शक्नोति च पशुशब्दोऽयं गवाश्वशब्दाभ्यामेकवाक्यतया संबद्धस्तद्गतं प्राशस्त्यं लक्षयितुम् । तच्च नञा पर्युदसिष्यते, एतदुक्तं भवति गवाश्वेषु यत्प्राशस्त्यं न तदन्येष्वस्ति । तस्मादप्रशस्तास्ते गवाश्वमेव प्रशस्तमिति । सोऽयं गवाश्वगतप्राशस्त्याभावः पश्वन्तराणाम् अपशूनां च तुल्य इत्यनेनाभिप्रायेण पश्वन्तराण्यपशव इत्युच्यन्ते ।

(शेषमग्रे)

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

रु० आ०

१ काशिका पंडितवरवामनादित्यविरचिता

पूर्वार्धम् .. .. ॥

उत्तरार्धम् .. .. १० .. ॥

२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम् .. .. २ .. ॥

३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम् .. .. १ .. ।)

४ लघुकौमुदी वरदराजकृता .. .. १ .. =)

५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्गलण्डीयभाषायां कृता ८ .. ॥

६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः ≡)

७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम् ४ .. ॥

८ मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद ४ .. ॥

९ शाश्वतधर्मदीपिका .. .. १ .. ॥

१० अमरकोश सटीक.. .. .. ४ .. ॥

११ योगवार्तिकम् .. .. ३ .. ।)

१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः १) .. ॥

१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-
देशाधिपति रचिता .. .. ४) .. ॥

Digitized by Google

CONTENTS.

		Page.
SAṂKSHEPAŚÁRÍRAKAM	...	177
VEDÁNTATATTWASÁRAH	...	185
KHAṆḌANAKHAṆḌAKHÁDYAM	...	196
ŚRÍBHÁSHYAM	...	209
ŚÁSṬRADÍPIKÁ	...	225

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 5.] MAY 1887. [Vol. IX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.]

[*All rights reser vd.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 208. Vol IX.)

मू॰ [a]तदसम्भवात् [b]अन्यथा व्यभिचाराव्यभिचारसंशयो न स्यात् नाप्यनुमानं [c]अनवस्थाप्रसङ्गात् नाप्यर्थापत्तिरनुमानाव्यतिरेकात् [d]व्यतिरेके वा यदि लिङ्गव्यतिरेकेण लिङ्गस्यानुपपत्तिस्तदा तत एव लिङ्गिसिद्धेः कृतमनुमानेन [e](१)अनेवम्भावे च तयोः किमायातं अस्तु कथमपि तावदर्थापत्तिर्बाधिका तथापि कीदृशस्याभ्युपगम इति प्रष्टव्यं किं विपक्षवृत्तिबाधकसध्रीचीनो यत्र क्वचिदन्वयो व्याप्तिः उत तत्सचिवः सार्वत्रिकोऽन्वय उत किं नो विशेषगवेषणेन तत्सध्रीचीनः सामान्यतोऽन्वयो व्याप्तिः उत सार्वत्रिकोन्वयः स च विपक्षबाधकादवगम्यते नाद्यः विकल्पानुपपत्तेः तथाहि किं विपक्षे वृत्ता बाधकं सर्वव्यक्तिविषयं उत सामान्यविषयं(२)आद्ये [f]यत्राप्यनुमानं प्रवर्तनीयं तत्रावश्योपस्थाप्यया अन्यथाभावबाधकभूतयार्थापत्त्यैव साध्यसिद्धेः शान्तमनुमानव्यसनेन [g]द्वितीये क्वचिद्व्यभिचारेपि क्वचिदव्यभिचारमाश्रित्य बाधकस्य चरितार्थत्वम् ॥

टी॰ ॥ [a]"तदसम्भवात्" इति । अतीतानागतसम्बन्धे इन्द्रियाणामसामर्थ्यादित्यर्थः अभ्युपेत्याह—। [b]"अन्यथे"ति । अव्यभिचारस्यैव

(१) लिङ्गव्यतिरेकेण लिङ्गानुपपत्त्यभावे चेत्यर्थः ।

(२) सामान्यतः कतिपयव्याप्यव्यापकव्यक्तिविषयमित्यर्थः ।

परिच्छेदात् संशयाभाव इत्यर्थः ॥ [c] "अनवस्थे"ति । विपक्षबाधकानुमानमूलव्याप्तावपि विपक्षबाधकानुमानान्तरानुसरणौचित्यादित्यर्थः ॥ [d] "अव्यतिरेकादि"ति । न्याय नये इति शेषः ॥ [e] "अनेवमि"ति । लिङ्गव्यतिरेकेण लिङ्गस्य यदि नानुपपत्तिस्तदा व्याप्तिरपि न तयोरिति तद्ग्रहार्थं विपक्षबाधकप्रमाणानुसरणमफलमेवेत्यर्थः ॥ [f] "यत्रापी"ति । सर्वा धूमव्यक्तिर्वह्निव्यक्तिं विनानुपपन्ना तथाच वह्निं विना दृश्यमानापि धूमव्यक्तिरनुपपन्नेत्यर्थापत्त्या वह्निसिद्धौ गतमनुमानमित्यर्थः यद्यपि पूर्वोत्पन्न(१) तदर्थापत्त्या व्याप्तिग्रहोनतु प्रत्येकानुमितिकाले(२)पि तदवतारो येनानुमानवैफल्यं स्यात्तथापि तावद्विशेषोपस्थापकप्रमाणाभावे तात्पर्यं [g] "द्वितीये" इति । साधनवत्सामान्यं साध्यवन्मात्रभिन्ने वर्त्तते इति विपक्षस्य यद्बाधकं तेन साध्यसाधनयोर्विरोधः परं निरस्योनतु व्यभिचारोपीत्यर्थः ॥

मू० धूमवत्तामात्रमग्निमत्तामात्रव्यतिरेकीत्येवंरूपो हि सामान्यतो विपक्षः तत्र च बाधकं(३) तयोरविरोधे पर्य्यवस्यति [a] अविरोधश्च क्वचित्साहित्याद्भवत्येवेति पार्थिवत्वलोहलेख्यत्वयोरप्येवं भूतव्याप्तत्वप्रसङ्गः नापि द्वितीयः [b] विशेषणवैयर्थ्यात् सार्वत्रिकोऽन्वय इत्येवोच्यतां [c] नच सोऽपि सङ्गत इत्युक्तम् नापि तृतीयः [d] बाधकस्य सामान्यविशेषविषयत्वविकल्पोक्तयुक्त्यैव निरस्तत्वात् नापि चतुर्थः तथाहि [e] यद्धूमवत्तदग्निमदित्यत्रेदमन्वयस्य सार्वत्रिकत्वं वाच्यम् यत्सर्वेषां धूमव्यक्तीनामग्निसम्बन्धित्वं तद्यदि व्याप्तिग्रहकाले गृहीतं तदा पक्षस्यापि धूमवद्व्यक्तेरग्निमत्वं प्राग्गृहीतं स्मर्यते एवेति गतमनुमानं [f] * सामान्यतो-

(१) अनुमितेः पूर्वमर्थापत्त्यात्मकज्ञाने उत्पन्ने सतीत्यर्थः । "पूर्वोत्पन्नतदर्थापत्त्या"—इत्यपि क्वचित्पाठः ।

(२) प्रत्येकानुमितिकाले=प्रत्येकानुमितिपूर्वकाले, तदवतारः=अर्थापत्त्यवतारः ।

(३) साध्यसाधनयोः ।

ऽग्निमत्त्वं तस्यापि गृहीतमेव विशेषणन्त्वनुमीयते? *—इति चेन्न, विशेषण इति किमग्निमत्त्वस्य विशेषो व्यक्तिरूपो विवक्षित उत कालदेशादिसम्बन्धस्तस्य नाद्यः [g] सर्वव्यक्तीनां व्याप्तौ प्रतीतत्वेन भवतैवाङ्गीकारात् नापि द्वितीयः ।

टी० ॥ एतदेवाह—। [a] "अविरोध" इति ॥ [b] "विशेषणे"ति । विपक्षबाधकसहित इति विशेषणस्य वैयर्थ्यमित्यर्थः ॥ [c] "नचे"ति । तत्र ग्राहकाभावस्योक्तत्वादित्यर्थः ॥ [d] "बाधकस्ये"ति । सामान्ययोः क्वचित् सामानाधिकरण्यमात्रमादाय विपक्षबाधकविश्रान्तेर्विशेषाणां यदि प्रत्येकं तच्चिन्ता तदार्थापत्त्यागतार्थमनुमानमित्यर्थः ॥ [e] "यद्रूमवदि"ति । पक्षीयवह्निव्यक्तेः(१) पूर्वमनुभवादिदानीं स्मरणोपपत्तौ विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहरूपप्रत्यक्षग्रहसामग्रीसत्त्वात् गतमनुमानमित्यर्थः यत्र विशेषणस्य विशेष्यगततया ग्रहणं तत्रैवमुपनीतं प्रत्यक्षं ननु सामान्यतोऽपि ग्रहे इत्याशङ्कते—। [f] "सामान्यतोऽग्निमत्त्वमि"ति । वह्निव्यक्तिविशेषस्य विशेष्यगततयैव पूर्वं भानात्तस्यादेव प्रत्यक्षमित्याह—। [g] "सर्वे"ति ॥

मू० [a] "अग्निमद्रूपतया गृहीतस्य पक्षीभूतस्य धूमवद्विशेषस्य चक्षुरादिभिरेव पर्वतत्वादिदेशकालविशेषादिमत्तया परिच्छेदात् यथा प्राक्प्रत्ययाहितसंस्कारसध्रीचीनैश्चक्षुरादिभिः परिच्छिद्यमानेदानीम्भावदेशविशेषावस्थानादेः स एवायमिति प्रत्यभिज्ञायमानताङ्गीक्रियते तथैवाप्यस्तु कृतमनुमानेन नाप्युपमानं बाधकं विपक्षे वक्तुं शक्यं तस्य नियतविषयत्वेन (२) तादृशे विषयेऽनुदयात् नापि शब्दः

(१) वह्नित्वेन वह्निव्यक्तेः पूर्वं महानसादावच्छेदेनाऽनुभवादिदानीं च तस्यैव पक्षीयत्वेन स्मरणोपपत्तावित्याशयः ।

(२) सादृश्यात्मकनियतविषयविषयकत्वेनेत्यर्थः ।

आप्तस्योपदेष्टुरभावे व्याप्त्यनवगमप्रसङ्गात् [b] अभावस्तु कदाचित्स्यात् सोपि निरूप्यमाणो न घटते [c] एवं स वाच्यो यदि वह्निव्यतिरेकेण धूमः स्यात्तदा तथोपलभ्यते नचोपलभ्यतेऽतोनुपलम्भान्नास्ति तद्व्यतिरेकेणेति तच्च न तथा हि [d] क्वचिद्व्यभिचारादर्शनादयमभावः प्रवर्त्तते सर्वत्र व्यभिचारादर्शनाद्वा नाद्यः पार्थिवत्वलोहलेख्य-त्वयोरपि व्याप्तत्वप्रसङ्गात् नापि द्वितीयः [e] सर्वत्र योग्यानुपलम्भो वाऽनुपलम्भमात्रं वा नाद्यः सर्वत्र योग्या-नुपलम्भासम्भवात् नापि द्वितीयः पार्थिवत्वलोहलेख्यत्व-योरपि सम्भवात् * तत्र वज्रे एव व्यभिचार ? *—इति चेन्न, तदीयादर्शनदशायां व्यभिचारानवगमात् * तद्दर्शनदशायां तावदस्ति व्यभिचारो यत्र तु न कदापि व्यभिचारदर्शनं तत्र व्याप्तिः ? *—इति चेन्न, अन्यत्रापि व्यभिचारो न दृश्यते इत्यत्र नियामकादर्शनात् नापि विपक्षे बाध-कस्तर्को वाच्यः तर्कस्य व्याप्तिमूलत्वाऽभ्युपगमे(१) ऽनव-स्थानप्रसङ्गात् तदनभ्युपगमे मूलशैथिल्येन तर्काभासत्वा-पातात् * अथ ब्रूषे न शक्य—

टी० देशकालसम्बन्धस्य प्रत्यक्षेणैव भानं प्रत्यभिज्ञावदित्याह—। [a] "आप्तस्ये"ति । [b] "अभावस्त्वि"ति । भट्टाभिमतानुपलब्धिरित्यर्थः अनुप-लम्भप्रमाणस्येति कर्त्तव्यताभूतं तर्कमाह—। [c] "एवमि"ति । एवमुपकरणः

(१) तर्कः किं मूलक इति प्रश्ने व्याप्तिमूलक इति वाच्यं व्याप्तिः किं मूलिके-ति प्रश्नेपि तर्कमूलिका व्याप्तिरिति प्रश्नोत्तरधारयाऽनवस्थाया दुर्वारत्वादिति नच वा-च्यं प्रश्नोत्तरधारयानास्त्यनवस्थातयोः परस्परमूलकत्वेनैवानवस्थाभङ्गादिति तथाभ्युपग-मेपरस्पराश्रयापत्तेः नच व्याप्तिमूलं तर्कान्तरमिष्यत इत्यपि साम्प्रतं तत्रापि पर्य्यनुयोगे निरुक्तदोषप्रसरादिति दुरुद्धरानवस्थेति भावः ।

स वाच्य इत्यर्थः ॥ [d] "क्वचिदि"ति । क्वचित्कव्यभिचारादर्शनमात्रमनुपलम्भः सार्वत्रिकव्यभिचारादर्शनं वेत्यर्थः ॥ [e] "सर्वत्रे"ति । सर्वासु व्याप्तिषु वा एकस्यामपि व्याप्तौ सर्वासु धूमादिव्यक्तिषु वेत्यर्थः ॥

मू० [a] मिदं वक्तुं तथाहि धूमाग्निव्यभिचारशङ्कायां बाधकस्तर्कोऽयमभिधीयते यदि धूमोऽग्निं व्यभिचरेत् अकारणः सन्नित्यः स्यात् न स्यादेव वा सचाय[b]म(१)नुत्तरस्तर्कस्तच्छङ्कायां व्याघातापत्तेः [c] तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा नावतरन्तीति लोकमर्यादा एवं सर्वत्रानुत्तरस्तर्को बाधकोऽभिधेय? *—इति नैवम् [d] किमित्येवं शङ्कितव्यं य(२)द्धेतुफलभाव एव न भविष्यतीति एवं तु शङ्कितव्यं अग्निं विहायान्यस्मादपि हेतोरयमुदेष्यतीति [e] *नच वाच्यं एवं हि सति धूमस्यैकजातिमत्त्वं न स्यादिति? *—[f] क्वचिदिन्द्रियजत्वे क्वचिदनुमानादिजत्वे विज्ञानैकजात्यवत्तदुपपत्तेः * नचेन्द्रियादीनामवान्तरसामान्ये साक्षात्कारित्वादौ प्रयोजकत्वं न ज्ञानतायाः? *—इति चेन्न, ज्ञानत्वस्याकस्मिकत्वपरिहाराय तत्कारणस्यानुगतस्य भवतावश्यं वक्तव्यत्वात् धूमेपि वह्नेः(३) विशेषे एव प्रयोजकत्वस्य तद्वच्छङ्कितुं शक्यत्वात् * न दृश्यते तावदग्निप्रयोज्ये धूमे विशेष इति च न वाच्यम्? *—[g] तद्दर्शनस्या(४)पाततो हेत्वन्तरप्रयोज्यावान्तरजात्यद-

(१) अपरिहार्य्यः ।
(२) ययोर्वह्निधूमयोः कार्य्यकारणभावः ।
(३) धूमविशेषपोत्पत्तिः ।
(४) विचारमन्तरेण ।

ज्ञानेनायोग्यतया(१)विकल्प्यत्वादप्युपपत्तेः यदा तु हेत्वन्तरप्रयोज्यो धूमस्य विशेषो द्रक्ष्यते तदाऽसौ विकल्पिष्यते इति सम्भावनाया दुर्निवारत्वात् ।

टी० [a]“इदं वक्तुमि”ति । अनवस्थापादकं वाक्यमित्यर्थः । तर्कंद्वाप्तिग्रहेऽपि शङ्कानिराकरणद्वारैवेति शङ्कानिरासार्थः तदवतारो न विरुद्धः ॥ [b]“अनुत्तर”इति । शङ्काप्रतिपादकोत्तररहित इत्यर्थः ॥ तदेवाह—। [c]तदेवेति । स्वक्रिया कथादिप्रवृत्त्यात्मिका ॥ [d]“किमि”ति । अग्निधूमयोः कार्यकारणभावनिश्चयेऽपि हेत्वन्तरशङ्कानिरासो न प्रकृततर्कादित्यर्थः ॥ धूमत्वावच्छिन्नम्प्रति वह्नेः कारणताग्रहे हेत्वन्तरशङ्का नोदेतुमर्हतीत्यत आह—। [e]“नचे”ति । हेत्वन्तरजन्यं धूममादायापि वह्निधूमे धूमत्ववृत्तावैक्यजात्यं स्यादेवेत्याह—। [f]“क्वचिदि”ति ॥ तृणारणिमणिप्रभववह्निवत् विशेषस्यापाततोऽग्रहेऽपि न दोषः इत्याह—। [g]“तददर्शनस्ये”ति ॥

मू० [a]“अस्त्यात्ममनोयोगोऽनुगतं कारणं ज्ञानोत्पत्तौ?*—इति चेन्न, [b]यद्यात्ममनोयोगादुत्पद्यमानं ज्ञानं स्यादिच्छादयोऽपि ज्ञानं प्रसज्येरन् यदि त्वदृ(२)ष्टविशेषो वा(३) शक्तिभेदो वा (४)ज्ञानत्वजातिर्वा (५)ज्ञानप्रागभावो वा तथानुगतं कार-

(१) विशिष्टज्ञानयोग्यत्वादपि तद्दर्शनस्योपपत्तेरन्यथासिद्धं तदित्याशयः । परे-तु-अयोग्यतया-अविकल्प्यत्वादिति पदं छिन्दन्ति तेषामयमाशयः यद्यप्यस्ति धूमेऽग्निप्रयोज्योविशेषोधूमस्याग्निमन्तरेण हेत्वन्तराजन्यात्तथापि तद्गतविशेषस्य नास्तिदर्शनयोग्यत्वमिति न शक्यते वक्तुं तद्गतविशेषादर्शनस्य हेत्वन्तरप्रयोज्यतद्गतविशेषादर्शनेनैवबाधितत्वेन तद्दर्शनस्य विकल्पमन्तरेण सिद्धत्वादिति ।

(२) अदृष्टस्य कार्य्यत्वावच्छिन्नम्प्रति हेतुतया सर्वकार्यसाधारणत्वाद्विशेष इत्युपात्तम्—

(३) मीमांसकमते कारणेषु कार्य्यवैचित्र्यनियामकशक्तिवैचित्र्यस्वीकाराद्भेद इत्युक्तम्—

(४) ज्ञानत्वजातेर्नित्यत्वेन ज्ञानमात्रनियतपूर्ववृत्तित्वाज्जातिरित्युक्तम्—

(५) जातिरूपकारणस्य नित्यत्वेन सर्वदाकार्य्योत्पत्तिस्स्यात्तन्माभूदिति ज्ञानप्रागभावइत्युक्तम् ।

पमुच्यते 'तदा(१) तदितरत्रापि वह्निव्यभिचारेपि धूमस्यै(२)कजात्यप्रयोजकतया शक्यते एवं शङ्कितुं[d] * दृष्टे व्यभिचारे युक्तमदृष्टादेरैकजात्यपरिकल्पनम्? *—इति चेन्न, अस्तु(३) दृष्टे तन्निश्चयः अत्रापि व्यभिचारो न दृश्यते इत्यत्र नियामकाभावात् 'एवं शङ्क्यते शङ्किष्यमाणस्य भवतो न क्वचिदनुमानं स्यात् प्रतिवाद्यात्माद्यनुमानादिव्यतिरेकेण कथायामेव प्रवृत्त्यनुपपत्त्या स्वयं स्वीकर्त्तव्येष्वनुमानेष्वेतादृशशङ्काक्रमणात् * स एव व्याघात * इति चेन्न, धूमवद्बन्हेरपि वह्निकारणविशेषानुमानस्यैवं सति सदनुमानत्वप्रसङ्गात् सामग्रीसाम्येन प्रमाप्रमावैचित्र्यस्यानुपपत्तेः साधारणधर्मदर्शनादौ सत्यपि शङ्कायाश्चानुदये सामग्र्यां सत्यामपि कार्यानुदयात् परप्रतिपत्त्युत्पादनार्थं वचनादिरूपां प्रतिपत्तिसामग्रीमुत्पादयितुं यतमानस्य भवतोपि स्वक्रियाव्याघातस्तुल्यः व्याघातस्यैव(४) विशेषत्वात्तद्दर्शने शङ्कासामग्र्येव नास्ति मत्पक्षे तत् कुतो व्याघात साम्यमिति चेत् ॥

टी० सिंहावलोकनन्यायेन ज्ञानमात्रप्रयोजकमाह—।[a] "अस्ती"ति॥ [b] "यद्यात्ममन" इति । यद्यपीच्छादौ ज्ञानत्वापादनमयुक्तं तथापि ज्ञानमेवात्ममनःसंयोगो जनयतीति गृहीत्वापादनं शक्तिभेदो मीमांसकनयेन तृणारणिमणिवद्वैस्वन्तरसाधारणेवह्न्यादावित्यर्थः ॥ ज्ञानत्वजातिरित्यभ्यु-

(१) अदृष्टादन्यत्रापीत्यर्थः ।

(२) एकजातेर्भाव ऐकजात्यम्–

(३) दृष्टे–इत्यस्मात्प्राक्व्यभिचारे–इत्यपि पूरणीयम्–

(४) व्याघातः=व्याप्यज्ञानाधीन व्यापकज्ञानलक्षणः, तच यत्रयत्र धूमस्तत्रतत्र वह्निजन्यत्वमित्येवं लक्षणः, तस्यैव विशेषत्वादित्यर्थः ।

पगममात्रं शङ्कासौलभ्यादाह–। [c]"तद्दे"ति ॥ तृणादौ व्यभिचारः स्फुट इति तत्र कल्पना नास्त्यत्रापीत्याह–। [d]"दृष्टे"इति ॥ अनुमित्यभावात् प्रवृत्त्यभावं शङ्कते–। [e]'एवमि'ति । अवश्यमियं शङ्का निवर्तनीया अन्यथा तृणाद्वह्निमसकृदुपलभ्य व्याप्तिं गृहीतवतोऽयं देशस्तृणवान् वह्निमत्त्वादित्यप्यनुमानमनाभासं स्यात्तथाच शङ्कानिवर्तनीयैव तन्निवृत्तिस्त्वशक्येति भावः(१) ॥

मू० [a]तद्धि न ताव[b]दाहारादिकारणाज्जायमानमेष्टव्यं [c]कूटविषयस्य तस्यातिप्रसञ्जकत्वात् [d]*कूटभिन्नः प्रसञ्जकः प्रमितस्यैव स्यात्?*–इति चेन्न, [e]तस्य तर्कावसरे निरस्यत्वात् [f]तस्मात् यदेतद्व्याघातरूपस्य विशेषस्य दर्शनं शङ्काप्रतिपक्षभूतमुच्यते तत्किं प्रमाणात् कुतश्चिदुपजायमानं वक्तव्यं तर्काद्वा यदि प्रथमः [g]शङ्कास्तित्वमपि तेनैव प्रमाणेन उपनेयं शङ्कायां सत्यां व्याघातात् ॥

टी० [a]"तद्धी"ति । व्याघातस्वरूपमित्यर्थः ॥ [b]"आहारादिकारणादि"ति । आहार्यव्याप्यारोपरूपकारणादित्यर्थः । तथाचैतादृशव्याप्यारोपाधीनव्यापकारोपरूपव्याघातदर्शनमतिप्रसञ्जकत्वात् न व्यभिचारशङ्कानिवर्तकमिति भावः ॥ [c]"कूटविषयस्ये"ति । असदर्थविषयस्येत्यर्थः ॥ [d]"कूटभिन्न"इति । वास्तवाद्व्याप्याद्वास्तवस्यैव्यापकस्य प्रसञ्जनं व्याघात इत्यर्थः ॥ एतच्च तर्कस्वरूपमेव तच्चाग्रे दूष्यमित्याह–। [e]"तस्ये"ति ॥ व्याघातस्वरूपमाक्षिप्य तदाक्षेपोपसंहारव्याजेन तद्दर्शनमाक्षिपति–[f]"तस्मादि"ति ॥ शङ्कायां सत्यां व्याघात इति व्याघातग्राहकप्रमाणादेव शङ्कासिद्धिरित्याह–। [g]"शङ्कास्तित्वमपी"ति ॥

मू० यदि च शङ्कां विनापि व्याघातः तदा शङ्क्यमानयोर्व्याघातस्य साम्यं सिद्धमेव [a]*भवतु शङ्कायामपि तत् प्रमाणं

(१) इति सिद्धान्तिनो भाव इत्यर्थः ।

किमेतावता प्रथमोपजातशङ्कामवलम्ब्यावस्थितस्य व्याघातरूपस्य विशेषस्य दर्शनात्तु शङ्कान्तरं नोत्पद्यत? *—इति चेन्न, व्याघातसत्ताकाले (१)तदवलम्ब्यया शङ्कयैव शङ्क्यमानव्यभिचारता तस्याः शङ्काया व्युपरमे च तदवलम्बिनो व्याघातरूपस्य विशेषस्याभावात् कः शङ्कान्तरोत्पत्तेर्वारयितेति वक्तव्यं [b] * मा नामास्तु तदा व्याघातात्मा विशेषस्तदवगमस्तदाहितो वा संस्कारस्तावदस्ति । विशेषावगमतत्संस्कारौ च शङ्काविरोधिनौ नच स्वरूपेण क्वचिदस्ति विशेषस्यावस्थानं तथा? *—इति चेन्न [c] अयावदाश्रयभाविनो विशेषस्य पूर्वस्थितस्य यद्दर्शनं तदाहितो वा संस्कारस्तस्य कालान्तरेपि तत् प्रतिधर्मसंशयविरोधित्वेऽवयविपाकपक्षे कुम्भस्य(२)परमाणुपाकपक्षे परम्परया तदारम्भकस्य परमाणोः पूर्वं श्यामतया ज्ञातस्य कालान्तरे सम्भावितपाकजन्यरूपविशेषवत्तायां संशयो न स्यात् ॥

टी० व्याघातेन शङ्कानिवृत्तौ शङ्कान्तरानुत्पादे स्यादेव व्याप्तिग्रह इति शङ्कते—। [a] "भवत्वि"ति ॥ विशेषदर्शनस्य स्वरूपनिवृत्तावपि तदाहितसंस्कारस्य शङ्काविरोधित्वं शङ्कते—। [b] "मा नामे"ति ॥ [c] "अयावदि"ति । यद्यपि तत्र पाकसम्भावना विशेषदर्शनजसंस्कारावस्कन्दितेति तत्र संशयः प्रकृते तु न तथा तथाप्युपाधिसंभावनया प्रकृते संशयः स्यादिति भावः ॥

(१) व्याघातविषयीभूतया—

(२) अवयविपाकपक्षे कुम्भस्य पूर्वं श्यामतया ज्ञातस्य कालान्तरे सम्भावितपाकजन्यरूपविशेषवत्तायां संशयो न स्यादित्यन्वयः । तदारम्भकस्य=घटकस्यारम्भकस्य ।

मू० [a]"यदि च शङ्कायां व्याघातस्तदाशङ्काश्रयस्य विशेषरूपस्य व्याघातस्य दर्शनाच्छङ्कायां शङ्कान्तरं मा भूत् [b]यदि तु व्यभिचाराश्रयस्तदा व्यभिचारः स्यादेव व्याघाताश्रयस्य व्यभिचारस्यापि प्रमितत्वापत्तेः *अनादिसिद्धव्याप्तिकास्ते तर्काः?*–इति चेन्न, [c]'तद्बुद्धेः प्रमितत्वासिद्धेः (१) शरीरेष्वात्मप्रत्ययस्य तादृशस्याप्यप्रमात्वापगमात् अनादिसिद्धस्योभयत्राविशेषात् नापि यद्यत्र व्यभिचार शङ्क्येत तदा व्याघातः स्यादित्येवंरूपात्तर्काद्व्याघातावगमः (२) व्याघातप्रतिपादकस्य तर्कस्य मूलशैथिल्ये तर्काभासत्वापातात् तादृशस्यापि व्याघातोपनायकत्वे व्याघातापत्तेः साम्यं, शक्यते एव तर्काभासाद्भवतोऽपि व्याघात उपनेतुं अथ (३) तस्य तर्कस्य व्याप्तिमूलताभ्युपगमते तथापि व्यभिचारशङ्कायां पुनरनवस्थैव तथापि व्याघातोपपादने पुनरित्थमनवस्थैव॥ [d]तस्मादस्माभिरप्यस्मिन्नर्थे न खलु दुष्पठा त्वद्गाथैवान्यथाकारमक्षराणि कियन्त्यपि

टी० ॥ व्याघातात्समानमानाधिकरण्यशङ्कानिवृत्तिरितिशङ्कायामेव शङ्का न स्याद्व्यभिचारे तु स्यादेवेत्याह–। [a]"यदि चे"ति ॥ ननु व्यभिचारे एव व्याघात उक्त इति तत्रैव शङ्कानिवृत्तिरपीत्यत आह–। [b]"यदि त्वि"ति ॥ [c]"तद्बुद्धेरि"ति। व्याप्तिबुद्धेरित्यर्थः ॥ शङ्कानुच्छेदं प्रतिपादयितुं प्रस्तौति–। [d]"तस्मादि"ति । शङ्का चेदनुमास्त्येव न चेच्छङ्कातस्तरां व्याघातावधिराशङ्का तर्के शङ्कावधिर्मत इत्यादि त्वद्गाथा कियन्त्यप्यक्षराण्यन्यथाकारं

(१) व्याप्तिबुद्धेः प्रमितत्वे तु व्यभिचारस्यापि प्रमितत्वापत्तिर्बोद्धव्या ।
(२) तर्कस्य चाऽप्रमाणत्वाच्च व्यभिचारप्रमापकमिति भावः ।
(३) तस्येति क्वचित्पुस्तके न दृश्यते ।

अन्यथा कृत्वा न दुष्यठेत्यन्वये सिद्धाप्रयोगत्वाभावा(1)दप्यन्यथैवं कथमित्थं सुसिद्धाप्रयोगश्चेदिति सूत्रेण णमुल् प्रत्ययो न स्यादत इत्थं योज्यं कियन्त्यप्यक्षराणि त्वद्गाथा अन्यथाकारम् अन्यथा न दुष्यठा अन्यथाकारम् अन्यथा करणं यथा स्यादिति क्रियाविशेषणं वा

मू० [a]"व्याघातो यदि शङ्कास्ति नचेच्छङ्का ततस्तराम् व्याघातावधिराशङ्का तर्कशङ्कावधिः कुतः" [b]अव्यभिचारस्यैकपरित्यागव्यवच्छेदेनापराम्वयः समकालजातदृष्टनष्टेऽदृष्टः शङ्क्यत [c]इत्याहुः, स्वाभाविकः सम्बन्धो व्याप्तिरित्यपरः स प्रष्टव्यः कस्य स्वाभाविकः किं सम्बन्धिनोरुतान्यस्य न चरमः [d](2)विपरीतापत्तेः आद्ये कः स्वाभाविकशब्दार्थ इति प्रष्टव्यं किं सम्बन्धिस्वभावाश्रितः १ अथ सम्बन्धिस्वभावजन्यः २ अथ (3)सम्बन्धित्वविवक्षितस्वभावानतिरिक्तः ३ अथवा सम्बन्धिस्वभावव्याप्यः ४ अथ सम्बन्धिस्वभावादन्येन न प्रयुक्तः ५ उतान्य एव ६ कश्चिद्विवक्षितः आद्ये

टी० ॥ अन्यथाकारं पठति [a]"व्याघात" इति । यदि व्याघातस्तदा तदाश्रयभूता शङ्कास्त्येव शङ्कामन्तरेण व्याघातानवतारात् नचेद्व्याघातस्तदा सुतरां शङ्काप्रतिबन्धकस्य व्याघातस्याभावाद् व्याघातावधिर्व्याघातोऽवधिर्यस्याः शङ्काया सा कुतः शङ्काया अवधिः पर्यवसानं च कुतस्तर्के-

(1) सिद्धाप्रयोगत्वाभावादपणमुल्प्रत्ययो न स्यादित्यन्वयः अन्यथा—एवम्—कथम्—इत्थम्—इत्येतेषूपपदेषु सत्सु कृञ्धातोर्णमुल् प्रत्ययः स्यात् स चेत्कृञ् सिद्धाप्रयोगः स्यात्, "सिद्धाऽप्रयोग"इति किम्? शिरोन्यथा कृत्वा भुङ्क्ते । सिद्धाऽप्रयोगो नाम उपपदाऽनतिरिक्तार्थक इति ।

(2) व्याप्यव्यापकातिरिक्तयोरपि व्याप्त्यापत्तेरित्यर्थः । वैपरीत्यापत्तेरित्यपि क्वचिदुपलभ्यते पाठः ।

(3) सम्बन्धित्वविवक्षितेत्यस्य सम्बन्धित्वेन रूपेण विवक्षितोयस्तत्सम्बन्धीत्यर्थः ।

स्तर्कमूलव्याप्तावपि शङ्कातादवस्थ्यादित्यर्थः ननु व्यभिचारशङ्कायामव्यभिचारोऽप्येका कोटिरिति क्वचिदव्यभिचारप्रमायां तदधीनमनुमानं तत्रैव स्यादित्यत आह—। [b] "व्यभिचार" इति। एकस्य व्यापकस्य परित्यागो विरहस्तद्वच्छेदे एवापरस्य व्याप्यस्यान्वय इत्यर्थः । न च तत्रैवानुमानं तस्यादृष्टत्वा(१)दिति भावः ॥ नष्टपुनरुत्पत्तिमेदालसास्थले दृष्टत्वात् समदृष्टनष्टयोरपि नाव्यभिचारसिद्धिरित्यस्वरसादाह—। [c] "इत्याहुरि"ति । व्यावहारिकमनिर्वचनीयमव्यभिचारमादाय शङ्केति परमार्थ इति भावः ॥ [d] "विपरीते"ति । व्याप्यव्यापकत्वाभिमतान्ययोरेव सर्वत्र व्याप्तिः स्यादित्यर्थः ॥

मू० [a] पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तत्वप्रसङ्गः न द्वितीयः [b] अतिव्याप्तेरव्याप्तेश्च [c] अत एव न तृतीयः नापि चतुर्थः [d] व्याप्यनिरुक्तौ व्याप्यत्वानिरुक्तेः [e] सम्बन्धस्य व्याप्यत्वे च सम्बन्धिनोर्व्यापकयोः सम्भावितसम्बन्धाधिकदेशकालतया एकसम्बन्धिदर्शनेऽपरानुमाननियामकत्वायोगान्नापि पञ्चमः [f] न प्रयुक्त इति यदि न जनितस्तदा सम्बन्धस्याजनकत्वपक्षेऽन्येनेति विशेषणवैयर्थ्यं अजनकस्य सम्बन्धिस्वभावेनाप्यजनितत्वात् सम्बन्धस्य जनकत्वपक्षे स्वरूपासिद्धिरेव स्यात् सामग्र्याः सर्वसम्भवादनन्तः कालदेशादृष्टादिभिरपि तज्जन्यत्वस्यावश्यं वक्तव्यत्वात् नापि षष्ठः तस्य निर्वक्तुमशक्यत्वात् [g] एवमेव विकल्प्यायं चरमविकल्पः सर्वेषोपन्यस्य दूष्यो न्यूनत्वशङ्काभयादिति अनौपाधिकः सम्बन्धो व्याप्तिरित्यपरः

(१) "तस्य दृष्टत्वाद"—इति क्वाचित्कः पाठस्तु प्रामादिकः ।

स प्रष्टव्यः कोऽयमुपाधिर्नाम यच्छून्यत्वमनौपाधिकत्वम्—उपाधिः साध्यव्यापकत्वे सति साधनाव्यापकः अयं च

टी० ॥ [a] "पार्थिवत्वे"ति । लोहलेख्यत्वयोग्यतायाः पार्थिवत्वाऽन्वितत्वादित्यर्थः ॥ [b] "अतिव्याप्तेरि"ति । धूमरासभसंयोगेऽतिव्याप्तौ रूपरससम्बन्धे चाव्याप्तिरित्यर्थः ॥ [c] "अत एवे"ति । भूतलघटाभावसम्बन्धयोरतिव्याप्तेर्वह्निधूमसम्बन्धे चाव्याप्तेरित्यर्थः ॥ [d] "व्याप्तौ"ति । आत्माश्रय इत्यर्थः दोषान्तरमाह—। [e] "सम्बन्धस्ये"ति । सम्बन्धस्य सम्बन्धिद्वयव्याप्यत्वं स्याचेत्तु सम्बन्धिनोरन्यतरस्य येनैकेनापरमनुमीयेतेत्यर्थः ॥ [f] "न प्रयुक्त" इति । प्रयुक्तत्वं जन्यत्वं व्याप्यत्वं व्यापकत्वं वा आद्ये सम्बन्धिद्वयमात्रजन्यत्वं क्वापि न सिद्धमदृष्टादेरपि जनकत्वात् अजन्यसम्बन्धाव्याप्तिश्च-अन्त्ययोरात्माश्रय इत्यर्थः ॥ विशिष्यानिरुक्तस्य विकल्पनीयत्वे हेतुमाह—। [g] "एवमेवे"ति । यदि वादी विकल्पितभिन्नमेव पक्षमालम्बेत तदा विकल्पे न्यूनता भवेत् सामान्योक्तौ च तदालम्बितपक्षस्य तत्रैवान्तर्भावयितुं शक्यत्वादिति भावः न्यूनत्वमिहाकौशलं

मू० [a] "एकसाध्याविनाभावे मिथः सम्बन्धशून्ययोः साध्याभावाविनाभावी स उपाधिर्यदत्यय" इत्यस्य व्यतिरेकमुखस्य(१) यदत्ययः स उपाधिरिति योज्यमानस्य पर्यवसितोऽर्थः तद्धर्मभूता हि व्याप्तिर्जपाकुसुमरक्ततेव स्फटिके साधनाभिमते चकास्ति इत्युपाधिरसावुच्यते तदिदमाह [b] "अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा" * स चोपाधिर्निश्चित इवा [c] शङ्कितश्च यचेदमुच्यते [d] "यावत्साव्यतिरेकित्वं शतांशे-

(१) व्यतिरेकमुखस्येति षष्ठी तृतीयार्थे ज्ञेया, तथा च व्यतिरेकमुखेन योज्यमानस्येत्यर्थः ।

नापि शङ्क्यते विपक्षस्य कुतस्तावद्धेतोर्गमनिकावशं"? *—इति चेन्न, साध्यव्यापके साधनाव्यापके

टी० ॥ [a] "एके"ति । यदत्यये यदभावः साध्याभावाविनाभावी साध्याभावव्याप्यः स उपाधिस्तथा च साध्याभावव्याप्याभावप्रतियोगी साध्यव्यापक इति यावत्—मिथः सम्बन्धशून्ययोः साधनोपाध्योर्मध्ये एकस्य साधनस्य साध्याविनाभावे शाह्ये(१)यदत्ययः साध्याभावाविनाभावी स उपाधिरिति भट्टाचार्यवार्तिकयोजना मिथः सम्बन्धशून्यतया साधनाव्यापकत्वमुक्तं साध्य(२)सामग्र्या उपाधित्वव्युदासाय दूषकतावीजाव्यभिचारोन्नयनप्रयोजनलाभाय च साधनाव्यापकत्वमुक्तं यो यद्व्यापकव्यभिचारी स तद्व्यभिचारीति व्यभिचारसिद्ध्यर्थमेव साध्यव्यापकत्वमुक्तं ॥ [b] "अन्ये" इति । अन्ये सोपाधयः परप्रयुक्तानामुपाधिगतानां व्याप्तीनामुपजीवका इति तैस्सोपाधिभिः पक्षनिष्ठतया दृष्टैरपि न व्यापकांशावधारणानुमितिरित्यर्थः ॥ [c] "आशङ्कितश्चे"ति । साध्यव्यापकत्वेन निश्चितस्य साधनाव्यापकत्वशङ्का साधनाव्यापकत्वेन वा निश्चितस्य साध्यव्यापकत्वशङ्का ननु भविष्यति कश्चित्तत्रोपाधिरिति शङ्कार्थः(३) ॥ [d] "यावदि"ति । विपक्षस्येति सप्तम्यर्थे षष्ठी तथाच हेतोर्विपक्षे व्यतिरेकित्वं सद्भावो यावच्छङ्क्यते तावन्नानुमितिः तेनोपाधिसंदेहादपि तादृशी शङ्का व्याप्तिमवस्कन्दतीत्यर्थः

मू० [a] "पक्षेतरत्वेपि प्रसङ्गात् *तद्धानिरिक्ता इत्यपीति? *—चेन्न, [b] बाधेनोन्नीतस्य तस्याव्यापनात् [c] 'अन्यथा निरुपाधिसम्ब-

(१) शाह्ये=निरूप्यमाणे सति, यदत्ययः=यादृशोपाधेरभावः ।

(२) निश्चितधूमादिसाधनवति पर्वतादौ वह्निलक्षणसाध्यव्यापकत्वमात्रमादाय साध्यसामग्र्या उपाधित्वनिरासार्थं साधनाव्यापकत्वमुक्तं, तथा साधनाव्याप्तिनिरूपकाधिकरणस्यैव हेतुसाध्ययोर्व्यभिचारनिरूपकाधिकरणत्वाद् व्यभिचारोन्नयनप्रयोजनलाभार्थं तदुक्तमित्याह—साध्येति ।

(३) यद्यपि तत्र सोपाधित्वं संदिग्धत्वेनैवाभिहितं तत्संदेहश्चोपाधेरप्य एव तथापि व्यतिरेकनिश्चयो ऽनुमिति जनकस्तत्संदेहो ऽनुमितिप्रतिबन्धकस्तदुभयनिरूपकश्चोपाधिरित्युपाधेर्दोषत्वमुच्यत इति प्रगल्भाचार्याः ।

न्यत्वे बाधासिद्धेः यदाह बाधेनोपाधिरुन्नीयताम् [d] अन्येन वा इति न कश्चिद्विशेषः [e] *एतदर्थमपि विशेषणीयम्—?*—इति चेन्न, [f] तथापि साधनाव्यापकत्वे सतीति तद्व्याप्त्यनवधारणे न शक्यावधारणम् एवं साध्यव्यापक इत्यपि अथ मन्यसे [g] अदृष्टव्यभिचारसाध्यत्वं साध्यव्यापकत्वं न [h] वस्तुतो व्यभिचारिसाध्यव्याप्यापाततोऽदृष्टव्यभिचारसाध्यत्वसम्भवात्तस्याप्युपाधित्वापातात् [i] न दृश्यते इति च निरूपयितुमशक्यं [j] व्याप्तिग्रहकाले च साध्यत्वाभावेन तदव्यभिचारः कथमवधार्य्यः

टी० ॥ [a] "पक्षेतरत्वेपी"ति । सकलानुमानोच्छेदकतया स्वव्याघातकतया([1]) च तस्यानुपाधित्वेन तत्रातिव्याप्तिरित्यर्थः पक्षेतरत्वभिन्नत्वेन यद्युपाधिलक्षणं विशेषणीयं तदा सङ्ग्राह्यस्यापि बाधोन्नीतपक्षेतरत्वस्य सङ्ग्रहो न स्यादित्याह—। [b] "बाधेने"ति ॥ ननु बाध एव तत्र दोषो न तूपाधिरपीत्यत आह—। [c] "अन्यथे"ति । व्यभिचारे चावश्यमुपाधिर्हेतुमति च पक्षे बाधस्थले पक्ष एव व्यभिचार इति तत्रोपाधिरावश्यकोऽन्यथा कृतकत्वस्य हेतोरव्याप्यत्वानुव्याप्यत्वोभयसहचारविरोधः स्यादित्यवच्छेदकभेदोपन्यासस्योचितत्वादन्यस्य तादृशस्याभावात्पक्षेतरत्वादेरेव([2]) तथात्वमभ्युपेयमित्यर्थः ॥ [d] "अन्येन वे"ति । व्यभिचारेणेत्यर्थः बाधोन्नीतपक्षेतरत्वान्यपक्षेतरत्वान्यत्वेनोपाधिलक्षणं विशेषणीयमित्याह—। [e] "एतदर्थमि"ति ॥ [f] "तथापी"ति । व्याप्त्योपाधिनिरूपणमुपाधिना च व्याप्ति-

(१) स्वव्याघातकतया=उपाधिस्वरूपव्याघातकतया, तथाहि—उपाध्यभावेन साध्याभावः साध्यते यथा पर्वतो धूमाभाववान् आर्द्रेन्धनसंयोगाभावाद् ह्रदादिवदिति, यद्वा हेतोरुपाधिव्यभिचारित्वेन साध्यव्यभिचारित्वमुन्नीयते, यथा वह्निर्धूमव्यभिचारी, आर्द्रेन्धनसंयोगव्यभिचारित्वाद् घटादिवदिति, पक्षेतरत्वस्योपाधित्वे तु निरुक्तोभयविधसाध्यकानुमानेपि तस्य सुवचत्वादुपाधेरुपाधित्वमेव लोपेतेति ।

(२) तथात्वम्—अवच्छेदकत्वमित्यर्थस्तथा च हेतौ कृतकत्वे पक्षेतरत्वावच्छेदेनानुव्याप्यत्वसामानाधिकरण्यं पक्षावच्छेदेन तूव्याप्यत्वसामानाधिकरण्यम् ।

निरूपणामित्यन्योन्याश्रय इत्यर्थः ॥ [g] "अदृ"ष्टेति । अदृष्टव्यभिचारं साध्यं येनेत्यर्थः ॥ [h] "वस्तुत"इति । तत्र च साध्याव्यापकेऽप्युपाधिलक्षणमतिव्यापकमित्यर्थः ननु व्यभिचारदर्शनात्यन्ताभाववत्त्वं विवक्षितमित्यत आह—। [i] "न दृश्यत" इति । तथाच दुर्ग्रहं लक्षणमित्यर्थः । [j] "व्याप्तौ"ति । तदा न सिद्धिकर्मत्वमित्यर्थः ॥

मू० [a] *साध्यं व्यापकमपेक्षितम्—?*—इति चेन्न, [b] व्याप्त्यनवगमे व्यापकार्थानवगमात् [c] *सम्भावितव्यापकभावो व्यापकोऽपेक्षित?*—इति चेन्न, [d] व्यापकस्यानिरुक्तौ किंरूपतया सम्भावनापि स्यात् अथ साध्यव्यापक इत्येव [e] भद्रं तदानीं साध्यत्वाभावेऽपि साधयितुमर्हत्वस्य विवक्षितत्वात्(१) न कथं ह्यवगन्तव्यमिदमेव साधयितुमर्हमिदं नेति व्यापकत्वादिति वक्तुमशक्यत्वात् [f] न च साधनाव्यापकत्वं सर्वत्र निश्चेतुं शक्यं स श्यामो(२) मैत्रतनयत्वादित्यत्र शाकाद्याहारपरिणतिपरम्पराया मैत्रतनयेऽभावस्य दुरधिगमत्वात् [g] *यत्रोक्तलक्षणस्य निश्चायकं प्रमाणमस्ति तत्र निश्चितोपाधित्वं अन्यत्र शङ्कितोपाधित्वं(३) मैत्रतनयत्वव्याप्यशाकाद्याहारपरिणतिपरम्परया(४) स्यातव्यमित्यत्र नियामकाभावात्?*—इति चेन्न, [h] मैत्रतनयत्वेनैव हेतुना तस्यापि प्रसाधने तच्छङ्काया अपिच्छेतुं शक्यत्वात् ॥ (शेषमग्रे)

(१) परिहारमाह—नेति—अन्वयस्तु वह्निमान्याद्येव साध्यं न धूमादीति कथमवगन्तव्यमिति ।

(२) मित्राया अयं मैत्रः मैत्रस्यापत्यं मैत्रतनय इति तथा—

(३) श्यामत्वविशिष्टमैत्रतनयत्वं व्याप्यं यस्यास्तथेत्यर्थः । मैत्रतनयत्वविशिष्टश्यामत्वव्यापिकयेति पर्यवसितोऽर्थः ।

(४) स्यातव्यमित्यस्मात्प्राक्—गौरशरीरे—इत्यपि योजनीयम्—

॥ श्रीः ॥

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(Continued from page 224. Vol. IX.)

मू० ननु वर्णात्मना प्रतिपन्ना रेखा वर्णबुद्धिहेतुर्वर्णात्मना त्वसत्या । नैवं, वर्णात्मतायास्त्वसत्याया उपायत्वायोगात् असतो निरुपाख्यस्य ह्युपायत्वं न दृष्टमनुपपन्नं च । अथ तस्यां वर्णबुद्धेरुपायत्वम्, एवं तर्ह्यसत्यात्सत्यबुद्धिर्न स्यात् बुद्धेः सत्यत्वादेवोपायोपेययोरैक्यप्रसङ्गश्च उभयोर्बुद्धित्वाविशेषात् रेखाया अविद्यमानवर्णात्मनोपायत्वे चैकस्यामेव रेखायामविद्यमानसर्ववर्णात्मकत्वस्य सुलभत्वादेकरेखादर्शनात्सर्ववर्णप्रतिपत्तिः स्यात्

टी० "ननु[1] चे"ति, परिहरति "नैवमि"ति, वर्णात्मकता किं सत्तया वर्णप्रतिपत्तेरुपायः ? उत प्रमिततया ? उत प्रतीततये ति विकल्पमभिप्रेत्याह "असत" इति, असत्यत्वा[2]त्मतयोपायत्वमनुपपन्नमित्यसत इति पदस्याभिप्रायः । असतः—सद्व्यतिरिक्तस्येत्यर्थः । असत्त्वादेव प्रमिततयोपायत्वं चानुपपन्नमिति निरुपाख्य-शब्दाभिप्रायः । उपाख्या प्रमितिस्तदविषयत्वं निरुपाख्यत्वं प्रतीतिविषयतयोपायत्वानुपपत्तिस्तु वक्ष्यते सत्ताप्रमित्योरभावेऽपि वर्णात्मतया उपायत्वमस्तीति कल्प्यते चेत् तदनुपपन्नं व्याप्तिविरोधात् व्याप्त्यनुगुणं हि कल्पनं प्रवर्त्तेत इत्यभिप्रायेणाह "अनुपपन्नं चे"ति, । अथ भ्रान्तितः प्रतीताया वर्णात्मताया वर्णप्रतिपत्तिहेतुत्वपक्षेऽपि बुद्ध्यंशस्य

१ नन्विति तु धारायां युज्यते मूले तथैवोपलम्भात् ।

२ असत्त्वात्सत्तयोपायत्वमनुपपन्नमिति द्राविडपाठः ।

हेतुत्वे परस्यानुपपत्तिं दर्शयितुमाह, "अथे"ति, दूषयति "एवं तर्ही"ति, कुत इत्यत्राह, "बुद्धेरि"ति, दूषणान्तरमाह "उपाये"ति, तदुपपादयति "उभयोरि"ति, बुद्ध्यंशस्य हेतुत्वे दूषणमुक्तं वर्णात्मतांशस्य हेतुत्वे सिंहावलोकितकेन दूषणमाह, "रेखाया" इति, अविद्यमानवर्णात्मना—अविद्यमानवर्णात्मकत्वेनेत्यर्थः । अतिप्रसङ्गपरिहारार्थं शङ्कते—

सू॰ अथ पिण्डविशेषे देवदत्तादिशब्दसङ्केतवच्चतुरश्राद्यरेखाविशेषे श्रोत्रग्राह्यवर्णविशेषसङ्केतवशाद्रेखाविशेषो वर्णविशेषबुद्धिहेतुरिति हन्त तर्हि सत्यादेव सत्यप्रतिपत्तिः, रेखायाः सङ्केतस्य च सत्यत्वात्, रेखागवयादपि सत्या गवयबुद्धिः सादृश्यनिबन्धना, सादृश्यं च सत्यमेव न चैकरूपस्य शब्दस्य नादविशेषेणार्थभेदबुद्धिहेतुत्वेऽप्यसत्यात्सत्यप्रतिपत्तिः, नाना नादाभिव्यक्तस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यङ्ग्यस्वरूपेणार्थविशेषैस्सह संबन्धग्रहणवशादर्थभेदबुद्ध्युत्पत्तिहेतुत्वात् शब्दस्यैकरूपत्वमपि न साधीयः

टी॰ "अथे"ति, तत्रापि स्वमतसिद्धिमाह, "हन्ते"ति, तदुपपादयति "रेखाया" इति, उदाहरणान्तरं परिहरति, "रेखागवयादि"ति, स्फोटवादावलम्बनेनोच्यमानमुदाहरणान्तरं परिहरति न चैकरूपस्येत्यादिना, नादैः स्फोट्यत इति व्युत्पत्त्या स्फोट एकरूपः शब्दः, तदभिव्यञ्जकनादविशेषाः बहवः कत्वखत्वगत्वादिभेदो व्यञ्जकगतः शब्द आरोपितोऽर्थविशेषप्रतिपत्तिहेतुः तत्रासत्यात्सत्य[1]प्रतिपत्तिरित्यपि न युक्तमित्यर्थः । कुत इत्यत्राह, "नानानादे"ति, खत्वगत्वादिविशेषान्विततत्तादृक्तोऽभिव्यक्तिविशेषस्सत्यः तद्विशिष्टः सत्यशब्दोऽर्थप्रतिपत्तिहेतुरित्यर्थः । यद्यपि खत्वगत्वादिवैशिष्ट्यं शब्दस्यारोपितं तथापि तज्ज्ञानं सत्यमेवार्थप्रतिपत्तिहेतुः, ज्ञानस्य

१ असत्यात्सत्योत्पत्तिरिति पाठान्तरम् ।

च सत्येनैवालम्बनेन स्वाग्रज्ञानवद्व्यावृत्तिरनुसंधेया कत्वाद्यालम्बनाभिव्यक्तिविशिष्टरूपेण स्फोटस्यार्थप्रतिपत्तिहेतुत्वसंभवात् कत्वादिवैशिष्ट्यस्यासत्यस्य नार्थप्रतिपत्तावुपयोगः, एवं शब्दस्यैकरूपत्वमभ्युपगम्य परिहृतम् अथ तदनभ्युपगमेन परिहरति "शब्दस्यैकरूपत्वमपी"ति, कुत इत्यत्राह–

सू० गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात् ॥

टी० "गकारादेरि"ति, एवकारेणैकरूपशब्दो व्या[1]वर्त्तते न तु दुन्दुभिशब्दादिः । स त्वनभिव्यक्तविशेषाकारो गकारादिरेव । अथ गौरित्यत्र कः शब्दः गकारौकारविसर्जनीया इति हि भगवानुपवर्ष इति गकारादेरेव बोधकत्वं व्याचख्युः

ननु "तस्मिंस्तस्मिंस्तु तन्मात्रं तेन तन्मात्रता स्मृते"ति शास्त्रवशादेकरूपं शब्दमात्रमभ्युपगन्तव्यं तत्कथं तत्प्रतिक्षेपः, नैवं तन्मात्रावस्थायां सूक्ष्मभूतकारणगुणानामिन्द्रियग्राह्यत्वायोगात् पञ्चीकृतभूतगुणानामेव श्रोत्रेन्द्रियकत्वं, किं च दध्यवस्थायां दुग्धावस्थेव तन्मात्रावस्थाऽऽकाशगुणभूतं शब्दतन्मात्रं स्थूलाकाशसृष्टेः पश्चान्न विद्यते यथा च महाभूततृतीये तेजसि शुक्लकृष्णादिवर्णव्यतिरेकेण रूपतन्मात्रं किंचिदस्ति शुक्लकृष्णादयश्चाभिव्यञ्जकगता एकरूपे आरोपिता इति वक्तुमयुक्तम् एवमिदानीमेकरूपशब्दस्य विद्यमानत्वं तत्राभिव्यञ्जकगतकत्वखत्वादीनामारोपितत्वं च सर्गप्रतिपादकशास्त्रानुसारिभिरभ्युपेतुमयुक्तम् । अत्रायमभिसंन्धिः, वर्णातिरिक्त एकरूपः शब्दः किं स्फुटप्रतिपन्नत्वादभ्युपगम्यते? उत कल्पनावशाच्च प्रथमः, गकारादिव्यतिरिक्तस्य कस्यचिदनुपलम्भात्, न द्वितीयः कल्पकाभावादिति

ननु वर्णानां वाचकत्वानुपपत्तेरेकं पदमित्यादि प्रत्ययस्य वर्णेष्वनुपपत्तेः, भिन्नेषु वर्णेषु शब्दः शब्द इत्यनुवृत्तिबुद्धिवशाच्च वर्णातिरिक्तपदस्फोटसिद्धिः, तत एव न्यायात्पदसंघातातिरिक्तवाक्यस्फोटसिद्धिश्चेत्यत्राह "गकारादेरि"ति, गकारादिवर्णानामेव समुदितानां वाचकत्वम् एकं

[1] व्यावर्त्यते इति तु युक्तः पाठ इति प्रतिपद्यामहे ।

Digitized by Google

पदमेकं वाक्यमिति प्रत्ययश्च वर्णसमुदायविषयः शब्दः शब्द इत्यनुवृत्तिबुद्धिश्च श्रोत्रग्राह्यत्वोपाधिनिबन्धना अतः कल्पकानामन्यथासिद्धत्वान्नैकरूपशब्दसिद्धिरित्यर्थः

ननु न कल्पकान्यथासिद्धिः, तथाहि न तावदेकैकस्य वर्णस्य वाचकत्वं वर्णान्तरवैयर्थ्यात् गकारमात्रेण गोगवयगवाद्यप्रतिपत्तेश्च, नापि वर्णसमुदायो वाचकः क्रमोच्चारितानां वर्णानां यौगपद्याभावेन वृक्षादीनामिव समुदायभावानुभूतवर्णविषयस्मरणानुपपत्तेः

न च पूर्वपूर्वानुभवजनितसंस्कारसचिवोऽन्त्यवर्णो वाचक इति युक्तं वर्णानुभवजनितसंस्काराणामनुभूतवर्णविषयस्मरणहेतुतयाऽननुभूतार्थान्तरप्रतीतिहेतुत्वाभावेनाकिंचित्करत्वात् तत्साचिव्यविरहितान्त्यवर्णस्य चार्थप्रत्यायकत्वायोगात्, तथा वर्णानां भिन्नत्वादेकं पदमिति प्रत्ययश्च तदतिरिक्तार्थविषयो भवितुमर्हति

न च वनसेनादिप्रत्ययवत्समुदायविषयत्वमेकत्वप्रत्ययस्य युक्तम् एकप्रदेशसंबन्धित्वादिवदेकैकार्थनिमित्तोपाध्यभावात् एकस्मृत्यु[1]पारोहत्वमुपाधिरिति चेन्न द्वे पदे त्रीणि पदानि बहूनि वाक्यानीत्यनेकेषामप्येकप्रत्ययारोह[2]त्वदर्शनात् न चैकार्थावच्छिन्नवर्णसमुदाय एकं पदं, वर्णानां वाचकत्वानुपपत्तेरेवैकार्थप्रतिपादनाभावात्। किंच बहुषु वर्णेष्वयं शब्दोऽयं शब्द इत्यनुवृत्तः शब्दः शब्दो वर्णातिरिक्तविषयो युक्तः, घटकरकापवरकादिभेदेऽप्येकार्थविषयस्याकाशशब्दस्य हि घटकरकाद्यतिरिक्तार्थविषयत्वं दृष्टम्

न च श्रोत्रग्राह्यतोपाधिना शब्दशब्दानुवृत्तिरिति युक्तं श्रोत्रस्य श्रोत्रग्राह्यत्वायोगेन श्रोत्रग्राह्यताया अपि श्रोत्रेण ग्रहीतुमशक्यत्वात्मानान्तरेण श्रोत्रग्राह्यताप्रतीतावविलम्बितशब्दसाक्षात्कारानुपपत्तेः अतः कल्पकान्यथासिद्ध्यभावाद्वर्णातिरिक्तः शब्दस्फोट इति। अत्रोच्यते न तावद्वर्णानां वाचकत्वानुपपत्त्या स्फोटसिद्धिः, तेषां स्फोटाभिव्यञ्जकत्वेऽपि चोद्यपरि-

१ एकस्मृत्युपारूढत्वमुपाधिरिति द्राविडपाठः।
२ प्रत्ययारूढत्वदर्शनादिति तु युक्तमुत्पश्यामः पाठम्।

हारयोस्तुल्यत्वाल्लाघवन्यायेन वर्णानामेव वाचकत्वाभ्युपगमस्य न्याय्यत्वात् तथा हि न तावदेकैकवर्णः स्फोटव्यञ्जकः, द्वितीयवर्णवैयर्थ्यात् गकारमात्रेण गवयादिपदस्फोटाभिव्यक्तिप्रसङ्गाच्च नापि वर्णसमुदायो व्यञ्जकः क्रमोच्चारितध्वस्तानां वर्णानां यौगपद्याभावेन समुदायभावानुपपत्तेः

न च पूर्वपूर्ववर्णजनितसंस्कारसचिवोऽन्त्यवर्णो व्यञ्जकः, वर्णानुभवजनितसंस्काराणामनुभूतवर्णस्मृतिमात्रे हेतुतयाऽननुभूतस्फोटप्रतीतिहेतुत्वायोगेन तत्संस्कारानुगृहीतस्यान्त्यवर्णस्य च तदभिव्यञ्जकत्वायोगात्। यदुच्यते पदं तावत्प्रतीयते अतस्तत्प्रतीत्यनुरूपं कारणं कल्प्यं क्रमभाविनामपि संस्काराणां युगपत्कार्यकरत्वं युक्तं क्रमदृष्टयोरपि घटयोः घटाविति स्मरणदर्शनादतो युगपद्वा पूर्ववर्णस्मरणसचिवोऽन्त्यवर्णो वा युगपत्स्मर्यमाणसर्ववर्णसमुदायो वा स्फोटाभिव्यञ्जक इति, एवं तर्हि स्फोटाभिव्यञ्जकतयाऽभ्युपेतायाः सामग्र्या अर्थाभिव्यञ्जकत्वमास्थीयतां चोद्यपरिहारयोस्तुल्यत्वात् अन्यथासिद्धस्यार्थान्तरकल्पकत्वायोगात्, वर्णानामेव वाचकत्वसंभवे तदतिरिक्तकल्पनानुपपत्तेर्लाघवन्यायस्य बलीयस्त्वाच्च वर्णानां भिन्नत्वेऽपि युगपद्बुद्धिस्थैकविभक्त्यन्तानेकवर्णसमुदायविषयतया पदैकत्वबुद्धिरपि नार्थान्तरकल्पिका न चार्थैकत्वात्पदैकत्वं पदैकत्वादर्थैकत्वमित्यन्योन्याश्रयः, एकविभक्त्यन्तवर्णसमुदायस्यैकपदत्वनिश्चयात् सुप्तिङन्तं पदमिति हि पदनिष्कर्षः, तस्य चोक्ताभिप्रायत्वे सत्यव्याप्तिश्च स्यात् एकव्युत्पत्तिसिद्धैकार्थप्रतिपत्त्युपयुक्तवर्णसमुदायस्य वा पदत्वं बहुषु वर्णेष्वयं शब्दोऽयं शब्द इति प्रत्ययोऽपि श्रोत्रग्राह्यत्वोपाधिनिबन्धनत्वादन्यथासिद्ध इति नार्थान्तरसिद्धिः

न च श्रोत्रग्राह्यताया अपि श्रोत्रेण ग्रहणापेक्षा यथा चाक्षुषाणां धवलिमपीतिमनीलिम्नां चाक्षुषत्वज्ञाने न चक्षुरपेक्षा इदं चाक्षुषमिदं चाक्षुषमिति व्यवहारश्चाक्षुषत्वज्ञाननिबन्धन एव प्रमाणान्तरावगतचक्षुःश्रोत्राद्यन्वयव्यतिरेकानुविधायिज्ञानगोचरत्वेन चाक्षुषश्रावणत्वादिज्ञानं चक्षुरादिकं नापेक्षते

न च सहसैव शब्दोऽयमिति जानन्ति प्रथमं गकारादिरूपेणैव शब्दे ऽवगते व्युत्पन्नशब्दस्मरणपूर्वकमेव शब्द इत्यवगम्यते अतः शब्देन स्मरणकालविलम्बवत् श्रोत्रयाग्नताऽनुमानविलम्बोऽपि अभ्यासपाटवकृतात् शैघ्र्यात् न विविच्यते अतो वर्णा एव पदं पदसमुदाय एव वाक्यमिति स्थितम् । असत्यात्सत्यप्रतिपत्तिनिराकरणमुपसंहरति–

सू० अतोऽसत्याच्छास्त्रात्सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा ।

ननु शास्त्रस्य न गगनकुसुमवदसत्यत्वं प्रागद्वैतज्ञानात्सद्बुद्धिबोध्यत्वादुत्पन्ने तत्त्वज्ञाने ह्यसत्यत्वं शास्त्रस्य, न तदा शास्त्रं निरस्तनिखिलभेदचिन्मात्रब्रह्मज्ञानोपायः, यदोपायस्तदाऽस्त्येव शास्त्रमस्तीति बुद्धेः । नैवम् असति शास्त्रेऽस्ति शास्त्रमिति बुद्धेर्मिथ्यात्वात् ततः किमिदं ततो मिथ्याभूतशास्त्रजन्यज्ञानस्य मिथ्यात्वेन तद्विषयस्याऽपि ब्रह्मणो मिथ्यात्वम् ॥

टी० "अत"इति, सत्यप्रतिपत्तिहेतुषु–सत्यतया अभिमतेषु यादृशसत्यत्वं तादृशं सत्यत्वं शास्त्रस्याप्यस्तीत्यभिप्रायेण चोदयति "नन्वि"ति, गगनकुसुमवदिति युक्तिबाधो ह्युक्तः, न त्विदानीमेव लौकिकपुरुषैर्नास्तीति प्रतिपन्नत्वम् अतस्तादृशमसत्यत्वञ्चेत्यर्थः । हेतुमाह "सद्बुद्धिबोध्यत्वा"दिति, सदिति बोध्यत्वमेव कार्यकरत्वानुगुणं न सत्यत्वमित्यर्थः । तर्हि सदद्वैतभङ्गः स्यादित्यत्राह "उत्पन्न"इति, तर्हि न बोधकमित्यत्राह "न तदे"ति, परिहरति "नैव"मिति, नैवम्–उपायकालेऽपि सत्यत्वं नास्तीत्यर्थः । ज्ञानस्य मिथ्यात्वं मिथ्यार्थविषयत्वात् ज्ञानस्य दोषमूलत्वात् । विषयमिथ्यात्वे निदर्शनमाह–

सू० यथा धूमबुद्ध्या[1] गृहीतबाष्पजन्याग्निज्ञानस्य मिथ्यात्वेन-

१ यद्यपि धूमबुद्ध्या गृहीतबाष्पजन्यमपि वह्निमति वह्निज्ञानं प्रमेति प्रमाणजन्यत्वं न प्रमात्वे तन्त्रमिति श्रीभाष्याचार्याणां "यथा धूमबुद्ध्या गृहीतबाष्पजन्याग्निज्ञानस्य मिथ्यात्वेन तद्विषयस्याग्नेरपि मिथ्यात्व"मित्यभिधानं कथं सङ्गच्छतामित्याश-

तद्विषयस्याग्नेरपि मिथ्यात्वं पश्चात्तनबाधादर्शनं चासिद्धं शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाधदर्शनात्तत्तु भ्रान्तिमूलमिति चेत् एतदपि भ्रान्तिमूलमिति त्वयैवोक्तं पाश्चात्यबाधादर्शनन्तु तस्यैवेत्यलमप्रतिष्ठितकुतर्कपरिहसनेन ॥

टी० "यद्य"ति, पूर्वं पश्चात्तनबाधादर्शनमभ्युपेत्य दूषणमुक्तमिदानीं तदेव नास्तीत्याह, "पश्चादिति", तदुपपादयति, "शून्यमिति", तद्वाक्यं तत्प्रामाण्यमपि भ्रान्तिसिद्धमिति शङ्कते, "तत्त्विति" तुल्यत्वमाह, "एतदपीति", पाश्चात्यबाधादर्शनस्य प्रामाण्यहेतुत्ववचनं च सर्वशून्यवादिन एव साधकं ततः परं निषेध्याभावेन निषेधानुदयादित्याह "पाश्चात्येति", प्रामाण्यादीनां दोषमूलत्वं द्वयोरपि तुल्यं पाश्चात्यबाधादर्शनं तु शून्यवादिनोऽधिकमित्यर्थः । सर्वशून्यवादिनोऽपि परो निषेधोऽस्ति सर्वमस्तीति वचनं हि तन्निषेध इति चेत् तर्हि प्रपञ्चमिथ्यात्ववचनस्यापि प्रपञ्चसत्यतावचनं निषेधः स्यात् नास्तीति वचनमेव च निषेध इति चेत् तत्तु शून्यवादिन एवेति भावः । इदं च वेदाप्रामाण्यं मृषावादिनां सौगतानां च समानं यदाहुः "वेदो ऽनृतो बुद्धकृतागमो ऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम् । बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंसदः" ।

ततः शङ्का प्रसरति तथाऽपि परमतेऽप्यबाधितविषयकत्वं कथं प्रमात्वप्रयोजकमिति विवेचनीयं तत्राबाधितविषयकत्वं स्वरूपसत् ज्ञायमानं वा प्रमात्वप्रयोजकं, तत्रापि च स्वरूपसतो ज्ञायमानस्य वा प्रमात्वस्य प्रयोज्यत्वमिति विकल्पस्तत्र यदि अबाधितविषयकत्वं स्वरूपसत् स्वरूपसतः प्रमात्वस्य प्रयोजकमिति परो ब्रूयात्तदा ऽबाधितविषयकत्वस्यैव प्रमात्वेन प्रमात्वस्य प्रमात्वप्रयोजकत्वे पर्यवसानमित्यात्माश्रयः, यदि त्वबाधितविषयकत्वज्ञानं प्रमात्वज्ञानप्रयोजकमित्युच्येत तदाऽपि पूर्ववदेवात्माश्रयप्रसङ्गः तस्मादबाधितविषयकत्वज्ञानं स्वरूपसतः प्रमात्वस्य प्रयोजकमथवा अबाधितविषयकत्वं स्वरूपसत् प्रमात्वज्ञानप्रयोजकमित्यवशिष्येते कल्पौ तत्र यदि प्रथमः पक्षः कक्षीक्रियेत तदा प्रमात्वप्रयोजकीभूतमबाधितविषयकत्वज्ञानं प्रमाणजन्यत्वेनैवागत्या वक्तव्यमिति प्रमाणजन्यत्वस्यैव प्रमात्वप्रयोजकत्वं भवताऽपि प्रकारान्तरेणाङ्गीकृतमित्यस्मत्पक्षसौस्थ्यं, यदि तु स्वरूपसदबाधितविषयकत्वं प्रमात्वज्ञानप्रयोजकमुच्येत तदेतदपि न सांप्रतम् अबाधितविषयकत्वेऽपि दोषसमवधाने प्रमात्वज्ञानानुदयात् । तदेतदाशयानैराचार्यपादैस्तथोक्तमित्यनुसंधेयम् ।

Digitized by Google

ननु विषयसत्यत्वरूपं शास्त्रप्रामाण्यं विद्यत इति मतद्विह वैषम्यमस्माकमिति चेत् न किं कतिपयविषयसत्यत्वं विवक्षितम्? उत कृत्स्नविषयसत्यत्वं? कतिपयविषयसत्यत्वं बुद्धागमस्याप्यस्ति संवित्स्वयम्प्रकाशत्वादेस्सम्प्रतिपन्नत्वात् कृत्स्नविषयसत्यत्वं तु श्रुतेरपि त्वयाऽपि न स्वीकृतमिति । किं च विषयसत्यत्वं दुर्वचं सत्यतयाऽभ्युपेतस्य ब्रह्मणः प्रमाणाविषयत्वानभ्युपगमात् यस्मादित्यो यूप इत्यत्र यूपादित्यैक्याप्रतिपादनं तात्पर्यलिङ्गाभावान्न तु प्रत्यक्षप्राबल्यादित्युच्यते तत्र तात्पर्यलिङ्गाभावोऽभ्युपगत एव तेन प्रत्यक्षविरुद्धार्थप्रतिपादनाक्षमत्वमङ्गीकरणीयमापतति न हि वेदान्तिभिरर्थवादादेरन्यपरत्वात्स्वार्थे प्रामाण्यं त्यज्यते मन्त्रार्थवादानां स्वार्थे प्रामाण्यस्य भवद्भिरेवोपपादितत्वात् अतः स्तुतिपरत्वात् यूपादित्यैक्याप्रतिपादनमित्यपसिद्धान्तः । अर्थवादानां स्वार्थे तात्पर्यमस्ति[1] चेत् कथं तद्यूपादित्यैक्याप्रतिपादनमिति चेत् उच्यते प्रमाणान्तराविरोधश्च तात्पर्यलिङ्गम् उपक्रमोपसंहारादिष्वर्थेष्वपि तात्पर्यलिङ्गतया ह्युक्तम् "अभ्यासोऽपूर्वता फल"मिति अपूर्वत्वं च साधकबाधकप्रमाणागोचरत्वं यथाऽऽहुः "असन्निकृष्टवाचा च द्युमत्र विहासितम् । तादूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वेति" अतः प्रमाणान्तरागोचरत्वलक्षणं तात्पर्यलिङ्गमत्र नास्तीति यूपादित्यैक्याप्रतिपादनत्व स्वार्थबाधत्वेन स्वार्थे प्रामाण्यस्याभावादिति अतस्तात्पर्यलिङ्गाभावो नाम प्रत्यक्षविरोधे पर्यवसित इति शास्त्रं न तद्विरुद्धार्थप्रतिपादनक्षमम् । शास्त्रप्राबल्यनिरसनं परिसमापयति "अल"मिति, । यद्वा यत्तु प्रत्यक्षमित्यादिना न्यायमुखेन कृतं परपक्षप्रतिक्षेपमुपसंहरति, "अलमिति", प्रमाणविरुद्धस्तर्कः कुतर्कः तत एवाप्रतिष्ठितत्वं स्वविरुद्धबौद्धमतोपयुक्तयुक्तिकथनात्परिहसनीयत्वं परेण प्रत्यक्षादपि शास्त्रप्राबल्यं वदता प्रबलतयाऽभिमतं शास्त्रं पुरस्कृत्य पश्चात्तर्कः प्रतिपादितः सिद्धान्ते तु प्रबलतया अभिमतलौकिकप्रमाणगतिं प्रथमं निरूप्य परोक्तदुस्तर्कोक्तिरस्य लौकिकप्रमाणविरोधे शास्त्रप्राबल्यं च प्रतिक्षिप्तं शास्त्रस्य लौकिकप्रमाणविरुद्धार्थप्रतिपादनासाम-

१ प्रामाण्यमस्तीति द्राविडपाठः ।

र्थ्योपपादनेन शास्त्रस्य सविशेषपरत्वं सामान्यतः सामर्थ्यात्सिद्धं विशेषेण शब्दस्य पदवाक्यरूपेण प्रवृत्त्या सविशेषपरतोपपादनाच्च शास्त्रस्य सविशेषपरत्वं सामान्येनसिद्धमथापि ये वाक्यविशेषाः परैर्निर्विशेषपरत्वेनोदाहृताः तेषां सविशेषपरत्वं वाक्यतात्पर्यपर्यालोचनया प्रतिपादयितुमारभते–

सू० यदुक्तं वेदान्तवाक्यानि निर्विशेषज्ञानैकरसवस्तुमात्रप्रतिपादनपराणि "सदेव सोम्येदमग्र आसीदि"त्येवमादीनीति तदयुक्तम् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनमुखेन सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगदुपादानत्वं जगन्निमित्तत्वं सर्वज्ञता सर्वशक्तियोगः सत्यसङ्कल्पत्वं सर्वान्तरत्वं सर्वाधारत्वं सर्वनियमनमित्याद्यनेककल्याणगुणविशिष्टतां कृत्स्नस्य जगतस्तदात्मकतां च प्रतिपाद्य एवंभूतब्रह्मात्मकस्त्वमसीति श्वेतकेतुं प्रत्युपदेशाय प्रवृत्तत्वात्प्रकरणस्य

टी० "यदुक्तमि"त्यादिना तत्र निर्विशेषपरत्वं संग्रहेणानुवदति "यदुक्त"मिति. ज्ञानैकरसत्वेन शोधकवाक्येषु प्रतिपन्नत्वान्निर्विशेषत्वं. तच्च कारणवाक्येषु प्रतिपन्नं वस्तुमात्र–शब्देनान्यत्र सगुणे ब्रह्मणि तात्पर्याभावस्सूच्यत इत्यादीनीत्युक्ते तस्यामेवोपनिषदि पर्यवस्यतीति तद्वाक्यार्थमित्येवमादीनीत्युक्तं तद् दूषयति "तदयुक्त"मिति, कुत इत्यत्राह "एकविज्ञानेने"ति, येनाश्रुतमित्यादिवाक्येनैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायते तस्यायमर्थः, येन श्रुतेन मतेन विज्ञातेनाश्रुतममतमविज्ञातं श्रुतं मतं विज्ञातं भवतीति। न तु ब्रह्मणस्सत्तया सर्वं ज्ञातं भवतीति दार्ष्टान्तिकसामर्थ्यात् मृद्दृष्टान्तसामर्थ्याच्च, न हि ब्रह्मसत्तया मृत्पिण्डसत्तया वा तत्कार्यता[1] ज्ञायते "कस्मिन्नु भगवतो विज्ञाते सर्वमिदं विज्ञातं भवती"ति मुण्ड-

१ तत्कार्यं ज्ञायते इति तु क्रम् ।

कोपनिषदि "आत्मनि खल्वरे दृष्टे श्रुते विज्ञाते इदं सर्वं विदितमि"ति बृहदारण्यके च श्रवणात्, अतो यथोक्त एव प्रतिज्ञावाक्यार्थः, न हि घटज्ञानेन पटज्ञानसंभव इत्येकविज्ञानेन सर्वविज्ञानञ्च संभवतीति शङ्कायां कार्यकारणयोस्तद् दृष्टमित्याह यथा "सोम्ये"ति, तत्राप्यसत्कार्यवादमुखेनैकविज्ञानेन सर्वविज्ञानानुपपत्तिशङ्कां परिहरति, "वाचारम्भणमिति",वाचा—वाक्शब्दोऽजहल्लक्षणया वाक्पूर्वव्यवहारपरः, वाचेति तृतीयया प्रयोजनतया हेतुत्वं विवक्षितम् आरम्भणमिति कर्मणि ल्युट् आरभ्यते आलभ्यते इत्यारम्भणम् "आलम्भः स्पर्शहिंसयोः" मृत्पिण्डेनेत्यर्थसिद्धं विकारो घटत्वद्रव्यत्वाद्यवस्था वाक्पूर्वकव्हानादिव्यवहारार्थंमृत्पिण्डेन नामरूपे स्पृश्येते मृत्पिण्डो नामरूपभाग् भवतीत्यर्थः । कार्यकारणयोरेकद्रव्यत्वे प्रमाणमाह, "मृत्तिकेत्येव सत्यमिति" मृदयं घट इति प्रत्यभिज्ञया मृ[1]न्मयं घटादिकमपि मृद्द्रव्यत्वेनैव प्रामाणिकमित्यर्थः । बुद्धिशब्दादिभेदाः घटपटादिषु द्रव्यभेदेऽपि दृष्टाः, आस्ते शेते सुख्यहं दुःख्यहमित्यादिषु द्रव्यैक्येऽपि दृष्टाः अतस्ते साधारणाः, तत्राऽऽस्ते शेते सुख्यहं दुःख्यहमित्यादिषु द्रव्यैक्यनियामिका प्रत्यभिज्ञा सैवात्रापि द्रव्यैक्यनियामिकेति भावः । अत्र मृत्तिकामात्रस्य पारमार्थ्यं विकारासत्यत्वं च विवक्षितं चेदिति—शब्दवैयर्थ्यं स्यादिति तदा मृत्तिकैव सत्येति हि वाच्यं विकारासत्यत्वे दृष्टान्तस्साध्यविकलः सत्यत्वप्रतिपत्तेर्घटादिसत्यत्वं व्यावहारिकमिति चेत् मृत्पिण्डस्यापि सत्यत्वं व्यावहारिकमिति न कारणसत्यत्वसिद्धिः कारणस्य व्यावहारिकमेव सत्यत्वमभिमतं चेत् तद् घटादेरपि तुल्यं स्यात् कार्यकारणद्रव्यैक्यात्, कारणविज्ञानेन कार्यविज्ञानमुपपन्नमस्तु तथाऽपि लोके विविधकार्यवर्गस्य विविधोपादानकत्वदर्शनादेकविज्ञानेन सर्वविज्ञानमनुपपन्नमिति शङ्कायां जगतो ब्रह्मैककारणतामाह "सदेव सोम्येदमग्र आसीदिति", श्रुतिगतसच्छब्दार्थमभिप्रेत्यात्र सच्छब्दवाच्यस्येत्युक्तं सगुणब्रह्मपरमिदमित्यन्यथासिद्धिर्दुर्वचेत्यभिप्रायेण परस्य ब्रह्मण इत्युक्तम्

१ मणमर्यमिति द्राविडपाठः ।

अग्रे—सृष्टेः पूर्वमित्यर्थः अनन्तरं सृष्टेर्वक्ष्यमाणत्वात् विजातीयसजातीयस्वगतनानात्वव्यावृत्तिः अत्र विवक्षिता चेदग्र इति वक्तुमयुक्तं, न हि ब्रह्मणः कालविशेषे निर्विशेषत्वं वैषम्यनैर्घृण्यादिपरिहाराय जीवबहुत्वतत्कर्मप्रवाहतदनादित्वानामभ्युपगम्यत्वाच्च तद्बहुत्वमपारमार्थिकमिति चेत् न पारमार्थिकबहुत्वस्येदानीमप्यभावादग्रशब्दवैयर्थ्यात् न चाग्रशब्दस्याविवक्षितार्थता अनन्तरं सृष्ट्युक्तेः अतः कालरूपविजातीयभेद श्चेतनरूपसजातीयभेदः सार्वज्ञ्यादिसृष्ट्यनुगुणगुणरूपस्वगतभेदश्च तदानीमस्तीति विजातीयादित्रिविधभेदनिरसनपरत्वं विरुद्धं कारणवाक्यत्वात् । न चेदिदं कारणवाक्यमीदृशानां वाक्यानां सर्वशाखाप्रत्ययन्यायाद्विजातीयादिभेदनिरसनपरत्वेन कारणपरत्वाभावात् ब्रह्मकारणत्वमप्रमाणं स्यात् अवधारणवाचिन एवकारस्य स्वयंव्यावर्त्यविशेषोपस्थापनासमर्थस्य समभिव्याहृतपदान्तरार्थविरोधिव्यावर्तकत्वनियमदर्शनात् सदेवेत्यवधारणमसत्कार्यवादव्युदासपरं, न ह्ययं विद्वानेवेत्यवधारणं ब्राह्मणत्वं व्यावर्तयति अपि त्वविद्वत्त्वमेव, अतः शब्दस्य स्वारस्यात्सदेवेति व्युदसनीयमसत्त्वमेव न तु विजातीयभेदः । यद्यपि सद्विजातीयमसत् तथाऽपि तस्य व्यावर्त्यत्वं न विजातीयत्वाकारेण अपि तु सद्विरोधित्वरूपेण सदेव न तु कदाचिदप्यसदित्यर्थः सच्छब्दो हि मानसंबन्धयोग्यत्वलक्षणसत्त्वं प्रवृत्तिनिमित्तीकृत्य परमात्मनि वर्तते अयं तु सच्छब्दो विशेष्यभूतपरमात्मवाचकोऽपि कारणविषयत्वसामर्थ्यात्कारणत्वौपयिकगुणविशिष्टप्रकृतिपुरुषकालशरीरकं परमात्मानमुपस्थापयति एकमेवेत्यविभक्तनामरूपं कारणावस्थं ब्रह्मोच्यते कारणावस्थायामेकत्वावधारणस्य बहु स्यामिति वक्ष्यमाणकार्यबहुत्वप्रतियोग्येकत्वपरत्वादेकेन मृत्पिण्डेन सर्वं मृण्मयमित्युक्तदृष्टान्तसामर्थ्यात् "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते"ति श्रुत्यन्तरैकार्थ्याच्चायमेवार्थः वैशेषिकादिभिर्नित्यतयोक्तानामाकाशादीनामपि संहाराभिप्राय एवकारः । एवमविभक्तनामरूपत्वाद्ब्रह्मण उपादानत्वं सिद्धं भाव्यवस्थाविशेषवतःप्रागवस्थायोगो ह्युपादानत्वम् अद्वितीयमिति निमित्तान्तरनिषेधः उपादानस्य प्रस्तुतत्वेन निमित्तस्य धीस्थत्वात्परतन्त्ररू-

Digitized by Google

पविशेषणानां विहितत्वात्प्रतिषेधस्य विहितव्यतिरिक्तविषयत्वादुपरितनवाक्यसङ्गतिरपेक्षितत्वाच्च एकमेवेति शब्दस्याविभक्तनामरूपतापरत्वं बहु स्यामित्यनेनावगम्यते "तदैक्षत तत्तेजोऽसृजतेत्यनेनाद्वितीयपदस्य निमित्तान्तराभावपरत्वमवगम्यते परस्य ब्रह्मणः सर्वदा सत्त्वेन सदेवेत्यवधारणमसत्कार्यवादव्युदासपरमित्युपरितनेन कथमसतः सज्जायेतेत्यादिवाक्येनावगम्यते परस्य ब्रह्मणः सर्वदा सत्त्वेन सदेव कथमसत इत्यादिवाक्यं वैशेषिकमतनिरासपरं न तु क्षणिकत्वादिनिरासपरं न शून्यवादिनिरासपरं च क्षणिकशून्यवादिनिरासे कृतेऽप्येकविज्ञानेन सर्वविज्ञानस्य वैशेषिकमतनिराससापेक्षत्वात् "तद्धैक आहुः" "असदेवेदमग्र आसीदित्यारब्धत्वाच्च, न हि क्षणिकत्वं शून्यत्वं च कालविशेषे भवति अतोऽसत्कार्यवादनिरासपरं तद्धैक आहुरित्यादि वाक्यं "कुतस्तु खलु सोम्यैवं स्यादि"ति मृद उत्पन्नस्य मृदात्मकत्ववदसत उत्पन्नस्यासदात्मकत्वप्रसङ्ग इति भावः। उत्पत्तिर्नाम द्रव्यस्यावस्थान्तरापत्तिरित्ययमर्थो वाचारम्भणमित्यनेन शिक्षितः, तदुपजीव्योच्यते कथमसतः सज्जायेतेति कथं निराश्रयावस्थासंभव इत्यर्थः। तदैक्षतेति सर्वज्ञत्वम्, असृजतेति निमित्तत्वं, बहु स्यामित्युपादनत्वम्, तदुभयागुणं सर्वशक्तित्वं, सत्यसङ्कल्पत्वं च, अनेन जीवेनात्मनाऽनुप्रविश्येति सर्वान्तरत्वं चोक्तं भवति जीवेनात्मना जीवशरीरकेण मयेत्यर्थः सिंहेन भूत्वा बहवो मया हता व्याघ्रेण भूत्वा बहवो मया हता इतिवत् सर्वज्ञत्वादिगुणकस्य तद्विपरीताकारजीवैक्यासंभवाद्यस्यात्मा शरीरमिति वचनात्तदनुप्रविश्येत्यचेतन इव जीवेऽप्यनुप्रवेशश्रवणाच्च शरीरवाचिपदस्य शरीरिपर्यन्तत्वस्य मुख्यतयोपपन्नत्वाच्चायमेवार्थः। "सदायतनाः" इत्यनेन सर्वाधारता तत एव सर्वनियमनं च सिद्धम्। "एतस्य वाऽक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत" इति प्रशासनेन धारकत्वश्रवणात् एवं सर्वधारत्वसर्वनियमनसर्वान्तरत्वैः शरीरितयोक्तं सच्छरीरकत्वं ब्रह्मण उक्तम् आदि—शब्देन सङ्ग्रहोपयोगिनः श्रुत्यन्तरसिद्धा गुणा गृह्यते ऐतदात्म्यमित्यनेन कृत्स्नस्य जगतस्तदात्मकता चावगम्यते तत्सत्यमिति त-

दात्मकत्वेनैव जगतः प्रामाणिकत्वं जगतः स्वनिष्ठत्वेन[1] प्रतीतिर्भ्रान्तिरित्यर्थः। अतः कृत्स्नस्य जगतस्स आत्मा "ऐतदात्म्यमिदं सर्वं" स "आत्मे"ति निर्देशो रामानुजं लक्ष्मणपूर्वजं चेतिवदन्योन्यसंबन्धित्वतात्पर्यातिशयकृतः। यद्वा 'स त आत्मा अन्तर्याम्यमृत" इतिवत्कृत्स्नजगदन्तर्यामित्वात्तवात्मा स इत्यर्थः, तस्मात् त्वंशब्दतदर्थेतद्द्वयस्तत्पर्यन्ता इति तत्त्वमसीत्यस्यार्थ इत्याह "एवंभूते"ति, एवंभूतशब्देन तत्पदस्य प्रकृतपरामर्शित्वं सूचितम्। अस्याः सद्विद्यायास्सविशेषवस्तुन्येव षड्विधतात्पर्यलिङ्गं विद्यते, उपक्रमे तावत् उत तमादेशमप्राक्ष्य इत्यत्रादेशशब्देन प्रशासिताऽभिधीयते अत्र श्लोकावाचार्यपादैरुक्तौ "छान्दोग्ये केचिदाहुर्दिशतिरुत तमादेशमप्राक्ष्य इत्यत्राङ् पूर्वस्सूपदेशं प्रकटयति ततो न प्रशास्तिं घञन्तः। नो कर्तर्यस्ति कर्मण्ययमपि घञिह तत्कर्तृशास्तौ न कर्म स्यात्स्यात्कर्मोपदेशे तदिदमुत तमादेशवाचोपदेश्यम्। अत्र ब्रूमः प्रशास्तिं वदति दिशिरसावाङ्मुखो नोपदेशं शास्तौ सोऽतिप्रसिद्धो न हि पर इह चापेक्षितार्थप्रसङ्गः। युक्तोऽसाधारणोक्त्या घञपि करणेऽप्यत्र वैवक्षिकत्वं शाब्दोक्तं कारकाणां ननु करणतया कर्तरि स्याद्धि वेदे"ति आदेशशब्देनोपदेश्यमुच्यते प्रकृत्यर्थ उपदेशः प्रत्ययार्थः कर्मत्वम् 'अकर्तरि च कारके संज्ञाया'मिति कर्तृव्यतिरिक्तकारके घञो विहितत्वादुपदेशे ब्रह्मणः कर्मत्वोपपत्तेश्च, प्रशासने तु ब्रह्म न कर्म अपि तु कर्तृ कर्तृव्यतिरिक्तकारके हि घञ्प्रत्ययविधिः। नात्र कर्तरि कप्रत्यय उपपद्यते "क्ङिति चे"ति गुणप्रतिषेधादादेशशब्दे रूपासिद्धेः, नापि पचाद्यच्प्रत्य-

---

१ नैतेन शाङ्करमतप्रवेशः शङ्कनीयः, निजमते भगवतः सर्वाधारत्वेन सर्वनियामकत्वेन चिदचिदन्तर्यामित्वेन च विश्वव्यवहारनिर्वाहकतया भगवत्संकल्पायत्तसत्ताकतया आत्मात्मकरूपे जगज्जातेरङ्गीकृतत्वात्। भगवत्संकल्पानायत्तसत्ताकत्वरूपाया जगतः स्वनिष्ठत्वेन प्रतीतेश्च भ्रमत्वाभ्युपगमात्। ब्रह्मपृथक्सिद्धत्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वस्य च टीकाकारैरनभिमतत्वम्। इदं पुनरिहावधेयं विशिष्टाद्वैतमते चिदचिद्विशेषणयोः पृथक्तत्त्वरूपत्वेऽप्येकः स्वसङ्कल्पायत्तानन्तसर्वसमृद्धिः, चिदचित्तत्त्वयोस्तु न तथाभावः किन्तु भगवदिच्छाधीनस्वस्थितिसत्ताकत्वमित्यनयोरन्तरम्, तमेव च तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति इत्यादिश्रुतिशतेन बोध्यते न तु ब्रह्मवदनादिरक्षकत्वशून्यत्वं तयोरप्यकल्पितत्वेन तथा वस्तुमत्यवस्थत्वादिति प्रामाणिकाः।

य उपपद्यते दिशिधातोरिगुपधत्वेन "इगुपधात्कः" इत्यपवाददसूत्रेण कप्रत्ययप्राप्तेर्गुणाभावादतो घञ्प्रत्ययान्त एवायमादेशशब्दः, स च प्रत्ययः कर्तर्यविहित इति कर्मार्थत्वस्यैव युक्तत्वादुपदेश्यमेवादेशशब्दवाच्यमिति अत्रोच्यते प्रकृत्यर्थः शासनं प्रसिद्धिप्राचुर्यात् अन्यथा स्वारस्यभङ्गात् आङ्पूर्वाद्दिशतेर्नियोक्तृप्रयोजनवचनः, उपपूर्वस्तु नियोज्यप्रयोजनवचन इति हि न्यासकारः, नियोक्तरि प्रयोजनं यस्य तस्यार्थस्य वाचक इत्यर्थः, एवमन्यत्रापि। किंच उपदेश्यत्वं लौकिकालौकिककर्मब्रह्मभागार्थसाधारणं, शासितृत्वं तु ब्रह्मणोऽसाधारणम् "अन्तःप्रविष्टः शास्ता जनानाम्" "एतस्य वाऽक्षरस्य प्रशासने गार्गि" इत्यादिभिर्निरुपाधिकप्रशासनस्य ब्रह्मासाधारणत्वावगमात् निरुपाधिकोपदेश्यत्वं ब्रह्मणोऽसाधारणमिति चेन्न इष्टप्राप्त्यनिष्टनिवृत्तितत्साधनेषु साधारण्यात्। यद्यप्यपरिमितसुखप्राप्तिदुःखनिवृत्त्यादि साक्षादुपदेश्यं स्यात्तथापि संसारनिवृत्तिब्रह्मतदुपासनानामुपदेश्यत्वं साधारणं प्रष्टव्यस्योपदेश्यत्वमर्थसिद्धम् अत उपदेश्यत्वकथनवैयर्थ्यं च

ननु येनाश्रुतं श्रुतमित्यनेनैकवाक्यात्स्वज्ञानेनान्यज्ञानहेतुना विशेषितमुपदेश्यत्वम् असाधारणमिति चेत्तथाप्येतादृशमुपदेश्यत्वं प्रतिज्ञावाक्येन प्रष्टव्यत्वोक्त्या वार्थसिद्धमित्यनपेक्षितोपदेश्यत्वकथनादप्यपेक्षितं प्रशासितृत्वमेव वाच्यमिति युक्तं येनाश्रुतमित्युपादानत्वे सिद्धे प्रशासितृत्वेन हि निमित्तत्वं सिध्यत्, निमित्तान्तरे सति एकविज्ञानात्सर्वविज्ञानं नोपपद्यते अतः प्रतिपिपादयिषितवस्तुनोऽपेक्षितासाधारणाकारविशिष्टतयैव प्रतिपादनमुचितं घञ्प्रत्ययस्य तु करणेऽपि व्युत्पन्नत्वाद्विवक्षातः कारकाणां प्रवृत्तिरिति शाब्दोक्तन्यायेन कर्तर्येव करणान्तरनैरपेक्ष्येण साधकतमत्वविवक्षया तथा प्रयोग उपपद्यते अकर्त्तरीति सूत्रस्य प्रयोजनं करणत्वविवक्षया विना कर्त्तर्यसाधुत्वेन प्रयोगनिवृत्तिः। उपदेशपक्षे प्रकृत्यर्थास्वारस्यं प्रत्ययस्वारस्यं च, प्रशासनपक्षे तु प्रत्ययास्वारस्यं प्रधानभूतप्रकृत्यर्थस्वारस्यमर्थौचित्यं चेति वैषम्यम्, अतः प्रशासितैवादेशशब्दाभिधेय इति स्वीकर्तुं युक्तम्। एवमुपक्रमे निरुपाधिकप्रशासनगुणयोग उक्तः, तथा जगदुपादानत्वं निमित्तत्वम्, तदनुगुणसार्वज्ञ्यं, सर्वशक्तित्वं चावगतमुपसंहारे च तत्त्वमसीति

सामानाधिकरण्येन जीवान्तर्यामित्वं नाम गुणविशेष उक्तः, अस्यैवार्थस्य बहुश आवर्तितत्वादभ्यासोऽप्यस्ति, एवं ब्रह्मणो जगत्कारणत्वजगदन्तरात्मत्वादिगुणानां प्रमाणान्तराप्रतिपन्नत्वादपूर्वता सिद्धा । एवमुपासकस्य "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्यत इति शरीरपातानन्तरं मोक्षश्रवणात्फलमपि विद्यते पितुः पुत्रं प्रति प्रतिवचनरूपत्वादर्थवादश्च लब्धः, मृत्पिण्डादिदृष्टान्तोपपादनादुपपत्तिश्चेति अस्मिन् दृष्टान्तत्रयेऽपि विवर्तपक्षानुगुण एकोपि दृष्टान्तो न दृश्यते अपि तु परिणामपक्षानुगुण एव दृश्यते, दार्ष्टान्तिकविषयवाक्येऽपि "तत्तेजोऽसृजतेत्युक्तं न तु तदभ्रमदिति अतोऽस्यां श्रुतौ विवर्तपक्षप्रसङ्गोऽपि नास्ति, श्रुत्यन्तरेषु च तदात्मानं स्वयमकुरुतेत्यादिकं श्रूयते न तु व्यवर्ततेति, सूत्रं च "परिणामादि"ति, न तु विवर्तादिति स्मृतिषु च "कटकमुकुटकर्णिकादिभेदैः कनकमभेदमपीष्यते यथैकं ज्ञितितलपरिणामतोऽनिलान्ते" इत्यादिषु परिणामपक्षानुगुण्यं दृश्यते अतः श्रुतिस्मृतिसूत्रस्वारस्यात् परिणामपक्ष एव दृश्यन्ते अतः श्रुतिस्मृतिसूत्रस्वारस्यात् परिणाम एवाभ्युपगन्तव्यः स च परिणामस्सद्वारक एव भवितुमर्हति निर्विकारत्वनिर्दोषत्वानुप्रवेशशरीरशरीरिभावादिविषयानेकश्रुतिस्वारस्यादन्यथा तद्विरोधप्रसङ्गाच्चेति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं किं कथं तदुपपादनमित्याशङ्कायामेतद्विस्तरो वेदार्थसङ्ग्रह इत्याह,—

मू० प्रपञ्चितश्चायमर्थो वेदार्थसङ्ग्रहे अत्राप्यारम्भणाधिकरणे निपुणतरमुपपादयिष्यते "अथ परा यया तदक्षरमधिगम्यत" इत्यत्रापि प्राकृतान् हेयगुणान् प्रतिषिद्ध्य नित्यत्वविभुत्वसूक्ष्मत्वसर्वगतत्वाव्ययत्वभूतयोनित्वसर्वज्ञत्वादिकल्याणगणयोगः परस्य ब्रह्मणः प्रतिपादितः

१ मकुटपदं द्राविडाः प्रयुञ्जते ।

टी० "प्रपञ्चित" इति, अत्रापि तिरोधानार्थः कथं ज्ञास्यत इत्यत्राह, "अत्रापी"ति, निपुणतरं-तस्याधिकरणस्यैतदर्थैकविषयत्वादिति भावः । अनन्तरोदाहृतायाः परविद्यायाः सविशेषपरत्वमाह "अथ परेत्यादि"ना-अपाणिपादमित्यन्तानां पदानां विषयमाह, "प्राकृतानिति" प्राकृताः-प्रकृतिसंबन्धिनः, अनेन पदेन क्वचित्सिद्धस्य हि क्वचिन्निषेधः इति निषेध्यानां क्वापि सिद्धिर्दर्शिता भवति। प्रकृतिगताः-प्रकृतिसंसर्गप्रयुक्ता जीवगता दोषाश्च प्राकृताः। अद्रेश्यमग्राह्यं प्रत्यक्षागोचरमनुमानाद्यगोचरम्। यद्वा चक्षुरगोचरमिदीन्द्रियान्तरागोचरम् अगोत्रमवर्णं प्राकृतनामरूपरहितम् अचक्षुःश्रोत्रं इन्द्रियाधीनज्ञानञ्च भवति अपाणिपादम् इन्द्रियाधीनचेष्टं न भवति "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः", इति श्रुतेः अनेन पदद्वयेन जीवगतहेयनिषेधः, इन्द्रियाधीनज्ञानत्वं तदधीनप्रवृत्तित्वमपि हि जीवधर्मः सर्वगतं सुसूक्ष्ममिति पाठक्रमः, तथाऽप्यर्थक्रमेण व्याख्यातं "सूक्ष्मत्वसर्वगतत्वे"ति, सूक्ष्मतया हि व्याप्तिः, नित्यत्वेन कालापरिच्छेदः प्रभुत्वाचिदचिन्नियन्तृत्वं जगच्छरीरकत्वं फलितमनेन वस्त्वपरिच्छेदसिद्धिः, सर्वगतत्वेन देशापरिच्छेदः, अव्ययत्वं व्ययशब्दोपलक्षितदोषविरोधित्वं नामगुण इत्यभिप्रायेण कल्याणगुणैः सह तन्निर्देशः। यद्वा अव्ययत्वमेकरूपत्वं पूर्णत्वं वा भूतयोनित्वं-जगत्कारणत्वम् एतत्प्रकारणस्थेन "यस्सर्वज्ञस्सर्ववि"दित्यनेन वाक्येन सार्वज्ञ्यमुक्तं सर्वज्ञस्सर्ववित् सर्वं स्वरूपतो वेत्ति सर्वप्रकारतश्च वेत्तीत्यर्थः, परस्य ब्रह्मण इत्यस्य पूर्ववदर्थः। अथ शोधकवाक्येषु सत्यज्ञानादिवाक्यस्याखण्डार्थत्वचिरस्यति-

सू० सत्यं ज्ञानमानन्तं ब्रह्मेत्यत्रापि सामानाधिकरण्यस्यानेकविशेषणविशिष्टैकार्थाभिधानव्युत्पत्त्या न निर्विशेषवस्तुसिद्धिः ॥

(शेषमग्रे)

॥ श्रीः ॥

श्रीमद्रामानुजाचार्यप्रणीत इति प्रसिद्धो

वेदान्ततत्त्वसारः ॥

श्रीमते रामानुजाय नमः ॥

(Continued from page 195. Vol. IX.*)*

ननु मिथ्याभुतस्य मिथ्यात्वेन दर्शनं न सम्यग्ज्ञानविरोधीति चेत्, यदीश्वरो मिथ्यात्वेनेव स्वव्यतिरिक्तं जानाति न तर्हि तन्निग्रहानुग्रहादिषु प्रवर्तेत, नह्यनुन्मत्तः कोपि मिथ्यात्वेन ज्ञातानुद्दिश्य किमपि करोति । किञ्चेश्वरस्य यावद्विशेषविरोधिब्रह्मस्वरूपावभासे ब्रह्मविवर्त्तभूतं द्वैतदर्शनं मिथ्यात्वेनापि न सम्भवति न हि

But if it be said that the perception (by Ísvara) of that which is unreal as unreal is not opposed to (the existence of) right knowledge (38), we reply, if Ísvara (39) knows what is distinct from himself to be unreal, then he cannot engage in the acts of favouring (the good), repressing (the wicked), etc.; for nobody who is not crazy performs any action with reference to (persons) known (by him) to be unreal. Moreover, seeing that in the case of Ísvara there is a manifestation of the essence of Brahma, which is the opposite of all variety,

38. If Ísvara perceives what is unreal as real, then he cannot be omniscient; but if he perceives what is unreal *as unreal*, then his being Ísvara is not invalidated. Just as a traveller in a sandy desert while seeing the water of the mirage, feels assured of the non-existence of water (i. e. that his perception is false), in the same way Ísvara, also, cognising the whole world as false is not involved in ignorance.

39. As we have seen, the Śānkaras hold that the supreme Brahma is not differenced in any way. The word Ísvara is applied by them to the Māyā—modified, differenced Brahma who engages in the creation, etc., of the world. The Rāmānujas, on the other hand, regard Brahma as always differenced by qualities, etc., and with them Ísvara is but another name for Brahma.

शुक्तितया शुक्तौ भासमानायां तत्र रजतावभासोपपत्तिः । तथानभ्युपगमे "स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद् यः" "तेषामेवानुकम्पार्थ"मित्यादिश्रुतिस्मृतिविरोधः । किञ्च यथा चन्द्रैकत्वे ज्ञायमानेपि द्विचन्द्रदर्शनमविद्येव दोषमन्तरेण न स्यात्, तथेश्वरस्य मिथ्यात्वेनापि द्वैतदर्शनमविद्येव दोषं विना च न सम्भवति । दोषाभ्युपगमे तु "शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तते

the perception of duality (40), which is an illusory modification of Brahma, (41) cannot exist even as unreal, (42) for when the mother-of-pearl shell appears as a mother-of pearl shell, there is no possibility of the manifestation of silver therein. If you do not admit this to be so (viz, that there cannot be a perception of duality as false in the case of Iśvara), then your position contradicts the following texts of the Śruti and Smṛiti—"He is (43) omnific, omniscient, self-caused (self-existent), who knows, is the author of time, endowed with good

---

40. *I. e.* the perception of difference of substance—the cognition that the world exists apart from Brahma.

41. Another reading is "Brahmavivartabhūtendriyadvaitadarśanam"—"perception of duality by means of an organ which is an illusory modification of Brahma."

42. Íśvara, says the Śankara, perceives duality, but perceives it as false.

43. Śvetāśvatara Upanishad vi. 16. Instead of kālakāla (which seems to be the reading everywhere in Rāmānuja works), the printed Upanishad reading is kālakāra, which agrees with Śankara's explanation—kālasya kartā. According to the translation adopted in the text, kālakāla has practically the same meaning, the second kāla being equivalent to prerayitā, pravartaka, from kālayati, to instigate. Or according to another meaning of the same root kālakāla may mean the 'Calculator of time.' Or perhaps the sense simply is, 'the time of time,' that is, the Lord of time. The Vedānta Syamantaka, in expounding this passage says "Time is not the Lord of the Supreme Spirit, as it is of other things, but the Supreme Spirit is the Lord of time."

Digitized by Google

मैत्रेय भगवच्छब्दः सर्वकारणकारणे", "समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्", "परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेश" इत्यादिनित्यनिर्दोषप्रतिपादकशास्त्रविरोधः । तस्माद्यथा तिमिरादिदोषरहितस्य द्विचन्द्रदर्शनं मिथ्यात्वेनापि न सम्भवति तथा समस्तहेयप्रत्यनीकस्येश्वरस्यापि मिथ्यात्वेनापि द्वैतदर्शनं न सम्भवति । किन्तु नीलपृष्ठाद्याकारेणानुभूयमानायां शुक्तौ मिथ्यात्वे-

qualities, all-wise," "To (44) show compassion on them only (I, abiding in the essence of the self, destroy, with the bright lamp of knowledge, the darkness sprung from ignorance)." Moreover, as the perception of two suns, though it is known that there is only one sun, is pure nescience (error), not without fault (as its cause); so Iśvara's perception of duality even as false would be nothing but nescience, and could not arise without fault. But if you should allow the existence of fault (in the case of Iśvara), then such an admission would be in conflict with the following sacred authorities, which describe an eternally faultless being—(45) "The word Bhagavat, O Maitreya, is applied to the pure supreme Brahma, who is called Mahāvibhūti, the cause of all causes," (46) "(He who is) called Vishṇu is the highest refuge, devoid of all imperfection," "The (47) highest of the high ones (gods), who is free from all distress, etc., the Lord of the higher (gods) and the lower (men)." Therefore as the perception of two moons even as unreal, is not possible in the case of one who is free from the defect of timira, etc., so the perception of duality even as unreal is not possible in the case of Iśvara likewise, seeing that He is the opposite of all imperfection (48)

44. Bhagavadgītā X. II. The recipients of compassion are those only who are devoted to Krishna.

45. Vishṇu Purāṇa VI. 5. 59.

46. Vishṇu Purāṇa.

47. Vishṇu Purāṇa VI. 5. 70.

48. The word heya, 'what is to be abandoned,' denotes here and elsewhere in the Rāmānuja darśana whatever is defective and the

नापि न रजतप्रतीतिः । तदुपादानाद्यर्थं प्रवृत्तिश्चानुन्मत्तानां यदि दृश्येत तदेश्वरस्यापि सर्वदाऽपरोक्षेणाद्वयानन्दात्मसाक्षात्कारे मि-थ्यात्वेन द्वैतदर्शनं तन्मूलोपदेशादिव्यवहाराश्चोपपद्येरन् । किंच रज्जौ सर्पवन्निर्विशेषज्ञानमात्रे ब्रह्मण्यारोपितस्य प्रपञ्चस्य को द्रष्टा । "नाऽन्योऽतोऽस्ति द्रष्टे"ति श्रुतेर्ब्रह्मैव द्रष्टेति चेत्, ज्ञानमात्रस्वरू-पस्य कथं द्रष्टृत्वं कथं वा ज्ञानमन्तरेण भ्रमभूतस्य प्रपञ्चस्य

Moreover, (49) when the pearl-oyster shell is perceived under the aspect of a dark-coloured exterior, etc., there exists no cognition of silver even as unreal. And if it were observed that men in their sober senses exerted themselves for the purpose of acquiring such (silver) etc., then in the case of Īsvara, also, the perception of duality even as unreal, and the usages of instruction, etc, based on that perception, would be fitting, notwithstanding his (50) immediate cognition of the secondless bliss-spirit, Brahma, which (immediate cognition) exists always and by intuition.

Moreover, who is the percipient of the manifested universe, which is imagined in Brahma, who is undifferenced knowledge only, as the snake (is imagined) in the robe? If you say that Brahma alone is the percipient, according to the passage of the

opposite of good, and specially the faults and imperfections that attend the jīvātmā in the state of bondage, and from which it is dissociated when emancipated. From these Īśvara is ever free. It is to be borne in mind that heya resides in Prakṛiti, and not in the jivātmā, and is only connected with the latter through the antaḥkaraṇa, which is really connected with the jīvātmā, not illusorily as in the Śānkara system.

49. That is when the shell is closed, or seen so lying that the outer part only is exposed to view, and not the internal, iridescent, silvery layer called mother-of-pearl, or nacre.

50. The Śānkaras hold that Īśvara, although engaging in the work of the universe, is not bound, and is omniscient, etc. Hence, as omniscient, he must have an 'immediate cognition of Brahma,' or a 'manifestation of the essence of Brahma.'

द्रष्टा । मायायोगेनेति चेत्, किमयं योग [अथवा सम्बन्ध] आगन्तुक उत स्वाभाविकः । आगन्तुके तु विभुत्वं ब्रह्मणो न स्यात् । स्वाभाविकश्चेत्, आद्येऽपि मायाशबलमेव ब्रह्म, अतश्च सर्वदा विशिष्टमेवेति सिद्धम्, एवं च सति कथं विजातीयभेदशून्यम् । किंच मायाशबलत्वेऽप्याद्ये प्रपञ्चाप्रतीतेः किं कारणम् । ईक्षणाभावादप्रतीतिरिति चेत्, तदभावे किं कारणम् । इच्छैवेति चेत्, किमये-

Śruti (51) "There is no other percipient than this," How can that whose essence is knowledge only be a percipient, or how can there be a percipient of the universe, which is constituted of error (illusion), without knowledge (as a quality of the percipient)? If you say that (Brahma is the percipient) by means of union with Māyā, then, we ask, is this union [or (52) connection] adventitious or essential? If you hold it to be adventitious, then Brahma cannot be (53) all-pervasive; and if it is essential, then it is established that even in the beginning Brahma is truly modified by Māyā, and hence that he is always differenced; and this being the case, how is he devoid of the difference inherent in another (54) class? Moreover (55) what is the cause of the non-cognition of the universe notwithstanding that Brahma is modified by Māyā? If you say that non-cognition is owing to

51. Bṛihad Áraṇyaka Upanishad III. 8. 11. Though the Śānkaras usually quote the passage as given in the text, the Upanishad reading is 'Nānyadato'sti drashṭṛi.'

52. This seems to have crept in from the margin.

53. If the connection with Māyā is adventitious, then Brahma is not all-pervasive; otherw se why should he not, diffused everywhere, be always in union with Māyā?

54. See note 2, p. 1.

55. If the connection between Brahma and Māyā is essential, then there must be a cognition of the manifested universe at the very beginning, (i. e. even before each creation, and during each pralaya). I. e. you hold that before the creation Brahma is undifferenced, which cannot be the case if the connection with Māyā is essential.

Digitized by Google

ऽपीच्छावद्ब्रह्म तर्हि सर्वदा सविशेषमेवेति सिद्धम् । किञ्चाङ्गीकरणा-त्पूर्वं कमाश्रिता माया । ब्रह्माश्रितेति चेत्, सर्वदा वैशिष्ट्यप्रसङ्गोऽद्वैतहानिश्च । ननु मायाया अपरमार्थत्वान्नोक्तदोषप्रसङ्ग इति चेत्, अपरमार्थशब्देन किं विवक्षितम्, रज्जुसर्पवन्मिथ्यात्वम्, अथवा विकारावच्छिन्नत्वेन ब्रह्मसमानसत्ताभाववत्त्वम् । न चाद्यः, "अज्ञानन्तु त्रिगुणात्मकं ज्ञानविरोधि भावरूपमि"ति स्वसम्प्रदायवा

the absence of (56) vision, we ask what is the cause of the absence of that? If you say the will (of Brahma) alone, we ask, was Brahma even in the beginning endowed with will? If so, then it is established that he was always differenced. Moreover, prior to the appropriation (by Brahma), who was the substratum of Māyā? If you say that Brahma was the substratum, then it follows that he is always differenced, and there is an end to non-duality.

But if it be said that Māyā being unreal the fault just referred to does not attach (to Brahma), we ask what is intended by the word 'unreal'? Falsity like that of the snake (imagined) in (57) the rope? Or, as (Māyā) is characterised by modification, the not being possessed of an existence like that of Brahma (58)?

---

56. The act of seeing referred to in such passages as Chhāndogya Upanishad VI. 2. 3, 4. as being the first step in the work of creation. This Īkshaṇa is interpreted to import sankalpa (the resolve to create) in the darśanas generally.

57. The Śānkaras agree with the Rāmānujas in holding that Māyā, constituted of the three qualities, is modified in the form of the ether etc.; i. e. in practical life they acknowledge modification (pariṇāma); but they further affirm that according to the real condition of things this is only illusory modification (vivarta).

58. Literally "the being that which is possessed of the negation of an existence like that of Brahma." Another reading is 'Brahmasamānasattākābhāvatvam.' Perhaps the original reading was 'Brahmasamānasattākatvābhāvaḥ,' or 'Brahmasamānasattābhāvaḥ.'

चनविरोधः । अथ "मयाध्यक्षेण प्रकृतिः सूयते सचराचरमि"त्युक्तया कार्योत्पत्तिः कारणाभावे न स्यात्, असतः परोत्पत्त्यनुकूलशक्तिमत्त्वरूपकारणत्वासम्भवात् । ननु कार्यस्याप्यसत्त्वे नैष दोषः स्वाप्नशिरश्छेदनकार्यं प्रति स्वाप्नचोरस्य कारणत्वं दृश्यत इति चेन्न "वैधर्म्याच्च न स्वप्नादिव"दि"ति सूत्रे स्वप्नजाग्रतोर्वैधर्म्याज्जाग्रत्प्रत्ययानां स्वप्नप्रत्ययसादृश्यप्रतिषेधात्, तथा "सत्त्वाच्चावरस्ये"तिसूत्रे यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति तथा कार्यमपि जगत्त्रिषु कालेषु सत्त्वं न व्यभिचरतीति कार्यस्य सत्यत्वप्रतिपादनात्,

The first alternative is not (admissible), for it is in conflict with the declaration of your own system,—"(59) Now ignorance —is constituted of the three qualities, adverse to knowledge, having the form of an entity."

Moreover, the production of effects (which is sanctioned) by the words—"Through (60) me, the supervisor, Nature gives birth to the animate and inanimate (world"—would not take place, there (61) being a non-existence of cause; (62) for it is impossible that what is non-existent should be a cause in the form of that which is endowed with a capacity conducive to the production of something else.

---

59. Śaṅkara Vedāntasāra, page 5, Calcutta printed edition.

60. Bhagavadgītā IX. 10.

61. In both systems Māyā is the material cause of the universe; but while to the Śaṅkara she is only illusorily a material cause, to the Rāmānuja she is, as identified with Prakṛiti, a real material cause, and her effects are also real. It may be said that there is no difference as to the identity of Māyā with Prakṛti in the two systems; only the Rāmānujas hold that Māyā, or Prakṛiti, is real, and the Śaṅkaras that she and her product, the unmanifested and manifested universe, are false.

62. Literally "It is impossible that the non-existent should possess causality in the form of the being endowed with a capacity conducive to the production of something distinct (from itself)."

अन्यथा "ऽसत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरमि' त्यासुरसिद्धान्तप्रस-ङ्गात्, "गौरनाद्यन्तवती सा जनयित्री भूतभाविनी", "विकारजननी मज्ञामष्टरूपामजां ध्रुवाम्", "अस्मान्मायी सृजते विश्वमेतत्", "अजामेकां", "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, यस्याऽवयवभूतैस्तु व्याप्तं सर्वमिदं जगत्", "अक्षरात्परत: पर:" "मम योनिर्महद्ब्रह्म", "मम माया दुरत्यया", "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी"त्यादिश्रुतिस्मृतिविरोधाच्च, न हि मिथ्याभूतं वस्त्वक्षरत्वध्रुवत्वादिभि: परवाक्यैरुपदिश्यते । द्वितीयस्तु पक्ष: प्रकृते-

But if you say that since the effect is purely non-existent this is not a fault—a thief seen in a dream is perceived to be the cause in relation to the effect consisting of the cutting—off of a head seen in a (63) dream—we say no, since in the Sūtra—(64) "Because of difference of characteristics, (the waking state is) not like sleep, etc."—because of the different nature of waking and sleeping—it is denied that the cognitions of the waking state are like the cognitions of the state of sleep; and also since in the Sūtra—"And (65) because of the existence of what is posterior"—the (66) effect is affirmed to be real, according to the dictum—"and (67) as the cause, Brahma, does not forego (is inseparably connected with) existence during the three times (past, present, and future), so the effect, the world, also does not forego existence

63. In the dream all appears real, though false; so this illusory world appears real, but is purely fictitious; and since it is fictitious, it cannot be said that the non-existence of the cause Māyā is a fault.

64. Brahma Sūtras II. 2. 29.

65. Do. do. 1. 16. Instead of 'aparasya' 'avarasya' is the reading found in the printed text of the Sūtras, but the former seems to be the only reading in Rāmānuja works.

66. The Rāmānuja here argues if the effect—the manifested universe—is real, then the cause Māyā (i. e. Prakṛiti) must be real also.

67. A quotation from Śankara's commentary on this Sūtra, and a shaft drawn from the enemy's quiver.

ब्रह्मसमानसत्ताकाभावाभ्युपगमात्, "विकारजननीमज्ञाम्", "नित्यां सततविक्रियामि"त्यादिभिरस्याः सविकारत्वेन सततपरिणामत्वेन चैकरूपाभावान्न ब्रह्मसमानसत्ताकत्वम् । अत एवेयमनृतादिपदैरुपवर्ण्यते तत्कार्यस्याप्यनित्यत्वेनाविर्भावतिरोभावधर्मकत्वसाम्यात्स्वप्नप्रपञ्चमृगतृष्णातोयादिवदसन्मिथ्यादिपदैरुपचारतो व्यपदिश्यन्ते वैराग्यजननार्थम् । यत्त्वोपलभ्यमानत्वविनाशित्वाभ्यां सदसदनिर्वचनीयत्वेन कार्य्यस्य मृषात्वमिति तदसत्, उपलब्धिविनाशयोगो हि न

during the three times"—for otherwise the doctrine of demon—like men would accrue,—"They (68) declare the world to be without reality, without basis, without a divine ruler"; and the following passages of the Śruti and Śmṛiti would be contradicted (by the theory of the falsity of mundane effects),—"Nature is without beginning and without end, she is the genetrix, who causes beings to be," "The genetrix of change, the unconscious, the eightfold, (69) the unborn, the enduring," "Out (70) of this the Māyā-associated One creates all this universe," "(Māyā (71) who is) unborn, and one," "(72) Let him know Māyā to be Nature, but the Māyā—associated One to be the great Lord, by whose parts all this world is pervaded" "(The (73) Supreme Spirit is) higher than the imperishable, high One," "My (74) great Brahma is the source (whence proceeds the birth of all things)," "My (75) Māyā is hard to over pass," "Know (76) Nature and Spirit to be both of them begin-

68. Bhagavadgītā XVI. 8.
69. See Bhagavadgitā VII. 4.
70. Śvetāśvatara Upanishad IV. 9.
71. Do. IV. 5.
72. Do. do. 10.
73. Muṇḍaka Upanishad II. 1. 2.
74. Bhagavadgītā XIV. 3.
75. Do. VII. 14. Quoted in proof of the reality of Nature.
76. Do. XIII. 19.

Digitized by Google

मिथ्यात्वं साधयति किंत्वनित्यत्वम् । यद्देशकालसम्बन्धितयोपलभ्यते नोपलभ्यते च तदनित्यत्वं प्रबलवाक्यैः, "अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते तत्तु नास्ति न सन्देहो नाशिद्रव्योपपादितम्", "यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै परिणामादिसम्भूतां तद्वस्तु

ningless"; for it is not an unreal thing which (these) higher (77) texts describe as being 'imperishable,' 'enduring,' etc.

But the second alternative (is not opposed to our view) for (we) acknowledge that Nature is not possessed of an existence like that of Brahma—because she is not uniform, as shown by her changefulness and continual modification, she is not possessed of an existence like that of Brahma, according to the words "(Nature) the genetrix of change, the unconscious," "The eternal subject to continual change." Hence for the purpose of generating (78) dispassion, 'false' and other like terms are metaphorically applied to her, and her effects are also, like the world of sleep, the water of the mirage, etc., metaphorically described by the words 'non-existent,' 'unreal,' etc.; inasmuch as they resemble (these illusory objects) in being endowed with the properties of appearance and disappearance. (79) That which (you assert) viz, that an effect is false since, on account of its being (first) perceived and (afterwards) destroyed (as to form), it cannot be described either

77. So called because, in contrast to those texts which set forth things in a secondary sense, these higher texts declare the higher transcendental truth of things.

78. I. e. Nature is so described by the Śruti in order that those whose knowledge is imperfect may attain dispassion and freedom from worldly desires and appetites, for if they entertained the notion that the world was real, they would give their minds to worldly things only.

79. Because the effect is perceived, it cannot be said to be non-existent; and because it is destroyed as to form, it cannot be said to be existent—according to the Śânkara dictum 'âdâvante yannâsti vartamânepi tat tathâ'—'what does not exist in the beginning and end, that is such now also.'

Digitized by Google

नृप ! तत्त्व किम्", "अन्तवन्त इमे देहा", "अविनाशि तु तद्विद्धि" "आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः", "आगमापायिनोऽनित्याः", "अनित्यमसुखं लोकम्", एकादशे च "प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा, आद्यन्तवदसज्ज्ञात्वा निस्सङ्गो विचरेदिह", "त-

as existent or non-existent, is untrue, for (the effect's) connection with perception, and destruction (of form) does not prove that it is false, but rather that it is impermanent. What is (first) perceived and (afterwards) not perceived in relation with time and space, that is impermanent according to the cogent (80) texts "The (81) wise hold (the soul to be) imperishable and real, but that (the effect of works) is perishable, without doubt, being effected by means of the perishable substance," "But (82) what never at any other time obtains another name resulting from transformation, etc., that is real. and what is that O king?", "These bodies (83) (are said to) pass away," "But (84) know that (spiritual substance) to be imperishable." "(Enjoyments (85) produced by external objects) have beginning and end, the enlightened does not take pleasure in them, O Son of Kunti!", "(The (86) contacts of the senses with the outer world) come and go, being impermanent," "(This) transient (87) joyless world"; and in the eleventh Skandha of the Bhāgavata Purāṇa—"By sense-perception, by inference, by revelation, by cognition of the self, knowing (this

80. Cogent—setting forth in a clear and conclusive manner, as contrasted with other texts, the reality of things.

81. Vishṇu Purāṇa II. 14. 15.

82. Do. do. 13. 74.

83. Bhagavadgītā II. 18.

84. Do. do. 17.

85. Do. V. 22.

86. Do. II. 14.

87. Do. IX. 33.

ष्टैतदव्ययं नित्यं जगत्" । ते एव नित्यानित्ये "नासतो विद्यते भाव" इत्यत्र सत्त्वासत्त्वव्यपदेशहेतुः, अन्यथा पूर्व्वापरविरोधः प्रत्यक्षादिविरोधश्च । प्रत्यक्षं प्रपञ्चसद्भावग्राहकमिति सूत्रकारोऽप्याह "नाभाव उपलब्धेः" ।

(शेषमग्रे)

world) to have beginning and end, to be non-existent, let him live here without attachment (to worldlythings)" "This universe is undecaying, eternal." It is the same permanence and impermanence (of Spirit and Nature respectively) which cause them to be described as existent and non-existent in the śloka "There (88) is no being of the non-existent (there is no non-being of the existent)," (89) otherwise there would be a contradiction to the context, and also contradiction to perception by the senses. That (90) perception causes apprehension of the true being of the universe the author of the Sūtras has also declared "Because (91) of its perception (the world) is not non-existent".

J. J. Johnson.

(to be continued)

---

88. Do. II. 16. See Rāmānuja's Commentary on the Bhagavadgītā, *in loco*, on which this paragraph is largely based.

89. In the above Commentary Rāmānuja shows that the indestructibility and destructibility of spirit and body respectively, (not the reality of the one and the falsity of the other), are referred to in the passage immediately preceding the last quoted śloka, beginning with "Learned men do not grieve for the living or the dead," and in the subsequent ślokas "Know that to be imperishable," etc., "These bodies are said to pass away," etc.

90. There is perception by the senses of the external world of matter, which would also be contradicted; for the senses do not perceive what is wholly false in itself.

91. Brahma Sūtras II. 2. 28.

Digitized by Google

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या
विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page 232.* Vol. IX.)

अथ बाहुल्येन सृष्टिव्यपदेशाधिकरणम्।
इदमेव च भूमाधिकरणमुच्यते।

सू० भूमा ॥ १६ ॥

"सृष्टीरुपदधाती"ति सृष्टिशब्दो गुणविधिरर्थवाद इति संशयः। तत्राख्यातसंबन्धाद्विध्यन्तरशेषत्वाभावादर्थवत्त्वाच्च विधिः। सृष्टिलिङ्गा मन्त्रा उपधानार्थेन विधीयन्ते नैवं लिङ्गप्रकरणाभ्यामेव मन्त्राणां प्राप्तत्वान्न विधिः संभवति तथा सति परिसंख्या स्यात् बहुषु मन्त्रेषु प्रकरणप्राप्तेषु सृष्टिविधानादन्ये परिसंख्यायेरन्। सा च त्रिदोषा परिसंख्यातानां च मन्त्रान्तराणाम् आनर्थक्यं स्यात्। तस्मादुपधानमेव विधेयम्। सृष्टीरिति तु लिङ्गप्राप्तमन्त्रानुवादमात्रं यथा सृष्टमेवावरुन्द्धे इत्यस्यार्थवादस्योपपत्त्यर्थमिति भाष्याभिप्रायः। केचित्त्वयं मन्त्रविधिरेवेति समर्थयन्ते न ह्येकया स्तुवते इत्यादीनामुपधानैकान्तिकं लिङ्गमस्ति येन प्राप्तिः स्यात्। साधारणलिङ्गत्वाद्धि ग्रहणासादनादिष्वपि इष्टकानां प्राप्नुयुः, तत्रास्ति विधेरवकाशः सत्यामप्युपधानप्राप्तौ मध्यमचितिसंबन्धार्थमपि प्रत्यक्षविधानमर्थवद्भविष्यति। वक्ष्यति हि मध्यमायां तु वचनाद्ब्राह्मणवत्य इति, न चास्मिन्सूत्रेऽवश्यं सृष्टीनामविधानमादर्तव्यम्। गुणवृत्तिनिमित्तकथनमात्रपरत्वात्कः पुनरत्र गुणः? सृष्टिसमुदाये हि भूमाऽस्ति सृष्टसृष्टिसमुदाये हि सृष्टिभूमाऽस्ति सृष्टसृष्टिसमुदाये कया स्तुवतेत्यनुवाके सृष्टिभूमाऽस्तीत्यनेन सादृश्येन सृष्टिशब्दः।

अथ प्राणभृदादिशब्दानां
स्तुत्यर्थताऽधिकरणम्।

सू० लिङ्गसमवायात् ॥ १७ ॥

प्राणभृत उपदधातीत्यत्रापि पूर्ववदेव मन्त्रोपादानमर्थवादार्थं विध्यर्थं वेति वक्तव्यम्। निमित्तान्तरकथनार्थं तु सूत्रान्तरम्, तत्र हि भूम्ना शब्दप्रवृत्तिः, इह तल्लिङ्गवतामल्पत्वात्तत्समवायमात्रादेव शब्दप्रवृत्तिः। प्राणभृद्वृद्ये हि प्राणभृत्समवायोऽस्ति। प्राणभृदप्राणभृद्वयोऽपीत्यनेन सादृश्येन प्राणभृच्छब्दः। "तत्सिद्धिजातिसारूप्यप्रशंसालिङ्गभूमभिः। षड्भिः सर्वत्र शब्दानां गौणी वृत्तिःप्रकल्पिता"॥

अथ वाक्यशेषेण संदिग्धार्थनिरूपणाधिकरणम्।

सू॰ संधिग्धेषु वाक्यशेषात् ॥ १८ ॥

"अक्ताः शर्करा उपदधाति" "तेजो वै घृत"मित्यत्र संशयः। घृततैलवसानामन्यतममेवाञ्जनं कर्त्तव्यम्? उत घृतेनेत्रे? ति तदर्थं किं विध्युद्देशार्थवादयोर्विरोधोऽस्ति न वे? ति। स्तावकत्वेन प्रामाण्यमर्थवादस्योक्तमिह संदिग्धनिर्णयेऽपि क्वचित्प्रामाण्यं प्रतिपाद्यत इति सङ्गतिः। तत्राक्ता इति शब्देन येन केनचिदञ्जनम् प्रतीयते विधिश्चायं बलवानर्थवादतः। "प्राधान्यात्प्रक्रमस्थत्वादप्राप्तविषयत्वतः। तद्बाधाद् घृतशब्दोऽयं लक्षणार्थो भविष्यति"। प्रधानं विधिरङ्गं स्तुतिः। न चाङ्गेन प्रधानं बाधितुं शक्यम् उपक्रमस्थत्वाच्चासंजातविरोधो विधिर्निर्विघ्नमेव स्वार्थं बोधयन्नुपसंहारस्थं स्वविरुद्धमर्थवादं लक्षणां नयति। विधिश्चाप्राप्तविषयत्वाद्यथाश्रुत एव नेतव्यः। अर्थवादस्त्वनुवादत्वाल्लक्षणयाऽपि नीयमानो नातीव दुष्यति। विधेश्च यत्किंचिदञ्जनसाधनमपेक्षितमिति तेन बाधितो घृतशब्दोऽर्थवादस्थोऽञ्जनसमर्थद्रव्यमात्रलक्षणार्थो भविष्यति। तस्मात् येन केनचिदञ्जनमिति प्रसिद्धे ब्रूमः। "विधेर्यदि विरोधः स्याद्भवेदेवं न चास्त्यसौ। न हि सामान्यशब्दोऽयं विशेषेण विरुध्यते"। सामान्यं हि विधिना बोधितम्। तच्च सर्वविशेषेषु कृत्स्नमस्तीति न विशेषोपादाने तस्य बाधः। अवश्यं च यः कश्चिद्विशेष उपादातव्यो निर्विशेषसामान्येन व्यवहाराभावत्। तत्रासति विशेषप्रमाणे यः कश्चित् स्यात्। अस्ति त्वत्र घृतस्य प्रमाणमर्थवादः। स हि घृतं स्तुवत्तद्विधेयस्य स्तुत्ययोगाद्विधेयत्वं गमयति, तस्मात् घृतेनैवाञ्जनम्।

अथ सामर्थ्यानुसारेण अव्यवस्थितानां व्यवस्थाऽधिकरणम् ।

सू॰ अर्थाद्वा कल्पनैकदेशत्वात् ॥ १९ ॥

विधेरिदानीं प्रतिपादितप्रामाण्यस्य संदिग्धार्थनिर्णयेऽपि सामर्थ्यसनाथस्य प्रामाण्यं प्रतिपाद्यते । "स्रुवेणावद्यति स्वधितिनाऽवद्यति हस्तेनावद्यतीत्यवदानसाधनत्वेन स्रुवादीनि विहितानि । अवदानं च द्रवाणामाज्यादीनांसंहतानां च पुरोडाशादीनां मांसादीनां चास्ति । तत्र किमविशेषेण स्रुवादीनि भवेयुः,? यथासामर्थ्यं वेति तथाऽञ्जलिना सक्तून् प्रदाव्ये जुहुयादिति किं देवताप्रसादादिप्रार्थनायामिव हस्तसंयोगमात्रमञ्जलिहोमे यथासमार्थ्यं व्याकोश एव वा । तत्र विशेषाश्रवणाद्नियम इति प्रतिभायामुत्तरमुच्यते अशक्यार्थविध्यसंभवादवश्यं विधायकस्य शक्तिः सहकारिणीत्यङ्गीकर्त्तव्यं तस्माच्छक्तिसहायो विधिरेव यथासामर्थ्यं विधेयं व्यवस्थापयति द्रवादिषु स्रुवादीनां व्याकोशस्य च सक्तुषु अर्थापत्तिवशात्तस्माद् व्यवस्थेति व्यवस्थितम् । "नामार्थवादविधिमन्त्रयुतश्च वेदस्तद्वत्स्मृतेश्च चरितं च निरस्तदोषम् । धर्मप्रमाणमिह सिद्धमतः परं तद्भेदप्रकारविनियोगफलादिचिन्ता ॥

इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तश्चायं सपरिकरधर्मप्रमाणनिरूपणपरः प्रथमोऽध्यायः ॥

अथ द्वितीयाध्याय आरभ्यते ।

श्रीगणेशाय नमः ।

अपूर्वस्य आख्यातपदवाच्यत्वाधिकरणम् ।

सू॰ भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थोऽभिधीयते ॥ १ ॥

प्रथमेऽध्याये धर्मस्य प्रमाणं निरूपितं, प्रथमे पादे चोदनाया, अनन्तरं स्वर्थवादमन्त्रनामधेयस्मृत्याचाराणां, वाक्यशेषसामर्थ्ययोश्च संदिग्धा-

र्थनिर्णये प्रामाण्यमुक्तम्। एवं समस्तेनाध्यायेन धर्मप्रमाणनिरूपणात्कथंलक्षणको धर्म इत्ययमंशो निरूपितः[1], तद्विचारादेव तत्प्रमेयस्य ज्योतिष्टोमाष्टकादेर्धर्मत्वावधारणात्को ऽयं धर्म इत्ययमंशो विचारितो भवति। वेदादिप्रमेयो धर्म इत्येतावत्यवबोधिते ऽपि न कार्त्स्न्येन धर्मस्वरूपमवगतं भवति। भेदलक्षणेन त्वियन्ति धर्मस्वरूपाणीत्यवधारणाविवशेषस्वरूपावगतिसिद्धिः। अतो भेदलक्षणमपि को धर्म इत्यस्मिन्नंशे ऽन्तर्गतं भवति। कान्यस्य साधनानीति तु शेषलक्षणे विचारयिष्यते। सर्वे च भेदाभेदशेषशेष्या[2]दिप्रमाणबलेन निरूपणीयमिति प्रमाणलक्षणात्पश्चादारम्भः॥

ननु वेदार्थस्यैवेह भेदाभेदादि शास्त्रे चिन्त्यते तत्र तु वेदप्रामाण्यमेवो पयुज्यते, स्मृत्यादिप्रामाण्यस्य तु न तत्रोपयोगं पश्यामः, नैवम्। धर्मस्यैवेह भेदाभेदादिविचारः शास्त्रे चिन्त्यते श्रौतस्य स्मार्तस्य वा, न श्रौतस्यैव अष्टकादिष्वपि शब्दान्तरादिलक्षणस्य भेदस्य श्रुत्यादिलक्षणस्य च शेषशेषिभावस्य प्रयुक्त्यादेश्च तुल्यत्वात्। अपि चाहत्यैव शास्त्रे स्मृत्याचारगम्यधर्मविचारः प्रदेशेषु करिष्यते[3] द्रव्यार्जननियमः क्रत्वर्थः पुरुषार्थ इति, तथा प्रजापतिव्रतानि, तथा तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन्। अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन्। आचारादृह्यमाणेषु तथा स्यादित्यादिभिः। तस्माद्धर्म इत्येव शास्त्रविषयो न वेदार्थ इति, तथा च "दर्शितम्। "धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजन"मिति तथा चाथातो धर्मजिज्ञासा चोदनालक्षणो धर्म इति सूत्रं को धर्मः कथंलक्षण इत्यादि भाष्यं च न क्वचिदिकृतिरिव वेदार्थपरं व्याख्येयम्। अतोधर्मप्रमाणत्वेन स्मृत्यादिनिरूपणं नानुपयोगीति सिद्धम्। तत्र भेदपूर्वकत्वाच्छेषलक्षणादेः प्रथमं तावद्भेदलक्षणमारभ्यते शब्दान्तरादिभिः। तत्र शब्दान्तराभ्यासनामधेयगुणप्रकरणान्युत्पत्तिपरतां विधेर्बोधयन्ति[4]। उत्पन्नस्य चोत्पत्स्यन्त-

१ विचारित इति तु पुस्तकान्तरपाठो नातिशायकः।

२ भेदाभेदशेषशेषिभावादिप्रमाणबलेनेति पाठान्तरम्।

३ करिष्यते इति पुस्तकान्तरपाठस्तु युक्तोभाति।

४ बोधयन्ति सन्ति इति पुस्तकान्तरपाठो नातिशायकः।

Digitized by Google

राभा[1]द्वाक्यान्तरविहितात्कर्मणः स्ववाक्यविषयस्य भेदं बोधयन्ति । संख्या त्वेषामेवान्यतमेनोत्पत्तिपरत्वे विधेरवगते सत्यनेकोत्पत्तिपरतां विधेर्बोधयन्ती स्ववाक्यविधेयानामेव कर्मणां मिथोभेदमावहतीति वेदितव्यम् । तदिह धात्वर्थभावनापूर्वाणां त्रयाणामपि भेदः प्रतिपादयिष्यते । तत्रापूर्वस्याशब्दार्थत्वात् स्वरूपेण भेदनिरूपणाशक्तेर्भावनाभेदनानुनिष्पादी भेदस्तद्विदश्च करणीभूतधात्वर्थभेदद्वारेण वक्ष्यते । तच्च धात्वर्थस्य करणत्वे सति वक्तुं शक्यते नान्यथेति प्रस्तुतधात्वर्थभेदानु निष्पाद्यापूर्वभेदानुसारसिद्ध्यर्थमाद्यमधिकरणमुपोद्धातत्वेनाध्यायस्यारभ्यते । किमिहोदाहरणं "श्येनेनाभिचरन्यजेत" "चित्रया यजेत" "पशुकामः 'सोमेन' यजेत" हिरण्यमात्रेयाय ददाति हिरण्यं भार्यै समिधो यजति दर्शापर्विचेष्ट यद्दं संमार्ष्टि यज्ञेनमार्त्विज्यावृतं सन्तं निर्हरेदाग्नीध्रे जुहुयाद्धूशहोतारं चतुर्गृहीतेनाज्येन । यः कामयेत वीरो म आजायेतेति स चतुर्होतारं जुहुयादित्यादि यावत्किंचिददृष्टार्थं विधानं क्रत्वर्थं पुरुषार्थं काम्यं नैमित्तिकं वा द्रव्योपपदं वा नामोपपदं वा गुणोपपदं वा तत्सर्वमुदाहरणम् । केचित्त्वधिकारचोदना एवोदाहरन्ति । तासु च सर्वासु विरुद्धत्रिकद्वयापत्त्या नामैवोपपदम् । अतो नामोपपदान्येवोदाहरणमित्याहुः, तदयुक्तम् । तथाहि यद्यपि तावदधिकारचोदना एवोदाहरणं तथाऽपि न तासु सर्वासु नामैवोपपदम् । यदेव हि यौगिकवाक्यभेदतत्प्रख्यतद्व्यपदेशयुक्तं तदेव नामधेयम्, इतरत्त्वधिकारावगतमपि गुणार्थमेव । यथा "यः कामयते वीरो म आजायेतेति स चतुर्होतारं जुहुयादिति चतुर्होतृशब्दो मन्त्रवचनो न नामधेयं तथा यज्ञेनमार्त्विज्यावृन्तं सन्तं निर्हरेदाग्नीध्रे जुहुयाच्चतुर्गृहीतेनाज्येनेति नैमित्तिकाधिकारगतमाज्यपदं न नामधेयम् ॥

न च विरुद्धत्रिकद्वयापत्तिः । मत्वर्थलक्षणया विशिष्टविधानसंभवात् । वरं च लक्षणाऽप्रसिद्धार्थकल्पनातः, इतरथा हि सोमेन यजेतेत्यपि सोमपदं नामधेयं स्यात्, उत्पत्तिवाक्येपि गुणपक्षे लक्षणाऽस्तीत्यभ्यासाधिकरणे स्वयमेव निबन्धनकारेणोक्तं "यागविधानेनेत्यादिना । युक्तं चैतत् ।

1 उत्पन्नस्योत्पत्स्यये।गादिति पाठान्तरम् ।

तथाहि तत्राऽपि हि यद्यपि प्रथमपूर्वान्तरमप्रतिपन्नं तथाऽपि प्रत्ययेन तावत्तदेवाभिधीयते। तत्करणं च याग इति दोषसाम्याद्यागत्वं स्यात्। न चैवं [1]युक्तं। किंच "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" "वायव्यं श्वेतमालभ्येतेति अधिकारचोदनेयम्। अत्र चरुं श्वेतमिति द्रव्यगुणशब्दौ सौर्यादिपदं भावार्थे नियोगविषय इति निबन्धनकारः शब्दानुबन्धवादी मन्यते। तेन तदप्यत्रोदाहरणम्। भावार्थयुक्ता[2]र्थचोदनात्वाच्च। तथा हिरण्यं भार्यमित्यत्रस्यर्थत्वाद्विश्वजिदादिवदुदाहरणम् अत्र चरुश्वेतहिरण्यसौर्यशब्दा द्रव्यगुणवचना न नामधेयम्। अतो नामोपपादान्येवोदाहरणमित्ययुक्तमेतत्। भाष्यविरुद्धं च। भाष्यकारो हि भावार्थाधिकरणस्य प्रयोजनमभिदधानः सिद्धान्ते श्रुतद्रव्यापचारे प्रतिनिध्युपादानं प्रयोजनमाह, नामधेयत्वे हि कस्य प्रतिनिधिः स्यात्। न चावश्यमधिकारचोदना एवोदाहरणम् "सोमेन यजेत" "हिरण्यं ददाती"त्यादिष्वपि कुतोऽपूर्वमिति विचारसंभवात्। यद्यपि तेषु प्रधानापूर्वानुवादशङ्कायां न प्रथमपूर्वान्तरं प्रतीयते तथाऽपि पश्चादपि तावत्प्रतीयमानं किं विषयं प्रत्येतुं न्याय्यमिति संभवति चिन्ता।

(शेषमग्रे)

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः।

(*Continued from page* 184. Vol. IX.)

मू० ॥ रागव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
रागव्यक्तौ रागताकारणेन
तस्मादात्मा सर्वभूतस्य एकः ॥ ७३ ॥

टी० ॥ इच्छा रागशब्दार्थः ॥ ७३ ॥

१ न चैवमिष्टम् इति पुस्तकान्तरपाठः।

२ भावार्थयुक्ताधिकारचोदनात्वादिति पाठान्तरम्।

मू० ॥ द्वेषव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ॥
द्वेषव्यक्तिर्द्वेषताकारणेन
तस्मादात्मा सर्वभूतस्य एकः ॥ ७४ ॥

टी० ॥ द्वेषशब्दार्थस्तु स्पष्टः । एवं सुखदुःखप्रयत्नधर्माधर्मादि च पक्षीकृत्यात्मैक्यमनुमेयमिति भावः ॥ ७४ ॥

मू० ॥ एवं सतीदमविवेकनिबन्धनं ते
कर्तृत्वमात्मनि विभाति न वस्तुभूतम् ॥
बालेन कल्पितमतीव विशुद्धरूपे
व्योम्नीव भूम्नि मलिनत्वमबोधहेतोः ॥ ७५ ॥

टी० ॥ ननूक्तविधयैकस्यैवात्मनो रागद्वेषादिमत्त्वेन तन्नियतकर्तृत्वादिसर्वसंसारोऽपि तस्यैव स्यादिति शान्तिकर्मणि वेतालोदयन्यायापातः । न चाहङ्कारस्यैव रागादयो धर्मास्तन्नियतसंसारस्तस्यैव न त्वसङ्गस्य तत्साक्षिणश्चिदात्मन इति वाच्यम् । तथा सत्युक्तानुमानैस्तस्यैव सर्वत्रैक्यं साधितं स्याच्च तदतिरिक्तात्मन इत्यसमञ्जसं स्यादित्याशङ्क्य वस्तुत उक्तरूपस्याप्यात्मनोऽविद्याक्रान्तरागादिमदहङ्कारतादात्म्याधीनरागाद्यन्वयः प्रातिभासिक उपेयते तथा चोक्तानुमानैस्तादृशरागाद्यन्वयानुवादेन तत्साक्षिण एवैकत्वं साध्यते, अहङ्कारस्य तु प्रतिशरीरं स्वसमानसत्ताकभेदवत्त्वस्यानन्यथासिद्धानुभवादिसिद्धतयोक्तानुमानानां तद्विरोधेन न तत्र प्रवृत्तिरिति वैषम्यमभिप्रेत्य साक्ष्यैकत्वसाधनफलमाह । एवं सतीति । सर्वभूतस्यसाक्ष्यैक्ये सतीत्यर्थः । भूम्नीति विशेषणमात्मनि व्योम्नि च योजनीयम् । कर्तृत्वादिभेदस्याश्रयभेदसापेक्षत्वाच्चिदात्मनश्चोक्तविधया सर्वत्रैक्यात्तदाश्रयताऽयोगात्तत्र तद्भानं भ्रम आकाशनैल्यभानवदित्यर्थः ॥ ७५ ॥

मू० ॥ बाह्यैरसौ रविनिशाकरवह्निवाग्भि-
र्ज्योतिर्गणैरुपकृतोऽपि हि कर्मजातम् ॥

Digitized by Google

निर्वर्तयन्न खलु तावकमन्तरेण
चैतन्यसन्निधिबलं पुरुषः करोति ॥ ७६ ॥

टी० ॥ ननु कार्यकरणसंघातातिरिक्तः सर्वसाक्षी चिदात्मैव नास्ति यस्मिन् कर्तृत्वादिसंसारः कल्पितः स्यात् । न च स्वतो घटकुड्यादितुल्यसंघातस्य चित्प्रकाशाधीनचैतन्यभावं विना बाह्याभ्यन्तरसर्वकर्मकर्तृत्वानुपपत्तेः स्वतन्त्रश्चिदात्मोपेय इति वाच्यम् । आदित्यादिजडज्योतिरुपकृतेन्द्रियवृत्तिबलादेव तस्य सर्वव्यवहारसंभवादित्याशङ्क्य तदभावेऽपि स्वप्नमनोरथसमाध्यादिगतव्यवहारदर्शनात् संघातगतचिदाभासद्वारेण तदीयसर्वव्यवहारप्रयोजक एकश्चिदात्मा सर्वत्राभ्युपेय इत्यभिप्रेत्याह । बाह्यैरसाविति । उपकृतः पुरुषः संघातो निर्वर्तयन्नपि क्व चित् कर्माणि समर्थोऽपि तावकं त्वत्कृतं चैतन्यसान्निध्याधीनचिदाभासरूपं बलमन्तरेण कर्मजातं सर्वकर्माणि न करोति खल्विति संबन्धः । उक्तोपपत्तिसूचनार्थः खलुशब्दः । अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति श्रुतिसूचको हिशब्दः ॥ ७६ ॥

मू० ॥ ज्योतिर्द्वयान्तरित एव हि कर्मजातं
सर्वं करोति पुरुषोऽन्नमयः सदैव ॥
कर्मादिकारणविनिर्मितमस्य बाह्यं
ज्योतिस्त्वनित्यमनिमित्तकमान्तरं चित् ॥ ७७ ॥

टी० ॥ ननु संघातगतकर्तृत्वादिप्रयोजकं यच्चैतन्यज्योतिस्तत्तद्धर्मतया तदन्तर्भूतमेवास्तु तस्य स्वातन्त्र्यानुपलम्भात्ततो न तदात्मा श्रुतिस्त्वीश्वरविषयेत्याशङ्क्याह । ज्योतिर्द्वयेति । जडाजडज्योतिर्मध्यवर्ती वस्तुतस्तदसंसृष्ट इति यावत् । जडज्योतिरसंसर्गो दृष्टान्तत्वेनोक्तः । अन्नमयोऽत्रोपलक्षितभूतमयश्चैतन्यं न संघातान्तःपाती तदुपकारकज्योति-

ष्ट्रादावादित्यादिवत्, इतरथा तदानन्त्यप्रसङ्गेन गौरवापत्तेः, उदाहृतश्रुतिविरोधश्च । न च सेश्वरविषया । कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्यादिवाक्यशेषाऽसामञ्जस्यप्रसङ्गात् । ततश्चैतन्यस्य स्वातन्त्र्यात्त्वनुरोधेन स एवात्मेत्यर्थः । तथापि तस्य चैतन्यस्य संघातोपकारकत्वादादित्यादिवदनित्यत्वं स्यादित्याशङ्क्याह । कर्मादीति । आदित्यादिपदप्रापकोपासना आदिशब्दार्थः । किं तदात्म-कर्मिति गीतायामुक्तं चिदिति । आदित्यादेः कर्मादिसाध्यत्वात्तन्नाशे नाशस्यावश्यकत्वात्कर्मसाध्यत्वं तत्रोपाधिः, चैतन्यस्य स्वस्यात्ययानुयायिनस्तदभावाद्धुक्तलाघवाच्च नित्यमेवेत्यर्थः ॥ ७७ ॥

मू० ॥ श्रोत्रादिजन्यमतिवृत्तिषु बाह्यशब्दा-
द्यर्थाकृतिर्विशति कर्मवशेन कर्तुः ॥
बोधाकृतिस्तु तव सन्निधिमात्रहेतु-
र्धीवृत्तिषु प्रविशति स्वर॰ ॰ नित्यम् ॥ ७८ ॥

टी० ॥ ननु शब्दादिविषयस्फुर॰ ॰ कादाचित्कत्वात्सुखादिहेतुत्वाच्च तदात्मकचैतन्यं कथं न कर्मजन॰ ॰ति तत्राह । श्रोत्रादीति । जन्यत्वं वृत्तिविशेषणम् । अर्थाकृतिरर्थप्रतिबिम्बः । बोधाकृतिः स्वप्रकाशचैतन्यप्रतिबिम्बः । धीवृत्तिषु प्रत्यक्षाप्रत्यक्षसर्वबुद्धिवृत्तिषु । सन्निधिरेव कर्माधीन इत्याशङ्क्योक्तं स्वरसेनेति, व्यापिचैतन्यस्वभावेनेत्यर्थः । शब्दाद्याकारबुद्धिवृत्तीनां स्वरूपेण कादाचित्कत्वात्सुखादिहेतुत्वाच्च कर्मजन्यत्वमावश्यकं तासु चैतन्यप्रतिबिम्बरूपस्फुरणस्यापि कर्माधीनत्वे कदा चित्सतीष्वपि तासु स्फुरणं न स्यात्, न चैवमस्ति, तस्माद्वृत्त्युत्पत्तिमात्रमेव तत्र चैतन्यप्रतिफलनेऽपेक्ष्यते न कर्मेति न तत्साध्यं स्फुरणम्, न वा स्वरूपेण कादाचित्कं तत् स्वरूपचैतन्यस्य सदा सत्त्वादिति भावः ॥ ७८ ॥

मू० ॥ स्वाभाविकी हि वियदन्वितता घटादेः
क्षीरादिवस्तुघटना पुनरन्यहेतुः ॥

एवं धियामपि चिदन्वितताऽनिमित्ता
शब्दादिवस्तुघटना खलु कर्महेतुः ॥ ७६ ॥

टी० ॥ वृत्तिषु चिदाकारः कर्मनिमित्तः तद्गतान्यान्याकारत्वात्तद्गतविषयाकारवदित्याशङ्क्यास्याप्रयोजकत्वमित्यभिप्रेत्य दृष्टान्तेनोक्तं स्पष्टयति । स्वाभाविकीति । घटना अन्वितता । अन्यहेतुः भोक्तुः कर्महेतुका । अनिमित्तेति छेदः ॥ ७९ ॥

मू० ॥ संवेदनं यदिह मानफलं प्रसिद्धं
तच्च प्रमातरि विकारिणि निष्ठितं नः ॥
तस्य प्रमातुरपि साक्षितयान्तरात्मा
सर्वस्य तिष्ठति भवानविकाररूपः ॥ ८० ॥

टी० ॥ ननु प्रमाणजन्यानित्यज्ञानव्यतिरेकेण तदुपाधिकं बोधाकृतिशब्दितं संवेदनमेव नास्ति यस्या निमित्तत्वं नित्यत्वं च स्यादित्याशङ्क्याह । संवेदनमिति । इह व्यवहारभूमौ यन्मानफलं प्रसिद्धं तदेव स्वप्रकाशं संवेदनं जडज्ञानस्येच्छादिवत्स्वपरव्यवहारासमर्थस्य मानफलत्वायोगात्स्वयंप्रकाशं मानफलमुपेयमिति तदेव संवेदनमित्यर्थः । तथापि प्रमातृव्यापाराहिता विषयगता स्वप्रकाशज्ञाततैव संवेदनादिपदाभिलप्या मानफलं तच्चानित्यमिति नेत्याह । तच्चेति । स्वप्रकाशे मानफले स्वतोऽन्यतो वोत्पत्त्यादेरसिद्धेर्जडधर्मस्य रूपादिवज्जडत्वनियमात्तस्य प्रमेयनिष्ठत्वायोगात् स्वाभिव्यञ्जकवृत्तितादात्म्यात्तद्द्वारा प्रमातृनिष्ठत्वमेवाहमुपलभ इत्याद्यनुभवानुरोधादित्यस्मन्मतं युक्तमित्यर्थः । तर्हि प्रमातुरेव स्वनिष्ठसंवेदनसाधकत्वसम्भवात् किं तदतिरिक्तसाक्षिणेत्याशङ्क्य मातृमानादौ मातृमानान्तरासम्भवात् स्वस्य स्वस्मिन्वृत्तिविरोधात्तत्साधकं वस्तुतः स्वतन्त्रं नित्यमेकं मानफलत्वादिकल्पनारहितं स्वप्रकाशं संवेदनं सर्वसाक्षिभूतमुपेयं तदेवैष त आत्मा सर्वान्तर इत्यादिश्रुत्युक्तं त्वत्स्वरूपमित्याह । तस्येति ॥ ८० ॥

Digitized by Google

मू० ॥ कर्त्रादिसंनिधिबलेन तथापि कर्तृ-
भोक्तृप्रमातृवपुरापतति भ्रमेण ॥
तद् बुद्धिसंश्रयमनात्मगतं प्रतीचि
शुद्धेऽपि पश्यसि तमःपटलावृताक्षः ॥ ८१ ॥

टी० ॥ ननूक्तरूपसाक्षिसद्भावेऽपि न तन्मम स्वरूपम्, अहंप्रत्यये प्रकाशमानस्यैव मत्स्वरूपत्वात्तच्च कर्त्रादिरूपस्यैव प्रकाशमानत्वादित्याशङ्क्य वस्तुत उक्तरूपस्यैव तथाहंप्रत्यये विपर्यस्ततयाऽन्यथा प्रकाशमानत्वात्तद्बोधकेकर्त्रादिरूपं स्थूलादिरूपवत्तव नैवास्तीत्यभिप्रेत्याह । कर्त्रादीति । ननु स्थौल्यादाश्रयदेहवत् स्वतः कर्तृत्वादिमदात्मनोऽन्यन्नास्ति यत्संनिधिबलेनात्मनि तद्भ्रमः स्यादित्याशङ्क्य विज्ञानं यज्ञं तनुते अहमिहैवास्मीत्यादिश्रुत्यनुभवसिद्धा साभासबुद्धिरेव तद्युती तदविवेकादेवात्मनि कर्तृत्वादिभ्रम इत्याह । तद्बुद्धिसंश्रयमिति । तत्कर्त्रादिवपुः कर्तृत्वादीति यावत् । किं च कर्तृत्वादिर्न तावदात्मपरिणामो निरवयवस्य तस्य हेतूपरागायोगेन परिणामायोगात् स्वत एव तत्परिणामित्वे मुक्त्यभावप्रसङ्गादविकारित्वश्रुतिविरोधाच्च । नाप्यात्मनि मनःसंयोगजो गुणः निरवयवे प्रदेशवृत्तिसंयोगायोगात् । अत एव न मनस्तत्र तत्साधकं न चान्यत्तत्साधकमस्ति तस्मादात्मनो निर्गुणत्वश्रुतेः कामसंकल्पादेर्मनोधर्मत्वश्रुतेश्च तन्नियतकर्तृत्वादेरपि मनोधर्मत्वादात्मनि तद्धीर्भ्रम इत्यभिप्रेत्योक्तम् । अनात्मगतमिति ॥ ८१ ॥

मू० ॥ कर्तृत्वादि च दृश्यवर्गपतितं द्रष्टुः स्वभावः कथं
संभाव्येत तव प्रपन्नविमलस्वच्छप्रकाशात्मनः ॥
यद्यद् दृश्यतया जगत्यभिमतं सर्वस्य तत्तद्भवेद्
दूरं द्रष्टुरिति प्रसिद्धमखिलं भूभृत्समुद्रादिकम् ॥ ८२ ॥

टी० ॥ किं च कर्तृत्वादि वस्तुतो नात्मा तद्धर्मश्च दृश्यत्वात्पर्वतादिवत् । न चाप्रयोजकत्वम् । तस्य स्वरूपत्वे आत्मधर्मत्वे च तेनाकारेण दृश्यत्वायोगात्, अनाश्रयस्य तस्य कदाप्यप्रतीतेश्च तस्य दृश्यत्वानुपपत्तेरेव विपक्षे बाधकत्वादित्यनुमानादपि तस्यात्मतद्धर्मत्वाभावसिद्धेः।

तत्प्रतीतिर्भ्रम इत्यभिप्रेत्याह । कर्तृत्वादि चेति । द्रष्टुः साक्षिणः । आत्मत्वादौ व्यभिचारमाशङ्क्य तदेवासम्प्रतिपन्नमित्यभिप्रेत्य सामान्यव्याप्तिमेवाह । यद्वदिति । द्रष्टुर्दूरं तदनात्मकमतद्धर्मश्चेत्यर्थः ॥ ८२ ॥

मू० ॥ एतस्माच्च न जाग्रतस्तव भवेत् स्वाभाविकी कर्तृता
यद्येषा स्वत एव किं न भवति स्वप्नेऽपि ते तिष्ठतः ॥
यत् स्वप्ने परिपश्यसि त्वमखिलं तन्मायया निर्मितं
कर्तृत्वादि न सत्यमत्र घटते कार्त्स्न्यानभिव्यक्तितः ॥ ८३ ॥

टी० ॥ किं चेदं कर्तृत्वादिकमात्मनोऽग्नेर्ज्वालादिवदागन्तुकं किं वौष्ण्यादिवत् स्वाभाविकम्, नाद्यः पूर्वोक्तविधया तद्धेतोर्दुर्निरूपत्वान्न हि निर्हेतुकमागन्तुकं संभवति आगन्तुकत्वे वा तस्य रज्जुसर्पादिवन्मिथ्यात्वापत्तेश्चेत्यभिप्रेत्य द्वितीयं निराकरोति । एतस्मादिति । वक्ष्यमाणहेतोरित्यर्थः । चशब्दः प्रथमपक्षप्रतिक्षेपसमुच्चयार्थः । एतस्मादित्युक्तं विशदयति । यद्येषेति । अग्न्यौष्ण्यस्य यावदग्निस्वरूपानुवृत्तिवत् कर्तृत्वादेरात्मनः स्वाभाविकत्वे यावदात्मस्वरूपं तदनुवृत्तिः स्यान्न च साऽस्ति स्वप्ने सत्यप्यात्मनि तदभावादित्यर्थः । ननूक्तहेतुरसिद्धो जाग्रतीव स्वप्नेऽपीदं करोमीदं भुञ्ज इत्याद्यनुभवेनात्मनि तदापि कर्तृत्वादेः सत्त्वादित्यत आह । यत्स्वप्न इति । स्वप्ने यत्कर्तृत्वादि त्वं परिपश्यसि तदखिलं मायया निर्मितमिति संबन्धः । कार्त्स्न्यानभिव्यक्तितः परमार्थवस्तूचितदेशकालसाधनसंपत्तिः कार्त्स्न्यं तत्पूर्विका याऽभिव्यक्तिस्तद्रहितत्वादित्यर्थः । स्वे शरीरे यथाकामं परिवर्तेत इति वचनात्स्वशरीर एव स्वप्नवस्तु दृश्यते तत्र च वास्तवस्थानभोजनगमनाद्युचितदेशकालसाधनसंपत्तेरसंभवात्तदभावेऽप्यभिव्यक्तस्य तस्यैन्द्रजालिकसृष्टवस्तुवदनिर्वचनीयमायामात्रनिर्मितत्वान्मिथ्यात्वमावश्यकम् । तदुक्तम् । मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति । ततो न जागरितकर्तृत्वादेः स्वप्नेऽनुवृत्तिरिति सिद्धमित्यर्थः ॥ ८३ ॥ (शेषमग्रे)

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्	
	रु०	आ०
१ काशिका पंडितवरवामनादित्यविरचिता		
पूर्वार्धम्	..	॥
उत्तरार्धम्	१० ..	॥
२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२ ..	॥
३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१ ..	।)
४ लघुकौमुदी वरदराजकृता	१ ..	=)
५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८ ..	॥
६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४ ..	॥
८ मानवधर्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४ ..	॥
९ शाश्वतधर्मदीपिका	१ ..	॥
१० अमरकोश सटीक	४ ..	॥
११ योगवार्तिकम्	३ ..	।)
१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१) ..	॥
१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगादेशाधिपति रचिता	४) ..	॥

Digitized by Google

CONTENTS

	Page.
KHAṆḌANAKHAṆḌAKHÁDYAM ...	233
ŚRÍBHÁSHYAM ...	249
VEDÁNTATATTWASÁRAḤ ...	265
ŚÁSTRADÍPIKÁ ...	277
SAṂKSHEPAŚÁRÍRAKAM ...	282

Digitized by Google

HARVARD COLLEGE
JUL 29 1887
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 6.] JUNE 1887. [Vol. IX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [All rights reservd.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 248. Vol IX.)

टी ॥ व्यापकत्वमेव साध्यत्वं न सिद्धिकर्मत्वमित्याह—। [a]"साध्यमि"ति । अन्योन्याश्रयमाह—। [b]"व्याप्ती"ति । [c]"सम्भाविते"ति । वास्तवत्वं व्याप्तेरन्योन्याश्रयत्वापादकमित्यभिमानः । एवमप्यन्योन्याश्रय एवेत्याह—। [d]"व्यापकस्ये"ति । ज्ञप्तावन्योन्याश्रय इत्यर्थः ॥ [e]"भद्रमि"ति । तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं हि व्यापकत्वमिति नान्योन्याश्रय इत्यर्थः शाकपाकजत्वाद्युपाधावव्याप्तिमाह—। [f]"नचे"ति । निश्चितोपाधेरिदं लक्षणं नतु शङ्कितोपाधेरिति तत्राव्याप्तिर्न दोष इत्याशङ्कते । [g]"यत्रे"ति । साधनेनैवोपाधेरपि साधनात्साधनव्यापकत्वनिश्चयाच तत्र शङ्कितोपाधित्वमपीत्याह—। [h]"मैत्रे"ति ।

मू० [a]तथापि तत्तत्सामग्रीत्युपाधिपरम्पराभिधाने च तस्यास्तस्या अपि मैत्रतनयत्वेनैव साधनस्य कर्त्तुं शक्यत्वात् *अनवस्थैवं स्यात्?*—इति चेन्न, [b]उपाध्युपन्यासे एव च कृतोनवस्था न स्यात् साध्य [c]सामग्र्या उपाधित्वे धूमानुमानसाधारण्यात् एवं च साध्यसामग्र्युपाधित्वव्यवच्छेदार्थमपि लक्षणं विशेषणीयं [d]श्यामत्वादौ साध्ये शाकाद्याहारपरिणतिपारम्पर्यादेस्तस्मिन्साध्ये श्यामत्वादेरुपाधित्वसम्भवेन कथमुपाधिरपि साधयितुं शक्यते इति चेन्नैवम् [e]प्रत्येकं द्वयोरपि मैत्रतनयत्वादिना साधने साधनाव्यापकत्वस्य शङ्कितुमशक्यत्वात् [f]अन्यथा सकर्तृकत्वे साध्येऽदृष्टजन्यत्वमदृष्टजन्यत्वे च सकर्तृकत्वमुपाधिरिति उभयासिद्धिः स्यादेवं बुद्धिमत्पूर्वकत्वे प्रयत्नपूर्वकत्वं प्रयत्नपूर्वकत्वे च बुद्धिमत्पूर्वकत्वमेवं वह्नित्वजात्या-

Digitized by Google

क्रान्तवत्त्वेपीन्धनजतेजोवत्त्वं तस्मिन् वह्निजात्याक्रान्तवत्त्वमुपाधिः स्यादित्यादिर्विश्वमनुमानं व्याकुली स्यात् ।

टी० ॥ ननु मैत्रतनयत्वेनापि शाकपाकजत्वे साध्ये साध्यसामग्र्या उपाधित्वाच्च तत्र शाकपाकजत्वनिश्चय इति सन्दिग्धोपाधित्वमेवेत्यत आह ॥ [a]"तत्रापी"ति ॥ [b]"उपाधी"ति । यथा हेतुना तत्तदुपाधिमाधनेऽनवस्था मम तथा तत्तदुपाध्युपन्यासे तवाप्यनवस्थैवेत्यर्थः शाकपाकजत्वादेरुपाधित्वेदोषान्तरमाह–। [c]"सामग्र्या" इति । धूमादिसदनुमानमप्येवं न स्यादित्यर्थः हेतुनोपाधिसाधने दोषान्तरमाह–। [d]"श्यामत्वे"ति । साध्योपाध्योर्द्वयोरपि मैत्रतनयत्वेन साधयितुं शक्यत्वाच्च प्रत्येकस्योपाधित्वमित्याह–। [e]"प्रत्येकमि"ति । ननु द्वयोः प्रत्येकं यदि साधनं तदा प्रत्येकस्योपाधित्वमेव मिलितसाधने चार्थान्तरं विप्रतिपत्तिसमये त्वोभयसाधनमर्थान्तरत्वापादकमेवेति तत्राहुः तत्रोपाधिः साधनेन साधनार्हः तत्र साधनव्यापकत्वाच्चोपाधित्वमस्तीति तात्पर्यमत एवानुरूपमुदाहरति–। [f]"अन्यथे"ति । कार्यत्वेन हेतुना सकर्तृकत्वादृष्टजत्वयोरुभयोरपि साधयितुं शक्यत्वाच्चोपाध्युपाधिमद्भाव इत्यर्थः ॥

मू० [a](१)अत एव साध्यसाधनसम्बन्धं प्रति व्यापकत्वं साध्यव्यापकत्वमित्यपि प्रत्युक्तम् [b]यच्चाप्युपाधिर्निश्चीयते तच्चाप्य(२)तीन्द्रियोपाधिविषये तदभावस्य साधनाव्याप्त्यर्थमनुमेयतायां(३) सोपाधीक्रियमाणेन साधनेनैव सत्प्रतिपक्षस्य

(१) उक्तं दूषणं साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमित्युपाधिलक्षणान्तरे प्यतिदिशति–अत एवेति–

(२) अतीन्द्रियउपाधिविषयत्वेन व्यवस्थितो यत्र हेतौ तत्रेत्यर्थः यथात्रैव स श्यामो मैत्रतनयत्वादित्यत्रशाकपाकजत्वमतीन्द्रिय उपाधिरिति तदभावस्याप्ययोग्यप्रतियोगिकत्वेनातीन्द्रियत्वाद्द्वारमैत्रतनयसाधनाव्यापकत्वसम्पत्त्यर्थमनुमेयत्वमेव वाच्यं तथा हि–अयं शाकपाकजत्वाभाववान् गौरत्वाद्यच्चैवं तच्चैवमिति तथा चायं शाकपाकजन्यो मित्रातनयत्वाच्छ्यामतनयवदिति सत्प्रतिपक्षतेति समयपक्षत्यर्थः–एवमुदाहरणान्तरेप्यूह्यम् ।

(३) उपाध्यात्मकसाध्यवत्तीक्रियमाणेनेर्थः ।

कर्त्तुं शक्यत्वात् तथा सति तव शङ्कितोपाधित्वमेव निर्व्यूढं स्यात्पतीति चेत् [c] (१) एवं ब्रुवाणो नियतमजैषीः परं मन्द-मन्दाक्षं तथाहि स्वीकृतनिश्चितोपाधिभावे शङ्कितोपाधि-त्वमापतत्तदनुकूलं मन्यते कोऽन्यो जितलज्जात् नच क्व-चिन्निश्चितोपाध्यनभ्युपगमे तच्छङ्काशङ्का [d] * यत्र प्रत्य-क्षेणोपाधिनिश्चयस्तदेव तद्दर्शनस्थानं भविष्यति ? *—इ-ति चेन्न, [e] ऐन्द्रियकबाधे तज्जातीयस्यातीन्द्रियस्याप्रयो-जकीक्रियमाणेन हेतुनैव साधयितुं शक्यत्वात् ॥

टी ॥ [a] "अत एवे"ति । साध्यत्वव्यापकत्वयोरनिरूपणादेवेत्यर्थः इदानीं निश्चितोपाधावपि साधनाव्यापकत्वस्याशक्यग्रहत्वमाह—। [b] "य-चापी"ति । साधनाव्यापकत्वसम्पत्तये साधनवति यथोपाध्यभावः साध्य-स्तथा साधनेनैवोपाधिरपि साधयितुं पार्यत एवेति न साधनाव्यापक त्वनिश्चय इत्यर्थः ॥ [c] "एवं ब्रुवाण" इति । उपाधित्वनिश्चयस्य क्वचि-दप्यसम्भवे तत्संशयस्याप्यसम्भवादित्यर्थः नन्वार्द्रेन्धनवत्त्वस्योपाधेः साध-नवह्निमत्ययोगोलकादावभावः प्रत्यक्ष इति तस्यैव साध्यधूमव्यापकत्वे सति साधनवह्न्यव्यापकत्वान्निश्चितोपाधित्वमिति शङ्कते—। [d] "यत्रे"-ति । अयोगोलकमार्द्रेन्धनवत् वह्निमत्त्वान्महानसवदित्यनेनात्राप्युपाधि-साधने क्व तदभावनिश्चय इति परिहरति —। [e] "ऐन्द्रियकबाधे" इति ।

मू० [a] नच यदेकचैकजातीयमैन्द्रियकं तदन्यचैन्द्रियकबाधे-हेतुबलादतीन्द्रियं न प्रसाध्यते पाकदर्शनाज्जठरानला-दिवत् [b] साधनाव्यापकत्वे सति साध्यव्यापक इति च न शाकाद्याहारपरिणतिपरम्परासाध्यं व्याप्नोतीत्यव्यापकता-दोषः [c] नहि शाकादित्वं नाम किञ्चिदेकमस्ति यत्साध्यं

(१) हेमन्द एव ब्रुवाणस्त्वं मन्दाक्षं=लज्जामेव नियतमजैषीः परं=परन्तु न प्रतिपक्षमित्यन्वयपूर्वकोऽर्थः ।

व्याप्नुयात् [d] अस्तु वा कथमपि तथापि श्यामत्वं न व्याप्नोति [e] इन्द्रनीलशिलादिश्यामलत्वस्याशराजन्यत्वात् [f] * शरीरश्यामत्वं साध्यं तच्च व्याप्नोत्येवेदम्? *—इति चेन्न, [g] व्याप्तावुपाधेरभिधेयत्वात् नच पुरुषश्यामत्वेन व्याप्तिः [h] इन्तु पक्षधर्मतयैव हि साध्यं पक्षधर्मः सिध्यति न व्याप्त्या [i] अन्यथा पुरुषपदस्याव्यवच्छेदकस्याविशेषणत्वापातात् ॥

टी० ॥ नन्विन्धनवस्त्वावच्छेदेनैवेन्द्रियकत्वमिति तत्साधने बाध एवेत्यत आह—। [a] "न चे"ति। यथा पाकेनानुमीयमानो वह्निर्जठरे प्रत्यक्षो न सिद्ध्यति अतीन्द्रियः साध्यते तथा प्रकृतेपि स्यादित्यर्थः साधनाव्यापकत्वं निरस्य साध्यव्यापकत्वं निरस्यति—। [b] "साधने"ति। शाकादीनामननुगमेन साध्यव्यापकत्वग्रहासम्भवात् तदेवाह—। [c] "नहीति। शाकाद्याहारस्यानुगमेपि श्यामत्वस्य व्यभिचाराच व्यापकतेत्याह—। [d] "अस्तु वे"ति। व्यभिचारमेवाह—। [e] "इन्द्रे"ति। विशिष्टसाध्यव्यापकत्वमभिमतं तथास्त्येवेति शङ्कते—। [f] "शरीरे"ति। ययोरेवव्याप्तिरभिमता तयैवोपाधिरभिमतो ननु विशेषणान्तरप्रक्षेपेणापि साध्यत्वमिति परिहरति—। [g] "व्याप्तावि"ति। ननु पुरुषश्यामत्वमेव पर्यवसितमिह साध्यं तद्व्यापकोयमुपाधिर्भवत्येवेत्यत आह—। [h] "इति"ति। यदि पुरुषश्यामत्वमेव साध्यं तदा मैत्रेयः पुरुषः श्यामः मित्रातनयत्वादित्येव प्रतिज्ञा स्यात्तत्र च पुरुषपदं व्यर्थं स्यादित्याह—। [i] "अन्यथे"ति।

मू० [a] परम्परासम्बन्धिकज्जलादिलेपश्यामलत्वव्यवच्छेदकत्वे च संयुक्तश्यामपुरुषसमवेतश्यामत्वस्य परम्परासम्बन्धिनः कथं व्यवच्छेदः स्यादिति [b] * नच साध्यसाधनसम्बन्धादृष्टव्यभिचारत्वं साध्यव्यापकत्वं मा रूपसाक्षात्कृतिकरणादेस्तैजसादित्वे साध्येऽभूदुद्भूतरूपादित्वादेरुपाधित्वम् *[c] साधनेनापि च विशेषणतया निवेश्येन यदि केवलसा-

ध्यव्यापकं व्यवच्छेद्यं तदा तस्य व्यभिचारशङ्काधानक्षमस्याप्युपाधित्वं न स्यात् [d] * अथ न किञ्चिद्व्यवच्छेद्यं तदा विशेषणत्वासिद्धिरेव नहि प्रयोजनमात्राद्विशेषणमर्थवद्भवति किंतु किञ्चिद्व्यवच्छेदादिति * शरीराजन्यत्वमिवाकर्तृकत्वे व्यर्थमसिद्धौ पर्यवस्येदिति

टी० ॥ ननु पुरुषीयमेव श्यामरूपं सिद्ध्यतु कज्जलादिगतं तु मा सैत्सीदित्येतदर्थमेव तद्विशेषणमित्यत आह [a] "परम्परे"ति । एवं व्यावर्त्त्यत्वानुसरणे संयुक्तपुरुषश्यामताव्यवच्छेदार्थमपि विशेषणान्तरमुपादेयं स्यादित्यर्थः श्यामरूपसमवाये साध्ये पुरुषपदस्य सुतरां वैयर्थ्यमिति भावः ननु तथापि मित्रातनयत्वावच्छिन्नश्यामत्वं प्रति शाकाद्याहारपरिणतेर्व्यभिचारो न दृश्यते इति तदवच्छिन्नव्यापकत्वमेव साध्यव्यापकत्वमभिमतमत आह—। [b] "न चे"ति । एवं सति चक्षुस्तैजसं रूपसाक्षात्कारकरणत्वात् प्रदीपवदित्यत्र सदनुमाने ग्रीष्मोष्मणि केवलसाध्याव्यापकमपि साधनावच्छिन्नसाध्यव्यापकतयोद्भूतरूपवत्त्वमुपाधिः स्यादित्यर्थः मा भूदिति सम्बन्धः दोषान्तरमाह—। [c] "साधनेनापी"ति । साधनावच्छिन्नसाध्यव्यापकत्वं केवलसाध्यव्यापकोपाधौ नास्तीति तत्राव्याप्तिरित्यर्थः ननु केवलसाध्याव्यापकोपाध्युपसङ्ग्रहमात्रार्थमिदं विशेषणं न तु केवलसाध्यव्यापकोपाधिव्यवच्छेदाय येनाव्याप्तिः स्यादित्याशङ्क्य निराकरोति—। [d] "अथे"ति । यदि न व्यवच्छेदकं तदा साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वेन । साधनस्य साध्यव्यभिचारित्वे साध्येऽसमर्थविशेषणतया व्याप्यत्वासिद्धिः स्यादित्यर्थः ।

मू० [a] किंच आभासे केवलव्यतिरेकिणि [b] पक्षधर्मे हेतौ जीवच्छरीरं पृथिव्याद्यष्टद्रव्यातिरिक्तानेकद्रव्यवत् प्राणादिमत्त्वादित्यादौ कथमिदमुपाधिलक्षणव्यवस्थाप्यं नह्याभासे व्यतिरेक्यनुमानात्मनि यत्साध्यं तदुपाधिना व्याप्तं

वर्त्तते तस्य पराभिमतस्य [c] क्वचित्सिद्ध्यापत्तेः [d] व्यतिरेकव्याप्तावुपाधिस्वेत्तर्हि व्यतिरेके यद्व्याप्यं तस्य व्याप्य उपाधिरवश्यं मन्तव्यः ॥

टी० ॥ व्यतिरेकव्याभासे साध्यव्यापकत्वाग्रहादुपाधेरनुपाधित्वमित्याह—। [a] "किञ्चेति । आभासत्वाभिधानमुपाधिग्रोध्यार्थं अपक्षधर्मतया चेदाभासत्वं तदा न व्याप्तिभङ्गायोपाध्यनुसरणमित्यत आह—। [b] "पक्षधर्मे"ति । अष्टद्रव्यातिरिक्तानेकचेतनवत्त्वं साध्यं तदप्रसिद्ध्या नोपाधेः साध्यव्यापकत्वग्रह इत्यर्थः पराभिमतस्य स्थापनाबाद्यभिमतस्य ॥ [c] "क्वचिदि"ति । * नच पक्ष एव तत्सिद्धिरिति वाच्यं ? *—साधनव्यापकत्वमुपाधेस्तथासति स्यादित्यर्थः ननु व्यतिरेकिण्यि व्यतिरेकव्याप्तावेवोपाधिरिति न तत्र साध्यव्यापकत्वं तन्त्रमित्यत आह—। [d] "व्यतिरेके"ति । व्यतिरेकव्याप्तो साध्याभावस्य व्याप्यत्वादुपाधेस्तद्व्याप्यत्वं स्वीकार्य्यमिति नोपाधिः साध्यव्यापकः स्यादित्यर्थः । यद्यपि साध्यपदेन व्यापकमभिमतं तेन व्यतिरेकव्याप्तावपि व्यापकव्यापकत्वमुपाधेर्व्यापकत्वं च साधनाभावस्येत्युपाधिस्तद्व्यापकोयथा प्रतिसन्धानाभावे कार्यकारणभावाभाव उपाधिः परोक्ते एककर्तृकत्वानुमाने तथापि साध्याभावव्याप्यत्वाभिधानं कथञ्चित्समर्थनीयमिति ।

खू० [a] अन्यथोपाधेरन्वये साध्यान्वयापत्तेरिति [b] उपाधेर्व्यतिरेकव्याप्यवश्यम्भावस्याभ्युपगम्यतयोपाधेर्यद्व्यापकं तद्व्यतिरेक उपाधिव्यतिरेकस्य व्याप्यतया मन्तव्य इति परसाध्यापत्तिः असमव्याप्तिकयोरन्वयव्याप्तिसाध्यसाधनभाववैपरीत्येन व्यतिरेकव्याप्तेरिति * नच दोषान्तरमेव तर्हि वाच्यम् ? *—इति वाच्यम् [c] हेतोः पक्षधर्मत्वस्थिते व्याप्तिचत्यर्थं त्वयोपाध्युपगमश्चैात्यात् [d] भवतु वा या काचि-

र्व्याप्तिर्नाम(१) तत्सत्वे एवानुमितिभावात् तस्याश्चानुमितेश्च व्याप्तिरेषत्व्या ततश्चात्माश्रय [e] स्तद्भेदे चाननुगमाविनिगमौ स्यातामिति व्याप्तिपक्षधर्मते अनुमितिं [f] भावयत इति वदन्ति तच्च केयं पक्षधर्मता * पक्षाश्रितत्व? *—इति चेन्न,

टी० ॥ अस्तु तत्रापि साध्यव्यापकत्वाध्याभावाव्याप्य एवोपाधिः किमनिष्टमित्यत आह—। [a] "अन्यथे"ति । उपाधिसद्भावे यदि साध्याभावो व्यापकतया न वर्तेत तदा साध्यं स्यात् साध्याभावाभावस्य साध्यत्वात्तचिकृपणं च पक्षादन्यत्र न वाच्यमन्यथा व्यतिरेकभङ्गप्रसङ्ग इत्यवश्यमुपाधिः साध्याभावव्याप्य एव वाच्य इत्यर्थः ॥ [b] "उपाधेरि"ति । साध्यव्यावृत्त्यर्थमुपाधिव्यावृत्तेरुपासनीयत्वेनोपाधेर्व्यतिरेकिधर्मत्वनियमादिति भावः अन्वये यद्व्यापकं तदभावो व्यतिरेके व्याप्य इति केवलान्वयिनि नास्तीत्यत उक्तम् असमव्याप्तिकयोरिति नन्वीदृशे व्यतिरेकिणि मास्तूपाधिरित्यत उक्तम् । [c] "हेतोरि"ति । व्याप्तिमभ्युपेत्य दोषमाह—। [d] "भवतु वे"ति । व्याप्तावप्यनुमित्या सह व्याप्त्यभ्युपगमे स्ववृत्तित्वमित्यर्थः ॥ [e] "तद्भेदे" इति । यदनुमितिव्याप्त्योरन्यैव व्याप्तिस्तदाननुगमो यदि तत्रापि स्ववृत्तिभयेनान्या तदानवस्था स्यात्तथाच का व्याप्तिरनुमानाङ्गमिति विनिगमना न स्यादित्यर्थः ॥ [f] "भावयत" इति । जनयत इत्यर्थः ॥

मू० [a] नैयायिकादिन् प्रति प्रमेयत्वस्याहेतुत्वप्रसङ्गात विषयविषयिभावस्य ज्ञेयज्ञान स्वरूपातिरिक्तस्यानङ्गीकारात् तयोश्च ज्ञेयाश्रितत्वायोगात् कश्चायं पक्षो नाम यद्धर्मत्वं पक्षधर्मत्वं * सिसाधयिषितसाध्यधर्मा धर्मी? *—इति चेन्न, सिसाधयिषा हि प्रतिपिपादयिषा वा स्यात् प्रति-

(१) तत्सत्वं—इत्यतः पूर्वं तथापीति पूरणीयम्—तत्सत्वे—इत्यस्यव्याप्तिसत्वे—इत्यर्थः ।

Digitized by Google

पित्सा वा आद्ये स्वार्थानुमित्यनुदयप्रसङ्गः द्वितीये चा [b] सुरभिगन्धानुमेयकुत्सितरसविषयस्वार्थानुमित्यनुदयप्रसङ्गः नचानवधारितधर्माधर्मी पक्षः हेतुमत्तयाप्यनवधारणे ऽनुमानोदय (१) निदानभावासम्भवात् अवधारणे वानवधारितधर्मत्वानुपपत्तेः नचानवधारित [c] हेतुविषयधर्मा धर्मी पक्षः तथाहि केनानवधारितधर्मा न तावदनुमानप्रयोक्ता स्वयमज्ञाने परं प्रत्यप्रयोगात् *प्रतिवादिना?*—इति चेत् न प्रतिवादिविदितेऽप्यर्थे वादितया परस्परविद्योत्कर्षनिरूपणार्थमनुमानदर्शनात् ॥

टी० ॥ [a] "नैयायिकादौ"निति । अतिरिक्तविषयविषयिभावसम्बन्धानङ्गीकर्तृमते वाच्यो घटः प्रमेयत्वादित्यादौ प्रमेयत्वस्य घटतत्प्रमास्वरूपस्य घटावृत्तित्वादपक्षधर्मता स्यादित्यर्थः कृत्तद्धितसमासेषु सम्बन्धाभिधानं भावप्रत्ययेन तुल्यमिति कात्यायनवचनादिति भावः(२) परम्परासम्बद्धं प्रमात्वमेव यदि प्रमेयत्वं तथापि तस्य विषयघटितोपाधितया विषयावृत्तित्वमेवेति हृदयम् ॥ [b] "असुरभी"ति । सटितमांसादावसुरभिगन्धेन हेतुना कुत्सितरसानुमानमस्ति नतु प्रतिपित्सापि येन तस्य पक्षता स्यादित्यर्थः हेतुधर्मावधारणेऽपि न सामान्यतोऽनवधारितधर्मत्वमिति पर्वतादेरपक्षत्वापत्तिरित्याह—। [c] "हेत्वि"ति । हेतुविषयः साध्यं तथा चानवधारितसाध्यधर्मेत्यर्थः ॥

मू० तथानवधारणं यत्किंचिद्धेतुविषयधर्मगोचरम् वादिप्रयोक्तव्यहेतुविषयगोचरं वा नाद्यः [a] अग्निमत्त्वनिश्चयदशायामपि तत्तद्धेतुविषयवह्नितरापरधर्मतानवधारणात् धूमं प्रति पर्वतस्य पक्षत्वप्रसङ्गात् न द्वितीयः तथापि तत्प्रसङ्गात्

(१) निदानानुभवासम्भवादित्यपि क्वाचित्कः पाठः ।
(२) स्वसमवायिविषयत्वसम्बन्धेन सम्बद्धम् ।

[b]तद्धेतूनामपि वादिप्रयोज्यत्वात् [c]असाधारण विवक्षायां चाननुगमात् इतरेतराश्रयदोषाच्च [d]पक्षधर्मत्वेन हेतुत्वनिरूपणात् व्याप्तपक्षधर्मत्वस्य हेतुत्वात् हेतुना च पक्षनिरूपणात् स्वार्थानुमाने च हेतोरप्रयोज्यत्वात् पक्षत्वाभावेनानुमानानुदयप्रसङ्गात् [e]विरुद्धहेतौ च पक्षधर्मत्वाभावप्रसङ्गात् न च साध्यस्य तद्धेतुविषयत्वाभावात् [f]हेतोरेव साध्यविपरीतव्याप्त्या दुष्टत्वात् [g]एतेन सन्दिग्धसाध्यधर्मविशिष्टो धर्मी पक्षः साध्यत्वं च स्वपरार्थानुमानसाधारणं उत्पाद्यज्ञानत्वमिति निरस्तम् ॥

टी० ॥ [a]"अग्निमत्त्वे"ति । अनुमित्यनन्तरमपि पर्वतादेः पक्षता स्याद्धर्मविषयस्य प्रदेशश्यामलतादेरनवधारणादित्यर्थः पूर्वप्रसङ्गे सत्येवाह—। [b]"तद्धेतूनामि"ति ॥ [c]"असाधारणे"ति । वादिप्रयोज्यधूमादिविषयस्येति कृते शब्दादेरपक्षता स्यादित्यर्थः ॥ [d]"पक्ष"ति । व्याप्तपक्षधर्मत्वं हेतुत्वं हेतुविषयधर्मवत्त्वं च पक्षत्वमित्यन्योन्याश्रय इत्यर्थः ॥ [e]"विरुद्धे"ति । नह्यनित्यत्वमपि कृतकत्वविषयस्तत्प्रतीतिजन्यप्रतीतिविषयत्वमेव हि तद्विषयत्वमित्यर्थः ननु विरुद्धेपक्षधर्मत्वाद्धेत्वाभासत्वमस्त्वित्यत आह—। [f]"हेतोरेवे"ति । साक्षाद्धेतुदोष एव विरोधो नतु पक्षद्वारेत्यर्थः ॥ [g]"एतेने"ति । सन्देहस्य विशेषणत्वोपलक्षणत्वव्युदासः सन्देहाधारपुरुषविकल्पादिनेत्यर्थः ॥

मू० *[a]प्रतीतिं व्याप्तिबलेन सामान्यतो व्यापकावगाहनप्रवृत्तां विशेषमादाय पर्यवसाययितुं व्याप्यस्य सामर्थ्यं सा? *—इति चेन्न, [b]तस्याः(१) सामान्यविषयाया [c](२)अनु-

(१) तस्याः=व्याप्तिबलेन सामान्यतो जायमानप्रतीतेः

(२) अनुपपत्तेरित्यतः अग्निविशेषं विनेत्यध्याहार्यम्—

पपत्तेरसिद्धेर्व्याप्तिवत्सम्भवात् अनुपपत्तित्वे व्याप्त्यनुप्रवेशात् [d] अधिकविषयाकाङ्क्षित्वे विरम्य व्यापारापत्तेः [e] मानान्तरत्वापत्तेर्वा विशेषविषयायाश्चानुपपत्तित्वेऽति [f] प्रसङ्गः [g] पक्षधर्मतया च यदि साध्यव्यक्तिभेदः सिद्धोत्तर्ह्यनुमाय तां प्रत्यक्षेण पश्यन् पुंशब्दात् पुरुषानुमायो प्रत्यक्षेण पुरुषद्वयदर्शने तद्विशेषासंशयी स्यात् [h] *प्राग्विशेषादर्शनात् तथा स्यात्?*—इति चेन्न, [i] पश्चात्तत्तद्दर्शित्वान्न संशयीतेति(१) ॥

टी० ॥ प्रकारान्तरेण पक्षधर्मतामाशङ्कते—। [a]"प्रती"तिमिति । व्याप्तिबलाद्वह्निमात्रप्रतीतिः पक्षधर्मताबलात्पर्वतीयत्वादिकमादाय पर्वतस्यतीत्येतादृशं धूमसामर्थ्यं पक्षधर्मतेत्यर्थः ॥ [b]"तस्या"इति । विशेषं विनापि साध्यसामान्यविषया वह्निप्रतीतिः स्यादेव यथा व्याप्तिबुद्धिरिति नानुपपत्तिरित्यर्थः अनुपपत्तिबलेन विशेषविषयत्वाभ्युपगमेऽर्थापत्तिरेव स्यात् सा चानुमानमेवेत्याह—। [c]"अनुपपत्तित्वे" इति । यदि च सामान्यबुद्धिरुत्पन्ना विशेषविषया तत्राह—। [d]"अधिके"ति । सामान्यबुद्धिरनुपपद्यमाना विशेषबुद्धिं यदि जनयति तत्राह—। [e]"मानान्तरत्वे"ति ॥

(१) ननु संशयस्य पक्षधर्मत्वाभावेपि सिषाधयिषाविरहसहकृतसिद्ध्यभावो यत्र स पक्षस्तद्वृत्तिधर्मः पक्षतेति विशेषसाक्षात्कारकाले सिसाधयिषा विरहसहकृतसिद्धिसत्त्वा न पक्षतेति चेन्न एतल्लक्षणस्य यत्र स इति पदघटितत्त्वेनाननुगतत्वात्—यावज्जीवं ममानुमितिस्स्यादित्यनुमित्सायांसत्यामनुमित्यव्यवहितोत्तरक्षणेऽनुमितिप्रसाङ्गाच्च अथानुमातुस्सिषाधयिषाविरहस्सिद्ध्यंशे विशेषणमाहेस्वित्पुरुषान्तरस्य नाद्यः । विशेषरूपेण दुर्गन्धानुमितिस्थले सिषाधयिषायामसत्यामप्यनुमितिदर्शनात्—न हि तत्र सामान्यरूपेण सिद्धिसत्त्वे विशेषरूपेण दुर्गन्धमनुमिनोमीत्येच्छोत्पद्यत इति नानुमातृच्छाविरहो विशेषणं स्याच्चामतदानुमातृच्छाविरहो विशेषणमुत्पद्येत कदाचिद्यदिदुर्गन्धानुमितेस्सत्त्वेप्यनुमितिर्न हि तत्रानुमातुर्दुर्गन्धानुमित्साभवति जात्वपीति न तादृशेच्छाविरहो विशेषणमित्यनवद्यम् । नापि द्वितीयः । सिद्धिसत्त्वेपि पुरुषान्तरयेच्छामादायानुमिति प्रसङ्गादित्येतल्लक्षणमप्यनुपपन्नम् ।

[f] "अतिप्रसङ्ग" इति । अपरापरविशेषधीप्रसङ्ग इत्यर्थः दोषान्तरमाह—।
[g] "पक्षधर्मतया चे"ति । वह्न्यनुमानानन्तरं प्रत्यासीदतो नानावह्निदर्शने किमियं वह्निव्यक्तिरनुमितेयं वेति वह्निसंशयो न स्यात् किंच शब्दविशेषेण गृहे पुरुषानुमानानन्तरं चैत्रोऽनुमितो मैत्रो वेति संशयो न स्यादित्यर्थः नन्वनुमितस्यापि विशेषस्य साक्षात्काराभावात्संशयः स्यादेवेत्याह—।
[h] "प्रागि"ति । विशेषसाक्षात्कारकालेपि संशयदर्शनाच्चैवमित्याह—।
[i] "पश्चादि"ति ॥

मू० (१)उपमानमपि(२) किमुच्यते सादृश्यज्ञानमुपमानमित्येके (३) तन्न [a]स्मृतावपि प्रसङ्गात् अनुभव इत्यभिधाने च सदृ-

(१) { प्रत्यक्षमनुमानं च विदोषणी युक्तितः पुरा ।
अधुना दूष्यते सम्यगुपमानं सविस्तरम् ॥ }

(२) उपमानं दूषयितुं पृच्छति—किमिति—

(३) सादृश्यज्ञानमुपमानमिति वदन्प्रष्टव्यो वादी किं सादृश्य स्मरणमुपमानं किं वा सादृश्यानुभवः । नाद्यस्सादृश्यस्मरणाध्वंस तत्प्रत्यक्षयोरपि सादृश्यस्मरणजन्यत्वेनोपमितित्वापत्तेः । द्वितीयश्चेत्किं सादृश्यप्रत्यक्षमुपमानम्—उत सादृश्यानुमितिः—आहोस्वित्सादृश्योपमितिः—सादृश्यबोधो वा—तत्राद्येऽकीदृशं तद्यदुपमानत्वेनाभिमतम्=चक्षुरादीन्द्रियसंसर्गिणि गवये गोसादृश्यप्रत्यक्षमिति चेत्—किं चक्षुरादिसन्निकृष्टे गवये गोसादृश्यं गवि च गवयसादृश्यं भिन्नमभिन्नं वा—भिन्नमिति चेत्—न तत्सादृश्यम्भवितुमर्हति भूयसामवयवानां समानसंसर्ग एव एव सादृश्यं स चेद्गोगवययोर्भिन्नस्स्यात्कथं सादृश्यं भवेदिति सादृश्यसम्पत्तये समान एव वक्तव्यस्सामानश्चेत्कथं तद्विषयं ज्ञानमुत्पद्यमानं भिन्नं भवेदिति यद्गोगवययोस्सादृश्य प्रत्यक्षं तदेकमेव वाच्यं तथा च तादृशसादृश्यप्रत्यक्षानन्तरं गवयोपमितिवद्गोरप्युपमितिस्स्याद्यदि तादृशसादृश्यप्रत्यक्षानन्तरं गवयोमितिवद्गोरप्युपमिति कस्यचिदभिमता येन गवोपमितिरपि स्वीक्रियेत् तादृशप्रत्यक्षस्योपमितिकरणत्वाङ्गीकारे च गवयोपमितिवद्गवोपमितिरप्यावश्यकीति न गवये चक्षुरादिसन्निकृष्टे गोसादृश्यप्रत्यक्षमुपमानम्—नापि सादृश्यानुमितिरुपमानम्—सा च गो सदृशो गवय इत्याकारैव वाच्या न सोपमानं भवितुमर्हति—तथात्वेस प्रत्यक्षयोरप्युपमितित्वप्रसङ्गात्—किञ्च गवयमपश्यतोपि पुरुषस्य गोसादृश्यानुमितिसम्भवेन तदनन्तरमप्युपमितिस्स्यान्नैतद्भवितुमर्हति गोसादृश्यानुमितेर्व्याप्तिप्रयदपूर्वकत्वेनेति तदनन्तरमेव गो सदृशो गवय इतिज्ञानसम्भवात्कृतमनुमित्यात्मकेनोपमानेन—। नाप्युपमितिरुपमानम्—तस्यास्स्वात्मकोपमितिम्प्रतिकरणत्वे आत्माश्रयः । उभययोरन्योन्यम्प्रतिकरणत्वेऽन्योन्याश्रयः । करणभूतोपमितेरप्युपमित्यात्मककरणत्वाङ्गीकारे तस्याप्युपमित्यन्तरं वक्तव्यमित्यनवस्थाप्रसङ्गेन नच करणभूतोपमितेर्न करणमुपमित्यन्तरमिष्यत इत्यपि शक्यं वक्तुं तथा सत्युपमितेरुपमिति करणत्वव्याघातादिति नोपमितिरप्युपमानम्—

ताविमावितीन्द्रियजेऽपि प्रसङ्गात् [b] सोऽपि गवयो गवा सदृशो गवयत्वात् गवयान्तरवदित्यनुमानस्यापि [c] तथात्वापत्तेः [d] एवमाप्तोक्तिजेऽपि किञ्चोपमितिलक्षणमिदं उपमितिकरणलक्षणं वा स्यान्नाद्यः [e] सादृश्यस्योपमेयतापत्तेः [f] *सदृशे चोपमेयव्यवहारोऽस्ति चन्द्रोपमेयं मुखमित्यादि सदृशमिति [g] सा?* —इति चेन्न, [h] अक्षादिकरणासम्भवे तदुदाहरणासिद्धेः नापि द्वितीयः [i] सादृश्यज्ञानस्य सर्वस्यासम्भवत्प्रमाणान्तरव्यापारफलजनकताया दर्शयितुमशक्यत्वात् [j] नच सादृश्यमनुगतमेकमस्ति [k] मुखसादृश्यस्य हस्तसादृश्यस्य च परस्परभेदेनैवोपलम्भात् ।

टी० ॥ [a] "स्मृतावि"ति । सादृश्यस्मृतावित्यर्थः सादृश्यगोचरः परोक्षानुभवश्चेद्भवति तस्तत्राह—। [b] "सोपी"ति ॥ [c] "तथात्वे"ति । उपमात्वापत्तेरित्यर्थः ॥ [d] "एवमि"ति । गोसदृशो गवय इत्यादिशब्दजन्यानुभवस्याप्युपमानत्वप्रसङ्ग इत्यर्थः । [e] "सादृश्यस्ये"ति । सदृशो धर्मी लोक उपमेयो न सादृश्यमित्यर्थः तदेवाह—। [f] "सदृश" इति ॥ [g] "सेती"ति । उपमितिरित्यर्थः ॥ [h] "अक्षादी"ति । प्रत्यक्षेण या सदृशमितिः प्रमा सा तावन्नोपमितिस्तत्र साक्षात्त्वानुभवात् एवमनुमितिशाब्दज्ञानयोरपि वाच्यम् तदतिरिक्ता च मितिर्नास्त्येव योपमितिः स्यादित्यर्थः ॥ [i] "सादृश्यज्ञानस्ये"ति । सादृश्यज्ञानं तदा पृथक् प्रमाणं स्याद्यदि क्लृप्तप्रमाणव्यापारापेक्षया विलक्षणोऽस्य व्यापारः स्यादेवं तत्फलापेक्षया विजातीयं फलं स्यादथवा प्रमाणान्तरासङ्कीर्णो विषयः स्यात् नचैवमित्यर्थः सादृश्यज्ञानमुपमानं सादृश्यभेदेनाननुगतं स्यादित्याह—। [j] "नचे"ति ॥ [k] मुखेति आह्लादकत्वकोमलत्वारुणत्वादीनां भेदादित्यर्थः

नापि बोधस्तस्य शक्तिग्राहकपदज्ञानजन्यतया गोसदृशो गवयपदवाच्य इति शक्तिग्रहकाल एव गवयबोधसम्भवादिति वैयर्थ्यं सादृश्यबोधस्योपमितिकरणत्वेनेति न तद्बोधोऽप्युपमानमित्यभिप्रेत्याह—नचेति—

मू० [a]नच सादृश्यरूपत्वमनुगतं तेष्वीत्यदोषः [b]तथापि सादृश्येन सह सादृश्ये ऽनेकस्थत्वादौ सादृश्यरूपत्वाश्रिते सादृश्यरूपत्वस्याश्रयणाभ्युपगमे परस्पराश्रयभावोऽ [c]नभ्युपगमे चाननुगमः [d]तयोः सादृश्यानभ्युपगमेऽन्यथापि तथात्वापत्तिः [e]किञ्च वैधर्म्यप्रतिपत्तेरपि प्रमाणान्तरत्वमेवं स्यादविशेषात् एवमेवाभ्युपगमे च परिगणितप्रमाणाधिक्यप्रसङ्गो वा सादृश्यबुद्धेरपि वा परिगणितेष्वन्तर्भावः स्यादिति [f]अप्रतीयमानस्य प्रतीयमानेन सह सादृश्यप्रमितिरुपमानमित्यपि न आप्तवाक्यादपि तथा प्रतीतेः * यच [g]तद्व्यापारो नास्ति ? *—इति चेन्न,

टी० ॥ नानासादृश्यगतं सादृश्यत्वमपि धर्मानुगतो नास्तीत्याह—। [a]"नचे"ति ॥ [b]"तथापी"ति । सादृश्येषु यदेकं सादृश्यत्वमनुगतं वाच्यं तत्रापि सादृश्यत्वेन सहानेकवृत्तित्वादिना सादृश्यमस्त्येवेति सादृश्ये सादृश्यत्वं तत्र च सादृश्यत्वे सादृश्यमित्यन्योन्याश्रय इत्यर्थः ॥ अनेन भयेन यद्येकं सादृश्यत्वं नाभ्युपेयं तदाननुगम इत्याह— [c]"अनभ्युपगमेचे"ति । अथ सादृश्यसादृश्यत्वयोर्न सादृश्यं तदा सादृश्यबुद्धेरविशेषात् मुखचन्द्रयोरपि सादृश्यं न स्यादित्याह—। [d]"तयोरि"ति ॥ [e]"किंचे"ति । धिक्करभमतिदीर्घग्रीवं प्रलम्बोष्ठं कठोरकण्टकाशिनमपसदं पशूनामिति पश्वन्तरवैधर्म्यज्ञानवतोप्ययमसौ करभपदवाच्य इति प्रमितिरस्ति तत्कारणं प्रमाणान्तरं स्यादित्यर्थः शाबरमुपमानं शङ्कते—। [f]"अप्रतीयमानस्ये"ति । सा गौरेतत्सदृशीति परोक्षधर्मिकसादृश्यज्ञानमुपमानमित्यपि नेत्यर्थः ॥ [g]"तद्व्यापार"इति । शब्दव्यापार इत्यर्थः ॥

मू० [a]स चायं चाभिन्नाविति वत् स चायं च सदृशाविति पूर्वप्रतीतस्य प्रतीयमानेन सहैन्द्रियकसादृश्यप्रतीतावपि

प्रसङ्गात् [b] * इन्द्रियासम्प्रयुक्तस्य ? *—इति चेन्न, प्रत्यक्षतो गोगवयसादृश्यं प्रतीत्य सापि च गौर्गवयः सदृशो गोत्वादियमिवेत्यनुमितावपि प्रसङ्गात् * अलिङ्गजापि ? *—इति चेत्, नत्वेवं प्रत्यक्षानुमानशब्दानुत्थत्वे सतीत्युक्तं स्यात् तथा च [c] विशेषणमेव समर्थमित्यप्रतीयमानस्येत्यादि व्यर्थम्। * नोपादेयमेव पदान्तरम् ? *—इति चेन्न, [d] अर्थापत्तेरवश्यम्भावात् (१) [e] तेन सार्द्धमेतत्सादृश्यस्यानेन सार्द्धं तत्सादृश्यव्यतिरेकेणानुपपद्यमानत्वात् [f] अन्यथावैधर्म्यप्रत्ययोत्पत्तिविषयं प्रमाणं प्रमाणान्तरमापद्येत तस्मादयं ह्रस्व इति प्रतीतेरस्मात्स दीर्घ इति वा अन्यथा कतमा प्रमा स्यादर्थापत्तिं प्रमाणान्तरमनिच्छतापि इयमर्थापत्तिरनुमानेवान्तर्भाव्या पृथक्प्रमाणीकर्त्तव्या वा ॥

टी० ॥ [a] "स चायं चे"ति । यद्यपि तत्र तत्तेदन्ताविशिष्टस्य धर्मिण एकत्वमिति भवति विशेष्यसन्निकर्षात्तादृशं प्रत्यक्षं प्रकृते विशेष्यभेदाच्च तादृशप्रत्यक्षसम्भवस्तथापि विशेष्यसन्निकर्षमात्रं प्रत्यक्षे तन्त्रं नतु यावद्विशेष्यसन्निकर्षोऽपि अन्यथा भ्रान्तविपरीतप्रत्यभिज्ञानं न स्यादिति भावः इन्द्रियव्यापारं विना यदसन्निकृष्टे सादृश्यज्ञान तदुपमानमितिशङ्कते—। [b] "इन्द्रिये"ति ॥ [c] "विशेषणमेवे"ति । प्रत्यक्षाद्यजन्यत्वे सत्य प्रतीयमानस्य प्रतीयमानेन सादृश्यप्रमितिरुपमितिरित्यत्र विशेषणमात्रस्यैव लक्षणत्वमुचितमित्यर्थः ॥ [d] "अर्थापत्तेरि"ति । अर्थापत्त्यैव प्रकृतफलसिद्धेः किमुपमानेनेत्यर्थः तामेव दर्शयति—। [e] "तेने"ति । अन्यथा तद्विधर्मायमिति प्रतीत्यनन्तरमेव तद्विधर्मा स इत्यपि प्रमाणान्तरफलं स्यादित्याह—। [f] "अन्यथे"ति ।

(१) किमुपमानेनेतिशेषः।

सू० [a] एतेनाप्रतीतगवयगवान्तर(१)सादृश्यस्य(२) दृष्टान्ताभावेनानुमानासम्भावात् गवयेनानेन सदृशी सा गौरिति मितिरुपमितिरित्यपि व्युदस्तम् [b] तथैतत् सादृश्यास्यैतेन तत्सादृश्यं विनानुपपत्त्यैव सिद्धः [c] अनवगतसङ्गतिसञ्ज्ञासमभिव्याहृतवाक्यार्थस्य सन्निन्यनुसधानमुपमानमित्यपि न [d] (३)प्रस्मृतसङ्गतेरेवम्भूतोयमित्यव्यापनात् * अस्मृतसङ्गतीत्यभिधेय(४)म् ? *—इति चेन्न, [e] अनुभूतस्मृतकालान्तरप्रस्मृतसङ्गतेरव्यापनात् * अस्मर्यमाणा ? *—इति चेन्न, कदाचिदस्मर्यमाणतायाः(५)स्तचापि सम्भवात् सर्वदा अस्मर्यमाणतयाः क्वचिदप्यसम्भवात् * उपमितिप्राक्काले ? *—इति चेत्, स्यादप्येतद्यद्युपमितिर्लक्षिता स्यात् तदर्थमेव तु(६) क्रन्दनमिदं भवतः किञ्च [f] सर्वैरनवगतसङ्गतित्वस्य प्रकृतेप्यसिद्धेः केनाप्यनवगतसङ्गतित्वस्य वाक्यजेपि सम्भवात् उपमाचेति च [g] पूर्ववन्निरस्तं यस्याः प्रमितेर्येन प्रमाणेति चाभिधानेनुगतरूपाभावाद्व्याप्तौ पतनेन लक्षणाननुगत्यापत्तेः ॥

टी० ॥ ननु येन गवान्तरगवयान्तरसादृश्यं न प्रतीतमस्ति तस्य सा गौरेतत्सदृशी गोत्वादित्यनुमानं न सम्भवति दृष्टान्ताभावादतः

(१) सामान्यस्येति पुस्तकान्तरपाठः ।

(२) अदृष्टान्तानुमानासम्भवादिति तु पुस्तकान्तरपाठः ।

(३) विस्मृतेत्यर्थः ।

(४) अनवगतस्थानेऽस्मृतसङ्गतीत्यभिधेयमित्यर्थः, तथा च तत्रानवगतत्वाभावेप्यस्मृतत्वमस्त्येवातो न दोषः ।

(५) कदाचिदस्मर्य्यमाणतायाः, अर्थात् कदाचित्स्मर्य्यमाणताया इत्यर्थः ।

(६) आक्रोशः ।

Digitized by Google

सैवोपमितिरित्यपि निरस्तमर्थापत्तित एव तत्फलसिद्धेरित्याह—। [a]"एते ने"ति । अतिदेश्यमाह—। [b]"तये"ति । आचार्यलक्षणं दूषयति—। [c]"अन-वगते"ति । अनवगता सङ्गतिर्यस्याः सञ्ज्ञायाः सा तथा तत्समभिव्या-हृतं यद्वाक्यं गोसदृशो गवय इति रूपं तदर्थस्य सञ्ज्ञिनि गवये प्रत्यक्षे यदनुसन्धानमयमसौ गवयपदवाच्य इति सैवोपमितिः प्रत्यक्षाद्यसाध्य-त्वादित्यर्थः ॥ [d]"प्रस्मृते"ति । तत्रानवगतत्वाभावादित्यर्थः ॥ [e]"अन-नुभूते"ति । तत्रास्मृतत्वाभावादित्यर्थः ॥ दोषान्तरमाह—। [f]"सर्वैरि"-ति ॥ [g]"पूर्वैर्वदि"ति । उपमितिनिरूप्यत्वात्तस्येत्यर्थः ॥

खं॰ [a]सञ्ज्ञेत्यपि व्याकुलं गोसदृशो गवयः प्रायः कानने भवति दृश्यते इति श्रुतवाक्यस्य काननपदाविदितसङ्गतेः गवयपदविदितसङ्गतेश्च सञ्ज्ञासञ्ज्ञिसंबन्धप्रतिपत्तिफलाया(१)मोहशप्रतिपत्तौ गतत्वेनातिव्यापकत्वात् [b]विनापि वा(२) प्रायः शब्दमभिहितस्य(३) तस्यानुसन्धाने प्रसङ्गः न च काननसञ्ज्ञासञ्ज्ञिसबन्धावधारणे(४)ष्य [c]न्यथैव पदान्तरसम्बन्धोत्थाया अन्यथानुपपत्तेः प्रमाणत्वानुपमानस्य [d]उपमेयसञ्ज्ञासमभिव्याहृतेति विशेषणे च [e]पूर्व एव निरासः वाक्यार्थेत्यपि [f]तादृगेव [g]प्रतिपत्तिकालास्मृतातिदेशवाक्यगतकाननादिपदार्थस्य तथाविधप्रत्ययाव्यापनात् ॥

(शेषमये)

(१) इदं, काननं, गवयाधारत्वादित्यनुमित्यात्मकप्रतिपत्तावित्यर्थः ।

(२) प्रायः पदस्य व्याप्तिसूचकतयानुमितिर्लभ्यते इति ज्ञेयम्—

(३) काननसञ्ज्ञासञ्ज्ञिसम्बन्धस्य प्रसिद्धगवयपदशक्तिविध्यानुपपत्त्याऽनुसन्धान इत्यर्थः ।

(४) गोसदृशो गवय इत्यत्रैवेत्यर्थः ।

॥ श्रीः ॥

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(Continued from page 264. Vol. IX.)

टी० “सत्यं ज्ञानमित्यादिना, स खल्वेवमुपन्यस्तः प्रतिपत्तिसौकर्यायाचार्यपादैः, तथा हि सत्यादिवाक्यं सत्य[1]त्वादिगुणविशिष्टमेव ब्रह्म प्रतिपादयति नीलमुत्पलमित्यादिषु समानाधिकरणवाक्येषु विशिष्टैकार्थपरत्वव्युत्पत्तेः सत्यादिवाक्यस्य च समानाधिकरणत्वाच्च, तथा च सामानाधिकरण्यलक्षणं भिन्नप्रवृत्तिनिमित्तानामित्यादिनोक्तं शाब्दैः, तत्र यदुक्तं सामानाधिकरण्यस्यैकार्थ्यपरत्वव्युत्पत्तेरैकार्थ्ये च पदानां विशेषणमात्रपरत्वे विशिष्टपरत्वे वासिद्धेः स्वरूपमात्रैक्यपरत्वं सत्यादिसमानाधिकरणपदानामास्थेयमिति तदयुक्तं विकल्पासहत्वात् किं सत्यादिपदानि तत्तत्पदार्थविरोधिव्यावृत्तिमात्रपराणि? उत स्वरूपमात्रपराणि? उत विरोधिव्यावृत्त्यवच्छिन्नस्वरूपपराणी?ति विवेचनीयं, न तावद्विरोधिव्यावृत्तिमात्रपराणि व्यावर्तमाना[2]नामनेकत्वेनैकार्थत्वासिद्धेः, व्यावर्त्यानेकत्वाद्व्यावृत्तयो ह्यनेकाः स्युः, नापि स्वरूपपराणि तथा सति पदानां पर्यायत्वप्रसङ्गात् प्रवृत्तिनिमित्तभेदाभावेन सामानाधिकरण्यलक्षणहानिप्रसङ्गादेकतरपदवैयर्थ्यप्रसङ्गाच्च। नापि तदवच्छिन्नस्वरूपपराणि विकल्पासहत्वात् किं विरोधिव्यावृत्तीनां स्वरूपावच्छेदकत्वमुपलक्षणतया? विशेषणतया? वा न तावदाद्यः कल्पः, एकेनोपलक्षणेन स्वरूपं प्रतिपन्नमिति उपलक्षणान्तरवैयर्थ्यात् उपलक्ष्याद्बहिर्भूत उपलक्ष्यप्रतीत्युपायो धर्म उपलक्षणमिति ह्युपलक्षणविदः। तथा च शाखायादिषु दृश्यते ह्यत एकतरपदवैयर्थ्यं, प्रवृत्ति-

१ सत्यादिगुणविशिष्टमेवेति द्राविडा अधीयते ।

२ व्यावृत्तीनामनेकत्वेनेति पुस्तकान्तरपाठः ।

Digitized by Google

निमित्तभेदाभावेन सामानाधिकरण्यलक्षणहानिश्च । कथं तर्हि भवत्पक्षे जन्मादिबहूपलक्षणत्वमेकस्यैव ब्रह्मणोऽभ्युपगम्यत इति चेत् उच्यते तत्र ह्युपलक्ष्यस्य धर्मिणो ब्रह्मण एकत्वेऽपि प्रत्युपलक्षणमुपलक्ष्य[1]धर्मभेदो जन्मस्थित्याद्यनुगुणज्ञानशक्त्यादिरूपोऽस्माभिरभ्युपगम्यते अन्यथा तत्राप्यनेकोपलक्षणवैयर्थ्यं प्रसज्यत एव, त्वत्पक्षे त्वनेकोपलक्षणोपलक्ष्यधर्मभेदानभ्युपगमादुक्तदोषो दुर्वारः, तदभ्युपगमे हि ब्रह्मणः सविशेषत्वप्रसङ्गः। नापि द्वितीयः, विशेषणभूतानां व्यावृत्तीनामनेकत्वेनैकार्थत्वासिद्धेः, विशेष्यान्तर्भूतो विशेष्यप्रतीत्युपायो धर्मो हि विशेषणं, विशेष्यान्तर्भावो नाम ज्ञाप्यान्तर्भावः, विशेषणभूतार्थभेदेऽपि विशेष्यभूतप्रधानार्थैक्यादैकार्थ्यसिद्धिरिति चेत् तत्सखण्डवाक्यार्थवादिनोऽपि समानं, कस्तर्हि विशेष आवयोरिति चेत् अयमेव विशेषः, यदेकस्य मते पदानां लाक्षणिकत्वमितरस्य पक्षे तेषां मुख्यत्वमिति । यच्चोक्तं विशेषणान्तरविशिष्टे वस्तुनि विशेषणान्तरान्वयाद्विशेषणानामन्योन्यसमवायप्रसङ्ग इति तदसत् विकल्पासहत्वात् "पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् । न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधक"मित्युक्तप्रक्रियया हि वाक्यमर्थमवबोधयति, तत्र किं पदानां पदार्थस्मा[2]रणदशायामन्योन्यसमवायप्रसङ्गः? उत परामर्शदशायाम्? अहोस्विद्वाक्यार्थाभिधानदशायां?, न तावत्प्रथमः कल्पः स्मारणदशायां पृथक्पृथक्पदार्थस्मरणेन मिथोऽन्वयप्रसङ्गाभावात् । नापि द्वितीयः, एकस्मिन्वस्तुन्यविरुद्धानेकविशेषणसमवायस्य प्रत्यक्षाद्यवगतस्य यथाऽवस्थितवस्तुपरामर्शदशायां परामृश्यमानत्वात् । नापि तृतीयः वाक्यार्थाभिधानदशायां सर्वैः [3]पदैर्युगपदनेकविशेषणविशिष्टैकवस्तुविषयैकज्ञानजनकत्वेन क्रमोभिधानप्रयुक्तान्योन्यसमवायप्रसङ्गाभावात् यथैव हि द्वे चक्षुषी जातिगुणाद्यनेकविशेषणविशिष्टैकवस्तुविषयामेकां धियं युगपज्जनयतः तथैवानेकपदा-

---

१ उपलक्ष्यधर्मभेद इति पाठान्तरम् ।

२ पदार्थस्मरणदशायामिति पुस्तकान्तरपाठः ।

३ सर्वेषां पदानामिति तु युक्तो भाति पाठस्तत्र षष्ठ्या एव साधुत्वादिति तज्ज्ञाः ।

नि युगपदेव तत्तद्विशेषणविशिष्टैकवस्तुविषयैकज्ञानजनकानि भवन्ति क्रमेणाभिधानेऽपि नान्योन्यसमवायप्रसङ्गः पदान्तरोपप[1]र्वाविशिष्टे विशेष्यांशस्यैव पदान्तरोपात्तविशेषणैर्विशेष्यमाणत्वात्तच्च यथादृष्टविषयत्वात् पदानां व्युत्पत्तेः, अन्यथा भवत्पक्षे व्यावृत्तिरूपविशेषणानामन्योन्यविशेषणविशेष्यभावः क्रमाभिधानप्रयुक्तो दुर्वारः, अतो यथोक्त एव परिहारस्तवापि शरणं, क्रमेणाभिधानानभ्युपगमे कथमुद्देश्योपादेयविभागसिद्धिरिति चेत् उच्यते ज्ञाताज्ञातविभागो ह्युद्देश्योपादेयविभागः, स च युगपत्प्रतिपादनेऽपि नापैति एकेन वाक्येनैकस्य वस्तुनोऽनेकविशेषणान्वये युगपत्प्रतिपाद्ये तत्रैकविशेषणान्वयः प्रागेव ज्ञातः, विशेषणान्तरान्वयस्त्वज्ञात इति ज्ञाताज्ञातविभागपरामर्शः परामर्शदशायां संभवत्येव । यदप्युक्तं विशिष्टैक्यप्रतिपादने विशेष्यैक्यवद्विशेषणैक्यं प्रसज्यत इति तदपि न साधीयः, विशेष्यमात्रैक्यपरत्वात्समानविभक्तेः, तच्च व्युत्पत्तिसिद्धं व्युत्पत्तिश्च प्रत्यक्षमूला प्रत्यक्षं च विशेष्यैक्यमेवावगमयति न तु विशेषणानामैक्यं, यथा गौरित्याद्येकपदप्रयोगेऽपि प्रातिपदिकावगतविशेषणविशेष्यैक्यं तद्गतमेकवचननावगमयति किं तु विशेष्यैक्यमेवावगमयति प्रत्यक्षमूला व्युत्पत्तिरेव हि तत्र कारणं, तथा समानाधिकरणपदसङ्घातस्थसमानविभक्तिरपि विशेष्यमात्रैक्यपरत्वेनैवनियामिका अन्यथा भवत्पक्षे असत्यादिप्रतियोगिव्यावृत्तिरूपविशेषणैक्यप्रसङ्गात्, प्रातिपदिकानां तत्तत्प्रतियोगिव्यावृत्तिविशिष्टस्वरूपपरत्वेऽपि समानविभक्तेः प्रातिपदिकार्थैकदेशभूतविशेष्यमात्रैक्यपरत्वव्युत्पत्त्या न विशेषणैक्यं प्रसज्यत इति चेत्तदस्मत्पक्षेऽपि समानम्, आवयोर्विशेषस्तु प्रागेवोक्तः । यच्चोक्तं विशेषणभेदे विशेष्यभेदप्रसङ्ग इति, तदयुक्तं विशेषणभेदमात्रस्य विशेष्यभेदकत्वाभावात्तत[2]श्च देवदत्तः श्यामो युवेत्यादिषु विशेषणभेदेऽपि विशेष्यैक्यदर्शनात् विशेषणभेदस्य स्वतःप्राप्तविशेष्यभेदकत्वं प्रत्यक्षेण तत्रापोद्यत इति चेत् तत्र धर्मवाचिपदैक्यात्समानविभक्तिनिर्देशाच्चैक्यप्रतीतेः

१ पदान्तरोपात्ते इति पुस्तकान्तरम् ।

२ तच्चेति तु पुस्तकान्तरम् ।

खण्डो मुण्डः पूर्णशृङ्गो गौरित्यत्र धर्मिवाचिपदैक्ये समानविभक्तिनिर्देशे सत्यपि विशेषणभेदाद्विशेष्यभेदः प्रतीयत इति चेन्नैवं यतः स्वतःप्राप्तं तयोर्विशेष्यैक्यप्रत्यायकत्वं प्रत्यक्षेण तत्रापोदितं, परोक्षविषयेऽपि खण्डः पूर्णशृङ्गो गौरित्यादिवाक्ये प्रयुक्ते खण्डत्वादिविशेषणभेदे विशेष्यभेदप्रतीतिर्दृश्यत इति चेत् परोक्षविषयेऽपि देवदत्तः श्यामो युवेत्यादिवाक्ये प्रयुक्ते श्यामत्वादिविशेषणभेदेऽपि विशेष्यैक्यप्रतीतिर्दृश्यत इति समानश्चर्चः, को निर्णायक इति चेत् यज्जातीयविशेषणानां नियमेन भिन्नाश्रयत्वं दृष्टं प्रत्यक्षेण तज्जातीयविशेषणानां परोक्षत्वेऽपि विशेष्यभेदापादकत्वं यथा खण्डत्वादीनां, यज्जातीयविशेषणानां भिन्नाश्रयत्वनियमो न दृष्टः तज्जातीयविशेषणानां धर्मिवाचिपदैक्ये समानविभक्तिनिर्देशे चैकविशेष्यनिष्ठत्वं युक्तं, यथा नीलत्वादीनामिति । यच्चोक्तं समानविभक्त्यवगतैक्यविरोधाद्विशेषणपरित्याग इति तदप्ययुक्तं प्रातिपदिकाभिहितविशेषणान्वयविरोधादैक्यपरित्यागापत्तेः, तथा हि यदि समानविभक्त्यन्वयावगतत्वादैक्यं न हातुं शक्यते तर्हि प्रातिपदिकावसितविशेषणान्वयः कथमिव हातुं शक्यते यथा नीलमुत्पलमित्यादौ, तत्र प्रत्यक्षसिद्धत्वादङ्गीक्रियत इति चेत् तत्रैक्यप्रतीतिरपि तथैव किमिति न स्यात् समानविभक्तिनिर्देशे परोक्षेऽप्यैक्यप्रतीतिः शाब्दी दृश्यत इति चेत् तथैव प्रयोगे परोक्षेऽपि प्रातिपदिकावगतविशेषणान्वयप्रतीतिर्दृश्यत एव तस्मादैक्यप्रतीतिः शाब्दी चेद्विशिष्टप्रतीतिरपि शाब्दीति न कश्चिद्विशेषोऽन्यत्राभिनिवेशात् । किंच प्रातिपदिकागतविशेषणान्वयपरित्यागहेतुभूतसमानविभक्त्यवगतमैक्यं किं स्वरूप? मुत तदतिरिक्तम्? अतिरिक्तपक्षे सविशेषत्वप्रसङ्गः, अनतिरिक्तपक्षे हेत्वसिद्धिः, प्रातिपदिकावगतस्वरूपातिरेकेण समानविभक्त्या कस्य चिदैक्यस्याप्रतिपादनात्, न हि स्वरूपतः[1] तत्र विरोधाद्विशेषणत्यागः, अधिकरणवाक्येष्वपि तत्त्यागप्रसङ्गात् प्रातिपदिकावगतं स्वरूपं निर्विशेषमिति प्रतिज्ञाय समानविभक्तेरैक्यवगमादित्युक्ते स्वरूपावगमादित्युक्तम् । ततश्चैक्यावगमविरोधरूपहेत्वसिद्धिः, स्वरूपं तु विशेषणान्वयाविरुद्धं व्यधि-

१ न हि स्वरूपमात्रे विरोधाद्विशेषणपरित्यागः इति पुस्तकान्तरे ।

करणवाक्येषु विशेषणान्वयावगमादित्युक्तम् । किंच समानविभक्त्यवगत-
मैक्यं च प्रातिपदिकार्थैकदेशभूतविशेष्यमात्रस्येत्युक्तत्वात्तस्य विशेषणभेदा-
विरोधित्वाच्च तद्विरोधनिबन्धनविशेषणत्यागो युक्तः, यतो न निर्देश-
विशेषत्वं वस्तुनः, कार्चर्येऽव्यावृत्तपीतिमव्यावृत्तं शौक्ल्यमित्यादिषु प्रति-
योगिभेदस्य तत्तद्व्यावृत्तस्वरूपस्य च शब्दोपात्तत्वाच्च लक्षणाप्रसङ्गः, सत्या-
दिवाक्ये तु न तथेति विशेषः, एवं शौक्ल्यादिदृष्टान्तवाक्यात् सत्या-
दिदार्ष्टान्तिकवाक्यस्य शब्दद्वारकवैषम्यमुक्तम् । अर्थद्वारकं च वैषम्यं
पूर्वोक्तं द्रष्टव्यं, कथमिति चेदित्थं शौक्ल्यादेः कस्यचिद् द्रव्यस्य द्रव्या-
न्तराद्व्यावर्तकधर्मतया धर्मान्तरानपेक्षत्वं युक्तं, ब्रह्मणस्तु न तथात्व-
मिति स्वरूपातिरिक्तव्यावर्तकधर्मापेक्षाऽस्त्येव न हि परनिर्वाहकत्वानभ्यु-
पगमे स्वनिर्वाहकत्वसंभवः । किंच शौक्ल्यादिस्वरूपस्फुरणे सति न
कार्ण्याद्यध्यासप्रसङ्गः, अतस्तत्र स्वरूपमेव व्यावृत्तिरिति युक्तमभ्युपगन्तुं
ब्रह्मस्वरूपस्फुरणेऽपि तदितराध्यासाभ्युपगमाज्जडतादिव्यावर्तकाधिष्ठा-
नस्वरूपातिरिक्तशुक्त्यादिवत् सर्वाध्यासाधिष्ठानब्रह्मस्वरूपातिरिक्तस-
कलेतरव्यावृत्तिरूपधर्मोऽवश्याभ्युपगमनीयः । यच्चोक्तं वाच्ये प्रधानांशस्य
प्रतिपादनाच्च लक्षणेति तदप्यसत् विशेषणद्वारेण विशेष्यपर्यवसायिनः
शब्दस्य द्वारानभिधाने द्वार्यभिधानासिद्धेः, फलार्थिकत्वेऽपि विशिष्टा-
भिधानस्वारस्यस्य शब्दस्य विशेष्यमात्रपरत्वे स्वारस्यहानिरवर्जनीया सा च
न विरोधाभावे युक्ता । यच्च विषं भुङ्क्ष्वेत्यादिषु सर्वपदलक्षणा दृष्टेति
तच्च विधिप्रत्ययांशस्य मुख्यार्थत्वादयुक्तं, तच्च विधिप्रत्ययव्यतिरिक्तशब्द-
लक्षणा च मुख्यार्थत्वे प्रमाणान्तरविरोधादङ्गीक्रियते प्रस्तुतेऽपि तु विरो-
धाभावान्न सा युक्ता विमतं वाक्यमखण्डार्थं समानाधिकरणवाक्यत्वात्
संप्रतिपन्नवदिति ईदृश्यनुमानोक्तिरनुपपन्ना वाक्यमखण्डार्थमिति पदयोर-
र्थभेदोऽस्ति न वा? अस्ति चेत्प्रतिज्ञावाक्य एव हेतोरनैकान्त्यं, न चेदख-
ण्डार्थत्वं प्रतिज्ञातमेव न स्यात् दृष्टान्तस्य च साध्यवैकल्यमवर्जनीयं
प्रकृतिप्रत्ययात्मकपदपुञ्जरूपत्वात्सर्ववाक्यानां, यदि भावरूपाखण्डार्थ-
प्रतिपादनासमर्थमिति प्रतिज्ञा तर्हि साध्यधर्मवचनान्तर्गतयोः समाना-

Digitized by Google

धिकरण्ययोर्भावरूपत्वाद् शब्दयोरनैकान्त्यं तस्मात्सत्यादिवाक्यं सत्यत्वा-
दिविशिष्टमेव ब्रह्म प्रतिपादयतीति सिद्धं तदिदमुच्यते "सत्यं ज्ञानमन-
न्तमित्यादिना । तत्र निर्विशेषपरत्वाभावं सोपपत्तिकं प्रतिजानीते "सत्य
ज्ञानमि"ति, सामानाधिकरण्यलक्षणप्रत्यभिज्ञापकशब्दैर्हेत्वंशं विवृणोति—

सू० प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वं हि सामानाधिकरण्यं
तत्र सत्यज्ञानादिपदमुख्यार्थैर्गुणैस्तत्तद्गुणविरोध्याका-
रप्रत्यनीकाकारैर्वा एकस्मिन्नेवार्थे पदानां प्रवृत्तौ निमि-
त्तभेदोऽवश्याश्रयणीयः । इयांस्तु विशेषः एकस्मिन् पक्षे
पदानां मुख्यार्थता अपरस्मिंश्च तेषां लक्षणा, न चाज्ञा-
नादीनां प्रत्यनीकता वस्तुस्वरूपमेव ।

टी० "प्रवृत्तीति", ततः किमित्यपेक्षायामन्वयमुखेन व्यावृत्तिमुखेन
वा प्रवृत्तिनिमित्तभेदस्यावश्याश्रयणीयत्वमाह "तत्रे"ति, तर्हि को विशेष
इत्यत्राह "इयानि"ति, अवश्याश्रयणीय इत्यत्राभिप्रेतं व्यावृत्तीनां स्वरू-
पमात्रत्वे दूषणमाह "न चे"ति, सामानाधिकरण्यासिद्धिमुपपादयति—

सू० एकेनैव पदेन स्वरूपं प्रतिपन्नमिति पदान्तरप्रयोगवैय-
र्थ्यात्तथा सति सामानाधिकरण्यासिद्धिश्च एकस्मिन्
वस्तुनि वर्तमानानां पदानां निमित्तभेदानाश्रयणात्, न
चैकस्यैवार्थस्य विशेषणभेदेन विशिष्टताभेदादनेकार्थत्वं
पदानां सामानाधिकरण्यविरोधि एकस्यैव वस्तुनोऽनेकवि-
शेषणविशिष्टताप्रतिपादनपरत्वात्सामानाधिकरण्यस्य,
भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सा-
मानाधिकरण्यमिति हि शाब्दिकाः ।

टी० "एकस्मिन्नि"ति, पर्यायत्वं दूषणं स्पष्टमिति तच्च कण्ठोक्तं, वि-
शेषणभेदेनानेकार्थत्वात् । सामानाधिकरण्यलक्षणहानिं निरस्यति "न चैक-

स्ये''ति, विशिष्टताभेदात्-तत्तद्विशेषणान्वयभेदात् तथाविधानेकार्थत्वञ्च विरोधि प्रत्युतानुकूलमेवेत्यर्थः । कुत इत्यत्राह "भिन्नप्रवृत्ती''ति, विशेषणतो भिन्नार्थत्वे विशेष्यतश्चैकार्थत्वे सति हि सामानाधिकरण्यलक्षणसामानाधिकरण्यसिद्धिरित्यर्थः । सामानाधिकरण्यवाक्यं किं विशेषणविशेष्यसंबन्धपरमुत ? विशेष्यैक्यपरम्? उतोभयपरम् ? प्रथमे विशेष्यैक्ये प्रमाणं न स्यात् । द्वितीये विषयान्वयो निष्प्रमाणकः स्यात् । तृतीये संबन्धद्वयस्यैकवाक्येन बोधयितुमशक्यत्वात् वाक्यभेदप्रसङ्ग इति केचिच्चोदयन्ति तच्च प्रातिपदिकेनैव विशेषणान्वयस्य बोध्यतया समानविभक्तिनिर्देशेन विशेष्यैक्यप्रतिपादने वाक्यभेदप्रसङ्गाभावात् । एवं सामानाधिकरण्यस्यान्यथैवोपपत्त्या सत्यज्ञानादिवाक्यस्य निर्विशेषपरत्वं निरस्तम् । अथ कारणवाक्यैकार्थ्यान्निर्विशेषपरत्वनिराकर्तुं तदनुवदति—

सू० यदुक्तमेकमेवाद्वितीयमित्यत्राप्यद्वितीयपदं गुणतोऽपि सद्वितीय[1]तां न सहते, अतः सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामद्वितीयवस्तुप्रतिपादनपरत्वमभ्युपगमनीयं कारणतयोपलक्षितस्याद्वितीयस्य ब्रह्मणो लक्षणमिदमुच्यते "सत्यं ज्ञानमनन्तं ब्रह्मे''ति अतो विलक्षयिषितं ब्रह्म निर्गुणमेव अन्यथा निर्गुणं निरञ्जनमित्यादिभिर्विरोधश्चेति, तदनुपपन्नम्—

"यदुक्तमित्यादिना, सदेवैकमेवेति विजातीयसजातीयभेदव्यावर्त्तकावधारणद्वयसमभिव्याहृतमद्वितीयपदं पारिशेष्यात् स्वगतभेदाभावपरमिति गुणतोऽपि सद्वितीयताञ्च सहत इत्यर्थः । "यस्सर्वज्ञः स सर्ववित्'' "यस्य ज्ञानमयं तपः'' "तस्मादेतत् ब्रह्म नामरूपमन्नं च जायत'' इत्यादिसगुणविषयकारणवाक्यैकार्थ्यमस्तीत्यत्राह "अत''इति, सर्वशाखाप्रत्यय-

१ सजातीयतां न सहते इति पुस्तकान्तरपाठः ।

न्यायान्निर्गुणकारणवाक्येषु सगुणत्वं, सगुण[1]वाक्येषु निर्गुणत्वं चोक्तं स्यात् तथापच्छेदन्यायेनापि निर्गुणवाक्यप्राबल्यात्सर्वकारणवाक्यानि निर्गुणपराणीत्यर्थः । कारणवाक्यैकार्थ्यं कुतोऽपेक्षितमित्यत्राह "कारणतयोपलक्षितस्ये"ति, जगत्कारणत्वं तटस्थलक्षणं न तु स्वरूपलक्षणमित्यभिप्रायेणोपलक्षितस्येत्युक्तं, कारणत्वशङ्कितदोषव्यावर्तकत्वादैकार्थ्यमवर्जनीयमित्यर्थः । अथ शोधकवाक्यान्तरैकार्थ्यात् निर्विशेषपरत्वोपपादनं निराचिकीर्षुरनुवदति "अन्यथे"ति, अनूदितमर्थं दूषयति "तदनुपपन्नमित्यादिना, तत्र प्रथमं कारणवाक्यैकार्थ्ये सविशेषविषयत्वे सतीत्याह—

सू० जगदुपादानस्य ब्रह्मणः स्वव्यतिरिक्ताधिष्ठात्रन्तरनिवारणेन विचित्रशक्तियोगप्रतिपादनपरत्वाद्द्वितीयपदस्य, तथैव विचित्रशक्तियोगमेवावगमयति "तदैक्षत बहु स्यां प्रजायेये"ति, "तत्तेजोऽसृजते"त्यादि, अविशेषेणाऽद्वितीयमित्युक्ते निमित्तान्तरमात्रनिषेधः कथं ज्ञायत इति चेत्—

टी० "जगदि"ति, "तथैवे"ति, अद्वितीयपदं यथाधिष्ठात्रन्तरनिवारणपरमेव भवति तथैवेत्यर्थः । शङ्कते "विचित्रशक्तियोगमेवे"ति, उत्तरवाक्यमुपादानभूतस्यैव ब्रह्मणोऽधिष्ठातृत्वशक्तियोगमेवावगमयति न तु निर्गुणत्वमित्यर्थः । शङ्कते 'अविशेषेणे"ति, सर्वनिषेधस्य निमित्तान्तरनिषेधस्य च साधारणमद्वितीयपदं निरुपपदत्वात् । किंच उपक्रमे सदेवैकमेवेति सजातीयविजातीयभेदयोर्निषिद्धत्वादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः सजातीयविजातीयभेदमात्रमिथ्यात्वेऽनुपपन्नत्वाच्चाद्वितीयपदमुपक्रमानुगुण्येन स्वगतभेदनिषेधपरं स्यात् न तूत्तरवाक्यानुगुणं स्यात् उपक्रमप्राबल्यादिति साक्षात्पूर्वपक्षिचोद्यं, निमित्तत्वोपादानत्वे उभे अप्युत्तरत्र श्रूयेते तत्रोपादानान्तरमद्वितीयपदेन निषिध्येत न तु निमित्तान्तरमिति पार्श्वस्थचोद्यं तत्राह—

१ सगुणकारणवाक्येषु इति पाठान्तरम् ।

सू० सिसृक्षोर्ब्रह्मण उपादानकारणत्वं "सदेव सौम्येदमग्र आसी""देकमेवे"ति प्रतिपादितं कार्योत्पत्तिस्वाभाव्येन बुद्धिस्थं निमित्तान्तरमिति तदेवाद्वितीयपदेन निषिध्यत इत्यवगम्यते, सर्वनिषेधे हि स्वाभ्युपगतास्सिषाधयिषिता नित्यत्वादयश्च निषिद्धाः स्युः ॥

"सिसृक्षोरिति, अनेन शङ्काद्वयं परिहृतं भवति तदैक्षतेत्यनन्तरोक्तत्वादस्य वाक्यस्य कारणपरत्वमपलपनीयमित्यभिप्रायेण सिसृक्षोरित्युक्तं, कारणपरत्वे च सत्यशब्देन विजातीयकालसद्भावसिद्धेर्जीवानादित्वश्रुतेरकृताभ्यागमकृतविप्रणाशादिप्रसक्त्यर्थापत्त्या वैषम्यनैर्घृण्यपरिहाराय जीवानां कर्मसूक्ष्मभेदस्य प्रलयदशायामभ्युपगमादेकत्वावधारणस्य जीवसूक्ष्मभेदसहत्वस्य परैरभ्युपगन्तव्यत्वात् सार्वज्ञ्यसर्वशक्तित्वादीनां सर्गोपयिकत्वाच्च विजातीयसजातीयस्वगतभेदाभावस्य दुर्वचत्वादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाश्चोक्तार्थाविरोधेन निर्वाह्यत्वात्परतन्त्रभेदस्य विहितत्वात्, निषेधस्य च विहितव्यतिरिक्तविषयत्वात्स्वतन्त्ररूपभेदविशेषस्य "न तत्समश्चाभ्यधिकश्चे"त्यादिभिर्निषेधितत्वात्सामान्यनिषेधस्य च तत्पर्यवसानस्य न्याय्यत्वाच्चाद्वितीयपदस्य स्वतन्त्रभेदनिषेधपरत्वे प्राप्ते सत्यविभक्तनामरूपताप्रतिपादकेनैकमिति पदेनोपादानत्वस्य सिद्धत्वात् निमित्तान्तरस्य बुद्धिस्थत्वाच्च निमित्तान्तररूपस्वतन्त्रवस्तुनिषेधपरमद्वितीयपदमित्यर्थः । सर्वनिषेधेऽनिष्टमाह—

सू० सर्वशाखाप्रत्ययन्यायश्च भवतो विपरीतफलः सर्वशाखासु कारणान्वयिनां सर्वज्ञत्वादीनां गुणानामेवोपसंहारहेतुत्वात् अतः कारणवाक्यस्वभावादपि "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यनेन सविशेषमेव प्रतिपाद्यत इति विज्ञायते ।

न च निर्गुणवाक्यविरोधः, प्राकृतहेयगुणविषयत्वात् तेषां, निर्गुणं निरञ्जनं निष्कलं निष्क्रियं शान्तमित्यादीनां ज्ञानमात्रस्वरूपवादिन्योऽपि श्रुतयो ब्रह्मणो ज्ञानस्वरूपता-मभिदधति ।

"सर्वे"ति, सर्वशाखाप्रत्ययन्यायस्य निर्विशेषत्ववादविपरीतत्वमाह "सर्वशाखे"ति, अत्र—निर्गुणवादे अत्र भवत इत्युपालम्भो वा सर्वशाखा-प्रत्ययन्यायेऽनुक्तगुणस्वीकारफलः, न तूक्तगुणत्यागफल इति त्वत्पक्षे विपरीत इत्यर्थः । सविशेषपरत्वे कारणवाक्यैकार्थ्यं निगमयति "अत" इति, न केवलं सामानाधिकरण्यान्यथानुपपत्त्या कारणवाक्यैकार्थ्याच्च सविशेष-परमित्यपि-शब्दस्य भावः । अथ शोधकवाक्यान्तरैकार्थ्यं निर्विशेषपरत्व-हेतुं निरस्यति "न चे"ति, परेणापच्छेदन्यायेन हि निर्गुणसगुणवाक्यवि-रोधः परिहृतः, अत्र भिन्नविषयत्वाद्विरोध एव नास्तीत्याह "प्राकृते"ति,-निर्गुणमिति गुणसामान्यनिषेधः, निष्कलमिति शरीरसामान्यनिषेधः, नि-ष्क्रियमिति क्रियासामान्यविनिषेधः, न तु गुणनिषेधः संकोचयितव्यः सार्वगु-णनिषेधबलेन सर्वगुणविरहावगमात् ज्ञानस्य ज्ञानादिगुणाश्रयत्वादर्शनात् ब्रह्मणो ज्ञानमात्रत्वप्रतिपादनेन निर्गुणत्वं हि फलितमिति शङ्कायामार्थ-गुणनिषेधं परिहर्तुं श्रुतिप्रतिपन्नमर्थमनुभाषते "ज्ञानमात्रे"ति, ततः किमित्यत्राह—

भा० न तावता निर्विशेषज्ञानमात्रमेव तत्त्वं ज्ञातुरेव ज्ञानस्वरूप-त्वात् ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वं मणिद्युमणिप्रदीपा-दिवद् युक्तमेवेत्युक्तं ज्ञातृत्वमेव हि सर्वाः श्रुतयो वदन्ति ॥

टी० "न तावते"ति, कुत इत्यपेक्षायां किं ज्ञानत्वात् ज्ञानाना-श्रयत्वमुच्यते ? किमेकजातीयतधर्मधर्मिभावानुपपत्तेरिति विकल्पे प्रथमं प्रतिवक्ति "ज्ञातुरेव ज्ञानस्वरूपत्वा"दिति, अयमर्थः, ज्ञानस्य ज्ञानादिगुणा-श्रयत्वाभावः किं व्याप्त्या कथ्यते ? उत श्रुतिबलात् व्याप्त्या चेत् ज्ञानाना-

Digitized by Google

आश्रयभूतं विषयप्रकाशकं ज्ञानं कस्यचिद्धर्मभूतमेव दृष्टमिति धर्मत्वेनाङ्गीक्रियतां, यदि श्रुतिबलात् स्वतन्त्रत्वेनाङ्गीक्रियते तर्हि श्रुतिबलादेव ज्ञानाश्रयत्वमप्यङ्गीक्रियतामिति ज्ञानानाश्रयत्वं धर्मभूतज्ञानत्वप्रयुक्तं न तु ज्ञानत्वमात्रप्रयुक्तमिति सोपाधिकत्वम्, अतो व्याप्तिविरोधश्च नास्ति । यद्वा जडस्य घटादेरिव ज्ञातृत्वायोगात् ज्ञातृत्वेनैव ज्ञानस्वरूपत्वमर्थसिद्धं, द्वितीयं प्रतिवक्ति "ज्ञानस्वरूपस्ये"ति, एकजातीयद्रव्ययोर्नियतधर्मधर्मिभाव उपपद्यत इत्यर्थः । श्रुत्या ज्ञानाश्रयत्वे सिद्धे हि तथाभ्युपगम इत्यत्राह "ज्ञातृत्वमेव ही"ति; यद्वा ज्ञातुरेव ज्ञानस्वरूपत्वादिति ज्ञातुर्ज्ञानस्वरूपत्वाविरोधादित्यर्थः । एकजातीयद्रव्ययोर्नियतधर्मधर्मिभावानुपपत्त्या विरोधं परिहरति "ज्ञानस्वरूपस्यैवे"ति, ज्ञानत्वात् ज्ञानानाश्रयत्वं परिहरति "ज्ञातृत्वमेव ही" ति, पूर्ववदभिप्रायः, ज्ञातृत्वं यथाफलितं भवति तादृशगुणपराश्च ज्ञातृत्वकण्ठोक्तिमत्यश्च श्रुतयः सर्वशब्दविवक्षिताः । बहुवचनेन बहूपनिषद्वाक्यानि वा विवक्षितानि एवकारेण ज्ञातृत्वस्यानन्यथासिद्धिरभिप्रेता, हि-शब्दो हेतौ ज्ञातृत्वस्य श्रुतिसिद्धत्वान्न काचिदनुपपत्तिरित्यर्थः । काः पुनः श्रुतय इत्यपेक्षायामपि प्राकृतगुणनिषेधपरिहारार्थं निर्गुणश्रुतिसंकोचसिद्ध्यर्थं सगुणश्रुतीनामाविष्कृतगुणविषयत्वशङ्कापनोदार्थं च श्रुतीर्दर्शयंस्ताभिरेतत्प्रयोजनत्रयसिद्धिं च दर्शयति—

मू० "यः सर्वज्ञः सर्ववित्" "तदैक्षत" "सेयं देवतैक्षत" "स ऐक्षत लोकान्नु सृजा" इति, "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" "ज्ञाज्ञौ द्वावजावीशानीशौ" "तमीश्वराणां परमं महेश्वरं" "तं देवतानां परमं च दैवतं पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यम्" ॥

टी० "यः सर्वज्ञ इत्यादिना, यः सर्वज्ञः सर्ववित् सर्वं स्वरूपतः प्रकारतश्च जानातीत्यर्थः । ज्ञानस्य सर्वविषयत्वं तस्य समष्टिव्यक्तिसृष्टु-

पयोगित्वमात्मसंबन्धित्वं च दर्शयति तदैक्षतेत्यादि वचोभिः नित्यो नित्यानामित्यत्र चेतनबहुत्वमुक्तं कामप्रदत्वं च ज्ञाज्ञौ द्वावजावित्यत्र ज्ञातृत्वमीश्वरत्वं च तमीश्वराणामित्यत्र ईश्वरत्वदैवतात्वपतित्वानि ईश्वरत्वं नियन्तृत्वं निया[1]म्यविषयज्ञानवत एव नियन्तृत्वात् नियमनस्य ज्ञानविशेषरूपत्वाच्च नियन्तृत्वेन ज्ञातृत्वसिद्धिः, दैवतात्वं कामैराध्यत्वं पतित्वं शेषित्वम्-

मू० "न तस्य कार्यं करणं च विद्यते" "न तत्समश्चाभ्यधिकश्च दृश्यते" "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको ऽविजिघत्सोऽपिपासः" "सत्यकामः सत्यसङ्कल्प" इत्याद्याः श्रुतयो ज्ञातृत्वप्रमुखान् कल्याणगुणान् ज्ञानस्वरूपस्यैव ब्रह्मणः स्वाभाविकान् वदन्ति समस्तहेयगुणविरहिततां च ।

टी० "न तस्ये"ति, कार्यं—शरीरं करणमिन्द्रियादि "कार्यकारणकर्तृत्वे" इति प्रयोगात् समाभ्यधिकनिषेधश्चात्र श्रूयते तेनाद्वितीयमितिसामान्यनिषेधस्य "छागो वा मन्त्रवर्णा"दिति न्यायादीश्वररूपद्वितीयविशेषपर्यवसायित्वं सूचितं पराऽस्येति ज्ञानबलक्रियादीनां स्वाभाविकत्वमुक्तं, क्रिया—नियमनम्, एष आत्मेति विशेषविधानं विशेषनिषेधश्च आर्यगुणनिषेधस्य परिसंख्यतामभिप्रेत्य ज्ञानस्वरूपस्यैवेत्युक्तम् । आविद्यकत्वनिराकरणाय स्वाभाविकानित्युक्तं, समस्तहेयरहिततां चेत्यनेनाप्याविद्यकत्वशङ्काऽर्थात्परिहृता । किंच ज्ञातृत्वप्रमुखान् कल्याणगुणान् समस्तहेयरहिततां चेत्यनेन निर्गुणवाक्यस्य संकुचितवृत्तित्वं चोपपादितं भवति, तथा हि कल्याणगुणानित्यस्यायमभिप्रायः, गुणविशेषविधानं गुणसा-

१ "नियम्यविषयज्ञानवत एव" इति साधु "योरदुपधादित्यनेन यत एव साधुत्वात् ण्यतस्तु साकल्येन सर्वथैव बाध्यत्वात् ।

मान्यनिषेधो न बाधितुं प्रभवति अपि तु तद्व्यतिरिक्तविषय एव भवति अन्यथा "न हिंस्यात्सर्वा भूतानी"ति सामान्यनिषेधेना"ग्नीषोमीयं पशुमालभेते"ति हिंसाविशेषविधानबाधप्रसङ्गादिति समस्तहेयरहिततां चेत्यस्यायमर्थः, यथा "पशुना यजेत" "छागस्य वपायाः" इत्यादिषु "छागो वा मन्त्रवर्णा"दिति सूत्रोक्तन्यायात्सामान्यशब्दो विशेषदर्शने सति तत्र पर्यवस्यति, तथा गुणसामान्यनिषेधो विशेषगुणनिषेधे पर्यवस्यतीति । किंच सामान्यशब्दानां विशेषे पर्यवसायित्वं व्युत्पत्तिसिद्धं, यथा गामानय गां बधानेत्यादिषु सामान्यशब्दो विशेषकटाक्षेण प्रयोजकवृद्धेन प्रयुज्यते तत एव हि तत्र प्रयोज्यवृद्धश्च न सर्वा गोव्यक्तीरानयति किं तु विवक्षितव्यक्तिविशेषमेवानयति तथैव हि तत्र व्युत्पत्तिः, एवं ज्ञातृत्वप्रमुखान् कल्याणगुणानित्यनेन समस्तहेयरहिततां चेत्यनेन च उत्सर्गापवादन्यायः, सामान्यविशेषन्यायश्चाभिप्रेतः, उपात्तविशेषव्यतिरिक्तविषये सामान्यशब्दस्य विरोधपरिहाराय संकोच उत्सर्गापवादन्यायः । अविरोधेऽपि वैयर्थ्यपरिहाराय संकोचश्चेद्ब्राह्मणबलीवर्दन्यायः, उपात्तविशेषविषये तस्य संकोचस्सामान्यविशेषन्याय इति भिदा । किंचाध्यात्मशास्त्रेषु गुणशब्दस्सत्त्वरजस्तमस्सु प्रसिद्धः "न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि । वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः" ॥ "सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः" । "निर्गुणस्याप्रमेयस्य" "गुणा गुणेषु वर्तन्ते" "कारणं गुणसङ्गोऽस्य" "निर्गुणं गुणभोक्तृ च" "नान्यं गुणेभ्यः कर्तारं" "दैवी ह्येषा गुणमयी मम माया दुरत्यया" "विना हेयैर्गुणादिभिः" "गुणादिदोषांश्च मुने व्यतीतः" "गुणकलुषस्य सदातनस्य नेते"त्यादिषु एवं केवलगुणशब्दस्य सत्त्वादिपरत्वेन प्रसिद्धिप्राचुर्यान्निर्गुणशब्दास्सत्त्वादिनिषेधपराः । अयं विषयविभागो न केवलम् भिन्नोपनिषद्वाक्येषु गुणविशेषविधानगुणविशेषनिषेधदर्शनाद्विश्चीयते एकस्मिन्नेव वाक्ये विषयविभागो दृष्ट इत्याह—

सू॰ निर्गुणवाक्यानां सगुणवाक्यानां च विषयमपहतपाप्मेत्याद्यपिपास इत्यन्तेन हेयगुणान्प्रतिषिध्य सत्यकामः

सत्यसंकल्प इति ब्रह्मणः कल्याणगुणान् विदधतीयं श्रुतिरेव विविनक्तीति सगुणनिर्गुणवाक्ययोर्विरोधाभावादन्यतरस्य मिथ्याविषयताऽऽश्रयणमपि नाशङ्कनीयम् ।

टी० "निर्गुणे"ति, गुणसामान्यनिषेधवद्गुणसामान्यमात्रविधानाऽभ्युपगमेन निर्गुणवाक्यानां सगुणवाक्यानां चेत्युक्तं, न हि श्रुतिषु गुणसामान्यविधानं क्वचिद्दृश्यते गुणविशेषा एव हि श्रूयन्ते दोषसमभिव्याहृतगुणशब्दस्तूपादेयगुणपरः "वर्षायुतैर्यस्य गुणा न शक्याः" "स ते गुणानामयुतैकदेशं" नान्तं गुणानां गच्छन्तीत्यादि स्मृतिवचनाभिप्रायेण सगुणवाक्यानामित्युक्तं, तत्र च गुणशब्दो दोषप्रतिपक्षवचनो लोके तथा प्रसिद्धेः, प्रकरणवशाच्छागपशुन्यायेन कल्याणगुणरूपविशेषपर्यवसानस्य न्याय्यत्वाच्च । उक्तन्यायद्वयेन विरोधाभावादपच्छेदन्यायस्याविषयत्वमाह "इति सगुणनिर्गुणवाक्यद्वयो"रिति, इति-शब्देन पूर्वोक्तसर्वहेतवो विवक्षिताः उत्सर्गापवादन्यायात्सामान्यविशेषन्यायादध्यात्मशास्त्रेषु गुणशब्दस्य सत्त्वादिषु प्रसिद्धिप्राचुर्याच्चेत्यर्थः "सगुणनिर्गुणवाक्ययो"रिति, अत्र तु विषयविभागाच्च विरोध इति नापच्छेदनयः प्रवर्तेत इति भावः । अन्यतरस्य मिथ्याविषयताश्रयणमपि नाशङ्कनीयमिति सगुणवाक्यस्येति नोक्तं, किं त्वन्यतरस्येत्युक्तं सगुणेन निर्गुणवाक्यस्य वा निर्गुणेन सगुणवाक्यस्य वा बाधाश्रयणमनुपपन्नमित्यर्थः । अत्रायमभिप्रायः पूर्वं विरोधो नास्तीति परिहृतम् इदानीं विरोधाभ्युपगमेऽपि नायमपच्छेदन्यायविषयः, अपि तु विरोधाधिकरणन्यायविषय एवेति, तथा हि अपच्छेदन्यायो ह्यनियतविरोधपौर्वापर्यविषयः, उद्गातृप्रतिहर्त्रोरुभयोरपच्छेदनियमो नास्ति तत्रापि क्रमेणापच्छेदोऽप्यनियतः, तन्नियमे सति हि सर्वस्वदक्षिणाकत्वादक्षिणाकत्वविरोधनियमः, उभयोरप्यपच्छेदे तस्य क्रमभावित्वेऽपि उद्गात्रपच्छेदः पूर्वभावी इतरस्तु चरमभावीति वा विपर्ययेणेति वा नियमोऽपि नास्ति, अतोऽपच्छेदन्यायविषयः प्रयोगावधिकविरोधः सगुणनिर्गुणवाक्यविरोधस्तु स्वरूपप्रयुक्तः, विधिनिषेधरूपतया नियतपौर्वापर्यश्च अतो विरोधाभ्युपगमे-

Digitized by Google

ऽप्यनियतविरोधपौर्वापर्यविषयोऽपच्छेदन्यायो नात्र प्रवर्तते, अपि तु विरोधाधिकरणन्याय एव प्रवर्तते, तद्विषये हि पौर्वापर्यनियमो विरोधनियमश्च विद्यते तथा हि "औदुम्बरीं स्पृष्ट्वोद्गायेदि"ति प्रत्यक्षश्रुतिः "औदुम्बरी सर्वा वेष्टयितव्या" इति स्मृतिः, तत्र श्रुतिः प्रथमत एव प्रमितिं जनयति निरपेक्षप्रमाणत्वात्, स्मृतिस्तु स्वमूलभूतश्रुत्यनुमानसापेक्षतया विलम्बितप्रवृत्तिः अतस्तत्र पौर्वापर्यं नियतमौदुम्बरीस्पर्शनद्वेष्टनयोर्विरोधश्च नियतः, तत्र पूर्वमेव प्रमित्यां जातायां तद्विरुद्धार्थः कालात्ययापदिष्टः स्यात् अतो "विलम्बितधीहेतोः शीघ्रधीहेतुर्बलीयानि"ति न्यायात् पूर्वस्याः श्रुतेर्बलीयस्त्वमित्युत्तरत्र [1]शास्त्रानुदय एव, नन्वधीतमेवोत्तरशास्त्रमिति चेत् ततः किं प्रमित्यनुदयो ह्यनुदयः, न तु शब्दानुदयः, आदित्यो यूप इति वत् ।

ननु तत्र स्मृतित्वश्रुतित्वे बाध्यबाधकभावप्रयोजके नैवं स्मृतित्वश्रुतित्वयोः पौर्वापर्यहेतुत्वात् तेन सिद्धं पौर्वापर्यमेव बाध्यबाधकभावे हेतुरिति न्यायसाम्यात्सगुणवाक्यबलीयस्त्वमिति । यद्वा माभूद्विरोधाधिकरणन्यायः अत्र उपक्रमाधिकरणन्याय एव प्रवर्तते विरोधपौर्वापर्यनियमात् अतः सगुणवाक्यप्रतिबद्धत्वाच्च निर्गुणशास्त्रानुदय एवेति

ननु प्रथमप्रवृत्तं विलम्बितस्योत्पत्तिप्रतिबन्धकं चेदिदं रजतमिति ज्ञानोदयमिदं रजतमिति धीः प्रतिबध्नातीति चेन्न सत्तया ज्ञायमानतया च ज्ञापकयोरत्यन्तवैषम्यात् सत्तया ज्ञापकं हि प्रमाणं पूर्वापरपरामर्शनिरपेक्षं ज्ञानं जनयति तच्चोत्पन्नं ज्ञानं "पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यती"ति न्यायात् पूर्वं बाधित्वैवोदेति ज्ञायमानतया ज्ञापकं तु योग्यतापरामर्शादिसापेक्षं प्रमितिं जनयति, तत्र परामर्शदशायां पूर्वप्रमाणेन विरुद्धोऽर्थः प्रमितश्चेत्सा प्रमितिरुत्तरोत्पत्तिं प्रतिबध्नातीति वैषम्यमिति, एवं तर्हि नेदं रजतमिति ज्ञानस्य इदं रजतमिति परामर्शसापेक्षत्वात् पूर्वज्ञानेन प्रतिबद्धस्य नेदं रजतमिति ज्ञानस्यानुदयप्रसङ्ग इति चेन्न इन्द्रि-

१ उत्तरशास्त्रानुदय इति तु पुस्तकान्तरम् ।

यस्य प्रत्यभिज्ञेतरज्ञानजनने पूर्वपरामर्शविरपेक्षत्वादिहापि शुक्तिरियमिति शुक्तित्वविषया झटिति[1] प्रतीतिः शुक्तित्वप्रतिपत्तेश्च न रजतप्रतिपत्तिसापेक्षत्वं शुक्तित्वे गृहीते सति तद्बुद्ध्युपफलभूतो नेदं रजतमिति व्यवहारो नञुल्लिखितस्वात्मप्रतियोगिसापेक्षः प्रवर्तते, तत्सापेक्षत्वं च शब्दस्वभावाधीनम् अतः शुक्तिज्ञानं रजतज्ञाननिरपेक्षमुदयमानं पूर्वं बाधित्वैवोदेति, अतो नियतविरोधपौर्वापर्यविषय उप[2]क्रमाधिकरणन्याय एवात्र प्रवर्तते न त्वपच्छेदनयः, स चेदृशस्थले यदि प्रवर्तेत पश्वालम्भनमकर्तव्यं स्यात् चरमभाविनो न हिंस्यादि निषेधस्य प्रबलत्वात्तस्यानुष्ठानविरोधः सगुणनिर्गुणवाक्ययोर्विरोधपौर्वापर्यनियमः परैरेवोक्तः, अतो विरोधाधिकरणन्यायविषयत्वेनात्रापच्छेदनयानवकाशात्सगुणवाक्यानां बलीयस्त्वं सिद्धमिति । एतदभिप्रायेणान्यतरस्येत्युक्तम् उपाध्यानुक्तिपूर्वकमुत्युक्तानां गुणानां निरुपाधिकत्वस्य स्वतःप्राप्तत्वात्स्वाभाविकत्वश्रुतेर्नोच्यो हेतुर्विद्यत ईशनायेति ईशनस्य हेतुत्वश्रवणेन तदौपयिकगुणानामपि निरुपाधिकत्वसिद्धेः ज्ञानशक्त्यादितारतम्योपाधिभूतकर्मसंबन्धनिषेधपूर्वकसत्यकामाद्युक्तेः, “त इमे सत्याः कामा” इति स्वरूपवत्सत्यत्वश्रुतेः “पराऽस्य शक्तिः” ते ये शतमित्यादिभिर्गुणानामनवच्छिन्नत्वप्रतिपादनेन कर्मसंबन्धव्यापकपरिच्छेदनिवृत्त्या व्याप्यकर्मसंबन्धनिवृत्तेरर्थसिद्धत्वात्स्वाभाविकत्वं कण्ठोक्तिरहितगुणवाक्येष्वपि सर्वशाखाप्रत्ययन्यायेन गुणानां स्वाभाविकत्वसिद्धेरानन्दं ब्रह्मण इत्यादितात्पर्यलिङ्गसा[3]हचर्यादुत्सर्गापवादन्यायसामान्यविशेषन्यायाभ्यां विषयविभागादेकस्यां श्रुतावेव विषयविभागस्य दृष्टतया च विरोधाभावादपच्छेदन्यायाविषयत्वाद्विरोधे सत्यपि विरोधाधिकरणादिन्यायेन सगुणवाक्यप्राबल्यात् यस्सर्वज्ञ इत्यादिरूपासनविधिरहितवाक्येषु स्वरूपवत्प्रतिपन्नत्वात् मानान्तरागोचरतया[4]ऽन्यविषयत्वासंभवेन

१ उत्तरोर्मिमितिरि तु पुस्तः पाठः ।

२ विरोधाधिकरणन्याय एवेति पुस्तकान्तरपाठः ।

३ तात्पर्यलिङ्गप्राचुर्यादिति पाठान्तरम् ।

४ मानान्तरागोचरतयाऽनुवादविषयत्वासंभवेनेति पुस्तकान्तरम् ।

Digitized by Google

निर्देष्टुमशक्यत्वात् "आत्मा वा अरे द्रष्टव्यः" "सत्यं ज्ञानमनन्तं ब्रह्म" "यो वेद आत्मानम्" "अनुविद्य व्रजन्त्येतांश्च सत्यान् कामानि"ति श्रुति-ष्वपास्यत्वप्रश्रयस्य स्वरूपेऽपि तुल्यत्वादध्यात्मशास्त्रेषु सत्त्वादिषु गुण-शब्दस्य प्रसिद्धिप्राचुर्याच्च निर्गुणवाक्यविषयत्वाभावाद्वाक्यतर्कोणां काला-न्ययापादिष्टत्वादवधारणाद्वयसाहिताद्वितीयत्वश्रुतिज्ञानानन्दस्वरूपत्वबा-धानसनिवृत्तिज्ञेयत्वनिषेधरूपार्थगुणनिषेधानां परिहृतत्वाच्च निरुपाधिका ब्रह्मगुणा इत्युक्तवत्यमाचार्यसङ्ग्रहः प्रतिपत्तिसौकर्याय दर्शितः । सत्यं ज्ञानमिति ज्ञानपदेन मिथ्यार्थगुणनिषेधः पूर्वं परिहृतः । अथैतदनुवा-कोपसंहारे "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे"ति वाङ्मनसनिवृत्त्य-भिधानान्निर्गुणत्वं फलितम्, अतस्तदैकार्थ्याच्च सत्यज्ञानादिवाक्यस्य नि-र्विशेषपरत्वमिति शङ्कायामार्थगुणनिषेधपरतया परोक्तस्यास्य वाक्यस्या-र्थानुगुण्यमुपपादयति—

मू० भीषाऽस्माद्वातः पवत इत्यादिना ब्रह्मगुणानारभ्य "ते ये शत"मित्यनुक्रमेण श्रेषज्ञानन्दातिशयमुक्त्वा "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह

"भीषाऽस्मादित्यादिना, भीषाऽस्मादित्यनेन आज्ञापयितृत्वमुच्यते शेषज्ञानन्दातिशयमुक्त्वेति अत्र निर्विशेषत्वं प्रतिपिपादयिषितं चेत् गुणानां क्रमेण न्यूनतां प्रतिपाद्य सर्वाभावे पर्यवसितुं युक्तं, यत्र तु क्रमेण गुणानामाधिक्यमुक्त्वा वाङ्मनसनिवृत्त्यभिधानमानन्त्यादेवेत्यभिप्रायः, य-था "संख्यातुं नैव शक्यन्ते गुणा दोषाश्च शार्ङ्गिणः आनन्त्यात्प्रथमो राशिर-भावादेव पश्चिम" इति प्रथममनुष्यानन्दमारभ्य क्रमेणातिशयो दर्शितः, साधु युवाऽध्यायकः साधु यथाविधि सम्यक्संप्रदायसिद्धतया स्वरवर्णादिसं-सर्गहितं वा युवशब्देन प्रत्ययत्वं विवक्षितम् अविस्मरणोचित्यनवं यथा भव-ति तथाध्ययनवानित्यर्थः । यद्वा स्वसमवयस्कानां सर्वेषामध्यापकः तद-धिकज्ञान इत्यर्थः । आशिष्ठः आशुतरक्रियः । यद्वा अशनक्षमः अरोग

इत्यर्थः । यद्वा आशीर्वादविषयभूतः सर्वानुरञ्जक इत्यर्थः सर्वान् देवान्
नमस्यन्तीतिवत् । बलिष्ठः—मनोबलवान् द्रढिष्ठ इति शरीरबलस्योक्त-
त्वात् । यद्वा द्रढिष्ठः—दृढतरः, न त्वव्यवस्थस्वभाव इत्यर्थः । बलिष्ठः शा-
रीरमानससर्वविधबलवान् वित्तस्य पूर्णः वित्तेन पूर्णः "पूरणगुणसुहितार्थ-
सदव्ययतव्यसमानाधिकरणेनेति षष्ठ्यनुज्ञानात् स एको मानुष आनन्दः
एवं गुणसमुदायं विभूतिपौष्कल्यं चोक्त्वा स एको मानुष आनन्द इति श्रुत्या
स्वारसतस्तस्यैवानन्दत्वमुक्तम् । अनुकूलत्वं ह्यानन्दत्वं निवर्त्यानिष्टत्वेष्ट-
साधनत्वानपेक्षमिष्टत्वमनुकूलत्वम् उक्तलक्षणयोगात् गुणविभूत्योरानन्द-
त्वमुपपद्यते तद्विषयज्ञानस्याप्यनुकूलत्वं विषयानुकूलत्वकृतमेत्यन्वयव्य-
तिरेकसिद्धम् एवं च सति श्रुतिस्वारस्यं च सिध्यति गुणविभूतिप्रकर्षमु-
क्त्वा आनन्द इति ह्युक्तं न तु तद्विषयज्ञानमिति युवत्वाद्यनेकगुणान्वि-
भूतिमप्युक्त्वा तत्समुदायमानन्दशब्देन निर्दिश्य तस्यानन्दस्य निरतिशय-
त्वप्रतिपादनात् सर्वगुणानां विभूतेश्चानवधिकातिशयत्वं प्रतिपादितं
भवति अनुकूलत्वज्ञानत्वमेवानन्दत्वमर्थादुक्तं भवति गुणविभूतिविषय-
ज्ञानस्यानन्दत्वेऽपि तस्यानन्दस्य निरवधिकातिशयत्वोक्त्या गुणविभूत्यो-
रप्यनवधिकातिशयत्वमर्थादुक्तं भवति तदानन्त्यस्य गुणविभूत्यानन्त्यनि-
बन्धनत्वादिति आरभ्येति उपक्रमानुगुणमुपरितन[1]वाक्यं नेयमिति
भावः । श्रोत्रियस्य चाकामहतस्येति वाक्यैर्मुक्तानन्दस्य भगवदानन्द-
साम्यमुक्तं भवति बद्धदशायां निरवधिकविषयानन्दासंभवात् श्रोत्रियो
ब्रह्मनिष्ठोऽकामहतो निवृत्ताविद्यत्वात्समस्तसांसारिकभोगानुपहतः स
एकः प्रजापतेरानन्द इ[2]त्यनेन क्षेत्रज्ञानन्दातिशय उक्तः, स एको ब्रह्मण
आनन्द इत्यत्र भगवदानन्द उच्यते चतुर्मुखानन्दपरत्वे ब्रह्मशब्दस्वार-
स्यहानिः "परं जैमिनिर्मुख्यत्वात्" "स्याच्चैकस्य ब्रह्मशब्दव"दिति
ब्रह्मशब्दस्य तत्रैव मुख्यवृत्तत्वस्य सूचितत्वात् भाष्ये प्रथमसूत्रस्यब्रह्मश-

[1] उपक्रमानुगुणमुपसंहृतवाक्यमिति पुस्तकान्तरपाठः ।

[2] इत्यन्तेन इति पुस्तकान्तरे पाठः ।

ब्दव्याख्यानावसरे प्रपञ्चितत्वात् च "ब्रह्मविदाप्नोति" "ब्रह्मणा विपश्चिता" "सत्यं ज्ञानम् अनन्तं ब्रह्म" "असद्ब्रह्मेति वेद चेत्" "अस्ति ब्रह्मेति चेद्वेदे"ति प्रकरणस्थब्रह्मशब्दानां परब्रह्मपरत्वात् प्रकरणविरोधश्च आनन्दं ब्रह्मणो विद्वानिति पूर्वत्रोत्तरत्र चानन्दप्रतियोगिषष्ठ्यन्तब्रह्मशब्दस्वारस्यविरोधश्च सैषानन्दस्येति प्रक्रान्तब्रह्मानन्दस्य चतुर्मुखानन्देनोपसंहारानुपपत्तिश्च "तदप्येष श्लोको भवती"ति ब्रह्मानन्दं प्रकृत्य वक्ष्यमाणस्य श्लोकस्य उक्तविषयत्वविरोधश्च "स एकः प्रजापतेरि"ति निरुपपदैकवचनान्तप्रजापतिशब्दस्वारस्यभङ्गश्च

न च तज्जात्येकवचनं बहुत्वैकत्वविवक्षायां बहुवचनैकवचनप्रकरणत्वात् देवानां गन्धर्वाणाम्मनुष्यगन्धर्वाणामिन्द्रस्य बृहस्पतेः प्रजापतेरिति हि निर्दिश्यते अतः प्रजापतिशब्दश्चतुर्मुखपरः स एको ब्रह्मण इत्यत्र ब्रह्मशब्दो भगवत्परः ते ये शतं स एक इति भगवदानन्दस्य कथं परिच्छिन्नत्वमिति चेत् न परिच्छिन्नत्वमेकवणाद्दूं बहूनि योजनानि गच्छतो रवेः चिप्तेषुरिव सर्पतीत्यादौ साम्यकथनं यथा गतिमान्द्यनिवृत्तिपरं न तु परिच्छेदपरं तद्वत्ते ये शतम् स एक इति निर्देशोऽपि चतुर्मुखानन्दाधिक्याभिप्रायः, न तु परिच्छेदपर इति । यद्वा ते ये शतं स एक इति निर्देशोऽपि तस्य निर्देशस्य संख्याविशेषपरत्वेऽप्यानन्दस्यापरिच्छिन्नत्वं फलितम् "अण्डानां तु सहस्राणां सहस्राण्ययुतानि च ईदृशानां तथा तत्र कोटिकोटिशतानि च रोमकूपेष्वनन्तानि ब्रह्माण्डानि भ्रमन्ति ते" इत्यादिवचनैरण्डानामनन्तत्वेन तत्र तत्र चतुर्मुखानामप्यानन्त्यात् कालत्रयवर्तिसमस्तब्रह्माण्डगतचतुर्मुखानन्दापेक्षया शतगुणत्वान्मेरोरिवाणुर्यस्यैतद् ब्रह्माण्डमखिलम्मुन इत्युक्तत्रिपाद्विभूतिमत्तया च भगवदानन्दस्यात्यन्तमानन्त्यसिद्धेरिति कल्याणगुणानन्त्यमिति न हि क्रमेण गुणापकर्ष उक्तः, किं तु गुणानां प्रकर्ष एवोक्तः, अतो गुणप्रकर्षस्य निरतिशयत्वाद्वाङ्मनसनिवृत्तिरिति भावः ।

(शेषमग्रे)

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या

विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(Continued from page 282. Vol. IX.*)*

ननु प[1]श्चात्कारकविशिष्टस्य कर्मणो ग्राहकगृहीतस्यावान्तरव्यापारत्वेन कल्प्यमानं भावार्थविषयत्वेनैव निर्णीतमिति न विचारावसरः । स्यादेवं यदि कर्मैव ग्राहकेण गृह्यत इति प्रागस्मादधिका[2]रात्सिद्धं स्यात् न तु तत्सिद्धम्, अत्रैव ह्येतद्विचार्यते । किं सर्वाणि पदानि क्रियाकारकसंबन्धानादरेण अपूर्वस्य विषयीभवन्ति ? उत क्रियाकारकसंबन्धापरित्यागेनेतरपदविशेषितमेकमेव पदम् ? ॥ यद्याद्यं तदाऽपि द्रव्यादिपदं भावार्थविशेषितं विपरीतं वेति । तत्र क्रियाकारकसंबन्धावगमात्प्रागपि द्रव्यगुणयोर्भावार्थकारकत्वेन श्रवणादन्योत्पादकस्वभा[3]वाच्च भावार्थादेवापूर्वमिति स्थिते चास्मिन् क्रियाकारकसंबन्धापरित्यागन्याये ग्राहकग्रहणमपि भावार्थस्यैव भवति । तस्यान्योत्पादकस्वभावत्वात्कारकत्वाच्च द्रव्यगुणयोः अतश्चापूर्वमपि तत एव स्यात् । असति तु तस्मिन् न्याये हिरण्यं ददातिश्च मिथःसंबन्धानादरेण ग्राहकेण गृह्येयाताम् । दानोपसर्जनं वा हिरण्यम् । ततश्चापूर्वमपि पश्चात्कल्प्यमानमुभयविषयं हिरण्यविषयं वा स्यात् तस्मात्तत्रापि भावार्थविषयत्वमपूर्वस्यैतदधिकरणाधीनमिति युक्तमुदाहरणत्वम् । तस्माददृष्टार्थं सर्वमत्रोदाहरणम् । तत्र संशयः । किं सर्वाणि पदानि प्रत्येकमपूर्वं प्रतिपादयन्ति ? उतैक ? मिति । तदर्थमिदं विचार्यते किं सर्वेषामर्थाः फलभावनायां करणम् ? मुतैकस्यैव करणत्वम्

१ तत्पश्चादिति पुस्तकान्तरम् ।
२ प्रागस्मादधिकरणादिति तु युक्तः पाठः ।
३ स्वभावत्वाच्चेति पाठान्तरम् ।

Digitized by Google

इतरे च तदर्थाः? इति । यच्च फलसाधनं ततोऽपूर्वं कल्प्यते अतो यस्तस्य वाच[1]कस्तेनापूर्वं प्रतिपादितं भवतीति । ततश्च सर्वेषां फलसाधनत्वे सर्वेभ्योऽपूर्वमेकस्य तु साधनत्वे तत एवापूर्वमिति । तत्र प्रधानसंबन्धलाभादवैरूप्याच्च सर्वेषां फलेन संबन्धः । अन्यथा हि यत्फलसाधनं तस्य फलं प्रत्युपादानविधानगुणभावात् इतरेषु प्रत्युद्देशानुवादप्रधानत्वाद्वैरूप्यं, मत्वर्थलक्षणा वा स्यात् । तस्मात्सर्वेषां फलसंबन्ध इति प्राप्तेऽभिधीयते । अपूर्वस्य तावददृष्टत्वादेककल्पनयैवोपपत्ते वाक्ये नानेककल्पनमुपपत्तिमत् तस्मादेकमेव फलसाधनमितरत्तु तदर्थमिति ।

न च वैरूप्यं, श्येनादीनां नामत्वसंभवात् सोमादिषु मत्वर्थलक्षणाश्रयणात् । वरं चादृष्टकल्पनातो लक्षणा तस्मादेकमपूर्वं यदैकं तदा संदेहः । किं भावशब्देभ्यः? उत द्रव्यगुणशब्देभ्य? इति तदर्थे च किं भावार्थाः फलेन संबध्यन्ते? किं वा द्रव्यगुणशब्दार्थाः? इति । नन्वनियमेन यत्किंचिद्भवतु न त्ववश्यं नियन्तव्यम् । उच्यते नानियमो वाक्येन बोधयितुं शक्यते तस्यैकरूप एवार्थः । न हि तत्कदाचिद्यागस्य फलवत्त्वमितरस्य च तादर्थ्यं प्रतिपादयति कदाचिच्च विपर्ययम्, वचनव्यक्तिभेदात् । तस्मादेकरूप एव वाक्यार्थः स किंरूप इति चिन्तयितव्यम् । तत्रानध्यवसायमेव केचित्पूर्वपक्षमाहुः । तदयुक्तम्, तथा ह्यप्रामाण्यमेव स्यात् । तच्चायुक्तम् । तथा सति हि प्रमाणलक्षण एवायं विचारः स्यात् न त्विह सिद्धत्वात्प्रामाण्यस्य ।

ननु पक्षद्वयेऽप्यनुष्ठानस्यैकरूपत्वेनाध्यवसितत्वाच्चाप्रामाण्यं, मूर्वमसर्पितमेतत् । यदि पक्षद्वयेऽपि न कश्चिदनुष्ठाने विशेषः किमर्थमधिकरणम्? । अपि च पूर्वपक्षे श्येनादीनां गुणविधित्वात् श्येनद्रव्येण यष्टव्यम् । सिद्धान्ते तु नामधेयत्वात्सोमेन यष्टव्यमित्यस्ति विशेषः । यथाऽऽह भाष्यकारः "स्थित एतस्मिन्नधिकरणे गुणविधिर्नामधेयमिति विचारः" इति । यत्तु न सिद्धान्तेऽपि नामधेयं "सोमेन यजेते"ति तत्र प्रतिनिधिसद्भावः प्रयोजनम् । तदप्याह भाष्यकारः । यदि द्रव्यगुणशब्दा अपूर्वं बोधयन्ति द्रव्यगु-

१ यस्तस्य वाचकस्तेनापूर्वमिति युक्तः पाठः ।

व्यापारे न प्रतिनिधिरुपादातव्यो यथा पूर्वपक्षः, यथा तर्हि सिद्धान्तः। द्रव्यं गुणं वा प्रतिनिधाय प्रयोगोऽनुष्ठातव्य इति तस्मात्प्रसज्यत एवाप्रामाण्यमिति नैवं पूर्वः पक्षः। किंतु द्रव्यादिभ्योऽपूर्वं त एव फलसाधनमिति। कुतः, फलं हि साध्यमानत्वात्सिद्धं साधनमिच्छति, द्रव्यादि च तथा यागः स्वयं साध्यो न साधनम्। श्येनेनाभिचरन् यजेतेत्यादौ फलं समिधो यजतीत्यादौ च फलवदुपकारः साध्यरूपत्वात्सिद्धरूपं साधनमपेक्षते न साध्यान्तरम्। द्रव्यगुणौ च सिद्धरूपत्वात्तदाकाङ्क्षां पूरयितुं समर्थौ यागादयस्तु स्वयमेव साध्यत्वाच्च साधनत्वयोग्याः। तस्मात् द्रव्यादिभ्यः फलम्। यत्तु भाष्यकारेणाविशेषेणेत्युक्तं तच्छब्दतो विशेषानवगमाद्वस्तुस्वभावेन द्रव्यादिभ्य एव फलं युक्तमित्येतदभिप्रायम्। तस्माद्द्रव्याद्येव फलभावनायाः करणमिति प्राप्ते ऽभिधीयते। "भावनैव हि भाव्येन फलेनान्वेतुमर्हति। धात्वर्थः करणं तस्यां लाघवात्सन्निकर्षतः" फलमपि कारकं करणमपि न हि कारकाणि मिथःसंबध्यन्ते। किंतु क्रियया, सा चेह प्रत्ययवाच्या फलभावना, तेन तयैव फलं संबध्यते तद्द्वारेणैव करणस्य फलसंबन्धः। तस्यां च धात्वर्थस्यैव करणत्वं युक्तम्। कल्पनालाघवात्तस्मिन् हि फलवति अपूर्वसाधने कल्पिते द्रव्यादेस्तन्निर्वृत्तिर्दृष्टमेव प्रयोजनं द्रव्यादिभ्यस्त्वपूर्वे कल्प्यमाने धात्वर्थोऽसिद्धरूपः सिद्धरूपस्य द्रव्यादेर्दृष्टमुपकारं शक्नोति कर्तुमिति ततोऽप्यपरमदृष्टं कल्पनीयम्। संनिकृष्टश्च प्रकृत्युपात्तो धात्वर्थः प्रत्ययवाच्यया भावनया पदश्रुत्या संबध्यते, द्रव्यादि तु पदान्तरेणोपात्तं वाक्येन। श्रुतिश्च वाक्याद्बलीयसी। साध्यरूपोऽपि धात्वर्थः स्वसाधननिष्पादितः सन् शक्नोति फलं साधयितुम्, तस्मात्स एव भावनायाः करणम्। का पुनरियं धात्वर्थातिरेकिणी भावना नाम यस्यां धात्वर्थः करणम्?। कर्तृव्यापार इति चेत्। नन्वसौ पचाद्यर्थाधिश्रयणादिर्यजौ च मानसस्त्यागस्तद्धेतुर्वा प्रयत्नः सङ्कल्पो वा गतौ चलनं ते चाधिश्रयणत्यागप्रयत्नसंकल्पचलनादयो धात्वर्था एवेति न धात्वर्थातिरेकिणीं भावनामुपलभामहे। प्रयत्नो भावनेति चेत्। रथो गच्छतीत्यादौ व्यभिचारः। स्पन्द इति चेत् यजेतेत्येवमादिषु आत्मकर्तृकेषु व्यभिचारः।

उभयसाधारणमुदासीनं[1] स्वविच्छेदसामान्यं भावनेति चेत् शब्दादिष्वभाव-प्रसङ्गः। न हि शब्दस्य विभोरचेतनस्य प्रयत्नः परिस्पन्दो वास्ति। तत्राभिधा-भावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यत इत्यादिविरोधः। तस्मादुक्तरूपं भावनारूपम्। किमत्रोच्यते। उक्तं ह्येतदा-चार्यैः। धात्वर्थव्यतिरेकेण यद्यप्येषा न लक्ष्यते। तथापि सर्वसामान्य-रूपेणान्यावगम्यत” इति। विवृतं चैतन्मण्डनेन कथ्यमानाद्रूपभेदाद्द्विधा-धात्वर्थसङ्गतिः। अन्योत्पादानुकूलात्मा भावना किं प्रदुष्यतीति। एतदुक्तं भवति। सत्यं न धात्वर्थातिरेकिणी भावना धात्वर्थानामेव तु द्वे रूपे पाको यागः प्रयत्नः संकल्पश्चलनं क्षेदनमभिधानं छेदनमिति। प्रातिस्विकं धात्वभिधेयम् एकमक्रियात्मकं सिद्धस्वभावम्। अपरं तु सर्वधा-त्वर्थानुयायि करोतिप्रत्ययवेद्यं क्रियात्मकं साध्यस्वभावमन्योत्पादानु-कूलात्मकमाख्याताभिधेयं। तथाहि। यः स्पन्दते यो यजते प्रयतते चलति अभिदधाति ते सर्वे करोतिप्रत्ययमनुभवन्ति भिन्नेष्वपि धात्वर्थेषु। तच्च रूपमुत्पाद्यवस्त्वन्तरकर्मकमेव सर्वदा प्रतीयते। तदेव च भवितुः प्रयो-जकव्यापारो भावनेत्युच्यते। तच्चाख्यातेष्ववगम्यमानत्वात्तदभावे पाका-द्यवगमादाख्याताभिधेयमाश्रीयते। येऽपि प्रयत्नं भावनामाहुः ये च स्पन्दं ये चोभयं तेऽपि स्वरूपेण तेषां भावनात्वमाहुः किं त्वन्योत्पादानुकूलत्वं रूपं तच्च सर्वधात्वर्थानामस्तीति सर्वैरप्येव भावनारूपमङ्गीकर्तव्यं। तस्मिंश्च क्रियारूपे प्रकृत्युपात्तो यागादिः कदाचित्कर्मत्वेन संबध्यते पाकं करोति यागं करोतीति कदाचित्करणत्वेन यागेन स्वर्गं करोति पाकेनौद-नमिति यथा विवक्षितम्। तत्र यदा यागादेः कर्मत्वेन सङ्गतिस्तदा तद्धेतुभूतः प्रयत्नः संकल्पादिर्वा धात्वन्तरार्थोऽपि यजेतेत्यत्र पदे यागकृतिरित्येवंरूपे-णाख्याताभिधेयतां भजते। संकल्पादिकं तु विशेषरूपं धात्वन्तराभिधेयं प्रमाणान्तरवेद्यं नाख्यातेन स्पृश्यते यदा तु विधिवशात् करणत्वेन यागस्य सङ्गतिः, कर्मत्वं तु स्वर्गादेर्दर्शपूर्णमासयागेन स्वर्गं कुर्यादिति तदा न यागस्य हेतुभूतैव कृतिराख्यातेनोच्यते यागस्य कर्मत्वाभावात् फलस्यैव कर्मत्वात्तत्कर्मिका कृतिराख्यातेनोच्यते यागस्तु करणम्। अतो यदवस्था

१ उदासीनत्वविच्छेदसामान्यमिति पा०।

यागः स्वर्गं संपादयति तदवस्थो यागो येन व्यापारेण संपद्यते स व्यापारः स्वर्गकृतिरित्येवंरूपेणाख्याताभिधेयो भवति तस्यापि व्यापारस्य विशेषरूपं प्रमाणान्तरवेद्यं नाख्यातेन स्पृश्यते यागेन स्वर्गं कुर्यादित्यनेन ह्येतावदवगम्यते यथा यागात्स्वर्गो भवति तथा व्याप्रियेतेति तत्र कथं व्यापरितव्यं कोऽसौ व्यापार इति व्यापारविशेषात्मककथंभावापेक्षायामभ्यन्वाधानप्रयाजावघातादिभिरुपकारसंपादनं शास्त्रान्तरैरवगम्यते यागस्वरूपस्य च संपादनमर्थापत्त्या । न ह्यनिष्पादितस्य करणत्वमुपपद्यते तेन स्वरूपसंपादनं प्रयाजादिभिश्चोपकारसंपादनमिति सकलोऽयं व्यापारः स्वर्गकृतिरितिरित्यनेनाकारेणाख्यातेनाभिधीयते, विशेषरूपं च प्रयाजादिशास्त्रान्तरावगम्यन्तेन सकलोऽयं प्रयाजादिव्यापारः फलभावनाया एव प्रपञ्चः । तेन च व्यापारेण फलसाधनात्मना संपद्यमानो यागः करणम्, एतदेव हि करणानां करणत्वं यदुत फलोद्देशप्रवृत्तकर्तृव्यापारेण फलसाधनात्मना संपत्तिः परशोरिवोद्यमननिपतनाभ्यां द्वैधीभावसाधनतया तत्सिद्धा धात्वर्थातिरिक्ता भावना । नन्वेवं धात्वर्थसामान्यमेव भावना स्यात् नेति ब्रूमः । विलक्षणत्वात्प्रतिधात्वर्थम् अन्यद्धि पाकस्यौदनं प्रत्यानुकूल्यम् अन्यच्च चलनादेः संयोगादि प्रति फलभेदात् । एकात्मकत्वे हि तद्रूपस्य फलभेदो न स्यात् भिन्नेषु रूपेषु भावनात्वसामान्यमनुवर्तते यागादिष्विव करणत्वसामान्यम् । अयं चापरो विशेषः, यतो धातोर्यज्यादिकात्प्रत्यय उत्पन्नस्ततो धात्वर्थान्तरं संकल्पादिकं तत्कृतिरूपेण प्रत्ययेनोच्यते न यजिरेव । तत्तु कामं धात्वन्तरेणोच्यताम् । इह तावदेकान्ततः प्रत्ययार्थः यजिस्तु तत्र कर्म करणं वा तथा संकल्पयतीत्यत्रापि संकल्पादर्थान्तरमेव भावना सङ्कल्पस्तु कर्म करणं वा तेन यतो धातोः प्रत्यय उत्पन्नस्तदर्थव्यतिरिक्तैव भावना तत्कर्मिका तत्करणिका वा तद्गतेन प्रत्ययेनोच्यते न तु तस्यैव रूपान्तरमिति न धात्वर्थसामान्यं भावनेत्युच्यते धात्वन्तरेण तस्याभिधानं नानिष्टं यथा स्पन्दनस्य प्रयत्नस्य वा द्वयोर्वा भावनात्वे स्पन्दादिधातुवाच्यत्वं तस्मात्सिद्धं धात्वर्थातिरिक्तं भावनारूपं तत्र च धात्वर्थः करणं ततोऽपूर्वं कल्प्यत इति भावशब्देभ्योऽपूर्वम् ॥ (शेषमग्रे)

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(Continued from page 288. Vol. IX.)

मू० ॥ कार्त्स्न्ये ह्यीष्टमबाधनं न खलु तत् स्वप्नस्य जाग्रद्धिया
बाधाद् बाधितमेव सत्यमिति चेन्नैवं विरोधात् मिथः ॥
सत्यत्वे न हि बाधितत्वघटना बाधे च सत्यं कुतः
सत्यं बाधितमित्यतीव पदयोः संबन्धिता दुर्घटा ॥ ८४ ॥

टी० ॥ कार्त्स्न्यशब्दस्यार्थान्तरं वदन्स्वप्नस्य तदभावेनासत्यत्वमाह । कार्त्स्न्ये हीति । भाष्यकारादिसंमत्यर्थो हिशब्दः । जाग्रद्धिया बाधादिति । यद्यपि सिद्धान्ते स्वप्नस्य मूलाज्ञानकार्यस्य जाग्रद्धिया भ्रमान्तररूपया सविलासाविद्यानिवृत्तिरूपबाधो न संभवति । तथापि रचनासमारोपितभुजङ्गाद्यानन्तरोत्पन्नदण्डभ्रमेणेव जाग्रद्धिया स्वप्नदृष्टवस्तुनस्तदाप्यभावनिश्चयेन तन्मिथ्यात्वनिश्चयरूपबाधनं तदधीनमभिप्रेत्य तथोक्तमिति द्रष्टव्यम् । अथ रथान् रथयोगान्पथः सृजत इति श्रुतेः । स्वप्नदृष्टस्य जाग्रद्धिया निवृत्तिमात्रं बाधशब्दार्थं मन्वानः शङ्कते । बाधितमेवेति । पूर्वोक्तमिथ्यात्वनिश्चयं बाधमभिप्रेत्य परिहरति । नैवमिति । मिथोविरोधमेव प्रकटयति । सत्यत्व इति ॥ ४८ ॥

मू० ॥ मायामेनां जागरे लोकसिद्धा
मुक्त्वा तद्वत् स्वप्नमायां विविच्य ॥
शक्तिव्याप्ती तत्र सिद्धे गृहीत्वा
मायासिद्धं जागरं साधयामः ॥ ८५ ॥

टी० ॥ ननु मायां तु प्रकृतिं विद्यादित्यादौ वियदादिसत्यवस्तुप्रकृतित्वेन मायास्वरूपनिश्चयात्सूत्रकारेण च स्वप्नस्य मायामात्रत्वाभिधानात्सोऽपि जाग्रत्तुल्यस्तदभिप्रेतस्तथा च न तत्र रथा इत्यादिश्रुतिर्जाग्रद्वाह्यभावपरेति न तस्यालीकत्वमित्याशङ्क्य लोकेऽनिर्वचनीयाऽविद्याया एव मायापदार्थत्वाच्छ्रुत्यादिकमायाशब्दस्यापि तदर्थत्वात्तत्कार्यवियदादेरप्य-

निर्वचनीयत्वाज्जाग्रद्वस्तुनोऽपि न सत्यत्वं जाग्रत्स्वप्नयोर्मिथ्यात्वाविशेषेऽपि स्वप्नस्याविद्यातिरिक्तकारणाजन्यत्वात्प्रातीतिकत्वं झटिति साधयितुमुपपद्यत इत्यभिप्रेत्य वक्ष्यमाणमर्थजातं प्रतिजानीते । मायामेनामिति । लोकसिद्धाम् ऐन्द्रजालिकादौ प्रसिद्धामुक्त्वा अविद्यामात्रतया प्रतिपाद्य स्वप्नमायां सूत्रकारोक्तस्वप्नमूलमायां विविच्याविद्यात्मतया निरूप्य तत्राविद्यायां स्वप्ने वा सिद्धे वृद्धप्रयोगभूयोदर्शनाभ्यामवगते शक्तिव्याप्ती मायाशब्दस्य शक्तिं कार्यत्वादिहेतोरविद्याकारणकत्वेन व्याप्तिं च गृहीत्वाऽविस्मृत्य जागरं जाग्रदवस्थागतं वियदादिप्रपञ्चमपि मायासिद्धमविद्याकार्यं श्रुतियुक्त्यनुमानैरनुपदमेव साधयिष्याम इत्यर्थः ॥ ८५ ॥

मू० ॥ लोके हि मायाधिगता न माया
तमोऽतिरिक्ताऽस्ति निरूप्यमाणा ॥
व्याप्तिश्च शक्तिश्च निरूप्यमाणा
भविष्यतीहैव तु नेतरत्र ॥ ८६ ॥

टी० ॥ तत्र तावल्लोके मायायास्तमःशब्दिताऽविद्याऽभेदं साधयितुमुपक्रमते । लोके हीति । लक्षणाविना निरूप्यमाणा माया नाऽविद्याविलक्षणा शक्या निरूपयितुमिति वक्ष्यमाणत्वात्तस्या अविद्यामात्रत्वे फलितमाह । व्याप्तिश्चेति । इह अविद्यायाम् । तुरवधारणे । इतरत्र सत्यरूपमायायाम् । नैव भविष्यतीत्यनुषङ्गः ॥ ८६ ॥

मू० ॥ मायाविनो न मणिमन्त्रमहौषधं वा
मायेति शक्यमिह वर्णयितुं कुतश्चित् ॥
सत्यं हि तत् सकलमिष्टमियं त्वसत्या
माया ततोऽन्यदिह किं चन वर्णनीयम् ॥ ८७ ॥

टी० ॥ ननु मणिमन्त्रौषधादिसत्यवस्तुमति पुरुषविशेषे लोके मायाविशब्दप्रयोगनियमात्तद्विशेषणीभूतमायाऽपि सत्यभूतैवेत्याशङ्क्य

सा किं मन्त्रादिरूपसत्यवस्त्वेव तस्मात्‌ पुरुषशक्तिविशेषो वा, नाद्य इत्याह । मायाविन इति । मायाशब्दस्य मण्यादिवाचकत्वे बाधकाभावमभिप्रेत्य शङ्कते । कुत इति । बाधकाभावोऽसिद्ध इति परिहरति । सत्यमीति । किं मण्यादीनां स्वस्वरूपेणैव मायाशब्दवाच्यत्वम्‌ उत मिथ्याकार्यसंवलितरूपेण, नाद्यः केवलमण्यादिसंबन्धावगमेऽपि तद्वति मायाविशब्दायोगात्‌, द्वितीयेऽपि प्राप्ताप्राप्तविवेकेनानिर्वचनीयगजतुरगादिकार्यसम्बद्ध एव मायाविशब्दगोचर इति तदेव मिथ्याकार्यं मायाशब्दवाच्यमुपेयम्‌, तस्य च स्वरूपेण नानाजातियुक्तस्यैकशब्दवाच्यत्वायोगात्तादृशकार्यकल्प्यं तस्मिन्सर्वस्मिन्नुपादानतयाऽनुगतमनिर्वचनीयमज्ञानमेव मायाशब्दवाच्यम्‌, तत्तादात्म्याद्घटादौ मृदादिशब्दवत्तत्कार्ये मायाशब्दस्तद्योगात्पुरुषेऽपि मायाविशब्दो युज्यत इति न मन्त्रादिर्मायाशब्दार्थ इति भावः ॥ ८ ॥

मू० ॥ सामर्थ्यमस्य मणिमन्त्रनिमित्तमस्ति
माया भविष्यति जनभ्रमहेतुरेषा ॥
इत्युच्यते यदि तदप्यतिफल्गु कस्मात्
सामर्थ्यमप्यवितथं हि तदिष्टमस्य ॥ ८८ ॥

टी० ॥ पुरुषे शक्तिविशेषे मायेति पक्षमनूद्य प्रतिक्षिपति । सामर्थ्यमिति । तस्याः पार्श्वस्थजनभ्रामकत्वानुपपत्तिकल्प्यत्वात्तस्मादतिफल्गु नेति शङ्कते । कस्मादिति । तत्किं सामर्थ्यं कार्यानुरोधेनासत्यं कल्प्यते किं वा सत्यम्‌, नाद्यः, स्वविष्टविघातापातादस्मदिष्टापत्तेश्चेत्याशयेनाह । सामर्थ्यमिति । तदपीति संबन्धः, मिथ्याकार्यकल्प्यमपीत्यर्थः । अस्य पुरुषस्य प्रतिवादिनो वा । द्वितीये कार्यस्यापि सत्यता स्यात्सत्यसामर्थ्याधीनकार्यस्यापि सत्यत्वनियमात्ततश्च तत्र मायाशब्दप्रत्ययावनुपपन्नौ, भ्रमगोचर एव तयोः प्रसिद्धेरिति हिशब्दार्थः ॥ ८८ ॥

मू० ॥ न च शक्तिरस्य सहजा यदि वा
जनिताऽस्ति केन चिदिति ब्रुवतः ॥

परिपुष्कलं स्वमतनिर्वहणं
भवितुं क्षमं तदनिरूपणतः ॥ ८६ ॥

टी० ॥ ननु काचकामलादिगतसामर्थ्यस्य सत्यत्वेऽपि तदधीन कार्यस्य मिथ्यात्ववत्पुरुषगतशक्तिविशेषरूपमायायाः सत्यत्वेऽपि तदधीनं कार्यं मिथ्या किं न स्यादित्याशङ्क्य तर्हि दोषगतसामर्थ्यवत्पुरुषे सा सहजा उत चक्षुरादौ भ्रमसामर्थ्यवदागन्तुकीति विकल्प्योभयथाऽपि दुर्निरूपत्वात्तस्याः सत्यत्वनिर्वहणमशक्यमित्याह । न चेति । दोषादावपि सत्यसामर्थ्यासंप्रतिपत्तिसमुच्चयार्थश्चशब्दः । केन चिद्रूपेण पुरुषेण । परिपुष्कलं पक्षद्वयेऽप्यनवद्यम् ॥ ८९ ॥

मू० ॥ न च शुक्रशोणितसमागमने
न च गर्भशायिन इयं विदिता ॥
न च मातृयोनिविवरादुदरा-
दपसर्पतो बहिरियं घटते ॥ ९० ॥

टी० ॥ तत्राद्यकल्पस्य दुर्निरूपत्वमुपपादयति । न च शुक्रेति । पुरुषस्य स्वतो जन्माभावात्तच्छक्तेः सहजत्वं तच्छरीरेण सह जन्मेति वक्तव्यम्, तत्किं गर्भाधानसमये शुक्रशोणितसंसर्गादेव भवति किं वा गर्भ एव करचरणादिमत्पिण्डरूपपरिणामान्मातुरुदरादतिकष्टद्वारेण बहिर्निर्गमनाद्वा, न सर्वथापि तत्तत्समयानन्तरमेव मायाकार्यादर्शनेन तच्छक्तिकल्पकाभावात्, तत्सत्त्वासिद्धौ तस्या जन्मासिद्धिरित्यर्थः ॥ ९० ॥

मू० ॥ मणिमन्त्रमौषधमितीदृशकं
विरहय्य नापरमिहार्पयति ॥
पुरुषोऽपि कश्चिदत एवमियं
परतोऽपि नास्य घटनामटति ॥ ९१ ॥

टी० ॥ द्वितीये गुरुः किं शिष्ये मण्यादिकमेव समर्पयत्युत तद्द्वारा शक्तिविशेषमपि, आद्ये न त्वदिष्टशक्तिसिद्धिः, न द्वितीयः, मण्या-

दे रज्जुसर्पादिमिथ्यावस्तुकारणत्वेन कृप्तसामर्थ्याज्ञानदोषजनकत्वेन मिथ्याकार्योपयोगोपपत्तौ पुरुषे शक्त्यादिकल्पकाभावेन तद्योगादित्यभिप्रेत्याह । मयीति । पुरुषो गुरुभूतोऽपरं सामर्थ्यमिह शिष्ये नार्पयतीति संबन्धः । आगन्तुकी पुरुषशक्तिर्मायेति पक्षासम्भवमुपसंहरति । अत एवमिति । इयं शक्तिरस्य पुरुषस्य घटनां संबन्धसम्भावनां नार्हति न गच्छतीत्यर्थः ॥ ९१ ॥

मू० ॥ अन्यस्य विभ्रमकरी पुरुषस्य शक्ति-
राकारमन्यमनपेक्ष्य मनीषिता चेत् ॥
वाच्येह लौकिकजनव्यवहारभूमौ
मायागिरस्तदपि दुर्घटमिष्टहानेः ॥ ९२ ॥

टी० ॥ ननु मायां तु प्रकृतिं विद्यात् दैवी ह्येषा गुणमयी मम माया दुरत्ययेत्यादिवचनादनादिसिद्धा माया शक्तिरीश्वरे तावदङ्गीकर्तव्या, न च साऽज्ञानमेवेति वाच्यम्, तस्य स्वाश्रयव्यामोहकत्वाद्भ्रान्तिविषयसदृशवस्त्वपेक्षयैव रज्ज्वादौ सर्पादिभ्रमहेतुत्वाच्च, ईश्वरमाया तु ततो विलक्षणा. न हि सा स्वाश्रयमीश्वरं मोहयति यः सर्वज्ञः सर्ववित् यो योनिं योनिमधितिष्ठत्येक इत्यादौ तस्य सर्वज्ञत्वमायानियन्तृत्वश्रवणेन तन्मोहितत्वायोगात्, न च तस्या वियदादिभ्रमजनने तत्सदृशवस्त्वन्तरापेक्षाऽस्ति, तद्वत्कार्यस्य तस्याभावात्, सैव च मन्त्राद्युपासितेश्वरप्रेरिता योगिप्रभृतिजीववश्या सतीतरान्भ्रामयतीति सर्वत्र माया न जन्या ततो नोक्तदोष इति मायाऽविद्याभेदवादिनमेकदेशिनं प्रत्याह । अन्यस्येति । स्वाश्रयादन्यस्येत्यर्थः । अन्यमनध्यस्तम् । आकारं भ्रमविषयाकारं तत्सदृशमिति यावत् । इहेत्येतद्विवृणोति । लौकिकेति । मायागिरो वाच्या मनीषिताऽभिमता चेदिति संबन्धः । दूषयति । तदपीति । किमुक्तरूपा माया ऽनिर्वचनीया उत सत्या, न प्रथमो घटते, अनिर्वचनीयत्वस्याविद्यास्वरूपलक्षणत्वेन मायाया अपि तथात्वे मायाऽविद्याभेदस्त्वदिष्टो न सम्भवेत । न चानिर्वचनीयत्वाविशेषेऽपि स्वपरव्यामोहकत्वतदभावाभ्यां भेद

इति वाच्यम् । अविद्याया अपि द्विचन्द्रकोशोंड्रादिभ्रमहेतोस्तन्मिथ्यात्व-निश्चयवत्स्वाश्रये व्यामोहकत्वाभावात् । त्वदुक्तरीत्या मायिनां जीवाना-मीश्वरार्पिततदीयमाययेतरव्यामोहकत्ववत्स्यैव वियदादिसत्यत्वभ्रमहेतु-भूतया तेषामपि व्यामूढत्वोपगमान्मायाया अपि स्वाश्रयव्यामोहकत्वस्य समानत्वात् । एतेन कर्तुरिच्छया कार्यकरी मायाऽविद्या तु नैवमिति तद्भेद इति निरस्तम् । मायातोभकमन्त्रादिप्रयोगवदविद्यातोभकालातचक्रभ्रम-णादेरपि कर्तुरिच्छया निष्पाद्यमानत्वात्, तुच्छायां मायायां तत्कार्यस्य तदनिच्छायामप्यविद्याकार्यवदुत्पद्यमानत्वादुभयत्रापि कार्यस्येच्छा न तु विधानस्यापि तुल्यत्वात्, तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते योगीमा-यामभेयाय तस्मै विद्यात्मने नम इत्यादिवचनान्मायाऽविद्ययोरभेद एव युक्त इति भावः ॥ ९२ ॥

मू० ॥ मायामयत्ववचनादखिलं मृषेति
यद् भाष्यकारवचनं तदसङ्गतं स्यात् ॥
प्रत्यक्षमुत्सृजसि कारणमन्यदन्यद्
यत्किञ्चिदानयसि कष्टमतः किमन्यत् ॥ ९३ ॥

टी० ॥ माया सत्येति द्वितीयकल्पमपसिद्धान्तप्रसङ्गेन दूषयति । मायामयत्वेति । मायायाः सत्यत्वे तत्कार्यस्यापि सत्यत्वमावश्यकं स्यात्, ततश्च मायैव सन्ध्ये सृष्टिर्न परमार्थगन्धोऽप्यस्तीत्यादिभाष्यकारव-चनमप्रमाणं स्यात्, मायाकार्यस्यापि सत्यत्वे मायामात्रं त्विति सिद्धान्तसूत्र-मप्यसङ्गतं स्यात्, सन्ध्ये सृष्टिराह हीत्युक्तपूर्वपक्षानिरासात्, कात्स्न्र्येनानभि-व्यक्तस्वरूपत्वादिति सौत्रहेतुरपि विरुद्धः स्यात्तस्यासत्यत्वेनैव व्याप्तत्वात्, मायायाः सत्यत्वे तस्या ज्ञाननिवर्त्यत्वायोगाद् भूयश्चान्ते विश्वमाया-निवृत्तिः मायामेतां तरन्ति त इत्यादिवचनमप्यप्रमाणं स्यादिति भावः । किं च मायादृष्टान्तां तत्तत्त्वविषयाज्ञानमनुभवसिद्धमस्त्येव ततश्च तस्यैवा-न्वयव्यतिरेकाभ्यां दृश्यमानमायाहेतुत्वशब्दवाच्यत्वयोः सम्भवे सति तद-

तिरिक्ता शक्तिः शक्तिमती वा माया न कल्पनीया कल्पकाभावात्तदभावेऽपि कल्पनेऽतिप्रसङ्गादित्याह । प्रत्यक्षमिति ॥ ९३ ॥

मू० ॥ अज्ञानमेव च भविष्यति शक्तिरेषा
सर्वप्रपञ्चजननी परमेश्वरस्य ॥
माया श्रुतिस्मृतिवचोभिरुदीर्यमाणा
शक्तिग्रहो हि परविभ्रमहेतुशक्तौ ॥ ९४ ॥

टी० ॥ ननु सर्वज्ञेश्वरेऽज्ञत्वप्रयोजकाज्ञानासंभवात्तस्मिन् श्रुतिस्मृतिप्रसिद्धा माया ततोऽन्यैव जगत्प्रकृतिरूपाऽभ्युपगन्तव्येत्याशङ्क्य चिन्मात्राश्रिताज्ञानस्य तदात्मकेश्वरे सत्त्वेऽपि तस्य तं प्रति स्वरूपानावरकत्वात्तत्राज्ञत्वाप्रयोजकाज्ञानमेवोक्तमायेत्यभ्युपगन्तुमर्हति कृतमतिरिक्तमायाकल्पनयेत्यभिप्रेत्य परिहरति । अज्ञानमेव चेति । श्रुतिस्मृतिवचोभिरुदीर्यमाणा सर्वप्रपञ्चजननी परमेश्वरस्य माया शक्तिरेषाऽज्ञानमेव भविष्यतीति संबन्धः । न त्वतिरिक्तेति चशब्दार्थः । ननु मायाद्रष्टॄणामनुभवसिद्धाज्ञानस्यैव मायात्वेन तदज्ञाने तेषु च मायामायाविशब्दप्रयोगः स्यादित्याशङ्क्यानादिवृद्धव्यवहारानुरोधेनेतरभ्रामकत्वविशिष्टेऽज्ञाने मायाशब्दस्य शक्तिग्रहात्पश्चात्तत्रैव तत्प्रयोगस्तथा तद्वत्यभ्रान्ते मायाविशब्दप्रयोगो नाज्ञानमात्रे तद्वन्मात्रे वा तयोः प्रयोग इति व्यवस्थोपपत्तेर्मैवमित्यभिप्रेत्याह । शक्तिग्रह इति ॥ ९४ ॥

मू० ॥ न च प्रसिद्धार्थपदान्तराणां
प्रयोगसान्निध्यवशेन शक्तिः ॥
ग्रहीष्यतेऽस्येति समञ्जसं स्या-
दलौकिके शब्द इदं हि युक्तम् ॥ ९५ ॥

(शेषमग्रे)

॥ श्रीः ॥

श्रीमद्रामानुजाचार्यप्रणीत इति प्रसिद्धो

वेदान्ततत्त्वसारः ॥

श्रीमते रामानुजाय नमः ॥

(*Continued from page* 276. Vol. IX.)

न"न्वेकमेवाद्वितीयं ब्रह्मे"ति श्रुतिः स्फुटतयाऽद्वितीयत्वं ब्रह्मणो वदति कथं तर्हि वस्त्वन्तरसद्भावे तत्सिद्धिः । उच्यते वस्त्वन्तरविशिष्टस्यैवाद्वितीयत्वं श्रुत्यभिप्रायः । तथाहि, इदं विभक्तनामरूपवत्त्वावस्थं जगदग्रे सृष्टेः प्रागेकमेवाऽविभक्तनामरूपकतयेकत्वावस्थापन्नमेवाऽद्वितीयमधिष्ठानान्तरशून्यञ्च सदेवासीदित्यर्थः, "मूलमनाधारमि"त्यादिभिरैकार्थ्यात् । सच्छब्दो विशेष्यभूतपरमात्मवाचकोपि कारणविषयत्वसामर्थ्यात्कारणत्वोपयिकगुणविशिष्टप्रकृ-

But it may be said that the Śruti clearly affirms that Brahma is without a second in the words "(Truly existent was this in the beginning), one only without a second, Brahma." How then can that possibly be the case if there is true existence of substance additional to, and distinct from (Brahma)? We reply that the meaning of the Śruti is that Brahma as differenced by substance (92) additional and distinct is without a second. Thus the mean-

92. Viz. The two substances chit and achit, i. e. soul and not-soul (not-soul, Prakriti, Kāla). The three real and distinct substances or existences acknowledged by the Rāmānujas are indicated in the formula chidachidīśvarāḥ. Chaitra is spoken of as one, though a differenced being composed of soul, body, etc. The Supreme Spirit is differenced, qualified, conditioned by the aggregate of soul and not-soul as co-existing substances composing as it were his body, and controlled by him as man's body is by his spirit; and the title of the Rāmānuja system, Viśishṭādvaita, means the doctrine of the secondlessness (complex oneness, wholeness) of Brahma so differenced.

Digitized by Google

तिकालशरीरकं परमात्मानमुपस्थापयति । तथाच सदेवेत्येवकारेण नैयायिकाभिमतमुत्पत्तेः प्राग्जगतोऽसत्त्वं व्यावर्त्यते । एकमेवेत्ये-वकारेण "बहु स्यामि"ति वक्ष्यमाणकार्यबहुत्वावस्था व्युदस्यते । सर्वासां कारणवादिनीनां श्रुतीनामेकवाक्यावश्यम्भावात् । तच "वि-ष्णुस्तदासीद्धरिरेव निष्कलः", "एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्य्यः" "स एकाकी न रमते तस्य ध्यानान्तःस्थस्यैका कन्या दशेन्द्रियाणी"-त्यारभ्य सुबालोपनिषदि "किं तदासीन्नैवेह किंचनाग्र आसीन्मूल-ing of the above passage is as follows, "This universe whose state is (now) that of a multiplicity of discrete name and form, in the beginning, before the creation, was truly existent as one only, and without a second, (i. e.) had (then) passed into a state of unity because of its having indiscrete name and form, and was devoid of another basis," for it thus agrees in meaning with 'A baseless root,' and similar texts. The word 'existent' besides denoting (93) the Supreme Spirit as characterized by difference, by virtue of its relating to the cause (of the world) indicates the Supreme Spirit as one whose body is Nature and Time differenced (94) by (possessed of) properties conducive to causality. So here, by the word 'truly' in 'Truly existent,' the non-existence of the world before its production (as an effect), as held by the Naiyá-

93. As for instance in Chhāndogya Upanishad VI. 8. 4, 6. 'sat' denotes the Supreme Spirit in his own nature as spirit only. He is viśeshya, susceptible of, and characterized by difference; as contradistinguished from differencing Nature and soul, which are his viśeshaṇa.

94. The word '*sat*' relating to the cause of the genesis, etc., of the world, describes that which is capable of being a cause, and such causality is possible only to the differenced Brahma, i. e. the Supreme Spirit in conjunction with soul and not-soul, not the Supreme Spirit alone. Here the Supreme Spirit and soul are the nimittakāraṇe, and not-soul (Prakṛiti) is the upādānakāraṇa.

Digitized by Google

मनाधारमिमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायण" इत्याद्यनुसारात्, "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते"ति नामरूपव्याकरणमात्रश्रवणाद्वायमेव श्रुत्यर्थः, अन्यथापरस्परव्याघातप्रसङ्गात् । उपदिष्टं चैतच्छ्रुत्यभिप्रायं भगवतैकादशे

"एको नारायणो देवः पूर्वसृष्टं स्वमायया ।
संहृत्य कालकलया कल्पान्त इदमीश्वरः ॥
एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ।
कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥
सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः ।
परावराणां परम आस्ते कैवल्यसंज्ञित" ॥

yikas, is excluded. By the word 'only' in 'one only' the state of multiplicity of the effects about to be created, which is described in the words "Let me become many," is (95) negatived. For all passages of the Śruti that are declarative of the cause must necessarily agree in meaning.

This is clearly the meaning of the Śruti in the above quotation (tatra), because in accordance with the passages commencing with "Then Vishṇu existed—Hari alone, without parts," "Verily one only, Náráyana, existed; Brahmá was not, nor Siva, nor this heaven and earth, nor the stars, nor the waters, nor fire, nor the moon, nor the sun," "He delights not in being alone—one daughter (buddhi) and the ten organs (were born) of him while

95. The state characterized by multiplicity of effects is negatived, but not the real independent existence of soul and not-soul. The idea is, If these did not previously exist as distinct realities, then Brahma would have said Lest me become differenced,' 'Let me become soul and not soul,' but not 'Let me become many'; which indicates that soul, not-soul, and Íśvara existed in a state of unity, as one differenced whole—'Let me become many' implies difference of substance existing in an indeterminate state.

Digitized by Google

इत्यखिलाग्रये सत्येवाद्वितीयत्वनिर्देशेन विशिष्टस्यैवाद्वि-
तीयत्वं स्फुटतया सिद्धम्। वाराहे च “मय्येव सकलं जातं मयि सर्वं
प्रतिष्ठितं मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्” । श्वेताश्व-
तरोपनिषदि च मन्त्राभिमानिभिर्देवैरपि सूक्ष्मचिदचिद्विशिष्टस्यैव पर-
मात्मनः परमकारणत्वं निर्णीतम्, “ओं ब्रह्मवादिनो वदन्ति
किं कारणं ब्रह्म कुतः स्म जाता जीवामः केन क्व च सम्प्रतिष्ठाः ।
अधिष्ठिताः केन सुखेतरेषु वर्त्तामहे, ब्रह्मविदां व्यवस्था ॥

absorbed in meditation," in the Subála Upanishad, (and subsequently proceeding thus) "What then existed? Nothing indeed existed here (in the word) in the beginning, there was a baseless root—these creatures are produced—there was one heavenly deity, Náráyaṇa;" and because there is a revelation of the (96) development of name and form alone in "This (world) was then undeveloped, it was (afterwards, at the creation) developed by name and form:" for otherwise it would follow that (these texts and (97) "Truly existent" etc.) are mutually conflicting.

And this, intended (as shown above) by the Śruti, is taught by Bhagavat (Kṛishna) in the eleventh (Skandha of the Bhāgavata Puráṇa), "The one divine being, Náráyaṇa, the Lord, at the end of the kalpa, at the (fitting) period of time, by his wonder—working power having retracted this formerly—created universe into himself, existed as one only without a second, the self—based, the substrate of all—at the (right) time by his own inherent energy goodness and the other forces (qualities) having been brought into a state of equipoise, the Primal Soul, the Lord of Nature and Soul, supreme over the superior (gods), and the

96. The world previously existed in the state of undeveloped name and form, and the origin of previously non-existent things is not here described.

97. 'Truly-existent,' etc., teaches the secondlessness of Brahma only as differenced.

Digitized by Google

कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुषेति चिन्त्यम् ।
संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः ॥
ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् ।
यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः" ॥
वेदान्तसूत्रकारोपि स्वयोगमहिम्नेदमेव निश्चितमित्याह श्रीभागवते,

"भक्तियोगेन मनसि सम्यक्प्रणिहिते मले ।
अपश्यत्पुरुषं पूर्णं मायां च तदुपाश्रयाम् ॥

inferior (men), abides under the designation of pure unity." In this passage by the enunciation of the secondlessness (of Brahma), while he is at the same time the (98) substrate of all, it is clearly proved that this secondlessness is that of a differenced being only. Also in the Varáha Puráṇa "In me all originated, in me all is subsistent, in me all is (ultimately) absorbed, therefore I am the secondless Brahma."

And in the Śvetáśvatara Upanishad the supreme causality of the Supreme Spirit only as differenced by subtile Soul and not-Soul, (and not as undifferenced, according to the Śánkaras) is definitely declared by (99) the deities who identify themselves with the Mantras (of this Upanishad)—(100) "Om! Those who inquire about Brahma ask, (101) What is the cause Brahma? Whence

98. The substrate of all things (soul, not-soul) existing in the subtile, undeveloped state.

99. The deities are here distinguished from Bhagavat, mentioned in the preceding passage. They identify themselves with, or regard themselves as the patron deities of, the Veda, i. e. preside over its preservation, revelation, transmission by accredited teachers, application to the different holy rites, and the teaching of the recondite meaning of the Angas and Upāngas.

100. Śvetāśvatara Upanishad I. 1—3. This is a very difficult passage, but I have tried to render it in conformity with Rāmānuja doctrines, and also as far as possible in accordance with the meaning of the original as I understand it. There are several

Digitized by Google

यया संमोहितो जीव आत्मानं त्रिगुणात्मकम् ।
परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥
अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ।
लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिताम्" ॥

क्व चाय इत्यनेन यदि प्रलयकालो विवक्षितः तदा तु "अक्षरं तमसि लीयते तमः परे देव एकीभवति",

are we born? Whereby do we live, and wherein do we (ultimately) abide? By whom ruled do we live in pleasure and pain? The dictum of those who know Brahma—It (the cause Brahma) is to be regarded as time, the inherent character (of things), necessity, (102) spontaneity, the elements, (103) Nature, and Soul—as the union of these;

---

readings different from those of the printed text which have influenced the rendering. I have found the passage elsewhere with the same readings. Brahmavidām vyavasthā, instead of Brahmavido vyavasthām in the printed text as annotated by Śankara, is alluded to and explained by the word nirṇīta. In two manuscripts the word sankhyā occurs between kāla and svabhāva. This, if not a clerical error or something crept in from the margin, indicates that the doctrine of the Pythagoreans was not altogether unthought of in India. Chintyam for chintyā probably agrees with kāraṇam. In some manuscripts the reading is natvātmā bhāvat instead of natvātmātmabhāvat. This would still give the sense that 'soul is not (alone) the cause by its nature (as soul).'

101. Here we have the three notions of genesis, continuance, and absorption in Brahma, which latter according to this system is simply a return to the subtile state of soul and not-soul, and not identification with Brahma, as the Śankaras teach.

102. The word yadṛichchhā presents a difficulty of which I have not been able to get a satisfactory explanation. How can 'spontaneity' be enumerated among the causes?

103. The original word 'yoni' is clearly a name of one of the causes, and not a mere predicate to the rest of the sentence, as it has been understood in previous versions of this passage. The sense 'Nature' seems the only suitable one.

Digitized by Google

"प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥
परमात्मा च सर्वेषामाधारः पुरुषोत्तमः ।
स विष्णुनामा वेदेषु वेदान्तेषु च गीयते" ॥

भारते च,

but spirit (alone) is not (the cause) by its nature as spirit—spirit also (as jīvatmā) is not the Lord, because of (the existence of) pleasure and pain. They (the Brahmavidaḥ), devoted to the practice of meditation, beheld (104) the power of the Divine Spirit concealed by its own qualities. He who, being one, (105) superintends all those causes associated with time and spirit, (in the preceding passage)"—

The author of the Vedānta Sūtras also declares that he has ascertained the same (106) truth by the greatness (power) of his concentration :—"By the practice of devotion defilement being destroyed in the mind he saw the Perfect Soul and Māyā whose substrate he is, (that Māyā) (107) by whom the soul being deluded, though superior, regards itself as consisting of the three qualities, and obtains (suffers) the evil resulting therefrom. For the sake of the people who do not know that direct devotion to Kṛishṇa is the annulment of evil Vyāsa has composed the (108) Sātvatasamhitá."

104. Devātmaśakti is perhaps more correctly 'the power inherent in God,' though the Rāmānuja doctrine seems to require the rendering given in the text.

105. Or 'superintends all those causes combined with time and spirit, (in the work of causation).'

106. Viz. the supreme causality of the differenced Brahma.

107. In this system the connection of Soul with body and works produces identification with the body, and Māyā (Avidyā) is Nature, works, and the ignorance resulting from connection with these.

108. Scil. Bhāgavata Purāṇa.

Digitized by Google

"ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे ।
आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान् ॥
एकस्तिष्ठति सर्वात्मा स तु नारायणः प्रभुः" ।

इत्याद्यनेकप्रमाणैस्तदानीं सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणः सिद्धत्वाद्विशिष्टस्यैवाद्वितीयत्वं सिद्धम् । यदा तु यत्पूर्वं कदाचिदपि न सृष्टिसद्भावस्तत्कालोऽग्रशब्दार्थः तदा तु "सूर्याचन्द्रमसौ धाता

Again, if by the expression 'in the beginning' the time of the world's absorption is intended then by "The imperishable one (jívátmá, Soul) is merged in darkness (Prakṛiti, Nature), darkness becomes one with the Supreme Deity," (109) "Nature whom I have described as of manifested and unmanifested essence, and Soul also, both these are merged in the Supreme Spirit, and the Supreme Spirit is the basis of all (beings), the Highest Soul; he is celebrated under the name Vishṇu in the (110) Veda and in the Vedānta," and in the Mahābhārata "When Brahmā and the other deities are absorbed, and when, the reflux (dissolution) of all beings having arrived, the animate and inanimate world vanishes and is absorbed in Nature, the Great (Being) abides as one, (111) the essence of all, and he is Nārāyaṇa the Lord," and many other proofs it being established that Brahma is differenced by subtile Soul and not—Soul, it is established that he is secondless as differenced only.

Again, if the words, 'in the beginning' signify (112) that time before which the creation had never really taken place, what is the meaning of this passage of the Śruti (113) "The Creator formed the sun and moon as before."?

109. Vishṇu Purāṇa ?

110. The Veda here is the Karmakāṇḍa. 111. Not 'the soul of all,' but 'he of whom all consists, he who comprises all in himself as his body and modes.'

112. The Śānkara is supposed to say that this refers to a time when the creation had not occurred, and Brahma was undifferenced.

113. Ṛig Veda X. 190. 3.

यथापूर्वमकल्पयदि"ति श्रुत्यभिप्रायः कः । अथ च तदानीं जीवानां तत्कर्मप्रवाहाणाञ्चाभावाद्देवादिविषमसृष्टेः किं कारणमिति निरूपणीयम् । ईश्वरेच्छैवेति चेन्न "साधुकारी साधुर्भवती"त्यादिश्रुतिविरोधाद्वैषम्यनैर्घृण्यदोषप्रसङ्गाच्च । ननु प्रपञ्चस्य मिथ्यात्वेन न वैषम्यादिदोषप्रसङ्ग इति चेन्न प्रपञ्चमिथ्यात्ववादे "यथोर्णनाभिः सृजते गृह्णते चे"त्यादि श्रुतिविरोधः, दोषपरिहारार्थं "वैषम्यनैर्घृण्ये न सापेक्षत्वात्"इति सूत्रनिर्माणवैयर्थ्यं च स्याद्विवर्त्तवादे । (शेषमग्रे)

Moreover, seeing that souls, and the streams of their works, had at that time no existence it ought to be shown what is the cause of the unequal creation of gods, etc. If you say it is the will of Iśvara alone that is the cause, we say no, for that would be opposed to this and other passages of the Śruti—(114) "He that does good becomes good" and the faults of injustice and cruelty would attach to (Iśvara).

Again, if you say that the universe being false injustice and other faults do not thus attach, we reject this position—by the doctrine of the falsity of the universe (115) "As the spider sends forth and withdraws (its thread)" and other passages of the Śruti are contradicted; and according to the doctrine of illusory modification (116) the composition of the Sútra (117) "Injustice and cruelty do not exist for (the world) is dependent (on works)" in order to disprove these faults would be purposeless (118).

J. J. Johnson

(to be continued)

114. Bṛihad Āraṇyaka Upanishad IV. 4. 5. He who performs good works obtains good recompense in the future life. Hence works are the cause of injustice (inequality of condition).

115. Muṇḍaka Upanishad I. 1. 7.

116. The differenced Supreme Spirit is the real material cause of the world by modification of that portion of himself which is called not-Soul.

117. Brahma Sūtras II. 1. 34.

118. If the world is mere illusory appearance, then these are not real faults to be disproved.

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम् रु०	आ०
१ काशिका पंडितवरवामनादित्यविरचिता		
पूर्वार्धम्	..	॥
उत्तरार्धम्	१० ..	॥
२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२ ..	॥
३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१ ..	।)
४ लघुकौमुदी वरदराजकृता	१ ..	=)
५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८ ..	॥
६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४ ..	॥
८ मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४ ..	॥
९ शाश्वतधर्मदीपिका	१ ..	॥
१० अमरकोश सटीक	४ ..	॥
११ योगवार्तिकम्	३ ..	।)
१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१) ..	॥
१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा- देशाधिपति रचिता	४) ..	॥
१४ शीतपदार्थनिर्वचनम्	३ ..	।)

Digitized by Google

CONTENTS.

	Page.
KHAṆḌANAKHAṆḌAKHÁDYAM ...	289
ŚRÍBHÁSHYAM ...	305
ŚÁSTRADÍPIKÁ ...	324
SAṂKSHEPAŚÁRÍRAKAM ...	329
VEDÁNTATATTWASÁRAH ...	336

Digitized by Google

HARVARD COLLEGE
SEP 7 1887
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 7.] JULY 1887. [Vol. IX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [*All rights reservd.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page* 335. Vol. IX.)

टी० ॥ ननु यूपाहवनीयादिशब्दवन् मायां तु प्रकृतिं विद्यादित्यादिवाक्ये मायाशब्दस्य प्रसिद्धार्थेतरपदसमभिव्याहारादलौकिकेश्वरशक्तौ जगदुपादाने सङ्गतिग्रहसंभवात् स्वाश्रयातिरिक्तव्यामोहकत्वविशिष्टाज्ञानेऽस्य शक्तिग्रहकल्पना न युक्तेति नेत्याह । न च प्रसिद्धेति । ननूक्तं यूपाहवनीयादिशब्दवदिति तत्राह । अलौकिक इति । लोके वृद्धव्यवहारे यूपादिशब्दप्रयोगाभावात्तदधीनसङ्गतिग्रहस्यासंभवाद्वेदे प्रयुक्तयूपादिशब्दस्य सङ्गतिग्रहं विना तद्युक्तवाक्यस्याबोधकत्वात्तत्सङ्गतिग्रहे चोपायान्तराभावात्प्रसिद्धार्थपदसमभिव्याहार एव तदुपायो युक्त इत्यर्थः ॥ ९५ ॥

मू० ॥ अयं तु मायेति न शब्द एव-
मलौकिको लौकिक एव तस्मात् ॥
यदर्थवाची जगति प्रसिद्ध-
स्तमेव वेदेऽपि स वक्ष्यतीह ॥ ९६ ॥

टी० ॥ मायाशब्दे ततो वैषम्यमाह । अयं त्विति । एवं यूपादिशब्दवन् मायेत्ययं शब्दोऽलौकिको न किं तु लौकिक एवेति संबन्धः । तुः किं त्वर्थः । तस्य लौकिकत्वे फलितमाह । तस्मादिति । इह मायां त्वित्यादिवाक्ये लौकिकवृद्धव्यवहारे प्रयुज्यमानमायाशब्दस्य परभ्रमहेत्वनिर्वचनीय एव वस्तुन्युक्तविधया सङ्गतिग्रहात्तयोरेव शब्दार्थयोर्वेदे प्रत्यभिज्ञायमानत्वात्तमर्थमादायैव वाक्यार्थप्रतीत्युपपत्तौ तत्र पृथक्सङ्गतिग्रहे प्रमाणप्रयोजनयोरभावात्सोऽयुक्तः, अन्यथा व्रीह्यादिशब्दानामपि त्वदुक्तविधया वेदे पृथक् सङ्गतिग्रहप्रसङ्गादिति भावः ॥ ९६ ॥

मू० ॥ ननूद्भिदादेर्यदि नाम लोके
प्रसिद्धमर्थान्तरबाधकत्वम् ॥

Digitized by Google

तथापि भावार्थनिपीडितस्य
विजानते कर्मणि शक्तिमस्य ॥ ९० ॥

टी० ॥ नन्वृद्भिच्चित्रादिशब्दानां लोके खनित्राद्यर्थवाचिनामपि वेदे उद्भिदा यजेत पशुकामः चित्रया यजेत पशुकामः इत्यादिप्रयोगेषु लौकिकार्थपरित्यागेन कर्मविशेषनामधेयतदर्थत्वं निरूपितं प्रथमे तन्त्रे, तथाहि, तत्र यजेतेत्यस्य यागेनेष्टं भावयेदित्यर्थे सति खनित्रादिवाचकोद्भिदापदस्य न तावत्सामानाधिकरण्येनान्वयः उद्भिद्यागपदयोरेकार्थत्वासंभवात् । न चोद्भिदेति पदेन तद्वतेति विवक्षितत्वात्सदुपपत्तिरिति वाच्यम् । तथा सति मत्वर्थलक्षणाप्रसङ्गात् । नापि वैयधिकरण्येन तदा हि दध्यादिवदन्यतः प्राप्तयागानुवादेन गुणविधिर्वा स्यात्, सोमेन यजेतेतिवद्विशिष्टविधिर्वा स्यात्, नाद्यः अधिकारान्तरस्ययजिना पूर्वयागोपस्थितेस्तदनुवादायोगेन तत्र गुणविध्यसंभवात् । नापि द्वितीयः, तदा हि उद्भित्साध्ययागेन पशुं भावयेदिति वाक्यार्थं स्यात्स तु न संभवति यागेन पशुं भावयेदित्येतावतैवाधिकारविधेर्निराकाङ्क्षत्वाद्विशिष्टविषयत्वे गौरवात्, रक्तपटन्यायेन उद्भिदोऽपि वाक्यार्थप्रवेशे योग्यतानुसारेण उद्भिदा यागं यागेन च पशुं भावयेदित्येवान्वयः स्यात्, ततश्च सकृच्छ्रुते यागे वाजपेयाधिकरणोक्तन्यायेन गुणविधानायोद्देश्यतया सिद्धत्वं फले विधेयत्वादनुष्ठेयत्वम्, उद्देश्यत्वादेवानूद्यत्वं विधानादेवाज्ञातत्वं गुणसाध्यतया प्राधान्यं फलसाधनतया च गुणत्वम् इत्येवं विरुद्धत्रिकद्वयापत्तिः स्यात्, सोमेन यजेतेत्यस्य तु द्रव्यविशिष्टयागोत्पत्तिविधित्वेनान्वयभेदाभावाच्च विरुद्धत्रिकद्वयापत्तिः, तस्मादुद्भित्पदार्थस्य लोकसिद्धस्य खनित्रादेः कथमपि वेदवाक्यार्थेऽन्वयायोगाज्ज्युत्यादिपदवत्समभिव्याहृतकर्मनामधेयत्वकल्पनया वैदिकोद्भिदादिपदस्य तत्र पृथक् शक्तिरिति सिद्धम्, तथा मायाशब्दस्यापि वेदे पृथगर्थवत्त्वमिति शङ्कते । नन्वृद्भिदादेरिति । भावार्थनिपीडितस्येति । भावार्थवाचियजिसामानाधिकरण्येन त्याजितलौकिकार्थस्येत्यर्थः ॥ ९७ ॥

मू० ॥ सत्यं न गत्यन्तरमस्ति तव
तनस्तथा निश्चितमत्र नैवम् ॥
मायागिरोऽज्ञाननिवेदनेऽपि,
न का चिदत्रानुपपत्तिरस्ति ॥ ९८ ॥

टी० ॥ उक्तन्यायेन वैदिकोद्भिदादिपदस्य पृथगर्थवत्त्वमुपेत्य दार्ष्टान्तिके मायाशब्दे ततो वैषम्यं वदन् परिहरति । सत्यमिति । अङ्गीकृतमेवाह । न गत्यन्तरमिति । तत्र वैदिकोद्भिदादिपदे कर्मनामधेयत्वं विना लौकिकार्थार्पणेन वाक्यार्थप्रतिपत्त्युपयोगित्वं यतो नास्ति ततः कर्मनामतया वेदे पृथक्शक्तित्वं निश्चितमित्यर्थः । मायाशब्दे वैषम्यमाह । अत्र नैवमिति । तत्र हेतुः । मायागिर इति । अत्र मायां तु प्रकृतिं विद्यादित्यादिवाक्ये मायाशब्दस्य लोके तदर्थत्वेनावगतस्याज्ञानस्य निवेदनेऽपि न का चिदनुपपत्तिरस्ति, तस्यानिर्वचनीयजगत्प्रकृतित्वयोग्यत्वादित्यर्थः ॥ ९८ ॥

मू० ॥ अज्ञानं जडशक्तिमात्रपुषा सर्वेश्वरस्येष्यते
सर्वज्ञत्वविरोधि तन्न च भवेदुक्तप्रकारेण नः ॥
सर्वज्ञेश्वरसंश्रया भवति सैवाज्ञानमाया श्रुतौ
तस्माद्बुद्धिदिवेति वर्णनमिदं वैषम्यदुष्टं तव ॥ ९९ ॥

टी० ॥ मायाशब्दस्य लौकिकाज्ञानार्थत्वे यद्यपि मायां तु प्रकृतिं विद्यादित्यत्र न का चिदनुपपत्तिः तथापि मायिनं तु महेश्वरमित्यत्रास्त्येव सर्वज्ञादिरूपमहेश्वरस्याज्ञानित्वानुपपत्तेरित्याशङ्क्य स्वतः कूटस्थासङ्गाद्वितीयचिद्रूपेश्वरस्य जडप्रपञ्चजननानुकूलशक्तिरूपाज्ञानवत्त्वेऽपि तस्य तं प्रति जीववत्स्वरूपतत्त्वावारकत्वाभावेनेश्वरस्याज्ञत्वादिप्रसङ्गाभावस्यानेकत्र निरूपितत्वात्सर्वज्ञत्वाद्यविरोध्यज्ञानाश्रयत्वे न का चिदनुपपत्तिरित्याह । अज्ञानमिति । मात्रया सर्वेश्वरं प्रत्यज्ञानस्य तत्त्वावारकत्वं निवारयति । श्रुतौ मायिनमित्यादिश्रुतौ । सैव लोकसिद्धाज्ञानानुरूपा

माया । सर्वज्ञेश्वरसंश्रया विवक्षिता भवतीति शेषः । वैदिकमायाशब्दस्य लोकसिद्धार्थावेदनेऽनुपपत्त्यभावात्तस्योद्भिदादिपदसाम्योक्तिरयुक्तेति फलितमाह । तस्मादिति ॥ ९९ ॥

मू० ॥ मायाऽनिर्वचनीयमेव तु तमो मायाविनो गीयते
द्रष्टृणां भ्रमकारणं विषयता मायाविता तस्य तु ॥
तं हस्त्यादिविकल्पनाघटितवन्मूढाशया जन्तवो
रज्जुं सर्पतयेव तद्विरहितं जानन्त्यबुद्धत्वतः ॥ १०० ॥

टी० ॥ ननु लोके मायाशब्दोऽज्ञानवाचीति कथं येन वेदेऽपि तदर्थः स्यात्, न तावन्मायाविनोऽज्ञानं तदर्थः, तस्य विशेषदर्शनवतो भ्रमाभावेन तन्मूलाज्ञानायोगात्, पार्श्वस्थानां तद्विषयाज्ञानवत्त्वेऽपि तेषु मायावित्वप्रसिद्ध्यभावान्मायाशब्दस्य तदज्ञानवाचित्वस्याप्ययोग इत्याशङ्क्य द्रष्टृणां भ्रमोपादानभूताज्ञानमेव लोके मायाविनो मायेति गीयते तच्च चिन्मात्राश्रयविषयं मूलाज्ञानमेवेति गूढाभिसन्धिः, परिहरति । मायाऽनिर्वचनीयमिति । एवेति तमसः सत्यत्वं वारयति । तुरवधारणे तम एवेति तदर्थः । ननु मायाविनि व्याघ्रादिभ्रमकारणमज्ञानं न तस्यास्ति किं तु द्रष्टृणामेव तत्,मायावी तु तद्विषय एव न तदाश्रयः, ततश्चान्याश्रिताज्ञानस्य मायात्वे तदनाश्रयः स कथं मायावी स्यादित्युक्ताभिसन्धिमजानतः शङ्कामङ्गीकृत्यैकदेशिभिरुक्तं परिहारमाह । विषयतेति । तुरवधारणे । तस्याज्ञानस्य विषयतैव मायाविता न तदाश्रयत्वं लोके मायाद्रष्टृभिरज्ञात एव पुरुषे मायाविशब्दप्रयोगप्रत्ययनियमादित्यर्थः । पुरोऽवस्थितस्य मायाविनस्तैरज्ञातत्वमेव कथमित्याशङ्क्य तस्यान्यथा तैर्दृश्यमानत्वाद्यथावदज्ञातत्वं रज्ज्वादाविव कल्प्यमित्याह । तं हस्त्यादीति । व्याघ्रादिरादिपदार्थः । हस्त्यादय एव विकल्पना विविधरचनात्मिकास्तद्घटितवत्तद्भावमापन्नवज्जानन्तीति संबन्धः । वार्तिना सूचितं स्पष्टयति । तद्विरहितमिति । वस्तुतो हस्त्यादिभावरहितं तं मायाविनं तदात्मना भ्रान्त्या यतो जानन्ति ततस्तस्य याथात्म्येनाज्ञातत्वमावश्यकमिति तदेव तस्य मायावित्वमित्यर्थः ॥ १०० ॥

मू० ॥ सम्यग् ज्ञानबलेन तं विरहितं हस्त्यादिभिर्यत्त्वमी
जानीयुस्तदनन्तरं न स भवेद्धस्त्यादियुक्तः पुमान् ।
तेनास्मत्तम एव तत्र विषये मायास्तु मायाविनः
सोऽज्ञातो वयमज्ञकोटिपतिता मायी स तेनोच्यते ॥ १०१ ॥

टी० ॥ ननु सूर्यादौ नभोगतत्वेन यथावत्प्रतिभासमानेऽज्ञातत्वाभावेऽपि जलादिगतत्वादिरूपेण प्रतिबिम्बभ्रमदर्शनाच्च भ्रमाधिष्ठानस्याज्ञातत्वं नियतं तथा च कथं तेन मायाविनोऽज्ञातत्वसिद्धिरित्याशङ्क्य सोपाधिकभ्रमाणामुपाधिप्रतिबद्धाधिष्ठानतत्त्वबोधनिवर्त्यत्वाभावेऽपि निरुपाधिकभ्रमाणां नियमेनाधिष्ठानतत्त्वबोधनिवर्त्यानां तदज्ञातत्वाधीनत्वं नियतमेव मायाविगोचरहस्त्यादिभ्रमस्योपाधेरनिरूपणान्निरुपाधित्वे न विवाद इत्यभिप्रेत्य तस्याधिष्ठानतत्त्वबोधयोग्यत्वमुपपादयति । सम्यग्ज्ञानेति । मायाविना मन्त्राद्युपसंहारे कृते द्रष्टॄणां नेत्रादिप्रतिबन्धाभावादप्रतिबद्धसंनिकर्षादयममुको मम रथहस्त्यादिरूप इति तं मायाविनं यदा तत्त्वतो जानीयुः पार्श्वस्थास्तदनन्तरं तेषां पूर्ववत्तद्गोचरभ्रमाभावात्स तत्त्वबोधयोग्य इत्यर्थः । तत्त्वबोधनिवर्त्यभ्रान्त्यधिष्ठानस्याज्ञानविषयत्वनियमे फलितमाह । तेनास्मदिति । येन मायाविगोचरभ्रमज्ञानं द्रष्टॄणां सिद्धं तेनेत्यर्थः । तत्र विषये तद्विषयमिति यावत् । उभयसंबन्ध्यज्ञानस्य मायात्वे कथं तद्विषयस्यैव मायावित्वं न तदाश्रयस्येत्याशङ्क्य तदाश्रयस्याज्ञत्वभ्रान्तत्वादिमतो मायावित्वस्य क्वाप्यदर्शनादज्ञत्वादिरहितस्य तद्विषयस्य लोकवेदयोर्मायावित्वेन व्यवहाराच्च स एव तथोच्यते इति निगमयति । सोऽज्ञात इति ॥ १०१ ॥

मू० ॥ नन्वेवं सति रज्जुखण्डलकमप्यज्ञानमज्ञानिभि-
र्मायावीति गिरोच्यतां न तु तथा लोके प्रसिद्धिः क्वचित् ।
तेनाज्ञातविलक्षणत्वमुचितं मायाविनो लौकिका
मायावीति पुमांसमेव निपुणं येनाहुरत्यादरात् ॥ १०२ ॥

Digitized by Google

टी० ॥ एवमज्ञानात्मकमायाया आश्रयविषयभेदमङ्गीकृत्य तद्विषयस्यैव मायावित्वं यदेकदेशिनोक्तं तदाक्षिपति । नन्वेवमिति । अज्ञानविषयस्य मायावित्वे सतीत्यर्थः । खण्डलक्षं खण्डः । अपिशब्दः स्थाणुत्वेन भ्रमविषयपुरुषसमुच्चयार्थः । उच्यताम् उच्येत । प्रसिद्धिर्व्यवहारः । येनाज्ञातत्वमतिप्रसङ्गि तेन मायाविनो मायावित्वस्याज्ञातविलक्षणत्वम् अज्ञातत्वादन्यत्वमेव वक्तुमुचितमित्यर्थः । मायामयहस्त्याद्याविर्भावं विना तटस्थतया स्वरूपेण दृश्यमानेऽपि नरेऽज्ञातत्वरहिते मायावित्वं येन तेनापि नाज्ञातत्वं मायावित्वमित्याशयेनाह । लौकिका इति ॥ १०२ ॥

मू० । नैवं भ्रान्तिनिमित्तकारणमयं संगृह्य सर्वक्षणे
मन्त्रादिप्रचुरं प्रयत्नजनितं तज्जीवनो वर्तते ।
तेनाप्येव तु लोकरूढिरभवन्मायाविता गोचरा
यद्वद्ब्राह्मणताप्रसिद्धिरभवन्मुक्त्वा परिव्राजकान् ॥ १०३ ॥

टी० ॥ एवमेकदेशिमते पूर्वपक्षिणा दूषिते स्वाशयं प्रकटयन्नाह सिद्धान्ती । नैवमिति । यथैकदेशिनोक्तं नैवं किं तु शुद्धचिन्मात्राश्रयविषयमूलाज्ञानमेव लोकेऽपि माया सैव लौकिकमायोपादानं तदधीनाज्ञत्वादिरहितः परमेश्वर एव तयाऽज्ञान् भ्रामयन्सर्वत्र मुख्यो मायावीति भावः । तर्हि कथं लोके जीवविशेषे मायावित्वप्रसिद्धिरित्याशङ्क्य मायाक्षोभकमन्त्रादिप्रयोक्तुस्तत्कार्योत्पत्त्यादौ स्वातन्त्र्यात्तत्कृतव्यामोहाभावाच्च मुख्यमायाविसदृशत्वादज्ञातमुख्यस्य तस्मिन्मुख्यवल्लोके मायावित्वव्यवहारो न तद्व्यामूढेष्वित्यभिप्रेत्याह । भ्रान्तिनिमित्तेति । अयं प्रतारकः पुमान्मन्त्रादिप्रचुरं मन्त्रौषधादिप्रधानं प्रयत्नजनितं यत्नेन प्राप्तं प्रयत्नगुणितमितिपाठे तेन वर्धितं प्रतिघातरहितमितियावत्, एतादृशं भ्रान्तिनिमित्तकारणं संगृह्य तज्जीवनस्तद्रूपजीवनोपायवानयं सर्वक्षणे वर्तत इति संबन्धः । तेन मायया सहोक्तसंबन्धविशेषेण तुशब्दोऽवधारणार्थोऽनेन संबध्यते, अत्र मायाक्षोभके पुंसि मायाविता गोचरा लोकरूढिर्मायाविशब्दस्यायं मुख्योऽर्थ इतिलोके प्रसिद्धिरभवदित्यर्थः । ननु

मायाविशब्दस्य यौगिकत्वाद्योगस्य मायासंबन्धस्य दृष्टृष्वपि सत्त्वात्कथं तत्त्वोभ एव तत्प्रयोगप्रत्ययावित्याशङ्क्य सामर्थ्याविशेषेऽपि पूर्वपूर्वप्रचुरप्रयोगप्रत्ययवशादेकत्रैव तो भवतो नान्यत्रेत्येतद्दृष्टान्तेनाह । यद्वदिति । यत्र परिव्राजका अपि विवक्षितास्तत्र केवलब्राह्मणशब्दात्तदप्राप्तिरिति परिव्राजकशब्दस्यापि प्रयोगदर्शनात्केवलब्राह्मणशब्दात्परिव्राजकप्रसिद्धिर्यथा नेत्यर्थः । यद्वा अज्ञातमुख्यानां गैाणे मुख्यवद्व्यवहारे दृष्टान्तमाह । यद्वदिति । अमैानं च मैानं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः शिखा ज्ञानमयी यस्य उपवीतं च तन्मयं ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुरित्याद्युक्तान्ब्रह्मविदः परिव्राजकान्मुख्यब्राह्मणान्विहाय शिखादिमत्स्वेव तत्प्रसिद्धिवदीश्वरं मुख्यं मायाविनं विहाय लोके प्राकृतेषु परभ्रामकेषु मायावित्वप्रसिद्धिरित्यर्थः ॥ १०३ ॥

मू० ॥ एवं तावल्लोकसिद्धा न माया
मिथ्याज्ञानाद्भिद्यतेऽतश्च तत्र ॥
शक्तिव्याप्तिप्रत्ययो वर्जयित्वा
वेदाल्लिङ्गाच्चान्यमायात्वसिद्धिः ॥ १०४ ॥

टी० ॥ एवं मायाऽविद्ययोरभेदं तत्र बाधकाभावं चोपपाद्य तदनुवादेन फलितमाह । एवं तावदिति । लोकसिद्धमायातत्कार्ये अविद्यातत्कार्याभ्यां न भिद्येते इत्यर्थः । चोऽवधारणे । तत्र लोके मायाशब्दस्याविद्यायां शक्तिप्रत्ययं यन्मायाकार्यं तदविद्याकार्यमिति व्याप्तिप्रत्ययं च निर्वर्त्य वैदिकमायाशब्दाद्वियदादिद्वैतप्रकृतेस्तत्कार्यद्वैतस्य च कार्यत्वलिङ्गान्मिथ्यात्वं साधयेदित्यर्थः ॥ १०४ ॥

मू० ॥ यावद्भूमौ या प्रसिद्धेह माया
सा निर्णीता तावदज्ञानमेव ॥
तस्यां शक्तिव्याप्तिविज्ञानसिद्धेर्विज्ञातव्या सैव वेदानुमानात् ॥ १०५ ॥

टी० ॥ शुक्त्याद्यज्ञाने मायात्वप्रसिद्ध्यभावात्कथं तयोरभेद इत्याशङ्क्य तथापि नाज्ञानादन्यत्र तत्प्रसिद्धिः मूलाज्ञानस्यैवोक्तरीत्या तथा प्रसिद्धत्वादित्याशयेनाह । आद्यद्वमाविति । ततश्च जाग्रत्प्रपञ्चस्य मायाकार्यत्वश्रुतेरुक्तविधया तन्मिथ्यात्वसिद्धिरिति फलितं निगमयति । तस्यामिति । द्वन्द्वैकवद्भावाद्विदानुमानादित्येकवचनम् ॥ १०५ ॥

मू० ॥ स्वप्नेऽप्येवं स्वप्नदृङ्मोहमात्रा-
दन्या का चिन्न प्रसिद्धाऽस्ति माया ॥
तत्रैवायं सूत्रकारस्य तस्मान्
मायाशब्दो वर्तते नापरत्र ॥ १०६ ॥

टी० ॥ यदि मूलाज्ञानमेव माया तर्हि स्वप्नस्य झटिति बाध्यमानस्य तत्कार्यत्वायोगात्कथं तत्र सूत्रकारस्य मायामात्रत्वव्यपदेश इत्याशङ्क्य शुक्तिरजतादिवत्स्वप्नस्य किंचिदवच्छिन्नचैतन्याज्ञानकार्यत्वस्य वक्तुमशक्यत्वाज्जाग्रद्वत्पूर्णात्मन्येवाध्यासात्तद्गोचरमूलाज्ञानकार्यत्वमेव तस्यावश्यमुपेयम् । अत एव तस्य जाग्रत्प्रत्ययेन न सविलासाविद्यानिवृत्तिरूपो बाधो भवति किं तु मिथ्यात्वनिश्चयमात्ररूपः स च प्रसिद्धमायाकार्येऽपि समानः, तथा च स्वप्ने सूत्रकारस्य मायामात्रत्वनिर्देशो युक्त एवेत्याशयेनाह । स्वप्नेऽपीति । तदुपादानभूतापीत्यर्थः । शुद्धचैतन्याज्ञानं मोहमात्रशब्दार्थः । अवच्छिन्नचैतन्यगोचराज्ञानमन्यपदार्थः । तस्मात्तत्रैवेति संबन्धः । ॥ १०६ ॥

मू० ॥ शक्तिव्याप्तिप्रत्ययौ कारयिष्यन्
स्वप्ने स्थित्वा प्रत्यगज्ञानमात्रे ॥
मायावाचा लोकवत्सूत्रकारो
वेदं लिङ्गं चोपनेतुं प्रवृत्तः ॥ १०७ ॥

टी० ॥ मोहमात्रं तत्रेत्युक्तम् तथापि स्वप्नद्रष्टुर्व्यामूढत्वादन्यस्य च तत्र भ्रामकस्यादर्शनात् सूत्रकारः केनाशयेन तत्राविद्याशब्दं विहाय

मायाशब्दं प्रयुङ्क्तेति वीतायां तदाशयमाह । शक्तिव्याप्तीति । सूत्रकारः प्रत्यगज्ञानमात्रे स्वप्ने स्थित्वा तमाश्रित्य शक्तिव्याप्तिप्रत्ययौ कारयिष्यन्मायाशब्दस्याज्ञाने शक्तिं मायामयत्वलिङ्गस्य दृश्यत्वकार्यत्वादेराविद्यकत्वेन व्याप्तिं च लोके ग्राहयन् लोकंवत्तत्सिद्धस्वप्नादिवज्जाग्रत्प्रपञ्चस्याविद्यकत्वे मायामात्रमित्यादिदृश्यत्वादिलिङ्गं च मानतया घटयितुं मायामात्रत्वप्रतिज्ञया स्वप्नं निरूपितवानित्यर्थः ॥ १०७ ॥

मू० ॥ अज्ञानमावरणमावरणं च माया
सर्वेश्वरेण हरिणा दृढमभ्यधायि ॥
चैतन्यवस्तुन इति प्रतिपद्यमाना-
स्तत्त्वं तदेकमिति निश्चयतः प्रतीमः ॥ १०८ ॥

टी० ॥ एवमाविद्यकत्वेन लोकसिद्धस्वप्ने सूत्रकारस्य मायामयत्वनिर्देशसामर्थ्यान्मायाऽविद्ययोरभेदमुपपाद्य मायायामज्ञानासाधारणधर्मप्रतिपादकभगवद्वचनसामर्थ्यादपि तयोरभेदे विमतिर्न कर्तव्येत्याह श्लोकत्रयेण । तत्र प्रथमं चिदात्मतत्त्वावारकत्वमविद्यालक्षणं मायायामपि भगवतोक्तं तद्विजानतां तयोरेकत्वनिश्चयोऽवश्यंभावीत्याह । अज्ञानमावरणमिति । चैतन्यवस्तुन आवरणमिति संबन्धः । तदभिधानं प्राकृताभिधानवच्च मन्तव्यमित्याशयेनोक्तं सर्वेश्वरेणेति । दृढं कुतर्कैरन्यथा कर्तुमशक्यं यथा स्यात्तथेत्यर्थः । तदभिधायकं भगवद्वचनं तृतीयपद्ये वक्ष्यति । तन्मायाऽविद्यात्मकं तत्त्वं स्वरूपम् एकमभिन्नं स्वप्रकाशप्रत्यगभिन्नवस्तुनोऽनिर्वचनीयाज्ञानव्यतिरेकेणावरणासंभवात्तदावारकत्वेन भवतोक्ता माया अज्ञानमेवेति निश्चिनुम इत्यर्थः ॥ १०८ ॥

मू० ॥ ज्ञानं निवर्तकमपि द्वितयस्य तस्य
गीतागतः करुणया भगवानुवाच ॥
तेनापि तत्त्वमिदमेकमिति प्रतीति-
रानीयते कथितलक्षणतुल्यभावात् ॥ १०९ ॥

टी० ॥ किं च तत्त्वज्ञानैकनिवर्त्यत्वस्यानिर्वचनीयाज्ञानादन्यत्रासंभवात्तदप्यज्ञानस्यैव लक्षणं तच्च मायायामपि भगवतैवोक्तं ततोऽपि तयोरभेदः श्रद्धया ग्राह्य इत्याह। ज्ञानं निवर्तकमिति। तस्य मायाऽज्ञानात्मकस्य द्वितयस्य द्वित्वेन भ्रमादवगतस्य। गीतागतो भारतसारभूतगीतायां प्रवक्तृत्वेन प्रवृत्तः। प्राकृतवत् स्यात्यादावेव प्रवृत्तिशङ्कां निवारयितुं करुणयेत्युक्तम्। तेनापीत्यस्य कथितेत्यनेन संबन्धः। तेन भगवद्वचनेन। इदम् मायाऽविद्यात्मकम्। तत्त्वं स्वरूपम्। एकमभिन्नम् ॥ १०९ ॥

मू० ॥ नाहं प्रकाश इति तावदनेन माया-
ऽज्ञानेन चावृतमितीतरदप्यभाणि ॥
मामेव ये तु परमं पुरुषं प्रपन्ना
ज्ञानेन तु प्रभृतिना च धिया निवृत्तिः ॥ ११० ॥

टी० ॥ कानि तानि भगवद्वचनानि यैर्मायाऽज्ञानयोस्तत्त्वावारकत्वं तत्त्वबोधनिवर्त्यत्वं चोक्तमिति वीक्षायां तानि निर्दिशति। नाहं प्रकाश इति। नाहं प्रकाशः सर्वस्य योगमाया समावृत इत्यनेन मायावारकत्वेनाभाणि, एवमज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इत्यनेनाज्ञानमप्यावारकमभाणि तेन चिदात्मतत्त्वावारकत्वमुभयोः समानमित्यर्थः। एवं मायाज्ञानयोस्तत्त्वज्ञाननिवर्त्यत्वप्रतिपादकं भगवद्वचनं दर्शयति। मामेवेति। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त इत्यनेन मायाया ब्रह्मज्ञाननिवर्त्यत्वमुक्तम्। न चानेन वचनेन भक्त्या मायातरणमात्रं न तु तत्त्वबोधात्तन्निवृत्तिरिति वाच्यम्। ज्ञानी त्वात्मैव मे मतमित्यादिवाक्यशेषे ज्ञानस्यैव प्रशंसादर्शनेन प्रपद्यन्ते इत्यनेन तस्यैव विवक्षितत्वात्, मायाया मुख्यतरणासंभवेन तरति ब्रह्महत्यामित्यादिवत्तरन्तीत्यनेन तन्निवृत्तेरेव विवक्षितत्वाच्च। ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन इत्यनेनाज्ञानस्यापि ज्ञाननिवर्त्यत्वमुक्तमिति तदप्युभयोस्तुल्यमित्यर्थः ॥ ११० ॥

Digitized by Google

मू० । ज्ञानस्य प्रागभावादपरमभिहितं प्रत्यगज्ञानमेत-
त्संसारव्याधिबीजं कथितनयवशादेव बुध्यस्व बुद्ध्या ॥
ज्ञानेनाज्ञाननाशङ्कथयति भगवानेष गीतागतः स-
न्न ज्ञानात् प्रागभाववय इति घटते तत्क्षये तत्प्रसूतेः ॥१११॥

टी० । ननु सर्वत्राज्ञानपदस्थनञा ज्ञानाभाव एवोच्यते, स च परिशेषात्तत्प्रागभाव एव, माया च भावरूपा कथं तदभिन्ना स्यादित्याशङ्क्याधर्मासुरादिपदानां धर्मादिविरुद्धभावरूपदुरितादिप्रतिपादकत्ववदज्ञानपदस्यापि ज्ञानविरुद्धभावरूपमायाप्रतिपादकत्वोपपत्तेर्मैवमित्याह । ज्ञानस्येति । किं च तत्त्वज्ञाननिवर्त्यतया श्रुतसंसारस्यानिर्वचनीयं प्रत्यगज्ञानमेवोपादानमित्यनेकधा मानयुक्तिबलेनोपपादितं ततोऽपि न तदभावरूपमित्याह । प्रत्यगज्ञानमिति । किं च सर्वज्ञः श्रीहरिरेव ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन इत्यनेनाज्ञाननाशे हेतुं ज्ञानं कथयति स्म, तदज्ञानस्य ज्ञानप्रागभावत्वे नैव घटते, ज्ञानस्य स्वप्रागभावनाशरूपतया तद्धेतुत्वायोगात्, येषां मते प्रागभावनाशः प्रतियोगिनोऽन्य इत्यभ्युपगमस्तेषां सोऽनुपपन्नः ज्ञानप्रागभावस्य तदन्यनाशस्य प्रागभावात्मत्वानुपपत्तेरागन्तुकनाशप्रागभावोऽन्योऽभ्युपेयः स्यात्ततश्च तस्याप्यन्यो नाशस्तस्याप्यन्यः प्रागभाव इति मानहीनप्रागभावतन्नाशानवस्थादोषप्रसङ्गात् । किं च तन्मते ज्ञानसामग्र्येव तदन्यनाशोत्पत्त्ययोगाज्ज्ञानमेव स्वप्रागभावनाशहेतुर्वक्तव्यः स न संभवति ज्ञानस्य स्वप्रागभावसमये जन्मासंभवात्तन्नाशसमयोत्पन्नस्य तद्धेतुत्वायोगाच्च तन्नाशानन्तरमेव ज्ञानजन्म वाच्यं ततश्च पश्चाद्भाविज्ञानस्य पूर्वभाविनाशहेतुत्वं सुतरामनुपपन्नमिति ज्ञानप्रागभावरूपाज्ञानस्य कथमपि भगवदभिहितज्ञाननिवर्त्यत्वासंभवात्तन्निवर्त्यमज्ञानं भावरूपमेवोपेयमित्यभिप्रेत्याह । ज्ञानेनेति ॥ १११ ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालाध्यापकेन श्रीद्विवेदहरिनाथशर्मणा ।

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 304. Vol. IX.)

टी० ॥ प्रकारान्तरेणातिव्याप्तिमाह—। [a] "सञ्ज्ञेत्यपी"ति । प्रायः पदं बाहुल्यवाचि व्याप्तिपरतां वाक्यस्य व्यनक्ति तथाचेदं काननं गवयाधारत्वादित्यनुमितौ लक्षणमिदं गतमित्यर्थः । यत्रापि प्रायः पदं नास्ति तत्रापि यथेह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति प्रसिद्धपदसामानाधिकरण्यान्मधुकरसञ्ज्ञासञ्ज्ञिसंबन्धपरिच्छेदवत्काननसञ्ज्ञापरिच्छेदे गतत्वादतिव्याप्तिरित्याह—। [b] "विनापी"ति । त्वयाप्युपमानादस्य भेदाङ्गीकारादित्यर्थः ॥ [c] "अन्यत्रैवे"ति । गोसदृशो गवय इत्यत्र यथा सङ्गतिग्रहस्तथात्रापि प्रसिद्धपदसामानाधिकरण्यानुपपत्त्या सङ्गतिग्रहेऽतिव्याप्तिरित्यर्थः ननूपमेयसञ्ज्ञाया अनवगतसङ्गतित्वं विवक्षितं प्रकृते च काननसञ्ज्ञाया अनवगतसङ्गतित्वं काननं च नोपमेयमित्यत आह—। [d] "उपमेये"ति ॥ [e] "पूर्व एवे"ति । उपमेयत्वस्योपमितिगर्भतयाव्याप्ति तदनिरुक्तेरित्यर्थः ॥ [f] तादृगेवे"ति । आकुलमेवेत्यर्थः ॥ तदेवाह—। [g] "प्रतिपत्तौ"ति । गवयाव्युत्पन्नं प्रति काननान्तर्भावेन प्रवृत्तमतिदेशवाक्यं काननपदबहिर्भावेन स्मर्यमाणं यत्र गवयसञ्ज्ञाप्रतिपत्तिफलकं तत्राव्याप्तिः समयवाक्यार्थानुसन्धानाभावादित्यर्थः ।

मू० [a] वाक्यार्थैकदेशस्यापि(१) वाक्यार्थत्वेन विवक्षितत्वे सदृशो गवय इत्यादिस्मारिणोऽपि प्रत्यये प्रसङ्गात् [b] * प्रतीत्युत्पत्तिं प्रति प्रयोजकीभूतं यावत्तावद्वाक्यं विवक्षितम् ? *—इति चेन्न, [c] अन्तर्भावितवनाधिकरणताहग्रप्रतीतिं प्रति तस्यापि प्रयोजकत्वात्(२) [d] उपमिति(३) प्रतीतिं तु पूर्वोक्तामित

(१) वाक्यत्वेनेति पाठः पुस्तकान्तरे लभ्यते—

(२) तदनुसन्धानस्थलोपमितावव्याप्तिरिति शेषः ।

(३) यावत्प्रयोजकविवक्षितं वनपदन्त्वधिकमेवेत्याशयः ।

[e] * यावत्सञ्ज्ञासञ्ज्ञिसम्बन्धबुद्ध्यौपयिकं तावद्विवक्षितम् ? *—इति चेन्न, [f] लक्षणसहचरितसञ्ज्ञोपदेशार्थानुसन्धानेपि प्रसङ्गात् ॥

टी० ॥ वाक्यैकदेशार्थानुसन्धानस्यापि यद्युपमानत्वं तदा गोपदमस्मृत्वा सदृशो गवय इति मात्रं यत्रानुसन्धत्ते तत्रातिव्याप्तं करणलक्षणमित्याह—। [a] "वाक्ये"ति । सदृशो गवय इति मात्रनुसन्धानं न प्रतीतिहेतुरिति नातिव्याप्तिरिति शङ्कते—। [b] "प्रती"ति । तर्हि काननान्तर्भावेनापि यदतिदेशवाक्यं तत्रापि काननाधिकरणगवयस्य गवयपदवाच्यत्वबुद्धौ काननपदमपि प्रयोजकमेवेति तदननुसन्धानस्थलोपमितावव्याप्तिरेवेति परिहरति—। [c] "अन्तर्भावित"ति । ननु तथाप्युपमितिं प्रति गोसदृशो गवय इत्येव प्रयोजकं काननपदं त्वधिकमेवेति न प्रयोजकमित्यत आह—। [d] "उपमितिं प्रती"ति । उपमितिरेव सञ्ज्ञासञ्ज्ञिसम्बन्धबुद्धित्वेनाभिधेयेति नात्माश्रयद इति शङ्कते—। [e] "यावदि"ति । गन्धवती पृथिवीतिवाक्यात् सञ्ज्ञासञ्ज्ञिसम्बन्धपरिच्छेदानन्तरं यत्र पुनः प्रत्यक्षेण तदर्थानुसन्धानं तत्रातिव्याप्तिरिति परिहरति—। [f] "लक्षणे"ति । उपदेशः कथनं

मू० [a] किंच यदा तर्कानुसन्धानविरहिणः सत्यप्येवंविधानुसन्धाने साहश्यमेव गवयपदप्रवृत्तिनिमित्तमिति मितिः फलमुत्पद्यते तदा तस्याप्रमाकरणस्याप्युपमानत्वं चापद्येत- [b] प्रमाफलकमिति विशेषणप्रक्षेपे चानुसंहितरूपव्यवहार्येनानुमित्युत्पादेनाप्येताहशानुसन्धानमुपमानं स्यात्* अव्याप्त(१)विषयप्रमाफलकमिति विशेषणीयम् ? *—इति चेन्न-

(१) पृथिवीत्वस्य पृथिवीव्यवहारव्याप्यत्वात्तज्ज्ञानमनुमानं भवति अव्याप्तविषयकं यत्प्रमाविषयकमिति विशेषणे तु न तत्रातिव्याप्तिरित्यभिप्रायेणाह—अव्याप्तेति ।

[c]वस्तुगत्या(१)ऽव्याप्तत्वस्योपमेयेऽप्यभावात् [d]व्याप्ततयाऽनवगम्यमानस्येति च कृते यत् प्रति तल्लिङ्गं तेन सह व्याप्तत्वावगतमुपमितिकरणमपि न व्याप्नुया [e]दुपमेयेन सह व्याप्तत्वानवगतत्वोक्तावप्यनुमाने प्रसङ्गस्तदवस्थः ॥

टी० ॥ व्युत्पत्तिग्रहाय गोसादृश्यं सखण्डत्वेन गुरु गवयत्वं तु जातिरूपतया लघु गवयपदप्रवृत्तिनिमित्तमिति तर्कोपगृहीतगवयसादृश्यानुसन्धानस्य गवयत्वेन प्रवृत्तिनिमित्तेन गवयपदवाच्योपमितिप्रमाकरणस्य तावदुपमानत्वमपेक्षितं तच्च तर्कानुसन्धानविरहिणो यत्र सादृश्यस्यैव गवयपदप्रवृत्तिनिमित्तताज्ञानं तत्र तत्करणफलयोरुपमानत्वोपमितित्वातिव्याप्तिरित्याह—। [a]"किन्त्वे"ति । इयमप्रमेति प्रमाफलत्वेन करणं विशेषमित्याह—। [b]"प्रमे"ति । लक्षणवाक्यानुसन्धानानन्तरमियं पृथिवीति व्यवहर्तव्या पृथिवीत्वात् यन्नैवं तन्नैवमिति व्यवहर्तव्यत्वानुमित्यापि(?)पर्यकेऽतिप्रसङ्ग इत्यर्थः ॥ [c]"वस्तुगत्ये"ति । उपमेयमपि केनचिद्व्याप्तमित्यसम्भविलक्षणं भवेदित्यर्थः ॥ [d]"व्याप्ततये"ति । उपमितिकरणस्य स्वव्यापकेन सह क्वचिदनुसन्धाने यत्रोपमितिस्तत्राव्याप्तिरित्यर्थः ॥ [e]"उपमेयेन सहे"ति । व्यवहार्यतानुमानेऽप्युपमेयेन सह व्याप्यत्वानवगतिरेवेति तत्रातिव्याप्तिरेवेत्यर्थः ॥

खू० [a] अनुमेयेन सहेति कृते च तदनपायादव्याप्तिस्तदवस्थैव *सज्ञासंज्ञिसम्बन्धप्रमितिकरणम् ? *—इति चेन्न, [b]तथात्वासिद्धेः अर्थापत्त्यादितस्तत्सिद्धेर्वक्ष्यमाणत्वात् *अननुमितिजनकं [c]तादृक्प्रतिसन्धानमुपमानम् ? *—इति चेन्न, [d]तज्जातीयस्यानुमितिजनकत्वात् [e]व्यक्त्यपेक्षया

(१) गोसदृशो गवय इतिवाक्यानुसन्धानस्योपमेयरूपगवयेऽपि विषयस्तथापि केनचित्पदार्थत्वादिना व्याप्तत्वात्तज्ज्ञानमप्यनुमानं न स्यादतोऽसम्भव इत्याह—वस्तुगत्येति ।

चाजनकत्वस्य(१) सामान्याकारपर्य्यवसायिनो नित्यं व्यक्तावसम्भवितयाननुगमेन चायुक्तत्वादिति [f] किंच गोसादृश्यं विहाय गवयशब्दार्थताप्रतीतिः कल्पनालाघवाख्यं तर्कमपास्य न स्यादिति तदुपन्यासस्थितौ किमानुमानिक्येव तच्च गवयपदवाच्यताप्रमितिरियं नेष्यते सम्भवति हि प्रयोगः ॥

टी० ॥ अनुमेयव्याप्यविषयत्वं यदि विवक्षितं तदा स्वव्यापकेनानुमेयेन सहोपमितिकरणस्य कदाचिद्व्याप्यत्वग्रहेऽप्युपमितिदर्शनादव्याप्तिरित्याह–। [a] "अनुमेयेने"ति ॥ [b] "तथात्वे"ति । सञ्ज्ञासञ्ज्ञिसम्बन्धपरिच्छेदकरणमर्थापत्तिरनुमानं वा नतूपमानमधिकं प्रमाणमित्यर्थः ॥ [c] "तादृगि"ति । अनधिगतसङ्केतसञ्ज्ञासमभिव्याहृतवाक्यार्थस्य सञ्ज्ञिन्यनुसन्धानमित्यर्थः तथाच न व्यवहार्य्यतानुमितिकरणेतिव्याप्तिरित्यर्थः ॥ कदाचित्तेनाप्यनुमितिजनने तज्जातीयस्यानुमितिजनकत्वादसम्भव इत्याह–। [d] "तज्जातीयस्ये"ति । या करणव्यक्तिस्तादृशी नानुमितिं जनयति सैवोपमानमिति न युक्तं सामान्यपुरस्कारेण गृहीतस्य जन्यजनकभावस्य व्यक्तावावश्यकत्वेनासम्भवादननुगमाद्वेत्याह–। [e] "व्यक्तौ"ति । कल्पनालाघवतर्क्को य उपमाने कल्पनीयप्रमाणभावे सहकारीष्यते स कॢप्तप्रमाणभावस्यानुमानस्यैव किं नेष्यते इत्याह–। [f] "किंचे"ति ॥

सू० [a] विमतिपदं गवयशब्दप्रवृत्तिनिमित्तं तथात्वे तर्केणाविषयीक्रियमाणविपर्य्ययकत्वात् न यदेवं न तदेवं यथा गोत्वं(२)

(१) व्यक्त्यपेक्षया चाऽजनकत्वस्याऽयुक्तत्वादित्यन्वयः. तत्र हेतुद्वयमाह–सामान्याकारेत्यादिना, 'सामान्याकारपर्य्यवसायिनः'–इत्यतोऽग्रे 'जन्यजनकभावस्य सतः'–इति शेषः पूरणीयः । 'व्यक्त्यपेक्षया चाजनकत्वस्ये'ति स्थाने क्वचित् 'व्यक्त्यपेक्षया च जनकत्वस्य'–इत्यपि पाठः ।

(२) यथागोत्वमिति, गोत्वस्य गवयाऽवृत्तित्वात्तत्र्यक्तिवृत्तित्वकल्पनायां कल्पनागौरवेण विषयीक्रियमाणविपर्य्ययकत्वाच्च तद्गवयपदप्रवृत्तिनिमित्तमित्यर्थः । तथाचेदामिति, इदं गवयत्वं तथा=प्रवृत्तिनिमित्तत्वे तर्केणाऽविषयीक्रियमाणविपर्य्ययकमित्यर्थः ।

Digitized by Google

तथा चेदं ततस्तथेति [b]न ह्यस्ति सम्भवो न्यूनशैथिल्यादिदोषविरहिततर्कनिवेदितविपर्ययस्यार्थो नच तथेति अथवा गवयपदमसम्भवत्प्रवृत्तिनिमित्तान्तरमनुपपद्यमानाम्नोऽगोसदृशसामानाधिकरण्यमर्थाद्गवयत्वप्रवृत्तिनिमित्तकतामाक्षिपतीत्यर्थापत्तिरेवास्य प्रमाणमस्तु सा च त्वया व्यतिरेकीकृत्य परेण पृथगेवावश्यं प्रमाणनीयेति ।

टी० ॥ तर्कापकार्यमनुमानमाह—। [a]"विमतिपदमि"ति । गवयत्वमित्यर्थः । तथात्वे प्रवृत्तिनिमित्तत्वे तर्केण गौरवेणाविषयीक्रियमाणो विपर्ययोऽप्रवृत्तिनिमित्तत्वं यस्य तत्तथा सादृश्यत्वादित्यर्थः गवयत्वस्याखण्डतया तस्य प्रवृत्तिनिमित्तत्वे सादृश्यस्य न प्रवृत्तिनिमित्तत्वं कल्पनागौरवतर्केण प्रतिहतत्वादिति भावः ॥ [b]"नही"ति । यद्यपि गौरवादितर्के विशिष्टव्याप्त्युपग्रहो नास्ति येन विपर्ययपर्यवसानं भवेत्तथापि लाघवमेवास्य विपर्यय इति भावः वस्तुतो गवयपदं सप्रवृत्तिनिमित्तं पदत्वादिति सामान्यतो दृष्टमेव सादृश्यप्रवृत्तिनिमित्तताबाधकसहकृतं पक्षधर्मताबलाद्गवयत्वस्य प्रवृत्तिनिमित्तत्वं विषयीकरोति यथा पृथिव्यादिवृत्तिताबाधकसहकृतस्येच्छा क्वचिदाश्रिता गुणत्वादित्यनुमानस्यैवाष्टद्रव्यान्यद्रव्यवृत्तित्वपरिच्छेदकत्वमिति भावः ॥

मू० (१)शब्दोपि (२)क उच्यते (३)आप्तवाक्यं हि शब्दः प्रमाणमिति न युक्तं विकल्पानुपपत्तेः तथाहि कोयमाप्तो नाम * यथादृष्टवादी ? *—इति चेन्न, [a]भ्रान्तिप्रतिपन्नवादिवाक्येपि प्रसङ्गात् [b]प्रमाणदृष्टेति विशेषणे च तथा-

(१) { पराकृत्य प्रमाणानि प्रत्यक्षादीन्यतः परम् । आगमस्याप्रमाणत्वं साध्यते तर्कबृंहितम् ॥ }

(२) आगमं दूषयितुं पृच्छति—क इति ।

(३) किमाप्तवाक्यं शब्दः प्रमाणमुतनिर्दोषस्य वाक्यमाहोस्विदबाधितार्थवाक्यमिति विकल्पप्रथमं निराकरोति—आप्तवाक्यमिति—

भूतस्यान्यथावादव्यापनात् [c]यथाप्रमाणेति करणे चांशे तथाभूतवादिवाक्यस्यायथार्थस्यापि व्यापनात् [d]यावद्यथा प्रमाणदृष्टनिरुक्तौ च प्रायेणानथाभूतत्वादेव लक्ष्याणां तद-व्याप्तेः नहि यावत् प्रमितं तावदभिधीयते [e]यथाप्रमितस्यैव वक्तुर्वाक्यमिति व्याकारे च(१) युधिष्ठिरवाक्यस्याप्यने-वम्भूतत्वेनाव्याप्त्यापत्तेः नच विषये इति विशेषरूपस्य वि-षयस्यासाधारण्येनाव्यापकत्वापातात् * अथ [f]निर्दोषस्य वाक्यं तथा * इति चेन्न, (२) [g]सदोषस्य नास्ति घट इत्य-भिधित्सतोऽस्ति घट इति दैवान्निर्गतयथार्थवाक्याव्याप्तेः [h]* तत्प्रमाणं तु न भवत्येव? *—इति चेन्न,

टी० ॥ [a]"भ्रान्ती"ति ॥ भ्रान्तेरपि दृष्टत्वात्तया प्रतिपन्नं यो वद-ति तद्वाक्ये इत्यर्थः ॥ [b]"प्रमाणे"ति । प्रमाणदृष्टरजतस्य भ्रान्तेन शु-क्त्यात्मतया यदभिधानं तदपि प्रमाणं स्यादित्यर्थः ॥ [c]"यथे"ति । इमे-रक्कुरजते इति वाक्यस्य रजतांशे यथा प्रमाणदृष्टाभिधाने रज्ज्वंशे अय-थार्थस्य प्रमाणत्वं स्यादित्यर्थः ॥ यावद्यथाप्रमाणेन दृष्टं तावतस्तादृप्ये-णाभिधानमित्यव्यापकं नहि ताणत्वादिदर्शनाद्वह्निर्महानसेऽस्तीति ना-भिधीयत इत्याह—। [d]"यावदि"ति ॥ [e]"यथाप्रमितस्यैवे"ति । भ्रान्तेः पुरुषधर्मत्वादिति भावः ॥ [f]"निर्दोषस्ये"ति । भ्रमप्रमादविप्रलिप्साकर-णापाटवरहितस्येत्यर्थः ॥ भ्रान्तप्रतारकवाक्याव्यापकत्वमाह—। [g]"सदो-षस्ये"ति । दैवादिति निर्देशेन करणापाटवं विवक्षितं ॥ [h]"तदि"ति । प्रमाया गुणजन्यतया दोषवत्प्रणीतवाक्यस्य प्रमां प्रत्यजनकत्वादित्यर्थः ॥

मू० [a]पूर्वमुक्तोत्तरत्वात् प्रश्नसामर्थ्येन प्रामाण्यासम्भ-वात् [b]आपाततः सन्देहेप्यदोषात् सामान्यतो निर्दोष-

(१) अश्वत्थामा हतो नरो वा कुञ्जरो वेत्याकारकस्य—
(२) द्वितीयमपाकरोति—। नेति—

Digitized by Google

त्वस्य च(१) भीमाग्रजेऽप्यभावात् विशेषतस्तथात्वस्यासाधारण्यपर्यवसायित्वात् * यथार्थवाक्यं शब्दप्रमाणमित्यत्र को दोष इति चेत् ? *—[c] (२)पूर्वोक्तयाथार्थ्यदूषणानि तावत्प्रथमः यथार्थमिति विशेषणस्य व्यवच्छेदकत्वाव्यवच्छेदकत्वयोः पूर्ववद्दोषस्य [d] द्वितीयः वाक्यत्वानिरुक्तेश्च तृतीयः तथाहि किमिदं वाक्यं नाम * एकार्थावच्छिन्नपदसमुदायो वाक्यम् ? *—इति चेत्, एकत्वविषयत्वावच्छिन्नत्वानां वाच्यानि दूषणानि तावत्सन्तु(३) पदपदार्थं तु चिन्तयामः सुप्तिङन्तं पदमित्येके वर्णा विभक्त्यन्ताः पदमित्यन्ये तत्र नाद्यः [e] प्रत्येकं मिलितस्य वाऽव्यापकत्वात् ॥

टी० ॥ [a] "पूर्वमि"ति । आभासकरणजन्यस्यापि संवादिज्ञानस्य प्रमात्वेन प्रमाखण्डनप्रस्तावेऽभिधानादित्यर्थः ॥ [b] "आपातत" इति । प्रवृत्तिसंवादात्प्रागित्यर्थः ॥ [c] "पूर्वोक्ते"ति। यथार्थोनुभवः प्रमेति लक्षणप्रस्तावोक्तदूषणानि तथाहि वाक्यार्थयोः सादृश्यं प्रमेयत्वादिनाप्रमाणशब्देष्वप्यस्ति तेन यथार्थज्ञानजनकं वाक्यमिति वक्तव्यम् तत्र यत्किञ्चित्सादृश्यं भ्रान्तावपीति तज्जनकवाक्यातिव्याप्तिः प्रकाशमानरूपेणेत्यभिमते रूपवान् पट इत्यादौ प्रकाशमानरूपवत्त्वादिरूपेण ज्ञानस्य सादृश्याभावादसम्भव इत्यर्थः ॥ [d] "द्वितीय" इति । यथार्थपदस्यायथार्थवाक्यार्थव्यवच्छेदकत्वे यस्य वाक्यस्यांशे याथार्थ्यमंशे चायाथार्थ्यं तत्रापि प्रमाणं न स्यादित्यव्याप्तिरव्यवच्छेदकत्वे च विशेषणवैयर्थ्यमित्यर्थः ॥ [e] "प्रत्येकमि"ति । सुबन्तं यदि पदं तदा तिङन्तं न भवेत् तिङन्तत्वं च सुबन्ताव्यापकं मिलितं चासम्भवीत्यर्थः ॥

(१) युधिष्ठिर इत्यर्थः ।
(२) तृतीयं दूषयति पूर्वोक्तेति-
(३) पदेत्याकारकपदस्य योऽर्थस्तमित्यर्थः ।

मू० [a]"पृथक्प्रवृत्तिनिमित्ततायां च वाक्यलक्षणाव्यापकत्वात् नापि द्वितीयः विभक्त्यर्थस्यानुगतस्याभावात् विभक्तिरित्यनेन सुप्तिङोः प्राक्‌दिष्टो विभक्तिरित्यनेन च तसिलादेः पृथक् पृथगेव विभक्तिसञ्ज्ञाविधानात् शब्दसाम्येन लक्षणायोगात् किञ्च वर्णा इति [b]बहुत्वस्य विवक्षितत्वेऽहमित्यादेरपदत्वप्रसङ्गः अविवक्षितत्वे देवदत्त इत्यन्ताकारस्य पदत्वापातः तस्य विभक्त्यन्तत्वात् * सार्थकस्तथा? *—इति चेत्, भवतीत्यादौ [c]शवकारादीनां पदत्वप्रसङ्गः शपः सार्थकत्वात् [d]* यत्र विहिता विभक्तिस्तद्? *—इति चेन्न, शवकारं परित्यज्य पदत्वप्रसङ्गात् * तन्मध्यपतितत्वाच्छवकारोपि गृह्यते? *—इति चेत्, तर्हि यत्र विभक्तिर्विधीयते तत्र तद्विभक्तिमध्यपतितं च पदमिति वा विवक्षितं यत्र विभक्तिर्विधीयते तत्तद्विभक्तिमध्यवर्तिसहितं पदमिति वा आद्ये शवकारस्यापि [e]पृथगेवपदत्वप्रसङ्गः लक्षणस्य चाव्यापकत्वात् ॥

टी० ॥ [a]"पृथगि"ति । सुबन्तत्वतिङन्तत्वरूपप्रवृत्तिनिमित्तभेदा नानार्थमेव यदि पदपदं वाच्यं तदा पदसमुदायो वाक्यमित्यत्राननुगमः स्यादित्यर्थः ॥ [b]"बहुत्वस्ये"ति । अवां हलां वा बहुत्वं यदि विवक्षितं तदाहमित्यादीनामपदत्वं स्यात् वर्णमात्रबहुत्वविवक्षा चेत्तदा अस्त्रविष्णुशिववाचकानामकारोकारमकाराणां पदत्वं न स्यादित्यर्थः ॥ [c]"शवकारादीनामि"ति । प्रत्ययत्वेन तस्य सार्थकत्वं स्यादित्यर्थः ॥ [d]"यत्रे"ति । शवकाराच्च न विभक्तिविधानमित्यर्थः ॥ मध्यपतितमात्रस्य पदत्वं मध्यपतितसहितस्य वेति विकल्पार्थः ॥ [e]"पृथगि"ति । तन्मात्रस्य पदत्वप्रसङ्ग इत्यर्थः ॥ (शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

श्रीं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(*Continued from page* 323. Vol. IX.)

भू० "आनन्दं ब्रह्मणो विद्वा"निति ब्रह्मणः कल्याणगुणाऽऽनन्त्यमत्यादरेण वदतीयं श्रुतिः "सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिते"ति

टी० "अत्यादरेणे"ति, ब्रह्मस्वरूपादपि तद्गुणेष्वादरातिशय उक्तः आनन्दं ब्रह्मणो विद्वानिति हि श्रुतिः, न त्वानन्दान्वितं ब्रह्म विद्वानिति भावः—इयं श्रुतिरिति। निर्गुणपरत्वेन त्वयोक्तेतत्प्रकरणस्था श्रुतिरप्यस्मदुक्तार्थानुगुणेति भावः। एवमार्थगुणनिषेधनिरासद्वारा प्रकरणगतवाक्यान्तरेण गुणानन्त्यपरेणैकार्थ्यात्सत्यज्ञानादिवाक्यस्य सविशेषविषयत्वमुक्तम् । अथ स्ववाक्यैकदेशेनापि सविशेषपरत्वमुपपादयति "सोऽश्नुत"इत्यादिना, फलमवगमयद्वाक्यमिति ब्रह्म विदाप्नोति परमिति ब्राह्मणे ब्रह्म, तद्वेदनं, प्राप्तिः, प्राप्यं चेति चतुष्टयमुक्तम्, एतद्विवरणं सत्यं ज्ञानमित्यादिमन्त्रेण क्रियत इति श्रुतिरेवाह "तदेषा ऽभ्युक्ते"ति तदेत ब्राह्मणमभिमुखीकृत्य ऋगेषा ऽभ्यनूभिहितेत्यर्थः, मन्त्राणां ब्राह्मणविवरणरूपत्वदर्शनादुपक्रमाधिकरणविषयवा क्ययोरिवापातविरोधप्रतीत्यभावान्मन्त्रब्राह्मणयोर्नित्यनिर्दोषत्वाविशेषाच्च मन्त्रापेक्षया ब्राह्मणप्राबल्यवादोऽनुपपन्नः स्फुटप्रतिपत्तिहेतुत्वतदभावावेव प्राबल्यदौर्बल्यशब्दविवक्षितौ चेन्न विरोधः "सत्यं ज्ञानमनन्तं ब्रह्मे"ति ब्रह्मशब्दो विवृतः, "यो वेद निहितं गुहाया"मिति विच्छब्दः "परमे व्योमन् सोऽश्नुत" इति प्राप्तिः, "सर्वान्कामा नित्यादिना प्राप्यं, तत्र परशब्दार्थविवरणमेतदिति दर्शयतु

परस्य विपश्चितो ब्रह्मण इत्युक्तं, विपश्चित्त्वमपि भोग्यगुणत्वेनोक्तं, वाक्यस्यार्थं वक्तुं पदानामन्वयं दर्शयति—

सू० ब्रह्मवेदनफलमवगमयद्वाक्यं परस्य विपश्चितो ब्रह्मणो गुणाऽऽनन्त्यं ब्रवीति "विपश्चिता ब्रह्मणा सह सर्वान् कामानश्नुते" काम्यन्ते इति कामाः कल्याणगुणाः ब्रह्मणा सह तद्गुणान्सर्वानश्नुत इत्यर्थः ।

टी० "विपश्चिते"ति, किमत्र गुणवाचिपदम्?इति शङ्कायां "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता" इति त्याज्यतयोक्तकामव्यावृत्त्यर्थमवयवशक्त्या व्याचष्टे "काम्यन्त" इति, ब्रह्मवेदनफलतया मुक्तानुभाव्यत्वादिह त्याज्यकामपरत्वानुपपत्तेः काम्यत्वस्य ब्रह्मस्वरूपेऽपि संभवे सत्यपि व्यतिरेकनिर्देशाद्बहुवचनान्तत्वादवयवशक्तेः तदुक्तभोग्यत्वस्य च गुणेषु संभवात् "स वा एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते" "ये एते ब्रह्मलोके" च "इहात्मानमनुविद्य" "व्रजन्त्येतांश्च सत्यान् कामान्" "त इमे सत्याः कामा" इत्यादिश्रुत्यन्तरैकार्थ्याच्च कामशब्दवाच्याः कल्याणगुणगणा इत्यर्थः । कस्येमे गुणास्सहभावश्च ब्रह्मणा- पुत्रेण सहौदनं भुङ्क्ते इत्यत्र पुत्रस्येव किं भोक्तृतया? उत क्षीरेण सहौदनं भुङ्क्ते इत्यत्र क्षीरस्येव भोग्यतयेति? शङ्कां च, परिहरन्वाक्यार्थमाह "ब्रह्मणे"ति, अस्य वाक्यस्य प्राप्यवाचिपरशब्दब्रह्मविवरणरूपत्वात्सर्वान् कामान् सह ब्रह्मणेति भोग्यवाचिपदेनाव्यवहितप्रयोगस्वारस्याच्च सहशब्दो भोग्यसाहित्यपरः सन्निहितं ब्रह्मैव च गुणानामाश्रयः, अतोऽनन्तगुणविशिष्टं ब्रह्मानुभवतीत्यर्थः "सह युक्तेऽप्रधान" इति शब्दानुशासनवशात्सहशब्देनाप्राधान्यं ब्रह्मण आशङ्क्य तत्परिहाराय सहशब्दप्रयोजनमाह—

सू० दहरविद्यायां "तस्मिन्यदन्तस्तदन्वेष्टव्यम्" इतिवद्गुणप्राधान्यं वक्तुं सह-शब्दः, फलोपासनयोः प्रकारैक्यं "यथा-

कतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवती"ति श्रुत्यैव सिद्धं "यस्यामतं तस्य मतम्" "अविज्ञातं विजानता"मिति ब्रह्मणो ज्ञानाविषयत्वम् उक्तमिति चेत् "ब्रह्मविदाप्नोति परं" "ब्रह्म वेद ब्रह्मैव भवती"ति ज्ञानान्मोक्षोपदेशो न स्यात् ।

टी० "दहरे"ति, यो वेदेति विहिते वेदने गुणानां प्राधान्यसूचकः सहशब्दः, दहरविद्यायामुपासने हि गुणप्राधान्यमुक्तं तथाऽत्राप्युपासने गुणप्राधान्यं वक्तुं सहशब्द इत्यर्थः, फलदशायां गुणप्राधान्यश्रवणादुपासने गुणप्राधान्यं कथं सिध्यतीत्यत्राह "फलोपासनयो"रिति, फलोपासनयोरुभयोरपि सगुणत्वं गुणप्रधान्यं च तुल्यप्रकारमित्यर्थः । गुणप्राधान्यं वक्तुमित्यनेनापि सहशब्दस्य भोग्यसाहित्यपरत्वं सिद्धम्, अन्यथा भोक्तृप्राधान्यं हि सिध्येत्, न तु भोग्यगुणप्राधान्यमिति श्रुत्यैवेत्येवकारेण उक्तन्यायस्य पुरुषबुध्युत्प्रेक्षा निरपेक्षं श्रुत्या कण्ठोक्तत्वमभिप्रेतम् । अथ सगुणानामेव ज्ञेयत्वं दृष्टमिति ज्ञेयत्वनिषेधेन निर्गुणत्वं फलितमिति ज्ञेयत्वनिषेधपरत्वेन परोक्तं वाक्यमुपादत्ते "यस्ये"ति, किं ज्ञानमात्राविषयत्व मुतोपासनात्मकज्ञानाविषयत्वमुत सगुणोपासनात्मकज्ञानाविषयत्वं? विवक्षितमिति विकल्पत्रयमभिप्रेत्य प्रथमं ज्ञानमात्राविषयत्वं दूषयति "ब्रह्मविदि"ति, ब्रह्मणो ज्ञेयत्वश्रुतेरादराति–

भू० "असन्नेव स भवति असद्ब्रह्मेति वेद चेत्" "अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु"रिति ब्रह्मविषयज्ञानासद्भावासद्भावाभ्यामात्मनाशमात्मसत्तां च वदति अतो ब्रह्मविषयवेदनमेवापवर्गाय सर्वाः श्रुतयो विदधति, ज्ञानं चोपासनात्मकम् ॥

टी० शयं दर्शयति "असन्नेवे"ति, न ब्रह्मवेदनमपवर्गोपायः, अपि तु प्रपञ्चमिथ्यात्वज्ञानमेव तदुपाय इति परेरुच्यते "विद्ययाऽमृतमश्नुते"

Digitized by Google

तथा "विद्वान्नामरूपाद्विमुक्तः" "ततो ज्ञानं प्रवर्त्तते" "ज्ञानाग्निः सर्वकर्माणी"त्यादिष्वनिर्दिष्टविषयविशेषेषु वाक्येष्वपवर्गोपायतया श्रूयमाणस्य ज्ञानस्य ब्रह्मविषयत्वप्रपञ्चमिथ्यात्वविषयतासाधारण्यात्तदाशङ्क्याह "अत"-इति, अतः केषुचिद्वाक्येष्वपवर्गोपायज्ञानस्य ब्रह्मविषयत्वदर्शनात्सर्वाः श्रुतयः अनिर्दिष्टविषयविशेषा विद्ययाऽमृतमश्नुत इत्यादिकाः श्रुतयोऽपि सर्वशाखाप्रत्ययन्यायेन ब्रह्मविषयमेव वेदनमपवर्गोपायतया विदधतीत्यर्थः । यद्वा केषुचिद्ब्रह्मविषयत्वे श्रुते ज्ञानमात्रोपायपराः श्रुतयश्च सामान्यविशेषन्यायात् तत्रैव पर्यवस्यन्तीत्यभिप्रायः । अथोपासनात्मकज्ञानाविषयत्वपक्षं दूषयति "ज्ञानं चे"ति, "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत" इति श्रुतिरुपासनात्मकज्ञानाविषयशङ्काबीजं वाक्यार्थज्ञानस्योपायत्वानुपपत्त्युपपादनात्परिहृतमित्यर्थः, नेदं यदिदमुपासत इत्यस्यायमर्थः—यदिदं प्रतीकमुपासते तच्च तदेव परं ब्रह्म त्वमुपास्स्वेति । अथ सगुणोपासनाविषयत्वपक्षं प्रतिक्षिपति—

सू० उपास्यं च ब्रह्म सगुणमित्युक्तं "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे"ति ब्रह्मणोऽनन्तस्यापरिमित[1]गुणस्य वाङ्मनसयोरेतावदिति परिच्छेदायोग्यत्वश्रवणेन ब्रह्मैतावदिति ब्रह्मपरिच्छेदज्ञानवतां ब्रह्माविज्ञातममतमित्युक्तम् ॥

टी० "उपास्यं चे"ति, निर्गुणपरत्वेन परोक्तायाः सद्विद्याया एव सगुणविषयत्वोपपादनादिति भावः । यद्वा ज्ञानं चोपासनात्मकमिति ज्ञानविशेषविषयत्वकथोक्त्या ज्ञेयत्वमात्रनिषेधो दूरं निरस्त इति भावः । उपास्यं चेति ज्ञेयत्वनिवृत्त्या सिषाधयिषिता गुणनिवृत्तिर्गुणविधानबाधिता ततश्चाज्ञेयत्वं बाधितं[2] ज्ञेयत्वमाक्षिपतीति भावः । तर्ह्यविज्ञातत्वामतत्वश्रुत्योः कोऽर्थः? इत्यत्राह "यतो वाच" इति, अनन्त—शब्देन सत्यं ज्ञान-

[1] अपरिच्छिन्नगुणस्येति पाठान्तरमनतिशायकम् ।
[2] बाधित्वेति पुस्तकान्तरपाठोऽपि युक्तः ।

मिति वाक्यं स्मारितम् । अनन्तस्येति स्वरूपानन्त्यमुक्तम्, अपरिच्छिन्नगुणस्येति गुणानन्त्यम्, अस्मिन्नर्थे "न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः" "नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमुच्यते" "तवानन्तगुणस्यापि षडेव प्रथमे गुणाः" "वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वलोकैः महात्मनः शङ्खचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य चतुर्मुखायुर्यदि कोटिवक्त्रो भवेन्नरः क्वापि विशुद्धचेताः स ते गुणानामयुतैकदेशं वदेन्न वा देववर प्रसीद" "यथा रत्नानि जलधेरसंख्येयानि पुत्रक तथा गुणा ह्यनन्तस्य असंख्येया महात्मनः । इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात्" इत्यादि द्रष्टव्यं परिच्छिन्नत्वज्ञाने कथं धर्मिणो ब्रह्मणोऽज्ञातत्व? मित्यत्राह—

मू० अपरिच्छिन्नत्वाद्ब्रह्मणः, अन्यथा यस्यामतं तस्य मतं विज्ञातमविजानतामिति ब्रह्मणोऽमतत्वविज्ञातत्ववचनं तत्रैव विरुध्यते, यत्तु न दृष्टेर्द्रष्टारं न मतेर्मन्तारमिति श्रुतिः दृष्टेर्मतेर्व्यतिरिक्तं द्रष्टारं मन्तारं च प्रतिषेधतीति तदागन्तुकचैतन्यगुणयोगितया ज्ञातुर्ज्ञानस्वरूपतां कुतर्कसिद्धां मत्वा "न तथाऽऽत्मानं पश्येः न मन्वीथाः अपि तु द्रष्टारं मन्तारमप्यात्मानं दृष्टिमतिरूपमेव पश्ये"रित्यभिदधातीति परिहृतम् ।

टी० "अपरिच्छिन्नत्वात् ब्रह्मण" इति—ब्रह्मशब्दवाच्यस्य स्वरूपतोगुणतश्चापरिच्छिन्नत्वादित्यर्थः, न केवलं श्रुत्यन्तराविरोधार्थमेवमर्थ उक्तः इतरथा स्ववाक्यव्याहतिप्रसङ्गा[1]च्चेत्याह "अन्यथे"ति, तत्रैव—स्ववाक्य एव । ज्ञेयत्वनिषेधे परिहृते ज्ञातृत्वनिषेधं परिहरति "यत्त्वि"त्यादिना, दृष्टेर्मतेरिति पञ्चम्यन्तत्वाभिप्रायेण व्यतिरिक्तमिति पदाध्याहारेण किं योजना? उत षष्ठ्यन्ततया व्यतिरिक्तपदानध्याहारेण योजना

१ व्याहतिप्रसङ्गश्चेति युक्तः पाठः ।

त्वया क्रियत? इति विकल्पमभिप्रेत्य प्रथममध्याहारपक्षमनुवदति "न दृष्टे"रिति, परिहरति "तद्धि"ति, । प्रसक्तस्य हि प्रतिषेध इति इति शङ्कायां प्रसङ्गं दर्शयति "कुतर्कसिद्धा"मिति कुतर्कः कथमुपन्यस्त? इत्यपेक्षायां स्वरूपजडत्वे परोक्तं हेतुद्वयं संग्रहेणोपपादयति "आगन्तुकचैतन्यगुणयोगितये"ति, आगन्तुकत्वाद्गुणत्वाच्चेतिहेतुद्वयम्, आगन्तुकत्वात्—अनित्यत्वात् ज्ञानं नित्यस्यात्मनो न स्वरूपं भवितुमर्हति गुणत्वाच्च न स्वरूपमिति । यद्वा चैतन्यं नाम विषयप्रकाशः तच्चित्यं स्वरूपं चेत्सर्वदा विषयप्रकाशप्रसङ्ग इति भावः । दृष्टश्रुतिमतिनिदिध्यासनानां ज्ञानविशेषाणां कर्तुरात्मनः स्वरूपस्य दृष्ट्यादिरूपत्वे विधीयमाने आत्मनः स्वरूपस्य न ज्ञानावान्तरभेदः शङ्कनीयः, तेषां ज्ञानविशेषाणां स्वयंप्रकाशत्वलक्षणं ज्ञानत्वमविशिष्टमिति तावन्मात्रमेव स्वरूपस्य विवक्षितं भवति । अयं परिहारः परपक्षे ऽपि समानः । साक्षाद् योजनामाह—

सू० अथवा दृष्टेर्द्रष्टारं मतेर्मन्तारं जीवात्मानं प्रतिषिध्य सर्वभूतान्तरात्मानं परमात्मानमेवोपास्स्वेति वाक्यार्थः अन्यथा "विज्ञातारमरे केन विजानीया"दित्यादिज्ञातृत्वश्रुतिविरोधश्च ।

टी० "अथवे"ति, दृष्टिश्रुतिमतिनिदिध्यासनानां कर्तारं जीवात्मानं प्रतिषिध्य परमात्मानमेवोपास्स्वेत्ययमर्थ उक्त इत्यर्थः, । यद्वा अभिदधातीत्यनुषङ्गः, जीवात्मानं प्रतिषिध्य परमात्मानमुपास्स्वेत्यभिदधाति श्रुतिरिति वाक्यार्थ इति वाक्यान्तरम् । यद्वा प्रतिषिध्य परित्यज्येत्यर्थः अतः समानकर्तृकत्वोपपत्तिः, "यः प्राणेन प्राणिति योऽपानेनापानिति एष त आत्मा सर्वान्तर" इति प्रस्तुतत्वात्प्राणेन प्राणितृत्वादि जीवात्मनः संभवतीति तदुपास्यत्वशङ्काव्यावृत्त्यर्थं न दृष्टेर्द्रष्टारमित्याद्युच्यत इति प्रथमेवार्थः, अन्यथा श्रुत्यन्तरविरोधमाह "अन्यथे"ति, गुणत्वमसिद्धं ज्ञानस्वरूपत्वेन श्रुतिप्रतिपन्नत्वात् ज्ञानं चेदागन्तुकमिति न वाच्यम् ईश्वरज्ञाने

व्यभिचारात् अस्मदादिज्ञानस्याप्यागन्तुकत्वं कालात्ययापदिष्टं न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इति हेतुद्वयपरिहारः विषयप्रवणत्वश्रुतेः, धर्मभूतज्ञानस्यैव सर्वसाधारणं ज्ञानत्वं स्वप्रकाशत्वम् अतो न सर्वदा विषयप्रकाशप्रसङ्गश्च ज्ञेयत्वनिषेधपरिहारानन्तरं बुद्धिस्थत्वात् ज्ञातृत्वनिषेधः परिहृतः। अथार्थगुणनिषेधोऽन्तरं परिह्रियते—

भू० आनन्दो ब्रह्मेत्यानन्दमात्रमेव ब्रह्मस्वरूपं प्रतीयत इति यदुक्तं तज् ज्ञानाश्रयस्य ब्रह्मणो ज्ञानं स्वरूपमिति वदतीति परिहृतम्। ज्ञानमेव ह्यनुकूलमानन्द इत्युच्यते विज्ञानमानन्दं ब्रह्मेत्यानन्दरूपमेव विज्ञानं ब्रह्मेत्यर्थः, अत एव भवतामेकरसता अस्य ज्ञानस्वरूपस्यैव ज्ञातृत्वमपि श्रुतिशतसमधिगतमित्युक्तं तद्वदेव "स एको ब्रह्मण आनन्दः" "आनन्दं ब्रह्मणो विद्वानित्यादिव्यतिरेकनिर्देशाच्च नानन्दमात्रं ब्रह्म अपि त्वानन्दि।

टी० "आनन्द इत्यादिना, पूर्वोक्तपरिहारमत्रातिदिशति "तज्ज्ञानाश्रयस्ये"ति, कथं तेनेदं परिहृतमित्याह "ज्ञानमेव ही"ति; तर्हि श्रुतिषु विज्ञानानन्दशब्दयोः समभिव्याहारो नोपपद्यत इत्याह "विज्ञान"मिति, स्वप्रकाशत्वानुकूलत्वरूपप्रवृत्तिनिमित्तभेदादुपपद्यत इति भावः। तथैव भवद्भिरभ्युपगतमित्याह "अत एवे"ति, अत एव—ज्ञानानन्दशब्दयोरेकविषयत्वादेवेत्यर्थः। आनन्दस्यानन्दाश्रयत्वाभावः किं श्रुत्या? उत व्याप्त्या? व्याप्त्या चेत्कस्यचिद्धर्मः स्यात् श्रुतिबलात्स्वतन्त्र इति चेत्तत एवानन्दाश्रयत्वमप्यभ्युपगम्यतां धर्मभूतानन्दस्य ह्यानन्दाश्रयत्वाभावो दृष्टः अतो व्याप्तिविरोधश्च नास्ति अतः स्वतन्त्रत्ववत् गुणाश्रयत्वमपि श्रुतिसिद्धत्वात् स्वीकार्यमिति भावः। उभयत्र प्रमाणे सति हि न्यायसंचार इति हि शङ्कायां दृष्टान्तभूमौ प्रमाणस्य दर्शितत्वमाह "अस्ये"ति, दार्ष्टा-

न्तिकेऽपि कण्ठोक्तिं दर्शयति "तद्धि"ति, ज्ञातृत्ववदानन्दित्वमपि कण्ठोक्तमित्यर्थः । ज्ञातृत्वश्रुतिरप्यानन्दित्वे प्रमाणमित्यभिप्रेत्याह—

सू० ज्ञातृत्वमेव ह्यानन्दित्वं यदिदमुक्तं "यत्र हि द्वैतमिव भवति "नेह नानाऽस्ति किंचन "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्ये"दिति भेदनिषेधो बहुधा दृश्यत इति ।

टी० "ज्ञातृत्वमेव ह्यानन्दित्व"मिति, ज्ञातृत्वातिरिक्तानन्दित्वव्युदासपर एवकारः, हि–शब्दस्तदुपपत्तिसूचकः, अनुकूलज्ञानाश्रयत्वमेव ह्यानन्दित्वमित्यर्थः । ज्ञातृत्वश्रुतिर्ज्ञानाश्रयत्वनिषेधस्यानन्दाश्रयत्वनिषेधस्य च विरोधिनीति भावः । अथ भेदनिषेधपरत्वेन परोक्तां श्रुतिं योजयितुमनुवदति "यदिद"मिति, यत्र हीत्यादिवाक्ये भेदनिषेधः कृतः भेदप्रतिपत्तावनर्थं दर्शयति "मृत्यो"रिति, "तमसो वा एष तमः प्रविशती"ति वत् नित्यानुवृत्तस्य भेदस्य कथं भ्रान्तिसिद्धत्वमित्यत्राह "यत्र त्वि"ति, उक्तवाक्येषु वचनभङ्गीवैविध्याभिप्रायेण बहुधेत्युक्तं, बहुश इति पाठे निषेधक्रियाऽऽवृत्तिरित्यर्थः । परिहरति "तदि"ति, तच्छब्दस्य परिहृतमित्यत्रान्वयः समस्तहेयप्रत्यनीकत्वेन समस्तकल्याणगुणात्मकत्वेन च श्रुत्यन्तरप्रसिद्धस्य ब्रह्मणो विकारास्पदक्लेशकर्मादिहेयपरवशजगदैक्यं व्याहतत्वाच्छ्रुतिर्न प्रतिपादयति, न व्याहतिर्हेयानामपारमार्थिकत्वादिति चेदपरमार्थिकत्वेऽप्येतन्निरसनीयत्व वा न चेत्तन्निरस्यर्थं शास्त्रमनर्थकं स्यात् निरसनीयं चेन्निरसनीयसंबन्ध इति तत्प्रत्यनीकस्य तत्संबन्धित्वं व्याहतं किंच बहु स्यामिति स्वसङ्कल्पपूर्वकं बहु भवनं श्रूयते सर्वज्ञस्य च स्वेच्छया स्वस्मिन् हेयोपादानमनन्वितमिति तत्सर्वज्ञस्य तत्प्रतिपादनमशक्यं असर्वज्ञत्वे पश्यत्यचक्षुः स शृणोत्यकर्णः "स्वाभाविकी ज्ञानबलक्रिया च" यःसर्वविदित्यादि श्रुतिविरोधः हेयस्यापारमा-

१ विरोधिताऽवच्छेदकसंबन्धातिरिक्तसंबन्धेन संबन्धित्वं व्याहतमित्यर्थः ।

Digitized by Google

र्थ्योऽपि स्वसंकल्पेन स्वस्यानन्तापुरुषार्थप्रमापादनं सर्वज्ञस्य नोपपद्यते सार्वज्ञ्यस्याविद्याकल्पितत्वाभ्युपगमादविद्यापूर्वकमेव बहुभवनधर्मरूपं सार्वज्ञ्यमिति न वाच्यं स्वाभाविकीति श्रुतेः "त इमे सत्याः कामा" इति सत्यत्वश्रुतेश्च स्वसार्वज्ञ्यमाविद्यकत्वेन मिथ्येति न जानाति चेत् सार्वज्ञ्यं न स्यात् जानाति चेत्तेनैव ज्ञानेन बाधितत्वात्सार्वज्ञ्यं न स्यात् ततश्च पूर्वजगदाकारपर्यालोचने स्वसङ्कल्पपूर्वकं जीवकर्मानुगुणसृष्टिर्नोपपद्यते यतः सार्वज्ञ्यस्याविद्यकत्वमनुपपन्नमिति सर्वज्ञस्य तस्य स्वगतहेयापादनं न घटते। किंच हेयं स्वगतत्वेन जानतस्ततः सर्वशक्तेस्तस्य सत्यसङ्कल्पस्य सहसैव स्वगतहेयनिरासकत्वमपि नोपपद्यते अशक्तत्वे "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी"त्यादिश्रुतिविरोधः ईदृशविरोधो नास्ति श्रुतिबलादविरुद्धत्वस्याभ्युपगन्तव्यत्वादिति चेत् तर्हि "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति" "न जायते म्रियते वा विपश्चित्" "वायुश्चान्तरिक्षं चैतदुभयममृतम्" "आत्मनः आकाशस्संभूतः" "न नभो न भूमिर्नेमे द्यावापृथिवी" "अन्तवदेवास्य तद्भवति नास्येष्टापूर्तं चीयेते इत्यादिश्रुत्युक्तस्यात्मादीनामनित्यत्वानित्यत्वादेरपि श्रुतिप्रतिपन्नतया विरोधाभावादुभयमभ्युपगन्तव्यं, ततश्च सर्वत्र यथाप्रतिपन्नस्वीकारे मीमांसारम्भवैयर्थ्यं स्यात् प्रस्तुतभेदाभेदश्रुत्योरपि पारमार्थिकाऽपारमार्थिकविषयत्वेन सोपाधिकानिरुपाधिकविषयत्वेन वा विभागकल्पनमनुपपन्नं तस्य विरोधपरिहारार्थत्वाद्विरोधस्य चाभावात्ततश्च भेदपरमार्थत्वसिद्धिः, अतो विरोधोऽभ्युपगन्तव्य इह च विरोधोऽवगम्यते "मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यती"ति भेदप्रतिपत्तेः संसारहेतुत्वं श्रूयते "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमे"ति "जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमितरो वीतशोक" इति भेदज्ञानस्य मोक्षोपायत्वं श्रूयते द्वैतिनोऽतथ्यदर्शिन इत्यादिस्मृतिविरुद्धं, "द्वाविमौ पुरुषौ" "बिभर्त्यव्यय ईश्वरः "यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः" इत्यारभ्य "योमामेवमसंमूढो जानाति पुरुषोत्तम"मिति भेदज्ञानवतोऽसंमूढत्वं स्मर्यते एवमादिवचनप्रतिपन्नस्य भेदस्य लोकासिद्धत्वाभावान्निषेधार्थं भेदोऽनूद्यत इति वादोऽनु-

पपचः । किंच यदि भेदमात्रस्य लोकसिद्धत्वादप्राप्ते हि शास्त्रार्थवत्त्वादिति न्यायादभेद एव शास्त्रप्रतिपाद्य इत्युच्यते तर्हि सोऽयं देवदत्त इत्यादावभेदमात्रस्य लोकसिद्धत्वादप्राप्ते शास्त्रस्यार्थवत्त्वाच्च शास्त्रेणाभेदप्रतिपादनमयुक्तं देवदत्ताद्यैक्यं हि लोकसिद्धं न जीवपरयोः, अतस्तयोरभेदः शास्त्रप्रतिपाद्य इति चेत्तर्हि घटपटादिभेद एव लोकसिद्धः, न तु जीवपरयोर्नियाम्यत्वनियन्तृत्वधार्यत्वधारकत्वशेषत्वशेषित्वव्याप्यत्वव्यापकत्वादिलक्षणभेदो न लोकसिद्ध इति स भेदः शास्त्रप्रतिपाद्य एव, यथोक्तमाचार्यपादैः "न द्वैतं प्रतिपादयन्त्युपनिषद्वाचः प्रसिद्धं हि तत् । किंच द्वैतमनन्यगोचरतया तद्वैक्यमास्थीयताम् अप्राप्ते खलु शास्त्रमर्थवदिति व्यर्थप्रयासो यतः प्रख्यातादपरस्तु शास्त्रविषयो भेदस्त्वदद्वैतवदि"ति अयं चार्थोऽनन्तरमेव भाष्ये वक्ष्यते अतोऽनुवाद इति निर्बन्धो। नोपपद्यते भेदश्रुतिरुपासनार्था न तु तत्त्वपरा 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टं यदा पश्यती'त्युपासनवाचिपदश्रवणादिति चेत्. तथाऽपि तात्त्विक एव भेदः, तज्ज्ञानस्य मोक्षोपायत्वोक्तेः, तत्त्वज्ञानेन हि मोक्षो न च फलविशेषायोपासनार्थत्वात् भेदश्रुतीनाम् भेदस्यातात्त्विकत्वं वाच्यम् ऐक्यस्य चोपासनार्थत्वादसत्त्वप्रसङ्गात् श्रूयते ह्यभेदस्योपासनार्थत्वम् "अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद" "आत्मेत्येवोपासी"तेति ऐक्यस्य चोपासनार्थत्वं भेदस्य च तात्त्विकत्वं युक्तं वैनतेयध्यानेन ह्यैक्यमारोपितं दृष्टं भेद एव हि नरेन्द्रवैनतेययोस्तात्त्विकः विधिशेषभूतव्यतिरिक्तेष्वपि वाक्येष्वभेदः प्रतीयत इति तस्य तात्त्विकत्वमिति चेत् तर्हि "क्षरं प्रधानममृताक्षरं हरः प्रधानक्षेत्रज्ञपतिर्गुणेशः "ज्ञाज्ञौ द्वौ ऋतं पिबन्तौ द्वा सुपर्णा नित्यो नित्यानामित्याद्यविधिशेषभूतवाक्यावगतत्वाद्भेदस्य तात्त्विकत्वमवर्जनीयम् उपास्तिफलभूतमुक्तिदशायामभेदादभेदपारमार्थ्यं चेन्मुक्तिदशायां भेदश्रवणाद्भेदतात्त्विकत्वसिद्धिः । अत उपासनार्थत्वादपरमार्थविषयत्वेन भेदश्रुतिनिर्वाहो नोपपद्यते भेदाभेदयोर्नियतपौर्वापर्यविरोधवत्त्वादपच्छेदन्यायविषयत्वं सगुणत्वनिर्गुणत्वयोरिव न संभवति विरोधनयादुपक्रमनयाद्वापरभूतभेदनिषेधोत्पत्तिप्रतिबन्ध एव स्यात् इदं च पूर्वमेव प्रपञ्चितम् एवं

न्यायानुगृहीतश्रुत्यन्तरविरोधस्यावर्ज्जनीयत्वमेवाविर्वाहाणामनुपपन्नत्वं च प्रदेशान्तरोक्तमिहाभिप्रेत्य समीचीननिर्वाहं दर्शयति–

मू० तत्कृत्स्नस्य जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात्तत्प्रत्यनीकनानात्वं प्रतिषिध्यते न पुनर्बहु स्यां प्रजायेयेति बहुभवनसङ्कल्पपूर्वकं ब्रह्मणो नानात्वं श्रुतिसिद्धं प्रतिषिध्यत इति परिहृतं, नानात्वनिषेधादियमपरमार्थविषयेति चेन्न प्रत्यक्षादिसकलप्रमाणानवगतनानात्वं दुरारोहं ब्रह्मणः प्रतिपाद्य तदेव बाध्यत इत्युपहास्यमिदम् ॥

टी० "तदि"ति, जगदिति पदं ब्रह्मपर्यन्तं तस्य ब्रह्मकार्यतयेति पदेनैक्यादिति पदेन चान्वयः तदन्तर्यामिकतयेत्यत्र सामर्थ्याज्जगत इत्यध्याहारः तेन सङ्कल्पयुक्तजगच्छब्दस्य निष्कर्षकत्वानिष्कर्षत्वविरोधपरिहारः सर्वं खल्विदं ब्रह्म तज्जलानिति वाक्योक्तं जगतस्तज्जत्वं तल्लयत्वं चोपजीव्याह "ब्रह्मकार्यतये"ति, ब्रह्म–शब्दः कारणावस्थविदचिद्विशिष्टपरः तदनत्वमुपजीव्याह "तदन्तर्यामिकतया चे"ति, तच्छब्दो विशेष्यविपरामर्शाविशिष्टे प्रक्रान्ते विशेष्यांशस्यापि प्रकृतत्वात् तथा सन्मूलाः सदायतना इत्यत्र सच्छब्दस्य विशिष्टपरत्वं विशेष्यपरत्वं च तद्वत् तत् ब्रह्मान्तर्यामी यस्य तत्तदन्तर्यामिकं तद्भावेनेत्यर्थः कथं तदनत्वेन तदन्तर्यामिकत्वसिद्धिः । उच्यते अननं स्थितिः, ब्रह्मणो जगत्स्थितिहेतुत्वं चान्तः प्रविश्यप्रशासनेन धारकत्वं "सन्मूलास्सोम्येमास्सर्वाः प्रजाः सदायतनास्सत् प्रतिष्ठा" इत्यत्र सन्मूलाः सत्प्रतिष्ठा इति पदद्वयं सच्छब्दवाच्यब्रह्माधीनोत्पत्तिलयपरं प्रतिष्ठा निष्ठा–पर्यवसानं–लयः, न तु सदाधारत्वं सदयतना इति पुनरुक्तिप्रसङ्गात्, एवं ब्रह्मण उत्पत्तिलयहेतुत्ववाचिपदद्वयमध्यगतेन स्थितिहेतुत्ववाचिना सदायतना इति पदेन धारकत्वसिद्धिः । (शेषमग्रे)

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page* 328. Vol. IX.)

अपूर्वस्यास्तिताऽधिकरणम् ।

सू० चोदना पुनरारम्भः ॥ ५ ॥

"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "श्येनेनाभिचरन् यजेत" त्येवमादिषु अपूर्वं सिद्धं कृत्वा तत्प्रतिपादकशब्दविशेषो विचारितः, तस्य त्वस्तित्वमेवासिद्धमिति तत्प्रतिपादनार्थमारभ्यते किमेतेष्वपूर्वं नाम यागस्वर्गातिरिक्तमस्ति? ने? ति विचारः। तदर्थं च किं वाक्यावगतः स्वर्गयागादिसाध्यसाधनभावोऽपूर्वमन्तरेणापि घटते? ने? ति तत्र "साध्यसाधनभावो हि श्रूयते स्वर्गयागयोः। वस्त्वन्तरस्य सद्भावे श्रुतिरेव विरुध्यते" । वस्त्वन्तरं हि कल्प्यमानं यागसाध्यं स्वर्गसाधनं च कल्प्येत, तच्चोभयमपि श्रुतिविरुद्धं स्वर्गयागयोरेव साध्यसाधनभावश्रवणात् । कथं पुनः क्षणिकयागस्य विनाऽपूर्वेण कालान्तरभावि फलसाधनत्व? मिति यदि ब्रूयात् प्रतिब्रूयादेनमपूर्वेऽपि कल्पिते कथं यागस्य फलसाधनत्वं, ? तदा ह्यपूर्वमेव साधनं स्यान्न यागः। यागस्यैव शक्तिरवान्तरव्यापारो वाऽपूर्वमिति चेन्न शक्तिमति व्यापारवति चातीते शक्तिव्यापारयोरवस्थानायोगात्, तस्माद्याग एव विनष्टोऽपि फलं साधयति, स एव वा फलं यावदवतिष्ठत इति शास्त्रप्रामाण्यादवगन्तव्यं, नापूर्वमिति प्राप्ते ब्रूमः । "विनष्टस्यासतस्तावच्च कार्यारम्भसंभवः । क्षणिकत्वेन सिद्धस्य नावस्थानं च युक्तिमत्" । तदेव हि श्रुतार्थानुपपत्त्या कल्पयितव्यं न यत्प्रमाणान्तरेण विरुध्यते, विरुद्धं च सर्वप्रमाणैर्विनष्टस्यासतोऽनारब्धवस्त्वन्तरस्य कार्यारम्भकत्वमवस्थानं च क्षणमात्रवर्त्तिनः प्रमाणाविरुद्धमेवातोऽपूर्वमेव कल्पनीयम् ।

Digitized by Google

न च श्रुतिविरोधः, तस्य यागस्य शक्तित्वात् । अवान्तरव्यापारत्वाद्वा । न हि शक्त्याऽवान्तरव्यापारेण वा व्यवधिर[1]करणतामापादयति काष्ठादीनामिव ज्वालया । न चावश्यं शक्तिमत्येवा[2]वतिष्ठते कार्यानुमेया हि शक्तिः, यत्रैव कार्यायालं तत्रैव कल्प्यते । अतो यागशक्ति[3]रात्मनि तिष्ठति इत्यविरोधः । एतदेवावान्तरव्यापाराणां तत्त्वं यत्समीहितादुपायभूतेन साधनेन तत्सिध्यर्थमन्तरा साध्यमानत्वं, काष्ठैरिव ज्वालायाः, तस्मादस्त्यपूर्वं फलसाधनस्य कर्मणोऽवान्तरव्यापाररूपम् । अङ्गानां च फलवदुपकारसाधनानामेषाऽत्र प्रक्रिया । प्रथमं तावत्फलवाक्येन कर्मणः फलसाधनत्वं बोध्यते, यागेन स्वर्गं कुर्यादिति, कथं विनश्वरेण फलं कर्तव्यमित्यपेक्षायामपूर्वं कृत्वेत्युच्यते, कथमपूर्वं क्रियत इत्यपेक्षायामङ्गानुष्ठानप्रकारेणेति, ततः पूर्वापरकालवर्तिभिरङ्गव्यापारैर्विषयीकृतस्य यागस्यापूर्वसाधनत्वं न स्वरूपेण संभवतीति अपूर्वान्तरमपि कल्प्यते । दर्शपूर्णमासयोस्तु षड्यागवर्तिभ्यां समुदायाभ्यां युगपत्फलापूर्वारम्भायोगादेकैकं प्रति समुदायमपूर्वं कल्प्यते, तत्कथंभावापेक्षायामन्वाधानाद्यङ्गोपदेशः । ततः पूर्ववदेव पूर्वोत्तरा[4]ङ्गसहितेभ्यस्तदुत्पत्तिर्न स्वरूपेण संभवतीति प्रति त्रिकं त्रीणि त्रीण्यपूर्वाणि कल्प्यन्ते । यदि पुनः [5]षड्यागेभ्यः प्रथममेव षडपूर्वाणि कल्प्येरन् ततोऽपूर्वार्थत्वादङ्गानामङ्गोपकृतेभ्योऽपूर्वसिद्धौ पुनरपि षडपूर्वाणि कल्प्यानि स्युरिति गौरवं स्यात् । तस्मादेकमेव फलापूर्वमुत्पत्त्यपूर्वाणि तु प्रतिप्रधानं भिद्यन्ते, तथाऽङ्गान्यपि क्रतूपकारकत्वेन स्वीकृतानि क्षणिकत्वाच्च स्वरूपेण संहत्योपकर्तुं शक्नुवन्तीत्यवान्तरव्यापाररूपाण्यपूर्वाणि तावदारभन्ते, ततः सर्वाणि संहत्य प्रधानस्य सामर्थ्याद्बोधनं फलारम्भोन्मुखत्वरूपमनुग्रहं परमोपकारं जनयन्ति । तत्र त्वयं विभागः, सन्निपत्योपकारकाणि द्रव्यदेवतासंस्कारद्वारेण यागस्वरूपस्यैव

१ व्यवधिकरणतामापादयतीति पा० ।
२ न चावश्यं शक्तिमत्येवावस्थातव्यं शक्त्येति पुस्तकान्तरपाठः ।
३ यागशक्तिरप्यात्मन्येवावतिष्ठते इति पाठान्तरम् ।
४ पूर्ववदेवाङ्गसहितेभ्यस्तदुत्पत्तिरिति तु पुस्तकान्तरम् ।
५ यदि पुनः प्रथममेव षड्भ्यो यागेभ्यः ।

Digitized by Google

प्रत्यतिशयमादधानानि तदुत्पत्त्यपूर्वनिष्पत्तौ व्याप्रियन्ते तद्द्वारेण फलापूर्वे, आरादुपकारकाणि तु साक्षादेवोत्पत्त्यपूर्वेभ्यः फलापूर्वनिष्पत्तौ । एवं प्रकारभेदे सत्यपि सर्वाण्यङ्गानि यागापूर्वनिष्पत्तावनुग्राहकाणि भवन्तीत्येवमेकरूपेणेत्थंभावेन स्वीक्रियन्ते तस्मादस्त्यपूर्वम् ॥

कर्मणां गुणप्रधानभावविभागाधिकरणम् ।

सू० तानि द्वैधं गुणप्रधानभूतानि ॥ ६ ॥

एवं ताव[1]दस्त्यपूर्वं तच्चाख्यातेभ्यस्तदर्थं च द्रव्यादिपदमाख्यातं तु द्रव्याद्यपेक्षया प्रधानस्य कर्मणो वाचकमित्याख्यातभेदानुसारेणापूर्वभेदानुसरणं कर्तव्यमिति स्थितं, तस्यापवादः क्रियते सत्यपि धात्वर्थभावनयोर्भेदे केषुचिदाख्यातेषु नापूर्वं भिद्यते इति दर्शपूर्णमासयो"र्व्रीहीनवहन्ति" "तण्डुलान् पिनष्टी"ति श्रूयते तत्र संशयः किमवघातादिभ्योऽपूर्वमस्ति ? न वे ? ति तदर्थं च किमवघातार्था व्रीहयः ? उत व्रीह्यर्थोऽवघात ? इति, तत्र वाक्यसाफल्यायावश्यं कल्प्यमदृष्टं, तच्च धात्वर्थादेव साध्यभूतान्याय्यम् । तथा हि भूतस्य द्रव्यस्य तन्निर्वृत्त्या दृष्टार्थता स्यात् । अन्यथा त्वदृष्टद्वयं कल्प्यमित्युक्तं पूर्वाधिकरणे, तस्माद्व्रीह्यपेक्षयाऽवघातः प्रधानमेव ततश्चापूर्वमिति । स्यादेवं यद्यदृष्टं कल्प्येत अत्र पुनः क्लृप्तमेव यागनिर्वृत्तिः प्रयोजनं, तादर्थ्ये चावघातस्य कर्मापयिकं तुषविमोकादि दृष्टमेव प्रयोजनं लभ्यते इति न कस्यचिद् यदृष्टं कल्प्यं, नियमादृष्टं तु कल्पनीयं तच्चावघातस्यादृष्टार्थत्वेऽपि द्रव्यनियमादवश्यं कल्प्यमित्यदृष्टद्वयं, तद्वरमेकमेव दृष्टार्थावघातनियमाददृष्टं कल्पितम् ॥

संमार्जनादीनामप्रधानताऽधिकरणम् ।

सू० धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ९ ॥

यत्र न किंचिद् दृष्टमस्ति कर्मापयिकं तु द्रव्यं द्वितीयया संयुज्य निर्दिश्यते "स्रुचः संमार्ष्टी"त्या"दिषु तत्र विचार्यते किं प्रधानकर्मोत गुणकर्म ? ति । तदर्थं च साध्यवाचिनी द्वितीया ? ऽथवा साधनवाचिनी ? ति । यद्यपि अत्र सिद्धान्तेऽपि द्रव्यगतादृष्टरूपं संस्काररूपापूर्वसद्भावादपूर्व-

१ एतावदस्त्यपूर्वमिति पाठान्तरम् ।

भेदाभेदयोरुपयोगस्तथाऽपि पूर्वोक्तगुणकर्मलक्षणस्याव्यापकत्वं प्रधानकर्मलक्षणस्यातिव्याप्तिं चाशङ्क्य समाधीयत इति सङ्गतिः। तथा हि येस्तु द्रव्यं चिकीर्ष्यते इति दृष्टोपकारित्वं गुणकर्मलक्षणमुक्तं तच्चाव्यापकं संमार्जनादिष्वभावात्, तथा येर्द्रव्यं न चिकीर्ष्यत इति दृष्टोपकाराभावः प्रधानलक्षणमुक्तं, तच्च संमार्जनादिष्वतिव्यापकं तेषामपि प्राधान्यप्रसङ्गात्, तदिदमाशङ्काद्वयं निराकर्तुमिदमुच्यते। द्वितीयाश्रुत्या संमार्जनादीनामपि द्रव्यगुणत्वं, पूर्वोक्तं तु लक्षणद्वयं न गुणप्रधानविषयम्, अपि त्वपूर्वसद्भावविषयं तावन्मात्रस्यैव भावार्थाधिकरणापवादत्वेन प्रतिपित्सितत्वात्तेनापूर्वसदसद्भावाय तानि द्वैधमिति गुणप्रधानकर्मणी उपक्षिप्ते कीदृशं तद्गुणकर्म यत्रापूर्वं नास्ति? कीदृशं वा प्रधानकर्म यत्रापूर्वं विद्यते? इत्यपेक्षायामुक्तं दृष्टोपकारिष्वपूर्वं नास्ति तदभावे त्वस्तीति, संमार्गादिषु चास्त्येवापूर्वं द्रव्यगतमित्यनवद्यं लक्षणम्। अत्र पूर्वपक्षाभिप्रायः, दृष्टप्रयोजनत्वमेव गुणकर्मलक्षणं न द्वितीयेति। "कुतः, व्यभिचाराच्च साध्यत्वमुच्यते लोकवेदयोः। साधनत्वं द्वितीयार्थः सर्वत्राव्यभिचारतः" ॥ १ ॥

बल्वजान् शिखण्डकात् कुर्विति लोके, वेदे च "सक्तून् जुहोती"ति व्यभिचाराच्च साध्यत्वं द्वितीययोच्यते, साधनत्वं तु घटं करोतीत्यादावपि घटादीनां बुद्धिस्थत्वेन क्रियाहेतुत्वादस्त्येवेत्यव्यभिचारात्स एव हि द्वितीयार्थः, अतः स्रुगादिसाधनकसंमार्गविधानात् दृष्टोपकाराभावाच्च प्रधानकर्मैव संमार्गादीनीति प्राप्ते ब्रूमः ॥

"स्मृत्या साध्याभिधायित्वं द्वितीयायाः प्रतीयते।
कर्तुर्यदीप्सितं यच्च तथा युक्तमनीप्सितम् ॥ १ ॥
तत्कर्म तद् द्वितीयार्थ इत्येवं पाणिनेः स्मृतिः।
बलीयसी च साऽऽचारात्प्रयोगोऽप्यस्ति तादृशः ॥ २ ॥

स्मृतिस्तावदाचाराद्बलीयसीति स्थितम्। स्मरति च पाणिनिः "कर्मणि द्वितीया" "कर्तुरीप्सिततमं कर्म" "तथा युक्तं चानीप्सित"मिति च यथेप्सितं क्रियया युज्यते साध्यात्मना तथा साध्यात्मनैव क्रियया युक्तम-

नीप्सितमपि कर्मसंज्ञमितीप्सितानीप्सितानुवर्त्तिसाध्यरूपं कर्मेत्यर्थः । कर्म च द्वितीयाऽर्थे इति साध्यत्वमेव द्वितीयार्थः ॥

न च निर्मूलं स्मरणं, घटं करोति व्रीहीनवहन्तीति लोकवेदयोः प्रयोगसद्भावात् । यदि च साधनत्वमर्थः स्यात् परशुना छिनत्तीति परशौ द्वितीया स्यात् । साधनविशेषवचनत्वादयमदोष इति चेत्कः पुनरसौ? यस्य साध्यत्वमितिचेत्तदेव तर्हि वाच्यमस्तु किं साधनत्वोपलक्षणत्वेन नन्वेवमपि कथं स्रुगादीनां शेषित्वमीप्सितं हि शेषि भवति । न चे-प्सितं द्वितीयाऽर्थः । किं त्वीप्सितानीप्सितानुवर्त्तिसाध्यत्वमात्रम् । सत्यम् । न शेषित्वं द्वितीयार्थः, तत्तु विधेर्लभ्यते । विधिवशेन हि समीहितमेव भावनाया भाव्यमवगतं, तद्विशेषश्च पदान्तरात्प्रार्थ्यते तत्र स्रुगादीनां द्वितीयया भाव्यत्वमुच्यते । समीहितभाव्यापेक्षिण्यां च भावनायां नास-मीहितस्य भाव्यत्वं संभवतीति स्रुगादीनां समीहितत्वसिद्धिः ।

ननु यत्समीहितं तस्य साधनं विधिना बोध्यते, न तु तद्वशेन समी-हितत्वं, को नामाह समीहितत्वं विधिगम्यमिति । किं तु विधिविष-यीभूतया क्रियया ईप्सितत्वं स्रुगादीनां द्वितीयया प्रतिपादितंसाध्यभा-वानां विधिवशाद्गम्यत इत्युच्यते । स्वरूपेण तु तेषां समीहितत्वं क्रतु-साधनत्वादेव सिद्धम् । सक्तूनां तु भूतभाव्युपयुक्तत्वाभावाच्च समीहित-त्वमस्तीति समीहितसाध्यापेक्षिण्यां भावनायां भाव्यत्वेनान्वयस्यायोग्य-त्वात् साधनत्वमेव लक्षणया द्वितीयाऽभिधत्ते । स्रुगादीनि तु क्रतुसाधनरू-पेणेप्सितत्वाद्योग्यान्येव समीहितभाव्यापेक्षिण्या संमार्गभावनयाऽन्वेतुमि-ति साध्यत्वमेव श्रुतिबलेन गृह्यते, तत्र दृष्टोपकाराभावेऽप्यदृष्टकल्पना-त्सिद्धं गुणकर्मत्वम् ॥

स्तोत्रादिप्राधान्याधि-करणम् ।

सू० स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवता-ऽभिधानत्वात् ॥ १३ ॥

इह स्तोत्रशस्त्राण्युदाहरणम् । "आज्यैः स्तुवत" इत्यादि प्रगीतम-न्त्रसाध्यं गुणेन गुणिनः संबन्धाभिधानं स्तवनं स्तोत्रम् । शस्त्रमपि स्तवन-

Digitized by Google

मेवाप्रगीतमन्त्रसाध्यम्, प्रउगं शंसतीत्यादि गुणकर्माणि प्रधानकर्माणि वेति विचारः। तदर्थं च किं देवतां प्रति गुणभूतानि तत्प्रकाशनार्थानि? । किं वा देवतां प्रति प्रधानभूतान्यदृष्टार्थानी?ति तत्र देवतास्मरणं दृष्टमुज्झित्वाऽदृष्टकल्पनं न युक्तं, तेन तादर्थ्यात्स्तोत्रादेर्गुणकर्मता, गुणगुणिसंबन्धे हि कीर्त्यमाने गुणिनी देवता कीर्त्यते तत्कीर्तनाच्च तत्स्मरणं क्रतूपयोगि दृष्टमेव प्रयोजनं लब्धमिति नादृष्टकल्पनावसरः। तस्माद्देवताप्रकाशनार्थत्वाद्गुणकर्मैवेति। उच्यते। "सत्यं दृष्टार्थता युक्ता श्रुतिश्चैव विरुध्यते। देवतास्मरणार्थत्वे श्रुतिरूपं विहन्यते"। यथाश्रुतस्यार्थस्य प्रयोजनकल्पनं न श्रुतरूपहानेन। स्तुतिश्चात्र कर्तव्यतया श्रूयते स्तौति शंसतीति। यदा च मन्त्रवाक्यं गुणसंबन्धाभिधानपरमेव भवति तदा स्तुतिर्भवति। यदा तु गुणद्वारेण गुणिप्रकाशनार्थं तदा स्तुतिर्न भवति। यथा लोके वक्रकेशान्तो देवदत्त इति गुणसंबन्धपरत्वे स्तुतिं मन्यन्ते। यदा तु एवमुच्यते योऽयं वक्रकेशान्तस्तमानयेति न तदा स्तुतिबुद्धिर्भवति। तेन प्रकाशनार्थत्वे स्तौतिशंसत्योः स्वार्थहानेन प्रकाशनलक्षणा स्यात्।

न च तत्र लक्षणार्थत्वे प्रमाणमस्ति, श्रुत्यैव वाक्यार्थोपपत्तेः तेन श्रुतिबलाददृष्टार्थत्वमेव। एवं च माहेन्द्रग्रहस्तविधावैन्द्री स्तुतिरुपपन्ना भवति। इतरथा हि श्रुतिसमवायिनी देवता विधिशब्देनैव निगमेषु वक्तव्येति माहेन्द्रग्रहदेवता नेन्द्रशब्देन शक्यते प्रकाशयितुमिति यत्रेन्द्रस्तत्रैन्द्री स्तुतिरुत्कृष्येत, मनोतास्याग्निशब्दवद्वाऽग्नीषोमाविन्द्रशब्द एव महेन्द्रलक्षणया प्रकाशयेत्। तच्च द्वयमप्यन्याय्यम्, तस्मात्प्रधानकर्मणी स्तोत्रशस्त्रे ॥

मन्त्राविधायकत्वाधिकरणम्।

सू॰ विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥ ३० ॥

प्रासङ्गिकमिदमधिकरणम्। द्विविधमाख्यातमुक्तं प्रधानकर्मणां विधायकं गुणकर्मणां विधायकं चेति। किमेतदेव प्रकारद्वयं? नेत्युच्यते। अस्ति तृतीयोऽपि प्रकारोऽभिधायकत्वमिति प्रतिपाद्यते। तत्र "देवांश्च याभिर्यजते ददाति च अग्नीदग्नीन्विहर" 'बर्हिर्देवसदनं दामीति। एव

मादीनि यच्छब्दामन्त्रणोत्तमपुरुषादिसंयुक्तान्याख्यातानि । यानि च यस्योभयं हविरार्तिमार्च्छेदित्यादीनि यावन्ति निमित्तादिप्रतिपादनेनाख्यातान्तरैरेकवाक्यतां गतानि तान्युदाहरणम् । तानि च प्रायेण मन्त्रेष्वेवेति मन्त्रोपन्यासः । न तु मन्त्रत्वस्य कश्चिन्न्यायोपयोगः । तानि विधायकानि न वेति संशयः । तत्र "विधायकत्वमेतेषामाख्यातत्वाविशेषतः । सत्यपि प्रकृते कर्मण्यभ्यासात्कर्मभेदधीः" । अत्रोच्यते । यच्छब्दादिभिरेतेषां विधिशक्तिर्विहन्यते" । न हि "याभिर्यजेते"ति कथंचिद्विधिसंभवः । तथा दामि गृह्णामीति नात्मनाऽऽत्मा शक्यो विधातुम् । आमन्त्रणविभक्तेश्चाग्नीदग्नीन्विहरेति वक्त्रभिमुखश्रोतृविषयत्वात्, वेदे च वक्तुरभावात् विधेश्चाभिमुखानभिमुखपुरुषसाधारणत्वाद्विरुद्धस्वभावेनामन्त्रणेन विधिशक्तिलोपः । तस्मादेवमादीनां प्रयोगमध्ये पुरुषान्तरेण पुरुषे स्मारयितव्ये सामर्थ्यं न बहिःप्रयोगभाविनि विधाविति सिद्धमभिधायकत्वम् ॥

मन्त्रनिर्वचनाधिकरणम् । सू० तच्चोदकेषु मन्त्राख्या ॥ ३२ ॥

न्यायानौपयिकेनापि मन्त्रशब्देन पूर्वं व्यवहृतमिति तत्प्रसङ्गादहे बुध्नियमन्त्रं मे गोपायेत्यादि वेदप्रयुक्तस्य मन्त्रशब्दस्यार्थनिरूपणार्थं मन्त्रलक्षणं क्रियते । यानि प्रयोगकाले ऽनुष्ठानोपयिकार्थाभिधानस्वरूपाणि वाक्यानि तानि मन्त्रशब्देनोच्यन्ते । प्रायिकमिदमभियुक्तप्रसिद्ध्युपलक्षणार्थम् । यत्राभियुक्तानां मन्त्रप्रसिद्धिः स मन्त्र इत्यर्थः ॥

ब्राह्मणनिर्वचनाधिकरणम् । सू० शेषे ब्राह्मणशब्दः ॥ ३३ ॥

द्विविभागस्य वेदस्यैकस्य भागस्य मन्त्रात्मकस्य लक्षणमुक्तं, तत्प्रसङ्गादे "तद्ब्राह्मणान्येव पञ्च हवींषी"ति वेदप्रयुक्तब्राह्मणशब्दार्थपरिज्ञानार्थं ब्राह्मणलक्षणकथनमवशिष्टं ब्राह्मणमिति ॥

ऊहाद्यमन्त्रताऽधिकरणम् । सू० अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात् ॥ ३४ ॥

ऊहप्रवरनामधेयानां मन्त्रत्व? मुत नेति संदेहे मन्त्रवाक्यैकवाक्यत्वेन तन्मध्ये निवेशान्मन्त्रकार्यकरत्वेन च मन्त्रत्वे प्राप्तेऽभिधीयते । मन्त्र-

कार्यकरत्वं तावदृष्टघोषादिष्वनैकान्तिकं, मन्त्रैकवाक्यताऽपि न तत्कार-[1]णम् । किंतु "अभियुक्तप्रसिद्ध्या हि मन्त्रत्वमवकल्पते । स्वाध्यायकाले तेषां च समाम्नातेषु मन्त्रधीः । मन्त्रानध्यापयामोऽद्य तथा मन्त्रानधीमहे । सामाम्नायबहिर्भूत ऊहादौ नास्ति मन्त्रधीः" ॥ तस्मादभियुक्तप्रसिद्ध्यभाववदेवामन्त्रत्वम् ॥

ऋग्लक्षणाऽधिकरणम् । **सू० तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥ ३५ ॥**

वेदभागयोर्मन्त्रब्राह्मणयोर्लक्षणमुक्तम् ॥ तत्र मन्त्रभागस्यापरोऽवान्तरविभागः ऋगादिरूपो लोके वेदे च प्रसिद्धः । "अहेर्बुध्नियमन्त्रं मे गोपाय यमृषयस्त्रयीविदा[2] विदुः ऋचः सामानि यजूंषी"ति । तत्र कोभाग ऋक्शब्देनोच्यते ? को वा सामवेदशब्देन ? को वा यजुःशब्देनेति ? तत्परिज्ञानाय ऋगादिलक्षणमुच्यते । यत्रार्थवशेन पादव्यवस्था सा ऋक् इति ।

सामलक्षणाधिकरणम् । **सू० गीतिषु सामाख्या ॥ ३६ ॥**

यद्यपि प्रगीते मन्त्रे सामशब्दप्रयोगोऽभियुक्तानां तथाऽपि नागृहीतविशेषणेति न्यायेन "कवतीषु रथन्तरङ्गायती"त्याद्यतिदेशोपपत्तेश्च गीतिरेव सामेति सप्तमे सूत्रकारः स्वयमेव वक्ष्यति । इह तु मन्त्रविभागमात्रं विवक्षितम् । तद्यदि प्रगीतो मन्त्रः साम यदि वा गीतिमात्रमुभयथाऽपि ऋग्यजु[3]र्भ्यामन्यत्सामेति विभागसिद्धेर्न विभागाय प्रयत्यते । सप्तमे तु रथन्तरमुत्तरयोर्गायतीत्याद्यतिदेशौपयिकत्वाद्विभागेन प्रयोजनमस्तीति तत्रैव वक्ष्यमाणावष्टम्भेन गीतिः सामेत्युक्तम् । यस्त्वत्र भाष्यवार्त्तिकयोर्गीतिवाचित्वं साधितं तद्वक्ष्यमाणमेव प्रसङ्गादिति द्रष्टव्यं न सूत्रार्थतया माभूत्साप्तमिकस्य पौनरुक्त्यम् ॥

---

१ तत्कारणमिति तु पाठान्तरम् ।

२ विदाविदुरिति आर्षतया साधुता ।

३ ऋक्सामेतिवत् ऋग्यजुषेति निपातनात् प्रकृतस्य साधुता ।

यजुर्लक्षणाधिकरणम् । सू० शेषे यजुःशब्दः ॥ ३७ ॥

ऋक्सामाभ्यां यदन्यत्प्रश्लिष्टपठितं मन्त्रजातं तद्यजुः ॥

निगदानां यजुष्ट्वाधिकरणम् । सू० निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ ३८ ॥

शेषे यजुःशब्द इत्येतदाक्षेपेणेदमारभ्यते । सन्ति निगदानामपरसंबोधनरूपा मन्त्राः प्रोक्षणीरासादयेत्यादयस्ते किं यजूंष्येव ? न यजुर्भ्योऽन्य ? इति विचारः । संज्ञाभेदादिमे निगदा इमानि यजूंषीति । तथा उपांशु यजुषा उच्चैर्निगदेनेति विप्रतिषिद्धधर्मयोगाच्च भेदप्राप्तावुच्यते । संज्ञा तावदितराङ्ग्यत इति व्युत्पत्त्या यजुःष्वेवोच्चैर्धर्मयोगाच्छक्नोति वर्त्तितुम् । ब्राह्मणेष्विव परिव्राजकसंज्ञेति न तया भेदः ॥

न च धर्मभेदाद्भेदः, सत्यपि यजुष्ट्वे परप्रत्यायनकार्यविरोधेन निगदेषूपांशुत्वाप्राप्तेरर्थवशादुच्चैस्त्वसिद्धेः ॥

ननु वाचनिकमुपांशुत्वं, लैङ्गिकं परं सम्बोधनं कार्य, तदुभयं[1] लिङ्गेन वचनस्य बाधः उच्यते ॥ अङ्गमुपांशुत्वं मन्त्रस्य प्रधानं परप्रत्यायनकार्यं तद्यद्यपि दुर्बलप्रमाणकं तथाऽपि स्वरूपतो बलवत्त्वात् बलवत्प्रमाणकमपि स्वरूपतो दुर्बलमुपांशुत्वं बाधते प्रमाणबलाबलाद्धि प्रमेयबलाबलमपबलीय इति वर्णितमेतत् ॥

न च वचनस्याप्रामाण्यं यजुरन्तरे सावकाशत्वात् । अपि चाप्राप्तविधानान्नियमविधानं लघीयः । तेन यत्रानियमेनोपांशुत्वं प्राप्तं तत्र तन्नियममात्रमुपांशु यजुषेत्यनेन क्रियते । निगदव्यतिरिक्तेषु च यजुःषु येन केनचित्स्वरेण कार्यसिद्धेरुपांशुत्वस्यानियमप्राप्तिरिति तद्विषयमेवेदं वचनम् । निगदेषु तु कार्यबलेनोच्चैस्त्वमेव प्राप्तं न पक्षेऽप्युपांशुत्वमिति न तत्रास्य वचनस्य व्यापारः । एवं चार्थप्राप्ते उच्चैर्निगदेनेत्यनुवादः । तस्माद्यजूंष्येव निगदा न मन्त्रान्तरम् । तथा वेदे अहेबुध्नियमन्त्रं मे गोपाय ऋचः सामानि यजूंषीति मन्त्रशब्दसामानाधिकरण्यम् ऋगादीनामेव

१ तत्कथं लिङ्गेनास्य बाधः इति पुस्तकान्तरपाठः ।

चयाणां दृश्यते । जात्यन्तरत्वे हि निगदशब्दोऽपि तत्र श्रूयेत । तस्मात् त्रिधैव मन्त्राः ॥

एकवाक्यत्वाधिकरणम्

सू॰ अर्थैकत्वादेकवाक्यं साकाङ्क्षं चेद्विभागे स्यात् ॥ ४६ ॥

ऋग्यजुःसामरूपे मन्त्रविभागेऽभिहिते ऽधुना तदवान्तरभेदं कथयितुं प्रस्तावः । तत्र ऋक्सामानामध्येतृसिद्धो भेदो न वक्तव्यः । यजुषान्तु प्रश्लिष्टपठितानां भेदो न सुज्ञान इति तत्परिज्ञानाय यजुषः परिमाणलक्षणमुच्यते । यावदेकप्रयोजनं विभागे च साकाङ्क्षं पदजातं तावदन्यासाधनत्वादेकं यजुर्वक्तव्यत्वाच्च वाक्यम् । एतस्माच्चेत्कारणादेकवाक्यत्वं तदा यत्ततोऽन्यद्वाक्यान्तरं यजुरन्तरं चेत्युक्तं भवति, उदाहरणं "देवस्य त्वा सवितुः प्रसव" इति अत्र हि सर्वाणि पदानि निर्वापप्रकाशनार्थानि विभागे च साकाङ्क्षाणि तस्मादेकयजुष्ट्वम् ॥

वाक्यभेदाधिकरणम् ।

सू॰ समेषु वाक्यभेदः स्यात् ॥ ४७ ॥

एकप्रयोजनं सर्वं विभज्यमानं साकाङ्क्षं पदजातमेकं यजुरित्युक्तम् । एतेन लक्षणेन यत्र कर्मसमवेतार्थप्रकाशकं निर्वपामीत्यादि पदमस्ति तत्र सुगमं परिमाणम् । अथ यत्र समवेतार्थपदाभावेन लैङ्गिकविनियोगाभावे वाचनिको विनियोगः परस्परनैराकाङ्क्ष्यं च स्वरूपतोऽवगम्यते यथे"षे त्वोर्जे त्वे"ति यथा "वायुर्यज्ञेन कल्पतां" "प्राणो यज्ञेन कल्पता"मिति तत्र किं[1] यदेकं यजुरिति चिन्त्यते किं प्राग् दृष्टार्थमन्त्रावधेरेकमन्त्रत्व? मुत यावदेव मिथः संबद्धमिषे त्वेति तावदेकं यजुरन्यच्च यजुरन्तरमिति । तदर्थं च किं सर्वमेकार्थमुतभिन्नार्थ? मिति चिन्ता । तत्र तावत् "अदृष्टार्थत्वमेतेषामनुष्ठेयाप्रकाशनात् । तच्चैकं तत्र साकाङ्क्षाः सर्वे इत्येकवाक्यता" । अदृष्टं हि कल्प्यमानमेकमेव युक्तं तावतैवोपपत्तेः अतः सर्वे तावदेकार्थाः । तच्च सर्वेषां सह कल्पितमिति संभूयकारित्वाद्विभज्यमानाः साकाङ्क्षा भवन्तीत्येकवाक्यता, निश्चिते च मन्त्रैकत्वे यद्यपि प्रत्येकभेदेनाने[2]कत्र विनियोग इषे त्वेति

(१) कियदेकमिति तु पाठान्तरम् ।
(२) प्रत्येकभेदेनानेकत्र विनियोग इति पाठान्तरम् ।

छिनत्ति, ऊर्जे त्वेति अनुमार्ष्टीति । तथाऽपि यावद्विनियोगं सकल आवर्त्स्यते । उच्यते । "यद्यप्येषामदृष्टोऽर्थस्तथाऽपि न तदेकता । रूपतो हि निराकाङ्क्षाभिन्नत्वेनावधारिताः । अन्योन्यानादरेणैव प्रार्थयन्ते प्रयोजनम् । यथाऽपेक्षमतस्तेषां भिन्नाऽदृष्टप्रकल्पना । यथा विश्वजिदादीनां भेदेन फलकल्पना । यथा च समिदादीनामपूर्वं भिन्नमिष्यते । तद्वच्च न चात्रैषामदृष्टार्थत्वसंभवः । शाखाच्छेदप्रकाशेन दृष्टार्थो हि विधेरमी" । इषे त्वेति छिनत्तीति शाखाच्छेदने करणत्वेन मन्त्रो विधीयते क्रियानिर्वर्त्तकं च करणं भवति ।

न च मन्त्राणां क्रियानिर्वर्त्तकत्वमन्यतः प्रकाशनात् । तेन विधिवशादेषां प्रकाशनार्थत्वम् । तत्र यावता विना चोदितप्रकाशनं न भवति तावदध्याहर्त्तव्यं छिनद्मीत्यादि । तत्रैकेन छेदनं प्रकाश्यते अन्येनानुमार्जनमिति अर्थभेदान्मन्त्रभेदः । तथा "आयुर्यज्ञेन कल्पता"मित्यादीनामपि स्वरूपतो निराकाङ्क्षत्वात् "क्लृप्तीर्वाचय"तीति च क्लृप्तिबहुत्ववचनस्य चोदितत्वात्तत्सम्बन्ध्यर्थमायुरादिविशिष्टक्लृप्तिभेदप्रकाशनपरत्वादर्थभेदेन मन्त्रभेदः ॥

अनुषङ्गाधिकरणम् । सू० अनुषङ्गो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगित्वात् ॥ ४८ ॥

अत्रापि यजुःपरिमाणमेव चिन्त्यते । यत्र बहूनां वाक्यशेषापेक्षिणां वाक्यानां सन्निधावेकस्यानन्तरदेशे परिपूरणसमर्थो वाक्यशेषः श्रूयते यथा- "याते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीत्त्वेषं वचो अपावधीत्स्वाहा याते अग्ने रजाशया याते अग्ने हराशये"ति । अत्रोत्तरौ मन्त्रावुदाहरणं किं तयोर्लौकिकः शेषोऽध्याहर्त्तव्यः ? उत योऽसौ पूर्वमन्त्रानन्तरं पठितस्तनूर्वर्षिष्ठेत्यादि स एव सर्वेषामर्थेनाम्नातः पूर्वस्यैवोत्तरयोरप्यनुषङ्क्तव्यः शेष ? इति अध्याहारे "याते अग्ने रजाशये"त्येतावानेव मन्त्रोऽध्याहृतस्य लौकिकस्योहादिवदमन्त्रत्वात् । अनुषङ्गे तु तत्सहित एव मन्त्र इत्यस्ति परिमाणे विशेषः । तत्र "एकत्रैव निबद्धो हि समाम्नायेन वैदिकः । शेषोऽन्यत्र न नेतव्यो लौकिकस्त्वनिबन्धनः" । लौकिको हि शब्दः सर्वार्थो न क्वचिदेव विशेषेण निबद्धः स यत्र यत्र कार्ये तत्र सर्वत्र यथेष्टं विनियुज्यमानो न विरुध्यते । वैदिकस्तु यदर्थमाम्नातस्तेनैव निबद्धो नान्यत्र नेतुं शक्यते नीयमानो वा समाम्नायबहिर्भावाल्लौकिक एव स्यात् ।

Digitized by Google

न च सर्वार्थमाम्नात इति वाच्यं सकृदाम्नातस्यानेकार्थता-ऽनुपपत्तेः । न चाऽत्रधर्माणामविशेषत्वम् आनन्तर्येण देशभेदेन च विशेषग्रहणात् । प्रथमस्य ह्यसावनन्तरो न तृतीयस्य । द्वितीयस्य तु यद्यप्यनन्तरस्तथाऽपि परस्माद्भावित्वेन वाक्यशेषस्याकाङ्क्षितत्वाच्च पुरस्ताद्भाविना संबन्धः, प्रथमस्य त्वपेक्षित एव देशे पठितस्तस्मात्तस्यैवायं शेष इति प्राप्ते ऽभिधीयते । "यथापेक्षितरूपे हि वाक्यशेषे समर्पिते । वेदे न लौकिकः शेषो न मृग्यो निष्प्रमाणकः" । सर्वानन्तरं सकृत्पठितुमशक्यो-बुद्धिविपरिवृत्तिमात्रेण साकाङ्क्षैः सर्वैः संबन्धसिद्धेः । पुनःपुनरसमाम्नातोऽ-प्ययं शेषः सर्वार्थेनैवाम्नात इति युक्तमङ्गीकर्तुम् । एवं वेदसमर्पितेन शेषेण सर्वेषां नैराकाङ्क्ष्यसिद्धेः, निष्प्रमाणकोलौकिकोऽध्याहारः शक्नोति नायं सर्वैः संबद्धुं । प्रथमेन हि संबद्धो द्वितीयस्याप्याकाङ्क्षावेलायां बुद्धौ विपरिवर्त्तमान-स्तेनापि संबध्यते तत्संबन्धाच्च विपरिवृत्त्यभङ्गात् तृतीयेनापि संबन्धसिद्धिः । तुल्यो ह्यस्य सर्वैर्योगः कारणाविशेषात् । एतावच्च शब्दानामन्वये कारणमाकाङ्क्षासन्निधियोग्यत्वं च, न त्वनन्तरसमाम्नानं । व्यवहितस्याप्य-संबन्धिव्यवधानाभावे बुद्धिविपरिवृत्तिरूपं सन्निधानं सर्वत्र क्रमेण लभ्यते । तस्मादाम्नानमेवास्य सर्वार्थमिति सर्वशेषता । एवं तावत्साकाङ्क्षेषु अनुषङ्गः उक्तः । यत्र तु निराकाङ्क्षाणामेकार्थानां सन्निधावेकस्यानन्तरं वाक्यशेषः श्रूयते यथा "चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वि"ति सर्वे निराकाङ्क्षा यजमानपावनार्थाः सत्यप्येकार्थत्वे वचनात्समुच्चीयन्ते । तेषामन्ते "अच्छिद्रेण पवित्रेणे"ति शेषः समाम्नातः स किं पूर्वयोरपि अनुषज्यते? किं वा परस्यैव मन्त्रस्य शेष? इति । तत्र शेषस्तावदेकेनैवानन्तरेण संबन्ध्य निराकाङ्क्षः संपद्यते, शेषिणस्तु प्रागेव निरपेक्षास्तेनाप्रामाणिको ऽनुषङ्ग इति उच्यते । पुनातुशब्देनैकवाक्य-तामुपगतोऽयमच्छिद्रादिः करणद्वारेण पावनक्रियाप्रकाशनार्थः, सैव च क्रिया पूर्वाभ्यामपि मन्त्राभ्यां प्रकाश्यते, तदर्थं च वाक्यशेषः प्रधानवशात्त-त्राकृष्यत इत्यनुषङ्गसिद्धिः ॥

व्यवेतानानुषङ्गाधिकरणम् । सू० व्यवायान्नानुषज्येत ॥ ४९ ॥

"सन्ते वायुर्वा तेन गच्छतां संयजत्रैरङ्गानि संयजपतिराशिषेति गच्छतामित्ययं शब्दः संयजत्रैरङ्गानीत्यनेन बहुवचनान्तेनायोग्यत्वाच संबध्यते संयजपतिना तु योग्यत्वादनुषङ्गेण संबध्येत्याशङ्कायामुच्यते । पूर्वत्रासंबद्धत्वेन बुद्धिविपरिवृत्तिभङ्गाच्चानुषङ्गः । "सर्वेच तुल्ययोगित्वादनुषङ्गो हि वर्णितः । असंबन्धितिरोधाने व्यवधानाच तुल्यता" ॥

इति श्री शास्त्रदीपिकायां द्वितीयाध्यायस्य प्रथमः पादः ॥

शब्दापूर्वभेदाधिकरणम् । सू० शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ १ ॥

गतमुपोद्घातप्रसक्तानुप्रसक्तमिदानीं तद्वार्थः कर्मभेदः शब्दान्तरादिभिरभिधीयते । तत्र प्रथमं शब्दान्तराद्भेदोऽभिधीयते इहैकप्रकरणगताऽन्यपर्यायधातुनिष्पन्नान्याख्यातानि यजतिददातिजुहोतीत्यादीन्युदाहरणम् । अत्र हि सत्यपि प्रत्ययांशस्यैकत्वे धातुभेदादाख्यातपदानि मिथःशब्दान्तराणि भवन्ति । तत्र संशयः किमत्रैका भावना नानाधात्वर्थानुरक्ता विधीयते ? उत प्रतिधात्वर्थं भावना भेद ? इति । तत्र भिन्नासु भावनासु स्यादनेकापूर्वकल्पनम् । "एकक्लृप्त्युपपत्तेऽर्थे नानेकं तत्र कल्प्यते । फलायत्तत्वात्क्रियाणां न फलभेदनमन्तरेण भेदसंभवः, तद्यदि प्रतिधात्वर्थं भावनाभेदः स्यात्ततः सा भाव्यरूपा पूर्वभेदादृते न भिद्यते इत्यनेकापूर्वकल्पना स्यात्, न चैकेनोपपन्ने वाक्यार्थेऽनेककल्पनं न्याय्यं, तस्मादेका भावना । किंच "भावनाप्रत्ययार्थत्वात्तदेकत्वाच भिद्यते । गुणभूता हि धात्वर्था न तां भिन्द्युः कथंचन" । यद्यपि धातुभेदादाख्यातपदानि मिथःशब्दान्तरं तथाऽपि प्रत्ययांशः सर्वत्रैकरूपस्तदर्थश्च भावना तदभेदादभिन्ना भवितुमर्हति । यदि हि धात्वर्थान् प्रति गुणभूता भावना स्यात् । ततस्तेषां धातुभेदेन भिन्नत्वाद्भावनाऽपि तान्प्रति उपादीयमाना प्रति धात्वर्थं भिद्येत । भावनाप्रधानत्वात्त्वाख्यातस्य तां प्रत्युपादीयमाना धात्वर्थाः संहत्यैव तां विशिषन्ति क्रयमिवारुणिमादयः । तस्माच भावनाभेदमावहेत् इति प्राप्तेऽभिधीयते ।

प्रत्ययांशः समानोऽपि प्रतिधातु प्रयोगतः ।
तत्तदर्थानुसारेण भावनाभेदमावहेत् ॥ १ ॥

निष्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।
ततः सर्वविशिष्टा स्याद् द्वन्द्वोत्पन्नसुबर्थवत् ॥ २ ॥
यदि वा प्रत्ययः शुद्धः सर्वधातुपृथक्कृतः ।
श्रूयेत क्रयवत्सर्वैर्विशेष्येत स धातुभिः ॥ ३ ॥

न हि समुदिते धातुभ्यः प्रत्ययः श्रूयते अग्नीषोमादिभ्य इव सुप्प्रत्ययः, नापि पृथक् क्रीणातिरिवारुणादिभ्यो विविक्तः, येन सर्वैर्धात्वर्थैः प्रातिपदिकार्थैरिव सुबर्थः पदेन क्रय इवारुणिकादिभिर्वाक्येन युगपद्भावना विशिष्येत प्रत्येकं तु धातुभ्यः प्रत्ययः श्रूयते इति नैकभावनासंभवः । तथा हि प्रत्ययो हि यजतिपरः श्रूयमाणः केवलयागकरणिकां भावनां श्रुत्या विधत्ते दानहोमौ तस्यां निविशमानौ पदान्तरगतत्वात् वाक्येन प्रकरणेन वा निविशेयातां, ते च श्रुतितो दुर्बले करणांशोपनिपाताच्चास्ति विरोधसमुच्चये नैरपेक्ष्यबाधः, तेन दानहोमयोस्तदनुवादेन विधानासंभवात् तदनुरक्ते भावने एव तद्गतेन प्रत्ययेन विधातव्ये विहितायाश्च विध्यसंभवात् भावनान्तरत्वम्, उच्चार्यमाण एव प्रत्ययः प्रकृत्यर्थभेदभिन्नामेव स्वाभिधेयां भावनामगमयति । तस्मात्सिद्धो धात्वर्थभेदेन भावनाभेदः ॥

समिदाद्यपूर्वभेदाधिकरणम् । सू० एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात् ॥ २ ॥

अभ्यासादिदानीं भेदोऽभिधीयते । विधेरविशेषेण पुनःश्रवणमभ्यासः । यथा समिधो यजतीत्यादिपञ्चकृत्वो यजतिपदमभ्यस्तं, तत्किमेकां भावनां प्रतिपादयत्युत प्रत्यभ्यासं भावनाभेद ? इति । तदर्थे च किमेक एव यागः ? उत पञ्च यागाः ? इति यागैकत्वे भावनैकत्वं, तद्भेदे च पूर्वाधिकरणन्यायात् धात्वर्थभेदात् भावनाभेद इति, तत्र "प्रत्यक्षप्रत्यभिज्ञानाच्छब्दैकत्वं प्रतिष्ठितम् । तदेकत्वात्तदर्थोऽपि न भेदं प्रतिपद्यते ॥ प्रत्ययांशस्य सर्वत्र समानत्वात्तदर्थस्यापि भावनाया एकत्वं प्राप्तमपि करणीभूतधात्वर्थभेदादपोदितम् । इह तु तस्यैव धातोः पुनः पुनः श्रवणादसति च शब्दभेदे ऽर्थभेदस्य निष्प्रमाणत्वात् स एव यागः सैव भावना ॥

ननु समिदादिसंज्ञा भेदाद्"थैष ज्योतिरथैष विश्वज्योतिरिति"वद्याग-भेदः स्यात् । न शब्दैकत्वेनार्थैकत्वस्य दृढतरप्रत्यभिज्ञानात् स्पष्टे च यागैकत्वे तस्य समित्संज्ञाऽवरुद्धस्य संज्ञान्तरमन्याय्यमिति तनूनपादादिशब्दः समिद्यागे देवता विधास्यन्ति न संज्ञाः, येन संज्ञातोभेदः स्यात् । यदि हि तनूनपा[1]दं यजतीत्यादयो यागविधयो भवेयुस्ततो विहितस्य विधानायोगाद्विधिपुनःश्रुत्या यागभेदो भवेत्, सति च यागभेदे संज्ञान्तरं युक्तमेवेति स्यात्तनुपादादिशब्दानां संज्ञात्वं, तेनाभ्यासनिमित्तभेदाधीनमेषां संज्ञात्वमिति न संज्ञावशाद्भेदसिद्धिः, यत्र तु प्राग्यागभे[2]दावगमात् संज्ञात्वं प्रसिद्धं तत्र संज्ञया भेदः स्याद्यथाऽथैष ज्योतिरिति षड्भिर्दा यजेतेति । इह तूपपदान्यपोद्धृत्य यजतीत्येतावन्मात्रं पञ्चकृत्वोऽभ्यस्तं भेदं बोधयति न वेत्येतदेव चिन्त्यम् । तत्र चाभेदावगमात् गुणविधिरेव तनूनपादादिशब्दैः ।

न च गुणाद्भेदः । सर्वेषां तनूनपादादिशब्दानामुत्पन्नवाक्यशिष्टत्वेन दध्यादिवत् अभेदकल्पकत्वात् । समिधो यजतीति चोत्पत्तौ समिच्छब्दस्य नामधेयत्वेन गुणत्वाभावात् । न चागृह्यमाणविशेषत्वम् । प्रथमोच्चारितत्वेन समिद्वाक्ये यागविधिरितरेषु तत्प्रत्यभिज्ञानात् । तदनुवादेन गुणविधिः चरमश्रुतत्वात् । गुणविधानार्थत्वादेव पुनः श्रुतेर्नानर्थक्यं, सत्यपि चानर्थक्ये न दोषः । न हि प्रयोजनवशेन प्रमाणं नेतुं शक्यम् । तस्मादेको यागः । तदेकत्वाच्च भावनापूर्वयोरप्येकत्वमिति प्राप्ते ब्रूमः । "विधेस्तावत्स्वभावोऽयमप्रवृत्तप्रवर्त्तनम् । धात्वर्थभावयोरेव तच्च श्रुत्याऽवगम्यते" । यत्तावदुक्तं भवत्वानर्थक्यमिति, तदयुक्तं विधिश्रुतिविरोधात् तथा हि स्वतोऽप्रवृत्तप्रवर्त्तनं गम्यते । तच्च बलवता कारणान्तरेणान्यथात्वं प्रतिपद्यते । न चात्र तदस्ति तत्रह्येकमेव कर्म स्यात्तस्य पूर्वविहितत्वादप्रवृत्तप्रवर्त्तनात्मा विधिरुपरुध्येत तेन विधिशात्कर्मान्तरत्वम् । यत्तु दृढप्रत्यभिज्ञानात्कर्मैकत्वमिति तन्न । सन्निधिकृता हि प्रत्यभिज्ञा । विधिश्रुत्या तु भेदज्ञानं संनिधेश्च श्रुतिर्बलीयसी । (शेषमग्रे)

१ तनूनपातं यजतीति पाठान्तरं तु न युक्तम् ।

२ प्राग् यागावगमादिति तु पाठान्तरम् ।

॥ श्रीः ॥

श्रीमद्रामानुजाचार्यप्रणीत इति प्रसिद्धो

वेदान्ततत्त्वसारः ॥

श्रीमते रामानुजाय नमः ॥

(Continued from page 344. Vol. IX.)

ननु सन्मात्राध्यस्तप्रपञ्चस्य को द्रष्टा, ब्रह्मैवानाद्यविद्यातिरोहितस्वरूपं स्वगतनानात्वं पश्यतीति चेन्न नित्यमुक्ताऽखण्डैकरसप्रकाशज्ञानमात्रस्वरूपस्य निरंशस्य तिरोधानासम्भवात् । प्रकाशपर्यायस्य ज्ञानस्य तिरोधाने स्वरूपनाशप्रसङ्गः । तिरोधानं नाम वस्तुस्वरूपे विद्यमाने तत्प्रकाशनिवृत्तिः । प्रकाश एव वस्तुस्वरूपमित्य-

If in reply to our question, (119) who is the percipient of the universe imagined in pure existence (Brahma) only, you say that it is Brahma alone (120) whose essence is concealed (121) by beginningless nescience that beholds multiplicity (the universe) existent in himself, we deny this, for it is impossible that (such) concealment should exist in the case of the (122) impartite (Brahma), whose essence is ever free, undivided, uniform light (or) knowledge only (123). On the (124) concealment of this know-

119. If the world is fictitiously imagined, then who is the percipient imaginer, for there must be such ?

120. There is no percipient distinct from Brahma, such as Chaitra, Maitra, etc.

121. Concealed in the form of jīva etc.

122. Nirañjanasya, another reading for niraṁśasya, would lay stress on Brahma's being ever free (from faults of nescience), as niraṁśasya does on his being of undivided essence.

123. Brahma, you say, in the form of the different jivas of Chaitra, Maitra, etc., is in the power of illusion but this cannot be, for Brahma is, according to your system, impartite, and in essence ever free, etc.

124. In the state of transmigration.

Digitized by Google

ङ्गीकारे तिरोधानाभावः स्वरूपनाशो वा स्यात्। न च वाच्यं स्वरूपप्रकाशस्य नित्यत्वेऽपि तद्वैशद्यमात्रमविद्यातिरोहितमिति वैशद्यस्य स्वरूपानतिरिक्तत्वे प्रागुक्तदोषस्य तदवस्थत्वात्, अतिरिक्तत्वे च सविशेषत्वप्रसङ्गात्। न च निर्विशेषप्रकाशमात्रस्याज्ञानसाक्षित्वमहंकारादिजगद्भ्रमश्चोपपद्यते साक्षित्वभ्रमादयोऽपि हि ज्ञातृविशेषगता दृष्टा न ज्ञप्तिमात्रगताः। किञ्च यदि ब्रह्मैवानाद्यविद्यावशात्स्वगतनानात्वं पश्यति तर्हि प्रलयकाले विद्यमानेऽप्यज्ञाने प्रपञ्चाद-

ledge, synonymous with light, there would ensue a destruction of essence. Concealment is the departure (cessation) of its light while the essence of the thing continues to exist. As you hold that the light itself is the essence of the thing, (i. e. Brahma) then either concealment cannot occur, or, (if it does), there will occur a destruction of essence. And it cannot be asserted that although the light (or knowledge which constitutes the essence (of Brahma) is imperishable. only its clearness (125) (or brightness) is concealed by illusion, for if the clearness is not distinct from the essence, then the afore-mentioned fault remains the same ((126), and if it is distinct, then (Brahma) becomes differenced (127). Nor is it admissible that that which is undifferenced light (or knowledge) alone should be a witness of ignorance, and the subject of the erroneous notion (of the existence) of the universe (consisting of) the organ of self-consciousness, etc., for the character of a witness, erroneous notion, etc., are observed to reside in a particular (concrete, personal) knower, and are not found in mere (abstract, impersonal) knowledge only. Moreover if it is Brahma only that under the influence of beginningless illusion beholds multiplicity existent in himself, then what is the cause of the non-perception of

125. One MS. reads vaiśishṭya for vaiśadya in both places, which seems a clear mistake.

126. Viz. that there takes place a destruction of essence.

127. The brightness then being a mere non-essential attribute of the light, Brahma.

Digitized by Google

र्थने किं कारणम् । किञ्च ब्रह्माज्ञानपक्षे स्वाज्ञाननिवृत्त्या तस्यैव-मोक्ष्यमाणत्वात्तदविद्याकल्पितानां जीवानां मोक्षार्थश्रवणादिप्रयत्नो निष्फलोऽविद्याकार्य्यत्वात्स्वाप्नमुमुक्षूणां प्रयत्नवत्, शुक्तिकारजतादिषु रजताद्युपादानादिप्रयत्नवत् । मोक्षार्थप्रयत्नोऽपि व्यर्थः कल्पिताचार्य्यायत्तज्ञानकार्य्यत्वात्, शुकप्रह्लादवामदेवादिप्रयत्नवत् । किञ्चैकमेव ब्रह्म सर्वशरीरेषु जीवभावमनुभवति चेत्, 'पादे मे वेदना शिरसि मे सुखमिति'वत्, सर्वशरीरेषु सुखदुःखप्रतिसन्धानं स्याज्जीवेश्वरबद्धमुक्तशिष्याचार्य्यज्ञत्वाज्ञत्वादिव्यवस्था च न स्यात् । सौभरिप्रभृतिषु

the universe during the time of its absorption, notwithstanding that ignorance (then) continues to exist (128)?

Again, if you hold that ignorance appertains to Brahma (alone) then as Brahma alone is liberated by the departure of the ignorance attaching to himself, the effort of reading, etc., in order to attain liberation on the part of the souls fictitiously produced by his nescience is futile, because it is an effect of nescience like the effort of aspirants after liberation seen in a dream, and like the effort to acquire nacrine silver, etc. The effort to attain liberation is also nugatory, because it is the effect of knowledge resting for its impartation on the agency of a feigned teacher, like the effort of Śuka, Prahláda, Vámadeva, etc.

Again, if you assert that Brahma as one only experiences the condition of soul in all bodies, then there must be the (129) consciousness of pleasure and pain in all bodies,—such as 'I have a pain in my foot,' 'My head is easy,' (free from pain)—, and the established order of soul, Lord, bound, free, disciple, teacher, learned and

128. Ignorance continues to exist, and also the percipient Brahma, why then is the world not perceived? Why does it not exist?

129. Brahma alone must be possessed of universal all-pervading consciousness, just as Chaitra being one only cognises simultaneously the sensations of pleasure and pain existing in various parts of his body.

Digitized by Google

ह्यात्मैकत्वेऽनेकशरीरप्रयुक्तं सुखादिप्रतिसन्धानमेकस्य दृश्यते । न चाहमर्थस्य ज्ञातृत्वात्तद्भेदात्प्रतिसन्धानाभावो नात्मभेदादिति वक्तुं शक्यम् । आत्मा ज्ञातेव स चाहमर्थ एव अन्तःकरणभूतस्त्वहंकारो जडत्वात्करणत्वाच्च शरीरेन्द्रियादिवन्न ज्ञाता "विकारजननीमज्ञाम्", "एतद्यो वेत्ति", "नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते", "नान्योऽतोऽस्ति द्रष्टे"ति, "जानात्येवायं पुरुषः", "विज्ञातारमरे केन विजानीयात्", मोक्षधर्मे च "अबुध्यमानां प्रकृतिं बुध्यते पञ्चविंशकः, न तु

unlearned would not exist. For oneness of soul existing in the case of Saubhari and others, the consciousness of pleasure, etc., occasioned by (union with) many bodies is seen to belong to one (soul).

Nor can it be said that the ahamartha (130) being the knower, it is because of its difference (in different bodies), not because of difference of souls, that there is an absence of consciousness (131). It is the soul that is the knower, and that (knower) is really the ahamartha (132), but the principle of egoism, constituted of the internal organ, is not the knower, seeing that it is insentient and an instrument, like the body and its organs; (according to the following passages) "(Nature) the genetrix of change, the unconscious," "He who knows this," "(133) For the knowledge of the knower is indefeasible," "There is no other percipient than this," "(134) Behold by what means should one

130. Ahamartha, that which is expressed by the word I, or the object of the consciousness I, is here, with the Śānkara, synonymous with ahaṅkāra, as appears from the following sentence.

131. I. e. of universal consciousness on the part of Brahma. The pleasure and pain experienced in the body of Chaitra is not cognised by Maitra, but this would be the case if all souls were parts of Brahma.

132. Here the ahamartha is held to be jīvātmā, the self, the Ego.

133. Bṛihad Āraṇyaka Upanishad IV. 3. 30.

134. Do. II. 4. 13. IV. 5. 15.

बुध्यति गन्धर्व प्रकृतिः पञ्चविंशकं" । किञ्चान्यत्र सत एवान्यत्रारोप-नियमान्नरविषाणादेरिव स्वरूपेणाऽसतः प्रपञ्चस्य न ब्रह्मण्यारोपसम्भवः, दृश्यते हि रज्ज्वादिषु सत एव सर्पादेरारोपः । 'नीलं नभ' इत्यत्रापि पूर्वमनुभूतस्य सत एव नीलस्य प्रतीतिः । स्वप्नेऽप्यस्यजन्मनि जन्मान्तरे वा दृष्टस्य श्रुतस्य वा विषयस्यानुभवः, "अदृष्टादश्रुताद्भावान्न भाव उपजायते" इत्येकादशे भगवद्वचनात् । नन्वारोपः स्वविषयस्य क्वचित्प्रतीतिमात्रमपेक्षते न सत्यत्वमपीति चेन्न

know the knower!" and in the Mokshadharma (135) "The Twenty-fifth is conscious of unconscious Nature, but Nature, O Gandharva, is not conscious of the Twenty-fifth."

Moreover according to the rule that only that which is (really) existent somewhere, can be imagined to exist elsewhere, it is impossible that the universe, essentially non-existent like the horn of a man, etc., should be imagined to exist in Brahma, for it is observed that only what is (really) existent, such as a snake, etc., is imagined to exist in a rope and like objects. In 'the sky is blue,' also, there is a (136) cognition only of a (really) existent blue (137), previously—perceived. In a dream, too, we perceive only those objects which we have seen or heard of in the present or some other (previous) birth; according to the declaration of Bhagavat in the eleventh skandha (of the Bhágavata Purána) "Nothing originates from a thing unseen or unheard of" (138).

---

135. Name of a section of the twelfth book (Śántiparva) of the Mahābhārata, 6456 to the end.

136. Cognition is perceptional in the several cases mentioned.

137. Not of a blue in the sky (or ether), for this, according to Hindu doctrine, being devoid of colour, the blue which presents itself in the sky is simply an áropa of the real blue previously perceived in cloth and other terrestrial things.

138. The argument is that even the imagination of the unreal is a result of the perceived real. Only the real can be imagined elsewhere

प्रतीतेरप्यसतः शशशृङ्गादेरिवासम्भवात् । ननु रज्जुसर्पप्रतीतेरिव प्रपञ्चप्रतीतेरपि दोषमात्रमेवकारणमपेक्षितमिति विषयसद्भावो नापेक्षित इति चेन्न दोषरूपकारणस्यापि मिथ्यात्वेन परपक्षे विषयप्रतीतिरूपकार्योत्पत्तेरसम्भवात्कार्यस्य कारणसत्तापेक्षत्वनियमात् । नन्वसतोऽप्यारोपितसर्पस्य भयादिकार्य्यं प्रति कारणत्वदर्शनात्कार्यस्य कारणसत्तापेक्षत्वनियमो नास्तीति चेन्नाऽसतः परोत्पत्त्यनुकूलशक्तिमत्त्वरूपकारणत्वासम्भवात्, भ्रमस्थलेऽप्यारोपिताहिविषयज्ञानस्यैव

But it may be said that only the cognition of its object in some substrate is necessary to erroneous surmisal (áropa), not the reality (of that object). This we deny, for there cannot be even a cognition of what (139) is non-existent, as for instance the horn of a hare.

You may say that as in the case of the cognition of the snake (imagined) in the rope, mere fault (nescience) is all that is required as the cause of the cognition of the universe likewise; hence it is not necessary that the object (the universe) should really exist. We deny this, for, according to the view of our opponents, the cause consisting of fault being false, the effect consisting of the cognition of the object cannot be produced; conformably to the rule that an effect is dependent on the existence of its cause. But, you will reply, it being observed that an imagined snake, though unreal, is the cause in relation to fear and other effects, there is no rule that the effect is dependent on the existence of its cause. This we deny, because it is impossible that the non-existent should be a cause, whose character is the being possessed of a capacity conducive to the production of something else, because

---

than where it really is. If the world is false, then all that takes place in it is unreal, and therefore unimaginable.

139. The presentation of what is real alone takes place, otherwise what should prevent the presentation of such chimeras as sky-flowers, etc.?

भयादिकार्यहेतुत्वेन विषयस्य तद्धेतुत्वाभावात्, कारणमात्रमिथ्यात्वपक्षे कार्योत्पत्तिवर्णनानुपपत्तेः । नन्वसतोऽपि सर्पादेर्ज्ञानकारणत्वोपपत्तिवद्भयकारणत्वोपपत्तिरपि किं न स्यादिति चेन्न दोषस्यैवासदर्थावलम्बनज्ञानकारणत्वेन भ्रमस्थले विषयस्य ज्ञानकारणत्वानुपपत्तेः । ननु घटपटादीनां व्यावहारिकसत्यत्वमङ्गीकृतमेवेति चेन्न स्वरूपतो मिथ्याभूतस्य शुक्तिरजतस्येव व्यवहारार्हत्वासम्भवात् । नन्वसतोऽपि स्वाप्नपदार्थस्य स्वकालावच्छिन्नव्यवहारोपयोगित्वं दृश्यत इति चेत्, तर्हि प्रातिभासिकव्यावहारिकसांकर्यप्रसङ्गः । किञ्च रज्ज्वावच्छ-

in the case of (140) mistake, too, the cognition whose object is the snake imagined (in the rope) being alone the cause of fear and other effects the object (the snake) is not the cause of these, (and) (141) because on (your) theory of the falsity of causes in general a description of the production of effects is inadmissible.

But, you will ask, in like manner as (in our view) the snake, though unreal, is the cause of the knowledge (of itself), why should it not be a cause of fear as well? To this we reply, It cannot be, for in the case of (mere) mistake fault alone being the cause of knowledge relating to a non-existent object, it is impossible that the object should be the cause of that knowledge.

But, you will say, (we Śānkaras) do in fact admit the practical reality (142) of waterpots, pieces of cloth, and other (mundane) objects. This we deny, for that which like nacrine silver is essentially false is not susceptible of use in practical life.

---

140. Mere, ordinary, and universally admitted mistake, such as the supposing a rope to be a snake.

141. 'You say the imagined snake is a cause and so forth, but it is not for you to talk of causes and their effects, who deny the reality of them all from Brahma downwards.' For Brahma, though really existent, is not according to the Śānkara doctrine a real cause.

142. Vyāvahārikasatyatvam is vyavahāropayogitvam — 'reality subservient to practical life.'

Digitized by Google

स्तानां सर्पभूदलनाम्बुधारादीनामसत्यत्वे यदि भेदो वक्तुं शक्यते तदा सन्मात्रेऽध्यस्तानामप्ययं व्यावहारिकसत्ताकोऽयं च प्रातिभासिकसत्ताक इत्येवं भेद उच्यताम् । अवच्छेदवादे,—"यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशस्तथा नानात्वेन प्रतिभासमानानां जीवगतानामज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः । इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना, एतदुपहितं चैतन्यं [सर्वज्ञत्व] सर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमन्तर्य्यामी जगत्कारणमीश्वर इति व्यपदिश्यते । सकलाज्ञानावभासकत्वात् [अस्य सर्वज्ञ-

If you say that an object seen in a dream though false is observed to be subservient to the practical life appertaining to the time of that (object), then you (143) confound what is illusory with what is practical. Moreover, if, in spite of their unreality, (144) difference can be asserted in the case of snakes, cracks in the ground, rills of water, etc., erroneously imagined in a rope, then may such a difference, as 'This is possessed of a practical existence' and 'This is possessed of a (merely) illusory existence be said to exist in the case of those things, also, which are imagined in mere existence (Brahma) (145).

'We do not hold the absolute non-reality of things. In the condition of practical life—during the period of transmigratory bondage—waterpots, etc., are real, but in the condition of real existence—when true knowledge has been attained—they are falsified.'

143. 'By acknowledging that objects dreamt of are subservient to the practical life (imaginary transactions) pertaining to the time in which they are perceived, you confound your own division of illusory and practical; for your doctrine is that dream—objects have only an illusory existence.'

144. I. e. such difference cannot be asserted in the case of snakes, etc.

145. "If the snake imagined in the rope were described as practically existent, and the similarly—imagined crack in the ground as illusorily existent, then you might talk of such a difference as 'the world

Digitized by Google

त्वम्] "यः सर्वज्ञः सर्ववित्" [इति श्रुतेः] । अस्येयं समष्टिरखिलकारणत्वात्कारणशरीर,मानन्दप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानन्दमयकोशः, सर्वोपरमत्वात्सुषुप्तिः, अत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते । यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशस्तथाऽज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः "इन्द्रो मायाभिः पुरुरूप ईयते" [इत्यादि श्रुतेः] । इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना, एतदुपहितं चैतन्यमल्पज्ञत्वादिगुणकं प्राज्ञ

(146) What is declared in the exposition (147) of circumscription is false, viz:—"As, when regard is had to a collective aggregate of trees, they are described as one, namely, a wood; so when regard is had to the collective aggregate of the ignorances existing in souls, (and) appearing as manifold they are described as one (Māyā). This collective aggregate (of ignorances), as forming the superior conditioning principle, chiefly consists of the quality of pure goodness; the intelligence conditioned by this collective aggregate being endowed with omniscience, and the characters of Lord of all, and Regulator of all, etc., is termed the Internal Ruler, the cause of the world, Iśvara. He (Iśvara) is omniscient because the illuminator of all ignorances, according to the Śruti passage "He who knows all (in general), and knows everything (in particular)." The collective aggregate of this is called the causal body because it is the cause of all, the sheath of bliss because it is fraught with bliss, and because it encases the

and all its contents are practical, and nacrine silver, etc., illusory.' If all things are alike imaginary and unreal, then there can be no such differences as 'this is practical,' 'this is illusory,' etc.

146. The long quotation that follows is from the exposition of adhyāropa in the Śānkara Vedāntasāra. Several sentences are here omitted that occur in the original, but I have supplied those words in brackets that appeared necessary to make good sense.

147. That is the exposition of Brahma's becoming Iśvara and jīva by being circumscribed by Māyā and the antaḥkaraṇa.

Digitized by Google

इत्युच्यते । एकाज्ञानावभासकत्वात् [अस्य प्राज्ञत्वम्] । अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिवाभेदः । तदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिवाभेदः । वनवृक्षतदवच्छिन्नाकाशयोराधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमिति चोच्यते, "शिवमद्वैतं चतुर्थं मन्यन्त"-इति श्रुतेः । इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यामविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते,—

soul like a sheath, dreamless sleep because there is (then) a cessation of all things, and hence also the place of the absorption of the gross and subtile universe. As, when regard is had to the distributive aggregate of a wood, it is described as many, viz. trees, so, when regard is had to the distributive aggregate of ignorance, it is described as many, according to the Śruti passage (148) "Indra (Âtmá) appears multiform by reason of illusions." This distributive aggregate, as forming the inferior conditioning principle, chiefly consists of the quality of impure goodness; the intelligence conditioned by this being endowed with parviscience, etc., is called the cognitive one. He (Prâjña) is cognitive, because the illuminator of one (individual) ignorance. These two, the collective aggregate and distributive aggregate (of ignorance), are identical, like the wood and the trees. Íśvara and the cognitive one conditioned by these are also identical, like the (two) ethers circumscribed by the wood and the trees. The unconditioned intelligence which is the substrate of ignorance and the (two) intelligences conditioned by that, just as the unconditioned ether is the substrate of the wood, the trees, and the (two) ethers circumscribed by these, is called the fourth, according to the Śruti passage (149) "They consider him blessed, secondless, fourth." This same fourth, viz., pure intelligence, when undiscriminated from

148. Ṛig Veda VI. 47.18.

149. Māṇḍūkya Upanishad 7.

Digitized by Google

इति यदुक्तं तदयुक्तम् । ईश्वरस्याधारभूतमनुपहितं चैतन्यमिति वचनं "मूलमनाधारम्", "दिव्यो देव एको नारायणः" "आत्माधारोऽखिलाश्रय" इत्यादिभिर्विरुद्ध्यते । वृक्षाणां समूहरूपस्य वनस्य वृक्षसत्तानन्तरसत्ताकत्वेन वनस्थानीयस्येश्वरस्यापि जीवसत्तानन्तरसत्ताकत्वादादावेकत्वेनावस्थानम्, पश्चादे"कोऽहं बहुस्याम्", "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी"ति संकल्पपूर्वकबहुत्वभवनं जीवभावापत्तिश्च न सम्भवति । (शेषमग्रे)

ignorance and the intelligence conditioned by that is said to expressed by the great (150) text, and when discriminated to be implied (only)." :—

The declaration that unconditioned intelligence is the substrate of Iśvara is (151) opposed to "a baseless root," "There was one heavenly deity, Nārāyaṇa," "The self-based the substrate of all," and other passages. Because the existence of a wood composed of an assemblage of trees is posterior to the existence of trees, the existence of Iśvara, also, who is represented by the wood, is (152) posterior to the existence of soul; hence it is impossible that he should at first subsist as one, (and) afterwards, on resolving "(153) I am one, let me become many" (154) "Having entered in along with this soul, (my) self, let me develop name and form," become many, and assume the condition of soul.

J. J. JOHNSON

(to be continued).

150. Tat tvam asi, Chhāndogya Upanishad VI. 8. 7.

151. For the Rāmānuja view is that Íśvarā, Nārāyaṇa, Paramātmā, Brahma, etc., are all names of one being, and there is no unconditioned Brahma.

152. The Rāmānuja argues that a collective aggregate supposes a previous distributive aggregate.

153. Chhāndogya Upanishad VI, 2. 3.

154. Ditto VI. 3. 2.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

		मूल्यम्	
		रु०	आ०
१	काशिका पंडितवरवामनादित्यविरचिता		
	पूर्वार्धम्	..	॥
	उत्तरार्धम्	१० ..	॥
२	बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२ ..	॥
३	प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१ ..	।)
४	लघुकौमुदी वरदराजकृता	१ ..	≡)
५	लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८ ..	॥
६	श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७	वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४ ..	॥
८	मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४ ..	॥
९	शाश्वतधर्मदीपिका	१ ..	॥
१०	अमरकोश सटीक..	४ ..	॥
११	योगवार्त्तिकम्	३ ..	।)
१२	वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१) ..	॥
१३	गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-देशाधिपति रचिता	४) ..	॥
१४	शीतपदार्थनिर्वचनम्	३ ..	।)

Digitized by Google

CONTENTS.

	Page.
SAṂKSHEPAŚÁRÍRAKAM ...	345
KHAṆḌANAKHAṆḌAKHÁDYAM ...	356
ŚRÍBHÁSHYAM ...	364
ŚÁSTRADÍPIKÁ ...	375
VEDÁNTATATTWASÁRAH ...	390

Digitized by Google

HARVARD COLLEGE
OCT 4 1887

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 8.] AUGUST 1887. [Vol. IX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

OCT 4 1887

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page* 355. Vol. IX.)

मू० ॥ मायामात्रमतः समस्तमभवत् स्वप्ने प्रसिद्धं दृशः
कर्तृत्वादि तमोमयं वितथमेवाज्ञानमात्रं यतः ॥
तस्माज्जागरितेऽपि नैतदभवत् स्वाभाविकं यत् पुन-
स्तादृक्तं तत्र सर्वदैव तु भवेत् स्वप्नेऽपि चैतन्यवत् ॥ ११२ ॥

टी० ॥ उक्तविधया मायाया अज्ञानात्मत्वे सति स्वप्नावस्थागत-कर्तृत्वादिप्रपञ्चस्य सूत्रोक्तं मायामात्रत्वमज्ञानमात्रत्वमेव ततस्तन्मिथ्यात्वसिद्धिरिति फलितमाह । मायामात्रमिति । अतो मायाया अज्ञानत्वाद् दृशो दृगात्मनो यत्स्वप्ने समस्तं कर्तृत्वादि मायामात्रं प्रसिद्धमभवत्तत्तमोमयं वितथमेवेति संबन्धः । तद्द्रष्टृत्वादीनामवस्थोपाधिधर्मोणां व्यभिचारेऽपि न तटस्थरूपस्य सर्वत्राव्यभिचाराद्व्यभिचारित्वम्, एवं सति तस्य कुतस्तत्र व्यभिचार इति भावः । स्वभाविकत्वे बाधकमाह । यत्पुनरिति । तादृक्तं स्वाभाविकम्, कर्तृत्वादेः स्वाभाविकत्वे स्वप्नेऽप्यनुवृत्तिः स्यात्, चैतन्यवदित्यर्थः ॥ ११२ ॥

मू० ॥ सत्यप्यलुप्तचिति यत्त्वयि नास्ति कर्तृ-
भोक्तृप्रमातृमुखमन्यदपोह किं चित् ॥
जाग्रद्दशाऽवगतमप्यखिलं न तत्ते
स्वाभाविकं भवितुमुत्सहते विरोधात् ॥ ११३ ॥

टी० ॥ कादाचित्कमपि स्वाभाविकमस्तु पक्वामघटगतरक्तत्वश्यामत्ववदिति चेन्न, विकारिणि तस्य संभवेऽपि कूटस्थात्मन्यसंभवादित्याह । सत्यपीति । न ह्यलुप्तचिद्रूपस्यागन्तुकं कर्तृत्वादि सहजं स्यादित्यर्थः । हेतोरदृष्टत्वे फलितमाह । अप्यखिलमिति । तदखिलमपि ते स्वाभाविकं परमार्थसद्भवितुं नोत्सहत इति संबन्धः । अप्रयोजकत्वमा-

Digitized by Google

शङ्कामाह । विरोधादिति । सतोऽपि व्यभिचारित्वे तस्य कदा चिदसत्त्वं स्याच्च च तत्संभवति सत्त्वासत्त्वयोरैकत्वे विरोधात् । तदुक्तं श्रीकृष्णेन । नासतो विद्यते भावो नाभावो विद्यते सत इति । तस्माद्व्यभिचारि सर्वमनिर्वचनीयमेवेत्यर्थः ॥ ११३ ॥

मू० ॥ स्वाभाविकी हुतभुजः खलु नोष्णता तं
जातु प्रमुञ्चति न तामपि जातवेदाः ॥
एवं भवन्तमपि जागरितोपलब्धं
स्वप्ने भवानपि च जागरितं न मुञ्चेत् ॥ ११४ ॥

टी ॥ किं चात्यन्तभिन्नयोर्गवाश्वादिवद्धर्मधर्मिभावानुपपत्तेस्तत्सत्यत्ववादिना तयोरभेदोऽपि वास्तवो वक्तव्यः, ततश्चैकस्यानुवृत्तावपरस्य व्यावृत्तिर्दुर्घटेति सदृष्टान्तमाह । स्वाभाविकीति । जागरितोपलब्धं कर्तृत्वादि स्वप्ने न मुञ्चेदित्यनुषङ्गः । मुञ्चति च तस्मात्कर्तृत्वादेरात्मनश्च धर्मधर्मिभावो न वास्तव इति शेषः ॥ ११४ ॥

मू० ॥ स्वप्ने न जागरितमस्ति मृषात्वहेतोः
स्वप्नस्य सत्यमिति जागरितं वदन्ति ।
स्वप्नस्य बाधनबलादनृतत्वमुक्तं
तस्माच्चिदेव तव रूपमतोऽन्यदार्तम् ॥ ११५ ॥

टी० ॥ ननु स्वप्नेऽपि जागरितवदेव व्यवहारदर्शनाज्जाग्रत्कर्तृत्वादि मुञ्चतीति कथमुक्तमित्याशङ्क्य तदुपपादयति । स्वप्न इति । स्वप्नस्य मृषात्वहेतोस्तद्विलक्षणजाग्रत्कर्तृत्वादि न तत्रास्तीत्यर्थः । ननु सिद्धान्ते जागरितस्यापि मृषात्वात्कथं स्वप्नवैलक्षण्यं तस्येत्यत आह । सत्यमितीति । जागरितोपलब्धवस्तूनामनिर्वचनीयत्वे समानेऽप्यविद्यातिरिक्तदोषाजन्यतया स्वोचितार्थक्रियासामर्थ्यरूपव्यावहारिकसत्यत्वस्य नियतान्वयव्यतिरेकविधिनिषेधशास्त्रसिद्धस्यापनिषदात्मतत्त्वसाक्षात्कारात्प्राग् बाधाभावात्तत्सत्यत्वं जाग्रत्कृतदुरितध्वंसाय प्रायश्चित्तवि-

धायका धर्मशास्त्रकारा वदन्ति । स्वप्नस्य तु निद्रादिदोषजन्यस्य प्राकृतैरपि मिथ्यात्वेन निश्चितस्योक्तविपरीतत्वादनृतत्वमेव रज्जुसर्पादितुल्यं सूत्रकारादिभिरुक्तम् । ततश्च स्वप्नप्रपञ्चस्य जाग्रदुपलब्धादन्यत्वात्स्वप्ने न तदनुवृत्तिरित्यर्थः । दृग्दृश्ययोरनुवृत्तिव्यावृत्तिप्रतिपादनफलमाह । तस्मादिति । रूपं वास्तवस्वरूपम् । आर्तं नश्वरं तत्त्वधीबाध्यमिति यावत् ॥ ११५ ॥

मू० ॥ स्वप्नोपलब्धमखिलं वितथं तथापि
तत्सूचयत्यवितथं परमार्थवस्तु ॥
जाग्रद्दशावगतमप्यनृतं तथापि
तद्वत्तदप्यवगतिक्षममेव भूम्नः ॥ ११६ ॥

टी० ॥ जाग्रदवस्थागतस्यापि मृषात्वे तद्गतश्रुतेरपि तथात्वाद्बाध्यधूमादेरिव ततस्तत्त्वबोधो न स्यादित्याशङ्क्य सूचकश्च हि श्रुतेरिति सूत्राभिप्रेतं परिहारमाह । स्वप्नोपलब्धमिति । तत्स्वप्नोपलब्धं कुञ्जरारोहणादि । अवितथं स्वप्नप्राप्तबाधरहितम् । परमार्थवस्तु अर्थक्रियासमर्थेष्टवस्तु । तदपि जाग्रद्गतमनृतमपि श्रुत्याचार्यादि । मिथ्यात्वाविशेषेऽपि तत्त्वमादिवाक्यस्य सर्वथा विषयाबाधात्तत्त्वावेदनसामर्थ्यात्तत्त्वबोधहेतुत्वं घटते, न तथान्यस्य, तद्विषयस्य श्रुत्यादिबाध्यत्वादिति भावः ॥ ११६ ॥

मू० ॥ स्वप्नभ्रमोऽपि सुकृतादिनिबन्धनत्वा-
त्तावत् परिस्फुरति यावददृष्टमस्ति ॥
क्षीणे तु तत्र लयमेति जगन्निदाने
गाढे तमस्यनुभवावगते प्रतीचः ॥ ११७ ॥

टी० ॥ ननु जाग्रत्स्वप्नयोर्मृषात्वे कथं तयोः पूर्वोक्तं वैषम्यं भवेत्, यद्यविद्यातिरिक्तनिद्रादिदोषजन्यत्वात्स्वप्नस्य प्रातिभासिकत्वं तद्दोषापगमे बाधश्चोपपद्यते जागरितस्य तदभावाद्व्यावहारिकत्वमिति वैषम्यमुच्यते, तर्हि यावन्निद्रा तावत्स्वप्न एव स्यादिति सुषुप्तिर्न स्यात्,

Digitized by Google

स्वप्नवैचित्र्यं च न स्यात्तद्धेतोर्निद्राया एकरूपत्वादित्याशङ्क्य स्वप्नस्यापि सुखदुःखपर्यवसायितया ऽदृष्टसाध्यत्वस्यावश्यकत्वात्तस्यामपि निद्रायां तदुपरमे स्वप्नलयात्सुषुप्तिः स्यात्कर्मवैचित्र्याच्च स्वप्नवैचित्र्यमित्याशयेनाह। स्वप्नभ्रम इति। तत्रादृष्टे क्षीण इति संबन्धः। प्रतीचस्तमसीति संबन्धः। गाढे सर्वविशेषप्रकाशशून्ये जगच्चिदाने तमसि स्वप्नस्य लयं वदता ग्रन्थकारस्य मूलाविद्याकार्यत्वं तस्याभिमतम् ॥ ११७ ॥

मू० ॥ निष्पादिता सकलकारकवर्गसाध्या
सर्वेण कारकगणेन सहैव तावत् ॥
तिष्ठेत् क्रिया परमसूक्ष्मतयेक्ष्यमाणा
सर्वेश्वरेण पुरुषः फलमेति यावत् ॥ ११८ ॥

टी० ॥ नन्वाशुतरविनाशिन्याः पुण्यपापक्रियायाः कालान्तरभाविस्वप्नादिहेतुत्वमेवानुपपन्नं कुतस्तदुपरमात्स्वप्नोपरम इत्याशङ्क्य कदाचित्सुकृतं कर्म कूटस्थमिव तिष्ठतीतिवचनाद्विधिनिषेधशास्त्रसामर्थ्याच्च कारकाश्रितक्रियायास्तत्कारकाणां च यावत् फलावसानं स्थायि सूक्ष्मरूपं कल्प्यते, नाशशब्दस्याप्यदर्शनवाचिनः सूक्ष्मरूपसत्त्वानुकूलत्वाच्च तावता तदसत्त्वापत्तिः, तथा चादृष्टसूक्ष्मरूपेण स्थायिन्याः क्रियायाः शास्त्रावगतस्वप्नादिहेतुत्वादि युक्तमेवेत्याशयेनाह । निष्पादितेति । तथापि जडस्य तस्य कथं कालविशेषे फलारम्भाय प्रवृत्तिश्चेतनस्याप्यज्ञस्य तत्प्रेरणाशक्तेरित्याशङ्क्य फलकालाभिज्ञेश्वरेक्षणप्रेरितं नियमेन तत्र व्याप्रियत इत्यभिप्रेत्याह । ईक्ष्यमाणा सर्वेश्वरेणेति । पुरुषः कर्मकर्ता, अर्थात्फलावसाने सूक्ष्मरूपमपि नश्यतीति द्रष्टव्यम् ॥ ११८ ॥

मू० ॥ स्वप्नश्च जागरितमप्युभयं तवैव
मोहप्रसूतमपि कर्मफलं विभाति ॥
कर्मक्षये तदखिलं परमात्ममाया-
माश्रित्य सूक्ष्ममवतिष्ठत एव लीनम् ॥ ११९ ॥

टी० ॥ ननु विचित्रस्वप्नस्य विचित्रवासनावदज्ञानादेवोत्पत्तिसंभवात्तत्र कर्मणो नोपयोग इत्याशङ्क्य वासनोद्बोधद्वारा तत्र तदुपयोग इत्याशयेनाह । स्वप्नश्चेति । दृष्टान्तार्थं जागरितग्रहणम् । यथा ज्ञानकार्यमपि जागरितं यत्कर्म कुरुते तदभिसंपद्यत इत्यादिवचनात्कर्मकार्यमेवमाविद्यकोऽपि स्वप्न उक्तवचनादेव कर्माधीन उपेय इत्यर्थः । तर्हि स्वप्नारम्भकवासनानां स्वप्नानुभवावसाने नाशात्पुनः स्वप्नो न स्यादित्याशङ्क्य स्वप्नस्यापि निरन्वयनाशाभावात्तद्वासनाश्चान्याः पुनः स्वप्नहेतवः सुलभा इत्यभिप्रेत्याह । कर्मेतय इति । तत्कर्मारब्धम् । अखिलं जाग्रत्स्वप्नदृश्यम् ॥ ११९ ॥

मू० ॥ उत्थानलिङ्गकृतकल्पनयैतदेवं

विज्ञायते न तु तथावगतं तदानीम् ॥

अज्ञानलीनमखिलं जगदस्ति सूक्ष्मं

तद्वेति नानुभवनादवगम्यते हि ॥ १२० ॥

टी० ॥ ननु किमिदं सूक्ष्मरूपं वासनेति चेत्सा किं पराभिमतभावनासंस्कारस्ततोऽन्या वा नाद्यः, तस्यानुभवमात्रजन्यस्य स्मृतिमात्रहेतोरस्त्वदिष्टदृश्यवस्तुजन्यत्वतद्धेतुत्वयोरसंभवात्पष्टस्य दृश्यस्य तद्रूपत्वासंभवाच्च, न द्वितीयः, तदनिरूपणान्मानाभावाच्च, सा किमनुभूयमाना स्थूलवस्त्वभिन्ना भिन्ना वा नाद्यः, नष्टस्य स्थित्यवस्थातो विशेषाभावप्रसङ्गाद्वस्तुनो नित्यत्वापत्तेः स्थूलसूक्ष्मरूपयोर्हेतुहेतुमद्भावानुपपत्तेश्चेति, द्वितीये स्थूलस्य नाशे सूक्ष्मरूपेणावस्थानोक्तिर्विरुध्येत वस्तुनो निरन्वयनाशोऽसतश्चोत्पत्तिरित्यपि प्रसज्येत, न चेतदिष्टम्, मानमपि तत्र न तावत्प्रत्यक्षमस्ति अननुभवात्, अन्यथा तत्र विप्रतिपत्त्यभावप्रसङ्गात्, नाप्यन्यन्मानमस्ति तत्र लिङ्गाद्यनिरूपणादिति तत्राह । उत्थानेति । यद्यप्याविद्यककार्याणां वासनापरपर्यायं सूक्ष्मरूपं तेभ्यस्तत्कारणाच्च भेदाभेदाभ्यां सत्त्वासत्त्वाभ्यां च दुर्निरूपमनिर्वचनीयत्वादेव, तथापि कार्याणामुत्पत्तेः प्राक् सत्त्वेऽसत्त्वे वा तदयोगात्सैवानुपपद्यमानाऽनिरूपितविशे-

सूक्ष्मरूपं तेषां कल्पयति । न चानुपलब्धिविरोधः । तस्य तदुपलम्भायोग्यत्वात् । तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे इत्यादिश्रुतिस्मृतिपर्यालोचनयाऽपि तदुपेयमिति भावः । तर्हि जागरितादाविव स्वप्नेऽपि सर्वोपाधिसत्त्वे सता सोम्य तदा संपन्नो भवतीत्यादिनोच्यमाना सत्संपत्तिर्विरुध्येतेत्याशङ्क्य तदा तदनुपलम्भेन तदधीनविक्षेपाभावमात्रात्तदुक्तिरुपपन्नेत्याशयेन तदा तदनुपलम्भमुपपादयति । अज्ञानलीनमिति । तत्र सुषुप्तौ । ईक्षितृत्वैः । अतोऽपि सूक्ष्मस्यानुपलम्भो लोके प्रसिद्ध इति हिशब्दार्थः ॥ १२० ॥

मू० ॥ अज्ञानमेव तु तदावगतं त्वदीयं
येनोत्थितो वदसि नावगतं मयाद्य ॥
सुप्तेन किंचिदपि गाढतमस्यभूवं
क्षिप्तः समस्तविषयावगमावसमर्थः ॥ १२१ ॥

टी० ॥ ननु सुषुप्तावज्ञानमेव नास्ति तत्साधकाभावात् यत्र लीनं जगत्सूक्ष्मरूपेण तिष्ठेत् तावत्तत्रेन्द्रियव्यापारोऽस्ति तेषां तदोपरमात्तदधीनलिङ्गादिधीरपि तत्र न संभवति, न च साक्षिणैव तत्सिद्धिः केवलस्य तत्साधकत्वेऽतिप्रसङ्गादित्याशङ्क्य केवलसाक्षिणा तदाज्ञानमेवानुभूयते तदान्यस्य तद्योग्यस्याभावादित्यभिप्रेत्याह । अज्ञानमेवेति । अवगतमेवेति संबन्धः । तुशब्दोऽन्यावगतिनिरासार्थः । तदाऽज्ञानावगतिरपि नेत्याशङ्क्याह । येनेति । सुप्तेन मयेति संबन्धः । किंचिदवगतमित्यत्र हेतुमाह । गाढेति । असमर्थोऽभूवमिति संबन्धः । स्वापकालीनाऽज्ञानव्यवहारस्य व्यवह्रियमाणाज्ञानावगत्यधीनत्वात्तत्सिद्धिरित्यर्थः ॥ १२१ ॥

मू० ॥ अज्ञानमेव यदि नानुभवात् प्रसिद्धं
नाज्ञासिषं त्विति कुतस्तव निश्चयोऽभूत् ॥
अज्ञानमस्त्यवगतं च सुषुप्तिकाले
तेनेति निश्चिनु तवानुभवप्रमाणात् ॥ १२२ ॥

टी० ॥ ननु स्वापादुत्थितस्यास्मरणलिङ्गकस्वापकालीनज्ञानाभावगोचरानुमानादुक्तव्यवहारोपपत्तेः कथमनेन स्वापे त्वदभिमताज्ञानतदनुभवसिद्धिरिति चेन्न, सत्यपि ज्ञाने कालान्तरे तस्य तद्विषयस्य वा स्मरणानुदयस्य बहुशो दर्शनेन व्यभिचारिणोऽस्मरणस्य ज्ञानाभावगमकत्वायोगाल्लिङ्गान्तरस्याप्यनिरूपणात्तस्य न किं चिदवगतं स्वापे मयेत्येतत्तत्त्यसमस्तवस्तुज्ञानस्मरणमेवेत्यवश्यमाश्रयणीयम्, न च स्वापे तदनुभवाभावे तत उत्थितस्य तत्स्मरणं घटते, नापि तत्स्मरणं तन्मूलानुभवश्च ज्ञानाभावगोचराविति युक्तम्, परमते तदा धर्म्यादिज्ञानाभावे तद्योगात्तदङ्गीकारे च सुषुप्तिभङ्गप्रसङ्गात्, न किं चिदवगतमित्यनुपपत्तेश्च, सिद्धान्त्यभिमतसाक्षिणापि विशिष्य प्रतियोग्युपस्थितिं विना ज्ञानाभावग्रहणासंभवात्तत्स्मरणस्याप्यनुपपत्तेः, तस्मात्समस्तसत्तागोचरभावरूपाज्ञानमेव तदा साक्षिणानुभूतं पश्चाच्च स्मर्यत इति वक्तव्यमित्यभिप्रेत्य विपक्षे बाधकमाह । अज्ञानमत्रेति । तत्रोत्थितस्येति शेषः । सर्वकार्यलयस्थानं तदनुभवं च साधितमुपसंहरति । अज्ञानमस्तीति । तेन नाज्ञासिषमितिनिश्चयेन । ननु स्वापे न किंचित्प्रमाणं प्रवर्तते कथमज्ञानानुभवं निश्चिनुयां तत्राह । तत्रानुभवेति । साक्षिणोऽप्यहंकारतद्धर्मादिसाधकत्वेन क्लृप्तत्वात्तत्सिद्धं नापह्नवमर्हतीत्याशयेन प्रमाणादित्युक्तम् ॥ १२२ ॥

मू० ॥ स्वप्नानुभूतिविषयो न तमस्तदानी-
मासीदहंकरणहीनतयाऽधुना तु ॥
निष्पाद्य कार्यमदमंशमहं न जाने
मूढोऽस्मि चेत्यवगतेर्विषयत्वमागात् ॥ १२३ ॥

टी० ॥ नन्वेवपरामर्शप्रामण्यात्सुषुप्तावज्ञानतदनुभवौ चेत् स्तस्तर्हि नाहं तदा किं चिदवेदिषमित्यपि परामर्शदर्शनात्तदाहंकारतदनुभवावपि कल्प्येयाताम्, न चैतदिष्टमुपपन्नं वा, तदा सकलकार्यलयाभावाद्विशेषविज्ञानभावाच्च सुषुप्तिभङ्गप्रसङ्गादित्याशङ्क्य तदा सत्संपत्तिप्रतिपादकवचनविरोधादहंकारस्तदनुभवश्च नैवास्ति सति संपद्य न विदुरि-

त्यादिवचनादज्ञानमात्रं तत्परामर्शबलात्तन्मात्रानुभवश्चापि तत्, ततो नोक्तदोष इत्याशयेनाह । स्पष्टानुभूतीति । अहं न जानामीति सविकल्पकानुभवविषयो नेत्यर्थः । तर्हि जागरितादौ कथं तादृशसविकल्पकानुभवगोचरत्वं तस्येत्याशङ्क्य तदाधिष्ठानचैतन्याभेदेनैवाविद्यया तस्यास्त्यादितत्त्वात्तत्संसर्गगोचरतया तदनुभवस्य सविकल्पकत्वापत्तिरित्याह । अधुना त्विति । तमोविषयत्वमागादित्यनुषङ्गः । एवं चोत्थितस्य नाहमवेदिषमिति परामर्शेऽप्यहंकारस्तदानींतन एव दैवगत्या तदाश्रयकोटिनिक्षिप्ततयाऽनुभूयते साक्षिणा न तु परामर्शविषयतया स्मर्यते ततश्चाहं नावेदिषमित्यस्याहंकारांशे परामर्शत्वाभावात्तद्बलात्स्वापेऽहंकारतदनुभवकल्पना नेति भावः ॥ १२३ ॥

मू० ॥ एतावता तव तमोऽपि सुषुप्तिकाले
नास्तीति बुद्धिरुदितं गुरुभिश्च कैश्चित् ॥
स्थाने क्व चित् क्व चिदतो द्वयमुच्यमानं
ग्राह्यं विविच्य भवता विषयं विभज्य ॥ १२४ ॥

टी० ॥ ननु सुषुप्तेऽज्ञानमनुभूतं चेत्किं चिदपि नान्वभूवमिति सर्वानुभवनिषेधोऽनुपपन्नः स्यात्ततोऽवगच्छामि तदा नाज्ञानं तदनुभवो वास्तीति, किं च तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपमित्यादिश्रुतिसमाश्रयणेन त्वंपदार्थशोधनाय प्रवृत्ता भाष्यकारादयः सुप्तावज्ञानमपि नास्तीति वदन्ति स्म ततोऽपि तदा नाऽस्त्यज्ञानमित्याशङ्क्याह । एतावतेति । तदा तत्स्पष्टं सविकल्पकेन नानुभूयत इत्येतावतैव न किं चिदन्वभूवमितिव्यपदेशोपपत्तेस्तव तदाऽज्ञानादि नास्तीति बुद्धिरप्येतावता विपर्यस्ता जायते, भाष्यकारादिभिश्चाचार्यैः क्व चित् क्व चित्त्वंपदार्थशुद्धिप्रकरणे तदा स्पष्टमनुभवाभावादेवाज्ञानं नास्तीत्युदितं न तु तस्यैवाभावात्, तैरेवैतं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढाः सति संपद्य न विदुरित्यादिश्रुत्यर्थतया तदाऽज्ञानस्य निरूपितत्वादित्यर्थः । कथं तर्हि विरुद्धार्थानां तद्वचनानामुपादेयता तत्राह । अतो द्वयमिति । यतो

विरोधधीरापाततोऽतो विचार्य वचनद्वयस्याविरुद्धं विषयं विभागेन कल्प-
यित्वोभयमप्युपादेयमित्यर्थः ॥ १२४ ॥

मू० ॥ नाज्ञानमस्ति च सुषुप्तिगतस्य पुंसो
गाढे तमस्ययमभूत् पुरुषः सुषुप्तः ॥
इत्युच्यमानमविरुद्धतया विविच्य
ग्राह्यं त्वयाऽनुभवयुक्तिनिरूपणेन ॥ १२५ ॥

टी० ॥ किं तदाचार्यैर्विरुद्धवदुक्तं द्वयमितिवीक्षायामाह । नाज्ञान-
मिति । स्पष्टमननुभवाद्भावोक्तिर्न किं चिद्वेदिषमितिपरामर्शकल्प्यानु-
भवात्तदाऽज्ञानाभावे पुनरुत्थानाद्यनुपपत्तिरिति युक्तेश्च तद्भावोक्तिरा-
चार्याणामिति तदुभयोपादेयतां निगमयति । अविरुद्धतयेति ॥ १२५ ॥

मू० ॥ एवं तमोऽपि न बभूव सुषुप्तिकाले
भाषान्तरेण पुरुषः पर एव जीवः ॥
निर्बीजतामुपगतः स निरन्वयेन
न स्पष्टमत्र तमसोऽनुभवोऽस्ति यस्मात् ॥ १२६ ॥

टी० ॥ एवमन्यैरप्याचार्यैरज्ञानपदं विहाय पदान्तरवद्वाक्यैर्मुख-
तोऽर्थाच्च तदाऽज्ञानाभाव उच्यते तदपि स्पष्टं तदनुभवाभावादेव न
तदभावादित्याह । एवं तम इति । भाषान्तरेण शब्दान्तरेण । तदा जीवः
परः पुरुष एवेत्यनेनार्थादज्ञानाभावः सूचितः । स जीवस्तदा निरन्वयेन
दुःखरागादिसंसारसंबन्धाभावेन निर्बीजतां संसारकारणरहिततामुपगत
इति वाक्यान्तरम् । अत्र स्वापे तमसः स्पष्टमनुभवो नास्ति यस्मात्तस्मादे-
तानि वाक्यान्युक्तानीत्यर्थः ॥ १२६ ॥

मू० ॥ अज्ञानतत्त्वमतिहीनतया सुषुप्ते
शुद्धः परोऽसि भगवानसि नित्यमुक्तः ॥
कामश्च कर्म सकलं च तदा कुतस्त्यं
चित्सागरेऽनवकरे त्वयि तायमाने ॥ १२७ ॥

Digitized by Google

टी० ॥ मयाप्येतादृशवाक्यान्युच्यन्ते न चैतावता मम तदाऽज्ञानाभावोऽभिप्रेतः, किं त्वहं न जानामीत्येव स्पष्टमननुभूयमानं विद्यमानमपि तदविद्यमानप्रायं बुद्ध्यादिकार्यराहित्यादिष्टमेवेति ततस्त्वं शुद्ध इत्यादि मदीयमपि वचनं ग्राह्यमित्याशयेनाह । अज्ञानतज्जमतिहीनतयेति । अहंकारघटिताज्ञानगोचरसविकल्पकमतिहीनतयेत्यर्थः । सकलं कामादिकार्यम् । अनवकरे अवच्छेदकरहिते । तायमाने विस्तीर्णे त्रिविधपरिच्छेदरहित इति यावत् । चित्सागर इत्यादिसप्तमीचतुष्टयं समानाधिकरणम् ॥ १२७ ॥

मू० ॥ आसीदहंकरणमात्मतमोनिमित्तं
तज्जाग्रतश्च भवतः स्वपतश्च दुःखम् ॥
आनीय दर्शयति तन्न सुषुप्तिकाले
बीजक्षयादिति भवानतिनिर्मलोऽभूत् ॥ १२८ ॥

टी० ॥ ननु सुषुप्तावुक्तरीत्यात्मनो भवतु शुद्धतादि नित्यमुक्तता तु न घटते जाग्रत्स्वप्नयोर्विविधदुःखान्यनुभवतस्तद्योगादित्याशङ्क्य तदा दुःखादिबन्धप्रतिभासेऽपि तस्यात्मन्यौपाधिकतया स्फटिके लौहित्यवन्मिथ्यात्वात्तत्प्रसञ्जकस्याहंकारादेराविद्यकत्वेन तथात्वाज्जाग्रदादावपि वस्तुतो मुक्तः शुद्धश्च भवत्येवात्मा सुषुप्तौ तु तत्प्रतिभासस्याभावान्नित्यमुक्तत्वादि तस्य नानुपपन्नमित्यभिप्रेत्याह । आसीदिति । आनीय मिथ्यैव प्रापय्य । तद्दुःखम् । सुषुप्तिकाले नेत्यत्र च हेतुर्बीजक्षयादिति, उपाधितयात्मनि दुःखप्रसञ्जकोऽहंकारस्तद्बीजं तत्क्षयादित्यर्थः । इतिहेतौ । अतिनिर्मलः नित्यशुद्धादिरूपः ॥ १२८ ॥

मू० ॥ सद्रूपमात्रगणनानुभवाद्भवाँस्तु-
मज्ञानमात्मविदिति नैशतमोवदेतत् ॥
ज्ञानं दिवाकरवदस्य जडप्रकाश-
रूपं निवर्तकमिति प्रवदन्ति धीराः ॥ १२९ ॥

टी० ॥ ननु किं तदात्मतमो यदहंकारादिकारणं स्यात्, अज्ञा-

नमेवेति चेच, स्वप्रकाशचिद्रूपात्मनि ज्ञानाभावरूपस्य तस्यासंभवात्, तस्याहंकारादिकारणत्वायोगाच्च, अनादिभावरूपं चाज्ञानं मानहीनम्, तस्य निवर्तकानिरूपणेनानिर्मोक्षप्रसङ्गश्चेति तत्राह । सद्रूपमिति । भावरूपमित्यर्थः । एतदज्ञानमात्मचिति आवरणतानुभवात्सद्रूपमिति संबन्धः । स्वप्रकाशात्मतत्त्वेऽद्वयातिशयानन्दब्रह्मणि तत्रास्ति न प्रकाशत इति विपरीतव्यवहारदर्शनेन तद्योग्यताकृपावरणप्रयोजकतयाऽहं ब्रह्म न जानामीत्यनुभूयमानाज्ञानमेव क्लृप्तम्, भगवता चोक्तम्, अज्ञानेनावृतं ज्ञानमिति, तच्च भावरूपम् आवरकत्वात् प्रसिद्धतमोवदित्यनुमानाद्भावरूपत्वसिद्धेस्तस्याहंकाराद्युपादानत्वे न काचिदनुपपत्तिः । नापि तन्निवर्तकानिरूपणम्, स्वरूपात्मकचित्प्रकाशस्योक्तावरणप्रतिबद्धस्यानिवर्तकत्वेऽपि महावाक्यजनितब्रह्मभावसाक्षात्काराद्दावरणनाशे प्रतिबन्धशून्यस्य तस्य दिवाकरवज्जडप्रकाशरूपवृत्तिसाक्षात्कारस्यैव वा तन्निवर्तकत्वोपपत्तेरित्यादि प्रागेवोपपादितं ततो न किं चिदवद्यमिति भावः ॥ १२९ ॥

मू० ॥ प्रावादुकैरपि तथैव तदेषितव्यं
संवेदनेऽस्फुरणमभ्युपयद्भिरग्रे ॥
संवेदने न खलु संविदभावरूप-
मज्ञानमभ्युपगतं न च बुद्ध्यभावः ॥ १३० ॥

टी० ॥ किं च स्वप्रकाशसंविद्वादिभिस्तदुत्पत्त्यादाङ्गीकुर्वद्भिस्तदुत्पत्तेः प्राक् तदस्फुरणरूपं तदज्ञानमङ्गीक्रियते तद्भावरूपमेव तैरवश्यमभ्युपेयं संविद्विषयस्य स्वप्रकाशस्य जडरूपस्य वा ज्ञानस्य तन्मतेऽभावेन तदभावरूपाज्ञानस्यासंभवात्, वस्तुतस्तेषां संविदुत्पत्त्यादिभ्रान्तिमूलतयापि तद्भावरभावरूपाज्ञानसिद्धिः, उक्तविधया तन्मते तत्र ज्ञानाभावरूपाज्ञानासंभवादित्याशयेनाह । प्रावादुकैरिति । अग्रे उत्पत्तेः प्राक् संवेदने अस्फुरणमुपयद्भिः प्रावादुकैरपि तदज्ञानं तथैव भावरूपमेवैषितव्यमिति संबन्धः । एवकारोक्ताभावरूपाज्ञानाभावे हेतुमाह । संवेदने न खल्विति । बुद्ध्यभावः संवेदने जडबुद्ध्यभावश्च नाभ्युपगत इति योजनीयम् ॥ १३० ॥

(शेषमग्रे)

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 363. Vol. IX.)

मू० द्वितीये देवदत्त इत्यस्यापदत्वप्रसङ्गः मध्यवर्त्तिनोऽभावेन मध्यवर्त्तिसहितविशेषणाभावात् * क्वचिन्मध्यवर्त्तिसहितस्य क्वचित्केवलस्येति यथासम्भवम्? *—इति चेन्न, एकानुगतरूपानभिधाने लक्षणस्याव्यापकतापत्तेर्दुर्निवारत्वात् किंच [a] देवदत्तास्त्वित्यपि पदं स्यात् * अथ अपशब्दोऽयं पदत्वे सति रुत्वादेर्विधानस्यावश्यम्भावित्वात्? *—इति चेन्न, [b] यत एवायमपशब्दः अत एव भवतो दोषः प्रसज्यते अपशब्देऽपि पदलक्षणं गतमिति तस्मात् पाणिनिनाचार्येण शब्दसिद्ध्यर्थं पद [c] सञ्ज्ञेयं रुत्वादिविध्यनुरोधेनापशब्ददशायामन्यैव कृता नदीसञ्ज्ञावन्न लौकिकपदव्यवहारसिद्ध्यर्थं साधुशब्दविशेषे ततश्च तत्वान्यदेव लक्षणं वाच्यम् अन्यथा(१) दाक्षीनन्दनोदीरितनदीसञ्ज्ञाप्रत्यभिज्ञायां पाथः प्रार्थयमानः(२) काननस्थलीमल्लिकाभिमानी भवानीहेत * अथोच्यते विभक्त्यन्तमेव [d] सर्वलक्षणप्रवृत्त्या निष्पन्नं व्यावहारिकं पदमिति पदलक्षणमस्तु * मैवं, [e] सर्वलक्षणवृत्तेः सर्वथा [f] सम्भवात् * सम्भवत्सर्वलक्षणप्रवृत्त्या? *—इति चेन्न, सम्भवत्वं तत्काले कालान्तरे वा विवक्षितं आद्ये देवदत्तावित्यपि पदं स्यात् रुत्वविधानकाले विसर्गस्याविहितत्वात् ॥

(१) पाणिन्युदीरितेत्यर्थः ।
(२) काननस्थलीमीहेतेति सम्बन्धः ।

टी० ॥ [a] "देवदत्तास्त्वित्यपी"ति । प्रथमान्तमिति शेषः ॥ [b] "यत एवे"ति । अलक्ष्ये लक्षणगमनस्य तथा निर्वाहादित्यर्थः ॥ [c] "इयमि"ति । सुप्तिङन्तं पदमिति सूत्रकृत्सं ज्ञेत्यर्थः ॥ [d] "सर्वलक्षणे"ति । व्याकरणानुशिष्टशबादिलक्षणप्रवृत्त्येत्यर्थः ॥ [e] "सर्वे"ति । शबादीनां श्यनादिस्थलेऽभावादित्यर्थः ॥ [f] "असम्भवादि"ति । दिवादित्वेन शबस्तत्रासम्भवादित्यर्थः देवदत्तर्विति प्रथमान्तदेवदत्तशब्दः सकाररुत्वविशिष्टः पदं स्यादित्यर्थः ॥

मू० देवदत्त इत्यपि पदं न स्यादित्यादिपदपूर्वकालभाविनो-य(१)त्वपलोपादेरकरणात् * शब्दान्तरसन्निधिव्यतिरेकेण यद्वाविलक्षणं तद्विवक्षितम्? *—इति चेन्न, [a] जीविकाकृत्य व्याचष्टे इत्यर्थं जीविकां कृत्वा व्याचष्टे इति प्रयुज्यमानं वाक्यं स्यात् एकार्थावच्छिन्नपदसमुदायत्वस्य तत्रापि गतत्वात्कृत्वेत्यनेन सम्बद्धस्य जीविकामित्यस्योक्तपदलक्षणेन सङ्गृहीतत्वात् * [b] यदुपाधिका यल्लक्षणप्रवृत्तिः तदुपाधिसम्पत्तौ तेन निष्पन्नं तथा? *—इति चेन्न, [c] यत्र नास्त्युपाधिसम्पत्तिः तत्र केवले तस्यां सत्यामित्यस्याभावात् अपदत्वापत्तेः * [d] यस्यामवस्थायां यस्य लक्षणस्योपनिपातस्तत्सर्वसम्पत्तौ विभक्त्यन्तं पदम्? *—इति चेन्न, यस्यामवस्थायामित्यवस्थानां भिन्नभिन्नाकारेण परामर्शे लक्षणस्याननुगमादव्यापकतादोषः [e] अवस्थानामैक्यं व्यविवक्षितम् [f] असम्भावितं च ॥

(१) भो भगो अपूर्वस्य योऽशि=लोपः शाकल्यस्येति सूत्राभ्यां प्राप्तस्य यत्वलोपादेरित्यर्थः ।

टी० ॥ [a]"जीविकाकृत्ये"ति । जीविकोपनिषदा चौपम्ये(१)इत्यनेन गतिसञ्ज्ञायां गतिसमासस्य नित्यत्वेन साधुत्वात्तत्पदद्वयात्मकं वाक्यं स्यात् नह्यत्र क्त्वास्थाने ल्यपो भावित्वमित्यर्थः ॥ ननु लक्षणस्य भावित्वं न विवक्षितं किन्तु निष्पन्नत्वमित्यत आह—। [b]"यदुपाधिकेति । यत्र नोपाधिमत्त्वं तत्र विशेषणाभावात् पदत्वं न स्यादित्याह—। [c]"यत्रे" ति । यच्छब्दार्थाननुगममाह—। [d]"यस्यामि"ति । ननु यस्यामित्येकीकृत्य सकलावस्थाभिधानान्नाननुगम इत्यत्राह—। [e]"अवस्थानामि"ति । अविवक्षितमेकत्र सर्वावस्थानामसम्भवात् ॥ [f]"असम्भावितमि"ति । बह्वीनामेकत्वासम्भवादित्यर्थः ॥

मू० [a]सर्वदा सर्वावस्थाविषये लक्षणप्रसङ्गादिति [b]स च भवतीति भवत्यस्तीति पटः पटाविति पटं पट इति चेत्यतिव्याप्तिः [c]एतेनापौरुषेयं वाक्यं तदित्यपि निरस्तं (२)का पुन(३)रर्थापत्तिरपि [d]*अन्यथानुपपत्तिः ?*—इति चेन्न, [e]यतोन्यत्वं तत्सिद्धेरग्रे तदसिद्धेः ॥

टी० ॥ ननु विवक्षायां को दोष इत्यत आह—। [a]"सर्वदे"ति । ननु कीदृशः प्रसङ्ग इत्यत आह—। [b]"स चे"ति । एकरूपत्वं यद्यवस्थैक्यं विवक्षितं तदा भवतीत्याख्यातस्य सम्बोधनस्य सप्तम्यन्तस्य च साधारणानि शत्रादिलक्षणानि स्युः एकार्थत्वं चेत्तदा भवत्यस्तीत्यत्र समानलक्षणत्वप्रसङ्गः समानविभक्तिकत्वं चेत्तदा पटः पटावित्यत्र प्रसङ्गः एकप्रातिपदिकत्वं चेत्तदा पटं पट इत्यत्र प्रसङ्गः(४)समानलक्षणत्वाभावात्तद्

(१) औपम्येऽर्थे गम्यमाने जीविकोपनिषदौ गतिसञ्ज्ञौस्त इति गतिसञ्ज्ञायां "कुगति प्रादयः" एते सामर्थ्येन नित्यं समस्यन्ते इति समासे च जाते समासेऽनञ्पूर्वे क्त्वो ल्यप्

(२) { व्यवस्थाप्याप्रमाणत्वं शब्दस्याखण्डयुक्तिभिः । खण्डनं क्रियते सम्यगर्थापत्तेरखण्डितम् ॥ }

(३, अर्थापत्तिरत्र—अर्थस्य आपत्तिर्यस्मादिति विग्रहेण प्रमाणमेव ग्राह्यं नत्वर्थस्य आपत्तिरिति विग्रहार्थापत्त्याख्यप्रमा प्रमाणखण्डनस्य प्रस्तुतत्वादिति भावः ।

(४) मूलेऽतिव्याप्तिशब्देन लक्षणव्याप्त्यभावरूपाऽव्याप्तिरेव ग्राह्येत्याह—अव्याप्तिरूपः प्रसङ्ग इति

घटितलक्षणविरहादव्याप्तिरूपः प्रसङ्ग इत्यर्थः मीमांसकमते वाक्यलक्षणं दूषयति—। [c]"एतेने"ति । वाक्यलक्षणदोषेण तद्घटकपदलक्षणदोषेण चेत्यर्थः नच शक्तत्वं पदत्वं शक्तेः पदार्थान्तरस्य सङ्केतस्य वा त्वत्सगोत्रकलहनिरस्तत्वात् अत एव न सङ्केतवद्वर्णत्वं पदत्वं नापि शाब्दानुभवाजन्यशाब्दानुभवजनकपदार्थोपस्थितिजनकतावच्छेदकरूपवत्त्वं पदत्वं प्रथमं जनकत्वस्य दुर्वहत्वमिति भावः ॥ [d]"अन्यथे"ति । जीविगृहासत्त्वस्य बहिः सत्त्वमन्तरेणानुपपत्तिरर्थापत्तिरित्यर्थः ॥ [e]"यत"इति । बहिः सत्त्वादन्येन प्रकारेण जीविगृहासत्त्वमनुपपन्नमिति ज्ञानेऽपि प्रथमत एव फलसिद्धेस्तस्यार्थापत्तेः प्रमाणस्य फलासिद्धेरित्यर्थः । अन्यत्वप्रतियोगिनो बहिः सत्त्वस्यात एव ज्ञानं चेत्किमर्थापत्त्येति फलितार्थः अज्ञातायाएवार्थापत्तेः करणत्वेऽर्थापत्त्याभासानुपपत्तिरिति भावः ॥

मू० *[a]सिद्धेनानुपपत्तिः?*—इति चेन्न, [b]विशेषणव्यवच्छेद्याप्रतीतौ तद्वैयर्थ्येन [c]तदनुपादाने सर्वथानुपपत्त्यर्थतायां फलविरोधात् [d]केनाप्यनुपपत्त्यर्थत्वे साध्यसिद्ध्यपर्यवसानात् *[e](१)प्रमाणयोर्विरोधानुपपत्तिः?*—इति चेन्न,

टी० ॥ ननु देवदत्तीयबहिः सत्त्वज्ञानमर्थापत्तिफलं बहिः सत्त्वसामान्यप्रतियोगिकान्यथानुपपत्तिश्च करणं सामान्यं च सिद्धमेवेति शङ्कते—[a]"सिद्धेने"ति । सिद्धमादायानुपपत्तिज्ञानं करणमित्यर्थः सिद्धे बहिःसत्त्वसामान्येनुपपत्तिर्नास्तीत्यन्ये सिद्धेनेत्यसिद्धदेवदत्तीयबहिःसत्त्वव्यवच्छेदार्थं विशेषणं तद्यदि व्यवच्छेद्यं प्रसिद्धं तदा पूर्वदोषः अथ न प्रसिद्धं तदा विशेषणवैयर्थ्यमिति परिहरति—। [b]"विशेषणे"ति । नन्वनुपपत्तिमात्रं करणं नत्वन्यथानुपपत्तिर्येन प्रतियोग्यनिरूपणं दोषः स्यादित्यत आह—। [c]"तदनुपादाने"इति । यदि जीविगृहासत्त्वस्य सर्वथैवानुपपत्तिस्तदापपा-

(१) अन्योन्यं विरुद्धयोर्गृहासत्त्वसत्त्वयोः प्रमाणयोर्यदवच्छेदानवच्छिन्नयोर्नास्ति विरोधोभिन्नविषयत्वादवच्छिन्नयोरनवच्छिन्नयोश्चैवास्ति विरोधस्समान विषयत्वादिति प्रतिनियमेनाविरोधव्यवस्थापनं तदर्थापत्तिरिति पूर्वपक्षिणोभिप्रायः ।

दकल्पनानवकाश इत्यर्थः ॥ ननु सर्वथानुपपत्तिर्न विवक्षिता किन्तु केनचिद्विनानुपपत्तिस्तथाच नोपपादककल्पनानवकाश इत्यत आह—। [d]“केनापी”ति । एवं सति देवदत्तीयबहिःसत्त्वसिद्धिर्न पर्यवस्येत्तेन विनानुपपत्तेरज्ञानादित्यर्थः ॥ ननु जीवी क्वचिदस्तीति सामान्यतो दृष्टस्य गेहमपि क्वचित्त्वेन विषयीकुर्वतो जीवो देवदत्तो गृहे नास्तीति प्रत्यक्षेण विरोधज्ञानाद्बहिः सत्त्वकल्पनार्थापत्तिफलमिति शङ्कते—। [e]“प्रमाणयोरि”ति ॥

मू० [a](1)असिद्धत्वात् * प्रमाणत्वे(2)नाभिमन्यमानयोः ? *—इति चेन्न, अभिमतेऽप्रमार्थत्वेऽतिप्रसङ्गात् ज्ञानार्थत्वे(3)-प्युक्तदोषानिवृत्तिरेव अनिर्णीयमानप्रामाण्याप्रामाण्ययोरित्यत्रापि तथैव [b]तथाहि सत्प्रतिपक्षेऽपि तस्य तदुपपादकप्रमाफलकत्वापत्तेः * [c]तत्र विरोधे व्यावृत्त्यैकाप्रामाण्यनिश्चयो यत्र तु नैवं तद्विवक्षितम् ? *—इति चेन्न, एवं [d]सत्प्रतिपक्षवदत्रापि विरोधार्थत्व (4)नैवाभासत्वाविशेषात् * [e]तर्कयोर्विरोधोपेक्षित *[f]इति चेन्न,

टी० ॥ परिहरति—। [a]“असिद्धत्वादि”ति । वस्तुगत्या प्रमाणयो(5)र्विरोध एव नास्ति किं कल्प्यं भवेदित्यर्थः । उक्तदोषोऽतिप्रसङ्ग एव ॥ [b]“तथैवे”ति । अतिप्रसङ्ग एवेत्यर्थः उक्तमतिप्रसङ्गं स्फुटयति—। [c]“तथाही”ति । सत्प्रतिपक्षस्थलेऽपि प्रमाणत्वाभिमतयोरविरोधाय किञ्चित्कल्प्यं

(१) असिद्धत्वादित्यतः प्राग्वस्तुगत्या प्रमाणयोर्विरोधश्चेत्यपि पूरणीयम्—अयम्भावः । न हि वस्तुगत्यास्ति प्रमाणयोर्गृहासत्त्वसत्त्वयोः कश्चिद्विरोधो येन विषयप्रतिनियमतोऽविरोधः प्रसाध्येत न हि विरुद्धयोरविरोधस्सम्भवति विरुद्धे चेत्स्यातां गृहासत्त्वासत्त्वे न तयोरविरोध उपपद्येत भवेच्चेद्धि विरुद्धयोर्घट तदभावविषयकयोर्बाधयोरविरोधस्सम्पद्यते तस्माच्च विरुद्धे गृहासत्त्वसत्त्वे इत्यवश्यमभ्युपगन्तव्यमिति नाविरोधाय तदन्यथार्थापत्तिः ।

(२) विरोधिप्रमाणत्वेनेत्यर्थः ।

(३) ज्ञानं चात्र यथार्थं ग्राह्यम् ।

(४) “विरुद्धार्थत्वे”—इत्यपि क्वचित्पाठः ।

(५) एकविषयप्रमाणयोरित्यर्थः ।

स्याच्च च तथोपेयत इत्यर्थः ॥ नन्वेकधर्मिकविरुद्धार्थोपस्थापकयोः सत्प्रतिपक्षयोरन्यतरदप्रमाणमिति यथा निश्चयो न तथाऽर्थापत्तौ तत्र विषयसङ्कोचेन सामान्यतो दृष्टस्यापि प्रमाण्यसम्भवाच्च व्याघात इति शङ्कते—। [d]"तत्रे"ति । विरोधे इति सति सप्तमी व्याहतिरेकधर्मिकविरुद्धार्थोपस्थापकता तथाभासत्वमित्यर्थः यथा तत्राभासत्वादेव न विरोधबलात्कल्पनान्तरं तथार्थापत्तावपि कल्पनान्तरमनवकाशमेवेति परिहरति—। [e]"सत्प्रतिपक्षवदि"ति ॥ ननु यत्रैकविषयप्रमाणयोर्न विरोधस्तदा तर्कयोरेव विरोधः कथं स्यादित्याह—। [f]"तर्कयोरि"ति । ज्योतिःशास्त्राच्चिरजीवित्वे गृहीते जीविदेवदत्तो यदि क्वचिन्न स्यात्तर्हि जीवी न स्यात् यदि जीवी देवदत्तो बहिर्न स्यात्तदा गेहनिष्ठात्यन्ताभावप्रतियोगी नस्यादित्यनयोः क्वचित्त्वेनगृहसत्त्वविषयकगृहासत्त्वविषयकयोर्विरोधः करणमित्यर्थः ॥

मू० [a]मिथोविरोधे तर्कयोरप्याभासत्वात् * [b]विशेषप्रवृत्तप्रमाणार्थप्रतिक्षेपविषयत्वसंशयोऽविशेषप्रवृत्ततद्विपरीतार्थप्रमाणस्य स([1])? *—इति चेन्न, [c]विशेषविषयप्रमाणबोधितवैपरीत्ये सति तद्विरुद्धार्थांशे संशयस्य दुर्बलस्यानवकाशत्वेनाविशेषप्रवृत्तप्रमाणविषयतां तदीयां([2])गोचरयितुमप्यसामर्थ्यादेव * [d]अविशेषप्रवृत्तप्रमाणस्य तद्विपरीतार्थविशेषविषयप्रमाणदर्शनं तदितरविशेषविषयप्रमाफलकं तथा? *—इति चेन्न,

टी० ॥ [a]"मिथ"इति । यथा प्रमाणयोर्न विरोधस्तथा तर्कयोरपि प्रकृते मिथोविरोधेन द्वयोस्तर्काभासत्वादित्यर्थः ॥ [b]"([3])विशेषे"ति । गेहे नास्तीति प्रत्यक्षानन्तरं जीवी क्वचिदस्तीति पूर्वप्रवृत्तसामान्य-

(१) स=विरोध इत्यर्थः ।
(२) तदीयाम्=विरुद्धार्थांशीयाम् ।
(३) पुनरपि प्रमापक्षमवलम्ब्य शङ्कते-विशेषेतीति-

Digitized by Google

तोदृष्टस्य प्रमाणस्य गृहसत्त्वमपि विषयो न वेति संशय एव विरोधोऽभिमत स च बहिरस्तीति प्रमाफलक इति शङ्कार्थः· विशेषप्रवृत्तं प्रमाणं गेहासत्त्वग्राहि प्रत्यक्षं तदर्थो गेहासत्त्वं तत्प्रतिक्षेपो गृहसत्त्वं तद्विषयसंशयस्य विरोधः कस्ये(१)त्यपेक्षायामविशेषप्रवृत्ततद्विपरीतार्थग्राहिप्रमाणस्येति योजना ॥ [c] "विशेषे"ति। गेहे नास्तीति विशेषदर्शनानन्तरं सामान्यतो दृष्टस्य गृहसत्त्वविषयया संशय एव नावतरति दूरे तेन बहिः सत्त्वप्रमाजननमिति परिहारार्थः गृहे सत्त्वग्राहिणः सामान्यतोदृष्टस्य विपरीतार्थोपस्थापकं गृहासत्त्वग्राहिप्रत्यक्षमिति ज्ञानमेव देवदत्तीयबहिः सत्त्वप्रमाफलकमिति शङ्कते–। [d] "अविशेषप्रवृत्ते"ति

मू० [a] "अविशेषप्रवृत्तस्य प्रमाणस्य तद्विपरीतार्थे विशेषविषयस्य च प्रमाणस्य विषययोस्तद्विपरीतत्वविशेषणप्रतीत्यङ्गीकारवश्यायां परस्परविरुद्धत्वप्रतीतौ धर्मिणोर्विरुद्धधर्माध्यासस्य भेदस्य विरोधविवेचनस्फुटतद्गर्भप्रवेशतया तत्सहज्ञेयस्य तन्नान्तरीयकस्य वान्यथैवान्यत एव प्राप्तेः ॥

टी० ॥ प्रमाणयोर्विपरीतार्थत्वज्ञानं तदुभयविषयसत्त्वासत्त्वविरोधगर्भं विरोधश्च सत्त्वासत्त्वयोरेकधर्म्यसमावेश इति विरोधसहज्ञेय एव धर्मिभेदः सत्त्वासत्त्वे भिन्नधर्मिके विरुद्धत्वादित्यनुमानसाध्यो वेति नार्थापत्तेरवकाश इति परिहरति–। [a] "अविशेषे"ति । यद्यपि सत्त्वासत्त्वयोर्धर्मिभेदमात्रसिद्धिरेवं स्यान्नतु सत्त्वस्य बहिर्धर्मिकत्व सिद्धिरपि तथाप्यसत्त्वस्य गृहधर्मिकत्वे प्रमीयमाणे धर्मिभेदकल्पना सत्त्वस्य बहिर्धर्मिकत्वपर्यवसन्नेवेति भावः । विरोधविवेचनमेकधर्म्यसमावेशप्रतिसन्धानं तद्गर्भप्रवेशो धर्मिभेदस्य तत्प्रतिसन्धानविषयत्वं तन्नान्तरीयकत्वं विरुद्धत्वस्य भिन्नधर्मिकत्वव्याप्यत्वं विरुद्धधर्माध्यासस्यैव भेदत्वे तत्सहज्ञेयत्वं भेदहेतुत्वे तु तन्नान्तरीयकत्वमुक्तमयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यस्तत्वमित्याचार्याः ॥

(१) कस्येति, किं निष्ठतया विषयत्वसंशय इत्यपेक्षायामित्यर्थः । यद्वा, किं प्रतियोगिकः स विरोध इत्यर्थः ।

मू० [a] किंच(१) अविशेषप्रवृत्तस्यैव तस्य किं विशेषविषयत्वम् १
(२) अथ सामान्यतः प्रवृत्तस्य नान्तरीयकतया प्रागेव वि-
शेषविषयस्य विशेषविषयत्वेनाज्ञातस्य विशेषविषयत्वम्—२
(३) अथ सामान्यस्य तद्विषयस्य विशेषः ३ (४) उत तद्विषयी-
कृतविशेषगतं किमपि धर्मान्तरमिदानीं प्रतीयते ४ (५) ना-
द्यः [b] अर्थापत्तेर्भ्रमकरणत्वापत्ते न द्वितीयः तद [c] नुव्यवसा-
योत्पत्तेस्तद्विषया प्रतीत्यसंभवात् (६) न तृतीयः [d] सामान्य-
स्यानन्तर्भाविताश्रयस्य प्रत्येतुमशक्यत्वात् प्रागेव तत्सिद्धेः।

टी० ॥ [a] "किं चे"ति । क्वचिदस्तीति सामान्यतो दृष्टस्य सामान्य-
मात्रविषयस्य बहिः सत्त्वविषयत्वज्ञानमर्थापत्तिफलमिति प्रथमविकल्पा-
र्थः । सामान्यविषयत्वेन विशेषविषयतया नियतस्य सामान्यतो दृष्टस्य
विशेषविषयत्वज्ञानमर्थापत्तिफलमिति द्वितीयविकल्पार्थः । सामान्यविष-
यत्वेनाविशेषाद्विशेषद्वयं(७) विषयस्यापि प्रमाणस्य बहिः सत्त्वमात्रविशे-
षविषयत्वज्ञानं फलमिति तृतीयविकल्पार्थः । प्रथमतो ज्ञायमानस्यैव
बहिः सत्त्वादिलक्षणविशेषस्य प्रतीयमानविरोधिव्यतिरिक्तत्वादिधर्मज्ञानं

---

(१) जीवति देवदत्त इत्यविशेष प्रवृत्तप्रमाणस्य बहिर्भावविशेषरूपविशेषविष-
यत्वं प्रमीयत इति प्रथमविकल्पार्थः ।

(२) प्रमाणस्य सामान्यतः प्रवृत्तत्वं तदपर्यवसानेनार्थापत्तेः प्रागेव विशेषविष-
यस्य सतो विशेषविशेषत्वेनाज्ञातस्य विशेषविषयत्वमिदानीं प्रमीयत इति द्वितीयार्थः ।

(३) जीवतिदेवदत्तइति प्रमाणविषयस्य सत्त्वमात्रस्य बहिर्देशत्वादिविशेष इ-
दानीं प्रमीयत इति तृतीयार्थः ।

(४) सामान्यप्रमाणविषयीकृते विशेषे किमपि धर्मान्तरमिदानीं प्रमीयत इति
तुरीयार्थः ।

(५) पूर्वन्तु विकल्पद्वयं प्रमाणाश्रयपरं प्रमेयाश्रयविकल्पक्रमेणनिराकरोति—ने-
ति=इति विद्यासागराः । विद्यासागराचार्याणामयमाशयः । नाद्य इत्यादिमूलेन न मूलो-
क्तप्रथमविकल्पस्य निरासः नापि न द्वितीय इत्यादि मूलेन मौलद्वितीयविकल्पनिरासो-
ऽपि तु नाद्य इत्यादिना मूलेन न द्वितीय इत्यादिना मूलेन च तृतीय चतुर्थयोः । न
तृतीयः । नापि चतुर्थः । इत्यादिना द्वितीयप्रथमयोर्निरास इति—

(६) तथानुव्यवसायेन तत्सिद्धेर्निरर्थार्थापत्तिरिति भावः ।

(७) विशेषद्वयं तु बहिः सत्त्वं गृहसत्त्वं च ।

फलमिति चतुर्थविकल्पार्थः ॥ [b] "अर्थापत्तेरि"ति । सामान्यमात्रविषयस्य विशेषविषयत्वज्ञानं भ्रम इत्यर्थापत्तेर्भ्रमकरणत्वापत्तिरित्यर्थः ॥ [c] "अनुव्यवसाये"ति । विशेषविषयं सामान्यतोदृष्टमनुव्यवसीयमानं विशेषविषयत्वेनाप्यनुव्यवसीयत एवेत्यनुव्यवसायेनैव फलसिद्धावर्थापत्तेरनुवादकत्वापत्तिरित्यर्थः ॥ [d] "सामान्यस्ये"ति । अभिमतविशेषस्यापि सामान्यविषयप्रमाणादेव सिद्धेरनुवादकत्वापत्तिरेवार्थापत्तेरित्यर्थः ॥

मू० नापि चतुर्थः [a] तत्सिद्धप्रतीयमानविरोधिव्यतिरिक्तत्वमन्यद्वा स्यात् नान्त्यः [b] तत्प्रतीतौ सामर्थ्यानुपदर्शनेनानियमप्रसङ्गात् न प्रथमः [c] अनुगताननुगतजातिव्यक्तिचाक्षुषाचाक्षुषादिव्यक्तिगन्धादितादात्म्यवादिनये तदुभयप्रमातादात्म्यविषयताव्युदासं विना विरोधासिद्धौ तन्नमनिका वक्तस्यैवासिद्धेः [d] तदुभयप्रतीतौ च तदवधारणे प्रागेव तत्प्रतीत्यार्थापत्त्यनुवादतापत्तेः ॥

टी० ॥ [a] "तदि"ति । सामान्यतो दृष्टस्य क्वचित्कत्वेन गृहबहिःसत्त्वविषयस्य [1]) गृहसत्त्वांशे प्रतीयमानो विरोधी गृहासत्त्वलक्षणः प्रत्यक्षेण तद्व्यतिरिक्तत्वं बहिः सत्त्वांशस्येत्यर्थः ॥ [b] "तत्प्रतीतावि"ति । अन्यत्वेनोक्तधर्मस्य विशेषापरिचयात्तत्र सामर्थ्यानुपदर्शनादित्यर्थः ॥ [c] "अनुगताननुगते"ति । गृहासत्त्वविरोधि गृहसत्त्वं तदा स्याद्यदि सत्त्वासत्त्वे विरुद्धे स्यातां तदेव तु नास्ति यतो द्वयोरपि धर्मयोर्भेदस्यार्थापत्तिवादिनो मतेऽधिकरणतादात्म्यन्तथाच विरोधासिद्धौ प्रतीयमानविरोधिव्यतिरिक्तत्वमेवानुपपन्नं किमर्थापत्त्या विषयीक्रियेतेत्यर्थः विरुद्धतादात्म्यप्रतिपादनायानुगताननुगतेत्यादि प्रमायास्तादात्म्यविषयता प्रमातादात्म्यविषयता तस्या व्युदासं विनेत्यर्थः ननु सत्त्वासत्त्वयोः प्रमायास्तदुभयाधिकरणतादात्म्यविषयताव्युदासेनास्तु विरोध एवानयोरित्यत आह—।

(१) गृहे बहिश्चेत्युभयत्रापि यत्सत्त्वं तद्विषयस्येत्यर्थः ।

Digitized by Google

[d] "तदुभये"ति । एवं सति सत्त्वासत्त्वयोर्विरोधज्ञानसहकृतैव एव धर्मिभेद इति पूर्वोक्तन्यायेनार्थापत्तिफलस्य पूर्वमेव सिद्धावर्थापत्तेरनुवादकत्वेन भट्टमते अगृहीतग्राहित्वं प्रामाण्यं न स्यादित्यर्थः ।

मू० [a] (१) योग्यानुपलम्भोऽभावप्रमाकरण(२) मित्यप्ययुक्तम् (३) प्रमाणाभावस्य तथात्वे [b] विभ्रमानुदयप्रसङ्गात् [c] उपलम्भाभावमात्रस्य तथात्वे शङ्खधवलिमप्रतिसन्धानवतः पीतभ्रमानुदयप्रसङ्गात् [d] * कालभेदात्तत्राविरोध? *—इति चेन्न, [e] तथापि संसृष्टयोरन्योन्याभावाग्रहणप्रसङ्गात् ॥

टी० ॥ भट्टस्य योग्यानुपलब्धिं प्रमाणं खण्डयति—। [a] "योग्ये"ति । अनुपलब्धिरुपलब्ध्यभावस्तत्रोपलब्धिः प्रमा वा विवक्षिता ज्ञानमात्रं वा आद्ये आह—। [b] "भ्रमे"ति । प्रमाया अभावो यद्यनुपलब्धिस्तदा शुक्तौ रजतत्वाभावप्रमैव स्यान्न तु रजतभ्रम इत्यर्थः तत्पूर्वं रजतप्रमाया अभावेनानुपलब्धिसत्त्वादित्यर्थः दोषाद्भावप्रमाप्रतिबन्ध इति न वाच्यं दोषस्य विकल्प्यनिरस्तत्वात् अन्त्ये आह—। [c] "उपलम्भे"ति । श्वेतः शङ्ख इति ज्ञानतः पित्तदूषितनेत्रस्य पीतभ्रम एवं सति न स्यात्पीतानुपलम्भात् पीताभावप्रमाप्रसङ्गादित्यर्थः ननु धवलिमप्रतिसन्धानं स्वकाले विरोधितया पीतिमज्ञानं प्रतिबध्नातु तदुत्तरक्षणे तु पीतिमोपलम्भसत्त्वात् न पीताभावप्रमा येन पीतभ्रमानुदय इति शङ्कते—। [d] "काले"ति । यद्यपि पीतभ्रमात्पूर्वं पीतोपलम्भ उपलम्भबाधित इतिशङ्केयमनुपपन्ना तथाप्यभ्यु-

(१) { अर्थापत्तिं तिरस्कृत्य विद्योपर्ध्वो क्रियतेऽधुना । योग्योपलम्भविरहः प्रमाणं भट्टसम्मतम् ॥ }

(२) योग्यत्वे सत्यनुपलम्भोऽभावरूपप्रमाकरणमित्यर्थः। योग्यत्वं चात्र प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपम्—विद्यासागरास्तु—योग्यत्वं च प्रतियोगिनि तत्सविन्द्रियसन्निकर्षातिरिक्तप्रतियोगिप्रमापकसामग्र्यन्वयमनस्समाधानादि दृष्टसामग्रीसम्पत्तिस्तस्यां सत्यां प्रतियोग्यनुपलम्भस्तदभावप्रमां कुर्वन्नभावप्रमाणमुच्यत इति वदन्ति—

(३) अनुपलम्भ इत्यत्र प्रमाणभूतोपलम्भाभावस्य विवक्षितत्वे—इत्यर्थः ।

पेत्य परिहरति—। [e]"तथापी"ति । संसृष्टयोरिन्द्रियसन्निकृष्टयोर्घटपटयोरन्योन्याभावग्रहो न स्यात्तदुभयोपलम्भेन योग्यानुपलम्भस्याभावप्रमाकरणस्याभावादित्यर्थः ॥

मू० [a]तादात्म्यस्य स्वरूपमात्रानतिरेकात् [b]अभावस्फुरणे च तत्प्रतिभानस्य ध्रौव्यात् [c]किं च योग्यता हि * तत्तदविनाभूतान्यप्रतियोगिप्रमापकसाकल्यमिष्यते [d]तथा सति यत्र भावोपलम्भस्तत्राप्यभावप्रमा स्यात् [e]नहि तत्र हेतुव्यतिरेकेणैव वा [f]सत्येव वा तत्र भावप्रमोत्पद्यते तत्तदविनाभूतविरहसन्निधिः स यथा? *—इति चेन्न,

टी० ॥ ननु घटपटतादात्म्यं तत्र प्रतियोगि न तु घटपटावेव तच्चानुपलब्धमेवेत्यत आह—। [a]"तादात्म्यस्ये"ति । तदुभयतादात्म्यस्याप्रतीकत्वेन तदुभयस्वरूपमेव तादात्म्यं वाच्यमित्यर्थः तादात्म्यस्वरूपेण तथाप्यनुपलम्भ एवेत्याशङ्क्याह—। [b]"अभावस्फुरणे"इति । घटपटात्मा न भवतीत्यत्र तादात्म्यज्ञानस्यापि सम्भवादित्यर्थः यद्वा सर्वत्राभावज्ञाने प्रतियोगिज्ञानध्रौव्यादनुपलब्धिस्स्वरूपं क्वापि नास्तीत्यर्थः ॥ [c]"किं चे"ति । स प्रतियोगी तदविनाभूत इन्द्रियसन्निकर्षादिस्तदितरव्यत्प्रतियोगिप्रमापकं तत्साकल्यमित्यर्थः । [d]"तथा सती"ति । घटप्रमा यत्र तत्रापि तस्यैव घटतज्ज्ञाप्यतद्विषयावद्घटप्रमापकसाकल्यं घटानुपलब्धिश्चास्तीति घटाभावप्रमैव स्यादित्यर्थः तदानीं तत्प्रमापकसाकल्ये हेतुमाह—। [e]"नही"ति । अनुपलब्धिसत्त्वे हेतुमाह—। [f]"सत्येवे"ति । नहि सतीविद्यमानैव प्रमा जायते येन घट प्रमोत्पत्तेः प्राक्तत्प्रागभावरूपाप्यनुपलब्धिर्न स्यादित्यर्थः ॥ [g]"तत्तदि"ति । प्रतियोगितज्ज्ञाप्ययोरप्यभावो योग्यानुपलम्भसहकारी प्रकृते च स नास्तीति नाभाव प्रमेति शङ्कार्थः सोऽनुपलम्भः ।

मू० [a]तदविनाभूतव्यतिरेकस्य तद्व्यतिरेकेणैवान्यथासिद्धसन्निधेरपि हेतुताङ्गीकारे प्रमाणाभावात् [b]अत एवालोकस्या-

ध्यक्षत्वे आलोकान्तरवत्ताऽवयवेनावयविना वा ऽऽलोके-
नान्यथा सिद्धसन्निधिरहेतुरित्यालोकाभावग्रहे सा ना-
पेक्षते अर्थान्वयोगस्तु नार्थे व्याप्तोऽप्रत ऐक्यात् ।

टी० ॥ [a] "तदविनाभूते"ति । प्रतियोग्यन्वयव्यतिरेकगर्भत्वात्त-
द्व्याप्यान्वयव्यतिरेकयोर्दृष्टत्ववदन्यथासिद्धस्तद्व्याप्यविरह इति परिहारा-
र्थः ॥ [b] "अत एवे"ति । आलोकावयवावयविनोः प्रत्यक्षतायामन्योन्य
सहकारिता यथारभ्यारम्भकभावसिद्धसन्निधितयाऽन्यथासिद्धतया नेष्यते
तथा प्रकृतेपीत्यर्थः ॥ ननु यथा प्रतियोग्यभावव्यापकस्तद्व्याप्याभाव इत्य-
न्यथा सिद्धस्तथेन्द्रियसन्निकर्षव्यापको घटादिरर्थ इति साक्षात्कारे सोऽप्यन्य-
थासिद्धः स्यादित्यत आह—। [c] "अर्थान्वयोग"इति । अर्थावसन्निकर्षस्या-
र्थघटितस्वरूपत्वादैक्यादिह व्याप्तिरेव नास्तीति न प्रतिबन्धिरित्यर्थः
यत्र घटः प्रतियोगी नास्ति तत्र तत्प्रमापकसाकल्यमपि नास्ति घटे-
न्द्रियसन्निकर्षस्येव तत्प्रमापकस्याभावात् * न च प्रतियोगितद्व्याप्यभिन्नत्वेन
विशेषणात्तदसत्त्वं न दोषायेति वाच्यं * तत्सन्निकर्षस्यतद्घटितत्वेनाभेदेन
तदव्याप्यत्वादिति स्वतन्त्रमेवेतद्दूषणमिति ध्येयं ।

मू० * [a] तद्विरहविरहतः स तथा? *—इति चेन्न, [b] इन्द्रियस-
न्निकर्षस्य हि प्रतियोग्युपलम्भे तावद्धेतुताङ्गीक्रियते तच्च
किं सन्निकर्षव्यतिरेके कार्यानुदयोदाहरणमेष्टव्यं न वा
न यदि तदा सन्निकर्षस्य हेतुतैव कुतो तन्नाद्या अन्य-
थैव कार्योत्पत्त्युपपत्तेः एष्टव्यं चेत्तर्हि [c] 'तच्चैवोदाहरणे
व्यवधायकेनेन्द्रियसन्निकर्षशून्ये परमार्थतस्वाभाववत्युक्त-
कारणसम्पत्तेरभावप्रमा स्यात् * [d] तच्च व्यवधायकाभावः
प्रतियोग्युपलम्भको नास्ति? *—इति चेन्न, [e] सन्निकर्ष-
व्यतिरेकस्य प्रमाव्यतिरेकप्रयोजकत्वावधारणोदाहरण-

Digitized by Google

मेव तर्हि तत्र स्यात् व्यवधायकस्य सन्निकर्षविरोधेनैव प्रमाविरोधित्वमिति चेत्तर्हि व्यवधायकाभावः सन्निकर्षोत्पत्तौ कारणं न त्वभावप्रमाविशेषोत्पत्ताविति स्थिते [f]स प्रसङ्गस्तदवस्थ एव ।

टी० ॥ [a]"तद्विरहे"ति । प्रतियोगिविरहः प्रतियोग्युपलम्भकयावत्समवधानं चाभावप्रमाकारणमतो न प्रतियोगिप्रमास्थले तदभावप्रमाप्रसङ्ग इत्यर्थः प्रतियोगिविरहसहकृतापी त्वदुक्तसामग्री क्वचिदभावग्राहिकेति व्यभिचारमुपदर्शयितुं पीठमारचयति—। [b]"इन्द्रिये"ति । व्यभिचारमाह—। [c]"तत्रैवोदाहरण"इति । यत्र कुड्यादिव्यवहितो घटाभावो न गृह्यते तत्र घटतद्व्याप्यभिन्नघटोपलम्भकसाकल्यं घटाभावश्चास्तीति घटाभाव प्रमा स्यादित्यर्थः कुड्यादेर्व्यवधायकस्याभावः प्रतियोगिप्रमापकः प्रकृते स नास्तीति शङ्कते—। [d]"तत्रे"ति तर्हि व्यवधायकाभावादेव तत्र कार्याभावो ननु सन्निकर्षाभावप्रयुक्त इति तत्सन्निकर्षस्य कारणतैव न स्यादिति परिहरति—। [e]"सन्निकर्षे"ति ॥ [f]"स प्रसङ्ग"इति । व्यवहिताभावग्रहप्रसङ्ग इत्यर्थः ।

मू० * [a]नच सन्निकर्षाभावादेव तदानीमुक्तसारणासम्पत्तिः * प्रतियोगिसन्निकर्षस्याभावप्रमोत्पादकत्वे नित्यं तदनुत्पत्त्यापत्तेः [b]अत एव नाव्यवधानमधिकं कारणमेष्टव्यं [c]इन्द्रियसन्निकर्षे एव तदुपपत्तेः [d]नचाश्रयसाक्षात्कारोपि प्राङ्नास्तितायहादौ व्यभिचारात् * [e]ननु व्यवधायकसद्भावे यत्र परमार्थतोऽप्यभावस्तत्रोक्तकारणादभावावधारणमस्त्येव को विरोधः न तावद्व्यवयोगिन्यपि तावता तद्विरहप्रमा प्रसज्येत(१)* । (शेषमग्रे)

(१) प्रसज्येतेत्यस्यानन्तरभावविरहस्य तत्राभावादितिपूरणीयम् ।

॥ श्रीः ॥

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(Continued from page 374. Vol. IX.)

"एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत" इत्यत्र तिष्ठतिधातूक्तस्थितेः प्रशासनेन धारकाधीनत्वावगमादन्तः प्रविष्टः शास्ता जनानामिति धारणहेतुभूतप्रशासनस्यान्तः प्रविश्य क्रियमाणत्वश्रवणात्तद्यथा "अरेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः" "मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवे"ति श्रुतिस्मृतिभ्यामरनाभिमणिगणसूत्रदृष्टान्ताभ्यामन्तः स्थितस्य धारकत्वावगमा"त्तत्सृष्ट्वा तदेवानुप्राविश"दित्युक्तानुप्रवेशस्य सृष्ट्यनन्तरभावित्वात् उदाहृतश्रुत्येकार्थ्याच्च स्थित्यर्थत्वात्सप्त प्राणाः प्रभवन्तीत्यादिवाक्योक्तप्रक्रियया सृष्टस्य जगत"स्तेनेदं पूर्णं पुरुषेण सर्व"मिति वाक्येन स्थितिवेलायां व्यापकेन परमपुरुषेण पूर्णत्वावगमात् सर्वशाखाप्रत्ययन्यायेन व्यापननियमनधारणेष्वन्यतमोक्तावन्यतमस्य सिद्धत्वाच्चानुप्रविश्य प्रशासनेन धारकत्वं स्थितिहेतुत्वमिति ह्यवगम्यते एवं तज्जलानिति वाक्यमुपजीव्योक्तं जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया चेति तदन्तर्यामिकत्वमुभयलिङ्गस्य ब्रह्मणः परमार्थजगदुपादानत्वान्यथानुपपत्तिसिद्धं घटकश्रुतिसिद्धं च, च-शब्दस्योत्तरत्रान्वयः तदन्तर्यामिकतया तदात्मकत्वेन चेति स आत्मा यस्य तत्तदात्मकं तदन्तर्यामिकत्वरूपेण तदात्मकत्वेनेत्यर्थः अन्तः प्रविश्य नियन्ता ह्यात्मा ब्रह्मकार्यतया तदन्तर्यामिकतया तदात्मकत्वेन चेत्युक्ते हेतुत्रयशङ्का स्यादिति तद्व्युदासार्थश्चशब्दस्य प्राक्प्रयोगः । एवमुभयविधेयस्य विहितत्वादित्यर्थः ।

ननु ऐक्यस्य कार्यकारणभावनिबन्धनत्वे कार्यावस्थजगद्विशिष्टस्य कारणावस्थचिदचिद्विशिष्टब्रह्मणा स्वरूपैक्यं युक्तं तदन्तर्यामित्वनिबन्धनत्वे तु न ब्रह्मणा जगत ऐक्यं, किंतु प्रकारिणो ब्रह्मण एकत्वसंख्यान्वय एवेत्यैक्यशब्दस्यार्थभेदः स्यात् ततश्च जगतस्तदात्मकत्वेनैक्यादिति वक्तुमयुक्तं प्रकारप्रकारिणोर्जगद्ब्रह्मणोर्भिन्नत्वात् । नैवं जगद्ब्रह्मणोर्भिन्नत्वेऽप्यत्र जगच्छब्दो जगद्विशिष्टब्रह्मपर इत्युक्तत्वादैक्यशब्दस्य च नार्थभेदः, उभयथाऽपि विशेष्यैक्यपरत्वात् तथा हि कार्यकारणभावनिबन्धनमैक्यं नामावस्थाद्वयापन्नचिदचिद्विशिष्टवस्त्वैक्यं यथा रूपस्पर्शादिविशिष्टघटस्य तादृशमृद्द्रव्येणैक्यं तथा चिदचिदात्मकजगद्विशिष्टस्य स्वरूपेण गुणैश्च निरतिशयबृहत्त्वविशिष्टस्य चैक्यं प्रकार्यैक्यं यथा नैल्यविशिष्टस्य उत्पलत्वविशिष्टस्य चैक्यं

न च विशेषणांशैक्याभावाद्वस्त्वैक्यहानिः, मृद्घटादावपि स्वरूपस्य रूपस्पर्शादीनां कार्यत्वकारणत्वावस्थयोरेकत्वाभावात्, इयान्विशेषः कार्यकारणभावे भिन्नकालीनावस्थारूपसद्वारकविशेषणाश्रयधर्म्यैक्यं यथा स एवायं तरुणो ऽभूदिति अन्यत्र समकालसंबन्ध्यद्वारकानेकविशेषणाश्रयधर्म्यैक्यं यथाऽयं वेदविद् ब्राह्मण इति बाल्ययौवने भिन्नकालीनसद्वारकावस्थे वेदनं ब्राह्मणशरीरं च समकालवर्त्यद्वारकविशेषणम् । एवमुभयविधविशेषणविशिष्टधर्म्यैकत्वमैक्यशब्दार्थः अतो जगच्छब्दवाच्यधर्म्यैक्याज्जगत ऐक्यादिति निर्देश उपपन्नः । यद्वा कृत्स्नस्य जगत इति निष्कर्षकः शब्दः ब्रह्मशब्दोऽपि विशेष्यमात्रपरः कार्यावस्थां प्रत्याधारत्वादाधारत्वं च साक्षाद्वा परम्परया वा मुख्यमेव अतो ब्रह्मकार्यं जगत् तदन्तर्यामिकशब्दो व्याख्यातः । एवं ब्रह्मकार्यतया तदन्तर्यामिकतया च जगत्तदात्मकं, तदात्मकत्वं नाम जगतस्तत्प्रकारैकस्वभावतया पृथगवस्थानाभावात्तदन्तर्गतत्वं तेन प्रकारैक्यं न तु स्वरूपैक्यं विशिष्टान्तर्भाव एवैक्यमित्यर्थः तत्प्रत्यनीकनानात्वमिति विहितोभयविधैक्यप्रत्यनीकनानात्वं निषिध्यत इत्यर्थः, कार्यकारणभेदः कुतर्कमूलभ्रान्तिविषयः स्वनिष्ठभेदो लौकिकप्रतीतिमूलभ्रान्तिविषयः, अतो भ्रान्तिसिद्धत्वाविशेषाद्विहितैक्यप्रत्यनीक-

Digitized by Google

स्याविशेषाच्च तेनाकारयोरुभयविधं भेदं नानात्वेन परामृश्य तन्निषिध्यत इति न वाक्यभेदः, तस्मात्यनीकमिति ऐक्यविधिशेषभूतो भेदनिषेधः अन्वयमुखेनोक्तार्थस्थिरीकरणार्थत्वाद्व्यतिरेकोक्तेः, ऐक्यविधिश्च "नेह नानास्ती"ति प्रकरणे श्रूयते एकधैवानुद्रष्टव्यमित्यैक्यदर्शनविधिः एकधा—एकतया परमात्मशरीरतया एकप्रकारयोरित्यर्थः तथा च "अहमेकः प्रथममासं वर्त्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्तः" "आत्मा वा इदमेव एवाग्र आसीत् नान्यत्किंचन मिषत्" तथा "परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातं तदच्युतो नास्ति परं ततोऽन्यत्" इत्यादिषु चैक्यविधिशेषतया भेदनिषेधो दृश्यते, शेषत्वं च विहितैकत्वस्थिरीकरणलक्षणाकिञ्चित्कारत्वं भवति यादृशमैक्यं विहितं तन्निषेधस्य तादृशैक्यविरोधिभेदविषयत्वे सति तत्स्थिरीकरणार्थत्वं सिद्ध्येत् स्वविरोध्यर्थान्तरनिषेधस्तदुपयुक्तः, न हि मृदेव घट इत्युक्ते घटद्वित्वनिषेधो मृद्घटैकत्वोपकारकः घटद्वित्वस्य मृद्घटैक्याविरोधित्वात् विनाऽप्येको घट इत्युक्ते घटगतरूपपरिमाणादिनिषेधो घटाख्यधर्म्यैक्यविधेरुपकारकः रूपपरिमाणादिभेदस्य घटव्यक्त्यैक्याविरोधित्वात् विधेयविरोध्यर्थनिषेध एव हि विध्युपकारकः । किंच न केवलमुपकाराभावः, ऐक्यविधिविरुद्धं च कृत्स्नभेदनिषेधपरत्वं समानाधिकरणवाक्येनैक्यविधानात् भिन्नविशेषणाभिधायिशब्दानामेकविशेष्यवृत्तित्वं हि सामानाधिकरण्यम्

न च प्रकारभेदे तिष्ठति कृत्स्नभेदनिषेध उपपद्यते अतो भेदनिषेधस्यैक्यविधिशेषत्वात् कार्यकारणभेदः स्वनिष्ठभेदश्च निषिध्यत इत्यभिप्रायः । किंच "न चास्य कश्चिज्जनिता न चाधिपः न तत्समश्चाभ्यधिकश्च दृश्यते तेनार्हति ब्रह्मणा स्पर्द्धितुं कः न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव:" इत्यादिभिः स्वतन्त्ररूपवस्तुविशेषविषयनिषेधदर्शनात्सामान्येनावगतो भेदनिषेधः तत्र छागपशुन्यायेन पर्यवस्यतीत्यर्थसिद्धं तस्मात्यनीकनानात्वमित्युक्तत्वात् केषुचिद्वाक्येषु तस्य कण्ठोक्तत्वाच्च । अथ उत्सर्गापवादन्यायमभिप्रयन्नाह 'न पुनरि'ति,

ब्रह्मणः कार्यरूपेण नानात्वविषयश्रुतिवाक्योदाहरणं प्रकारनानात्वविषय-वाक्यानामपि प्रदर्शनार्थम् "एकः सन् बहुधा विचार एको देवो बहुधा निविष्टः त्वमेकोऽसि बहूननुप्रविष्टः" "योऽव्यक्तमन्तरे संचरन् यस्याव्यक्तं शरीरं योऽक्षरमन्तरे संचरन् यस्याक्षरं शरीरं यो मृत्युमन्तरे संचरन् यस्य मृत्युः शरीरम् एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायण" इति प्रकारनानात्वं प्रकार्येकत्वं च हि स्पष्टं श्रूयते । यद्वा छान्दोग्ये तैत्तिरीयके च बहु स्यामिति प्रकरणे "अनेन जीवेनात्मना ऽनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं चेति चिदचिदनुप्रवेशपूर्वकनामरूपभाक्त्वश्रवणादुभय-लिङ्गस्याप्यव्यवधानेन जगदुपादानत्वानुपपत्तेश्च बहु स्यामित्यत्रापि ब्रह्मणो बहुनामरूपभाक्त्वस्य तद्द्वारकत्वसिद्धेः शरीरतया प्रकारभूतचि-दचिन्नानात्वमर्थसिद्धमित्यभिप्रायेण बहु स्यामिति वाक्यमुदाहृतम्, एवं कार्यनानात्वस्य प्रकारनानात्वस्य च विहितत्वात्सामान्यनिषेधस्य च विहितव्यतिरिक्तविषयत्वाच्च कुतर्कसिद्धकारणकार्यभेदविषया लौकिक-प्रतीतिसिद्धस्वनिष्ठभेदविषयाश्च भेदनिषेधश्रुतय इत्यर्थः । नानात्वनिषे-धादपरमार्थविषयत्वं शङ्कते "नानात्वे"ति, इयं श्रुतिः भेदस्तु निषेधा-र्थमनूद्यत इति भावः । परिहरति "ने"ति, अप्राप्तस्यानुवादायोगात् अतो विषयविभागादविरोध एव न्याय्यः, तदुक्तमाचार्यपादैः "यद् ब्रह्मणो गुणशरीरविकारभेदकर्मादिगोचरविधिप्रतिषेधवाचः अन्योन्यभिन्नविषया न विरोधगन्धमर्हन्ति तव विषयः प्रतिषेधबाध्याः" इति समस्तहेयरहि-तस्य हेयाकारवस्त्वैक्यासम्भवात् हेयस्यापारमार्थ्येऽपि तस्य निरसनी-यतया हेयत्वस्यावर्जनीयत्वात् तत्प्रतिभटतयोक्तस्य तत्संबन्धार्हवस्त्वै-क्यबाधात् सर्वज्ञस्य ब्रह्मणः स्वसङ्कल्पेन स्वगतहेयतद्विषयभ्रमापादना-योगादसर्वज्ञत्वे सार्वज्ञ्यश्रुतिविरोधात् सर्वशक्तेः स्वगतहेयानिवारकत्वा-योगादशक्तत्वे सर्वशक्तिश्रुतिविरोधात् श्रुतिबलादीदृशविरोधाभावे तान्ये-वानुविनश्यति न जायते म्रियत इत्यादिवाक्यप्रतिपन्ननित्यत्वानित्य-त्वनिर्गुणत्वसगुणत्वादेः श्रुतिबलाद्विरोधाभावेन क्वचिदपि न्यायसं-

चारानपेक्षतया मीमांसानैरर्थ्यात् भिन्नत्वाभिन्नत्वयोश्च विरोधाभावेन पारमार्थिकापारमार्थिकत्वेन विभागस्यानभ्युपगन्तव्यत्वात् "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" "जुष्टं यदा पश्यत्यन्यमीशमिति पृथक्त्वज्ञानस्य मोक्षोपायत्वश्रवणात् "यस्मात् क्षरमतीतोऽहमित्यादिना भेदज्ञानवतोऽसंमूढत्वस्मरणात् जीवपरयोर्नियन्तृत्वनियाम्यत्वादिलक्षणभेदस्य घटपटभेदवत् प्रमाणान्तरागोचरत्वेनानुवादासम्भवाद्विहितस्य निषेधायोगादुपासनार्थत्वाश्रयणस्य "अथ योऽन्यां देवतामित्यादिवाक्यप्रतिपन्नैक्येऽपि प्रसङ्गादैक्यस्याविधिशेषवाक्यप्रतिपन्नत्वे भेदस्य च तुल्यत्वान्नियतपौर्वापर्याविरोधतया अपच्छेदन्यायाविषयत्वाद्विरोधाधिकरणन्यायेन भेदश्रुतेः परभूतनिषेधोत्पत्तिप्रतिबन्धकत्वादैक्यविधिशेषस्य भेदनिषेधस्य विहितैक्यविरोधिभेदनिषेधकत्वोपपत्तेरन्यथा समानाधिकरणवाक्यप्रतिपन्नस्वशेषिभूतैक्यविरोधित्वप्रसङ्गादुत्सर्गापवादन्यायेन निषेधस्य विहितभेदव्यतिरिक्तविषयत्वाच्छागपशुन्यायेन सामान्येन भेदनिषेधस्य स्वतन्त्रभेदविशेषनिषेधपर्यवसायित्वाच्च भेदनिषेधश्रुतयोऽब्रह्मात्मकनानात्वनिषेधपरा, न तु भेदमात्रनिषेधपरा इति सङ्ग्रहः, यत्र हीत्यादिवाक्यानामयमर्थः, यत्र—यदा, द्वैतमिव भवति—स्वनिष्ठभेद इव भवति इवशब्दः स्वनिष्ठभेदस्यातात्त्विकत्वद्योतकः कथमिवेतिवद् वाक्यभङ्गः इत्यविवक्षितार्थो वा तत् तदा इतर इतरमितरेण पश्यति केनेति वक्ष्यमाणस्याविस्तरेणेत्यध्याहारः इतरः स्वनिष्ठो द्रष्टा इतरं स्वनिष्ठं द्रष्टव्यं स्वनिष्ठदर्शनसाधनेन पश्यति यत्र तु यदा अस्योपासकस्य सर्वमात्मैवाभूत् परमात्मसामानाधिकरण्येन सर्वं साक्षात्कृतं न हि पूर्वमनात्मभूतमिदानीं सर्वमात्मा भवति अतः साक्षात्काराभिप्रायोऽभूदिति निर्देशः, अस्येत्युक्तेः कं इत्यध्याहारः इतर इत्युक्तत्वात्, तत्—तदा स्वनिष्ठः को द्रष्टा स्वनिष्ठेन केन दर्शनसाधनेन स्वनिष्ठं कं द्रष्टव्यमर्थं पश्येत् ज्ञातृज्ञेयज्ञानसाधनेषु स्वनिष्ठं किंचिदपि नास्तीत्यर्थः प्रमितस्य निषेधायोगादापातप्रतीतिसिद्धस्यैव निषेध्यत्वात् लौकिकप्रतीतेश्च स्वनिष्ठताविषयत्वात् तेन रूपेणैव निषेधविषयत्वोपपत्तेः, यदि द्रष्टृदृश्यादिमात्रं निषिध्येत तदानीं "तद्धैतत्पश्यन्नृ-

षिर्वामदेवः प्रतिपेदे अहम्मनुरभवं सूर्यश्चेति परमार्थसाक्षात्कारदशायामह-मिति द्रष्टुरात्मनो मनुसूर्यादिदृश्यपदार्थानां च साक्षात्कारश्रवणं विरुध्यते तस्मात् लौकिकप्रतीतौ द्रष्टृदृश्यादिकं प्रकारीभूतपरमात्मप्रतिपत्तेस्तत्सा-मानाधिकरण्यमन्तरेण स्वनिष्ठतया भाति योगदशायां तु प्रकारिणः परमात्मनः प्रतीयमानत्वादहंशब्दवाच्यपरमात्मसामानाधिकरण्येन प्रका-शत इति वैषम्यं न तु द्रष्टृदृश्यादिनिवृत्तिरित्यभ्युपगन्तव्यम्, अन्यथा वामदेवादिदर्शनस्य भ्रान्तित्वप्रसङ्गात्, नेह नानेति इह—प्रपञ्चे लोकदृष्ट-प्रकारेण नानाभूतं स्वनिष्ठतया भिन्नं किंचिदपि नास्तीत्यर्थः स्वनिष्ठ-दर्शनेन प्रत्यवायमाह "मृत्योरि"ति, तमसो वा एष तमः प्रविशतीतिवदय-देशः नानेव—स्वनिष्ठमिव अज्ञानादज्ञानमाप्नोतीत्यर्थः तद्व्यतिरिक्त[1]तया ज्ञानं प्रागेव सिद्धं ततो ऽप्यतिशयितमज्ञानं स्वनिष्ठतया तद्वस्तुदर्शन-मित्यभिप्रायः ।

सू० "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवती"ति ब्रह्मणि नानात्वं पश्यतो भयप्राप्तिरिति यदुक्तं तदसत् "सर्वं खल्विदं ब्रह्म" "तज्जलानिति शान्त उपा-सीते"ति तन्नानात्वानुसन्धानस्य शान्तिहेतुत्वोपदेशात्

टी० यदा ह्येवैष इत्यादिश्रुतिमुपादाय तत्र ब्रह्मणीत्यादिना पूर्वपक्षोक्तमर्थमनूद्य दूषयति "तदसदि"ति, भयप्राप्तिहेतुत्वञ्चेत्यर्थः कुत इत्यत्राह 'सर्वमि'ति, ब्रह्मणः कार्यजगद्रूपेण, नानात्वानुसन्धानं मुक्तिहेतुरिति सिद्धान्तार्थः । इदानीं परोक्तं शान्तिहेतुत्वमभ्युपगम्योक्तं कथं तत्र नानात्वानुसन्धानप्रतीतिः? कथं वा तस्य भयप्राप्तिहेतुताविरो-धित्व? मिति शङ्कायामेतद्विवृणोति—

सू० तथा हि सर्वस्य जगतः तदुत्पत्तिस्थितिलयकर्मतया तदा-त्मकत्वानुसन्धानेनाच शान्तिर्विधीयते अतो यथाऽवस्थि-

१ देहातिरिक्तात्मज्ञानमिति पुस्तकान्तरपाठः ।

तद्देवतिर्यङ्मनुष्यस्थावरादिभेदभिन्नं जगत् ब्रह्मात्मकमित्यनुसन्धानस्य शान्तिहेतुतयाऽभयप्राप्तिहेतुत्वेन न भयहेतुत्वप्रसङ्गः एवं तर्हि अथ तस्य भयं भवतीति किमुच्यते? इदमुच्यते यदा ह्येवैष एतस्मिन्नदृश्ये ऽनात्म्ये निरुक्ते निलयेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयङ्गतो भवतीत्यभयप्राप्तिहेतुत्वेन ब्रह्मणि या प्रतिष्ठाऽभिहिता तस्या विच्छेदे भयं भवतीति

टी० "तथा ही"ति । अत्र नानात्वानुसन्धानप्रतीतिं दर्शयति "सर्वस्ये"ति, न हि केवलं ब्रह्मेत्युक्तमपि त्विदं सर्वं ब्रह्मेत्युक्तं, सर्वशब्दश्च विविधभेदप्रपञ्चपरः, अतो नानात्वविशिष्टब्रह्मानुसन्धानं प्रतीतमित्यर्थः । ततः किमित्यत्राह "अत" इति, नानार्थानुसन्धानस्य शान्तिहेतुत्वद्वारा समस्तभयनिवृत्तिरूपमोक्षोपायत्वात् भेदबुद्धेर्भयप्राप्तिहेतुत्वोक्तिस्तद्विरुद्धेत्यर्थः ।

ननु मणिकृपाणदर्पणादिगतप्रतिबिम्बेष्विव देहेषु रागद्वेषादिनिवृत्त्यर्थं सर्वस्य ब्रह्मण्यध्यस्तताऽनुसन्धानविधिः किन्न स्यात् नैवं प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वं हि सामानाधिकरण्यमित्युपपादितत्वाद् बाधार्थत्वस्य वक्ष्यमाणदूषणोपहतत्वाच्च । अथ श्रोतृपूर्वक्रमेतच्छ्रुत्यर्थमाह "इदमुच्यत" इति, अदृश्य इत्यचिद्व्यावृत्तिः, अनात्म्य इति बद्धव्यावृत्तिः स हि परमात्मना व्याप्यः । यद्वा आत्म्यं व्याप्यं कर्मकृतं शरीरं तद्रहितोऽनात्म्यः अनिरुक्त इति मुक्तव्यावृत्तिः, स हि बद्धावस्थायां देवादिशब्दैरुक्तः अनिलयन इति नित्यमुक्तव्यावृत्तिस्तेषां हि भगवानाधारः स्वोक्तार्थविषयमुपबृंहणं दर्शयति—

मू० यथोक्तं महर्षिभिः "यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च

विक्रिये"त्यादि अत्रापि प्रतिष्ठाया अन्तरमवकाशो विच्छेद एव

टी० "यथोक्त"मिति, हानिरिष्टहानिः, छिद्रमनिष्टप्राप्तिरन्धं भ्रान्तिस्तत्कृतचित्तस्खलनं विक्रिया तेनाज्ञानामवशादयथायथव्यापारः "एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम् वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः न शौरिचिन्ताविमुखजनसंवाससवैशसम्" इत्यादिवचनान्यादिशब्दविवक्षितानि भेदवाचिनोऽन्तरशब्दस्य विच्छेदार्थकत्वं कथमित्यत्राह "ब्रह्मणी"ति, अनवच्छिन्नं हि ध्यानं निरन्तरमित्युच्यते अतस्तद्विच्छेद एव, स कस्येत्यपेक्षायां प्रतिष्ठायाः प्रकृतत्वात् तस्या विच्छेदः प्रकृतब्रह्मविषये "तदप्येष" इत्युदाहृते भीष्माऽस्मादित्यनन्तरश्लोके वायुसूर्यादिसर्वचेतनप्रशासितृत्वकथनादन्तरशब्दस्योपासनविच्छेदपरत्वमेव युक्तं, न तु भेदपरत्वमतोऽयमर्थः पूर्वापरवाक्यश्रुत्यन्तरानुगुणः उपबृंहणानुगुणश्च परोक्तस्तु तदुभयविरुद्ध इति भावः

ननु यदा ह्येवैष इत्यत्र प्रतिष्ठाविच्छेदोऽर्थश्चेदेतस्यामिति स्त्रीलिङ्गता स्यात् अदितिः पाशानिति न्यायात् विभक्त्यवगतनपुंसकत्वाविवक्षेति चेत्तथाऽप्यस्वारस्यमर्जनीयं तच्च स्वरसार्थे संभवति नोपपद्यते सप्तमी चास्वरसा तस्याविच्छेद इति ह्युक्तिः स्वरसा न तु तस्यां विच्छेद इति प्रातिपदिकास्वारस्यं च प्रतिष्ठापरत्वे स्यात् पूर्ववाक्ये यदा ह्येवैष एतस्मिन्नदृश्ये नात्म्य इति ब्रह्मपरतया प्रयुक्तस्यैतस्मिन्निति पदस्यानन्तरवाक्येऽपि बुद्धौ विपरिवृत्तेः। उच्यते न तावल्लिङ्गसप्तम्योः प्रातिपदिकस्य वाऽस्वारस्यं ब्रह्मपरामर्शित्वादेतच्छब्दस्य, अन्तरशब्दश्चावकाशपरः निरन्तरं सान्तरतरमिति प्रयोगात् अन्तरं च देशतः कालतश्च भवति कालकृतं चान्तरं विच्छेद एव। नन्वेवं सति कस्य विच्छेद इत्यपेक्षायां प्रतिष्ठाया अन्तरमित्यध्याहारः स्यात् तच्चायुक्तम् अनध्याहारेण निर्वाहसम्भवादिति चेत् न सन्निधिलब्धस्यार्थस्याध्याहारनिरपेक्षत्वात् तथाऽप्यस्वारस्यमिति चेत् तद्वरं पक्षान्तरे बहुस्वारस्यसम्भवात् तथा हि भयहेतोरभयहेतुप्रतियोगित्वादभयहेतुपरप्रति-

ष्ठापदस्यैक्यवाचित्वाभावाद्वाक्यवृत्तेरसामञ्जस्यं तत्सामञ्जस्याय प्रतिष्ठा शब्दस्यैक्यपरत्वे मुख्यार्थहानिः, दृढसम्बन्धो हि प्रतिष्ठा यथा राज्ये प्रतिष्ठित इति प्रथमप्रतिपन्नप्रतिष्ठापदस्यार्थभङ्गश्चानुपपन्नः पूर्वसिद्धैक्यावगतिपरत्वाद्विन्दतिधात्वर्थास्वारस्यं च सप्तमी चास्वरसा भेदप्रतियोगित्वावधित्वसम्बन्धविवक्षायां तृतीयापञ्चमीषष्ठीनामेव स्वारस्यात्, करोतेश्च प्रतिपत्त्यर्थत्वादस्वारस्यं च मनसि कुरुत इति योजनायामध्याहारः एष ह्येवानन्दयातीति पूर्ववाक्यप्रतिपन्नभेदविरोधश्च, अनन्तरं च भीष्माऽस्मादिति प्रशासितृत्वेन भेद उच्यते अतो मध्ये भेदनिषेधश्चानुपपन्नः "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन कदाचनेति पूर्वापरवाक्येषु गुणविशिष्टवेदनस्याभयहेतुत्वोक्तेर्ब्रह्मणि भेदनिषेधस्याभयहेतुत्वकथनं च विरुद्धं ब्रह्मविदाप्नोतीति विद्युपक्रमत्वाच्च ब्रह्मणि प्रतिष्ठाया वेदनरूपत्वमेव युक्तं न त्वैक्यरूपत्वं, न ह्यैक्यतद्ध्योरुभयो'रपि प्रतिष्ठाशब्दवाच्यत्वं दृढसंबन्धवाचिनः प्रतिष्ठाशब्दस्य तूपास्यं ब्रह्म प्रत्युपासकतया संबन्धे पर्यवसानं युक्तं ब्रह्मणोनिर्विशेषत्वे व्यतिरिक्तमिथ्यात्वे च परोक्तं सूत्रद्वयं परिहरति—

सू० यदुक्तं "न स्थानतोऽपी"ति सर्वविशेषरहितं ब्रह्मेति वक्ष्यतीति तन्न सविशेषं ब्रह्मेत्येव हि तत्र वक्ष्यति "मायामात्रं त्वि"ति च स्वाप्नानामप्यर्थानां जागरितावस्थानुभूतपदार्थवैधर्म्येण मायामात्रत्वमुच्यत इति जागरितावस्थाऽनुभूतानामिव पारमार्थिकत्वमेव वक्ष्यति स्मृतिपुराणयोरपि निर्विशेषज्ञानमात्रमेव परमार्थोऽन्यदपारमार्थिकमिति प्रतीयत इति यदभिहितं तदसत् यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।

टी० ॥ "यदुक्तमि"ति । अथ स्मृतिपुराणयोः सविशेषपरत्वमुपपादयति "स्मृतिपुराणयो"रिति, "स्मृतीत्यादिना, सामान्येन प्रमाणस्य तद-

१ उभयस्य चेति पुस्तकान्तरपाठः ।

वान्तररूपस्य शब्दस्य च सविशेषवस्तुपरत्वोपपादनाच्छास्त्रस्य प्रत्यक्ष-विरुद्धार्थप्रतिपादनासामर्थ्योपपादनाद्विशेषेण वेदान्तवाक्यानां सविशेषपर-त्वोपपादनेन स्मृतिपुराणयोः श्रुतिविरुद्धार्थे प्रामाण्यासंभवाच्च तयोः सवि-शेषपरत्वं सिद्धम् । इदानीं स्मृतिपुराणयोरपि परोदाहृतवचनानां पूर्वापरप-र्यालोचनया सविशेषपरत्वमुपपाद्यते, यथा लौकिकप्रमाणश्रुतिविरुद्धानर्था-चेदं शास्त्रं प्रतिपादयति,एवमेव पूर्वापरवाक्यविरुद्धमप्यर्थं न स्मृतिपुरा-णानि प्रतिपादयितुं शक्नुवन्तीत्यभिप्रायः । परेण सर्वस्याविद्यिकत्वाविशेषेण स्वाभाविकवस्तुवैल²क्षण्येनाभ्युपगमादद्वैतस्य स्पष्टताभ्रमाच्च पूर्वं पुराणव-चनान्युपन्यस्य पश्चाद्भगवद्गीतावचनान्युदाहृतानि, अत्र तु स्वाभाविकव-स्तुवैलक्षण्याभ्युपगमादनन्तगुणविभूतिमत्त्वस्य स्पष्टतया च भगवद्गीताव-चनानि पूर्वमुपन्यस्य पश्चात्पुराणवचनानि प्रदर्श्यन्ते, अतः स्मृतिपुराण-योरित्युक्तं, परेण स्वोदाहृतवचनप्रतिपाद्यतया योऽर्थोऽभिहितः तद्विपरी-तार्थपरत्वेन स्पष्टतमानि वचनानि प्रथमं प्रदर्श्यन्ते पश्चात्तदविरोधेन परोक्तवचनानामर्थप्रतिपादनार्थं "यो मामि"ति, अत्रायमिति पदेन अचि-त्संसृष्टचेतनव्यावृत्तिः अनादिमिति मुक्तव्यावृत्तिः तस्याजत्वं हि आदि-मत् लोकमहेश्वरमिति नित्यमुक्तव्यावृत्तिः, लोक्यत इति लोकः प्रमाण-सिद्धत्रिविधचेतनाचेतनवर्गः अत्रोत्तरार्द्धो ऽप्यनुसंधेयतया ऽभिप्रेतः "असं-मूढः स मर्त्ये"ष्विति चेतनाचेतनविलक्षणत्वेन जानवसंमूढ इति कथनात् सर्ववैलक्षण्यं तात्त्विकमित्युक्तं भवतीत्यभिप्रायः । धारकत्वादिभिर्वैलक्ष-ण्यं वैशद्यार्थमुपादत्ते–

मू० मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं भूतभृन्न

च भूतस्थो ममात्मा भूतभावनः

टी० "मत्स्थानी"ति, अत्र शरीरलक्षणं सूचितं भवति सर्वभूतानि मदायत्तस्थितीनि नाहं तदायत्तस्थितिरित्यर्थः, लोकदृष्टप्रकारेण नाहमा-

२ वैषम्यानभ्युपगमादिति पा० ।

धारः अपि तु संकल्पमात्रादित्याह "न चे"ति, निषेधस्य विहितव्यतिरिक्तविषयत्वाद्वयमेवार्थः योगमैश्वरम् ईश्वरासाधारणं सर्वशक्तियोगमित्यर्थः ।

न च मत्स्थानीति धारकत्वपारमार्थ्यनिषेधश्चेद्योगमैश्वरं पश्येति विरुद्धं, मम भ्रान्तिं पश्येति हि तदा वक्तव्यं योगमैश्वरमित्येतद्विवृणवचिममेवार्थमाह "भूतभृदि"ति, ममात्मा मम संकल्प इत्यर्थः । आत्म—शब्दो हि मतिवाची "यत्नेऽर्के ऽपो मतावात्मे"ति अतोऽत्रात्मशब्दः संकल्परूपज्ञानवाची ममात्मा भूतभावन इत्यनेन न च मत्स्थानीत्यर्थः स्फुटीकृतः, भूतभावनः भूतानां सत्ताऽनुवर्त्तकः अर्वाचीनस्येश्वरस्य हि सगुणत्वमिति शङ्कायां कारणातिरिक्तवस्तुनिषेधप्रदर्शनार्थं लक्षणप्रदर्शनार्थं च जगत्कारणत्वमाह—

मू० अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जय ? मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो-जगत् उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः

टी० "अह"मिति, प्रभवः प्रलयश्चोक्तः स्थितिस्तु धारकत्वकथनेन सिध्यतीति धारकत्वं विशिनष्टि "मयी"ति, विष्टभ्याहमित्यनेन नियन्तृत्वमुक्तं, विष्टभ्य—अधिष्ठाय एकांशेन—संकल्पैकदेशेन तच्छरीरत्वलक्षणं यो मामजमित्यादिना ऽभिप्रेतचिदचिद्विलक्षणत्वकण्ठोक्तिं दर्शयति "उत्तम"इति, पूर्वस्मिन् वचने क्षराक्षरशब्दोक्तो बद्धमुक्तौ कूटस्थो निर्विकारः, ज्ञानसंकोचरूपविकाराभावान्मुक्तस्य कूटस्थशब्दस्साधारणवाची वा सर्वेषु लोकेषु कामचारो भवतीति मुक्तात्मन उभयविभूतिसाधारण्यात् कूटस्थत्वं परमात्मेत्युदाहृत इत्यनेन परमात्मा व्यवस्थित इत्येतद्वाक्यान्वितो नारायणानुवाकः स्मारितः, अक्षरादपि चोत्तम इत्यनेन च तत्रैव हि सोऽक्षरः परमः स्वराडित्युक्तं, ज्ञानसंकोचरूपक्षरणाभावादक्षरो मुक्तः स्वराट्—स्वतन्त्रः, अकर्मवश्यः परः—जीवगतावस्थास्वतः परमुत्कृष्टाव-

स्यान्तराभावात्पारम्यं, सर्वाणीति पदं ब्रह्मशिवाद्यभिप्रायं तस्मिन्ननुवाके हि “स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमः स्वराट्”इति बद्धमुक्तजीववाचिपदैः समानाधिकृतैर्भगवानुक्तः, तच्च विश्वमेवेदं पुरुष इति च सामानाधिकरण्यवाक्यं श्रूयते सामानाधिकरण्यहेतुश्च तस्मिन्ननुवाके स्पष्टः तद्विश्वमुपजीवति पतिं विश्वस्यात्मेश्वरं व्याप्य नारायणः स्थित इति च वाक्यजाते धार्यत्वधारकत्वनियन्तृत्वनियाम्यत्वशेषित्वशेषत्वव्याप्यत्वव्यापकत्वादिकमेव सामानाधिकरण्यनिबन्धनं न तु तदैक्यमिति स्पष्टं तदप्युच्यते–

सू० यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः “यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः”

टी० “आविश्ये”ति, व्याप्य नारायणः स्थित इत्यस्यार्थ उक्तः पतिं विश्वस्येत्यस्यार्थ ईश्वर–शब्देनोक्तः, ईश्वरशब्दोऽपि शेषिवाचकः अत एव हि पतिं विश्वस्यात्मेश्वरम् इत्यत्र पत्यन्तरराहित्यविवक्षायामात्मेश्वर इत्युक्तं तद्विश्वमुपजीवतीत्यस्यार्थो बिभर्तीत्युक्तः, तथा “व्यापनाद्भरणात्स्वाम्याद्न्यः पञ्चदशोदित इति यो मामेवमसंमूढ इति कृत्स्नवैलक्षण्यज्ञानवतोऽसम्मूढत्वमुक्तम् । इति गुह्यतमं शास्त्रमिति तस्यार्थस्य गुह्यतमत्वमुक्तम्, अतोऽस्मिन्नर्थे तात्पर्यमिति स्पष्टं पुरुषोत्तमशब्दस्य समास[1]साधुत्वञ्च संशयितव्यं नागोत्तमादिवत् सिद्धं भवतीति महाभाष्यवचनात्पार्थिनवत्पुरुषोत्तमशब्दनिर्वाहकत्वात्पुरुषाणामाप्ततमत्वाच्च पुरुषोत्तम इति पञ्चमीसमासो वा अक्षरादपि चोत्तम इति ह्युक्तं, पूर्वनिपातस्तु सामानाधिकरण्यविवक्षायामेव न तु तदविवक्षायामपीति नानुशासनविरोधशङ्काप्रसङ्गः एवमेभिर्वचनैश्चिदचिद्विलक्षणस्य प्रतिपादितत्वात् क्षेत्रज्ञं चापि मां विद्धीत्यादेस्तदविरोधेनार्थो वर्णनीयः यो लोकत्रयमाविश्य . बिभर्तीत्यादिना कृत्स्नस्य भगवच्छेषत्वधार्यत्वनियाम्यत्वव्याप्यत्वशरीरत्वादेर्विहितत्वा-

१ समासासाधुत्वमशङ्कनीयं नागोत्तमादि च सिद्धं भवतीति पुस्तकान्तरपाठः ।

तस्य च निषेद्धुमयुक्तत्वात् "न तदस्ति विना यस्मादित्यादिना भ्रतदात्मकस्य नास्तित्वमुच्यते भ्रविनाभावशब्दस्य मिथ्यात्वपरत्वेन प्रसिद्ध्यभावाच्च तथाऽभ्युपेत्यमित्यभिप्रायः, विना—शब्दो हि संबन्धविरहपरः भ्रविनाभावशब्दस्य संबन्धनियमवाचित्वात् । भ्रथ पुराणवचनान्युपन्यस्यन्ते तत्र प्रत्यस्तमितभेदमित्यस्य वचनस्यार्थे व्याचिख्यासुस्तदुपयोगित्वेन तदुपक्रमोपसंहारयोरुत्सर्गविशेषपरत्वं दर्शयिष्यन्नुपक्रमवचनान्युपादत्ते—

मू० "स सर्वभूतप्रकृतिं विकारान् गुणादिदोषाँश्च मुने ? व्यतीतः भ्रतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले समस्तकल्याणगुणात्मकोऽसौ

टी० ॥ "स सर्वे"ति, तत्र प्रथमपन्थो हेयप्रत्यनीकत्वपरः सर्वभूतप्रकृतिं प्रधानं विकारान् महदादीन् रागा[1]दिदोषान् सत्त्वरजस्तमोहेतुकान् दोषान् ते दोषाः क्लेशादयः । व्यतीतः—विशेषेणातीतः नियमेन भ्रतत्परवशतया संबन्धानर्ह इत्यर्थः । भ्रतीतसर्वावरणः—भ्रावरणं प्रकृतिसंबन्धकर्मवासनादिकं तत् सर्वमतीतं येन स इत्यर्थः । यद्वा सर्वविषयज्ञानावरणं सर्वावरणं सर्वविषयज्ञानसंकोचातीत इत्यर्थः, ज्ञानशक्त्यादिसर्वगुणसंकोचकातीत इति वाऽर्थः । भ्रखिलात्मत्वं विवृणोति "तेने"ति, न तु मृदात्मको घट इतिवदित्यर्थः भुवनान्तराले—उभयविभूत्यन्तराले । भ्रथ दिव्यात्मस्वरूपस्य मङ्गलैकतानत्वमाह "समस्ते"ति, "समस्तकल्याणगुणात्मक इति, कल्याणगुणवत्त्वमुच्यते चेत् भ्रात्मशब्दः स्वभाववाची स्यात् एवं संक्षिप्तार्थस्य तेजोबलैश्वर्येत्यादिना विस्तरः क्रियत इति वि[2]भागः भ्रस्मादपि निर्वाहाद् दिव्यात्मस्वरूपपरत्वं युक्तम् । भ्रपेक्षितविधेरनपेक्षितविधानं दुर्बलमिति न्यायात् तदा कल्याणशब्दो भावप्रधानः समस्तकल्याणत्वं गुणः स्वभावोयस्य स समस्तकल्याणगुणगुणः यथा "द्व्येकयोर्द्विवचनैकवचने" इति सूत्रस्थं द्व्येकयोरिति पदं

---

१ गुणादिदोषानिति पाठान्तरम् ।

२ इति निर्वाहः इति पा० ।

द्विखैकत्वपरं व्याख्यातम् । अन्यथा द्वेकेष्विति वाच्यं न तु द्वेकयोरिति तच्च भावप्रधाननिर्देशस्य साधुत्वज्ञापनाय कृतं तत एव हि गुणाः सत्यज्ञानप्रभृतय इत्यभियुक्तैरुक्तं समस्तकल्याणगुणा आत्मा धर्मिस्वरूपं यस्य स समस्तकल्याणगुणात्मकः बहुव्रीहिरौपचारिकः शिलापुत्रकस्य शरीरमिति निर्देशवत् । दिव्यात्मस्वरूपमेव स्तौति—

मू० स्वशक्तिलेशोद्धृतभूतसर्गः इच्छागृहीताभिमतोरुदेहः

टी० ॥ "स्वशक्ती"ति, स्वांशलेशात् धृतभूतसर्गः । यद्वा शक्तिः सामर्थ्यं स्वगुणलवधृतभूतव्रात इत्यर्थः, भूतसर्गो भूतसमूहः । यद्वा सृज्यत इति सर्गः कार्यवस्तुजातम् इत्यर्थः । अथाभिप्रायविशेषणाद्गुण्यं पश्चाद्वदन् प्रथमं दिव्यविग्रहत्वमाह "इच्छे"ति, अभिमतत्वमभिमत्यर्हत्वम् स्वानुरूपत्वमिति यावत् अर्हाऽर्थे निष्ठा यथा अदृष्टो द्रष्टा अश्रुतः श्रोतेति तत्र ह्यर्हार्थीयः क्तः अद्रेश्यमग्राह्यमित्याद्यैकार्थ्यात् अभिमतस्याननुरूपत्वमनुरूपस्यानभिमतत्वं च लोके दृश्यते तद्व्यावृत्त्यर्थमिच्छागृहीताभिमतशब्दो निरुपपदेच्छाशब्दो नित्येच्छाया अवतारसमयजन्येच्छायाश्च साधारणः असंकोचात् । अथावतारद्वारेण साध्यं विग्रहप्रयोजनमाह—

मू० संसाधिताशेषजगद्धितोऽसौ तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः

टी० ॥ "संसाधिते"ति, अथ षाड्गुण्यवत्तामाह "तेज"इति, नात्र क्रमविवक्षा महाशब्दसुशब्दौ सर्वगुणसाधारणौ महत्त्वमपरिच्छिन्नत्वं यथा महोत्साहोमहाबलः महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः इति यथा च प्रकृष्टं विज्ञानबलमतुलमित्यादि सुशब्देन तेषां मङ्गलत्वमुच्यते एवं स्वरूपतोविग्रहतो गुणतश्च पर इत्याह—

मू० परः पराणां सकला न यत्र क्लेशादयः सन्ति परा[१]वरेशे स ईश्वरोव्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः

१ परापरेशे इति पाठान्तरम् ।

संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् संदृश्यते वाऽप्यधिगम्यते वा, तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्

टी० "पर"इति, गुणादिविशेषानित्यत्र दोषशब्दार्थं विवृणोति "न यत्रे"ति, क्लेशादयः—क्लेशकर्मविपाकाशयाः अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः, कर्म पुण्यापुण्यात्मकं जात्यायुर्भोगा विपाकाः आशयो वासना संस्कारः "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर" इति योगसूत्रं स्मारयति "स ईश्वर" इति, योगशास्त्रादपि वेदान्तस्य वैषम्यमाह "व्यष्टी"ति, पूर्वं भेदश्रुत्यर्थं उक्तः । अथैक्यश्रुतिनिर्वाहार्थं घटकश्रुत्यर्थं उच्यते "व्यष्टी"ति, व्यष्टिसमष्टिशब्दाभ्यां कार्यकारणावस्थश्चेतनवर्ग उच्यते रूपं शरीरं स्वरूपं स्वासाधारणं शरीरं, शरीरिलक्षणं सूचयति "सर्वेश्वर"इति, ईश्वरो नियन्ता अनेन नियाम्यत्वं शरीरत्वं सिद्धं, नियाम्यविशेषो हि शरीरं सर्वदृक्—सर्ववेत्ता च स्वरूपतः प्रकारतश्च सर्वं ज्ञानातीत्यर्थः । यद्वा विश्वतश्चक्षुरित्यादिश्रुतिप्रक्रियया सर्वतो दृग्भवन् सर्वं वेत्तीत्यर्थः । यद्वा सर्वेषां दृक्सर्ववेत्ता च स चक्षुर्देवानामुत मर्त्याना"मिति श्रुतेः चक्षुर्ज्ञानप्रदः सर्वं विन्दतीति वा सर्ववेत्ता अवाप्तसमस्तकाम इत्यर्थः समस्तशक्तिः शक्तिः कार्यापयोग्यपृथग्भूतविशेषणम् । उक्तप्रकारेण सर्वशरीरकत्वादस्य सर्वमपृथक्सिद्धविशेषणमित्यर्थः परमेश्वराख्य इति परमशब्देनानन्येश्वरत्वं[१] सिद्धं परोमाऽस्येति हि परमः, एवंविधेश्वरविषयज्ञानस्यैवापवर्गोपायवेदनत्वमाह "स ज्ञायत"इति, संज्ञायत इति पाठे अस्तदोषमित्यादि ब्रह्मविशेषणं येन शास्त्रजन्यज्ञानेन ज्ञायते येनोपासनात्मकेन संदृश्यते येन परमभक्तिरूपेणानुभवरूपेण च प्राप्यते अनुभूयत इत्यर्थः "भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुनः । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं परन्तपे"ति वचनात् संज्ञायत इति पाठे अस्तदोषमित्यादि

१ अन्येश्वरत्वं निषिद्धमिति त्वनतिशायकः पाठः ।

ब्रह्मज्ञानविशेषणम् "अर्थेनैव विशेषो हि निराकारतया धियाम्" इति
न्यायात् ज्ञानस्यास्तदोषत्वादिकं विषयद्वारा अस्तदोषमिति दोषास्पदा-
चिद्विषयज्ञानाद् व्यावृत्तिः । शुद्धमिति अशुद्धास्ते समस्तास्तिस्त्वत्याद्युक्त-
मेवस्याशुद्धबद्धजीवविषयज्ञानाद्व्यावृत्तिः परं–निर्मलम् अत्यन्तनिर्मलम्
अनेन कदाचित्कर्मसंबन्धार्हतारूपमलान्वितमुक्तविषयज्ञानाद्व्यावृत्तिः ।
एकरूपमिति नित्यमुक्तविषयानेकरूपज्ञानाद् व्यावृत्तिः अनया दिशा ब्रह्म-
विशेषणत्वेऽपि व्यावृत्तिर्द्रष्टव्या ब्रह्मविशेषणत्वे एकरूपमित्याश्रयणीय-
तोपयोगिविशेषणं च भवति स्थिरस्वभावम्–आश्रितसंरक्षणादिप्रतिज्ञायां
दृढतरमित्यर्थः । अज्ञानं मोक्षोपायज्ञानादन्यत्तद्विरोधि वा सा विद्याया-
विमुक्तय इति वचनात् । यद्वा अज्ञानं ज्ञानाभावः ब्रह्मपर्यन्तत्वाभावेना-
यथार्थस्थितवस्तुविषयत्वात् ब्रह्मविशेषणत्वे एकवाक्यं ज्ञानविशेषणत्वे
वाक्यद्वयं प्रत्यस्तमितभेदमित्यादिश्लोके प्रत्यस्तमितभेदमिति पदं हृदि
निधाय सशेषत्वे वचनानि दर्शितानि । अवागोचरं वचसामित्येतद्व्याचि-
ख्यासया शब्दगोचरत्वे वचनानि दर्शयति–

**मू० शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते मैत्रेय? भग-
वच्छब्दः सर्वकारणकारणे**

टी० "शुद्ध"इत्यादिना, तत्राशब्दगोचरस्येत्यादिके पूर्वश्लोके
मुक्तात्मनि भगवच्छब्दप्रयोग औपचारिक इत्युक्तं तत्कथमित्यपेक्षायां
मुक्तात्मव्यावृत्तिनिमित्तमाह "शुद्ध"इति, यत्र प्रवृत्तिनिमित्तपौष्कल्यं तत्रैव
हि मुख्यत्वं नान्यत्रेति भावः । शुद्धे सिद्धे शब्दोऽर्थसंबन्ध इत्यत्र सिद्ध-
शब्दवच्छुद्धशब्दोऽवधारणगर्भः शुद्ध एव नित्यशुद्ध इत्यर्थः अक्षतायु-
भवश्च इति सिद्धशब्दस्यावधारणगर्भत्वात् सिद्धशब्दो नित्यपरत्वेन
हि व्याख्यातः तद्वत्, अनेन नित्यशुद्धत्वेन सकलचेतनव्यावृत्तिः, नित्यसिद्ध-
नामपि नित्यशुद्धत्वस्य भगवन्नित्येच्छायत्तत्वात् महाविभूत्याख्ये विभूति-
भूतस्य महाविभूतिमत्त्वायोगात् उभयविभूतिशेषित्वं समस्तचेतन-
व्यावर्तकं, परे ब्रह्मणीत्यनेन च चेतनव्यावृत्तिः सिद्धा, अपरात्मा हि

केवलब्रह्मशब्देनोक्तः, अवाच्यशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विजेति उत्तरत्र तु परमब्रह्मभूतस्येति हि परमात्मा वक्ष्यते प्रदेशान्तरे ऽपि परब्रह्मशब्दः परमात्मपर एव दृश्यते अतोऽपरमात्मव्यावृत्त्यर्थं महाविभूत्याख्ये परे ब्रह्मणीत्युक्तं, सर्वकारणकारणत्वं च भगवत एव जगद्व्यापारविरहितो हि मुक्तात्मा एव मुक्तप्रवृत्तिनिमित्तपौष्कल्यात् सर्वेश्वरे एव भगवच्छब्दो मुख्यवृत्तः नान्यत्रेत्यर्थः इममर्थं विवृण्वन्नवतरणः समुदायश्च भगवच्छब्दार्थमाह— (शेषमग्रे)

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page* 389. Vol. IX.)

ननु यजिश्रुतिकृतैवेयं प्रत्यभिज्ञा न यागोऽयमिति श्रुत्याववम्यते । न पुनः स इत्यऽन्य इति वा साधारण्येनैव तदभिधायिन्यां श्रुतौ सन्निधिकृतामभेदप्रत्यभिज्ञामनभिजानन्तः श्रुतिकृतां मन्यन्ते । तस्माद्विधिश्रुत्या कर्मभेदः । यदप्युक्तं, सन्निधिकृतप्रत्यभिज्ञाबाधाय गुणविधानार्था पुनः श्रुतिर्भवत्विति । तदप्ययुक्तं श्रुतिविरोधादेव, पदलक्षणया हि श्रुत्या धात्वर्थभावनयोरेव विधेयत्वं गम्यते न तत्सन्निधिमात्रेणैव बाधितुं शक्यते । यदि हि तनूनपादादि दध्यादिवदविधीयमानमनर्थकं स्यात् ततस्तस्यावश्यं विधीयमानत्वादनेकार्थविध्यशक्त्या कर्मानुवादाकाङ्क्षायां सन्निधिकृतमभेदज्ञानं विधिरनुमन्येत, यदा तु मन्त्रवर्णप्राप्तत्वात्तनूनपादादिदेवतानां तत्प्रख्यन्यायेन नामधेयत्वेनानुवादत्वेन वा संभवादानर्थक्यं, तदा श्रुत्यवगतं कर्मविधानं न बाधितव्यम् । तस्माद्यागभेदाद्भावनाभेदः तद्भेदाच्चापूर्वभेदः ॥

आग्नेयाद्याग्नेयादीनाम-ङ्गाङ्गिभावाधिकरणम् ।

सू० प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ ३ ॥

इदानीमभ्यासस्यापवादः क्रियते । "यदा ऽऽग्नेयोऽष्टाकपालोऽमावस्यायां पौर्णमास्यां चाच्युतोभवति तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन् ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत् ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावस्याया"मिति कालसंयुक्तानि वचनानि श्रूयन्ते । तथा "समिधो यजति" "तनूनपातं यजति" "आज्यभागौ यजति" इत्यकालसंयुक्तानि । तेषां सन्निधौ "य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत" इति वाक्यद्वयं श्रूयते । तथा "दर्शपूर्णमासाभ्यां स्वर्ग कामो यजेते"ति फलं श्रुतं तत्र विचार्यते किमनेन फलवचनगतेन यजिना सन्निहिताः सर्वे यागा राजसूयवत् फलं प्रति विधीयमानाः समप्रधानाः? किं वा य एव कालसंयुक्ता यागास्तेषामेव फलसंबन्धेन प्राधान्यमन्येषां तदङ्गते?ति तत्सिद्ध्यर्थमिदं विचारयितव्यम् ॥ य एवं विद्वानिति संयुक्तो यजतिप्रकृतानामाग्नेयादीनां पौर्णमास्यमावास्याकालसंयुक्तानां तन्निमित्तप्रसिद्धनामधेयत्वाभ्यां पौर्णमास्यमावास्यापदाभ्यां विशेष्यमाणावनुवदितारा? उतापूर्वयोः कर्मणोरेवं संज्ञयोर्विधातारा? विति। तत्सिद्ध्यर्थमप्येतच्चिन्तनीयं किमपूर्वकर्मविधौ रूपं लभ्यते? न वे?ति । ततोऽप्येतद्विचार्यते किं वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामित्येताभ्यां यदाऽऽग्नेयोष्टाकपाल इत्यादिभिर्वाक्यैः कर्मणोरनयोरूपं विधातुं शक्यते न वेति, ततोऽपि पुनर्विचारणीयं किं प्राप्तकर्मानुवादेनानेकगुणविधानमेकेन विधिना संभव?त्युत ने?ति ॥ अत्र चाभ्यासापवादार्थत्वादधिकरणस्य य एवं विद्वानित्येवं संयुक्तमेव वाक्यद्वयमधिकरणस्य विषयः, तच्च कर्मान्तरविधायकं समुदायानुवादकं वेत्येतावदेवाधिकरणशरीरम् । एतस्य तु फलं समप्रधानाङ्गाङ्गिभावविचारः । फलविचारविषयत्वेन चाग्नेयादिवाक्यानामुपन्यासो, नाधिकरणशरीरविषयत्वेन । तत्र पूर्वाधिकरणन्यायेन विधेः पुनः श्रुत्या कर्मान्तरत्वं पौर्ण-

मास्यमावास्यासंयुक्तयोः। किं पुनरनयोर्द्रव्यदेवतम्?। उच्यते। द्रव्यं ताव"च्चतुर्ध्रुवायां गृह्णातीत्यसंयुक्तोत्पन्नं ध्रौवमाज्यं प्रयोजनापेतम् । द्रव्यापेक्षिणां प्रकरणगतानां सर्वकर्मणामविशेषेण लिङ्गप्रकरणाभ्यामङ्गं भवदुपांशुयाजादीनामिवानयोरपि कर्मणोर्लभ्यते। वचनाद्वा, सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति । देवताऽपि वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावस्यायामिति वाक्याभ्यां पौर्णमास्यमावास्यासंज्ञयोर्मन्त्रविधानान्मान्त्रवर्णिकीति रूपलाभात्कर्मान्तरत्वम् । अन्यथा समस्तानुवादस्यानर्थक्यं न केवलं य एवं विद्वानित्येतयोरेवानर्थक्यं पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेत इत्यपि वाक्यद्वयमनर्थकं स्यात् । न ह्यनेनाग्नेयादीनां कालो विधीयते तेषामुत्पत्तिवाक्यैरेव कालस्य विहितत्वात्, यदा तु य एवं विद्वानित्येताभ्यां पौर्णमास्यमावास्यासंज्ञके कर्मान्तरे विधीयेते तदा तयोः कालविधानात्पौर्णमास्यां पौर्णमास्या-यजेतेत्यपि वाक्यद्वयमर्थवद्भवति तस्मात्कर्मान्तरविधानम् । यदा त्वेवं तदा सर्वे यागाः फलसंबन्धात्समप्रधानभूताः न हि तदा फलवाक्यगतं दर्शपूर्णमासपदमलमाख्यातमवच्छेत्तुमप्रसिद्धार्थत्वात् । कालनिमित्तं ह्येतद् द्विवचनान्तं च तच्चैषामुत्पत्तौ द्वित्वमाज्याभागादीनां न तेषु प्रातिपदिकं समर्थं कालयोगाभावात्तेषां त्वाग्नेयादीनां कालयोगस्तेषां बहुत्वात् द्विवचनानुपपत्तेरसमर्थं पदं । न च समुदायद्वयापेक्षया द्वित्वसंभवः, समुदायो हि पूर्वसिद्ध एव वा गृह्येत अन्नेव राजसूयवद्वा संपाद्येत, न तावत्पूर्वसिद्धमस्ति समुदायद्वयमेकावगत्यनुप्रवेशेन हि कर्मणामेकसमुदायापत्तिः, एकाभिधानेन चैकावगतिः । न चाग्नेयादीनां त्रिकस्य त्रिकस्यैकमभिधानमस्ति प्राक् सिद्धं य एवं विद्वानित्येतयोस्तदनुवादकत्वानङ्गीकरणात् उत्पत्तिवाक्येषु चैकैककर्मविधानेन समुदायाभावात्। तत्र तु फलवाक्यगतेन यजिना तन्त्रेण सर्वेषामुपादानात्समुदायापत्तिः स्यात् । तथा चैककर्मसमुदायनिष्पत्तौ राजसूयवत् द्विवचनानुपपत्तिः । न च दर्शशब्देन पौर्णमासशब्देन च त्रिकस्य त्रिकस्य पृथक् तन्त्रोपादानात्समुदायद्वयसिद्धिरिति वाच्यम्, तयोराख्यातपरतन्त्रत्वात् ।

तत्रत्राख्यातं वर्त्तते तत्राभ्यामपि वर्त्तितव्यं । न चाख्यातं तन्त्रेण त्रीन् यागान् प्रथममुपादाय पुनरन्यानुपादातुमर्हति सकृदुच्चरितत्वात् ।

न च समुदायद्वयं तन्त्रेण शक्यमुपादातुं, समुदायद्वयस्य प्रागसिद्धत्वात् । तदिदमाख्यातं बहून् यागान् सन्निहितान् फलमेकं प्रति तन्त्रेणोपादत्ते, तेषां च तदुपादानादेवैकः समुदायो निष्पद्यते ततश्च नामधेयमपि समुदाय्यभिप्रायं बहुवचनं, समुदायाभिप्रायं चैकवचनं लभ्येत न कथंचिद् द्विवचनं, द्विवचनान्तं चेदम् अतोऽप्रसिद्धार्थत्वात् नानेनाख्यातं विशेषे स्थापयितुं शक्यमिति अविशेषात्सर्वेषां फलसंबन्धात्प्राधान्यं, नामधेयमपि तत्परतन्त्रत्वात्सर्वेषामेवाव्युत्पन्नं द्विवचनप्रतिरूपकमिति प्राप्तेऽभिधीयते ॥

कर्मान्तराविधायित्वे स्यात्सर्वेषां प्रधानता
समुदायानुवादो तु रूपाभावाद्विमौ मतौ ॥ १ ॥
द्रव्यं कथंचिल्लभ्येत देवता तु न लभ्यते
लभ्यते मन्त्रवर्णाच्चेदाज्यभागाङ्गता यतः ॥ २ ॥
लिङ्गक्रमाभ्यां मन्त्राणामाज्यभागाङ्गता स्थिता
वचनन्तु व्यवस्थार्थमस्यार्थत्वादबाधतः ॥ ३ ॥

वार्त्रघ्नीवृधन्वतीनां हि लिङ्गक्रमाभ्यामाज्यभागाङ्गत्वेनाव्यवस्थया प्राप्तानां तादर्थ्याबाधेन व्यवस्थामात्रं वार्त्रघ्नी पौर्णमास्यां वृधन्वती अमावास्यायामित्येताभ्यां विधीयते लाघवादिति नैतेषां मन्त्राणां य एवं विद्वानिति विहितकर्मान्तरसंबन्धः येन मान्त्रवर्णिकी देवता स्यात् ॥ न च कल्पयितुं देवता शक्यते, विधिगम्यत्वाद्देवतात्वस्य । न चासत्यां देवतायां यागानुष्ठानं संभवतीति गत्यभावात्समुदायानुवादत्वं; तच पौर्णमासीसंयुक्तेन वाक्येनोपपद्यतेऽत्पौर्णमासीकालयुक्तानां त्रयाणां तन्त्रेणानुवादः, तेनैवैकानुवादेन त्रयाणामपि तेषामेकसमुदायापत्तिः, तदेकत्वाच्च पौर्णमासीमित्येकवचनम्, एवममावास्यासंयुक्तेऽपि । ततश्च समुदायद्वयसिद्धिः कालयोगाच्चाग्नेयादीनां प्रसिद्धार्थे दर्शपूर्णमासाभ्यामिति द्विवचनान्तं कालयोगि चोपपदं शक्नोत्याख्यातं विशेषे स्थापयितुमिति

तेषामेव प्राधान्यमितीयमेव च द्विवचनापेक्षितसमुदायद्वयसिद्धिः समुदायानुवादप्रयोजनमिति नानर्थक्यम् । यदुक्तं पौर्णमास्यां पौर्णमास्येत्येतदपि वाक्यद्वयमनर्थकं स्यादिति नानर्थकम्, आग्नेयादीनामेव त्रिकस्य त्रिकस्य सहप्रयोगार्थत्वात् उत्पत्तिवाक्येषु हि तेषां प्रत्येकं कालयोगाद्वैकप्रयोगता सिद्ध्येत् । अनेन तु वचनेन यथैकप्रयोगसिद्धिस्तथैकादशे वक्ष्यामः । तस्मादरूपत्वात्प्रयोजनवत्त्वाच्च समुदायानुवादत्वम् । इदानीं पूर्वपक्षवादी प्रकारान्तरेण प्रत्यवतिष्ठते ।

भवेदेवमरूपत्वे समुदायानुवादता ।
यदाग्नेयादिवाक्यैस्तु तयो रूपं विधीयते ॥

य एवं विद्वानित्येताभ्यां पौर्णमास्यमावास्यसंज्ञको यागौ विधीयेते यदाऽऽग्नेयोऽष्टाकपाल इत्यादिभिस्तु पौर्णमास्यमावास्यासंज्ञाभ्यां तावेव यागावनूद्याष्टाकपालादिद्रव्यमन्यादयश्च देवता विधीयन्ते इति नारूपत्वम् । एवं सर्ववाक्यानि विधायकानि भवन्ति न कश्चित्समुदायानुवादः । यागस्य प्रत्यक्षश्रुतौ न द्रव्यदेवतासंयोगादनुमातव्यो भवतीति श्रेयानयं पक्षः ।

उच्यते गुणो ऽनेकः प्राप्तकर्मानुवादतः ।
नैकेन विधिना शक्यो विधातुमसकृच्छ्रुतेः ॥

भावनांशोऽपि विधिस्तावदर्थभेदेन तत्र तत्र संक्रामति यत्परश्च विधिः स एव विधेयो नान्यस्तद्देशोऽपि । तद्यदाऽपूर्वकर्मपरो विधिर्भवति तदाऽस्यैकस्यानेकगुणविशिष्टस्य विधानाद्विशेषणानां चार्थापत्त्या विधिसिद्धेर्नासकृच्छ्रवणदोषः प्रसज्यते। यदा त्वन्यतः प्राप्तं कर्म भवति तदा तस्याविधेयत्वाद्विशेषणपरो भवति । तत्रानेकेषु विशेषणेष्वेकेन विहितेनेतरानाक्षेपात्तत्रापि श्रुत्यैव विधानं कर्त्तव्यमित्यावृत्तिप्रसङ्गः, विशेषणान्यपि यानि प्रागेव क्रियान्वयान्मिथः संबन्धितया शब्देन प्रतिपादितानि विनैव विधिना प्रसिद्धसंबन्धानि भवन्ति यथा पशुनेत्येकपदोपात्तानि जातिलिङ्गसङ्ख्याकारकाणि । तत्र हि प्रत्ययाविधेयमेकं प्रधानभूतं करणकारक-

मुपसर्जनीभूतजात्यादिविशिष्टं पदेन प्रतिपादितम् । प्रसिद्धा च कारकश-क्तिर्जात्यादीनां प्रमाणान्तरेण विनैव विधिनेति शक्यं प्राप्तकर्मानुवादेनापि तदेकं विधातुम् । भिन्नपदोपात्तान्यपि यानि सामानाधिकरण्येन षष्ठ्या वा क्रियान्वयात्प्रागेव मिथःसंबन्धं शब्दतो वस्तुतश्च विधिमनादृत्यैव लभन्ते यथाऽभ्युदितेष्टौ ये वेदिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम् । तत्र हि शिपिविष्टशब्दो यौगिकः शक्नोति संनिहितेन विष्णुशब्देन श्रुत्यैव सामा-नाधिकरण्यं प्रतिपत्तुम्, प्रसिद्धश्च विष्णुशिपिविष्टो मन्त्रार्थवादादिभिरिति तत्र केवलं शृतसहितवेदिष्ठसंबन्धो विधिना बोधयितव्यः यो विष्णुः शिपिविष्टः स शृतस्य वेदिष्ठानां च देवतेति । तेनैकार्थविधानाद्विधिप्र-त्ययस्य नासकृदुच्चारणापत्तिः । यत्र त्वाग्नेयोऽष्टाकपालः पौर्णमास्यामिति यद्यपि तद्धितस्य संनिहितद्रव्यवचनत्वात्सामानाधिकरण्यलक्षणः शब्दः संबन्धः प्रागेव पौर्णमासीसंबन्धादाग्नेयोऽष्टाकपालयोर्लभ्यते । तथाऽप्यसौ संबन्धः प्रमाणान्तरेणासिद्धत्वादत्रैव विधातव्यः । तं तु विधाय पुनः पौर्ण-मासीसंबन्धविधिरित्यावृत्तिप्रसङ्गः । न त्वेवं संभवति य आग्नेयोऽष्टाक-पालः स पौर्णमास्यामिति असिद्धत्वादाग्नेयस्याष्टाकपालस्य । अत एव वक्तव्यम् अष्टाकपाल आग्नेयः स च पौर्णमास्यामित्यावृत्तिः प्रत्ययस्य स्यात्तस्माद्य एवं विद्वानिति विहितकर्मानुवादेनात्र गुणविध्यसंभवादवश्य-मेव भावनान्तरं द्रव्यदेवताविशिष्टमाक्षिप्तयजिकं विधातव्यम् । न च

भावनान्तरं भावनान्तरस्य रूपं भवतीति सिद्धमरूपत्वमतः समु-दायानुवादो ॥

उपांशुयाजाऽपूर्वताऽधिकरणम् । सू० पौर्णमासीवदुपांशुयाजः स्यात् ॥ ५ ॥

अतः परं समुदायानुवादापवादकतयाऽधिकरणत्रयमारभ्यते । दर्श-पूर्णमासयोः श्रूयते "जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्यो ऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वाये"ति तथाऽग्नेया-

ग्नीषोमीयपुरोडाशयाज्यानुवाक्यायुगलयोर्मध्ये वैष्णवप्राजापत्याग्नीषोमीयाणि याज्यानुवाक्यायुगलान्याम्नातानि शाखाभेदेन। तत्र संशयः। किमुपांशुयाजमन्तरा यजतीति समुदायानुवादो विष्ण्वादिगुणकानां यागानामुत विधि ? रिति। तदर्थं किमस्य रूपमस्ति ? न वेति, तदर्थं च विष्णुरुपांशु यष्टव्य इत्यादिभिर्विष्ण्वादिदेवत्याः यागा विधीयन्ते ? । किम्वाऽयमर्थवाद इति। यदि विधयस्तत एषामेव यागानां विष्ण्वादिदेवत्याः याज्यानुवाक्याः लिङ्गक्रमाभ्यामङ्गं भवन्ति नोपांशुयाजमन्तरा यजतीत्यस्य सामर्थ्यापरिज्ञानात्तश्च मान्त्रवर्णिकदेवता ऽलाभाद्रूपः सन्नगत्या विष्ण्वादियागानां समुदायमनुवदति। यदा तु विष्ण्वादिश्रवणमर्थवादस्तदा याज्यानुवाक्या यागान्तराभावादुपांशुयाजमन्तरा यजतीत्यस्यैव क्रमादङ्गं भवन्ति दशमाधिकरणन्यायेनेति मान्त्रवर्णिकी देवता लभ्यते ध्रौवं च द्रव्यमिति रूपलाभाद्विधिरेव भवतीति ॥

तत्र विष्ण्वादिवाक्येषु तव्यप्रत्ययदर्शनात् ।
ऐकान्तिको विधिर्नात्र वर्त्तमानापदेशतः ॥

वैश्वानरवाक्ये हि यदष्टाकपालो भवतीत्यादिषु विधिपुरुषव्यापारयोरश्रवणाच्छब्दोपबन्धाद्वर्त्तमानापदेशेनार्थवादसरूपत्वात् द्वादशकपालं निर्वपेदिति विधियुक्तभावनाश्रवणात्तदुपक्रमोपसंहारमध्यवर्त्तिनामष्टत्वादीनां तदेकवाक्यत्वं न बाधितव्यमिति गुणफलविधानं निरस्तम्। इह तु सत्यपि जामित्वाजामित्वोपक्रमोपसंहारमध्यवर्त्तित्वे यच्छब्दाद्यनुपहतविधिश्रवणादजामित्वायेति च तेष्वेव प्रत्येकमुपक्रमोपन्यस्तजामित्वदोषपरिहारप्रशंसाऽवगमाद्वाक्यभेदमङ्गीकृत्य विधित्वमध्यवसीयते। जामि वा एतदिति चोपक्रमस्त्रयाणामपि तेषामनुषङ्गेण वाक्यशेषो भवति। सति च तेषां विधित्वे रूपाभावाद्वर्त्तमानापदेशाच्चोपांशुयाजं यजतीत्ययं जामित्वोपन्यासेन प्रस्तुतानां वक्ष्यमाणानां विष्ण्वादियागानां समुदायानुवाद इति प्राप्ते ऽभिधीयते ॥

जामित्वोपक्रमादेकमजामित्वोपसंहृतेः ।
वाक्यं तन्मध्यपाताच्च विष्ण्वादेरर्थवादता ॥

वाक्यशेषानुषङ्गस्तु गतौ सत्यां न युज्यते ।
अनूचीननिमित्तश्च जामिदोषः प्रकीर्त्तितः ॥
तेनान्तरालसंयुक्तो विधिस्तत्रैव निश्चितः ।
अजामित्वं च तस्यैव प्रशंसेत्यवधारितम् ॥

जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशाविति पुरोडाशनैरन्तर्ये जामिदोषाभिधानादुपक्रम एवैतदध्यवसितम् । नूनमन्तराले किंचिद्विधित्सितं तदन्तरालकरणादेवाजामित्वगुणेन प्रशंसितमिति । किं तद्विधेयमित्येतावदनवगतमन्तरालसंयुक्तं तद्विधानमित्यवगतमेव ॥

न च विष्ण्वादियुक्तेष्वनन्तरालसंयोगोऽस्ति येन विधिः स्यात् च-न्तराले चाविहितानां नाजामित्वेन प्रशंसाऽवकल्पते । पुरोडाशनैरन्तर्याज्जामिता स्यादतोऽन्यत्र क्वचिद्विष्ण्वादयो यष्टव्या अजामित्वायेति किन्तून सङ्गतं तस्मादुपांशुपाजमन्तरा यजतीत्युपांशुगुणको यागोऽन्तरालोपलक्षिते काले विधीयते तदर्थवादोऽयं विष्णुरुपांशु यष्टव्य इत्यादिमन्त्रवर्णप्राप्तविषयत्वाद्यनुवादेनेति न्याय्यम् । एवं चैकवाक्यत्वं न बाधितं भविष्यति न चानुषङ्गः सत्यां गतौ कल्पितो भवति । तस्माद्विधिरयं न समुदायानुवादः ॥

आघाराद्यपूर्वता-ऽधिकरणम् ।

सू० आघाराग्निहोत्रमरूपत्वात् ॥ ४ ॥

"अग्निहोत्रं जुहोति" "आघारमाघारयती"ति निर्गुणं कर्मसंज्ञायुक्तं श्रुतं तत्सविधौ दध्ना जुहोति ऊर्ध्वमाघारयतीत्यादीनि सगुणानि श्रवणानि । तत्र संशयः किं दध्ना जुहोतीत्यादिभिर्गुणविशिष्टा होमाघारा विधीयन्ते, तेषां च रूपवतामरूपोऽयमग्निहोत्रं जुहोतीत्याघारमाघारयतीति समुदायानुवादः? उतायमेव कर्मविधिरिति तत्रैव गुणविधय इति । तदर्थमिदं विचार्यते किमविज्ञातरूपं कर्म विधातुमेवाशक्यमुताविज्ञातरूपमपि तावद्विधाय पश्चाद्रूपज्ञानं संभवतीति । तथेदमपरं चिन्तनीयं प्राप्ते कर्मणि गुणकर्ममात्रविधानं संभवति? उत ने'ति । तत्र रूपापरिज्ञाने विशेषानवधारणात् ।

सामान्यस्याविधेयत्वाच्चानयोर्विधिसंभवः ॥

न च दध्यादिभिर्वाक्यैः प्राप्तकर्मानुवादतः ।
गुणमात्रं विधातव्यमव्यापारात्मकं यतः ॥

अग्निहोत्रं जुहोतीति होमसामान्यमवगम्यते । न च तद्वि-धानयोग्यं, विशेषस्तु योग्यः स चानुरञ्जकाधीननिरूपणो न जुहोतीत्येतावता गम्यते । न चेह द्रव्यदेवतादिकमनुरञ्जकमुपात्तं यद्वशेन विशेषावधारणं स्यादनिरूपितश्च विशेषो न विधिनाऽन्वेतुं योग्यः तेनावगतस्य सामान्यस्यायोग्यत्वाद्योग्यस्य च विशेषस्यानवगतत्वाच्चात्र विधिः संभवति तथाऽग्निहोत्रमिति संज्ञा च विशेषविषयत्वादनवगते विशेषे दुर्घटैव । यदा चैवं विधिरेवानिष्पन्नस्तदा न दध्यादिवाक्यैरपि गुणविधानं शक्यं विहिते कर्मणि तदनुवादेन तैर्गुणो विधातव्यो न चात्र विहितं कर्मेत्युक्तम् । अपि च यद्यप्यत्र कर्म विधीयते तथाऽपि न शक्यते गुणो विधातुमव्यापारात्मकत्वात्, चेतनप्रवर्त्तनात्मको हि विधिर्न चासौ स्वव्यापारादन्यत्र प्रवर्त्तयितुं शक्यते । तेन दध्यादिवाक्यैरपि स्वस्वव्यापारे एव विधातव्यः । तद्विशेषगुणतया च दध्यादीनां विधिरङ्गीकर्त्तव्यो न चाग्निहोत्रवाक्यविहितो होमः पुनरत्र दधिविशिष्टो विधातुं शक्यते विहितस्य विधानायोगात् तेन दधिमात्रमवशिष्यते तच्चाविधेयमित्युक्तम् । अतोऽत्र दध्यादिविशिष्टा होमा विधीयन्ते । तथा चाग्निहोत्रमित्यस्यान्यतोऽपि रूपालाभात्समुदायानुवादत्व,मेव माघारवाक्येऽपीति प्राप्ते ब्रूमः ॥

प्रकृतानामसद्भावात्कर्मणां नानुवादता ।
न हि दध्यादिवाक्येषु दध्याद्याक्षिप्तशक्तिना ॥
विधिना शक्यते कर्म विधातुमितरत्र तु ।
अनन्याक्षिप्तशक्तित्वाद्विधिः कर्मैकगोचरः ॥

"दध्ना जुहोतीति ह्यप्राप्तदध्याद्याक्षिप्तशक्तिर्विधायको ऽनेकविधि-निमित्तगौरवपरिजिहीर्षया कर्मानुवादं प्रार्थयमानो यदि न कथंचिदपि प्राप्तिं लभते ततो विशिष्टविधिमङ्गीकरोति । सत्यां त्वग्निहोत्रादिवाक्येन कर्मणः प्राप्तौ तदनुवादेन गुणमात्रविधानं लाघवान्न तु विशिष्टविधानम् । अतश्चाविहितत्वाद्धोमानामप्राप्तत्वादग्निहोत्रवाक्येऽनन्याक्षिप्त-

शक्तित्वात् विधायकः कर्म विधत्ते । यद्यपि तत्र रूपं न ज्ञायते तथाऽपि विधिवशादेव सामान्यमतिक्रम्य तल्लक्षितोऽन्यत्राविहितो होमविशेषोऽयमित्येतावतैव गम्यमानत्वाच्च विधानासम्भवः, लक्षितविशेषविषयत्वेन संज्ञोपबन्धोऽप्युपपन्नः । तस्य दध्यादिवाक्यरूपविधानाभावाद्रूपत्वं स्वरूपेण विधेयमपि दध्यादिव्यापारविशिष्टं शक्यं विधातुं दध्ना जुहुयादिति । यद्यपि न क्रियां विहाय द्रव्यविधिः प्रतीयते तथाऽपि तस्यामेव विशिष्टायां प्रतीयमानो विधिः स्वरूपेण तस्याः प्राप्तत्वादप्राप्तगुणमात्रपरतामवलम्बमानः फलतो गुणविधिरित्युच्यते न प्रतीतितः । तेनात्र गुणमात्रविधानम् अग्निहोत्रं जुहोतीति प्रकृतकर्माभावादूपलाभाच्च विधिरेव न समुदायानुवादः ॥

पशुसोमापूर्वताऽधिकरणम् ।

सू० द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन ॥ ५ ॥

"अग्नीषोमीयं पशुमालभेते"ति श्रूयते । तथा "हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस" इत्यादीनि । तथा सोमेन यजेतेति श्रुतं तत्राऽप्यैन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णातीत्येवमादीनि । तत्र संशयः किमवद्यतिगृह्णातिभ्यां चोदितानां कर्मणामिवालभतियजती समुदायस्यानुवादितारौ? उतापूर्वयोः कर्मणोर्विधारौ? इति, तदर्थे च किमैन्द्रवायवादिवाक्यैर्यागा विधीयन्ते? किम्वा संस्कारमात्रमिति तत्र

"ऐन्द्रवायवमित्यादि द्रव्यदेवतसङ्गतेः ।
याग एव विधातव्यो गृह्णातौ न हि देवता" ॥

ऐन्द्रवायवमित्यादि तावद्देवतातद्धितोऽयम् ॥ न च देवतायागादन्येन संपादयितुं शक्यते येन ग्रहणेनैन्द्रवायवं कुर्यादिति वाक्यार्थः स्यात् । न चैन्द्रवायवं सन्तं गृह्णातीति संभवति असिद्धत्वादैन्द्रवायवस्य तेनावश्यं यागा एव विधातव्याः ॥ ननु नावश्यं देवतातद्धित एवायं तस्येदमिति संबन्धमात्रेऽपि तस्य स्मरणात्तेनैन्द्रवायूद्देशविशिष्टव-

हणमात्रविधिः संभवत्येव भवेदेवमैन्द्रवायवादिषु परिहारः मत्वतीयादिषु देवतायामेव छविधानादवश्यं देवतासंबन्धोऽङ्गीकर्त्तव्यः । तथा चैन्द्रवायवादिष्वपि तथाऽस्तु किमनिरूपितसंबन्धमात्राश्रयणेन तस्माद्यागविधानम् । एवं च सोमेन यजेतेति देवताऽभावादरूपः सन्समुदायानुवाद एव भवति यजिः सोमशब्देन तत्रैव गृह्णाति नासामान्याक्षिप्तं द्रव्यं नियम्यते । यद्वाऽरवाधारया गृह्णातीति गुणवाक्येन धारासमर्थ इव द्रव्यमात्रावगमात्तत्प्रकृतित्वेन सोमविधानं व्रीहिभिर्यजेतेतिवत् ॥ ननु विकृतौ प्राप्तायां प्रकृतिविधानं युक्तं । न चैन्द्रवायवादिवाक्येषु पुरोडाशवत् विकृतिरूपात्ता यस्याः प्रकृतिर्विधीयेत । यदि तु सोममभिषुणोति सोमं यावयतीत्यादिभिः सोमरसस्य प्रकृतत्वात्तद्विषयत्वाच्च गृह्णातेः प्राप्त एव विकृतिभूतो रस इत्युच्यते ततस्तस्य निर्ज्ञातसोमप्रकृतित्वाच भूयः सोमविधानं संभवति । न चाऽरवाधारयेत्यन्तोऽपि विकृतिप्राप्तिरुदकस्यापि द्रवद्रव्यस्य संभवात् । उच्यते यदि विकारानुवादेन प्रकृतिर्विधातव्या स्यात्ततोऽयं दोषः स्याच च व्रीहिभिर्यजेत इत्यपि पुरोडाशानुवादेन व्रीहिविधिः पुरोडाशस्यानुपात्तत्वात् । व्रीहिभिर्यजेतेति च करणविभक्तेर्द्रव्यसंबन्धाभावात्तेन यागं प्रति करणत्वेन विहिता व्रीहयः पुरोडाशवत्तु यागे साक्षात्करणत्वासंभवात्तत्प्रकृतित्वेनैव करणं भवन्तीति प्रकृतिद्रव्यविधिरित्युच्यते ॥ न च प्रकृतित्वेनैव विधानात् एवमत्रापि यागं प्रति करणत्वेन विहितः सोमो धारासमर्थद्रव्यावत्तु यागे तत्प्रकृतिर्भवति, सम्भवति च सोमप्रकृतिकं द्रवद्रव्यमिति युक्तं प्रकृतिविधानम् । अथ सोममभिषुणोतीत्यादिभिः सोमरसस्य प्राप्तत्वात् सोमशब्दोऽप्यनुवाद एव तत्प्रख्यन्यायेन नामधेयं भवति । तदेवं त्रेधा पूर्वपक्षः सोमशब्देन द्रव्यं विधीयते? प्रकृतिद्रव्यं वा, नामधेयं वे?ति । यजिस्तु सर्वथैव समुदायानुवादः । तथा च यागभेदादैन्द्रवायवादीनां समुच्चये सति दशैतानध्वर्युः प्रातः सवने ग्रहान् गृह्णाति आश्विनो दशमो गृह्यते तं तृतीयं जुहोति इत्यादि क्रमसमुच्चयदर्शनमुपपद्यते । अन्यथा त्वेकत्वाद्यागस्य तदर्थानां च देवतानां ग्रहाणां च विकल्पे सति क्रमादिदर्श-

नानुपपत्तिः। यदि च सोमेन यजेतेति यागविधिः स्यात्ततः सोमशब्दस्य लतावचनत्वात्तयैवोत्पत्तिशिष्टया यागः साधनीय इति नैन्द्रवायवादिवाक्यैः रसविषयैर्गुणविधिः संभवतीत्यानर्थक्यं तेषां स्यात्। अभिषवादिभिश्चोत्पत्तिशिष्टा लता न रसीकर्तुं शक्यते। तस्मादैन्द्रवायवादिभिरेव यागविधिः। एवमग्नीषोमीयं पशुमालभेतेत्यत्रापि यागविधौ समुत्पत्तिशिष्टपशुजातीयद्रव्यमेव यागसाधनमिति हृदयाद्यवदानवचनानि तत्र गुणविधित्वेनासम्भवादनर्थकानि स्युः। अतो हृदयादिवाक्यविहितहृदयादिद्रव्यकर्मानुवादेन देवताविधानमेतदिति वक्तव्यम्। पशुशब्दोऽपि हृदयादीनां छागस्य वपाया मेदस इति मन्त्रवर्णाच्छागप्रकृतित्वात्तेषामेव विकृतौ प्रकृतिवदुपचारादनुवादः। कथं पुनः कर्माणि हृदयादिवाक्यैर्विधीयन्ते यान्यनूद्य देवताविधानम् उच्यते द्वावत्र पक्षौ एकस्तावदवदानमात्रं विधीयते। द्रव्यदेवतासंयोगाश्रवणात्त्यजियज्यश्रवणाच्च तदाक्षिप्तं तु स्पर्शनमालभतिनाऽनूद्यते पशुशब्देन तु हृदयादिप्रकृतिद्रव्यवाचिना उपचाराद्धृदयादिद्रव्यम् अग्नीषोमीयशब्देन तु हृदयादिप्रकृतद्रव्ये ऽग्नीषोमीयत्वेन विहिते तत्रैतावन्तो यागाः कल्प्यन्त इति। अन्यस्त्वसत्यपि देवतासंबन्धश्रवणे हृदयाद्यवदानानां सान्नाय्यावदानप्रकृतित्वात्तद्वदत्र यागसाधनत्वं हृदयादीनामभिषवयुक्तपूतीकवल्लभ्यते। यागानुवादेनैव देवतादिविधिरिति तस्मात्समुदायानुवाद इति प्राप्ते ऽभिधीयते

> द्रव्यान्तरेण संयोगान्नानुवादो ऽवकल्पते।
> तेन यागविधौ एतावन्ये गुणविधायिनः॥

पशुशब्दो हि जातिवचनोऽतज्जातीयेषु विना कारणेन लक्षणया भवितुमर्हति श्रौतपशुविशिष्टयागविधानोपपत्तेः।

न च पशुविशिष्टयागे विहिते हृदयादिवाक्यानां गुणविधित्वासंभवः पशोरेव हृदयादिद्वारेण करणत्वोपपत्तेः प्रणाड्याऽपि हि येन यत्क्रियते भवति तत्करणं तस्य। यथा लोके गोमयेन पचतीति, वेदेऽपि तुषपक्वा भवन्ति यागेन स्वर्गमिति तस्मादेको यागः पशुविशिष्टो ऽग्नीषोम-

देवत्यो विधीयते । हृदयादिवचनानि तथैव संस्कारमात्रविधानानि तथा सोमेन यजेतेति सोमशब्दो लतावचनः । न चासौ प्रकृतेष्वैन्द्रवायवादिषु हविष्ट्वेन विधातुं शक्यते धारया गृह्णातीति गुणवाक्यसंनिधापितस्य द्रव-द्रव्यस्यैन्द्रवायवमिति तद्धितेन देवतासंबन्धित्वेन श्रुत्याभिधानाच्च तावद्धु-विर्विधानम् । नापि तत्प्रख्यन्यायेन नामधेयत्वं सोमरसस्य प्रागस्माद्व-चनादप्राप्तेः । नन्वैन्द्रवायवमिति प्रकृताभिधायी तद्धितोऽभिषवादिवाक्यैः प्रकृतं सोमरसमभिधत्ते । नैवम् अपश्चार्धारयेत्यनेन व्यवधानादभिषवादि-वाक्यानामप्रकृतत्वाद्धारासमर्थद्रव्यमात्रमत्र प्रकृतम् न च धारावाक्यं सोमरसविषयं धारामात्रश्रवणात्तन्मात्रेण च वाक्यार्थोपपत्तेः सत्यपि संनिधाने तद्विषयत्वं धारावाक्यस्याप्रमाणकम् । संस्कारवाक्येषु हि लौकिकस्य संस्कारानुपपत्तेरपूर्वसाधनविशेषलक्षणाया कथंचित्प्रकृतग्रहणं युक्तम् । धारावाक्ये तु ग्रहणोद्देशेन धारामात्रविधानाच्च प्रकृतापेक्षा । किंचास्मिन्पक्षेऽयमपि नियमो नास्ति य एव क्रये सोमः स एवाभिषवे य एवाभिषवे स एव यावते इति सर्वेषां क्रयादिवाक्यानां लौकिकग्रहणे-नारादुपकारकक्रयादिविधायिनां मिथोऽनपेक्षत्वात् ।

न च प्रकरणाद्विशेषलाभः प्रकरणस्याविशेषकत्वात् । नाप्यधिकारा-द्विशेषसिद्धिस्तुल्येषु नाधिकारः स्यादिति हि द्रव्यसंख्यां हेतुसमुदाय-मित्यत्र वक्ष्यति । यदि तं सोममभिषुणुयादिति तच्छब्दः श्रूयते ततः सा वैश्वदेवीतिवत्प्रकृतग्रहणं भवेत् सोममात्रश्रवणाच्च प्रकृतगामित्वम् । एवं धारावाक्येऽपि ऐन्द्रवायवादिवाक्येषु प्रकृतगामिष्वपि धारासमर्थमेव द्रव्यं गृह्यते न सोमरसस्तस्याप्रकृतत्वादित्युक्तम् । अतो न तत्प्रख्यन्यायेन नामधेयत्वम् । एतेनैकदेशिनः संस्कारैर्वाक्यैः सोमस्य प्राप्तिमभिदधाना-निरस्ताः तेषां सिद्धान्तेऽपि तथैव सोमप्राप्तेः सोमपदं नामधेयं स्यादि-त्यास्तां तावत् । एवं तावद्धविष्ट्वेनाविधानं नापि नामधेयत्वमित्युक्तम् । प्रकृतिद्रव्यविधानं त्ववशिष्टं तन्निराकरणार्थं च सूत्रम् अचोदकाश्च संस्कारा इति । यद्यैन्द्रवायववाक्येषु यागो विधीयेत ततः स्यात्प्रकृति-द्रव्यविधिः, तेषु तु ग्रहणमात्रमेव देवताविशिष्टं विधीयते । तन्मात्र-

श्रवणात्संभवति च ग्रहणेनैन्द्रवायवं कुर्यादिति विधिः । यद्यपि ग्रहणमात्रेण तद्देवत्यता न भवति यागसहितेन तु ग्रहणेन शक्यते तद्देवत्यता कर्तुम् । अतो देवताविशिष्टे ग्रहणे चोदिते यागमन्तरेण तदनुपपत्तेः, यागापेक्षायां सोमेन यजेतेत्येतत्सर्वत्र द्रव्यदेवतासंबन्धानुपपादयद्यागान्तरकल्पनां निरुणद्धि दशमुष्टीर्मिमीत इति च परिमाणश्रवणात् तावतश्च सोमस्याल्पपरिमाणैः पात्रैरसति समुच्चये ग्रहणासंभवाद् यथागृहीतानामेव च होमादुपपद्यं क्रमसमुच्चयदर्शनमाश्विनो दशमो गृह्यते तं तृतीयं जुहोतीति । त्रयाणामपि समुदायानुवादापवादाधिकरणानां पूर्वपक्षे कर्मभेदः सिद्धान्ते त्वभेद इति लक्षणसंबन्धः ॥

संख्याकृतकर्मभेदाधिकरम् ।

सू० पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यात् ॥ ६ ॥

गतोऽभ्यासप्रसङ्गः । संख्यया भेद इदानीमभिधीयते । अत्र कर्मोत्पत्तिवाक्यगताकर्मसमानाधिकरणसंख्योदाहरणम् । यथा तिस्र आहुतीर्जुहोतीति तत्रैको होमो विधीयते बहवो वेति संदेहः ।

तत्र आख्यातस्य सकृच्छ्रुत्या कर्मैकत्वेऽवधारिते ।
संख्यासपत्तिरभ्यासात्प्रयाजैकादशत्ववत् । उच्यते
स्यादेवं यदि कर्मैक्यं प्रागस्मादवधारितम् ।
आख्यातमात्रात्तत्सिद्धौ तावतश्चाप्रमाणता ॥

एकादशप्रयाजानिति हि निर्ज्ञातसंख्येषु प्रयाजेषु श्रुतासंख्ययुक्तमभ्यासेन पूर्यते । न चैवमिह कर्मैकत्वं विज्ञातम् । न ह्याख्यातमात्रं प्रमाणं यतः कर्मैकत्वं प्रमितं स्यात् यावन्ति वाक्ये पदानि प्रयुज्यन्ते तावतां संहत्य प्रामाण्यम् । अतो विदधदेवाख्यातं सङ्ख्यासामानाधिकरण्याद्बहूनि कर्माणि श्रुतसङ्ख्याविशिष्टानि विधत्त इति सिद्धो भेदः । अत्र कर्मण्येव सङ्ख्याश्रवणात्पूर्वपक्षशङ्का मन्देति मत्वा भाष्यकारः सप्तदश प्राजापत्यानीत्युदाहरत् । अत्र द्रव्यगतसङ्ख्या नातीव स्फुटः कर्मभेद इति विचार्यते । किं सप्तदशपशुद्रव्यक एको यागो विधीयते? । किं वैकैकपशुद्रव्यकाः सप्तदशैते यागा इति तदर्थं विचार्यते । प्राजापत्यानीति

Digitized by Google

प्रकृत्या प्रजापतिर्देवताऽभिधीयते तद्धितेन पशुद्रव्यं बहुवचनेन बहुत्वम् । तत्र तद्धितोऽर्थो बहुत्वेन प्रथममन्वितः पश्चात् प्रजापतिना देवतया संबध्यते । पशुश्च पशुश्च पशुश्च पशवस्तेषां प्रजापतिर्देवतेति तदा बहुभिः पशुभिर्व्यासज्यैकदेवता संबध्यते इति द्रव्यदेवतासंबन्धैक्यादेको यागो भवति । किं वा प्रथमं प्रजापतिनाऽन्वितः पशुः पश्चाद्बहुत्वेन संबध्यते प्रजापतिर्देवता अस्येति प्राजापत्यः । प्राजापत्यश्च प्राजापत्यश्च प्राज्यापत्यश्च प्रजापत्या बहव इति तदा भिन्नैर्द्रव्यदेवतासंबन्धैर्भिन्ना एव यागाः कथ्यन्ते तत्र प्राजापत्यशब्देन देवतासंबन्धोपसर्जने द्रव्यमेव प्राधान्येनोच्यते । यच्च प्रधानं तस्यैवार्थान्तरेण बहुत्वेन संबन्धो नोपसर्जनस्य देवतासंबन्धस्य ॥ ननु देवताविशिष्टं द्रव्यमभिहितं विशिष्टेनैव स्वरूपेण संख्याऽन्वयः स्यान्न स्वरूपेण । न द्वौ त्रय इत्यत्रानैकान्त्यान्न हि द्वावित्यत्र द्वित्वविशिष्टेन रूपेण द्विवचनाऽभिहितसङ्ख्यायोगः । तथा सति द्वाविति चत्वारः प्रतीयेरन्, एवं त्रय इति नव ॥ न च तथा, तस्माद्यथा तत्र द्वित्वविशिष्टमपि द्रव्यं द्विशब्देनोक्तं स्वरूपेणैव द्विवचनाभिहितसङ्ख्यायोगं प्रतिपद्यते तथाऽत्रापि तद्धिताभिहितं सङ्ख्यायोगं प्रतिपद्यते तथाऽत्रापि तद्धिताभिहितं द्रव्यं स्वरूपेणैव बहुत्वयोगं प्रतिपद्यते न स्वरूपसोपसर्जनम् । तस्मादेकं कर्म सप्तदशपशुद्रव्यकम् । कथमिदानीं चोदकप्राप्तमेव पशुनिष्पन्नैकादशावदानद्रव्यत्वं यागस्यानुग्रहीतव्यं । मानुषा हि न चोदकानुसार्युपदेशनिर्णयः । यथोपदेशं त्वतिदेशवर्णना, तस्मादेकं कर्मेति प्राप्ते ब्रूमः

> यदि कर्म भवेदेकमेकः स्याच्चोदकस्ततः ।
> तेन चैकगणप्राप्तेः पशुसङ्ख्या विरुध्यते ॥

सवनीयविकारा ह्येकादशिनः तद्विकाराश्च प्राजापत्यास्तत्र चैकपशुनिष्पन्नैकादशावदानद्रव्यत्वं यागस्यासीदित्यत्राप्येकत्वे यागस्य चोदकोऽप्येकमेवावदानगणमतिदिशे,त्तस्मादत्र सप्तदशानां प्राजापत्यत्वं न संपादितं स्यात् । न चोपदेशेनातिदेशस्य बाधो, विरोधाभावात्, प्राजापत्यानीत्युपदेशस्योभयथाऽप्युपपत्तेः । तेनार्थद्वयसाधारणमुपदेशवाक्यं प्रकृतिवच्छ-

च्छेन वाक्यशेषभूतेनानेककर्मपरमवधार्यते । कर्मभेदे हि प्रतिकर्मभिन्नै-श्चोदकैस्तावतां गणानां प्राप्तेः सिद्ध्यति सर्वेषां प्राजापत्यत्वम् । एवं वसन्ताय कपिञ्जलानालभत इत्यादिष्वपि चोदकवशेनैव यावद् द्रव्यं यागभेदः । ये तु चोदकमनादृत्य द्रव्यस्य तद्धिताभिहितस्य विशिष्टस्यैव बहुत्वावगमात् भेदमाहुस्तेषां चतुर्थ्यभिहितदेवतेषु वसन्ताय कपिञ्जला-नित्यादिषु न कर्मभेदः सिध्येत्, तत्र प्रतिपश्ववदानगणप्राप्तिर्न स्यात् । अथ तत्र चोदकवशाद्भेद,स्तथैव सर्वत्रास्तु, किमतद्व्यापिना तद्धितोपन्या-सेनेत्यास्तां तावत् ॥

संज्ञाकृतकर्मभेदाधिकरणम् । **सू० संज्ञा चोत्पत्तिसंयोगात् ॥ ७ ॥**

उद्देशक्रमस्यातन्त्रत्वाद्बहुविचारं गुणप्रकरणान्तरनिमित्तं भेदमुपेत्य संप्रति संज्ञातो भेदोऽभिधीयते । ज्योतिष्टोमं प्रकृत्य श्रूयते । "अथैष-ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेते"ति । तत्रैतच्छब्दपरामृष्टानां ज्योतिरादीनां यजिसामानाधिकरण्येन यागना-मत्वं तावत्सिद्धम् । तत्र संशयः किं प्रकृतमेव ज्योतिष्टोमं ज्योतिरा-दिशब्दैरनूद्य सहस्रदक्षिणाख्यो गुणो विधीयते ? । उत कर्मान्तराण्येवं-नामान्येवंदक्षिणानि विधीयन्त ? इति । तत्र प्रकरणादेतच्छब्दस्य च प्रकृ-ताभिधायित्वात्तत्सामानाधिकरण्याच्च ज्योतिरादीनां प्रकृतद्वानाप्रकृत-कल्पनायोगाच्च पूर्वस्यैव गुणविधिरिति प्राप्ते ब्रूमः ।

नामान्तरश्रुतावर्थे भेदस्तावत्प्रतीयते ।
बलवद्बाधकाभावात्सावन्यथात्वं प्रपद्यते ॥

न चात्र बलवदस्ति बाधकं, येन संज्ञानिमित्तो भेदोऽपोह्येत संज्ञाश्रुत्या चार्थान्तरावगमात्प्रकरणविच्छेदे जाते ऽर्थान्तरकलुषितायां बुद्धावुपनियतत्सहस्रदक्षिणेन यजेतेति न ज्योतिष्टोमं गन्तुमर्हति तस्मात्कर्मान्तराणि । एवं चाथैष ज्योतिरित्यादेरथैषस्त्वमन्यथानर्थक्यं स्यात् एतेन सहस्रदक्षिणेनैतावतैव ज्योतिष्टोमस्य गुणविधिसिद्धेरेतच्छ-ब्दस्य प्रज्ञायमानकर्मान्तरवचनत्वेनाप्युपपद्यत इति सिद्धः कर्मभेदः ॥

(शेषमत्रे)

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम् रु०	आ०
१ काशिका पंडितवरवामनादित्यविरचिता		
पूर्वार्धम्	..	.. ॥
उत्तरार्धम्	१०	.. ॥
२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	.. ॥
३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	.. ।)
४ लघुकौमुदी वरदराजकृता	१	.. =)
५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८	.. ॥
६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४	.. ॥
८ मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	.. ॥
९ शाश्वतधर्मदीपिका	१	.. ॥
१० अमरकोश सटीक	४	.. ॥
११ योगवार्तिकम्	३	.. ।)
१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	.. ॥
१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-देशाधिपति रचिता	४)	.. ॥
१४ शीतपदार्थनिर्वचनम्	३	.. ।)
१५ वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४)	.. ॥

Digitized by Google

CONTENTS.

		Page.
SAṂKSHEPAŚÁRÍRAKAM	...	401
KHAṆḌANAKHAṆḌAKHÁDYAM	...	412
ŚRÍBHÁSHYAM	...	425
ŚÁSTRADÍPIKÁ	...	441

Digitized by Google

OCT 31 1887
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9.] SEPTEMBER 1887. [Vol. IX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

CONTENTS.

		Page.
SAṂKSHEPAŚÁRÍRAKAM	...	401
KHAṆḌANAKHAṆḌAKHÁDYAM	...	412
ŚRÍBHÁSHYAM	...	425
ŚÁSTRADÍPIKÁ	...	441

Digitized by Google

OCT 31 1887
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9.] SEPTEMBER 1887. [Vol. IX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 *per annum.*] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page* 411. VOL. IX.)

मू० ॥ तस्मादशेषजगदेकनिदानभूत-
मज्ञानमात्मविषयं न विरुद्धमूचुः ॥
वेदावसानवचनानि मुनीश्वराश्च
स्थानेषु भूरिषु ततोऽवकरो न कश्चित् ॥ १३१ ॥

टी० एवमनादिभावरूपाज्ञानमुक्तमेव विस्मरणशीलं प्रत्युपपाद्यास्य जगदुपादानत्वं फलितं वदन्सुषुप्तौ तद्भावाभाववादिश्रुत्याचार्यवचसामविरोधं प्रागुक्तमुपसंहरन्नात्मनो नित्यशुद्धत्वादि फलितमाह । तस्मादिति । आत्मविषयमधिकृत्य विरुद्धं नोचुरित्यर्थः । वेदावसानवचनानि सता सोम्य तदा संपन्नो भवति सति संपद्य न विदुरित्येवमादीनि । तद्व्याख्यातारो मुनीश्वराः । भूरिषु बहुषु । स्थानेषु प्रदेशेषु । अवकारोऽशुद्ध्यादिबन्धः ॥ १३१ ॥

मू० ॥ साक्षित्वमात्मतमसा मतिकञ्चुकेन
मातृत्वमेतदपि नेह सुषुप्तिकाले ॥
यद्धेतुकं भवति यन्न हि तद्विना तत्
संभाव्यते न च तदत्र सुषुप्तिकाले ॥ १३२ ॥

टी० एवमज्ञानमस्त्यवगतं च सुषुप्तिकाल इत्यत्रोक्तमज्ञानसत्त्वमुपपाद्य तथापि तदवगतिर्न संभवति, तदा अवगन्तुः प्रमातुरभावात्, भावे वा तदुपाधेरहङ्कारस्यापि तदा सत्त्वापत्तेः सुषुप्त्यभावापातात्, न च साक्षिणैतदवगतमिति वाच्यम्, लोके प्रमातुरेव साक्षित्वावगमात्, विनाहङ्कारं कूटस्थासङ्गचैतन्यस्य साक्ष्यसंबन्धायोगेन साक्षित्वासंभवाच्चेत्याशङ्क्य सुषुप्तावज्ञानमात्रस्य साक्ष्यत्वात्तत्संबन्धस्यानादेरपि चैतन्यस्वभावानुरोधेनाज्ञानमात्रप्रयुक्तत्वोपपत्तेरहङ्कारस्य तत्रानुपयोगादसंभवाच्चाज्ञा-

Digitized by Google

नोपहित एव चिदात्मा तदाऽज्ञानसाक्षी तद्द्वाराऽज्ञातवस्तुसाक्षी च, स एव चान्यदाहङ्कारेणाप्युपहितोऽहङ्कारतद्धर्मसाक्षी अन्यथातिप्रसङ्गात्, तदुभयोपहित एव मानजन्यवृत्तिमपेक्ष्य ज्ञातवस्तुसाक्षी भवतीति प्रमातुः साक्ष्यस्याहङ्कारविशिष्टस्य न क्वापि साक्षित्वमित्याशयेनाह । साक्षित्वमात्मतमसेति । तर्हि साक्षिणैव सर्वप्रतीतिसंभवात् किं प्रमात्रेत्याशङ्क्य लोकसिद्धप्रमात्रादिव्यवहारस्य निर्विषयत्वायोगात्तदभावे कर्तृत्वाद्ययोगाच्च स एव बुद्धितादात्म्यापन्नः प्रमाश्रयतया प्रमाता जागरिते भवति । सुषुप्ते तु बुद्धेरेवाभावान्न तद्भावोऽपीत्याह । मतिकञ्चुकेनेति । बुद्ध्यभावेऽप्यज्ञानशबलस्य तदा प्रमातृत्वं किं न स्यादित्याशङ्क्य प्रमाया बुद्धिपरिणामविशेषसंपिण्डितचैतन्यरूपत्वात्तत्कर्तृत्वरूपप्रमातृत्वं बुद्धिसंपिण्डितस्यैव घटते नाज्ञानमात्रशबलस्येत्यभिप्रेत्याह । यद्धेतुकमिति ॥ १३२ ॥

मू० । अज्ञानमस्ति सकलं च सुषुप्तिकाले

तत्र प्रलीनमिति यद्यपि नास्ति पुंसः ॥

स्पष्टानुभूतिरपवर्गविलक्षणत्वा-

देष्टव्यमेव तु सुषुप्तिभुवस्तथात्वम् ॥ १३३ ॥

टी० ननु सुषुप्तौ बुद्ध्यभाव एव कुतो येन तदधीनप्रमातृत्वं न भवेत्, न हि तदा बुद्धिर्नेत्यनुभवोऽस्ति, न चाननुभवादेव तदभावः कल्प्यत इति वाच्यम्, तथा सत्यज्ञानस्यापि स्पष्टमननुभवाद् निर्विकल्पकमात्रस्य च तदसत्त्वशङ्काऽनिवर्तकत्वादज्ञानस्याप्यभावः स्यात्, तत्र लीनं कार्यजातं सूक्ष्मरूपेण तिष्ठतीत्येतदप्यननुभवादेव न सिद्ध्येदिति चेत्तत्राह । अज्ञानमस्तीति । बुद्धेः सविकल्पकतया यावत्सत्त्वं साक्षिभास्यत्वात्सुषुप्ते तदप्रतिभासात्तत्सत्त्वे सुषुप्तिभङ्गप्रसङ्गाच्च तदा बुद्धेरभाव आवश्यकः, अज्ञानादेस्तु स्पष्टमनुभवाभावेऽपि तदा तदस्तितामात्रमुपेयम्, इतरथा कारणमात्राभावान्मुक्तिरेव तदा स्यादिति पुनरुत्थानं न स्यात्, तस्मात्तदवस्थाया मुक्तिविलक्षणत्वाज्जाग्रदादिविलक्षणत्वाच्च समस्तकार्यं तदा लीनमज्ञाने सूक्ष्मरूपेणावतिष्ठत इत्युपेयम्, अन्यथाऽसत उत्पत्त्य-

Digitized by Google

नुपपत्तेः, यदा सुप्तः स्वप्नं न कं चन पश्यत्यथाऽस्मिन्प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति सुषुप्तिकाले सकले विलीने तमोऽभिभूत इत्यादिश्रुतितोऽप्युक्तमेष्टव्यमिति भावः। अक्षरार्थः स्पष्टः ॥ १३३ ॥

मू० ॥ एवं सतीह तमसो न विविच्य वस्तु
साक्षान्निवेदयितुमस्ति निदर्शनं चेत् ॥
नैतत् परागवगतेर्विषयो विभाति
गाढं तमो न तु तथावगतिः प्रतीचि ॥ १३४ ॥

टी० ननु सुषुप्तेऽज्ञानं स्वरूपेणास्ति चेत्तर्हि जाग्रत्स्वप्नयोस्तदस्तित्वे विवादाभावाच्चैतन्यवदवस्थात्रयेऽप्यव्यभिचारात्तदात्मस्वभावः स्यात्, ततश्च स्वभावात्तमसो विवेचने निदर्शनाभावात्ततो विवेकासिद्धावशुद्ध एवात्मा स्यादिति शङ्कते। एवं सतीति। इहावस्थात्रये। मुक्त्यवस्थायाः परोक्षत्वाद्विप्रतिपन्नत्वाच्च न तन्निदर्शनमित्यभिप्रेत्योक्तम्। साक्षादिति। नास्तीति चेदितीतिशब्दो द्रष्टव्यः। यदाऽज्ञानं स्पष्टमनुभूयते तदा ममात्राज्ञानमस्तीति पराग्भावेन दृश्यते आत्मा त्वहमिति दृश्यश्चित्तथा-तथाऽपरोक्षदृग्रूपप्रत्यक्त्वेन स्वयं प्रथते ततश्चाज्ञानस्य घटादिवत्पराक्त्वेन तद्विरुद्धप्रत्यक्स्वभावता नेति विवेचनादात्मनि शुद्ध्युपपत्तिमाह सिद्धान्ती। नैतदिति ॥ १३४ ॥

मू० ॥ प्रत्यक्पराग्विषयवस्तुविवेचनाय
क्लेशो न सम्भवति कस्य चिदत्र जन्तोः
दृश्यं तमो घटपटादिवदेव तस्य
द्रष्टा सुषुप्तिभुवि चिद्घनविग्रहोऽभूत् १३५ ॥

टी० तथापि सुषुप्तौ तयोः स्पष्टं प्रत्यक्पराग्भावेनाननुभवात्तदा तद्विवेचनं दुःशकमित्याशङ्क्योक्तरीत्या जागरितादौ विवेचितानन्यत्वात्तयोस्तत्रापि विवेचनं सुकरमित्याशयेनाह। प्रत्यक्पराग्गिति। अत्र सुषुप्तौ तस्य तमसश्चिद्घनविग्रह एव आत्मा द्रष्टा साक्षी अभूदिति संबन्धः ॥ १३५ ॥

मू० ॥ तिस्रोऽपि चिद्घनतनोस्तव दृश्यभूता
दूरे चकासति मतेर्बहिरेव तावत् ॥
आविस्तिरोभवनधर्मतया ह्यवस्थाः
कः सङ्करो विमलचिद्वपुषस्तवाभिः ॥ १३६ ॥

टी० तथाप्यवस्थात्रयस्य चेतनधर्मत्वानुभवात्तत्कलुषितस्यात्मनः कुतः शुद्धत्वमिति चेत्तत्राह । तिस्रोऽपीति । तिस्रोऽप्यवस्थाः चिदेकरसस्य तव तावद्दृश्यभूतास्ततो घटादिवद्बहिरेव त्वद्धर्मत्वरहिता इति यावत्, किंच जाग्रदवस्थाया इन्द्रियादिजन्यबुद्धिवृत्तिरूपत्वात्स्वप्नस्य च तद्गतवासनाविलासत्वात्सुषुप्तेस्तदीयलयात्मकसूक्ष्मरूपत्वादनात्मबुद्धिसंबन्धिन्यस्ताः स्वरूपनिरूपणदशायां दृगात्मनो दूरे तत्संसर्गानर्हदेशे भासन्ते, ततः कथं तासां तद्धर्मत्वमित्याह । दूरे चकासतीति । तासामागमापायितया रज्जुसर्पवन्मिथ्यात्वादपि तदधीनाऽशुद्धिरात्मनो नेत्याशयेनाह । आविस्तिरोभवनेति । संकरो वास्तवः संश्लेषः ॥ १३६ ॥

मू० ॥ त्वय्येव कल्पितमहंकरणं बिभर्ति
तिस्रोऽपि ताः सहितमेव तु तच्च ताभिः ॥
त्वच्चित्प्रकाशविषयत्वमुपेत्य भाति
स्वाज्ञानवत्तव न रूपमतश्चतुष्कम् ॥ १३७ ॥

टी० नन्ववस्थावदहङ्कारसंबन्धादग्निसंबद्धजलोष्ण्यवच्चिदात्मनोऽप्यवस्थावत्त्वं दुष्परिहरमिति तच्छुद्धिर्दुर्घटेत्याशङ्क्याहङ्कारतत्संबन्धयोरप्यद्वितीयासङ्गचिदात्मन्यविद्यया कल्पितत्वात्तदभावे च तौ वस्तुतो न स्तः कुतस्तदधीनाऽशुद्धिरित्यभिप्रेत्याह । त्वय्येवेति । ताः अवस्थाः । ननु योऽवस्थावान्स एवात्मा कुतस्तस्य कल्पितत्वमिति प्राकृतशङ्कां निराकुर्वन् दृश्याहङ्कारादिसाक्षिणो दृगात्मनस्ततो विवेकमनेकधोक्तं स्मारयति । सहितमिति । मिलितमित्यर्थः । तदहङ्करणम् । चशब्द उक्तशङ्कानिरासार्थः । फलितमाह । तवेति । अहङ्कारोऽवस्थाश्चेत्येतच्चतुष्कं वस्तुतस्तव स्वरूपं त्वद्धर्मश्च नेत्यर्थः ॥ १३७ ॥

Digitized by Google

मू० ॥ नान्वेति तत्तत्र चिता व्यतिरेकिता च
दूरे न सम्भवति तस्य चतुष्टयस्य ॥
नाभावरूपभजनाय समर्थमेत-
देवं चिदेव तु चतुष्टयमेतदासीत् ॥ १३८ ॥

टी० उक्तचतुष्टयस्यात्मनः पृथक्त्वे तस्याद्वयत्वं न स्यात्, स्याच्च सांख्यादिमतानुमतिरित्याशङ्क्याह । नान्वेतीति । तच्चतुष्टयम् । तत्र चिता स्वस्वरूपचैतन्येन । तस्य किं सत्त्वमसत्त्वं वा, आद्येऽपि किं चिदभेदेन सत्त्वमुत भेदेन भेदाभेदेन वा । नाद्यः, जडाजडयोर्व्यभिचार्यव्यभिचारिणोश्च वस्तुतोऽभेदासंभवात् । न द्वितीयः, भेदस्यैव द्वितीयाध्यायोक्तविधया दुर्निरूपत्वेन सत्त्वायोगात्, किं च तस्यापि भेदेन सत्त्वेऽनवस्थापातात्, तदभेदस्य चोक्तविधयाऽसंभवात् । न तृतीयः, पक्षद्वयोक्तदोषापत्तेः, विरोधाच्चैकत्र भेदाभेदासंभवात् । नाप्यसत्त्वं नरशृङ्गवदपरोक्षत्वानुपपत्तेः, सदनुभवविरोधाच्च । तस्मादन्वयव्यतिरेकाभावपरिहारेणाविद्यातत्कार्यात्मकद्वैतस्य चिदेकता न सन्मात्रत्वे पर्यवसानात्तद्वैत तत्त्वं सद्विपरीतं त्वनिर्वचनीयं तत्त्वबोधेन बाधितमुक्तस्वरूपेणैवावशिष्यते तत उक्तदोषद्वयप्रसङ्गो नेति भावः ॥ १३८ ॥

मू० ॥ जाग्रत्स्वप्नसुषुप्तिमूर्छितततूनिष्क्रान्त्यवस्थासु य-
च्चैतन्यं व्यभिचारिवस्त्वनुगतं तत्सत्यमेवात्मनः ॥
यत्किंचिद्व्यभिचारि तन्ननु मृषा स्रक्सर्पदण्डादिव-
च्चानुस्यूतचिदात्मवस्तु वदितुं शक्यं मृषा रज्जुवत् ॥१३९॥

टी० स्यादेतदेवं यदि जाग्रदादीनां मिथ्यात्वं चैतन्यस्यैव सत्यतया तदधिष्ठानत्वं च स्यात्, न त्वेतदस्ति साधकाभावाद्व्यभिचारित्वस्य स्वापमूर्छाद्यवस्थासु चैतन्येऽपि सत्त्वादित्याशङ्क्य न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इत्यादिश्रुतेः प्रत्यभिज्ञाप्रामाण्याच्च तदापि तदागमापायस्य साक्षि चैतन्यमनुगतमस्त्येव इतरथा तत्तदवस्थापरामर्शानुपपत्तिः, ततश्च तस्य सत्यत्वाद्व्यभिचार्यवस्थाधिष्ठानत्वं युक्तमित्याशयेनाह । जाग्रत्स्व-

प्रेति । तनूनिष्क्रान्तिः स्थूलशरीराद्विर्गमनं मरणमिति यावत्, एतच्च पुनः शरीरप्राप्त्यवस्थोपलक्षणम् । तथाप्यवस्थानां मृषात्वे व्यभिचारित्व-मप्रयोजकमित्याशङ्क्य सतोऽसतो वागमापायित्वासंभवात्तदनिर्वचनी-यत्वमावश्यकमिति व्यभिचारित्वस्य मिथ्यात्वेन व्याप्तिसिद्धेर्नाप्रयोजक-त्वमित्यभिप्रेत्याह । यत्किं चिदिति । नन्विति निश्चये । चैतन्यं मिथ्या मिथ्यासंबन्धित्वान्मिथ्यावस्तुवदित्याशङ्क्य तत्र व्यभिचारित्वमुपाधिः । न च साधनव्यापकता पक्षे तदभावादिति सदृष्टान्तमाह । नानु-भूतेति ॥ १३९ ॥

मू० ॥ जाग्रत्स्वप्नसुषुप्तिधर्मकमिदं चित्तं त्वदज्ञानतः
प्रादुर्भूतमतस्त्वमेव सततं त्वत्तो न तद्विद्यते ॥
स्वाज्ञानं च तवानुभूतिबलतः सिद्धं मृषा तत्त्वतो
नासीदस्ति भविष्यतीति भवतः पूर्णा चितिः शिष्यते ॥ १४० ॥

टी० ननु रज्जुसर्पादे रज्ज्वज्ञानविलसितत्वाद्रज्ज्वेव तत्त्वं तद्विपरीतं तु मिथ्येति युक्तम्, नैवमवस्थाधर्मितयोक्तमन्तःकरणमात्माज्ञानविलसितं येनात्मैव तत्त्वं स्यात् तस्यानादित्वात्. अन्यथा तद्गतकर्मतत्फलप्रवाह-स्यानादित्वायोगात्, आत्मन्यवस्थात्रयेऽपि साक्षितया भासमानेऽज्ञानासं-भवाच्च तस्य तद्विलसितत्वायोगादिति तत्राह । जाग्रत्स्वप्नसुषुप्तिधर्म-कमिति । न तावदन्तःकरणस्य व्यक्तरूपेणानादित्वम्, तन्मनोऽकुरुत, एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादिश्रुतौ जन्मश्रवणात् साक्षिमात्रगम्यस्य तस्यागमापायित्वमन्तरेण कादाचित्कानुभवायोगाच्च तदापीतेः संसारव्यपदेशादित्यत्रोक्तन्यायेन सुषुप्त्यादावपि सूक्ष्मरूपेण विद्यमानत्वादनादिकर्मादिप्रवाहस्यैकाश्रयत्वोपपत्तिः । यत्तु भासमाना-त्मन्यज्ञानमेव नेति । तन्न, भासमाने तस्मिन्ननतिशयानन्दाद्वयब्रह्मात्मता-ज्ञानस्यानुभवयुक्तिसिद्धत्वात् । जडस्य स्वातन्त्र्येण स्वतः स्फुरणायोगाच्चि-दात्मन्यविद्याकल्पितं तदिति स एव सर्वावस्थासहितचित्तस्य तत्त्वमिति भावः । तर्ह्यज्ञानस्याज्ञानविलसितत्वाभावान्मिथ्यात्वासिद्धौ द्वैतापत्तिरि-त्याशङ्क्याह । स्वाज्ञानं चेति । अद्वयासङ्गस्वप्रकाशचिदात्मनि तस्य

वस्तुतोऽसंभवाज्जाग्रदृश्यात्वाभ्यां तस्मिन्मिथ्यात्वसिद्धेः कालत्रयेऽपि स्वतः सत्त्वहीनस्य तस्य सविलासस्य प्रतिभासेऽपि वास्तवत्वेन पूर्णानन्दचिदात्मावशिष्यत इत्यर्थः ॥ १४० ॥

मू० ॥ ज्योतिर्ब्राह्मणवाक्यमानबलतः संपूर्णरूपा चिति-
र्जाग्रत्स्वप्नसुषुप्तिधर्मरहिता मोक्षाय निश्चीयते ॥
तस्मादस्मदुदीरितं स्वकवपुः श्रद्धत्स्व मानं विना
नास्माभिः प्रतिपादिता चितिरियं वाक्यार्थसंबन्धिनी ॥१४१॥

टी० ननु सर्वेऽपि वादिनः स्वस्वमते युक्तिजालं वदन्ति तावता मम न तत्र श्रद्धा भवति. एवं युक्तिभिरुपपादितायामपि त्वमर्थशुद्धौ सा कथं भवेदित्याशङ्क्य युक्तिमात्रस्याप्रतिष्ठितत्वात्तावता तत्र श्रद्धानुदयो युक्त इह तु युक्त्युपोद्बलितागमवाक्यैरेव स्पष्टं प्रतिपादनादुक्तत्वमर्थशुद्धौ श्रद्धा विधेयेत्याह । ज्योतिर्ब्राह्मणेति । मोक्षाय तद्धेतुवाक्यार्थबोधाय । तत्र सूर्यादित्यादीनां व्यवहितव्यमाणवस्तुप्रकाशकज्योतिषामभावे स्वप्नमनोरथादौ व्यवहारहेतुभूतं ज्योतिः किमित्यभिप्रेत्य किंज्योतिरेवायं पुरुष इतिप्रश्नस्यात्मैवास्य ज्योतिरित्युत्तरं श्रुत्वा देहादीनां बहूनामहमितिप्रतिभासात्तत्रासाधारणात्मरूपजिज्ञासया कतम आत्मेति पुनः प्रश्न तस्योत्तरमुक्तं योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्यादिना । तेन हि देहेन्द्रियप्राणबुद्धितद्वृत्तिक्षणिकविज्ञानविलक्षणमात्मानमुक्त्वा तस्य समानः स उभौ लोकावनुसंचरतीतिबुद्ध्युपाधिकं संसारं निर्दिश्य तस्य ध्यायतीवेत्यादिना मिथ्यात्वमुक्तम् । पुनः स धीः स्वप्नो भूत्वेत्यादिना जाग्रत्स्वप्नमरणजन्मनां पर्यायेण प्राप्तिमनूद्य तेषां व्यभिचारिणामतत्स्वभावत्वं प्रतिपाद्य पुनः स वा एष एतस्मिन्संप्रसाद इत्यादिना क्रमिकावस्थानुवादपुरःसर स यत्तत्र किं चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इति क्रियासमभिहारेण तत्तदवस्थागतवस्तुसाक्षिमात्रत्वेन तदसङ्गत्वमुपपाद्यानन्तरं यत्र सुप्तो न कं चन कामं कामयते न कं चन स्वप्नं पश्यतीति सुषुप्तिमवतार्य तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपमित्यादिब्राह्मणशेषेण समस्तकामकर्मादिराहितस्वप्रकाशानि-

त्यचिदानन्दात्मकत्वंपदलक्ष्यं पृष्टात्मरूपं निरूपितम् । एवं स पर्यगाच्छुक्रम-कायमव्रणमस्नाविरं शुद्धमपापाविद्धं दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इत्यादिश्रुतिभिरप्युक्तरूप एव त्वमर्थो निरूपितः । ततोऽस्मिन्निरूपितेऽर्थे नाशङ्काकारणमस्तीति भावः ॥ १४१ ॥

मू० ॥ एतत्त्वंपदलक्ष्यवस्तु भवता यत् पृष्टमासीत् पुरा
तन्निर्णीतमतोऽन्यदस्ति यदि ते चित्तस्थितं पृच्छ तत् ॥
बुद्धिस्थं कुरु पूर्वमुक्तमखिलं यद्वक्ष्यमाणं च तद्
बोद्धुं धारय ते मनः स्थिरतरं श्रद्धाधनाद्याश्रयः ॥ १४२ ॥

टी० त्वंपदार्थशुद्ध्यर्थमन्यदपि श्रोतव्यमिति मतिं निराकुर्वंस्तद्वि-षयमुपसंहरति । एतदिति । तत्पदलक्ष्यप्रश्नक्रमे शङ्कितचित्तं प्रति सा-मान्येन तदनुज्ञां सूचयति । अतोऽन्यदिति । श्रुतस्याविस्मरणं श्रोतव्ये चित्तैकाग्र्यं च श्रवणस्य फलवत्त्वाय शिष्यस्यावश्यकमित्याशयेनाह । बुद्धिस्थमिति । यत् पूर्वमुक्तं तदखिलं बुद्धिस्थं कुरु यच्च वक्ष्यमाणं तद्बोद्धुं लौकिकधनादि विहाय श्रुत्युक्तश्रद्धारूपधनाढ्यबुद्धिः सन् मनः स्थिरतरम् अत्यन्तमेकाग्रं यथा स्यात्तथा धारयेति संबन्धः ॥ १४२ ॥

मू० ॥ इत्युक्ते गुरुणा स पृच्छति पुनस्त्वंशब्दलक्ष्यं मम
ज्ञातं न्यायबलेन पूर्वमुदिताद्वस्थात्रयापोहनात् ॥
तच्छब्देन तु लक्ष्यमर्थमधुना बोद्धुं मनो मामकं
धावत्याशु तमप्यपोह्य सकलद्वैतप्रपञ्चं वद ॥ १४३ ॥

टी० एवं गुरोरनुज्ञां प्राप्य शिष्यो निःशङ्कः सन्नुदितेऽर्थे जिज्ञासा-निवृत्तिं सूचयन्नापातप्रतिपन्नवस्तुनि जिज्ञासोत्कट्यप्रकटनपुरःसरं तत्पृ-च्छतीत्याह । इत्युक्त इति । पृच्छतीत्यस्य वदेत्येतदुपरीतिपदमध्याहृत्य संबन्धो ज्ञेयः । यद्यपि पूर्वं द्वैतप्रपञ्चमिथ्यात्वमुक्तम्, तथापि वाक्यार्था-न्वयितत्पदार्थनिर्णयं विना तद्बुद्धं न भवतीत्याशयेनापोह्य सकलद्वैतप्र-पञ्चमित्युक्तम् ॥ १४३ ॥

मू० ॥ किं सप्रपञ्चमिदमस्त्वथ वा समस्त-
द्वैतप्रपञ्चरहितं परिपूर्णरूपम् ॥
यद्वोभयात्मकमिदं परमार्थतोऽस्तु
विष्णोः परं पदमितीह विचारणीयम् ॥ १४४ ॥

टी० आपातप्रतीत्यधीनसंशयकोटिं दर्शयन्तं निवर्तकनिर्णयाय विचारारम्भः कार्य इत्याह । किं सप्रपञ्चमिति । इदं सा काष्ठा सा परा गतिरित्यादिश्रुत्यवगतं विष्णोः परमं पदमिति संबन्धः । परमार्थत इत्येतत्कोटिद्वयेऽपि योजनीयम्, इतरथा कोटीनां विरोधानभिव्यक्तेः ॥ १४४ ॥

मू० ॥ वेदान्तवाक्यगतिरत्र बहुप्रकारा
का चित् कथंचिदिति संशय उत्थितो मे ॥
तत्त्वं प्रकाशय निवर्तय मोहमूलं
मत्संशयं मम हिताय भव प्रसीद ॥ १४५ ॥

टी० ननु ब्रह्मणोऽलौकिकत्वाद्वेदान्तानां च दोषरहितत्वात्कुतस्ते तत्रोक्तसंशय इत्याशङ्क्य संभावितासंभावितविषयविविधवेदान्तवाक्यश्रवणसमुपजातमदीयचित्तदोषादेव स इत्याशयेनाह । वेदान्तवाक्येति । गतिः प्रवृत्तिः । अत्र ब्रह्मणि । बहुप्रकारत्वमेवाह । का चिदिति । सृष्ट्यादिवाक्यगतिः सप्रपञ्चे नेतिनेत्यस्थूलादिवाक्यगतिर्निष्प्रपञ्चे तदेजति तन्नैजति पश्यत्यचक्षुः स शृणोत्यकर्णः आसीनो दूरं व्रजति शयानो याति सर्वत इत्यादिवाक्यगतिर्विरुद्धोभयरूपे ब्रह्मणि दृश्यत इत्यर्थः । इतिर्हेतौ । तर्हि मया किं कर्तव्यमिति गुरोराशयमाशङ्क्य तत्प्रतिज्ञां स्मरन् स्वाभीष्टं प्रार्थयते । तत्त्वमिति । तत्समन्वयाध्याय एवौपनिषदब्रह्मतत्त्वं प्रकाशितमित्याशङ्क्याह । निवर्तयेति । मोहोऽसंभावनादिबुद्धिर्मूलं यस्य तम् । मया प्रष्टुमपि न ज्ञायते त्वयैव मद्धितं जानता तद्विधेयमित्याशयेनाह । मम हिताय भवेति । कथमयमेवं निर्बन्धं करोतीत्येवमपि न मन्तव्यमित्यभिप्रेत्याह । प्रसीदेति ॥ १४५ ॥ (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकेन श्रीद्विवेदहरिनाथशर्मणा ।

Digitized by Google

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या

विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page* 456. VOL. IX.)

देवताभेदकृतकर्मभेदाधिकरणम् ।

सू० गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ॥ ८ ॥

इदानीं गुणलक्षणो भेदः प्रस्तूयते । द्वेधा गुणस्य भेदकत्वं कश्चित्तावद्गुणः पूर्वविहितस्य कर्मणः प्रबलगुणावरुद्धत्वात्तत्र निवेशमलभमानः स्वात्मसंगतये विधेः कर्मान्तरोत्पत्तिपरतां कल्पयन् भेदको भवति, अनेकत्वाद्वा गुणानां प्राप्तकर्मानुवादेन विध्ययोगात्सर्वेषां विधिसिद्धये कर्मपरस्य विधेः कल्प्यते । तत्रानेकगुणनिमित्तो भेदः पौर्णमास्यधिकरण एव प्रसङ्गात्प्रतिपादितः । अधुना बलवद्विरोधनिमित्तोऽभिधीयते चातुर्मास्येषु वैश्वदेव्याऽऽमिक्षेति यागं विधायाम्नायते—“वाजिभ्यो वाजिन”मिति तत्र संशयः । किं पूर्वस्मिन्नेवामिक्षायागे वाजिनं गुणो विधीयते? किं वा कर्मान्तर?मिति । तदर्थं च किमुत्पन्नोत्पत्तिशिष्टौ गुणौ तुल्यबलावुत्पत्तिशिष्टोबलीयानिति, तथा तद्धितचतुर्थ्योरपि बलाबलं चिन्तनीयम् ।

तत्र वाजेनामिक्षया योगाद्विश्वेदेवा हि वाजिनः ।
प्रकृतांस्तान्वदेच्छ्रुत्या वाजिशब्दश्च यौगिकः ॥

ते च पूर्वविहितकर्मसंप्रदानरूपेण प्रकृतास्तेनैव रूपेण प्रत्यभिज्ञायन्ते । तथाविधेन च संबध्यमानं वाजिनं पूर्वकर्मण्येव विहितं भवति । एवं च संभवति पूर्वत्र गुणमात्रविधाने प्रकृतहानमप्रकृतकल्पनमपूर्वान्तरकल्पनं विशिष्टविधिगौरवं च नाश्रयितुं युक्तम् । नन्वामिक्षायुक्तस्यैव पूर्वकर्मण उत्पत्ताववगतत्वाच्च तत्र द्रव्यान्तरसंबन्धापेक्षा योग्यता वास्ति । उच्यते

यद्यप्युत्पत्तौ द्रव्ययुक्तं कर्मावधारितं तथाऽपीह निष्कृष्य कर्मस्वरूपमात्रमनूद्यते । अभिधानकृता ह्याकाङ्क्षा न वस्तुकृता, तेन स्वरूपमात्रस्याभिधानोपात्तस्यास्त्येव द्रव्यान्तरसंबन्धापेक्षा । योग्यता चास्त्येव द्रव्यान्तरेण स्वरूपमात्रस्य संबन्द्धुम् । शब्दान्तराधिकरणे हि प्रत्ययवाच्या भावना प्रकृत्यर्थानुरक्तैवावगम्यते न शुद्धस्वरूपेति धात्वर्थान्तरमनवकाशं स्यादित्युक्तम् । इह तु कल्पितेन यजिना गुणाननुरक्तमपि कर्मान्तरगतं पदान्तरत्वात् । अतस्तदनुवादेन शक्यं गुणान्तरविधानम्, अतो नास्त्युत्पन्नोत्पन्नशिष्टयोर्विरोधः । न चामिक्षया देवतासंबन्धस्य श्रौतत्वाद्वाक्यगम्याद्वाजिनसंबन्धाद्बलीयस्त्वमिति वाच्यम् उभयोर्वाक्यगम्यत्वात्, न ह्यामिक्षाया देवतासंबन्धो वैश्वदेवीपदेन केवलेनावगम्यते किं त्वामिक्षापदैकवाक्यतया । तस्मादुभयोस्तुल्यबलत्वात्पूर्वस्मिन्नेव कर्मणि विकल्पः समुच्चयो वेति प्राप्ते ऽभिधीयते ।

आमिक्षाया बलीयस्त्वमुत्पत्तौ चोदनाकृतेः ।
उत्पन्ने वाजिनं वाक्यात्तेन तद्दुर्बलं मतम् ॥

यत्तु सगुणोत्पन्नमपि कर्म स्वरूपमात्रेण निष्कृष्य शक्यं गुणान्तरं विधातुमित्युक्तं, तदयुक्तं, यद्यपि ह्यभिधानतः स्वरूपमात्रं निष्कृष्यते तथाऽपि तस्योत्पत्तिवाक्यावगतस्यानुवादात्तत्स्वरूपमालोच्यमानमेवंगुणयुक्तमवगम्यते, ततश्च नैराकाङ्क्ष्यादयोग्यत्वाच्च गुणान्तरं तत्र निवेशमलभमानमात्मनिवेशनमकर्मान्तरोत्पत्तिं सूचयति । श्रौतश्चामिक्षाया विश्वेदेवैः संबन्धः, तद्धितस्य देवताविशिष्टद्रव्यवाचिनः पदान्तरोपस्थापितद्रव्यविशेषवचनत्वाद्वाजिभ्य इति चतुर्थी संप्रदानमात्रं वदति न तद्विशिष्टं द्रव्यं, वाक्यात्तु तत्संबन्ध इति दुर्बलं, प्रपञ्चितं चैतद्वार्त्तिक एव । अन्ये च बहवः संनिकर्षविप्रकर्षप्रकारा वार्त्तिके एव द्रष्टव्याः । तस्मादामिक्षाऽवरुद्धे कर्मण्यसंनिवेशाद्वाजिनगुणात्कर्मभेदः ॥

पूर्वाधिकरणाशङ्कानिरासो द्रव्यविशेषानुक्तिकृतकर्मभेदाधिकरणं वा ।

सू० अगुणे तु कर्म(१)शब्दे गुणस्तत्र प्रतीयेत ॥ ९ ॥

१ अगुणे तु कर्मशब्द इति प्रत्युदाहरणं सूत्रम् । इति द्वित्रेषु पुस्तकेषु पाठो दृश्यते स तु न युक्त इति प्रतीमः ।

अथवाऽधिकरणान्तरम् "अग्निहोत्रं जुहोती"ति निर्गुणकर्मोत्पत्तं तत्सविधौ च दध्ना जुहोति पयसा जुहोतीत्यादयो बहवो गुणाः श्रूयमाणाः पूर्वकर्मनिवेशे सति विकल्पप्रसङ्गादन्यतरावरुद्धे चान्यतरस्य निवेशासंभवात्पूर्वेऽदेव कर्मान्तरं कल्पयन्तीति प्राप्ते ब्रूमः । सर्वेषाममीषामन्योन्याऽनालोचनेनाग्निहोत्रवाक्यमात्रालोचनात्तत्र च निर्गुणस्य कर्मणोऽवगतस्य सर्वगुणयोग्यत्वात्पौर्वापर्याभावाच्चान्यावरुद्धेऽन्यस्य निवेश इन्यभावात्तत्रैव गुणमात्रविधानं, प्रमाणवशाच्च विकल्पः ॥

दध्यादिद्रव्यस्य फलत्वाधिकरणम् ।

सू० फलश्रुतेस्तु कर्म स्यात्फलस्य कर्मयोगित्वात् ॥ १० ॥

अग्निहोत्रं प्रकृत्य "दध्नेन्द्रियकामस्य जुहुया"दिति श्रूयते । तत्र संशयः किमग्निहोत्रात्कर्मान्तरं दधिविशिष्टमिन्द्रियकामाय विधीयते? उत तत्रैव गुणमात्रं फलाय विधीयत? इति तदर्थमिदं विचार्यते किं कर्मणः फलमिद? मुत गुणादिति । यदि कर्मणः, ततः प्राप्तस्य कर्मणः फलसंबन्धं गुणसंबन्धं चैकं वाक्यं न शक्नोति विधातुमिति कर्मान्तरं स्यात् । गुणफलसंबन्धे तु तन्मात्रं वाक्येन विधीयते । दधिहोमसंबन्धस्त्वाश्रयाश्रयिरूपः प्रकरणप्राप्तोऽनूद्यमानो न वाक्यं भिनत्तीति सिद्धत्येकवाक्यत्वमकर्मान्तरत्वेऽपि । तेन भेदाभेदसिद्ध्यर्थं कर्मणः फलं गुणाद्वेति चिन्त्यते, सत्यपि च पक्षद्वये भावनाभेदे धात्वर्थभेदाभेदविचारणाल्लक्षणासंबन्धः । तत्र

> धात्वर्थात्फलमित्युक्तं भावना सन्निकर्षतः ।
> विप्रकृष्टस्तु नामार्थस्तदर्थो न फलान्वयी ॥

भावार्थाधिकरणे ह्येतदुक्तं, यथा धात्वर्थात्फलं न नामार्थात् स तु धात्वर्थस्यैवाङ्गमिति, तदिहापि दधि होमार्थं होमः फलार्थः । किंच ।

> दध्नश्च फलसंबन्धे जुहोतेः स्यादनन्वयः ।
> यदि सोऽपि विधीयेत वाक्यभेदः प्रसज्यते ॥

न ह्येकं वाक्यं फले होमे च शक्नोति दधि विधातुम् । तत्रासति होमसंबन्धे जुहोतिपदमनर्थं स्यात् तस्य च दध्ना सह क्रियाकारकभावोऽवगम्यमानः परित्यक्तः स्यात्तस्मात् होमस्यैव फले विधानं गुणविशिष्टस्येति प्राप्ते ब्रूमः ।

धात्वर्थस्यान्यतः प्राप्तेर्गुणमात्रं विधीयते ।
विधेयं यच्च तेनैव फलं नान्येन युज्यते ॥

तत्रैव हि भावनार्थाधिकरणन्यायो यत्र धात्वर्थो नामार्थश्चोभयमपि विधीयते । अत्र तु प्राप्तत्वेन धात्वर्थस्याविधेयत्वाद्गुणमात्रं विधीयते विधेयस्यैव फलसंबन्धो नाविधेयस्य । तेन गुणस्यैव फलं न तु कर्मान्तरं विधेयं भविष्यति । नापि प्रकृतहानाप्रकृतकल्पना विशिष्टविधिगौरवमस्वर्थलक्षणादोषप्रसङ्गः । अतो गुणमात्रविधानात्तस्यैव फलं, जुहोतेरिदानीं कथमन्वयः । केचिदाहुः कर्मापत्रमेव दधि फलकामस्य विधीयते न दधिमात्रम्, अभावार्थस्य विधिविषयत्वायोगात् अतो दध्यनुरक्तो होम एव विधीयते । न चैवं वाक्यभेदः, दध्ना विधानाभावात् लौकिकं हि क्रियाकारकलक्षणं संबन्धमाश्रित्य द्रव्याणां क्रियाऽऽपत्तिर्न पुनस्तादर्थ्यं कर्मणोऽकारकत्वप्रसङ्गादतः फलार्थतैव होमे कारकीभूतस्य दध्नः प्रतीयते न होमार्थत्वं, होमार्थत्वे तत्रापि विधिव्यापाराद्वाक्यभेदः स्यान्न तु तदस्ति, तेन होमाश्रितस्य दधिव्यापारस्य फले विधानाद्वाक्यभेदं विनैव सिद्धो जुहोत्यन्वय इति । अत्रेदं वक्तव्यं, यदि न दधि विधीयते किं तर्ह्यत्र विधीयते? होम एव दध्यनुरक्तः फलाय विधीयत इति चेदेवं तर्हि होम एव फलार्थः स्यात् । दधि तु होमगतदध्यनुरागसंपत्त्यर्थमुपादीयमानं तदर्थमेव स्यान्न फलार्थम् । अपि च मा भूद्दध्नो विधानं तदनुरागस्तु प्राप्तस्य कर्मणो विधीयते फलसंबन्धश्चेति वाक्यभेदः ॥

ननु न ब्रूमो दध्नो न विधानमिति किंतु होमार्थतया न विधीयते फलार्थतया होमाश्रितं विधीयते होमे कारकीभूतमित्यर्थः । उच्यते दध्नेति दधिविशिष्टकारकमात्रं पदेनोच्यते होमे तत्कारकमिति कुतोऽवगम्यते? । वाक्यादिति चेदेवं सत्याश्रयसंबन्धं फलसंबन्धं च बोधयद्वाक्यं भिद्येत ।

ननु लौकिकमेव क्रियाकारकफलत्रयमाश्रयाश्रयिसंबन्धमुपादाय केवलं फलसंबन्धकरणाच्च वाक्यभेदः । नैतदेवं, लोकतो हि क्रियाकारकयोः संबन्धः संभवमात्रेण सिद्धो न कर्त्तव्यतया । कर्त्तव्यतया चात्र दधिहोमसंबन्धः श्रूयते दध्ना जुहुयादिति तेन तस्य कर्त्तव्यता फलसंबन्धश्चेति वाक्यभेदः । न हि दध्नेन्द्रियकामस्य जुहुयादित्यत्र य इन्द्रियकामः स दध्ना जुहुयादिति वचनव्यक्तिः संभवति होमस्याविधेयत्वात्, विधाने च कर्मान्तरस्यापत्तेः अतो जुहुयादिति तावदनुवादः । तत्र यज्जुहुयात्तद्दध्नेन्द्रियकामस्येति च वाक्यभेदः । अथ यद् दध्ना जुहुयात्तदिन्द्रियकामस्येति तदयुक्तम् । न हि सत्यपि संभवे दध्ना होतव्यं प्राप्तं यदनूद्येत । अथ यदिन्द्रियकामस्य जुहुयात्तद्दध्नेति तदप्ययुक्तम्, इन्द्रियकामार्थत्वेन होमस्याप्राप्तत्वात् । अथ मन्येत यद्यपीन्द्रियकामस्येन्द्रियकामत्वेन रूपेण होमो न प्राप्त इन्द्रियार्थत्वेनेति यावत्तथाऽपि पुरुषाणां बहुकामत्वात्कदाचिदग्निहोत्रावस्थायामपि संभवतीन्द्रिये पुरुषस्य कामना, तेनेन्द्रियकामनोपलक्षितस्य पुरुषस्य कदाचित्प्राप्त एव होम इति तदनुवादेन दधि विधीयते, तदयुक्तम् । कामस्य फलरूपाभिधायिनः कामपदस्य पुरुषस्वरूपपरत्वे लक्षणाप्रसङ्गात् । अपि चैवं न फलार्थं दधि स्यात् किंतु इन्द्रियकामनायां निमित्ते नैमित्तिकं क्रत्वङ्गं स्यात् । विवरणकारस्य तु अपूर्वान्तरानभ्युपगमात् क्रत्वपूर्वान्वितस्यैव गुणस्य फलार्थत्वादपूर्वसंबन्धस्य च लोकतः सिद्धभावात्सुतरां वाक्यभेदः स्यात् । तस्माच्च होमसंबद्धं दधि वाक्येन विधीयते अपि तु दध्नेत्येतावन्मात्रमिन्द्रियकामः स दध्नेति, कथं तर्हि जुहोतेरन्वयः ? । उच्यते दध्नेति करणभूतं दधि फलाय विधीयते तृतीयानिर्देशात् क्रियाऽपेक्षं च करणत्वमिति क्रियाऽपेक्षायां सन्निधिलक्षणप्रकरणप्राप्तो होमसंबन्धो जुहोतिनाऽनूद्यते ॥

ननु होमादिवत्फलभावनाऽपेक्षमेव करणत्वं भविष्यति न क्रियान्तरमपेक्षते, उच्यते, न धात्वर्थवद्दध्यादेः सिद्धस्वभावस्य स्वरूपेण फलभावनाकरणत्वमुपपद्यते कर्तृव्यापारविषयस्य हि करणत्वं, दध्यादेश्च किंचिद्धात्वर्थं प्रति करणीभवतः कर्तृव्यापारविषयता न स्वरूपेण यागादिव-

वित्यस्ति धात्वर्थविशेषाऽपेक्षा । यद्यपि चादृष्टोपकारप्रयाजादिव्यापारविषयता यागादिवद्दध्यादेः सिद्धस्वभावस्यापि स्वरूपेण संभवेत्तथाऽपि दृष्टार्थव्यापारविषयतासिद्ध्यर्थं कारकभावमपेक्षते । अवश्यं च दृष्टद्वारेणापि कर्तृव्यापारविषयता करणस्याङ्गीकर्तव्या, अन्यथा दृष्टार्थाङ्गमात्रानुष्ठानास्करणं प्रति पुरुषप्रतिव्यापाराभावात्करणोपदेशवैयर्थ्यं स्यात्तस्माद्विभक्त्यभिहितकारकविशिष्टं दधि, दधिविशिष्टं वा कारकं प्रत्ययार्थप्राधान्यात्फलाय विधीयते । फलभावनाकरणत्वं च यागादिवदेव समभिव्याहारात्सिद्धं न विभक्त्यभिधानमपेक्षते । कारकभावश्च क्रियाविशेषापेक्ष इति सन्निधिवशप्राप्तो होमो धातुनाऽनूद्यत इति सिद्ध्यति जुहोतेरन्वयः, कारकभावश्चैकपदोपात्तः क्रियाविशेषसंबन्धश्च सन्निधिप्राप्तः फलान्वय एव वाक्येन विधीयते न वाक्यभेदः ॥

वारवन्तीयादीनां कर्मान्तरताऽधिकरणम् ।

सू० समेषु कर्म युक्तं स्यात् ॥ ११ ॥

त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेते"त्यग्निष्टुत्संज्ञकं यागं विधाय तस्य प्राकरणिकेन वारवन्तीयमग्निष्टोमसाम कार्यमिति वाक्येन गुणं विधाय पुनराम्नातमेतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति तत्र पूर्ववत्संशयः किं पूर्वस्मिन्नेवाग्निष्टुत्संज्ञके यागे पशुफलार्थत्वेन रेवत्याधारं वारवन्तीयं गुणो विधीयते? उत कर्मान्तरमिति तदर्थमेतद् विचार्यते । किं फलार्थस्य वारवन्तीयस्य प्रकृतो याग आश्रयीभवितुं शक्नोति नेति । तत्र पूर्ववदत्रापि गुणमात्रं विधीयते फलाय न तु यागस्य विधानं विधिगौरवात् । सामाश्रयत्वं यागस्य साक्षादप्यसंभवति । तथाऽपि स्तोत्रनिर्वृत्तिद्वारा तदुपपद्यते विशिष्टयागान्तरविधौ विधिगौरवात्प्रकृतहानाऽप्रकृतकल्पनादोषाच्च तत्रैव रेवत्याधारं वारवन्तीयं फलाय विधीयते । यद्यपि द्रव्यदेवतासाधनो यागः साम्ना साक्षात्साधयितुं शक्यते इति न साक्षात्साम्नः प्रकृताश्रयत्वं संभवति । तथाऽप्यानर्थक्यात्त-

Digitized by Google

दङ्गेष्वित्यङ्गभूतस्तोत्रनिर्वृत्तिद्वारेण यागसाधनत्वं साम्नः संभवतीति युक्तं प्रकृताश्रयत्वम्। नन्वेवं रेवतीवारवन्तीयसंबन्धः फलसंबन्धश्चेत्यनेकार्थत्वा-द्वाक्यभेदः स्यात्, नैष दोषः। यदि संबन्धद्वयमपि विधिशब्देन बोध-यितव्यं स्यात्स्याद्वाक्यभेदः कृत्वा-शब्देनैव तु रेवतीवारवन्तीसंबन्धे प्रतीते केवलसंबन्ध एव यत्नेः परेण लिङ्प्रत्ययेन प्रतिपादयितव्य इति न वाक्यभेदः, यथा विशिष्टापूर्वकर्मविधौ तस्य विशेषणसंबन्धि यः फलवि-भक्त्यादिभिरेव सिद्धे तादृशस्य फले विधानाद्वाक्यभेदः, यः फलं कुर्यात्स-दृशेन यागेनेति तद्वदिहापि यः फलं कुर्यात्स रेवतीषु वारवन्तीयकरणे-नेति न वाक्यभेदः। तस्मात्फलाय गुणमात्रविधिर्यजिस्तु विपरिवृत्तिप्रा-प्तयागानुवादः एतच्छब्दोऽपि बहुमन्तः पूर्वस्य यागस्य फलवता गुणेन सहा-श्रयाश्रयिसंबन्धं सन्निधिलब्धमनुवदति। अग्निष्टोमसामशब्दोऽपि आन-र्थक्यतदङ्गन्यायप्राप्तस्तोत्रसंबन्धानुवादः। यद्यपि तत्र बहूनि स्तोत्र-मेव स्थानं दृष्टमिति फलार्थस्यापि तदेव स्थानं भविष्यति तस्मादेषां प्राप्तत्वेनाविधेयत्वाच्च वाक्यभेद इति प्राप्ते ब्रूमः।

प्रकृतं कर्म गृह्णाति फलाय विहितो गुणः।

यत्र तत्र गुणात्कामो यागः साम्ना न साध्यते ॥ १ ॥

कारकभावापत्तिर्हि तदाश्रयत्वं तदपि प्रकरणप्राप्तमनुवदितव्यं वाक्येनाश्रयसंबन्धकरणे वाक्यभेदात् तेन यत्र प्रकृते कर्मणि फलार्थस्य गुणस्य कारकभावः संभवति तत्रैव गुणात्कामो यथा दध्नेन्द्रियकामस्येति न त्विह प्रकृतयागकारकत्वं साम्नः संभवति संभवति तु तदङ्गभूते स्तोत्रे कारकत्वं तत्तु न प्रकृतगातिदेशिकत्वादिह स्तोत्राणां, न चायमा-नर्थक्यतदङ्गन्यायस्य विषयः यो हि कर्माङ्गत्वेन गुणश्चोद्यते स तत्र साक्षादसंभवदङ्गे निविशते। संभवति ह्यङ्गद्वारेणाप्युपकारकत्वं। न चाश्र-यत्वमङ्गद्वारेण संभवति। न ह्यङ्गेन कारकभावात्प्रधाने कारकत्वं भवति। साम्नश्च गीतिरूपाक्रियात्वाद्यागादिवदाश्रयापेक्षा यतः प्रकृतक्रिया-संबन्धः स्यात्॥

Digitized by Google

ननु नावश्यं कारकतयैव तदाश्रयत्वं संबन्धान्तरेणाप्युपपत्तेस्तेन क्त्वा–शब्देन क्रियान्तरसमानकर्तृकयागस्य मानन्तरेवतीयसंबन्धकरणं फलाय विधीयते किं तत्क्रियान्तरमित्यपेक्षायां सन्निदधानो याग उपलभ्यते । एवमप्यग्निष्टोमसामेति नावकल्पते अनुवादासंभवाद्विधानेन वाक्यभेदात् ।

न च क्रत्वर्थस्य वारवन्तीयस्य यत्स्थानं तदेव पुरुषार्थस्यापि भवतीति प्रमाणमस्ति यतोऽग्निष्टोमसामत्वमनूद्येत । किंच रेवतीवारवन्तीयं कृत्वा पशून् भावयेदित्युक्ते पशुभावनाऽपेक्षयैव समानकर्तृत्वसंभवाच्च क्रियान्तरापेक्षा यतः सन्निकर्षहितो यागः संबध्येत । तस्मात् क्त्वा–शब्दकल्पितगुणफलसंबन्धविधौ यजेतेति चाग्निष्टोमसामेति च द्वावपि शब्दौ प्रकरणप्राप्तानुवादत्वासंभवाद्विधाने च वाक्यभेदादनर्थकौ स्याताम् । तस्मात् क्त्वा–शब्दकल्पितरेवतीवारवन्तीयसंबन्धविशेषितो यागः फलाय विधीयते । तत्र साम्नः प्रकृतितोऽग्निष्टोमस्तोत्रस्थानप्राप्तेस्तदनुवद्धा रेवत्योऽपि यत्स्थानाभवन्तीति । तेनाग्निष्टोमसामेत्यनुवादः, एतच्छब्दोऽपि प्रस्तूयमानापूर्वयागवचनो रेवतीषु वारवन्तीयं कृत्वा पशुकामो यजेतेत्येतावन्मात्रं विधीयते इति लाघवमेकवाक्यत्वं च लभ्यतेऽपूर्वविधौ, गुणफलसंबन्धविधौ तु यज्यादेरानर्थक्यं वाक्यभेदो वा स्यादित्युक्तम् । ये तु गुणफलाधिकारेष्वपि वाक्ये नैर्गुण्यस्याश्रयसंबन्धमुपगच्छन्तः कर्मैव गुणानुरक्तं फलाय विधीयते वाक्येनेत्याहुः । तेषामत्रापि रेवतीवारवन्तीयसाधनकाग्निष्टोमस्तोत्रविशिष्टस्य प्रकृतस्यैव यागस्य दध्यनुरक्तस्यैव होमस्य फले विधिसंभवात्सिद्धान्तहानिः ।

ननु तत्र दध्यनुरागो होमस्य लोकसिद्धो लभ्यते केवलस्तु फलसंबन्धो वाक्येन विधीयते । इह तु यद्यपि ऋक्सामयोः स्तोत्रसाधनत्वं लौकिकं स्तोत्रस्य यागविशेषणत्वं न लोकतः सिध्यतीति विधिवशादेव लब्धव्यं ततश्च तस्य च फलसंबन्धस्य च विधानाद्वाक्यभेदः स्यात् सत्यं न लोकसिद्धमतिदेशतस्तु सिद्धं स्तोत्रस्य पूर्वयागाङ्गत्वात्स्तोत्रविशे-

Digitized by Google

पदार्थत्वं च ऋक्सामयोर्लोकसिद्धम् । तदेव ऋक्सामविशेषितस्तोत्रानुरागं यागस्यान्यतः सिद्धमुपादाय केवलफलसंबन्धमात्रं विधिनाऽनेन बोध्यते इति कुतो वाक्यभेदः ! किं च क्त्वा–शब्देन स्तोत्रसमानकर्तृकत्वमेव यागस्योच्यते न तत्कारकत्वं तादर्थ्यं वा ॥ समानकर्तृकत्वं च लोकसिद्धमेव लभ्यते इति दध्यादिभिरविशेषः, अतो रेवतीवारवन्तीयसाधनकाग्निष्टोमस्तोत्रसमानकर्तृकत्वविशेषविशिष्टः प्रकृत एव यागः फलाय विधातुं शक्यते यद्वा अग्निष्टोमस्तोत्रमेवातिदेशप्राप्तं रेवतीवारवन्तीयानुरक्तं पशुकामस्य विधीयते यजिपरस्यापि विधेः स्तोत्रविषयत्वं तदुच्यतीति निर्वापपरस्यैव द्रव्यदेवतासंबन्धविषयत्वं यमेरपि निर्वपतिवदनुवादत्वात्, तस्माद्वाक्येनाश्रयसंबन्धे सिद्धान्तहानिरित्यास्तां तावत् ॥

सौभरनिधनयोः कामैक्याधिकरणम् ।

सू० सौभरे पुरुषश्रुतेर्निधनं कामसंयोगः[1] ॥ १२ ॥

"यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीते"ति ब्रह्म सामाख्यं स्तोत्रं प्रकृत्य तदाश्रयं सौभरफलत्रयसाधनत्वेनाम्नातम् । यद्यपि सौभरस्य साम्नो गीत्यात्मकक्रियात्वाद्वारवन्तीयवदाश्रयापेक्षा तथाऽपि स्तुवीतेत्यनेनैकवाक्यत्वात्तत्साधनभूतस्यैव फले विधानं विज्ञायते। तथा हि यावन्ति पदानि प्रयुज्यन्ते तावतां यथाऽन्वयो भवति तथा वाक्यार्थो वर्णनीयः । तद्यदि सौभरमात्रं विधीयेत ततः स्तुवीतेत्यनर्थकं स्यात् स्तुत्यन्तरविधाने गौरवं, मत्वर्थलक्षणा च स्यादतः सौभरेणेत्येकपदोपात्तं सौभरविशिष्टं करणकारकं फले विधीयते, करणं च क्रियाऽपेक्षमिति युक्तं प्रकृतस्तोत्राश्रयत्वम् । वारवन्तीयन्तु द्वितीयान्तत्वाच्च करणीभूतमवगम्यते किं तर्हि कर्मीभूतम् । न च स्तोत्रे यागे वा साम्नः कर्मत्वं संभवति तेन क्त्वा–शब्दार्थमात्रं प्रति कर्मत्वाच्च क्रियान्तरापेक्षेति वैषम्यं, तदेवं फलत्रयसाधनं सौभरं प्रकृत्याऽऽम्नातं "हीषीति वृष्टिकामाय निधनं कुर्यात् ऊर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामाये"ति । तत्र संशयः । किं हीषा-

---

१ निधने कामसंयोग इति पाठान्तरम् ।

दयो निधनविशेषाः सौभरफला फलान्तरार्थेन विधीयन्ते? उत सौभरस्यैव तत्तत्फलं साधयतस्तत्तन्निधनमनियमेन प्राप्तं नियम्यत? इति । तदर्थे किं वृष्टिकामादिशब्दैस्तत्पुरुषशेषत्वेनैते साक्षाद्विधीयन्ते? अथ तत्साधनशेषत्वेने? ति तत्र पुरुषस्य श्रोतत्वात्तादर्थ्यमेव हीषादीनां चतुर्थ्या विज्ञायते तच्छेषता च तदभिलषितफलसाधनतयेति फलार्थत्वमेवैषां, साधनसंबन्धे तु वृष्टिकामादिशब्दैः सौभरं लक्ष्येत

न च श्रुतिसंभवे लक्षणा न्याय्या । तस्माद्धीषादयो गुणाः फलान्तरार्था इति प्राप्ते ब्रूमः । वृष्ट्यादीनि पूर्वोक्तान्येव विपरिवर्तमानानि प्रत्यभिज्ञायन्ते इति न फलान्तरावगमः । किंच हीषेति शब्दमात्रे फलाय विहिते सत्याश्रयापेक्षायां यत्तावत्सौभरं प्रकृतं न तच्छब्दोत्याश्रयत्वं प्रतिपत्तुम् । यत्तु तदवयवभूतं निधनं न तत्प्रकृतं, न चानर्थक्यतदङ्गन्याय-स्यायं विषय इत्युक्तम् । सत्यपि च तदङ्गत्वतरणेऽनेकावयवत्वाच्च नियमेन निधनसंबन्धः, तत्र निधनमित्यनर्थकं स्यात्, विधाने च वाक्यभेदः । तस्माद्वृष्टिकामादि शब्दलक्षिते सौभरे निधनत्वेनैव नियतप्राप्ता हीषादयो नियम्यन्ते । अथवा लक्षणाऽपि नातीवात्र विद्यते । न हि यदेव फलस्य करणं तस्यैव पुरुषशेषत्वं तदङ्गस्यापि तद्द्वारेणास्त्येव पुरुषशेषता । तथा चान्यत्राऽपि प्रयोगो दृश्यते । वासिष्ठादीनां नाराशंसो द्वितीयः प्रयाज इत्यादिस्तेन हीषादयः सौभराङ्गभूतास्तद्द्वारेण वृष्टिकामादीनां पुरुषाणा-मनियमेन यथा शेषभूताः प्राप्तास्तानेव प्रति यथारूपा नियम्यन्त इति न लक्षणा, साधनद्वारेण तु तादर्थ्यं न साक्षादिति लक्षणावाचो युक्तिर्भाष्यवा-र्त्तिकयोः, यथा प्राप्तानां च नियम इति न शाखान्तरगते सौभरे शाखान्तरीयं निधनं प्रयोक्तव्यं, किंतु तत्तन्निधनसहित एव च सौभरविशेषस्तत्फला-र्थेन प्रयोक्तव्यः । तस्मात्फलान्तरार्थेन नैव हीषादयो गुणा विधीयन्ते नियम्यन्ते तद्यथाप्राप्ति सौभरे ।

इति शास्त्रदीपिकायां द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

Digitized by Google

अथ द्वितीये तृतीयः पादः।

यद्वाचनाया ज्योतिष्टोमाऽकृताऽधिकरणम्।

सू० गुणस्तु क्रतुसंयोगात्कर्मान्तरं प्रयोजयेत्संयोगस्याशेषभूतत्वात्।

ज्योतिष्टोमं प्रकृत्य श्रूयते। "यदि रथन्तरं सामासोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् यदि बृहत्सामा शुक्राग्रा"निति तत्र संशयः। किं ज्योतिष्टोमात्कर्मान्तरं रथन्तरसामा बृहत्सामेति विधीयते?। किं वा ज्योतिष्टोम एव रथन्तरेण बृहता वावच्छिन्नो ग्रहाग्रताविशेषं प्रति निमित्तत्वेनानुकीर्त्यते? इति, तदर्थमिदं चिन्त्यते। किमयं कृत्स्नक्रतुसंयोगो रथन्तरादेरुताकृत्स्नक्रतुसंयोग? इति। तदर्थमपि किं रथन्तरविशिष्टः क्रतुरिह निमित्तमुत क्रतुविशिष्टं रथन्तर?मिति।

तत्रान्यार्थप्रधानत्वाद्बहुव्रीहेर्निमित्तता।
रथन्तरविशिष्टस्य क्रतोरेवागम्यते॥
विशेषणं व्यवच्छेत्तृ विशेष्यस्यापि चोच्यते।
ज्योतिष्टोमे च नान्येषां व्यवच्छेदस्य संभवः॥
रथन्तरेण कृत्स्नस्य क्रतोर्व्याप्तिश्च नैव हि।
सन्त्यन्यान्यपि सामानि गायत्रादीनि तत्र हि॥

तेन व्यवच्छेद्याभावात्सत्तयाऽपि चाव्याप्त्या सामान्तरसापेक्षतया विशेषणासंभवात्पूर्वत्रासभत्री रथन्तरसामत्वं गुणः कर्मान्तरं कल्पयति। यदि-शब्दश्च निरर्थको ह्यध्याहारादिना वा व्याख्येय इति प्राप्ते ब्रूमः। यदि-शब्दात्प्रकरणाच्च ज्योतिष्टोमस्याभिधानम्।

न च सामान्तरव्यवच्छेदेन रथन्तरस्य विशेषणत्वं शब्दो हि स्वार्थसत्तामेव प्रथमं बोधयति यदि सा नित्यप्राप्ता स्यात्ततस्तत्प्रतिपादनमनर्थकमित्यर्थान्तरव्यवच्छेदं कुर्यात्, इह तु रथन्तरसत्तायाः पाक्षिकत्वात्तत्प्रतिपादने ऽपि नानर्थकत्वमित्यसत्ताव्युदासेन सत्तयैवात्र विशेषणत्वलाभाच्च कर्मान्तरत्वं, यद्यपि सामान्तरमेव व्यवच्छेत्तव्यम्। तथाऽपि वैकल्पिकयोरथन्तरबृहतोर्विरोधिनोः परस्परव्यवच्छेदेनैव विशेषणत्वं नावि-

Digitized by Google

रोधिनां सामान्तराणां व्यवच्छेदः । यथा नीलोत्पलमिति पीतादीनामेव व्यवच्छेदो न तु दैर्घ्यादीनाम् ।

न च रथन्तरस्य सामान्तरापेतत्वमनपेतस्यैव पृष्ठस्तोत्रसाधनत्वेन ज्योतिष्टोमान्वयात्, तेन यद्यपीह रथन्तरविशिष्टः क्रतुर्निमित्तं, तथाऽपि प्रकृतस्यैवाभिधानम् । अथवा क्रतुविशिष्टं रथन्तरमिह निमित्तमनित्यत्वात् नित्यस्तु क्रतुर्न निमित्तं भवितुमर्हति तेन यद्यपि बहुव्रीहिणा रथन्तर-विशिष्टः क्रतुरेवाभिधीयते तथाऽपि दध्ना जुहोतीतिवद्विशेषणपरत्वात्त-स्यैव निमित्तत्वं प्रथमप्रतीतं रथन्तरमुल्लङ्घ्य यदि–शब्दोपक्रान्तनिमित्त-प्रतीतिर्न यावत्क्रतुं गच्छतीति रथन्तरमेव निमित्तं, तच्च ज्योतिष्टोमेऽप्यस्ति तस्माच्च कर्मान्तरम् ।

अवेष्टौ कामन्तरता-ऽधिकारतोऽधिकरणम् ।

सू० अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ॥ १ ॥

राजसूये राजकर्तृके अवेष्टिर्नामेष्टिः समाम्नाता, "आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणे"त्यादिका तां प्रकृत्योच्यते । "यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत् । यदि राजन्य ऐन्द्रं यदि वैश्यो वैश्वदेव"मिति तत्र संशयः । किं ब्राह्मणादीनामवेष्टौ प्राप्तानां मध्ये निधानविशेषं प्रति निमित्तार्थानि श्रवणानि? उताप्राप्तानां प्रापकाणी? ति तदर्थमिदं विचार्यते किं राजसूये त्रयाणामपि ब्राह्मणादीनामधिकारः? उत क्षत्रियस्यैवे? ति । तदर्थमपि किं राजसूयाधिकारगतो राजशब्दस्त्रयाणामपि वाचकः? किम्वा क्षत्रियस्यैवे? ति । ततोऽपि किं राजशब्दो राज्ययोगनिमित्तः? उत क्षत्रियजातिनिमित्त? इति विचारयितव्यम् । यदि राज्ययोगनिमित्तस्ततस्तद्योगिनां त्रयाणामपि अधिकारवाक्यस्थराजोपपदोपादानतः प्राप्तेर्निमित्तार्थानि ब्राह्मणादीनां श्रवणानि । अथ जातिनिमित्तः, ततोऽतज्जातीययोर्वैश्यब्राह्मणयो राजोपपदवशेनार्थाच्चिरुक्तेरप्राप्तानां ब्राह्मणादीनां प्रापकाणि । तत्र "राज्ययोगनिमित्तोऽयमार्यावर्तप्रसिद्धितः । सर्वलोकप्रसिद्धत्वादविगानाच्च गम्यते ।

क्षत्रियत्वनिमित्तत्वमनार्येष्ववगम्यते । द्रविडेषु विगीतं च तदन्येष्वप्रसिद्धत्वात्" । तेन राज्ययोगाद्राजानस्त्रयोऽपि भवन्तीति राज्यपदं तु रूढ्या जनपदरक्षणे वर्तते न राजयोगमपेक्षते ॥

ननु राजयोगाद्राज्यमभियुक्ताः स्मरन्ति "तस्य कर्मणी"त्यधिकृत्य "पत्यन्तपुरोहितादिभ्यो यगि"ति वचनाद्राजशब्दस्य तत्र पाठादाचाराच्च स्मृतेर्बलीयस्त्वं स्थितम् । उच्यते । लोकप्रयोग एव शब्दार्थावधारणे प्रमाणं स्मृतेरपि स एव मूलं नान्यदस्ति, प्रयोगाच्च राज्यशब्दस्यैव स्वातन्त्र्यं तन्निमित्तत्वं च राजशब्दस्यावगम्यते, ततस्तदनुसारेण स्मरणं साधुशब्दविभागमात्रपरं व्याख्येयम् । अतस्त्रयाणामपि राजपदाभिधेयत्वेन राजसूये प्राप्तानां निमित्तार्थानि श्रवणानि यद्वि शब्दसामर्थ्यादप्येवमेव यद्वि—शब्दो हि राजशब्दस्य राज्ययोगनिमित्तत्वे प्रमाणम् अन्यथा प्राप्त्यभावाद्यद्वि—शब्दोऽनुपपन्नः स्याद्वैदिकश्च निर्देशः स्मृतेरपि बलीयांस्तस्मान्निमित्तार्थानीति प्राप्ते ब्रूमः । न तावद्वैदिकनिर्देशादत्र निर्णयः शक्यते कर्तुम् । अन्यथाऽपि तत्सद्भावात् "राजानमभिषेचये"दिति ह्यभिषेकविधेः प्रागेव राज्ययोगाद्राजशब्दः क्षत्रियमात्रे वेदप्रयुक्तस्तेन रूढमेव राजपदं निर्णीयते । यद्वि—शब्दस्तु निपातत्वादन्यथा कथंचिन्नीयमानो न दुष्यति स्मरणाच्च स्वतन्त्रमेव राजपदं

न च तस्य निर्मूलत्वं द्रविडप्रयोगस्य मूलस्य संभवादतो नायथार्थत्वे स्मरणस्य प्रमाणमस्तीति तेनैवाभियुक्तप्रणीतेनाचारस्य संभवाद्वैयाकरणास्यादिप्रयोगप्रसूनस्य बाधाद्राजयोगादेव राज्यशब्दः, स्वतन्त्रस्तु राजशब्दः क्षत्रियवचन इति ब्राह्मणादेरवेष्टौ प्राप्त्यभावात्प्रापकाणि वचनानीति ॥

आधानस्य विधेयत्वाधिकरणम् ।

सू० आधाने सर्वशेषत्वात् ॥ २ ॥

इदमामनन्ति "वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य" इति । तथा वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति अत्रापि स एव विचारः । किम् ब्राह्मणादीनामाधानोपनयनयोः प्राप्तानां वसन्तादिकालं प्रति निमित्तार्थानि श्रवणानि ? उत प्रापकाणी ? ति । तत्राविद्याग्निसाध्यत्वात् क्रतूनां तदुपाययोः प्राप्तत्वात् ब्राह्मणादीनां निमित्तार्था

पुनः श्रुतिः, आहवनीये जुहोतीति वाक्यादग्निसाध्यत्वं क्रतूनाम्, आहवनीयस्याधानैकसाध्य च इत्यर्थादाधानप्राप्तिर्ज्ञानपूर्वकत्वाच्चेतनप्रवृत्तेः क्रतुज्ञानस्य च वेदाध्ययनसाध्यत्वात्, वेदाध्ययनस्य चोपनयनमन्तरेणासंभवात् उपनयनस्यापि क्रतुभिरेवार्थात्प्राप्तिः । नन्वलौकिकत्वादाहवनीयादीनां विधिमन्तरेणाधानसाध्यत्वानवगतेः कथं क्रतुभिरर्थादाधानस्याक्षेपः तथापि वा प्रथमाधानविधिषु वसन्तादिष्वाहवनीयादिपदाश्रवणादाधानसाध्यत्वावगमः स्यात् । यदि "नक्तं गार्हपत्यमादधाति दिवाऽऽहवनीयं त्रिभिर्गार्हपत्यमादधाति पञ्चभिराहवनीय"मित्यादिगुणवाक्यालोचनेनैतत् ज्ञायते नूनमाधानाधीनमाहवनीयाभिधानीयकर्मित्युच्यते तन्ममापि तुल्यम् । अतोऽग्निविद्यासाध्यैः क्रतुभिस्तदुपायभूतयोरुपनयनाधानयोराक्षेपतः प्राप्तिः । अथवा य एवं विद्वानग्निमाधत्त इति सामान्यतः सर्ववर्णानामाधानस्य विधायकं गुणानभिभूतशक्तिकमस्ति वचनं यस्मिन् गुणापहृतशक्तये वसन्तादिविषयो ब्राह्मणादिनिमित्तं कालमात्रं विदधाति तस्मान्निमित्तार्थानि श्रवणानीति प्राप्ते ब्रूमः ।

न तावत्क्रतुसामर्थ्यात्प्राप्तिरैकान्तिकी तयोः ।
सामान्यवचनं यत्तु वर्त्तमानापदेशकम् ॥

वसन्तादिवाक्येषु तावद्यदि शब्दाद्यभावाद्वाक्यान्तरविहिताधानोपनयनविपरिवृत्त्यभावाच्च क्रियाविधिरेव प्रतीयते । यदि सामान्यतः प्राप्तिः स्यात्तदा बलान्निमित्तार्थता स्यान्न त्वस्ति प्राप्तिः, क्रतुविषयस्तावदग्निविद्यामात्रसाध्याः, अग्नयस्तु यद्यप्याधानसाध्यास्तथाऽपि न तेनैव सर्वे निष्पाद्याः अन्येन निष्पादितानामन्येन क्रयादिभिरपि प्राप्तिसंभवात्तथा विद्याऽपि पुस्तकनिरीक्षणाद्युपायसंभवेन नैकान्तत उपनयनमाक्षिपति तत्रास्ति विधेरवकाशः सामान्यवचनं तु वर्त्तमानापदेशरूपं न वसन्तादियुक्ते प्रत्यक्षविधौ सति क्लेशेन विधित्वमापादयितव्यं तस्मात्प्रापकाणि वचनान्याधानोपनयनयोः ।

अथ दाक्षायणादीनां गुणतार्थाधिकरणम् ।

सू० अयनेषु चोदनान्तरं संज्ञोपबन्धात् ॥ २ ॥

दर्शपूर्णमासप्रकरणे श्रूयते । "दाक्षायणयज्ञेन स्वर्गकामो यजेत तथा साकं प्रस्थाय्येन यजेत पशुकाम" इति तत्र विचारः किं कर्मान्तरविधिः? उत दर्शपूर्णमासयोरेव गुणात्फल? मिति तदर्थं च किं दाक्षायणादिशब्दो गुणविधिः कर्मनामधेयमिति विचारः । तत्रैवंविधसंज्ञायुक्तस्य लोके गुणस्याप्रसिद्धत्वादुद्भिदादिवच्च सामानाधिकरण्येन नामधेयत्वं, तच्च भेदकं ज्योतिरादिवत् । अपि चास्य नामत्वेनाविधेयत्वात् गुणान्तरस्य विधेयस्याभावात्फलस्य चाविधेयत्वात्कर्मैव विधेयमित्यभ्यासादपि भेद इति प्राप्ते ब्रूमः

स्यादेवं नामधेयत्वे गुणस्त्वत्र विधीयते ।
फलाय साकं प्रस्थानमावृत्तिश्चेत्यभिव्रता ॥

नामत्वे संज्ञालक्षणो ऽभ्यासलक्षणो वा कर्मभेदः स्यात् गुणविधिस्त्वयं यद्यपि न लोकसिद्धो गुणस्तथाऽपि वाक्यशेषादवयवव्युत्पत्त्या वा वृत्तिसहप्रस्थानलक्षणगुणवचनत्वमनयोरवगम्यते । अतो गुणावप्राप्ताववश्यं विधातव्यौ, यागस्तु प्रकृत इति तदाश्रयणेन गुणमात्रं फलाय विधीयते दध्यादिवत्, यथैव दध्यादेरर्थान्तरेऽत्यन्तरूढत्वाच्च नामधेयत्वमेवं दाक्षायणादिशब्दानां, द्वे हि पौर्णमास्यावित्यादिवाक्यशेषदर्शनेन दार्शपौर्णमासिकगुणवचनत्वावगमात्तद्वशेन च धातुपारार्थ्यादेराश्रयणीयत्वात्, नोद्भिदादिवत्कर्मान्तरवचनत्वं सम्भवतीत्यकर्मभेदः ।

अथ द्रव्यदेवतायुक्तानां यागान्तरताऽधिकरणम् ।

सू० संस्कारस्याप्रकरणेऽकर्मशब्दत्वात् ॥ ४ ॥

"वायव्यं श्वेतमालभेत भूतिकामः सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इत्यनारभ्याम्नातम् । तथा दर्शपूर्णमासप्रकरणे "ईषामालभेत चतुरो मुष्टीन्निर्वपति संदेहः किं दार्शपूर्णमासिकयोरीषालम्भमुष्टिनिर्वापयोः श्वेतचरुगुणौ विधीयेते? किम्वा कर्मान्तरे यावदुक्ते निर्वपणमालम्भनं च गुणफलविशिष्टे? किम्वा यागविधानमितरत्रेतरत्र? ति । तत्र विधिगौरवाच्च कर्मान्तरविधानं यागस्त्वश्रुतो दूरभ्रष्टः । न चासति यागे देवतात्वं वाय्वादीनां संभवति तेन सर्ववृक्षाणां वायुसंबन्धात् कथंचिदीषाया एव

वायव्यमित्यनुवादः सौर्यमिति चाग्नेयस्येव तेजोदेवतासामान्यादतो दार्शपौर्णमासिकयोरालम्भनिर्वापयोर्गुणविधी । यदालभेत तच्छ्वेतमिति यन्निर्वपेत्तच्चरुमिति चरुशब्दः स्थालीवचनः सप्तम्यर्थे च द्वितीया स्थाल्यां निर्वपेदित्यर्थः । भूतिब्रह्मवर्चसकामशब्दौ सर्वकामप्राप्त्यनुवादाविति नैतद्युक्तम् । न हि फलपदयोर्नित्यवच्छ्रुतयोः संभवत्प्रयोजनयोश्च प्राप्तिका-नुवादत्वमानर्थक्यं च युक्तमङ्गीकर्तुम् । तस्माद्गुणफलविशिष्टं कर्मान्तरं यावदुक्तं विधीयते । लोकेऽपि चालम्भादिसद्भावादैकान्ततो दार्शपौर्णमा-सिकयोः प्रतीतिः, देवतापदं तु पूर्ववद्यथाकथंचिज्ज्ञेयम् । यागस्याश्रुतस्य विधानायोगात्तदभावे च देवतात्वासंभवात्तस्माद्यावदुक्तकर्मान्तरविधि-रिति प्राप्ते ब्रूमः ॥

देवतापदवैयर्थ्ये यावदुक्तविधौ भवेत् ।
तेन तत्कल्पितो यागो विधेयोऽत्राश्रुतोऽपि सन् ॥

न हि यदेव प्रत्यक्षपठितं तदेवैकं शाब्दं सामर्थ्यमपि हि शब्दैक-देश इत्युक्तमतो द्रव्यदेवतासंबन्धकल्पितो यागो विधीयते । तदयं वाक्यार्थः श्वेतमालभेत वायुदेवत्यं कुर्यात् भूतिकामः इति, तत्र चाल-भेतेत्यनुवादः, चोदकादर्थेन वा प्राप्तत्वाद्वायव्यं श्वेतं कुर्यादित्येताव-द्विधीयते । न चान्तरेण यागं वायव्यं कर्तुं शक्यमिति याग एवायमेवं-विहितो भवति तस्माद्याग एव गुणफलविशिष्टो विधीयते ।

अथ वत्सालम्भादीनां संस्का-रताऽधिकरणम् ।

सू० विशये प्रायदर्शनात् ॥ ५ ॥

अग्निहोत्रदोहाधिकारे "वत्समालभेते"ति श्रुतं तत्रासत्यपि देव-तासंयोगे प्राणिद्रव्यकालम्भत्वसामान्यादत्रापि यागविधिं मन्यते । तस्यो-त्तरमालम्भो नाम स्पर्शमात्रं न तस्य यागमन्तरेणानुपपत्तिः, लोकेऽपि दृष्ट-त्वादतोऽत्रालम्भमात्रं वत्ससंस्कारो विधीयते ॥

नैवारचरोराधानार्थताऽधिकरणम् ।

सू० संयुक्तास्त्वर्थशब्देन तदर्थश्रुति-संयोगात् ॥ ६ ॥

"चरुमुपदधाति बृहस्पतेर्वा एतदन्नं यन्नीवारा" इत्यत्रापि किं चरोर्यागवदुक्तमुपधानमात्रमुत याग? इति संशयः । तत्र बृहस्पतेर्वा एतदिति कथं बृहस्पतिः स्यादसौ देवता न स्यात्संबन्धान्तराभावात्तैत्तिरीयकाणां तु बार्हस्पत्यो भवतीति तद्विहितेनैव वाक्यशेषे देवतात्वमुक्तम् । वाक्यशेषावगतदेवतासंबन्धबलेन यागार्थता चरोरुपधानं तु यागोपयुक्तस्य प्रतिपत्तिः स्विष्टकृदादिप्रत्याम्नानेनेति प्राप्ते ब्रूमः । विध्युद्देशापेक्षिते विशेषो वाक्यशेषाद्गृह्यते नानपेक्षितश्चरुश्चोपधानेनैव स्वलनिर्वृत्त्योपदिष्टेन निराकाङ्क्षो नार्थान्तरमपेक्षते न चोपधानस्य यागवद्देवतापेक्षा यतो वाक्यशेषावगता देवता गृह्येत, तैत्तिरीयकवाक्यमपि बार्हस्पत्यो भवतीति वर्तमानापदेशकं न देवताविधिपरमतोऽर्थवादमात्रं वाक्यशेष इत्युपधानमेव चरोर्न यागः ।

त्वाष्ट्रपात्नीवतस्य पर्यग्निककरणगुणकत्वाधिकरणम् ।

सू० पात्नीवते तु पूर्ववत्त्वादवच्छेदः ॥ ७ ॥

"त्वाष्ट्रं पात्नीवतमालभेते"ति प्रकृत्य पर्यग्निकृतं पात्नीवतमुत्सृजतीति श्रुतम् । तत्र संशयः किं पर्यग्निकरणान्ताङ्गरीतिगुणविधि? उत तत्संबद्धयागविधि? रिति । तदर्थं च किं पर्यग्निकृतं पात्नीवतं कुर्यादित्यन्वयः? उत पर्यग्निकृतमुत्सृजतीति । तत्राव्यवहितसंबन्धलाभात्पर्यग्निकृतं पात्नीवतं कुर्यादित्यन्वयो न तु पर्यग्निकृतमुत्सृजतीति व्यवहितकल्पनादोषात् ।

न च पात्नीवतशब्दात्पूर्वयागप्रत्यभिज्ञा । त्वष्टा हि पत्नीवांस्तत्र देवता न केवलः पत्नीवान् । अतो यथाऽऽग्नेयमित्यग्नीषोमीयादेरग्रहणं तथाऽत्रापि ।

न च पूर्वत्र विधेयः कश्चिदिह गुणः संभवति । न तावत्पर्यग्निकरणं चोदकप्राप्तत्वात् नोत्सर्गस्तस्याप्युत्पत्तिवाक्यसिद्धत्वात्पर्यग्निकरणविशिष्टपात्नीवतोद्देशेनोत्सर्गविधौ विशिष्टानुवादाद्वाक्यभेदः ।

न च पर्यग्निकृतोत्सृजतीति क्रमः तस्यापि चोदकप्राप्तेः ।

(शेषमग्रे)

॥ श्रीः ॥

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(*Continued from page* 441. Vol. IX.)

श्रु० संभर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः नेता गमयिता स्रष्टा गकारार्थस्तथा मुने?

टी० "संभर्तेत्यादिना, शुद्धत्वं विना हेयैरिति विवृतं, भोग्यसंपद्वाचकेनैश्वर्यस्येति श्लोकस्थश्रीशब्देन भोगविभूतेः संभरणादुक्त्या लीलाविभूतेश्च दर्शितत्वात् महाविभूतित्वं विवृतम्। अत एव ज्ञानशक्त्यादिभिश्च सर्वेकारणकारणत्वं चोपरि स्पष्टम् अत एव ज्ञानशक्त्यादिभिश्च निरतिशयबृहत्त्वात्परब्रह्मत्वं स्फुटम् अत उत्तरग्रन्थानां शुद्ध इत्यादिश्लोकविवरणरूपत्वं युक्तं भश्च गश्च वश्चेति विभज्यार्थ उच्यते एतेषां पदानां तत्तद्धातुष्वन्येष्वपि दृश्यत इति डप्रत्यये टिलोपे च कृते एवं रूपं भवतीति भार्थमाह समित्यर्द्धेन संभर्ता संभरणमुपकरणसंविधानं प्रकृतिपुरुषकालान् कार्योत्पत्तियोग्यान् करोतीत्यर्थः महदादिसृष्टिरण्डरूपकार्योत्पत्त्युपयुक्ता संभरणमिति वा विवक्षा भर्त्ता स्वामी धारणस्य वकारवाच्यत्वात्पोषकत्वस्य गकारवाच्यनेतृत्वान्तर्भावादपेक्षितविधेरनपेक्षितविधानदौर्बल्याच्च स्वामित्वमिह विवक्षितं यद्यपि प्रत्ययविशेषयुक्तस्य भरतेः स्वामिनि रूढत्वं तथाऽपि पूर्वोक्तयुक्तिसचिवार्थवचनबलाद् धातुमात्रस्य स्वामिवाचित्वविश्वीयते इतिकरणेन संभर्तृत्वभर्तृत्वे प्रवृत्तिनिमित्ते निष्कृष्योच्येते अत एवार्थद्वयान्वित इत्युक्तम्। उत्तरत्र तु प्रवृत्तिनिमित्तत्रये सत्यपि इतिकरणेन तेषामनिष्कृष्टत्वात्प्रवृत्तिनिमित्तत्रयविशिष्टो धर्म्येक एवार्थ उक्तः। गकारार्थमाह "नेते"ति, उपसर्गस्फुटीकृतानामर्थानां धातुलीन-

त्वादुद्गमयिता गमयिता सङ्गमयितेत्येवं रूपपदानामर्थमाह "नेते"ति, स्रष्टेत्यनेन उद्गमयितृशब्दार्थ उक्तः, नेतेति गमयितृशब्दार्थउक्तः स्थितिकर्त्तेत्यर्थः गमयितेति सङ्गमयितृशब्दार्थ उक्तः स च संहारः यथा यस्मिन्निदं सञ्चविचैति सर्वमित्यत्र वेति समेतेतीति सर्गसंहारा उच्येते तद्वत्। यद्वा कारणभूतं स्वात्मानं गमयिता स्वस्मिन् कार्यवर्गस्य लयकर्त्तेत्यर्थः उपसर्गाप्रयोगेऽपि अर्थानां धातुलीनत्वादेवं व्याख्यातं भगवता पराशरेण। अथ वकारव्याख्यानात्पूर्वमेव भकारगकारसमुदायस्यार्थमाह—

मू० ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।

टी० "ऐश्वर्यस्ये"ति, समग्र—शब्दः सर्वत्रान्वेति परिच्छिन्नचतुर्मुखाद्यैश्वर्यव्यावृत्त्यर्थः समग्रशब्दः, यशो—गुणवत्ताप्रथा श्रीर्भाग्य[1]संपत् वैराग्यं विरक्तिः परिपूर्णत्वादनादरतेत्यर्थः यथा अवाक्यनादर इति मतुप् प्रत्ययस्य प्रसिद्धार्थत्वाद् न तद् व्याख्यातम्। अथ वकारार्थमाह "वसन्ती"ति, "अन्येष्वपि दृश्यत" इति डप्रत्ययस्यानेकार्थत्वादधिकरणे कर्तरि च व्युत्पत्तिः, भूतात्मनि—भूतानामात्मनि अखिलात्मनि अखिलशरीरके। यद्वा भूतशब्देन कार्यजातमुच्यते तस्यात्मनि अखिलात्मनि कार्यान्तर्भूतानाचित्यमुक्तानामात्मनीत्यर्थः। अथ समुदायशक्तिविषयमर्थमाह "ज्ञानशक्ती"ति, पाठक्रमे त्वेवमेव इत्यादिश्लोकद्वयानन्तरं ज्ञानशक्तिबलैश्वर्येत्यादिश्लोकः पठ्यते तथाऽपि प्रवृत्तिनिमित्तवाचित्वसंगतिवशादेवमेव इत्यादिश्लोकद्वयात्पूर्वं ज्ञानशक्तीत्यादिश्लोक इहोपात्तः, उत्पत्तिं प्रलयं चैवेत्यादिश्लोकस्य प्रस्तुतानुपयुक्तत्वात् च एवमुपादानं कृतं भगवच्छब्दवाच्यानि—प्रवृत्तिनिमित्तत्वेन वाच्यानीत्यर्थः, अशेषतः—न प्रत्येकं प्रवृत्तिनिमित्तान्यपि तु

१ भोग्यसंपदिति पाठः।

समुच्चित्येत्यर्थः अशेषशब्देन षाड्गुण्याधान्तरभिदारूपं शीलादिगुणजातं च क्रोडीकृतं, यद्यप्यैश्वर्यवीर्यज्ञानानि पूर्वं कण्ठोक्तानि तथाऽपि कतिपय-समुदाय्याश्रयोद्ब्रापप्रयुक्तसमुदायभेदादपुनरुक्तिः । न चात्र समुदायशक्तिः कल्प्यते येनानुक्तगुणमात्रगोचरता स्यात् वचनबलादेव शक्तिस्वीकारः, पूर्व-मक्षरार्थकथनेन भकारगकारवकारा व्याख्याताः । अथ अचित्यस्यार्थमाह—

मू० भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः । एवमेष महा-
शब्दो मैत्रेय? भगवानिति परमब्रह्मभूतस्य वासुदेवस्य
नान्यगः । तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः शब्दो-
ऽयं नोचारेण ह्यन्यत्र ह्युपचारतः

टी० "विने"ति, कश्यपः पश्यको भवतीति न्यायात् अचित्यनेन नेत्युक्तं भवति निषेध्यं च हेयमित्यर्थः । एवं प्रवृत्तिनिमित्तपौष्कल्याद्भगव-त्येव मुख्यवृत्तत्वमाह "एवमि"ति, महार्थगर्भत्वान्महाशब्दत्वं मुक्तात्मव्या-वृत्त्यर्थं परमब्रह्मेत्युक्तं, कथं तत्रैव मुख्यवृत्तत्वमन्यत्रापि तत्प्रयोगो दृश्यत इत्यत्राह "तत्रे"ति, तत्र पूज्यपदार्थोक्तिः—पूज्यानामवयवार्थानामुक्तिः परिभाषा रूढिः ताभ्यां विशिष्टः, अत एव नोपचारेण मुख्य इत्यर्थः । अन्यत्रामुख्यत्वमित्याह "अन्यत्र ही"ति, मुक्तात्मन्योपचारिकत्वोक्त्या अर्थान्तरप्रयोगेषु औपचारिकत्वमर्थाद्दर्शितमिति हि—शब्दाभिप्रायः, भग-वच्छब्दप्रयोगविषयेषु सर्वेषु प्रयोगेऽन्यथासिद्धेऽपि न हि शक्तिभेदकल्पनं युक्तं यत्र ज्ञानादयोनिरङ्कुशाः स एव मुख्यार्थः, गुणलेशयोगादपि प्रयोग-संभवादन्यत्र वृत्तिरौपचारिकीत्यर्थः । अथ तस्मिन्नेव योगप्रकरणे उपसं-हारेऽपि सविशेषपरवाक्यानि दर्शयन् दिव्यविग्रहत्वं चाह—

मू० समस्ताः शक्तयश्चैता नृप? यत्र प्रतिष्ठिताः ।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर? ।
देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया ॥

जगतामुपकाराय न सा कर्मनिमित्तजा ।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥

टी० "समस्ता"इति, बद्धा मुक्ताः कर्मरूपाविद्या च शक्तयस्तत्तद-भिमानिदेवताद्वारेण तत्र तासां प्रतिष्ठितत्वं यच्चेत्यनुवादस्य पुरोवादसा-पेक्षत्वात् अस्मभूषणाध्याये यथोक्तप्रकारेण पुरोवादाच्च तद्विश्वरूपवैरू-प्यमिति सविशेषवैलक्षण्यमुक्तम्, अन्यदिति द्रव्यान्तरत्वमुक्तं, महदित्य-परिच्छेद्यत्वं. विलक्षणसर्वविशेषस्य सकलेतरविजातीयस्य कथं चिन्तयितुं शक्यत्वमित्यत्राह 'समस्ते"ति, केन हेतुनेत्यत्राह "स्वलीलये"ति, लीलायाः प्रयोजनत्वात्तदभिसंधिर्हेतुः, न तु कर्मणेत्यर्थः। किं प्रयोजनमित्य-त्राह "जगता"मिति, न तु स्वकर्मफलभोगायेत्यर्थः। एतद्विवृणोति "न से"ति, व्यापिनी–देशनियमरहिता, यथा वैदिकपुत्रानयनादिषु व्यापनशक्तत्वेऽपि प्रतिसंबन्धः संभवतीत्यत्राह "अव्याहतात्मिका" न तस्याः प्रतिहतिरस्ती-त्यर्थः। यद्वा व्यापिनी–सर्वावतारानुगुणा अव्याहता–देशकालवस्तुप्रकृ-तप्रतिबन्धरहिता एवं प्रत्यस्तमितेति श्लोकस्य परमात्मपरत्वाभ्युपगमेऽपि निर्विशेषपरत्वनिराचिकीर्षयोपक्रमोपसंहारयोस्तस्मिन्नेव प्रकरणे सविशेष-परत्वं दर्शितम् । अथास्य श्लोकस्य परिशुद्धजीवात्मस्वरूपविषयत्वं प्रत्य-स्तमितभेदादिपदानां कातपर्यविषयत्वं च विवक्षुस्तदर्थं परमात्मविषय-भेदनिषेधादीनां कतिपयविषयत्वाभिधायीनि वाक्यानि दर्शयिष्यन् तत्र परमात्मविषयकतिपयभेदनिषेधपरवचनोदाहरणेन मुक्तात्मविषये किमा-यातमिति शङ्कायां मुक्तस्य परमात्मसाम्यप्रतिपत्तये मुक्तगुणान् परमात्मन्य-तिदिशन्तं श्लोकं दर्शयति–

मू० एवंप्रकारममलं नित्यं व्यापकमक्षयम् ।
समस्तहेयरहितं विष्णवाख्यं परमं पदम् ॥

टी० "एवंप्रकार"मिति, एतच्छ्लोकोदाहरणेन प्रत्यस्तमितेत्यादि-श्लोकानन्तरं पूर्वपक्षे पठितस्य ज्ञानस्वरूपमित्यादेः प्रथमांशोपक्रमश्लोकस्य चतुःश्लोक्याश्च सविशेषपरत्वप्रतिपादनाय प्रथमांशोपसंहारेऽपि सवि-

शेषपरत्वं दर्शितं भवति, उपसंहारवचनोपादानमुपसंहारस्य बुद्धिस्थत्वात् क्रियते, एवंप्रकारं मुक्तात्मानं प्रति निर्व्यापारमनाख्येयमित्यादिना यः प्रकार उक्तस्तदुपेतमित्यर्थः । एवं भगवति मुक्तात्मगुणातिदेशः कृतः, भेदराहित्यस्य—सत्तामात्रत्वस्य वचसामगोचरत्वस्य च मुक्तगुणस्य निर्व्यापारमित्यादिनोक्तस्य भगवत्यतिदिष्टत्वाद्भगवति च तेषांनिषेधानां कतिपयविषयत्वस्य प्रामाणिकत्वाच्च ते निषेधा मुक्तात्मन्यपि तथाविधा इति कतिपयविषयत्वं सिद्धमिति भावः । अथ परमात्मनोऽधिकान् गुणानाह "अमलं"—मलप्रतिभटं सोपाधिकहेयविरोधिनमित्यर्थः । नित्यम्—उक्तप्रकारेण नित्यम्, मलप्रतिभटत्वं नित्यमित्यर्थः । व्यापकं-स्वरूपेण व्यापकम् । अक्षयं स्वत एव धर्मतोऽपि विकाररहितं, मुक्तस्य हि पूर्वावस्थायां ज्ञानसंकोचविकासविकारो विद्यते नित्यसिद्धानामपि तथात्वं परायत्तमिति तद्व्यवच्छेदः समस्तहेयरहितं पूर्वं हेयप्रत्यनीकत्वमुक्तमत्र हेयराहित्यमुक्तं स्वतोहेयाभावोऽपि मुक्तस्य नास्ति परमात्मप्रसादाधीनत्वात्तस्य, पदमत इति पदं विष्णात्मस्वरूपं परमपदशब्दस्य विष्णुलोके मुक्तात्मनि च प्रयोगात्तद्व्यावृत्त्यर्थं विष्ण्वाख्यमित्युक्तम् । अथ प्रथमांशोपक्रमेऽपि सविशेषपरत्वं दर्शयति—

मू० परः पराणां परमः परमात्मात्मसंस्थितः

टी० "परः पराणा"मिति, अनेन शास्त्रोपक्रमस्यापि सविशेषपरत्वमुक्तं भवति, अनेन प्रत्यस्तमितभेदमित्यादि पदानां कतिपयभेदनिषेधपरत्वं च सिद्धमिति त्रिविधं प्रयोजनम्, अनेन परः पराणामित्यादिग्रन्थजातस्य अविकारायेत्यादिसंग्रहश्लोकविवरणरूपत्वात् ज्ञानस्वरूपमित्यादिश्लोकं प्रत्युपक्रमत्वमर्थक्रमेण सिद्धमिति तस्यापि सविशेषपरत्वसिद्धिः। यद्वा प्रथमांशोपक्रमोपसंहारयोस्सविशेषपरत्वादुपक्रमोपक्रमभूतस्यापि ज्ञानस्वरूपमिति श्लोकस्य महावाक्यस्वारस्यविरोधो न न्याय्य इति तस्यापि सविशेषपरत्वं सिध्यति । यद्वा नमस्कारश्लोकस्य शास्त्रोपक्रमशेषभूतत्वात्तच्छेषभूतस्तदनुगुणार्थो वर्णनीय इति सिध्यति, उपक्रमोपक्रमभूतनमस्कारश्लोकार्थानुगुणं परः पराणामित्यादेरर्थो वर्णनीय इति चेत् न तस्या-

प्युपक्रमभूतप्रश्नोत्तरवरलाभकथनश्लोकानुगुणं तदर्थस्य वाच्यत्वादित्यभिप्रायः। अत्र ब्रह्मणः कृत्स्नजगत्कारणत्वसिद्ध्यर्थं वेदान्तेषु सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिभिरानन्त्यमुक्तं तच्च त्रिविधपरिच्छेदराहित्यं, न हि देशकालादिभिः परिच्छिन्नानां घटादीनां कृत्स्नस्य सर्वविधकारणत्वं दृष्टं कालत्रयवर्तिकार्यजातकारणत्वे सर्वदेशगतकार्यकारणत्वे च देशतः कालतोऽप्यपरिच्छेदावपेक्षितौ उपादानत्वसिद्धौ वस्त्वपरिच्छेदोऽपेक्षितः, न हि वस्तुतः परिच्छिन्नः कुलाल उपादानं भवति मृत्पिण्डकुलालयोः सामानाधिकरण्यासंभवात्, अतः कृत्स्नकारणत्वसिद्ध्यर्थं त्रिविधपरिच्छेदराहित्यं विस्तरेण विवक्षुः परः पराणामित्यर्धेन तत् संक्षेपेण प्रतिजानीते "परः पराणां परम" इति, अनेन कालानवच्छेदः सिद्धः, अधिककालवर्तित्वस्य परशब्दवाच्यत्वात्, परमात्मेति देशापरिच्छेद उक्तः, आप्नोतीति ह्यात्मशब्दव्युत्पत्तिः आत्मसंस्थितः—सर्वेषामात्मत्वेन सर्ववस्तुभिर्विशिष्टः। यद्वा आत्मत्वेन संस्थिततया सर्वशरीरकत्वात्स्वस्मिन्पर्यवस्थितः, स्वनिष्ठः अन्यत्सर्वं तन्निष्ठं शरीरतया विशेषणत्वात्, अतः सर्वपर्यवसानभूमिः, स्वनिष्ठ इति वस्त्वपरिच्छेद उक्तः, सर्ववस्तुसामानाधिकरण्यार्हत्वं हि वस्त्वपरिच्छेदः इदमिदं न भवतीति हि वस्तुपरिच्छेदः। यद्वा नित्यत्वविभुत्वव्यतिरिक्तगुणैस्समानाभ्यधिकराहित्यं वस्त्वपरिच्छेदः, स्वनिष्ठं परमात्मानमपेक्ष्य तन्निष्ठानामन्येषां समत्वाभ्यधिकत्वासंभवादात्मसंस्थित इत्यनेन वस्त्वपरिच्छेदसिद्धिः। एवं संक्षिप्तमर्थमुपपादयति रूपेत्यादिना, तत्र कालापरिच्छेदं प्रथमं विवक्षुः कालपरिच्छिन्नेषु विद्यमानं पञ्चकल्पनाऽन्वितत्वं ब्रह्मणि नास्तीत्याह—

मू० रूपवर्णादिनिर्देशविशेषणविवर्जितः। अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः वर्जितः शक्यते वक्तुं यः सदाऽस्तीति केवलम्।

टी० "रूपे" ति, रूप—शब्देन जातिरुच्यते "जातिगुणौ च रूपिणां रूपे" इति हि नीतिविदः, वर्णशब्दो रूपाख्यगुणविशेषपरः, आदि—शब्देन गन्धरसादिः, आसनशयनादिक्रिया विशेषणावयवस्त्वं च विवक्षितं रूपवर्णा-

दीति पाठे रूप-शब्दो नीलपीतत्वादिगुणपरः, वर्णशब्दो देवमनुष्यादिवर्णपरः, जातिपर इत्यर्थः तन्निबन्धनस्तद्विषयो निर्देशः शब्दः शब्दवाच्यास्त एव विशेषणानैर्विवर्जितः । यद्वा रूपवर्णादितद्वाचिशब्दरूपैर्विशेषणैर्विवर्जितः एवमनित्यत्वव्यापकं कर्मकृतं रूपादिमत्त्वं ब्रह्मणि नास्तीति कर्मकृतरूपादिनिवृत्त्या तद्व्याप्यकालपरिच्छेदनिवृत्तिरित्यर्थः । यद्वा अनित्यत्वव्यापककर्मकृतरूपाद्यभावादनित्यत्वं ब्रह्मण्यनुमातुं न शक्यमित्यर्थः, अनेन अस्त्यस्तमितभेदमित्यस्य पदस्य विषयो दर्शितः । अथानित्यत्वव्यापकत्वाद्विकाराणामनित्यत्वनिवृत्तये तद्व्यापकविकारराहित्यमाह "अपक्षये"ति, जायते अस्तीत्यवस्थाद्वयं जन्मशब्देन विवक्षितम् उत्पत्तिस्थितिनाशानामेकैकत्र विधाद्वयेन विकारषट्कसिद्धिः तद्विवर्जितत्वात्सदाऽस्तीति च शक्यते सदाशब्देन कादाचित्कास्तित्वव्यावृत्तिः न तूत्पद्यत इत्यादिशब्दैरिति केवलशब्दाभिप्रायः, अनेन सत्तामात्रमित्यस्य विषयो दर्शितः अगोचरं वचसामित्यस्य च विषयोदर्शितो भवति रूपवर्णादिप्रवृत्तिनिमित्ताभावादुत्पत्त्यादिप्रवृत्तिनिमित्ताभावाच्च कल्पनाविकारवाचिशब्देन वक्तुं शक्य इति तस्य पदस्यार्थ इत्यभिप्रायः, अगोचरं वचसामिति सर्वशब्दागोचरत्वमुच्यते चेत् वचसामगोचरं सत्तामात्रमित्यपि वक्तुं न शक्यते । अथ देशापरिच्छेदवाचिनामनिर्वचनमुखेनाह—

मू० सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥ तद् ब्रह्म परमं नित्यमजमक्षरमव्ययम् । एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् ॥

टी० "सर्वत्र"इति, ब्रह्मणः ईश्वरातिरिक्तत्वनिषेधार्थं देवतान्तरव्युदासार्थं च नामनिर्वचनमुखेन तदुक्तिः औणादिकप्रत्ययस्यानेकार्थत्वादधिकरणे कर्तरि च व्युत्पन्नवासुदेवशब्दस्योच्यते "सर्वत्रे"ति, वेदान्तेषु परब्रह्मणो हि निर्विकारत्वादिकमुक्तं तत्कथं वासुदेवस्योच्यत इत्यत आह "तद्ब्रह्मे"ति, शैत्यं हि यत्सा प्रकृतिर्जलस्येतिवत् तदिति निर्देशः, निर्दिश्यमानप्रतिनिर्दिश्ययोरेकत्वमापादयन्ति सर्वनामानि पर्यायेण तल्लि

Digitized by Google

द्रूमुपाददत इति हि शाब्दाः, नित्यमिति कार्यमात्रव्यावृत्तिः । अजमक्षरम- व्ययम् । एकस्वरूपमिति सविकारनित्यप्रधानव्यावृत्तिः एकस्वरूपशब्देन वृद्धिपरिणामराहित्यं विवक्षितं, हेयाभावाच्च निर्मलमिति बद्धव्यावृत्तिः सदैवेति मुक्तव्यावृत्तिः, परममिति नित्यसिद्धव्यावृत्तिः । यद्वा एकरूपमिति बद्धव्यावृत्तिः सदेत्यादिना मुक्तव्यावृत्तिरिति, एवं स्वव्यतिरिक्तसमस्तवस्तु- विलक्षणत्वेनोपनिषन्मुक्तं ब्रह्म वासुदेव एवेत्यर्थः त्रिविधापरिच्छेदवाचिनी श्रुतिरपि देवताविशेषविवक्षितात्, अनन्तमिति अनन्तशब्दो योगरूढः अतो नारायणादिशब्दपर्यायस्त्रिविधाऽनन्त्ययोगिनि भगवति मुख्ये वर्त्तते सत्यज्ञानादिवाक्ये ऽनन्तमिति पदं पुल्लिङ्गं द्वितीयान्तं योवेदेति वेद- नशब्देनान्वयात् प्रथमान्तत्वे तद्योवेदेति तत्पदाध्याहारः स्यात् वाक्यभे- दश्च स्यात् अतस्तत्र यथोक्त एवार्थः, तस्मात्तदनुसारेणात्रापि अपरिच्छेद- कथनसमये देवताविशेषो निर्णीतः । वस्त्वपरिच्छेदमाह—

मू॰ तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् तथा पुरुषरूपेणका- लरूपेण च स्थितम् प्रकृतिर्या मया ख्याता व्यक्ताव्यक्त- स्वरूपिणी पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि पर- मात्मा च सर्वेषामाधारः परमेश्वरः विष्णुनामा स वेदेषु वेदान्तेषु च गीयते द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्त्तमेव च

टी॰ "तदेवे"ति, सर्वमेवैतदिति व्यक्ताव्यक्तपुरुषकालसमुदाय उच्यते व्यक्ताव्यक्तादिस्वरूपमेतत् सर्वं तद् ब्रह्मेत्यर्थः, अनेन वस्त्वपरि- च्छेद उक्तः, सर्ववस्तुसामानाधिकरण्यार्हत्वं हि वस्त्वपरिच्छेदः सर्ववस्तु- सामानाधिकरण्यार्हत्वेनैव चिदचिच्छब्दवाच्यैकत्वहेतुभूतव्यापनभरणा- दिगुणतः समाभ्यधिकराहित्यसिद्धश्च वस्त्वपरिच्छेदसिद्धिः, न हि ब्रह्मव्य- तिरिक्तस्य कस्यचित् समस्तचिदचिच्छरीरकत्वसंभव, एवं शास्त्रोपक्रमे वासुदेवाख्यमुभयलिङ्गकं वस्तु प्रतिपाद्यमुक्तं, शास्त्रोपसंहारे च तथो- क्तमिदं दर्शयति "प्रकृतिर्ये"ति, परमात्म—शब्दस्य क्वचिज्जीवेऽपि प्रयोग-

दर्शनात्तद्व्यावृत्त्यर्थं साक्षात्परमात्मलक्षणं जगत्कारणत्वमुक्तं “लीयेते परमात्मनी”ति, स चेश्वरानतिरिक्त इति ज्ञापनार्थः परमेश्वर–शब्दः, ईश्वरश्च न देवताऽन्तरमिति ज्ञापनाय विष्णुनामेत्युक्तम्, अत्र परमात्मा आधारः परमेश्वर इति पदैः शरीरिलक्षणं स्पष्टम्, एवं शास्त्रोपक्रमोपसंहारयोरवान्तरप्रकरणोपक्रमोपसंहारयोश्च हेयप्रत्यनीकत्वकल्याणगुणास्पदत्वारायण एव परं ब्रह्मेति प्रतिपाद्यते इति दर्शितम् । अथाविद्यासंबन्धादयश्च ब्रह्मण एव हि प्रतिपाद्यन्ते तत्कथं यथोक्तस्वरूपस्य ब्रह्मण उपपद्यत इति शङ्कायां काठिन्यवान्यो बिभर्तीति बद्धारद्धारिभावेनोपपद्यत इति वक्तुं परमात्मनो जीवानां चात्मशरीरिभावेन संबन्धं तेषामविद्यासंबन्धादिकं च वक्ष्यन् प्रथमं जीवब्रह्मणोः शरीरशरीरिभावरूपसंबन्धं दर्शयति “द्वे रूपे” इत्यादिना, मूर्तं चामूर्त्तमेव चेति बद्धश्च मुक्तश्चेत्यर्थः, एतद्विवृणोति–

मू० क्षराक्षरस्वरूपे ते सर्वभूतेषु च स्थिते ।
अक्षरं तत्परं ब्रह्म क्षरः सर्वमिदं जगत् ॥
एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥

टी० “क्षराक्षरस्वरूपे” इति, ज्ञानसंकोचात्मकक्षरणवदसंकुचितज्ञानं चेत्यर्थः, सर्वभूतेषु च स्थिते–अर्हार्थे क्तः सर्वभूतस्थित्यर्हे सूक्ष्मतरतया व्यापनक्षमे इत्यर्थः । यद्वा बद्धस्य स्वरूपेण सर्वभूतस्थितिः, मुक्तस्य तु धर्मभूतेन विभुज्ञानद्वारेणेति अक्षरं तत्परं ब्रह्मेति तन्मुक्तस्वरूपम् अक्षरं क्षरं सर्वमिदं जगत् इदं बद्धस्य स्वरूपं क्षरमित्यर्थः, रूपत्वं विशिनष्टि “एकदेशे”ति, शक्तिरपृथग्भूतं कार्योपयोगि विशेषणम्, एकदेशस्थितस्य विस्तारिणीति विशेषणद्वयेनासंकीर्णस्वभावत्वमुक्तम्, अस्मिन् श्लोके अखिलं जगदिति चिदचिदात्मकं जगदुच्यते तुल्यन्यायत्वादक्षरस्यापि शक्तित्वसिद्धिः । यद्वा अखिलजगच्छब्देनाक्षरस्यापि क्रोडीकारः, त्रिपाद्विभूतेरपि लोकशब्दवाच्यत्वात्तत्समानार्थत्वाज्जगच्छब्दस्य अखिलशब्दस्य सङ्कोचकाभावाच्च क्षरं सर्व-

मित्यत्र चरसामानाधिकरण्यमपवादः इह तदभावादचरस्याप्यभिधानमु-
पपद्यते इदंशब्दस्याखिलशब्दस्य च प्रकृतवाचित्वात् चराचरपरत्वं युज्यते

ननु अत्र चराचर[1]शब्दो कार्यकारणरूपेणावस्थितपरब्रह्मपरो पर-
ब्रह्मशब्दमुख्यार्थत्वसिद्धेः, अन्यथा ब्रह्मशब्दानामेकप्रकरणस्थानामर्थवैरूप्यं
च स्यात् जगतोऽग्निज्योत्स्नास्थानीयत्वं चोपपद्यते प्रभाया विशीर्णावयवत्वेना-
ग्निकार्यत्वोपपत्तेः, नैवं, ब्रह्मणो रूपे इति व्यतिरेकनिर्देशस्वारस्यभङ्गप्रस-
ङ्गात्, स च कार्यकारणयोर्ब्रह्मव्यतिरिक्तत्वाभावात्, यदि षष्ठीस्वारस्याय
मूर्तत्वामूर्तत्वे विवक्षिते तदा मूर्तामूर्तशब्दस्वारस्यभङ्गः भावप्रधानत्वाविव-
क्षायां रूपशब्दसामानाधिकरण्यायोगः, यद्युच्येत ब्रह्मणो द्वे रूपे, ब्रह्म
हि मूर्तममूर्तं चेति तदा प्रथमान्तब्रह्मशब्दाध्याहारदोषः स्यात् षष्ठ्यन्तस्य
ब्रह्मशब्दस्य मूर्तामूर्तपदसामानाधिकरण्यायोगात् । किंच सर्वभूतेषु च
स्थिते इति चानुपपन्नं सर्वभूतशब्दस्य कार्यवाचितया तत्र कार्यस्थितावुच्य-
मानायां स्वस्मिन् स्ववृत्तिप्रसङ्गात् कारणस्यापि कार्यादन्यतया स्ववृत्ति-
प्रसङ्गाच्च अवस्थाद्वयस्य सर्वभूतस्थितिरिति च न वाच्यं धर्मिपर्यन्तचरा-
चरशब्दसामानाधिकरण्यायोगात् तयोरवस्थापरत्वे स्वारस्यभङ्गात्, अव-
स्थावद्वाचिजगच्छब्दब्रह्मशब्दसामानाधिकरण्यायोगाच्च, तस्मिन् सोढेऽपि
कारणत्वावस्थायाः कार्यविद्यमानत्वायोगाच्च शक्तिशब्दस्य कार्यवाचि-
त्वायोगाच्च श्लोकस्य नायमर्थः उपचारतोऽपि कार्योपयोगिविशेषणं हि
शक्तिशब्देन व्यपदेशमर्हति कार्योपयोगिविशेषणत्वस्य साम्यात् शक्तिर्हि
शक्तं प्रत्यपृथग्भूतं कार्योपयोगिविशेषणं, कार्यं तु न कारणस्यापृथग्भूतं
विशेषणं कार्योपयोगि च भवति कार्यकारणयोरनन्यत्वात्स्वस्य स्वयमेव
विशेषणत्वायोगात्, कार्यत्वं विशेषणमिति चेत् सत्यं, तथाऽपि धर्मिवा-
चिनो जगच्छब्दस्य कार्यतावाचित्वाभावात् शक्तिशब्दसामानाधिकरण्य-
मुपचारतोऽपि नोपपद्यते कार्योपयोग्यपृथग्भूतविशेषणं शक्तिरिति मुख्यत्व-
मस्मन्मते संभवेत् चरशब्दस्य कार्यपरत्वे दृष्टान्तवैघट्यं च स्यात्, तच्च
ज्योत्स्नायां विशीर्णावयवत्वाभावेनाग्निकार्यत्वाभावात्

१ चराचरशब्दो इति पाठान्तरम् ।

Digitized by Google

न च "क्षरं प्रधानममृताक्षरं हर" इति प्रयोगानुसारेण चेतनाचेतनपरत्वं युक्तम् । अचिदंशस्य स्वस्मिन् स्वप्रवृत्तिप्रसङ्गेन सर्वभूतस्थित्यनुपपत्तेः, चिदचित्संघातरूपेषु भूतेषु द्वयोरवस्थानमुपपन्नमिति चेत् न समुदायिनोः समुदायनिष्ठत्वानुपपत्तेः समुदायो हि समुदायिनिष्ठः उपरितनग्रन्थवैरूप्यं च स्यात्. उच्यते हि "भूप? मूर्त्तममूर्त्तं चे"ति मूर्त्तामूर्त्तशब्दाभ्यां रूपद्वयं प्रस्तुत्य हिरण्यगर्भादीन् निर्दिश्य "मूर्त्तमेतद्धरेरूपं भावनात्रितयात्मि"मिति मूर्तशब्दवाच्यरूपस्य भावनात्रयान्वयकथनात्, न ह्यचेतनस्य कर्मब्रह्मभावनान्वयः "सोऽक्षरः परमः स्वराट्" इत्यत्र ब्रह्मेन्द्रादिवद्विलक्षणत्वाभावित्वात्, स स्वराड् भवतीति वन्मुक्तिवाचिस्वराट्छब्दसामानाधिकरण्याच्च अक्षरशब्दो मुक्तात्मपरः अतस्तदनुरोधेनाक्षरशब्दोऽत्रापि मुक्तात्मपरः ब्रह्मशब्दार्थवैरूप्यं तु तपसा चीयते ब्रह्म तस्मादेतत् ब्रह्म नामरूपमन्नं च जायते इति श्रुताविवानेकोपपत्तिबलाद्युज्यते अतो यथोक्त एवार्थः ब्रह्मणोऽविद्यासंबन्धद्वारभूते जीवात्मन्यविद्यान्वयं दर्शयति—

मू० विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा ।
अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते यया

क्षेत्रज्ञशक्तिः सा वेष्टिता नृप? सर्वगा संसारतापानखिलानवाप्नोत्यतिसंततान् तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता

सर्वभूतेषु भूपाल? तारतम्येन वर्त्तते । प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया

टी० विष्णुशक्तिरित्यादिना, सर्वगा—चतुर्मुखादिपिपीलिकान्तसर्वशरीरस्था जातावेकवचनम् । यद्वा धर्मभूतज्ञानेन स्वतः सर्वं व्याप्तुं क्षमा कर्मणा वेष्टिता कर्मणा संकुचितज्ञानेत्यर्थः, तर्हि सर्वे यज्ञाः स्युरित्यत्राह "तये"ति, कर्मतारतम्यानुगुणं ज्ञानतारतम्यवती क्षेत्रज्ञशक्तिरित्यर्थः सर्वेषां ज्ञाननित्यत्वस्य मुक्तौ सर्वविषयत्वस्य च प्रामाणिकत्वाद्बद्धावस्थायां संको-

Digitized by Google

चाविकासो सिद्धो तत्तारतम्यं च पुंसः शक्त्युपलक्षितः तच्छक्त्या पशवोऽधिका इति स्पष्टीकृतं, जातीनामप्यपृथक्सिद्धधर्मत्वेन रूपशब्दवाच्यत्वाच्च तद्ग्रा हृत्यर्थं प्रस्तुतं रूपत्वनियाम्यत्वलक्षणमित्याह "प्रधानं चे"ति, चिदचितोः परमात्मनियाम्यत्वधार्यत्वव्याप्यत्वनित्यत्वादेः प्रमाणान्तरागोचरतया विहितत्वाविषेध्यत्वमयुक्तमिति नियाम्यत्वादिधर्माणां पारमार्थ्येन तदा-श्रयभूतयोश्चिदचितोश्च पारमार्थ्यानित्यत्वोक्त्या च तयोर्भ्रमविषयत्वासंभ-वश्च दर्शितो भवति. न हि धर्मिसत्यत्वेन विना धर्मसत्यत्वं युक्तं. नापि बाध्यस्य नित्यत्वं युक्तं सर्वभूतात्मभूतया—सर्वभूतव्यापिकयेत्यर्थः ।

मू० विष्णुशक्त्या महाबुद्धे? वृतौ संश्रयधर्मिणौ ।
तयोः सैव पृथग्भावकारणं संश्रयस्य च ॥
यथा सक्तो [1]जले वातो बिभर्ति कणिकाशतम् ।
शक्तिः साऽपि तथा विष्णोः प्रधानपुरुषात्मनः ॥

टी० विष्णुशक्त्या विष्णोर्नियमनशक्त्या अन्यथा "शक्तिः साऽपि विष्णोरित्यनन्तरोक्तिविरोधात् तया वृतौ—व्याप्तौ नियमेनेन च धारणं श्रुतिसिद्धम् । 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत" इति हि श्रूयते बिभर्तीत्युत्तरश्लोकसामञ्जस्यं संश्रयधर्मिणौ भगव-दपृथक्स्थितिधर्मकौ पृथग्भाव उपकारकोपकार्यत्वलक्षणसंबन्धविशेषरा-हित्यं संहारः तत्र हि करणकलेबरं नास्ति, संश्रयः करकरणत्वेन संबन्धः सृष्टिरित्यर्थः । यद्वा संश्रयस्तयोः संबन्धः संसारः—पृथग्भावो मोक्षः तत्सर्वं भगवन्नियमनाधीनमित्यर्थः । अत्र दृष्टान्तमाह "यथे"ति, कारणात्का-र्यस्य विभागे दृष्टान्तः जनस्य कणिकाः तस्माद्वेगेन बिभर्ति वायुः संयोजकत्ववियोजकत्वयोर्वा दृष्टान्तः परस्परं संकलिता असंकलिताश्च बिभर्ति हि वायुः । यद्वा प्रकृतिपुरुषगतदोषलेशराहित्ये दृष्टान्तः वायुर्हि कणिकाशतं तत्स्वभावास्पृष्टो बिभर्ति प्रधानपुरुषात्मनः प्रधानपुरुषयो-

१ यथा सक्तं जले वात इति पुस्तकान्तरपाठः ।

ात्मनः समस्तचिदचिद्वस्तुजातमिति कर्माध्याहर्तव्यम् । यद्वा प्रधानशब्दानन्तरपुरुषशब्दो बद्धपरः आत्मशब्दः प्रकृतिसंसर्गरहितमुक्तात्मपरः, एतान् बिभर्तीति एवंविधस्य जगतः परमार्थत्वमाह—

सू० . तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥

इत्यादिना परं ब्रह्म स्वभावत एव निरस्तनिखिलदोषगन्धं समस्तकल्याणगुणात्मकं जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलीलं प्रतिपाद्य कृत्स्नस्य चिदचिद्वस्तुनः सर्वावस्थाऽवस्थितस्य पारमार्थिकस्यैव परस्य ब्रह्मणः शरीरतया रूपत्वं शरीररूपतन्वंशशक्तिविभूत्यादिशब्दैस्तच्छब्दसामानाधिकरण्येन चाभिधाय तद्विभूतिभूतस्य चिद्वस्तुनः स्वरूपेणावस्थितिमचिन्मिश्रतया क्षेत्रज्ञरूपेण स्थितिं चोक्त्वा क्षेत्रज्ञावस्थायां पुण्यपापात्मककर्मरूपाविद्यावेष्टितत्वेन स्वाभाविकज्ञानरूपत्वाननुसंधानमचिद्रूपार्थाकारतयाऽनुसन्धानं च प्रतिपादितमिति परं ब्रह्म सविशेषं, तद्विभूतिभूतं च जगदपि पारमार्थिकमेवेति ज्ञायते

टी० "तदेतदि"ति, मिथ्या हि बाध्यत्वतानित्यं पारमार्थ्ये सति हि नित्यत्वसंभवः । उदाहृतवचनार्थान् संक्षेपेणाह "इत्यादिने"ति, निरस्तनिखिलदोषत्वं कल्याणगुणात्मकत्वं च स सर्वभूतप्रकृतिं समस्तकल्याणेत्यादिश्लोकार्थः जगदुत्पत्त्यादिलीलत्वं भगवच्छब्दनिर्वचनसिद्धम्, अन्तःप्रवेशनियमनादीत्यादिशब्देनाध्यवस्थानुमन्तृत्व उच्येते । इत्यादिनेत्यादि–शब्देन क्रीडतो बालकस्येवेत्यादिवचनं विवक्षितं तदर्था लीला–शब्देन विवक्षितः सर्वावस्थावस्थितस्य–कार्यकारणावस्थितस्य बद्धमुक्तावस्थितस्य चेत्यर्थः । प्रमाणान्तरगोचरस्यार्थस्य हि निषेधार्थं भ्रान्तिसिद्धत्वेनानुवादसंभवः पर-

मात्मनियाम्यत्वादिकं तु प्रमाणान्तरागोचरत्वाद्विधित्सितमेवेति विहितस्य निषेधोऽनुपपन्नः इत्यभिप्रायेण पारमार्थिकस्यैवेत्युक्तं, नियन्तृत्वनियाम्यत्वादिप्रतिपादनसिद्धार्थः शरीरतया रूपत्वं "तदेव सर्वमेवेतदि"त्यत्र तच्छब्द-सामानाधिकरण्य द्वे रूपे ब्रह्मणस्तस्येत्यादिनोक्तमर्थमाह "शरीररूप तत्त्वं-श्चे"ति. चे"ति, प्रतिपादितमितीति एवं शास्त्रोपक्रमोपसंहारेष्ववान्तर-प्रकरणोपक्रमोपसंहारेषु प्रतिपादितत्वादित्यर्थः, ज्ञायत इत्यन्तेनोक्तवचनार्थसंग्रहः कृतः उदाहृतवचनैर्वस्तुनः सविशेषत्वं जगतः सत्यं च स्थितम् । अथ परोदाहृतवचनानि पूर्वोदाहृतवचनार्थानुगुण्येन व्याचिख्यासुः प्रथमं प्रत्यस्तमितेत्यादि श्लोकं व्याचष्टे–

मू० प्रत्यस्तमितभेदमित्यत्र देवमनुष्यादिप्रकृतिपरिणामविशेषसंसृष्टस्याप्यात्मनः स्वरूपं तद्गतभेदरहितत्वेन तद्वद्वाचिदेवादिशब्दागोचरम् ॥

टी० "प्रत्यस्तमिते"ति, "दुःखाज्ञानमलाधर्माः प्रकृतेस्ते न चात्मन इति पुमांश्च, देवो न नरो न पशुर्न च पादपः शरीराकृतिभेदास्तु भूपैते कर्मयोनयः इत्यादिषु प्रकृतिर्देवादिशरीरं चोपाधित्वेन प्रतीयत इत्युभयविधवचनार्थं संघट्टयितुं "देवमनुष्यादिप्रकृतिपरिणामविशेषे"त्युक्तं, प्रकृतेरित्यत्र प्रकृतिशब्दनिर्देशः शरीरस्य प्रकृतिपरिणामरूपत्वादित्यभिप्रायः देवमनुष्यादीति शब्देन प्रतिषेध्यभेदस्य शरीरे विद्यमानता दर्शिता

टी० ननु मुक्तानामुपास्यत्वाभावादुपासकस्वरूपस्याचित्संसृष्टतया प्रत्यस्तमितभेदत्वायोगाच्च तादृक्त्वोपदेशायोगादस्य श्लोकस्यपरिशुद्धात्मविषयत्वानुपपत्तेः परमात्मविषयत्वं स्यादिति शङ्कापरिहाराय चोक्तं "देवमनुष्यादिप्रकृतिपरिणामविशेषसंसृष्टस्यापी"ति इदानीं संसरतोऽपि स्वाभाविकाकारस्य तिरोहितस्य विद्यमानत्वादाविर्भविष्यतस्तस्य स्तथानुसन्धानायोपदेश इति भावः । तस्यात्मपरदेहेषु सतोऽपीत्येतत् स्मारयितुं संसृष्टस्यापीत्युक्तम्, अपि विरोधे पातकिसंसर्गात्पातकित्वं भवति रुमासर्गात्पदार्थानां लवणत्वं भवति अतो विरोधस्तद्गतभेदरहितत्वेन भेदो रूप-

वर्णादिः, अनेन प्रत्यस्तमितभेदशब्दो व्याख्यातः प्रत्यस्तमितभेदशब्देन भेदस्यापुनरुदयविनाशोऽभिप्रेतः ततश्च प्रलयकालव्यावृत्तिः तद्वेदवाचि-देवादिशब्दागोचरम् इत्यनेनागोचरं वचसामिति पदं व्याख्यातम् ।

सू० ज्ञानसत्तैकलक्षणं स्वसंवेद्यं योगयुङ्मनसो न गोचर इत्युच्यत इत्यनेन न प्रपञ्चापलापः

टी० "ज्ञानसत्तैकलक्षण"मिति, ज्ञानपदं सत्तामात्रमिति च पदं व्याख्यातं सत्तैकलक्षणमित्यत्रैकशब्देन सत्तामात्रमिति पदगतमात्रजर्थं विवृण्वता जायतेऽस्तीत्यादिविकारा व्यावृत्ताः, सत्तामात्रमित्युक्ते केनाकारेण सत्तेत्यपेक्षायां ज्ञानसत्तैकलक्षणमित्युक्तं ज्ञानत्वाकारेण सत्तेत्यर्थः वचसामगोचरत्वे सत्ताव्याघातपरिहारार्थं न्यायवैशेषिकोक्तजडस्वरूपताव्युदासार्थं चात्मसंवेद्यमिति पदस्यार्थमाह "स्वसंवेद्यमि"ति, यद्वा अगोचरं वचसामित्यन्तैः पदैः कल्पनाविकाररहित्ये तद्वाचिशब्दागोचरत्वे चोक्ते भेदकधर्माभावात्कथं च स्वव्यावृत्तियहणमिति शङ्कायामाह "आत्मसंवेद्य"मिति, प्रत्यक्त्वेन भासमानत्वं स्वव्यावर्तकम् अन्ये हीदन्तया भासन्त इत्यर्थः ज्ञानपदं धर्मधर्मिणोरविशेषेणाजडत्वमाह धर्मभूतज्ञानस्य वृहत्तया परिशुद्धात्मस्वरूपस्य ब्रह्मशब्दवाच्यत्वं, ब्रह्मणो हि प्रतिष्ठाहमित्यादिष्वेवोपपद्यते योगयुक्—प्रक्तायोगः एवं प्रकारममलमिति वचनेन परमात्मनि मुक्तस्वभावस्यातिदिष्टत्वेन मुक्तस्य परमात्मसाम्यप्रतिपत्तेः परमात्मनश्च अपक्षयविनाशाभ्यां रूपवर्णादिनिर्देशेत्यादिवचनैः कतिपयभेदराहित्यस्य षड्भावविकारराहित्यस्य च स्पष्टत्वात्तदाऽऽनुगुण्येनानतिविस्तरं श्लोको व्याख्यातः । अस्य श्लोकस्य मुक्तात्मविषयत्वं तस्य च प्रक्रान्तयोगस्यागोचरत्वं च कथं ज्ञायत इत्यभिप्रायेणाह—

सू० कथमिदमवगम्यत? इति तदुच्यते अस्मिन् प्रकरणे संसारैकभेषजतया योगमभिधाय योगावयवान् प्रत्याहारपर्यन्तांश्चाभिधाय धारणासिद्ध्यर्थं शुभाश्रयं वक्तुं परस्य

टी० "कथमिद"मिति, प्रकरणादेवावगम्यत इति परिहरति तदुच्यत इत्यादिना, अस्मिन् प्रकरणे नह्ययं मुक्तकश्लोकः अपि तु प्रबन्धस्थः, अतः पूर्वापरापरामृष्टः शब्दोऽन्यां कुरुते मतिमिति तत्परिहाराय पूर्वापरपरामर्शनैवार्थो वक्तव्य इति भावः। संसारैकभेषजतया योगमभिधायेति एकशब्देन क्लेशानां च तयकरं योगादन्यत्र विद्यत इत्यस्यार्थोऽभिप्रेतः, वाक्यार्थज्ञानमात्रस्यापवर्गोपायत्वनिरासश्च स्मारितः योगावयवान् प्रत्याहारपर्यन्तानिति प्राणायामेन पवने प्रत्याहारेण चेन्द्रिये वशीकृते ततः कुर्यात्स्थितं चेतः शुभाश्रयम्, इत्यादिवचनार्थः संक्षिप्तः

मू० ब्रह्मणो विष्णोः शक्तिशब्दाभिधेयं रूपद्वयं मूर्त्तामूर्त्तविभागेन प्रतिपाद्य तृतीयशक्तिरूपकर्माख्याविद्यावेष्टितमविद्विशिष्टं क्षेत्रज्ञं मूर्त्ताख्यविभागं भावनात्रयान्वयादशुभमित्युक्त्वा द्वितीयस्य कर्माख्याविद्याविरहिणोऽचिद्वियुक्तस्य ज्ञानैकाकारस्यामूर्त्ताख्यविभागस्य निष्पन्नयोगिध्येयतया योगयुग्मनसोऽनालम्बनतया।

टी० "परस्य ब्रह्मणो विष्णोः शक्तिशब्दाभिधेय"मिति विष्णुशक्तिः पर प्रोक्तेत्यत्र विष्णुरेव शक्तिब्रह्मणा इति केचिद्वदन्ति तद्व्यावृत्तये विष्णोरिति व्यासः कृतः। परस्य ब्रह्मणः शक्तिः परब्रह्मभूतस्य वासुदेवस्य ततः स वासुदेवेति तद्ब्रह्म परमचिन्त्यं परमात्मा च सर्वेषां विष्णुनामा स वेदेषु वेदान्तेषु च परब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितं शक्तिः साऽपि तथा विष्णोरित्यादिभिर्विष्णोरेव परब्रह्मत्वं जगतस्तच्छक्तित्वं तच्छक्तिनियाम्यत्वं चोक्तमिति तत्प्रतिपादकतत्तद्वचनविरोधात्तदयुक्तमित्यभिप्रायः। शक्तिशब्दाभिधेयम्—अपृथक्सिद्धविशेषणं हि शक्तिः, ब्रह्म च न कस्यचिद्विशेषणम् अतो विष्णोरेव शक्तिः स हि ब्रह्मशब्दवाच्य इत्यभिप्रायः, अत्र नारायणः परं ब्रह्म विष्णुस्तदाऽऽसीद्धरिरेव निष्कलः पाति विश्व-

* स्फोरितः इति पाठान्तरम्।

Digitized by Google

स्यात्मेश्वरं न तस्येशे कश्चन" "नतत्समश्चाभ्यधिकश्च दृश्यते" "यस्मात्परं नापरमस्ति किंचित्" "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य" इत्यादयः स्मृतयोऽनुसंधेयाः शक्तित्रयाश्रयो दिव्यविग्रह उपास्यत्वेनोच्यते विष्णुरेव शक्तिश्चेत् कथं विष्णोर्विग्रहैकदेशो विष्णोरेवाश्रयः तदाश्रयभूतो विग्रहो न हि भूतो ब्रह्मणोऽस्तीतीदं च दूषणं फलितं "शक्तिशब्दाभिधेयं रूपद्वय"मिति, परापरसंज्ञस्यास्य रूपद्वयस्योत्तरत्र परापरशब्दसमानाधिकरणशक्तिशब्देन परामर्शात्परसंज्ञरूपगोचरः शक्तिशब्दोऽत्र परमात्म वाच्य इत्यभिप्रायः, तच्च विष्णोः परं रूपं विष्णुशक्तिः परा प्रोक्तेति ह्युच्यते भूप मूर्त्तं चेत्यादिवचनार्थमभिप्रेत्याह "मूर्त्तामूर्त्तविभागेने"ति, अविद्याकर्मसंज्ञान्या तृतीयाशक्तिरिष्यत इत्यस्यार्थमाह "तृतीये"ति, तृतीयेति मूर्त्तामूर्त्तविभागेनेत्युक्तत्वात् मूर्त्ताख्यविभागमिति विभज्य निर्देशः कृतः, निष्पन्नयोगिध्येयतयेति न विध्यर्थे कृत्यप्रत्ययः, अपितु शक्यभिप्रायः योगिध्येयं परं पदमित्यत्रापि स एवार्थः निष्पन्नयोगिध्येयतया प्रक्रान्तयोगस्य ध्यातुमशक्यत्वं फलितम् ॥

(शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(Continued from page 424. VOL. IX.)

टी० ॥ प्रतियोगिव्याप्यत्वेन व्युदस्तस्यापि प्रतियोगिसन्निकर्षस्य कारणत्वमाशङ्क्याह—। [a]"नन्वे"ति । अभावेन सह सन्निकर्षो न शङ्कितः भट्ट(१)स्तदनङ्गीकारात् ॥ [b]"अत एवे"ति । पूर्वं व्यवधायकाभावत्वेन कारणत्वं शङ्कितमिदानीमव्यवधानत्वेनेत्यपौनरुक्त्यं यद्वाऽभावेन ग्राह्येण सहेन्द्रियाव्यवधानमभावग्रहकारणं व्यवहितस्थले तदभावाभावग्रहप्रसङ्ग इत्यत आह—। "अत एवे"ति । तथाचार्थेन्द्रियसन्निकर्षः कारणमित्युक्तं स्यात्तथाचेन्द्रियवेद्यतैवाभावस्य नतु भट्टाभिमतानुपलम्भः कारणमित्याह—।

(१) भट्टस्तदनङ्गीकारात् (अभावेन समं सन्निकर्षस्याऽनङ्गीकारात्) अभावेन सह सन्निकर्षो न शङ्कितः (किन्तु प्रतियोगिनैव)—इत्यन्वयः ।

Digitized by Google

[c] "इन्द्रिये"ति । तदुपपत्तेरव्यवधानस्य(१)कारणत्वोपपत्तेः ॥ [d] "नचे"ति । कारणमित्यनुषज्यते आश्रयसाक्षात्कारस्याभावप्रमाहेतुत्वे गृहाद्बहिर्गतेन गृहे चैत्राभावो न गृह्येत तदानीं गृहस्यासाक्षात्कारादित्यर्थः ननु यत्र व्यवधानं तत्राप्युक्तसामग्रीबलादभावो गृह्यत एव प्रतियोगिमति यत्राभावज्ञानं भवेत्तदा दोषः स्यात्तत्र चाभाव एव वास्तवो नास्तीति शङ्कते—। [e] "नन्वि"ति ।

मू० [a] तर्हि प्रतियोग्यभावसहितोनुपलम्भ एवाभावप्रमाणमस्तु जहि हि योग्यताविशेषणनिवेशव्यसनं [b] योग्यता विशेषणाप्रक्षेपणेनुपलम्भमात्रतो वस्तुगत्या प्रतियोग्यभाववत्यपि नाभावनिश्चयः कदाचित्तु संशयो जायते तत्कथं तथाङ्गीक्रियत इति चे [c] त्तर्हि व्यवधानेप्येवमेवेति योग्यताविशेषणप्रक्षेपेपि तुल्यम् [d] अपिच मेयस्य वास्तवं सत्त्वं प्रमाणकोटावनिवेशाद्दमेव मेयवस्तुसत्त्वासत्त्वनिर्धारणार्थमेव हि प्रमाणाप्रमाणविवेचनं विचारकाणाम् [e] अन्यथानुमाने व्याप्तावुपाधिनिरासायासोव्यर्थः स्यात् व्याप्तिपक्षधर्मताज्ञानमात्रस्यैव कारणत्वाङ्गीकारेण सौस्थ्यात् [f] प्राङ्नास्तिताप्रमितौ च यद्यभावप्रमाणतां मन्यसे तर्हि सा (१)न स्यात्तच्चेदानीं जायमानाभावप्रमोत्पत्तावभाववास्तवसत्ताविरहस्येदानीं क्वचित्सम्भवात् ।

टी० ॥ अभ्युपेत्य परिहरति—। [a] "तर्ही"ति । व्यवधानेऽभावप्रमा स्यादित्येतदर्थमेव(२)हि योग्यताविशेषणं सा चेदभ्युपगतैव किं विशेषणे·

(२) प्राथमिकमेवार्थमनुसृत्य तदुपपत्तेरित्यस्यार्थमाह—अव्यवधानस्येति

(१) सा=प्राङ् नास्तिता प्रमितिः ।

(२) इत्येतदर्थम्=इत्येतत्प्रसङ्गवारणार्थम् ।

नेत्यर्थः योग्यताविशेषणमन्तरेणान्धकारे घटाभाववति गृहे घटाभावप्रमा स्यान्नतु घटसदसत्त्वसंशय इत्याशङ्कते—। [b] "योग्यते"ति । तर्हि व्यवधानेपि घटाभावप्रमायां घटसदसत्त्वसंशयो न भवेदिति योग्यताविशेषणादानेपि सामग्रीसत्त्वे फलानुदयदोषः(१)प्रसक्त इति परिहरति—। [c] "तर्ही"-ति । प्रमाणप्रवृत्तेः प्राक् प्रमेयसत्त्वनिर्णये प्रमाणफलमेवेत्याह—। [d] "अपि चे"ति । यत्र वास्तवी व्याप्तिस्तत्र पक्षधर्मताज्ञानमनुमितिजनकमिति व्याप्तिज्ञानार्थमुपाधिनिरासप्रयासवैफल्यमित्याह—। [e] "अन्यथे"ति । प्राङ्नास्तितास्थले यद्यनुपलब्धिः करणं तदा गृहोपलम्भकाले चैत्राभाववतो गृहस्य क्रमेण चैत्रवत्त्वे सति नाभावः सहकारीत्याह—। [f] "प्रागि"ति । तद्गेहं तदा चैत्राभाववच्चैत्रवत्तया योग्यतायां सत्यामप्यप्रमाणत्वादित्यनुमानामाशङ्क्य यद्युपनिबन्धः(२) ।

मू० [a] फलविषयकालिकाभावोपलक्षिताश्रयादेः कारणकोटिनिवेशे विशेषाभावात् तदु [b] पलक्षितत्वस्यैव विशेषणस्य विशेषत्वे [c] ऽतिप्रसङ्गात्(३)* [d] तथापि सामान्यतो विशेषाभावोऽसिद्ध ?*—इति चेन्न, [e] तस्य सत्त्वे निर्वचनापातात् ।

टी० ॥ ननु फलेनानुपलब्धिजन्यज्ञानेन प्राक्काल एव विषयीक्रियते तत्र चासीदेवाभाव इति तदुपलक्षिताश्रयोपि कारणकोटि प्रविष्ट इत्याशङ्क्याह—। [a] "फले"ति । तथा सति प्रतियोगिमत्यभावप्रमा नभवत्यन्यत्र भवतीति विशेषो न स्यादित्यर्थः आश्रयस्याभावोपलक्षितत्वं यद्विशेषणं तदेव विशेषः स्यादित्याशङ्कते—। [b] "उपलक्षितत्वे"ति । एवमप्यतिप्रसङ्ग

(१) फलानुदयदोषः, संशयाभावानुदयदोष इत्यर्थः ।

(२) यदि पदस्य मूले उपनिबन्ध इत्यर्थः ।

(३) अयमाशयः-आश्रयनिष्ठं यदिदमभावोपलक्षितत्वविशेषणं तादृशविशेषणविशिष्टत्वमप्याश्रये विशेषणमुपलक्षणं वा ? विशेषणत्वे तादृशविशेषणविशिष्टत्वस्यापि विशेषणत्वेन पुनस्तादृशविशेषणविशिष्टत्वस्यापि तथात्वेनाऽनवस्था, उपलक्षणत्वे तु प्रतियोगिमत्यपि देशे तदभावप्रमा प्रसज्येतेत्यतिप्रसङ्गस्तदवस्थ इति ।

एवेति परिहरति—। c"अतिप्रसङ्गादि"ति । विशेषस्य विशिष्यानिर्वचनेपि सामान्यतः कश्चिद्विशेषो व्यवहारानुरोधात्स्वीकार्य इत्याशङ्कते—। d"तथापी"ति । कोऽसौ विशेष इति वादिप्रश्ने तन्निर्वचनमावश्यकमन्यथा सर्वत्रसामान्येनैवोत्तरं स्यादिति परिहरति—। e"तस्ये"ति । व्याख्यानमिदमस्माकं यथा पितृवचस्तथा व्याख्यानगुणदोषाभ्यां संबन्धो मन्यितुर्न मे ॥

इति श्रीमहामहोपाध्याय शङ्करमिश्रकृतखण्डनव्याख्यानेऽनुपलब्धिखण्डनव्याख्यानं समाप्तम् ॥

सू० (१) a"कस्यायमसिद्धो नाम तथाहि b व्याप्तिपक्षधर्मत्वाभ्यामप्रमितोऽसिद्ध इत्यलक्षणं c हेत्वाभासान्तराणामप्यसिद्धप्रवेशः एवं सति स्यात् d व्याप्तिं पक्षधर्मतां e तत्प्रमितिं वा न विरुन्धतां हेतुदोषत्वासम्भवात् ननु नेद(२)मीदृशं तथाहि ।

टी० ॥ या सूक्तिर्भुवनाथवक्त्रकमलादुद्गत्वरी तत्कृतं सौभाग्यं प्रतिपद्य शुद्धमतिभिः श्लाघापदं लम्भिता न्यस्ता सज्जनमानसे विजयतामायुष्मन्तोदयं(३) ग्रन्थग्रन्थिविमोचनाय रचना वाचामियं शाङ्करी ॥ १ ॥ प्रमाणानां सामान्यलक्षणानि विशेषलक्षणानि च विस्तरेण निराकृत्य तच्चिकीर्ष्यत्वात्तदाभासानां तदनन्तरं तन्निराकरणाय प्रस्तौति—। a"कस्याय-मि"ति । यद्यपि भेदस्थापनायां हेत्वाभासखण्डनिकस्य स्ववधाय कृत्योत्थानमिव तथापि हेत्वाभासानामखण्डने तैरेव द्वैतापत्तिरिति तल्लक्ष-

---

(१) { एतावताप्रबन्धेन मानवर्क्कनिराकृतम् । आभासखण्डनं कर्त्तुमारभते ततः परम् । }

(२) इदम्=उक्तलक्षणम्, ईदृशं न=हेत्वाभासान्तराणामप्यसिद्धे प्रवेशकं न,—इत्यर्थः ।

(३) आयुष्मन्तोदयम्=सूर्यचन्द्रोदयपर्य्यन्तम्, "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ"—इत्यमरात् ।

णामपि खण्डयते—। [b]"व्याप्ती"ति। व्याप्तप्रमायां व्याप्यत्वासिद्धिः पक्षधर्मताया अप्रमायामाश्रयासिद्धिः स्वरूपासिद्धिश्च तदेतत्त्रितयसाधारणं लक्षणं अप्रमा च विषयाभावाद्विषये सत्यपि तदग्रहाद्वा तथाच यत्र व्याप्तिस्वरूपं नास्ति सदपि वा न प्रतीयते यत्र पक्षस्वरूपं नास्ति तद्विशेषणं सन्देहः सिषाधयिषा वा नास्ति तत्सत्त्वेपि हेतुर्वा नास्ति सर्वेष्वोपग्राहकमेतदिति भावः विरुद्धव्यभिचारिबाधितेषु व्याप्त्यभावात्सत्प्रतिपक्षे च तदनिश्चयात्सर्वत्र लक्षणमिदमतिव्यापकमित्याह—। [c]"हेत्वाभासान्तराणामि"ति। अतिव्याप्तिं दृढयति—। [d]"व्याप्तिमि"ति। व्याप्तिपक्षधर्मतयोः सत्त्वेपि(१) तदज्ञानदशायामज्ञानस्वरूपासिद्धिं सङ्गृहीतुमाह—। [e]"तत्प्रमितिमि"ति।

मू॰ [a]"केचिद्दोषा व्याप्तिपक्षधर्मतातत्प्रमितिविरहात्मानः केचित्तु व्याप्त्यादिभङ्गे लिङ्गभूताः प्रतिबन्धकतयानुमित्युत्पत्तिं निरुन्धानाश्च केचिद्दोषभूयं भजन्ते तत्र [b]प्रथमे तावदसिद्धमध्यमध्यासते तद्यथा व्याप्यत्वासिद्धः सोपाधिरूपः [c]अनौपाधिकसंबन्धिता हि व्याप्तिः सोपाधिता चानुपाधिताविरुद्धरूपैव [d]एवमधिकरणासिद्धिरप्यसिद्धावेवान्तर्भविष्णुः पक्षपदोपात्तस्याश्रयस्य व्यतिरेकरूपाहि सा [e]सिद्धसाधनमपि तथैव सिषाधयिषितधर्मविशिष्टो हि पक्ष उच्यते यत्र सिद्धं न तत्र सिषाधयिषास्ति ततो विशेषणाभावायत्तो विशिष्टपक्षरूपस्य तथाभावः *[f]न च वाच्यं यथा सव्यभिचारत्वादव्याप्तिकमिति पृथगेव सव्यभिचारस्य दोषत्वं तथा सिद्धत्वात्तत्र सिषाधयिषा

(१) अत्र 'हेतो'–इति शेषः।

नास्तीति सिद्धत्वस्यापि पृथगेव दोषत्वं प्राप्नोति * लिङ्गद्वारेणासिद्धिपर्यवसायित्वात् ॥

टी० ॥ व्याप्तिपक्षधर्मताप्रमितिविरहस्वरूपत्वमसिद्धत्वमिति लक्षणं सङ्ग्रहीतुं त्रिधा हेत्वाभासान् विभजते—। [a] "केचिद्" इति। अज्ञायमानस्यापि व्याप्तिपक्षधर्मताप्रमितिविरहस्य दोषत्वं बाधवत्(१)ज्ञायमानं सद्यदनुमितिप्रतिबन्धकं स हेत्वाभास इति न लक्षणं गौरवात् किन्त्वनुमितिप्रतिबन्धकत्वमात्रं तल्लक्षणमिति भावः दोषभूयं दोषत्वं—। [b] "प्रथमे" इति। ये व्याप्तिपक्षधर्मतातत्प्रमितिविरहात्मान इत्यर्थः ननु सोपाधित्वमसिद्धत्वं भवति ननु त(२) द्व्याप्तिविरहस्वरूपमित्यत आह—। [c] "अनौपाधिके" इति। आश्रयासिद्धेः पक्षधर्मताविघटनात्मकत्वनिर्वाहाय पीठमारचयति—। [d] "एवमि" इति। ननु गगनारविन्दं सुरभीत्यत्राश्रयव्यतिरेकरूपतास्तु सिद्धसाधनं तु न तथेत्यत आह—। [e] "सिद्धे" इति। पक्षताघटकसिषाधयिषाविरहात्तत्राप्याश्रयविरहरूपतैवेत्यर्थः ननु व्यभिचारवत् सिद्धसाधनस्यासिद्धत्वोद्भावकत्वमेव ननु तद्रात्मकत्वमित्याशङ्क्य निराकरोति—। [f] "न चे" इति ॥

मू० [a] अन्यथा व्याप्त्यादिविरहपर्यवसितनामात्रेण सव्यभिचारत्वादीनामप्यसिद्धावेवान्तर्भावः स्यादिति [b] यतः सिषाधयिषाभावो न प्रतिपन्नो सिद्धत्वाल्लिङ्गाद्गम्यते किंनामेच्छाभावस्य तस्य [c] यथादर्शनं प्रत्यक्षादेरेवाधिगमः [d] इच्छैव तु तत्र यन्नास्ति तत्र सिद्धत्वं प्रयोजकमित्येतावन्मात्रेण सिद्धत्वमुपन्यस्यते सिद्धसाधने नत्विच्छाभावमनुमातुं

(१) बाधः पक्षे साध्याभाववत्तानिश्चयो ग्राह्यः, ननु पक्षे साध्याभावः साध्याभाववत्पक्षो वा, निश्चयस्य च तस्याऽज्ञातस्यैवाऽनुमितिप्रतिबन्धकत्वम्।

(२) तद्=असिद्धत्वम्।

लिङ्गतयेति(१)एवं स्वरूपासिद्धिरपि पक्षधर्मताविरहरूपैव ये तु व्याप्तिपक्षधर्मताविरहलिङ्गभूतास्ते ऽसिद्धतः पृथगेव हेत्वाभासाः [e]तद्यथा विरुद्धः साध्यविपरीतव्याप्तः तच्च साध्यव्यतिरेकव्याप्तता हेतो र्न साध्यव्याप्तताभावः [f]किं नाम साध्यव्यतिरेकेण सहानौपाधिकः संबन्धोन्य(२)एवासौ ।

टी० ॥ असिद्ध्युद्भावकस्याप्यसिद्ध्यन्तर्भावे दृष्टान्तमाह–। [a]"अन्यथे"ति । सिद्धसाधनस्याश्रयासिद्धिघटकत्वं नतु तदुद्भावकत्वमिति व्यभिचाराद्विवैषम्येण परिहरति–। [b]"यत" इति ॥ [c]"यथादर्शनमि"ति । न्यायमते प्रत्यक्ष एवेच्छाभावो भट्टमते त्वनुपलब्धिगम्य इत्यर्थः ॥ प्रत्यक्षादेरित्यादिपदेनानुपलब्धिसङ्ग्रहः किं तर्हि सिद्धसाधनोपन्यासेन इच्छाविरह एवोपन्यस्यतामित्यत आह–। [d]"इच्छैव त्वि"ति । स्फुटत्वादिच्छाप्रयोजकस्य सिद्धसाधनस्योद्भावनमित्यर्थः ॥ विरुद्धे व्याप्तिभङ्गलिङ्गत्वमुपपादयति–। [e]"तद्यथे"ति साध्यविपरीतव्याप्तोऽयं न साध्यव्याप्तः नहि तदभावव्याप्तस्य तद्व्याप्तत्वसम्भव इति विरुद्धस्य व्याप्तिभङ्गलिङ्गत्वं नतु व्याप्तिभङ्गत्वमेवेत्यर्थः ॥ [f]"किंनामे"ति । साध्यव्यतिरेकसामानाधिकरण्यमात्रस्यानैकान्तिकसाधारण्यादिति भावः ॥

मू० [a]इत्थमेव पक्षधर्मताविरहात्मापि नायं [b]किंनाम ततः साध्यव्यतिरेकेण सह निरुपाधिकसंबन्धत्वात्साध्यव्याप्तिरस्य नास्तीत्यनुमीयते तथा सति साध्यव्याप्तिव्यतिरेके लिङ्गं सद् विरुद्धः पृथगेव हेत्वाभासो भवति एवमनै-

(१) शब्दोऽनित्यश्चाक्षुषत्वादिति स्वरूपासिद्धिस्तापिपक्षवृत्तित्वरूपपक्षधर्मताविरहरूपेत्याह–एवमिति–भागासिद्धादेरप्यत्रान्तर्भावो यथा यथमूहनीय इति–

(२) अन्यः, साध्यव्याप्तताऽभावादन्यः ।

Digitized by Google

कान्तिकोपि न व्याप्तिव्यतिरेकरूपः किन्तु तल्लिङ्गमेव तथाहि [c] हेतोरन्वयस्य व्यतिरेकस्य वा व्यभिचारो न साध्यसाधनव्याप्तिविरहात्मा [d] किंनाम व्यभिचारो हेतोः साध्यव्याप्तिविरहं विना न सम्भवतीति लिङ्गभावेन व्याप्तिभङ्गं बोधयते [e] यदि हि निरुपाधिः साध्येन संबन्धोऽस्य भवेत् कथं व्यभिचरितुं शक्नुयात्तस्माद्व्याप्तिविरहलिङ्गं व्यभिचारः ननु व्याप्तिविरहः [f] पक्षधर्मताविरहरूपता त्वनैकान्तिकस्यासम्भावितैव [g] सत्प्रतिपक्षतायां चानवगम्यमानविशेषप्रतिपक्षप्रतिरुद्धतया यत्साध्यनिश्चयाजनकत्वं हेतोः स प्रतिबन्धकसद्भावे कार्याजनकत्वमितरकारणसाधारणो वस्तुभावः ।

टी० ॥ [a] "इत्थमि"ति । विरुद्धौ पक्षतद्धर्मतयोरभङ्गादित्यर्थः ॥ [b] "किं नामे"ति । अयं न साध्यव्याप्यः तदभावव्याप्यत्वादित्यसिद्धलिङ्गत्वमेवास्येत्यर्थः किन्तु लिङ्गमेव व्याप्तिविरहस्येति शेषः ॥ [c] "हेतोरि"ति कार्त्स्न्येन संबन्धस्य व्याप्तेः यद्यपि व्यभिचारो भङ्ग एव तथाप्यनौपाधिकत्वं व्याप्तिरित्याशयेनोक्तं तदेवाह —। [d] "किं नामे"ति । यत्र व्यभिचारस्तत्रोपाधेरवश्यकतयानौपाधिकत्वं नास्तीति व्याप्तिभङ्गलिङ्गतैव व्यभिचारस्येत्यर्थः ॥ [e] "यदि ही"ति । साध्यात्यन्ताभावासामानाधिकरण्यस्य साध्यात्यन्ताभावसामानाधिकरण्यरूपव्यभिचारासम्भव इत्यर्थः ॥ [f] "पक्षधर्मते"ति । शब्दोऽनित्यः सत्त्वादित्यादीनां पक्षधर्मतायाः सत्त्वादित्यर्थः ॥ [g] "सत्प्रतिपक्षतायामि"ति । यद्यपि विरुद्धयोर्हेत्वोरेकत्र व्याप्तिभङ्ग आवश्यकस्तथापि(१)तदनवगमदशायामन्योन्यप्रतिबन्धादेव(२)नान्यो-

(१) तदनवगमदशायाम्=विरुद्धत्वानवगमदशायाम् ।

(२) नान्योन्यस्यानुमिति जनकत्वम्=नान्योन्यस्य निश्चयाकारानुमिति जनकत्वम् ।

Digitized by Google

न्यस्यानुमितिजनकत्वमिति न तत्र व्याप्तिविरहरूपता न वा तदुद्भाव-कतया दोषत्वमित्यर्थः ।

मू० [a] "तस्य व्याप्तिपक्षधर्मताविरहरूपता [b] संभाविनैव [c] बाध-स्तु साधनवति पक्षे साध्याभावबोधनात्मा भवन्नपि न व्या-प्तिविरहावगमरूपः सामान्यतोऽनौपाधिकसंबन्धरूपा हि व्याप्तिः साधनवति च पक्षे साध्यविरहो न सोपाधिता [d] साध्याविरोधिस्वभावत्वा [e] त्तस्याः [f] नाप्यसौ सामान्यतः साध्यसाधनसंबन्धस्य विरहरूपः ॥

टी० ॥ [a] "तस्ये"ति । सत्प्रतिपक्षहेतोरित्यर्थः ॥ [b] "असम्भाविनै-वे"ति । तस्यां दशायामिति शेषः ॥ [c] "बाधस्त्वि"ति । जलह्रदो वह्नि-मान् धूमवत्त्वादित्यत्र स्वरूपासिद्धिसाङ्कर्यमभिप्रेत्याह—। [d] "साधनवती"-ति । वह्निरनुष्णः कृतकत्वादित्यादावित्यर्थः सर्वोपसंहारेण व्याप्तिग्रहो ननु विशेषवह्नावेव येन व्याप्तिभङ्गो दूषणं भवेत् यत्कृतकं तदनुष्णमि-ति व्याप्तेर्व्यतिरेकस्याग्रहाद् वह्नौ साध्याभावप्रमादशायां व्याप्तिभङ्गग्रहे बाधस्यैवोपजीव्यत्वं न तु व्याप्तिविरहस्य तदा दोषत्वं बाध एव व्याप्ति-विरहमन्तरेण न सम्भवतीति तस्य व्याप्तिभङ्गोद्भावकत्वमत एवान्यस्योपा-धेरलाभे पक्षेतरत्वमेव तत्रोपाधिः सोपाधित्वमेव च व्याप्तिभङ्ग इत्य-र्थः पक्षताविघटनमपि बाधोदीच्यं बाधकप्रमाणसद्भावे सन्देहसिषाधयि-षयोरनुदयादिति भावः ॥ [e] "साध्याविरोधी"ति । तस्याः सोपाधितायाः साध्याविरोधिरूपत्वाच्च साध्याभावरूपता उपाधेः साध्यव्यापकतया सा-ध्यविरोधित्वादित्यर्थः ननु सामान्यतोऽपि व्याप्तिविशेषे वह्नौ हेतोः साध्या-भावसामानाधिकरण्यग्रहाद्भङ्गनैवेत्यत आह—। [f] "नापी"ति । यत्कृतकं तद-नुष्णमिति दृष्टान्ते घटादावविनाभावग्रहस्याप्रत्यूहत्वादित्यर्थः ॥

मू० [a] "बाधे सत्यपि सामान्येन साध्यसाधनयोः संबन्धस्य दृष्टान्तावगतस्यानपलापात् बाधस्य किञ्चिद्विशेषविषय-

त्वात् [b] सामान्याकारपरिगृहीतस्य संबन्धस्य विशेषान्तरमादाय पर्यवसानाविरोधात् [c] तस्माद्विशेषबाधेन सामान्यतः संबन्धस्य सोपाधितानुमीयते [d] निरुपाधित्वे बाधानुपपत्तेः यथाह बाधाद्दोपाधिरुन्नीयते ऽन्यथा वेति न कश्चिद्विशेष इति [e] अन्यस्तु सत्प्रतिपक्षवद्बाधस्यापि प्रतिबन्धकत्वमेव तेन बाधे सति प्रतिबद्धत्वान्निश्चयं न करोति हेतुरिति व्याप्तिपक्षधर्मतादोषमनालोच्यान्यथैव बाधस्य दोषत्वमित्याह ।

टी० ॥ एतदेवाह—। [a] "बाधे सत्यपी"ति ॥ [b] "सामान्याकारे"ति । यद्यत्कृतकं तत्तदनुष्णमिति यद्यपि बाधायां भग्नं तथापि यत्कृतकं तदनुष्णमिति सामानाधिकरण्यमात्रमभग्नमेवेत्यर्थः अतो बाधस्य व्याप्तिभङ्गलिङ्गत्वं न तु व्याप्तिभङ्गत्वेनासिद्धत्वमित्युपसंहरति—। [c] "तस्मादि"ति । अत्रैव विपक्षे बाधकमाह—। [d] "निरुपाधित्वमि"ति । हेतोः साध्यतदभावोभयसामानाधिकरण्यं नावच्छेदभेदं विनेत्यवच्छेदककल्पनायामन्यस्यावच्छेदकस्याभावात्पक्षेतरत्वमेवावच्छेदकं साध्यसामानाधिकरण्यावच्छेदक एवोपाधिरिति बाधेतस्यावश्यकत्वमन्यत्र तु त्वदुक्तव्याघातादिदोषाच्च पक्षेतरत्वस्योपाधित्वमित्यर्थः मतान्तरमाह—। [e] "अन्यस्त्वि"ति । साध्याभावप्रमा स्वरूपसत्येव साध्यधीप्रतिबन्धिकेति सत्प्रतिपक्षवत्प्रतिबन्धकतयैव दोषत्वं न व्याप्तिपक्षधर्मताविरहरूपतया न वा तदुपायकतयेत्यर्थः ॥

खं० [a] तस्माद्व्याप्तिपक्षधर्मताप्रमितित्वानां यत्र साक्षादेव विरहस्योद्भावनं तत्रासिद्धः यत्र तु व्याप्त्यादिविरहलिङ्गोपन्यासः सत्प्रतिपक्षोपन्यासो वा तत्रान्यो हेत्वाभासः * [b] ननु सोपाधित्वादयोपि यतोवगम्यन्ते तत्कृतः पृथग्दूषणं

न भवति अनैकान्तिकत्वादिवत् ?*— मैवम्, [c] अनैकान्तिकत्वादेर्व्याप्तिविरहबोधने लिङ्गभावनियमात् पृथगुपन्यासः सोपाधित्वादेस्तु प्रत्यक्षादपि प्रतीतेर्नतु लिङ्गभावनियतं तच्च प्रतिपादकं किञ्चिदस्ति [d]* नच वाच्यं

टी० ॥ उपसंहरति—। [a] "तस्मादि"ति । यद्यप्युद्भावनगर्भे नासिद्धत्वं तथापि तच्चास्तीति कृत्वोक्तम् ननु यदि व्याप्त्यादिभङ्गलिङ्गानामप्यनैकान्तिकादीनां हेत्वाभासत्वं तदा सोपाधित्वापक्षधर्मतयोरप्यायकान्तरमप्यस्ति नहि प्रत्यक्षादाप्तोपदेशाल्लिङ्गान्तराद्वा न सोपाधित्वादिग्रहीतुं शक्यते इति हेत्वाभासाधिक्यं प्रसक्तमिति शङ्कते—। [b] "नन्वि"ति । यथानैकान्तिकत्वं विरुद्धत्वं बाधितत्वं वा व्याप्तिभङ्गत्वनियतं तथानान्यत्सोपाधित्वादिनियतं येन हेत्वाभासान्तरं भवेत् सोपाधित्वग्राहकतामात्रेण प्रत्यक्षादीनां हेत्वाभासत्वं सम्भाव्येतापि यदि ज्ञायमानं सत्तथा स्यादिति परिहरति—। [c] "अनैकान्तिकत्वादेरि"ति । नन्वतीन्द्रियस्थले किञ्चिच्चिह्नं लिङ्गभावेनैव सोपाधित्वोन्नायकमिति तद्धेत्वाभासान्तरं भवेच्च तदपि चिह्नादि सोपाधित्वं नावश्यं सर्वत्र गमयतीति न हेत्वाभासान्तरं तदानैकान्तिकत्वादिकमपि न सर्वत्र व्याप्तिभङ्गे लिङ्गमिति क्वचिदनैकान्तिकत्वेन क्वचिद्विरुद्धत्वादिनापि तदुन्नयनादित्यत आह—। [d] "नच वाच्यमि"ति । यथानैकान्तिकत्वं विरुद्धत्वादिकं वा व्याप्तिविरहव्याप्यतावच्छेदकं न तथा तच्चिह्नादीनामनुगतमेकमवच्छेदकं येन तत्पृथक् स्यादित्यर्थः ॥

मू० यत्र लिङ्गा(१)त्सोपाधितादेः प्रतीतिरतीन्द्रियप्रभृतिविषये तत्र लिङ्गं पृथगेव दूषणतयाभिधीयतां नह्यनैकान्तिकत्वादिकमपि सार्वत्रिकं व्याप्तिविरहलिङ्गमिति हेत्वा-

(१) सोपाधितादेरित्यत्रादिना स्वरूपासिद्ध्यादेस्स्वीकारः । सोपाधित्वादिकमसिद्धेः पृथग्दूषणं भवतुमर्हति हेतुदोषज्ञापकत्वादनैकान्तिकत्वादिवदन्यथाऽनैकान्तिकत्वादेरपि पृथग्दोषत्वं न स्यादित्यर्थः ।

भासाधिक्यमापन्नमिति * अनैकान्तिकत्वादिवत्तेषां लिङ्गानामेकरूप्येण निर्देष्टुमशक्यत्वात् पृथक्पृथगेवाभिधानमशक्यमपरिसङ्ख्येयत्वादिति [a] वक्ष्यामश्चाग्रे हेतुं तदनभिधानस्य * [b] नन्वनुचितमुच्यते व्याप्त्यादिविरहलिङ्गतयानैकान्तिकत्वादीनां पृथग्दूषणत्वमिति * ([1])यतो व्याप्तिपक्षधर्मतोपेतलिङ्गप्रमितिस्तद्वैकल्यान्न भवेत्([2]) यतश्च सा न भवति तदेव तस्यां दूषणं वक्तुं युक्तमिदमनुमित्युत्पत्तिकारणमिह नास्तीति ॥

टी० ॥ ननु सोपाधित्वलिङ्गत्वमेव तेषामनुगतमस्तु अन्यथा ऽनैकान्तिकादीनामपि तन्न स्यादित्यत आह–। [a] "वक्ष्यामश्चे"ति । यद्यपि सोपाधित्वं व्याप्तिविरहोन्नायकत्वं चानैकान्तिकादीनां व्यवस्थापितमेव आदिपदग्राह्यापक्षधर्मत्वस्य च सिषाधयिषाया विरहस्य । प्रत्यक्षत्वमेवोपपादितमिति शङ्कयमस्थान एव तथापि सोपाधित्वं प्रमाणान्तरेणापि ग्रहीतुं शक्यमिति तस्य पृथक्त्वमाशङ्कितं नन्वनैकान्तिकत्वादीनामनुमितिदोषत्वं नास्ति तथाच हेत्वाभासत्वमपि न अनुमिति सामग्रीवैकल्यस्यैव तद्दोषत्वात्तत्सामग्रीवैकल्योन्नायकस्याप्यनुमितिदोषत्वमपि प्रसङ्गादिति शङ्कते–। [b] "नन्वि"ति ॥

मू० * ([3])नच व्याप्तिपक्षधर्मते विहायान्यत्तदुत्पत्तिकारणम

(१) व्याप्त्यादिभङ्गलिङ्गभूतानैकत्वादिदोषाणामनुमित्यनुत्पादप्रयोजकत्वात्तत्पृथगनुचितं पृथग्दूषणत्वमित्यत, आह–यत इति ।

(२) अस्तु लिङ्ग प्रमित्यभावस्तेनानुमित्यनुत्पादे प्रयोजकत्वमेतावता किंस्यादित्यत आह–यतश्चेति–

(३) व्याप्तिपक्षधर्मतावदनैकान्तिकत्वाद्यभावोपि कारणमनुमितेरतो व्याप्त्याद्यभाववदनैकान्तिकत्वाद्यभावाभावो ऽनैकान्तिकत्वादिरपि दूषणमित्यत आह–न चेति–अनैकान्तिकत्वाद्यभावस्यान्वयेपि व्यतिरेको न दर्शयितुं शक्यते व्याप्तत्वपक्षधर्मत्वप्रमितौ सत्यामनुमित्यनुत्पत्त्यदर्शनाद् व्यतिरेकात्कारणत्वमवधेयमित्यर्थः । इतिविद्यासागराः । व्याप्तिपक्षधर्मता ग्रहसत्त्वे ऽनुमिति सत्त्वं व्याप्तिपक्षधर्मताग्रहाभावे ऽनुमित्यभाव-

स्ति [a] व्यतिरेकोपदर्शनयोग्यं * (१)तस्मादनुमितिदोषप्रतीतिकारणत्वमनैकान्तिकत्वादीनां ननु साक्षाद्दोषत्वं [b] दोषप्रतिपादकतयापि च दोषत्वं साक्षाद्दोषमनुपजीव्याशक्याभिधानमिति प्रधानदोषस्यैव दोषतयोद्भावनं युक्तं न सव्यभिचारत्वादीनामिति सत्यमेतत् [c] साक्षाद्दोषत्वं प्रतिबन्धकस्य व्याप्त्यादिविरहस्य वा विरुद्धादीनां तु तत्प्रमापकतया यद्यपि दोषपक्षनिक्षेपस्तथापि विरुद्धत्वादयो यद्दोषप्रतिपादकतयोक्तास्तदुद्भावनलाघवानुरोधाद्व्याप्त्यादिविरहे तथोद्भाव्यमाने न हेतुर्गन्तुं शक्यते ॥

टी० ॥ [a] "व्यतिरेके"ति । अनुमितिकारणान्तरस्य कालादेर्व्यतिरेकोपदर्शनमयोग्यमित्यर्थः ॥ ननु दोषप्रतिपादकतयैव दोषत्वमस्तु परम्परयाप्यनुमितिदोषत्वसम्भवादित्यत आह–। [b] "दोषे"ति । एवं सति साक्षाद्दोषस्यासिद्धेरुद्भावनानन्तरमेव तद्व्यवस्थापकतयानैकान्तिकाद्युद्भावनप्रसङ्ग इत्यर्थः ॥ परिहरति–। [c] "साक्षादि"ति । असिद्धेरुद्भावने कथमसिद्धिरिति तद्व्यवस्थापनाय पुनरनैकान्तिकाद्युद्भावनमावश्यकं तेन प्रथममनैकान्तिकाद्येवोद्भाव्यं तच्च स्वव्यापकमसिद्धत्वं स्वत एवाक्षिपतीति लाघवादनैकान्तिकत्वमेवोद्भाव्यमित्यर्थः । न चैवं सत्यसिद्धोद्भावनमनवकाशम् अनैकान्तिकाद्युद्भावननैरपेक्ष्येण यत्रासिद्धत्वज्ञानं तत्र तदुद्भावनस्य सावकाशत्वादिति भावः * न च निर्वाह्यामसिद्धिमनुद्भाव्य निर्वाहकानैकान्तिकाद्युद्भावनमप्राप्तकालमिति वाच्यम् * कथासम्प्रदायस्य तादृशत्वेनाप्राप्तकालत्वाभावाद् अनैकान्तिकाद्युपनीतासिद्धत्वज्ञानादेवानुमिति प्रतिब-

इत्यन्वयव्यतिरेकदर्शनात्तयोः कारणत्वमावश्यकमनैकान्तिकत्वाद्यभावसत्त्वेऽपि व्याप्तिपक्षधर्मतापक्षासत्त्वेनानुमित्यनुत्पादादित्यनैकान्तिकत्वादेर्न कारणत्वमिति पूर्वपक्षिणोऽभिप्रायः ।

(१) व्याप्त्यादिविरहस्यासिद्धदोषत्वेऽनैकत्वाद्युद्भावनमनुचितमिति प्रतिपादयितुमनुमितिदोषप्रत्यायकत्वमेवेति फलितमुपसंहरति–तस्मादिति–

न्तस्य सम्भवात् । अनैकान्तिकत्वादीनामप्यसाधकतालिङ्गत्वात् तथाचो-द्भाव्यद्वयस्यानैकान्तिकाद्युद्भावनादेव सिद्धेरित्याशयात् ॥

खं० [a] "अनैकान्तिकत्वादौ तूद्भाविते व्याप्त्यादिविरहोऽर्थाद्गम्यते व्याप्त्यादिविरहव्यतिरेकेणानैकान्तिकत्वादेरनुपपन्नत्वात् [b] यथा तस्माद्दीर्घायमित्युक्ते सोऽस्मादध्रस्व इत्यर्थाद्गम्यते न तु तत्र प्रतिपाद्यान्तरापेक्षा तथेहापि निरग्नौ धूमोऽस्तीति प्रतिपादितेऽग्निनासौ न व्याप्त इत्यर्थाद्गम्यते नहि सम्भवत्यग्निना च व्याप्तोऽनग्नौ चास्तीति [c] अत एवानन्त्यादतीन्द्रियोपाध्यादिलिङ्गानां येषां पूर्वमनभिधानं समर्थितं तेषामनभिधानेऽयमपि हेतुः तान्युपाधिलिङ्गानि नार्थवशादुपाधि [d] मनपेक्षाणि गमयन्ति [e] येन तेषां व्याप्तिर्नावधारिता तं प्रति तत्प्रतिपादनमन्तरेणाप्रतिपादकत्वस्यापि सम्भवात् [f] अनैकान्तिकत्वाद्यवगतौ तु व्याप्त्यादिविरहबोधनाय न प्रतिपादनीयान्तरापेक्षा कस्यचित् सचेतसः सम्भवतीति पूर्वपक्षसङ्क्षेपः एवमसिद्धलक्षणे व्यवस्थिते बाधोयमभिधीयते,

टी० ॥ नन्वनैकान्तिकाद्युद्भावनानन्तरमसिद्ध्युद्भावनमस्तु तथाच न लाघवमित्यत आह–। [a] "अनैकान्तिकत्वादावि"ति । नह्यर्थायातमप्यभिधीयते अर्थपौनरुक्त्यापत्तेः अत्रानुरूपं दृष्टान्तमाह–। [b] "यथे"ति । वस्त्वाभस्त्वाचेति । यदुक्तं तत्र किञ्चिदाह–। [c] "अत एवे"ति ॥ [d] "अनपेक्षाणी"ति । उपाधिलिङ्गत्वेनाप्रतिसंहितानीत्यर्थः तत्प्रतिसन्धानं च न व्याप्यतावच्छेदकग्रहमन्तरेणेति भावः एतदेवाह–। [e] "येने"ति । अनैकान्तिकत्वादीनामसिद्धिव्याप्यतावच्छेदकरूपत्वस्योभयसिद्धत्वादिति तदुद्भावनमुपपन्नमित्याह–। [f] "अनैकान्तिकत्वादी"ति ॥ (शेषमग्रे)

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम् रु०	आ०
१ काशिका पंडितवरवामनादित्यविरचिता		
पूर्वार्धम्		॥
उत्तरार्धम्	१०	॥
२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	॥
३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	।)
४ लघुकौमुदी वरदराजकृता	१	≡)
५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्गलण्डीयभाषायां कृता	८	॥
६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम्	४	॥
८ मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	॥
९ शाश्वतधर्मदीपिका	१	॥
१० अमरकोश सटीक	४	॥
११ योगवार्तिकम्	३	।)
१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	॥
१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्विजनगा-देशाधिपति रचिता	४)	॥
१४ शीतपदार्थनिर्वचनम्	३	।)
१५ वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४)	॥

Digitized by Google

CONTENTS.

		Page.
SAṂKSHEPAŚÁRÍRAKAM	...	457
ŚÁSTRADÍPIKÁ	...	466
ŚRÍBHÁSHYAM	...	483
KHAṆḌANAKHAṆḌAKHÁDYAM	...	499

Digitized by Google

DEC 5 1887
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 10.] OCTOBER 1887. [Vol. IX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

DEC 6 1887
LIBRARY

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page* 465. Vol. IX.)

मू० ॥ न स्थानतोऽप्यस्ति परस्य कश्चिद्
विशेषयोगः परमार्थरूपः ॥
स्वतः पुनर्दूरनिरस्त एव
परस्य तत्त्वस्य विशेषयोगः ॥ १४६ ॥

टी० ॥ एवं प्रार्थितो गुरुर्न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हीत्यादिसूत्रसूचितन्यायनिर्णीतत्वाद्वस्तुतो निष्प्रपञ्चं ब्रह्म वेदान्तवेद्यमित्युपपादयति । न स्थानत इति । उपाधितोऽपीत्यर्थः । किं सविशेषत्वं निर्विशेषत्वं च ब्रह्मणः स्वाभाविकम्, उतान्यतरदौपाधिकम् । नाद्यः, वस्तुनः स्वभावतो विरुद्धरूपद्वयायोगात् । द्वितीये किं निर्विशेषरूपं सोपाधिकम्, किं वा सविशेषरूपम् । नाद्यः, वियदाद्युपाधीनां सर्वेषां सविशेषत्वेन स्वतःसविशेषतदधीननिर्विशेषत्वायोगात्, अन्यथा प्रपञ्चस्येव तदुपाधिकं निर्विशेषत्वं किं न स्यात् । न द्वितीयः, औपाधिकरूपस्य स्फटिकलौहित्यादिवन्मिथ्यात्वेन स्वाभाविकत्वायोगात् स्वभावतो निर्विशेषमेव ब्रह्मेत्यस्मदिष्टसिद्धेः । न च वस्तुतः सविशेषमेव ब्रह्म निर्विशेषत्वं तस्य स्वाभाविकं वौपाधिकं वा नैवास्तीति वाच्यम् । तत्पराऽनेकश्रुत्यादिविरोधात्, तत्रैव च श्रुतिसमन्वयस्योपपादितत्वादिति भावः ॥ १४६ ॥

मू० ॥ स्वभावतश्चिद्घनविग्रहस्य
मृषा ह्युपाधिप्रभवा विशेषाः ॥
यथा जपापुष्पनिबन्धनः स्यान्
मृषा मणेर्लोहितिमा तथैव ॥ १४७ ॥

टी० ॥ नन्वन्तस्तद्धर्मोपदेशादित्यादिसूत्रैः सगुणं ब्रह्म निरूपितम्, न च न स्थानतोऽपीत्यनेन विरोधः, सगुणत्वस्यौपाधिकत्वेन तत्परिहारादित्याशङ्क्यौपाधिकस्यापि सत्यत्वे तत्परिहारायोगात्तन्मिथ्यात्वमुपेयमि-

त्याशयेनाह । स्वभावत इति । किं च विमतं मिथ्या औपाधिकत्वात् स्फटिकलौहित्यवदित्यनुमानादपि तन्मिथ्यात्वसिद्धिरित्याह । यथेति । न च स्फटिकमरणावपि तदा सत्यमेव लौहित्यमुत्पन्नमिति साध्यवैकल्यमिति वाच्यम् । तद्गतशुक्लरूपे स्थिते तदुत्पत्त्ययोगात्, तन्नाशस्य च तदा रूपनाशे कृत्स्नकारणाभावेनासम्भवात् । एवं तद्वास्तवलौहित्योत्पत्तिकारणासम्भवाच्च तदसम्भवः । नापि जपापुष्पतद्रूपाभ्यामविवेकमात्रात् स्फटिके लौहित्यव्यवहारस्य तद्रूपस्यैव वा स्फटिके भ्रान्त्या प्रतिभासो न त्वनिर्वचनीयं लौहित्यान्तरमस्तीति वाच्यम् । नेदं जपापुष्पं तल्लौहित्यं च स्फटिके नास्तीति स्पष्टं विवेकदर्शनात्, तस्मिन्सति स्फटिके तद्रूपारोपासम्भवाच्चेत्यादिप्रपञ्चेन पद्मपादाचार्यादिभिर्विवेचितम् । तस्मान्मिथ्यालौहित्यमेव स्फटिके भातीति न साध्यवैकल्यमिति भावः ॥ १४७ ॥

मू० ॥ मायोपाधेरद्वयस्येश्वरत्वं
कार्योपाधेर्जीवता च प्रतीचः ॥
मिथ्यैव स्याद् बन्धुजीवप्रसून-
संपर्कोत्था रक्ततेवाभ्रकादेः ॥ १४८ ॥

टी० ॥ नन्वीश्वरत्वजीवत्वयोरनादित्वेन स्फटिकलौहित्यवदौपाधिकत्वायोगाद्वास्तवत्वमुपेयम्, ततश्च वस्तुत एवात्मनः सविशेषत्वमित्याशङ्क्याह । मायोपाधेरिति । ईश्वरत्वं हि जगत्सृष्ट्यादौ निरङ्कुशं सामर्थ्यम्, तच्च कूटस्थासङ्गाद्वितीयस्य स्वतो न घटत इति तत्समर्थसाभासमायाप्रयुक्तमेव ब्रह्मण ईश्वरत्वं तदुपाधिकमेव, अनादेरपि तस्य मायासम्बन्धवत्तदधीनसत्ताकतया तत्प्रयुक्तत्वोपपत्तेः, तेन तस्य व्यावहारिकत्वेऽपि मिथ्यात्वमपरिहार्यम्, यद्यपि जीवत्वमप्यन्तःत्वरूपमनादि, तथापि बुद्ध्यादिकार्ये सति तदुपहितस्य कर्तृत्वादिविक्षेपरूपानर्थरूपेणापि भातीति तेन रूपेण तस्य कार्योपाधिकत्वव्यपदेशः, स्वरूपेण तु तदप्यविद्याप्रयुक्तत्वादविद्योपाधिकमिति तदपि कर्तृत्वादिना सह मिथ्येति स्वतो निर्विशेषं ब्रह्मेत्यर्थः । औपाधिकत्वस्य मिथ्यात्वेन व्यभिचारशङ्कानिरासायोदाहरणा-

Digitized by Google

न्तरमाह । बन्धुजीवेति । तत्प्रसूनं वर्तुलमारक्तं प्रसिद्धम् । अभ्रकं स्वच्छ-धातुविशेषः, आदिपदेन तत्तुल्यमन्यदुपादीयते ॥ १४८ ॥

मू० ॥ भल्लातकादिरसयोगनिबन्धनं च

वस्त्रे कलङ्कितमनेन यथा निरस्तम् ॥

तस्यापि पक्षपतितत्वमभीष्टमेव

तस्मादसौ न भवति व्यभिचारभूमिः ॥ १४६ ॥

टी० ॥ ननु शुक्लवस्त्रादौ भल्लातकनीलीद्रव्यादिरसौपाधिककालिम्नो यावद्वस्त्रावस्थायमपायादर्शनात्तत्र तस्य सत्यत्वमुपेयम्, ततश्च तत्रौपाधिकत्वं मिथ्यात्वं व्यभिचरतीति नेत्याह । भल्लातकादीति । कलङ्कितमिति भावप्रधानं कालिमेति यावत्, पटादिगतस्वाभाविकशौक्ल्यनाशे क्लृप्तकारणाभावेन तन्नाशायोगात् स्थिते च तस्मिन् वास्तवरूपान्तरोत्पत्त्ययोगात् तदुत्पत्तौ क्लृप्तकारणाभावाच्च तत्र तद् वस्तुतो न घटते, तदिदमुक्तमनेन यथा निरस्तमिति, एवं च तदपि स्फटिके लौहित्यादिवदेव मिथ्येति कल्प्यते, तत्र स्वाभावे सत्येव भावात्, तत्रोपाधिभूतद्रव्यसंसर्गस्य मधुरोदके लवणसंसर्गवद्दुर्निवारत्वात्तत्प्रसञ्जितस्य मिथ्याभूतस्यापि कालिम्नो यावद्द्रव्यसत्त्वं स्थित्युत्पत्तेश्च, ततश्चोक्तहेतोरेतादृशं न व्यभिचारस्थलत्वेनोभयसंप्रतिपन्नमित्याह । तस्यापीति ॥ १४९ ॥

मू० ॥ यथा ह्ययं ज्योतिरात्मा विवस्वा-

नपो भिन्ना बहुधैकोऽनुगच्छन् ॥

उपाधिना क्रियते भेदरूपो

देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥ १५० ॥

टी० ॥ नन्वद्वितीयात्मनि जीवेश्वरत्वादिविशेषस्य मिथ्यात्वेऽपि तस्यौपाधिकत्वं कुतः सिध्येदित्याशङ्क्य तत्र श्रुतिं प्रमाणयति । यथा ह्ययमिति । अयं नभस्येकत्वेन प्रत्यक्षो ज्योतिरात्मा तद्रूपो विवस्वान् सूर्यः पात्रभेदेन बहुधा भिन्ना अपः स्तोकास्तोकादिरूपेण भिन्नास्वप्सु एक

एवानुगच्छन्प्रतिबिम्बभावेन प्रविशन्नुपाधिना स्वतः प्रकारतश्च भिन्नानुरू-
पोपाधिना भेदरूपः क्रियते, भेदो रूप्यतेऽनेनेति भेदरूपस्तस्य धर्मी
प्रतियोगी च स्वप्रतियोगिकमिथ्याभेदवान् ज्ञाप्यत इति यावत्, एवं देवः
स्वरूपप्रकाशेन दीप्यमानोऽयमात्माऽजोऽपि क्षेत्रेषु महाभूतान्यहङ्कार
इत्यादिना भगवतोक्तेषूपाधिषु प्रतिबिम्बभावेन प्रविष्टो मिथ्यैव भेदरूपः
क्रियते, स्वतस्तु शुद्धबुद्धाद्वितीयानन्दरूप इत्यर्थः ॥ १५० ॥

मू० ॥ ऐश्वर्यमस्य परमात्मन उक्तमन्यैः
साक्षात् स्वरूपमवबोधसुखादितुल्यम् ॥
तेनेशते किल यथायथमीशितव्यान्
भृत्यान् प्रतीश्वरतया जगतीभृतोऽपि ॥ १५१ ॥

टी० ॥ एवमीशितव्यजीवभेदस्यौपाधिकत्वात्तदपेक्षमीश्वरत्वमप्यौ-
पाधिकत्वान्मिथ्या, साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिसिद्धशुद्धचि-
दात्मानन्दाखण्डात्मस्वरूपमेव सत्यमिति स्वमतमुक्त्वा मतान्तरमुत्थाप-
यति । ऐश्वर्यमिति । साक्षादुपाधिं विना, ऐश्वर्यं द्विविधं स्वाभाविकमौ-
पाधिकं चेति, तत्र निरुपाधिकस्य परमात्मनः स्वरूपभूतमैश्वर्यं स्वाभा-
विकमेकरूपं च, अन्तर्याम्यादिषु तु तदीश्वरत्वं मायोपाधिकं तरतमभूतं
च, तत्राद्यं दृष्टान्तेन दर्शयति । अवबोधेति । सत्तादिशब्दार्थः । ननु
ब्रह्मादीनामधिकारिणां सविशेषाणामेवैश्वर्यं शास्त्रादिना प्रसिद्धं तत्कथं
निर्विशेषात्मनि स्यादित्याशङ्क्य तेषामपि परमात्मस्वरूपभूतैश्वर्येणैव स्वे-
शितव्यान् प्रतीश्वरत्वं तच्चैतन्येनैव बोद्धृत्ववदित्यभिप्रेत्याह । तेनेति ।
ईशते नियामका भवन्ति, किलेत्यस्वारस्यं सूचयति ॥ १५१ ॥

मू० ॥ नित्यं प्रियादिषु सुखं प्रतिबिम्बितं स-
ल्लोके वदन्ति विषयेन्द्रियसंप्रयोगात् ॥
उत्पन्नमन्यदिति तद्वदिहेश्वरत्वं
मायातदुत्थमतिषु प्रतिबिम्बितं सत् ॥ १५२ ॥

टी० ॥ ननु तेषामैश्वर्यं ज्ञानकर्मादिसाध्यं तारतम्यान्वितं च तत्कथं परात्मस्वरूपात्मकं स्यादित्याशङ्क्य न तत्रेष्वपि ज्ञानकर्मादिजन्यं किं तु तदभिव्यङ्ग्यं व्यञ्जकतारतम्याच्चौपाधिकं तारतम्यं नानात्वं चेति सुखादिदृष्टान्तेन वदन् द्वितीयं दर्शयति । नित्यमिति । प्रियमोदप्रमोदा अभीष्टवस्तुदर्शनलाभोपभोगजन्याः स्वरूपसुखाभिव्यञ्जका अन्तःकरणवृत्तिविशेषाः । प्रतिबिम्बितं सत् प्रतिबिम्बभूतमित्यर्थः । अन्यदिति । नानेति चेत्यर्थः । इह लोकागमयोः, प्रतिबिम्बितं सदीश्वरत्वमुत्पन्नमन्यदिति च वदन्तीत्यनुषङ्गः । यथा सुखस्य चैतन्यस्य च वस्तुतः कूटस्थैकरसस्वरूपत्वेऽप्यन्तःकरणपरिणामरूपोपाधिषु प्रतिबिम्बनात्तदुपाधिका उत्पत्तिनाशनानात्वतारतम्यव्यपदेशा एवमैश्वर्यस्यापि स्वतो निरपेक्षत्वकूटस्थत्वैकरूपत्वे सत्यप्युपाधिवशात्सापेक्षत्वादिव्यपदेशा उपपन्ना इत्यर्थः ॥ १५२ ॥

मू० ॥ मायानिविष्टवपुरीश्वरबोध एष
सर्वेश्वरो भवति सर्वमपेक्षमाणः ॥
बुद्धिप्रविष्टवपुरेष तथेश्वरः स्या-
दात्मीयभृत्यजनवर्गमपेक्षमाणः ॥ १५३ ॥

टी० ॥ तत्र मायाप्रतिबिम्बितमैश्वर्यमन्तर्यामिणस्तन्मते तत्प्रतिबिम्बितचैतन्यस्येश्वरत्वात्,तदैश्वर्यं त्वेशितव्यापेक्षित्वोत्कृष्टत्वभिन्नत्वानि मायोपाधिकानि, समष्टिव्यष्टिबुद्ध्युपाधिकहिरण्यगर्भाद्यैश्वर्यस्य चोत्पत्तिनाशतारतम्यादि बुद्ध्युपाधिकमित्याशयेन पूर्वपक्षस्य चरमचरणार्थं विभजते । मायानिविष्टवपुरिति । ईश्वरबोधः स्वतो निरपेक्षैश्वर्यरूपबोधात्मा एव परमात्मा मायाप्रतिबिम्बितः सन्समस्तमीशितव्यमपेक्ष्य निरङ्कुशैश्वर्यवान् भवत्येव एव परमात्मा बुद्धिप्रतिबिम्बितहिरण्यगर्भादिरूपः सन्कतिपयेशितव्यान्प्रति तारतम्यान्वितकादाचित्कैश्वर्यवान्स्यादित्यर्थः ॥ १५३ ॥

मू० ॥ सम्यग्ज्ञानध्वस्तसर्वप्रपञ्चः
स्वीये रूपे निर्गुणे निर्विशेषे ॥

पूर्णैश्वर्ये स्वप्रकाशस्वभावे

स्वाराज्येऽस्मिन् स स्वराडेव तिष्ठेत् ॥ १५४ ॥

टी० ॥ तर्हि निरुपाधिकपरमात्मस्वरूपात्मकैश्वर्यं वृथा तस्या-किंचित्करत्वाद्बुद्ध्युपाधिकजीवैः प्राप्तुमशक्यत्वाच्चेत्याशङ्क्य, तादृशपरा-भेदसाक्षात्कारवतो बुद्ध्याद्युपाधिबाधे तत्प्रतिबिम्बितभावरहितस्य प्रति-बिम्बान्तरात्मत्वायोगाद् बिम्बरूपनिरुपाधिकपरमात्मभूतस्य तत्स्वरूपभू-तनिरपेक्षैश्वर्यस्यापि लाभात्स्वाराज्यरूपाप्तकामत्वसिद्धेर्न वृथेत्याह । सम्यग्ज्ञानेति । अत्यन्तभिन्नगुणवत्त्वाभावेऽपि तादात्म्येन विशेषत्वशङ्का-निरासाय निर्विशेष इत्युक्तम् ॥ १५४ ॥

मू० ॥ ज्ञात्वा देवं सर्वपाशापहानिः

क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ॥

तस्याभिध्यानात्तृतीयं देहभेदे

विश्वैश्वर्यं केवल आप्तकामः ॥ १५५ ॥

टी० ॥ ऐश्वर्यावाप्तिरूपमुक्तेर्ज्ञानलभ्यत्वे श्वेताश्वतरश्रुतिं प्रमा-माणयति । ज्ञात्वा देवमिति । तस्येश्वरस्याभिध्यानादाभिमुख्येन प्रत्य-क्त्वेन ध्यानात्तं देवं ज्ञात्वा साक्षात्कृत्य देहे सत्येव सर्वेषां पाशानामवि-द्यास्मितादिरूपक्लेशानामपहानिः क्रियते, तैः क्षीणैः क्लेशैः कर्मानारम्भात्त-न्मूलजन्ममरणयोरात्यन्तिकहानिर्भवति, ततः प्रारब्धकर्मणां भोगात्क्षयेण देहस्य भेदे जाते सति केवलो निर्विशेष एव उक्तापेक्षया तृतीयं विश्वैश्वर्यं प्राप्याप्तकामस्तिष्ठतीत्युक्तश्रुत्यर्थावगमान्मुक्तावैश्वर्यसिद्धिरिति तदभि-मानः ॥ १५५ ॥

मू० ॥ स स्वराडिति च विद्यते श्रुति-

र्वर्णितेश्वरवपुःप्रकाशिनी ॥

तेन सत्यसुखबोधवद् भवे-

दीश्वरत्वमिति केचिदूचिरे ॥ १५६ ॥

टी० ॥ ननु पूर्वार्धेन ज्ञानाद्बन्धनिवृत्तिरूपा मुक्तिः स्पष्टमेवोक्ता-परार्धेन तु तस्याभिध्यानादिति सगुणब्रह्मोपासनमनूद्य तत्फलं तृतीयं बन्धमोक्षापेक्षया तृतीयं तदुभयविलक्षणं विश्वैश्वर्यं समस्तस्थूलसूक्ष्मोपाधि-केशितव्यविषयं हिरण्यगर्भैश्वर्यम्, तत्र च न बन्धो दुःखाभावात्, नापि मोक्षो द्वैतविषयत्वादविद्याकार्यत्वान्मुक्तिहेतुविद्यानधीनत्वाच्च, तस्मात्तत्तृतीयं तत्प्राप्य स्थितस्तत्रैव विवेकवैराग्यादिमान्स्वयं प्रतिभातवेदान्तवाक्यादि-गतस्वसाक्षात्काराादेव तद्ब्रह्मक्षये केवल आप्तकामो नित्यशुद्धादिरूपब्रह्मैव भवतीति क्रममुक्तिरेवाभिप्रेता ततः कथमियं श्रुतिः परमुक्तावैश्वर्यसत्त्वे मानमित्यरुच्या तत्र छान्दोग्यश्रुतिं दर्शयति । स स्वराडिति । साम्राज्या-दिवत्स्वाराज्यस्याप्यैश्वर्यात्मना प्रसिद्धेरुक्तश्रुत्या तत्र तत्सिद्धिरिति भावः । एवमेकदेशिमतं सदृष्टान्तमुपपाद्य तदुपसंहरति । तेनेति ॥ १५६ ॥

मू० ॥ तन्न भाति चतुरस्रमुच्यके-
स्तत्प्रमाणविरहादिह श्रुतौ ॥
सत्यबोधसुखवन्न तत्परा
सत्युवाच यत ईश्वरं श्रुतिः ॥ १५७ ॥

टी० ॥ तद्दूषयति । तन्न भातीति । चतुरस्रं सुन्दरं नैव भातीत्यर्थः । किं परमात्मनश्चिदेकरसात्मकं स्वरूपमेव वास्तवमैश्वर्यं यत्तत्त्वविदां प्राप्यम्, किं वा सर्वज्ञत्वसर्वनियन्तृत्वादिरूपो धर्मः । नाद्यः, अखण्डचैतन्यैक-रसस्य मुक्तोपसृप्यस्य सिद्धान्तिनाप्यङ्गीकारान्मतभेदायोगेन तत्रैश्वर्यपरिभा-षाया अनिवार्यत्वात् । द्वितीये किं धर्मधर्मिणोरत्यन्तमभेदः, उत भेदः, भेदा-भेदो वा । नाद्यः, धर्मधर्मिभावानुपपत्तेः, सापेक्षनिरपेक्षयोर्वास्तवाभेदासम्भ-वाच्च । न द्वितीयः, अत्यन्तभिन्नयोरपि गवाश्वादिवद्धर्मधर्मिभावानुपपत्तेः, मुक्तावपि तत्सत्त्वेऽद्वैतविघातात्, भेदस्वरूपतत्प्रमाणयोर्द्वितीयाध्यायोक्त-रीत्या दुर्निरूपत्वेन तत्सत्यत्वायोगाच्च । एतेन तृतीयोऽपि विकल्पो निर-स्तः । किं च भेदस्याभेदाभावात्मत्वेन तयोरैक्यत्र विरोधादयं पक्षोऽस-म्भवी, अभेदाविरुद्धवस्त्वन्तरत्वे च भेदपक्षोक्तात्क्षाप्यभेदभ्रमनिरासो न स्या-

तस्य, तद्विरोधात् तत्सत्त्वेऽपि स्तम्भकुम्भादीनामिव धर्मधर्मिभावाभा-
वाच्च । किं चोक्तमैश्वर्यं दृश्यमदृश्यं वा, आद्ये न तस्य सत्यत्वं दृश्यस्य
मिथ्यात्वनियमात्, तद्व्यावहारदर्शनतत्संबन्धानिरूपणेन तदसम्भवस्य, द्वितीये
तत्स्वप्रकाशमुपेयमन्यथा तदसत्त्वप्रसङ्गात्, तथा च तस्यात्ममात्रत्वमिति
कुतस्तद्धर्मत्वम् । किं चोक्तेश्वरत्वस्येशितव्यापेक्षत्वान्मुक्तौ तदभावात्तद-
पेक्षेश्वरत्वमपि न स्यात् पूर्वमपि तत्सापेक्षत्वान्मायिकमेवेति त्वदुक्तं
तद्द्वैविध्यमसम्भवीति भावः । किं च लोके वेदे च तत्त्वसाक्षात्कारवतां
मुक्तावप्यमैश्वर्यमस्तीत्यस्य गमकाभावात्तदसिद्धिरित्याह । तत्प्रमाणेति ।
ननु सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतेर्यथा ब्रह्मणः
सत्याद्यात्मत्वसिद्धिरेवं सर्वस्य वशी सर्वस्येशान इत्यादिश्रुतेस्तस्येश्वरत्व-
सिद्धेस्तद्वास्तवं ब्रह्मणः, ततश्च तद्भावमापन्नस्य विदुषस्तदैश्वर्यं दुर्निवा-
रमित्याशङ्क्य तत्पराऽतत्परश्रुतिप्रतिपन्नत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्या-
त्मैवमित्याशयेनाह । सत्यबोधेति ॥ १५७ ॥

मू० ॥ तत्परश्रुतिवचःप्रमाणकं
सत्यबोधसुखविग्रहं परम् ॥
ब्रह्म तद्वदिह नेश्वरत्वभाक्
तत्परश्रुतिवचःप्रमाणकम् ॥ १५८ ॥

टी० ॥ उक्तमेव वैषम्यं स्पष्टयति । तत्परश्रुतीति । इह विचा-
रदशायां तद्वत्सत्यादिरूपवत्तत्परश्रुतिवचःप्रमाणकं नेति संबन्धः । सत्यं
ज्ञानमनन्तमित्यादिवाक्यानां जिज्ञासितब्रह्मस्वरूपलक्षणाभिधायित्वा-
त्तस्य चापूर्वत्वाद्ब्रह्मणः सत्याद्यात्मत्वस्य वास्तवत्वाभावे तल्लक्ष्यब्रह्म-
त्वायोगात्तज्ज्ञानान्मुक्तिश्रुतेरनन्तरसंदर्भेण तदानन्त्यादेः प्रतिपादनात्तस्या-
सत्त्वादिज्ञाने निन्दाश्रवणाच्च तत्प्रकरणस्यार्थान्तरायोगात्तेषां सत्याद्या-
त्मब्रह्मणि तात्पर्यं युक्तम्, सर्वस्य वशीत्यादेस्तु सापेक्षैश्वर्याभिधायित्वा-
त्तस्याविद्यादशायामेव सम्भवात्तन्मात्रस्य कार्यलिङ्गकानुमानगम्यत्वेना-
पूर्वत्वाभावान्निरतिशयानन्दब्रह्मभावादेव परमपुरुषार्थसिद्धौ तस्याप्रयोज-

तत्त्वादनन्तरं स एव नेतिनेत्यात्मेत्यादिनिषेधश्रुतिविरोधाच्च सा न तदैश्वर्यपरा किं तु तदनुवादेन तदुपलक्षितस्य प्रत्यगभेदपरा स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्मेति तस्यैवोपसंहारादिति भावः ॥ १५८ ॥

मू० ॥ या फलश्रुतिरिहोपवर्णिता
सा न तत्परतयाऽवगम्यते ॥
तत्त्वमादिवचनं हि तत्परं
तत्परा न तु फलश्रुतिः क्व चित् ॥ १५९ ॥

टी० ॥ ननु स स्वराड् भवतीति निरपेक्षसाम्राज्यस्य तत्त्वज्ञानफलत्वप्रतिपत्तेः कथं तदपह्नव इत्याशङ्क्याह । या फलश्रुतिरिति । स्वाराज्यं यदि निरतिशयानन्दानुभवे नैरपेक्ष्यलक्षणं स्वातन्त्र्यं तदिष्टमेव, तदावरणापगमे तादृशब्रह्मभूतस्य तदवश्यंभावात्, यदि तु सर्वस्य तदिच्छावशवर्तित्वादिरूपं स्वातन्त्र्यं स्वाराज्यं तन्न तस्य तदाऽसम्भवात्, यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुत्या द्वैतगोचरसर्वव्यवहारप्रतिषेधात्, अविद्याकस्य द्वैतस्याविद्यानिवृत्तौ निवृत्तेरवश्यंभावाच्च तदपेक्षस्य तस्य तदाऽनुपपत्तेः, सापेक्षस्य तत्कल्पितत्वाच्च स्वाराज्यश्रुतिर्न तत्परेत्यर्थः । किं चार्थवादावगतफलस्य प्रधानवाक्यापेक्षितत्वनिबन्धनं प्रति तिष्ठन्तीत्याद्यर्थवादस्य स्वार्थपरत्वमङ्गीक्रियते, प्रकृते तु सच्चिदानन्दानन्तब्रह्मात्माभेदपरतत्त्वमादिमहावाक्यैः प्रधानभूतैर्नोक्तरूपस्वाराज्यं फलमपेक्षितं प्रत्युत तदर्थविरोधि तत् फलमिति तत्परता तदर्थवादस्य नैवोपपद्यत इत्याशयेनाह । तत्त्वमादिवचनमिति ॥ १५९ ॥

मू० ॥ सामगानमपि तत्स्वरूपतां
जक्षणं च जगतश्च सर्जनम् ॥
अश्नुवीत फलवाक्यतः श्रुतं
तत्स्वरूपमिति यद्युपेयते ॥ १६० ॥

टी० ॥ प्रधानवाक्यानपेक्षितार्थकार्थवादस्य स्वार्थपरत्वेऽतिप्रसङ्गमाह । सामगानमिति । फलवाक्यतः श्रुतं तत्स्वरूपमिति यदभ्युपेयते तदा सामगानमित्यादौ योजनीयम्, तदेतत्साम गायन्नास्ते हावु३ जक्षत्क्रीडन्रममाणः यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति इति फलश्रुत्यवगतं सामगानादि, अपिचशब्दैः सूचितमिमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन् तस्य सर्वेषु लोकेषु कामचारो भवति मनसैतान्कामान्पश्यन्रमत इत्यादिश्रुतिगतं कामाचारादि च तत्स्वरूपं स्यादित्यर्थः । मुक्तिर्मुक्तो वा तच्छब्दार्थः ॥ १६० ॥

मू० ॥ अर्थवादगतमभ्युपेयते

न प्रमान्तरविरोधि यन्मतम् ॥

सामगानमथ जक्षणादि वा

तत्परश्रुतिविरुद्धमिष्यते ॥ १६१ ॥

टी० ॥ ननु सिद्धान्तेऽर्थवादगतं देवताविग्रहादि यथोपेयते एवं मुक्तस्य सामगानाद्यभ्युपेयतां तथा चोक्तातिप्रसङ्गोऽपीष्ट एवेत्याशङ्क्य सत्यं मानान्तरादिविरोधाभावादर्थवादजन्यदेवताविग्रहादिप्रत्ययस्य स्वतः प्रामाण्यस्योत्सर्गतः प्राप्तस्यानपायात्तदुपगमो युक्तः सामगानादेस्तु शरीरादिसापेक्षत्वात् मुक्तो वाऽयमशरीरोऽमृतः अशरीरं वाव सन्त तथा विद्वान्नामरूपाद्विमुक्त इत्यादिश्रुतिभिः शरीरादिप्रतिषेधात्तदपेक्षसामगानादेरर्थवादादन्यपरादवगतोऽभ्युपगन्तुमयुक्त इत्याह । अर्थवादगतमित्यादिना । स्पष्टार्थान्यक्षराणि ॥ १६१ ॥

मू० ॥ ईश्वरत्वमपि तत्परश्रुतिर्नेतिनेति परिदुःखिता सती ॥

वारयत्यवशिनष्टि केवलं

चित्स्वरूपमनवद्यविग्रहम् ॥ १६२ ॥

टी० ॥ तर्हीश्वरत्वस्य परमात्मनि शरीराद्यनपेक्षत्वादुक्तश्रुतिविरोधाभावादर्थवादावगतं तदुपेयमित्याशङ्क्य तथापि निर्विशेषपरश्रुत्यन्तरवि-

Digitized by Google

रोधात्तदपि सामगानादितुल्यमित्याशयेनाह । ईश्वरत्वमपीति । नेति-नेत्यस्थूलमनणु अतोऽन्यदार्तमित्यादिश्रुतिभेददर्शनाद्वयाविभाजः संसारिणो दृष्ट्वा दुःखिता सती आत्मातिरिक्तं सर्वं निराकृत्याभयानन्दानुभूतिमात्रमात्मानं परिशेषयति, तद्विरोधादीश्वरत्वमपि तदा नोपेयमित्यर्थः ॥ १६२ ॥

मू० ॥ सोपाधीश्वरतानिषेधनपरा सा नेतिनेति श्रुतिः
साक्षाद् भागवतं निरस्तनिखिलोपाधिस्वरूपं पुनः ॥
विश्वेश्वर्यमिहोच्यमानमधुना मोक्षे ततस्तत्परे-
वाक्येऽस्य विरुद्धतानवसरो मुख्यं ततो गृह्यताम् ॥ १६३ ॥

टी० ॥ ननूदाहृतश्रुतिर्मायोपाधिकमेवेश्वरत्वादिविशेषं निषेधति न तु स्वाभाविकं भगवतो भगशब्दोदीरितं ततश्च भगवत्प्राप्तिरूपायां मुक्तौ तदुपेयमित्याशङ्कते । सोपाधीति । साक्षादित्यस्य विवरणं निरस्तेति, पुनःशब्दस्तुशब्दसमानार्थः । इह स स्वराडित्यादिवाक्ये मोक्षे उच्यमानं विश्वैश्वर्यं तु निरस्तनिखिलोपाधिस्वरूपं भागवतमिति सम्बन्धः । निषेधश्रुतीनां सोपाधिकविशेषनिषेधपरत्वे फलितमाह । तत इति । अस्य निरुपाधिकैश्वर्यस्य । अविरोधे फलितमाह । मुख्यमिति ॥ १६३ ॥

मू० ॥ सामगानमथ जक्षणं जग-
त्सर्जनं च निरुपाधि गृह्यताम् ॥
नेतिनेति वचसा निषिध्यते
जक्षणादिकमुपाधिसंश्रयम् ॥ १६४ ॥

टी० ॥ सिद्धान्ती सोपाधिकैश्वर्यातिरेकेण निरुपाधिकस्वरूपभूतैश्वर्ये मानाभावादुक्तविभागो न युक्तः, निरपेक्षपरमात्मवस्तुनः सापेक्षैश्वर्यस्वरूपत्वं चायुक्तमत एव भगवच्छब्दोऽपि मायिकैश्वर्यादिसम्बन्धं निमित्तीकृत्य तत्र वर्तते, यदि मुक्तिदशायामुदितत्वात्तस्य निरुपाधिकत्वं

स्वरूपत्वं चास्थीयेत निषेधश्रुतीनां च सोपाधिकस्वरूपविषयत्वं तदाऽतिप्रसङ्ग इत्याशयेन दूषयति । सामगानमिति । स्पष्टार्थान्यक्षराणि ॥ १६४ ॥

मू० ॥ सामगानमथ अक्षरं जग-
त्सर्जनं च न खलु द्विधेष्यते ॥
तत्प्रमाणविरहादिहेति चे-
दीश्वरत्वमपि न द्विधा भवेत् ॥ १६५ ॥

टी० ॥ समगानादौ मानाभावादयुक्तं द्वैविध्यमिति यदुच्येत तदैश्वर्येऽपि तुल्यमिति स्वाशयं परमतानुवादेनाविष्करोति । सामगानमथेत्यादिना । इहात्मनि लोकवेदयोरिति वा । न द्विधा भवेदित्यत्रापि तत्प्रमाणविरहादित्यनुषङ्गः ॥ १६५ ॥

मू० ॥ ज्ञानमस्ति खलु बाह्यगोचरं
निर्विशेषमविनाशि च द्विधा ॥
बाह्यगोचरमपोह्य केवला
स्वापमोक्षसमये चितिः स्थिता ॥ १६६ ॥

टी० ॥ यदुक्तमैश्वर्यमस्य परमात्मन उक्तमन्यैः साक्षात् स्वरूपमवबोधसुखादितुल्यमिति तत्र दृष्टान्तमुपेत्य दार्ष्टान्तिके वैषम्यं वक्तुं ज्ञाने तावद्द्वैविध्यमुपपादयति । ज्ञानमस्तीति । बाह्यगोचरम् इन्द्रियादिसंनिकृष्टार्थविषयं तज्जन्यं चेत्यर्थः । एवमन्तःकरणवृत्तिरूपमेकं ज्ञानमुक्त्वा तत्साधकमपरं साक्षिरूपमस्तीत्याह । निर्विशेषमिति । विषयकरणाद्यनपेक्षमित्यर्थः । तस्यैवाविनाशित्वं विशेषणम् । इति ज्ञानं द्विधास्ति खल्विति सम्बन्धः । तत्राद्यं सापेक्षत्वादागमापायित्वाच्च नात्मनः स्वरूपं किं त्वौपाधिकमलीकं च, द्वितीयं तु सदाभावान्निरपेक्षत्वाच्च परमार्थात्मस्वरूपमेव तस्य ततो भेदे मानाभावात्, ज्ञानोत्पत्त्याद्यनुभवस्येतरविषयत्वादित्यभिप्रेत्याह । बाह्यगोचरमिति ॥ १६६ ॥ (शेषमग्रे)

Digitized by Google

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या

विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page* 482. Vol. IX.)

न च पर्यग्निकरणान्ताङ्गकलापः, तस्यापि सिद्धत्वात्, नोत्तराङ्गपरिसंख्या त्रिदोषत्वात्तस्मात्कर्मान्तरमिति प्राप्ते ब्रूमः । पात्नीवतशब्दस्ताव-न्मनोतास्थाग्निशब्दवच्छक्नोति पूर्वयागमुपस्थापयितुम् । न चाग्नेयवद-सामर्थ्यमुत्पत्तिवाक्ये हि त्वाष्ट्रं पात्नीवतमिति हि प्रत्येकमुत्पन्नत्वाद्धितः प्रत्येकमेव देवतात्वङ्गमयति न त्वग्नीषोमीयादिवत्समासादुत्पन्नत्वाद्धितो-येन व्यासक्तं साऽपेक्षं देवतात्वं स्यात् ।

न च प्रत्येकमपि देवतात्वे विकल्पः युगपदेकेन वाक्येन विधा-नात्, इत्थङ्वित्थयोर्मातां इत्थमातेति शक्यते वक्तुं यथा एवं पात्नीव-तमपि । सति चैवं प्रकृतप्रत्यभिज्ञाने न कर्मान्तरत्वं युक्तमत उत्सृजतिना पूर्वयागमनूद्य पर्यग्निकरणान्ताङ्गकलापविधिर्यद्यपि चासौ चोदकात्सिद्ध्य-ति तथाऽपि ततः प्रागेव विधीयते । तेन च क्लृप्तोपकारेण निराकाङ्क्ष-त्वात्प्रयोगवचनो गृहमेधीयवन्नातिदेशमपेक्षते । शक्नोति च पर्यग्निक-तुशब्दः प्राकृतपर्यग्निकरणावस्थावचनस्तदन्ताङ्गकलापं गमयितुम् । न हि पूर्वाङ्गेष्वकृतेष्वियमवस्था भवति पर्यग्निकृतोत्सर्गानुवादेन चाङ्ग-रीतिविधौ पात्नीवतशब्दो नित्यानुवाद इति न विशिष्टानुवाददोषः ।

अदाभ्यादीनां ग्रहनामता-ऽधिकरणम् ।

सू० अद्रव्यत्वात्केवले कर्मशेषः स्यात् ॥ ८ ॥

"एव वै हविषा हविर्यजते यो ऽदाभ्यं गृहीत्वा सोमाय यजते" "परा वा एतस्यायुः प्राण एति योंऽशुं गृह्णाति" त्यनारभ्य श्रुतं, तत्र विचारः ।

---

१ पर्यग्निकृतशब्द इति पा० ।

किं ज्योतिष्टोमे ग्रहणविधिः उत यागान्तरविधिः इति । तदर्थं च किमंशुमदाभ्यमिति यागनामनी ? ग्रहणनामनी वे ? ति । तत्र ग्रहणस्य संस्कारत्वादवघातादिवन्नामधेयानर्हत्वाद्यागनामत्वमदाभ्यं यजत इति । नाम च प्रकृतादपि भेदकमित्युक्तं, किमुताप्रकृतादेव ज्योतिष्टोमादंशौ तु यद्यपि यजिनै श्रुतस्तथाऽपि संज्ञयैव तावत्कर्मान्तरं कल्प्यते । तच्च गृह्णातिचोदनासामान्याज्ज्योतिष्टोमप्रकृतिकमिति तदीयविध्यन्तप्राप्तेर्द्रव्यदेवतासंबन्धाद्यागो भविष्यति तस्माद्यागान्तरे इति । उच्यते

"संस्काराणां न नामानि बार्यन्ते राजशासनात् ।
आनन्तर्यादतः स्यातां ग्रहयोरेव नामनी ॥
अंशौ तावद्यजिनैव श्रुतस्तन्नामता कुतः ।
अदाभ्ये श्रूयमाणाऽपि व्यवधानाच नामभाक् ॥
तदिह ग्रहयोरेव भेदो नामवशाद्भवेत् ।
न तु यागस्य, तेनात्र विधीयेते ग्रहावुभौ ॥
तयोर्गृह्णात्युपस्थानाज्ज्योतिष्टोमेन सङ्गतिः ।
अथवा तैत्तरीयाणामनयोर्विनियोजकम् ॥
अस्ति प्रकरणे वाक्यं तेन तादर्थ्यमेतयोः ।
अदाभ्ये श्रूयमाणोऽपि गुणसंक्रान्तशक्तिना ॥
विधिना न विधातव्यो यागस्तेन न भिद्यते ।
अंशौ त्वश्रुत एवेति विधेयौ केवलौ ग्रहौ" ॥

अग्निचयनस्य संस्कारताऽधिकरणम् ।

सू० अग्निस्तु लिङ्गदर्शनात्क्रतुशब्दः प्रतीयते ॥ ९ ॥

"य एवं विद्वानग्निं चिनुत" इति श्रुतं तथेमान्यपि वचनानि "अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येने"त्यादि तत्र संशयः । किमयमग्निं चिनुत इति यागविधिः उताग्निसंस्कारमात्रं चयनं स्वतन्त्रं विधीयते ? । किं वा ज्योतिष्टोमादिषु गुणो विधीयत ? इति तदर्थं च किमग्निशब्दो यागनामधेय ? मुत द्रव्यवचन ? इति । तत्रांशवदाभ्यवत्प्रकरणे पुनः संकीर्त्तनाभावाच्च क्रतुसंयोगस्तदभावे च संस्कारमात्रं स्वतन्त्रमनर्थकम्, अतो "ऽग्निं कुर्या"दिति यागविधिश्चिनोतिश्चेष्टकाभिरग्निं चिनुत इति वाक्यप्राप्तानु-

वादो निर्वपतिवत्, कथं पुनरसति यजिश्रवणे यागविधानम्? । उच्यते अग्निं कुर्यादिति तावत्संज्ञयैव कर्मान्तरेऽवधारिते "ऽथातोऽग्निमग्निष्टोमेन अनुयजन्तीति यदग्निं यजति तदग्निष्टोमेनेति संस्थाविधिपरे वाक्ये यजिनाऽनुवादादुत्पत्तौ यागवचनोऽग्निशब्द इति गम्यते । यद्यपि नायं संस्थाविधिः किं त्वग्निष्टोमसंस्थेन यागेनाग्निमनुयजन्तीति तथाऽप्याग्नेर्यागत्वं, न ह्यन्यथा तमन्वन्यैर्यष्टुं शक्यते । यथा देवदत्तमनुगच्छति यज्ञदत्त इत्युक्ते देवदत्तोऽपि गच्छतीति प्रतीयते, अन्यथाऽनुगमनानुपपत्तेरेवमनुयजनवशादेवाग्नेर्यागत्वं सिद्धम् । तस्माद्यागविधानं स्यादिति प्राप्ते ब्रूमः । "अग्नेश्चयनसंस्कारमात्रमत्र विधीयते । तस्याथाऽतोऽग्निमित्यादिवाक्यैः स्यात्क्रतुसङ्गतिः । वह्नौ रूढोऽग्निशब्दोऽयं न हि यागस्य वाचकः" । न ह्यग्निशब्दोऽत्यन्तरूढत्वात् वाक्यभेदतत्प्रख्यतद्व्यपदेशविधुरत्वाच्च यागनामत्वं प्रतिपद्यते, तेन ज्वलनस्यैवायं चयनसंस्कारो विधीयते तस्य संस्कारस्य क्रतुसंबन्धपराण्यथातोऽग्निमग्निष्टोमेनानुयजन्तीत्यादीनि । अत्राग्निशब्दः प्रकरणाच्चयनसंस्कृतेऽग्नौ वर्त्तते अनु—शब्दश्चयनापेक्षया पश्चाद्भावमग्निष्टोमादीनामाह तेन चयनसंस्कृतेऽग्नावग्निष्टोमादिभिर्यजेतेत्यर्थः । न त्वत्राप्यग्निशब्दो यजिसमानाधिकरणो येन नाम स्यात् । न चावश्यं तुल्यरूपाणामेव पौर्वापर्यं, पाकमनुभुङ्क्ते इत्यादिषु विजातीयानामपि दर्शनात्तस्मादपि ज्योतिष्टोमादिषु गुणविधिः ।

मासाग्निहोत्रादीनां क्रत्वन्तरताऽधिकरणम् । सू० प्रकरणान्तरे प्रयोजनाऽन्यत्वम् ॥ १० ॥

गुणभेदप्रसङ्गे समाप्ते ऽधुना प्रकरणान्तरेण भेदोऽभिधीयते । कुण्डपायिनामयने "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति मासं दर्शपूर्णमासाभ्यां यजन्ते" इत्यादि श्रुतम् । तत्र संशयः किं नैयमिकेऽग्निहोत्रादौ मासो विधीयते? किम्वा कर्मान्तर? मिति । तदर्थं किमनुपादेयगुणसंबन्धानुगृहीतो ऽसच्चिधिर्भेदकारणं संभवत्युत ने? ति । "तत्राग्निहोत्रशब्देन तत्कर्मोपस्थितं यतः । तस्मात्तत्रैव मासोऽयमप्राप्तो हि विधीयते" । उपादेयमनुपादेयं वा यदप्राप्तं तदेव विधेयं मासश्च तथा, यच्च प्राप्तं तदनुवाद्यमग्निहोत्रशब्दश्च स्वाभिधेयं कर्मोपस्थापयति तच्च प्राप्तं न

विधेयम्। अतो यद्यपि स्वभावतोऽनुपादेयं मासमुद्दिश्य कर्मोपादीयते। तथाऽपि मास एव विधेयो न कर्म विधिनिबन्धनश्च भेदो नोपादाननिबन्धनः, तस्मादुपादेयमपि कर्माविधीयमानं न भिद्यते इति प्राप्ते ऽभिधीयते। "प्रकरणान्तरे प्रयोजनान्यत्व"मिति किमिदं प्रकरणान्तरम्? इति अप्रकृताभिधानमित्यर्थः। कथमप्रकृताभिधानम्? उच्यते उपसद्भिश्चरित्वेति वचनाच हि नैयमिकस्योपसदः सन्ति तत्र ताश्च मासश्चेत्यनेको गुणः प्राप्ते कर्मणि न शक्यते विधातुमिति कर्मान्तरम्। अत्र चाप्रकृत[1]विधानादेव प्रकरणान्तरपर्यायाद्भेदः अप्रकृताभिधानं तु गुणादिति न गुणाद्भेदः। यद्येवं वाजिभ्यो वाजिनमित्यत्राप्यप्रकृताभिधानादेव प्रकरणान्तरपर्यायाद्भेदः। अप्रकृताभिधानं तु पूर्वकर्मसंयोगिनो गुणादिति तत्रापि प्रकरणान्तरमेव भेदकं स्याच गुणः। तथा शब्दाऽन्तराभ्याससंज्ञाभिरप्यप्रकृतविषयतैव विधेर्बोध्यते न साक्षाद्भेदः, स तु विधेरप्रकृतविषयत्वात्सिद्ध्यतीति सर्वत्र प्रकरणान्तरमेव भेदकं स्याच शब्दान्तरादयः। अथ तेषामेवमेतदेव भेदकत्वं यद्विधेरप्रकृतविषयत्वापादनम्। एवं सत्यत्रापि गुणादेव तत्सिद्धेः स एव भेदकः स्यादिति न प्रकरणान्तरं शब्दान्तरादिभिः सह संख्यातुं युज्येत। तद्धि साक्षाद्भेदकं सर्वत्रान्ये तु तद्धेतव इत्यतुल्यत्वात्कथं सह गणनम्?। अपि च मासं दर्शपूर्णमासाभ्यां यजेत इत्यत्रानेकगुणाभावाचाप्रकृताभिधानं सिध्येत्तस्माचाप्रकृताभिधानं प्रकरणान्तरं किन्त्वन्यदेव गुणादिवदप्रकृताभिधानहेतुभूतमिति वक्तव्यम्। किं पुनस्तत् पूर्वकर्मासन्निधानं? कथं पुनस्तेन भेदसिद्धिः?। उच्यते "कर्मासन्निहितं नैव बुद्धौ विपरिवर्त्तते। शब्दात्तु तदुपस्थानमुपादेये गुणे भवेत्"। असन्निहितं तावत्कर्म न बुद्धौ विपरिवर्त्तते तादृशमपि कथंचिज्जुहोतीति प्राप्तवन्निर्देशेन दूरस्थमपि उपस्थाप्येत यदि विधित्सितो गुण उपादेयः स्यादाहवनीयादिस्तत्र हीदृशी वचनव्यक्तिः शक्यते निदर्शयितुम् यज्जुहोति तदाहवनीय इति। "यत्र वाक्ये ऽनुपादेयो देशकालादिको गुणः। अतो न तत्र दूरस्थकर्मोपस्थान-

१ अत्र चाप्रकृताभिधानादेवेति पा.।

Digitized by Google

संभवः" । यत्कुर्यादित्येवं प्राप्तवन्निर्देशेन दूरस्थकर्मोपस्थापनं स्यात्तथा च तस्योद्देशान्मासस्तत्रोपादेयः ।

न च होमानुरोधेन मासः संपादयितुं शक्यते । तेनैषा वचनव्यक्तिर्या-मासस्तत्र होमं कुर्यादिति तेन शब्दस्वरसतः प्राप्तोपस्थानानवगमात्सन्नि-धानाभावाच्च क्रियैव विधातव्येति कर्मभेदः । एवं "सरस्वत्या दक्षिणेन तीरेणाग्नेयोऽष्टाकपालः" । "सत्राधाऽवगूर्य विश्वजिता यजेते"ति देश-निमित्तयोरपि द्रष्टव्यम् ।

ननु नामधेयेन भवति पूर्वकर्मोपस्थापनम् भवतु धात्वर्थस्य भावना तु तेनानुपस्थानाद्विधीयते एव धात्वर्थोऽपि यादृशो धातुना-ख्यातवर्त्तिनाऽपूर्वापरीभूतो विधेयपादीयते न तादृशो नाम्ना उपस्था-प्यत इति तस्यापि युक्तो भेदस्तदभेदेऽपि तावद्भावना भिन्नेति सिद्धम् ॥

आग्नेयादिकाम्येष्ट्य-धिकरणम् ।

सू॰ फलं चाकर्मसन्निधौ ॥ ११ ॥

"आग्नेयमष्टाकपालं निर्वपेद् रुक्काम[१]" इत्यनारभ्य श्रुतम् । तथा "त्रैधातव्या दीक्षणीये"त्यश्वमेधे । तत्रापि पूर्ववत्संशयः किं प्रकृत आग्नेये फलविधिः काम्ये च त्रैधातवीये कर्मणि दीक्षणीया कार्ययजमानसंस्कार-विधि? रुत कर्मान्तरविधि? रिति तदिह यः पूर्वत्र प्रकरणान्तरग्रहणात्तदेव भेदकं नाप्रविधानमात्रमिति मन्यते यो वा फलस्योपादेयत्वं मन्यते शक्यते तद्धि पूर्णमासस्येनापि कामयितुं न मासादिवदशक्यसंपादनमिति तन्निरा-करणार्थमिदमधिकरणम् । पूर्वत्राप्यविपरिवृत्तिकारणत्वादप्रविधानमेव कारणं न प्रकरणान्तरं, सदपि तत्र व्याप्रियते । तच्चाप्रविधानमत्राप्य-विशिष्टं, यद्यपि च फलं शक्यते कामयितुं तथाऽपि स्वरसादेव तत्का-ममुद्दिश्य साधनमेवोपादेयं न फलं फलत्वव्याघाताद्विधीयमानं हि तदङ्गमेव स्यात, एवं संस्कारेऽपि द्रष्टव्यं, न चाग्नेये ऽग्निहोत्रवन्नाम-धेयत्वमस्ति येनाभेदाशङ्काऽपि तावत्स्यात्तस्मादत्रापि कर्मभेदः ॥

अवेष्टेरन्नाद्यफलकत्वा-धिकरणम् ।

सू॰ सन्निधौ त्वविभागात्फलार्थेन पुनः श्रुतिः ॥ १२ ॥

१ रुक्कामः-तेजस्कामः ।

Digitized by Google

सर्वेषामेव देशकालनिमित्तफलसंस्कार्याणामसन्निधिमत्युदाहरणार्थमारभ्यते। "समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेत। यावज्जीवं दर्शपूर्णमासाभ्यां यजेत एतयाऽन्नाद्यकामं याजयेच्छ्रेयसोऽस्व-ष्टकृते समवद्यती"ति तत्र संशयः कर्मसन्निधौ किं देशादिसंबन्धे कर्म-भेदो भवति? उत प्रकृतमेव कर्म देशादिषु विधीयत? इति विचारः, किं प्राप्तम्? अत्रापि तावद्देशादेरुद्देशात्कर्म तं प्रति उपादेयम्। तथा च स्याद्विधेयं तेन भिद्यते विधानमेवोपादानं नान्यत् अत्र च देशादेरुद्देश्यत्वात्कर्मा-वश्यमुपादेयमतश्च विधेयत्वापत्तेर्विहितस्य विधानायोगात्सत्यपि सन्नि-धौ कर्मान्तरमिति प्राप्ते ब्रूमः

सन्निधावविभक्तत्वं कर्मणः प्रत्यभिज्ञया।
गम्यते तेन तस्यैव फलाद्यर्था पुनः श्रुतिः॥

निर्देशगतस्वातन्त्र्यपारतन्त्र्यात्मके उद्देशोपादाने प्राप्त्यप्राप्तिवशो तु विध्यनुवादो अतस्तयोः ताभ्यां भेदादुपादेयमपि देशकालयोः कर्म प्राप्तं तद्रूपमेव प्रत्यभिज्ञायते इत्यनुवाद्यं, तस्य तूद्देश्याभ्यामपि देश-कालाभ्यां संबन्धमात्रमप्राप्तमिति तन्मात्रं विधीयते इत्यभेदः स्यात्। अस्तु तावद्देशकालयोर्विधेयत्वात्कर्मणोऽनुवादः। निमित्तफलसंस्कार्याणां त्वविधेयत्वात्कर्मैव विधेयमिति भेदः स्यात् सत्यं, कर्म विधातव्यं, तथाऽपि तु न भिद्यते। उत्पत्तिविधिभेदे हि भेदो नास्ति च सोऽत्र नः। कर्मस्वरूपगताप्रवृत्तपूर्वप्रवर्त्तनमुत्पत्तिः। न चैकस्मिन्कर्मणि उभाभ्यामप्रवृत्तप्रवर्त्तन संभवतीति कर्मभेदः स्यात्, संभवति चान्येनोत्पादि-तस्यान्येन निमित्तादिसंबन्धमात्रप्रतिपादनं, कर्त्तव्यतामात्रं ह्युत्पत्ति-वाक्यादवगतं तत्र किं कस्मिन् निमित्ते कस्मै वा कामायेति विशेषा-पेक्षायामुत्पन्नस्यैव कर्मणो नैमित्तिकी कर्त्तव्यता निमित्तवाक्ये प्रतिपाद्यते फलविनियोगश्च फलवाक्ये, संस्कार्यविनियोगश्च तद्वाक्य इत्यकर्मभेदः॥

आग्नेयाद्युक्तेः स्तुत्यर्थताऽधिकरणम्। सू० आग्नेयस्तू[1]क्तहेतुत्वादभ्यासेन प्रतीयेत॥ १३॥

१ आग्नेयसूक्तहेतुत्वादिति भाष्यानुसारिपाठः।

दर्शपूर्णमासयो"र्यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति कालद्वययुक्तमाग्नेयस्यैकं वचनमपरं तु यदाग्नेयोऽष्टाकपालो ऽमावास्यायां भवतीत्येककालयुक्तम् । तत्र संशयः किमुभयत्र विहितादाग्नेयात्कर्मान्तरमिदममावास्यायां विहित ? मुत तस्यैवानुवाद ? इति । तत्राभ्यासात्कर्मान्तरम ।

ननु तत्राविशेषाद्भेदः, न हि तत्रैवं शक्यं वक्तुम् एवमर्थेन[1] पुनः श्रुतिरेवेति विशेषाग्रहणात्सर्वं विधयः इह त्वस्ति विशेषग्रहणं कालद्वययुक्तस्येतरा पुनः श्रुतिः संभवति ।

न च विपर्ययः पौर्णमास्याधिक्यादिति नैवं, न हि तत्राविशेषाद् भेदः । समिद्वाक्यस्य प्राथम्येन विशेषग्रहणाद्विधिपुनःश्रुतिबलात्तु तत्र भेदः । किञ्चात्रापि न विशेषग्रहणं किमुभयकालयुक्तेन विहितस्येतरोऽनुवादः किं वा केवलामावास्यायुक्तेन विहितममावास्यायामाग्नेयमनूद्येतरेण केवलपौर्णमसीकालाग्नेयविधिरिति तस्मात्कर्मान्तरमिति प्राप्ते ब्रूमः । "कर्मणः प्रत्यभिज्ञानादविभागः प्रतीयते । ऐन्द्राग्नस्य प्रशंसार्था तस्यैवैषा पुनः श्रुतिः" ॥

इति शास्त्रदीपिकायां द्वितीयस्याध्यायस्य तृतीयः पादः ।

यावज्जीविकाग्निहोत्राधिकरणम् ।

सू० यावज्जीविको ऽभ्यासः कर्मधर्मः प्रकरणात् ॥ १ ॥

"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"ति काम्यं प्रयोगं विधायाम्नायते "यावज्जीवं दर्शपूर्णमासाभ्यां यजेते"ति तत्र संशयः । योऽयं यावज्जीविको धर्मो विधीयते इति स किमभ्यासः कर्मार्थः ? उत नियमः पुरुषार्थे ? इति पूर्वपक्षे काम्यस्यैव प्रयोगस्याभ्यासविधिः सिद्धान्ते प्रयोगान्तरं नित्यं विधीयते इति भेदप्रसङ्गात् प्रयोगभेदाभेदचिन्ता । तत्र कर्माङ्गविधौ कर्मकर्थंभावसंबन्धात्प्रकरणानुग्रहः, पुरुषार्थविधौ तु तदसम्बन्धात्प्रकरणबाधः स्यादतोऽभ्यासविधिः । यावज्जीवकालं यागमभ्यस्येदिति नैतद्युक्तम् । यावज्जीवशब्दे काललक्षणैवं प्रसज्यते । यजिना च तदभ्यासलक्षणा प्रक्रियावशात्, न हि

---

[1] १ अस्यार्थेन पुनः श्रुतिरेवेति पाठः ।

प्रकरणवशेन श्रुतेर्लक्षणार्थता न्याय्या, स्वपक्षे च जीवनवाचिना तत्संबद्धः कालो लक्ष्यते, यजिना च यागाभ्यासः, न चैतन्न्याय्यं, तस्माज्जीवने निमित्ते पुरुषस्य प्रत्यवायपरिहाराय दर्शपूर्णमासप्रयोगो विधीयते। जीवनं च यावद्विनिपातं नियतमिति नियतनिमित्तत्वान्नियमोऽयं विधीयत इति पुरुषार्थः॥

सर्वशाखाप्रत्ययैककर्मताऽधिकरणम् ।

सू० नाम-रूप-धर्मविशेष-पुनरुक्ति-
निन्दा-ऽशक्ति-समाप्तिवचनप्राय-
श्चित्तान्यार्थदर्शनात् शाखान्तरेषु
कर्मभेदः स्यात् ॥ २ ॥

शाखान्तरेषु किमग्निहोत्रादिकर्म भिद्यते? किं वा सर्वशाखास्वेकमेवेति? विचारः। तत्राविशेषात्पुनः श्रुतिलक्षणादभ्यासाद्दूरत्वलक्षणाच्च प्रकरणान्तराद्भेदः, तथा गुणादपि क्वचिदैन्द्राग्नमेकादशकपालं निर्वपेदिति श्रुतं क्वचिद् द्वादशकपालमिति तत्रावश्यमन्यतरेण कर्मोत्पादयितव्यं येन चोत्पादितं तद्गतो गुण उत्पत्तिशिष्ट इतरस्तु तत्र निवेशमलभमानो वाजिनवत्कर्मान्तरं कल्पयतीति प्राप्ते ब्रूमः। "विधेः कर्मार्थतामात्रं पुनःश्रुत्यादिभिर्भवेत्। तावन्मात्रमिहापि स्यान्न तु भेदः प्रसिध्यति"। पुनःश्रुत्या हि कर्म विधेयमित्येतावत्सिध्यति, विधिवशात्तु भेदो विहितस्य विधानायोगात्, एवमसन्निधावपि विपरिवृत्त्यभावात्कर्मविधानं, विधानाच्च भेदः। तदिहापि कर्मविधिः पुनःश्रुत्यादिना सिध्येच्च त्वत्र विधिवशादेव सिद्धिर्विहितस्यापि पुरुषान्तरं प्रति विधिसंभवात्। यथा खल्वेकशाखागतमग्निहोत्रादिवाक्यमेकस्य पुरुषस्य विहितमेवमपरस्यापि विधत्ते न कर्मान्तरमेवमत्रापि अध्येतृभेदात्तान्यपि सर्वाण्येव वाक्यान्येकमेव कर्म विदधति न कर्मान्तरमेवमेकादशद्वादशकपालयोरुभयोरुत्पत्तिशिष्टत्वाच्च बलाबलं, तस्माद् भेदः। "शब्दान्तराभ्यासगुणैः ससंख्यैर्नाम्नातिदूरेण च सापवादः। भेदः क्रियाणामिति साधितोऽयमतः परं तद्विनियोगचिन्ता॥ २ ॥

इति श्रीमहामहोपाध्यायश्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वितीयाध्यायस्य चतुर्थः पादः॥

इति द्वितीयोऽध्यायः समाप्तः॥ (शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

श्रीं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(*Continued from page* 499. Vol. IX.)

मू॰ स्वतः शुद्धिविरहाच्च शुभाश्रयत्वं प्रतिषिध्य परशक्तिरूपमिदममूर्त्तमपरशक्तिरूपं क्षेत्रज्ञाख्यममूर्त्तं च परशक्तिरूपस्यात्मनः क्षेत्रज्ञताऽऽपत्तिहेतुभूततृतीयशक्त्याख्यकर्मरूपाविद्या चेत्येतच्छक्तित्रयाश्रयो भगवदसाधारणम्-

"स्वतः शुद्धिविरहा"दिति, अत्र नं शुद्धेरस्वाभाविकत्वमुच्यते अपि त्वौपाधिकदोषनिरासे स्वयमशक्तत्वेन भगवत्प्रसादसापेक्षत्वं विवक्षितं, शुभाश्रयत्वं प्रतिषिध्येति स्वतः शुद्धिविरहादित्यनेन शुभत्वं प्रतिषिद्धम्, अनालम्बनतयेत्यनेनाश्रयत्वं प्रतिषिद्धमिति शुभाश्रयत्वप्रतिषेधः, शुभत्वं हेयविरोधित्वं न तु हेयराहित्यमात्रं "चिन्त्यमात्मविशुद्ध्यर्थं सर्वकिल्बिषनाशन"मित्युक्तत्वात् । शक्तित्रयाश्रयत्वकथनाय शक्तित्रयमनुवदति "परे"ति, "अत्र समस्ताः शक्तयश्चैता" इति वचनार्थो विवक्षितः, एताः शक्तय इति बहुवचने सत्यपि समस्तपदं बहुव्यक्तिक्रोडीकारार्थं परशक्तिरेव परमात्मनोरूपमिति परशक्तिरूपं परशक्त्यात्मकं वा, एवमुत्तरत्रापि भगवदसाधारणमिति चतुर्मुखादिशरीरव्यावृत्तिः, भगवदधिष्ठितत्वेऽपि तत्तज्जीवविशेषाभिमानविषयत्वात्तेषां शरीराणाम् । श्रुतिमूलतां दर्शयति—

मू॰ "आदित्यवर्ण"मित्यादि वेदान्तसिद्धं मूर्त्तस्वरूपं शुभाश्रय इत्युक्तम्, अथ परिशुद्धात्मस्वरूपस्य शुभाश्रयताऽनर्हतां वक्तुं प्रत्यक्तमितभेदं यदित्याद्युच्यते तथा हि "न तद्यो-

गयुजा शक्यं नृप? चिन्तयितुं यतः। द्वितीयं विष्णुसंज्ञस्य योगिध्येयं परं पदम् ॥ समस्ताः शक्तयश्चैता नृप? यत्र प्रतिष्ठिताः। तद्विश्वरूपवैरूप्यरूपमन्यद्धरेर्महद्”-ति च वदति

“आदित्ये”ति, मूर्तरूपमित्यनेन “मूर्त्तं भगवतो रूपे” इति वचनार्थ उक्तः, उक्तेष्वर्थेष्वयं श्लोकः किंविषय इत्यत्राह “अत्रे”ति, शुभाश्रयताऽनर्हत्वकथनार्थमुच्यते चेदन्यत्रास्यानर्हत्वकथनं वस्त्वन्तरस्य तदर्हत्वकथनं च द्रष्टव्यमित्यत्राह “तथा ही”ति, अस्मिन्नर्थद्वये वचनद्वयमुपादत्ते “न तदि”-ति, योगयुजा–प्रक्रान्तयोगेन, मनालम्बनत्वमनेन ग्रन्थेनोक्तं, स्वतः शुद्धिविरहश्च प्रकरणसिद्ध इहा[1]भिप्रेतः “अन्ये तु पुरुषव्याघ्र? चेतसा ये व्यपाश्रयाः। अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः” इत्यादिना भगवद्विग्रहव्यतिरिक्तानां हि शुद्धिविरह उक्तः, अन्यस्य रूपस्यार्हताकथनं चास्य रूपस्यानर्हत्वविवक्षासूचकमिति च-शब्दार्थः। अन्ये त्विति ग्रन्थेन कर्मसंबन्धलक्षणाशुद्धिकथनात्कर्मसंबन्धविनिर्मुक्तानामपि स्वतःशुद्धिविरहः सूचितः, तेषामपि शुभाश्रयपदस्याशुभशब्देन व्यवच्छेद्यत्वं स्पष्टयितुमाह–

मू० तथा चतुर्मुख[2]सनकादीनां जगदन्तर्वर्तिनामविद्यावेष्टितत्वेन शुभाश्रयत्वाऽनर्हतामुक्त्वा बद्धानामेव पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपात्मनां च स्वतःशुद्धिविरहात् भगवता शौनकेन शुभाश्रयता निषिद्धा

मू० आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः।
प्राणिनः कर्मजनितसंसारवशवर्त्तिनः ॥
यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः।
अविद्याऽन्तर्गताः सर्वे ते हि संसारगोचराः ॥

१ इत्यभिप्रेत इति पाठान्तरम्।
२ चतुर्मुखसनन्दनादीनामिति पुस्तकान्तरपाठः।

पश्चादुद्भूतबोधाश्च ध्यानेनैवोपकारकाः ।
नैसर्गिकोऽन वै बोधस्तेषामप्यन्यतो यतः ॥

तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवदि"त्यादिना, परस्य ब्रह्मणो विष्णोः स्वरूपं स्वासाधारणमेव शुभाश्रय इत्युक्तम्, अतोऽत्र न भेदापलापः प्रतीयते, ज्ञानस्वरूपमित्यत्रापि ज्ञानव्यतिरिक्तार्थजातस्य कृत्स्नस्य न मिथ्यात्वं प्रतिपाद्यते

"तथे"ति, पश्चादुद्भूतबोधाश्चेत्येतद्व्याख्यातं स्वस्वरूपापन्नाना-मिति पदेन, आब्रह्मस्तम्बपर्यन्ता इत्यत्राङभिविधौ स्तम्बसमभिव्याहारात्, स्तम्बो हि कर्मवश्यः "पुमान्न देव" इत्यारभ्य "भूपैते कर्मयोनय" इत्युक्तेः, तेषामप्यन्यतो यत इत्येवमन्तस्य ग्रन्थस्यार्थः पूर्वमुक्तः । अथ तस्मात्तद-मलं ब्रह्मेत्यादेरर्थमाह "परस्ये"ति, स्वासाधारणमित्यस्य पूर्ववदर्थः प्रत्यस्तमितेत्यादिश्लोकस्य भेदनिषेधपरत्वाभावं निगमयति "अत" इति, । अथ ज्ञानस्वरूपमित्यादि श्लोकस्य भेदनिषेध[1]परत्वाभावान्निगमयति "अत" इति, अथ ज्ञानस्वरूपमित्यादिश्लोकस्य भेदमिथ्यात्वपरत्वाभा-वमाह "ज्ञानस्वरूपमि"तीति, अपिः समुच्चये । कृत्स्नमिथ्यात्वप्रतिपा-दनाभावमुपपादयति–

शृ० ज्ञानस्वरूपस्यात्मनो देवमनुष्याद्यर्थाकारेणाऽवभासो भ्रा-न्तिरित्येतावन्मात्रवचनात्, न हि शुक्तिकाया रजततयाऽवभासो भ्रान्तिरित्युक्ते जगति कृत्स्नं रजतजातं मिथ्या भवति, जगद्ब्रह्मणोः सामानाधिकरण्येनैक्यप्रतीतेः ब्रह्मणो ज्ञानस्वरूपस्यार्थकारता भ्रान्तिरित्युक्ते सत्यर्थजातस्य कृत्स्नस्य मिथ्यात्वमुक्तं स्यादिति चेत्तदसत्

१ भेदमिथ्यात्वपरत्वाभावमाहेति पुस्तकान्तरपाठः ।

टी० “ज्ञाने”ति, ज्ञानस्वरूपस्यार्थाकारतयाऽवभासे भ्रमे सति अर्थाकारस्य तथात्वेनावभासो न भ्रमो भवतीत्यर्थः। तमेव दृष्टान्तेनोपपादयति “न ही”ति, दृष्टान्ताद्वैषम्यमुखेन चोद्यं शङ्कते “जगद्ब्रह्मणो”रिति, तत्र हि सर्वं रजतजातं न शुक्तिकाशकलेन समानाधिकरणं दृष्टम् अपि तु व्यधिकरणत्वेन प्रमाणप्रतिपन्नम् अतो न कृत्स्नस्य रजतजातस्य शुक्तित्वेन विरोधः, अपि तु समानाधिकरणरजतस्यैव विरोधः, तच्च विरोधात् समानाधिकृतरजतस्य मिथ्यात्वम् अविरुद्धस्यासमानाधिकृतरजतस्यामिथ्यात्वं च, अत्र तु ब्रह्मव्यतिरिक्तं कृत्स्नं ब्रह्मसमानाधिकरणं प्रतीयते अतो ज्ञानाकारस्यार्थाकारस्य च विरोधे कृत्स्नस्यार्थजातस्य मिथ्यात्वं फलितमिति। एतत्परिहरति “तदसदि”ति, तत्र प्रथमं परोक्तार्थस्य प्रबन्धवाक्यार्थस्य विरोधमाह—

मू० अस्मिन् शास्त्रे परस्य ब्रह्मणो विष्णोर्निरस्ताज्ञानादिनिखिलदोषगन्धस्य समस्तकल्याणगुणात्मकस्य महाविभूतेः प्रतिपन्नतया तस्य भ्रान्तिदर्शनासंभवात्।

“अस्मिन्नि”ति, ब्रह्मणोऽविद्यान्वयोजगतो मिथ्यात्वं च विरुद्धं “समस्तहेयरहितं विष्ण्वाख्यं परमं पदम्” “ततः स वासुदेवे”ति “तद् ब्रह्म परमं नित्यं” “हेयाभावाच्च निर्मलम्” “तानि सर्वाणि तद्वपुः” “विभूतयो हरेरेता” इत्यादिवचनादित्यर्थः, भ्रान्तिदर्शनतः स्थितं विष्णुं यसिष्णुमिति विष्णोस्सगुणस्य भ्रमाश्रयत्वमुच्यते अतस्तदुक्तं परमं ब्रह्म हि निर्दोषमिति शङ्काव्यावृत्यर्थं परस्य ब्रह्मणो विष्णोरित्युक्तं, निरस्ताज्ञानादिनिखिलदोषगन्धस्य समस्तकल्याणगुणात्मकस्येत्याभ्यां पदाभ्यामविद्यान्वयानुपपत्तिरुक्ता अविद्यासंबन्धे सति निरस्तसमस्तहेयत्वं समस्तकल्याणगुणात्मकत्वमपि ह्यनुपपन्नं स्यात्। महाविभूतेरिति जगन्मिथ्यात्वानुपपत्तिरुक्ता, जगतो भगवद्विभूतित्वं हि न प्रमाणान्तरसिद्धं येन निषेधार्थमनुवादः स्यात्, अतो विधीयत एव, विधिस्तु न भ्रमं जनयति तथा सति निषेधवचनस्यापि सतो भेदस्यासत्त्वविषयबुद्धिरूपभ्रमपरत्वस्यानिवार्यत्वात्, प्रामाण्यं हि वाक्यद्वयस्य समानं तस्माद्विहितोऽर्थः परमार्थ एवेति न जगन्मिथ्यात्वमित्यर्थः

सामानाधिकरण्येनैक्यप्रतीतौ सत्यां ज्ञानाकारार्थाकारयोर्विरोधादन्यतरमिथ्यात्वं स्यात् यथा शुक्तिरेव रजतमित्यत्रेति शङ्कायामाह—

सू० सामानाधिकरण्येनैक्यप्रतिपादनं च बाधासहमविरुद्धं चेत्यनन्तरमेवोपपादयिष्यते अतोऽयमपि श्लोको नार्थस्वरूपस्य बाधकः, तथा हि—

टी० "सामानाधिकरण्येने"ति, बाधासहं—न केवलमाकारद्वयेऽन्यतरबाधनिरपेक्षमपि सामानाधिकरण्यं संभवति किं तु बाधव सहते आकारद्वयासिद्धौ सामानाधिकरण्यलक्षणासिद्धेरित्यर्थः । तर्ह्येकस्मिन्वस्तुन्याकारद्वयविरोधः कथं परिह्रियेतेत्यत्राह "अविरुद्धं चे"तीति, आकारद्वयाङ्गीकारेऽप्यैक्यप्रतिपादनमविरुद्धं सद्वारकत्वादिति भावः । अनन्तरमेव—न त्वधिकरणान्तर इत्यर्थः । प्रथमश्च—शब्दः शङ्कानिवृत्तिपरः, द्वितीयः समुच्चयपरः । मिथ्यात्वपरत्वाभावं निगमयति "अतोऽयमि"ति, एवं ज्ञानस्वरूपमिति श्लोकस्य प्रपञ्चमिथ्यात्वपरत्वमनुपपत्त्युद्घाटनेन निरस्तम् । अथ श्लोकं स्वपक्षे व्याख्यातुमुपक्रमते "तथा ही"ति, अत्र किमर्थं प्रश्नश्लोकव्याख्यानम् ? उच्यते ज्ञानस्वरूपमिति श्लोके द्वितीयान्तपदानां विशेष्यो विष्णुरिति न प्रतीयते तेषां प्रणम्येति पदेनान्वयश्च न ज्ञायते श्लोकस्य विशिष्टार्थपरत्वं च प्रकरणस्य विशिष्टपरत्वेन विना नावगम्यते अतो नमस्कारश्लोका व्याख्यातव्यास्तेषु व्याख्यातव्येषु द्वितीयाध्यायारम्भे नमस्कारकरणं किमित्यत्र प्रथमत एव हि कर्त्तव्यमिति शङ्का जायते शास्त्रस्य प्रश्नप्रतिवचनरूपेणावतीर्णत्वात् प्रथमं प्रश्नानां सङ्क्षेपेण प्रतिवचनं कृत्वा विस्तरविवक्षायां द्वितीयाध्यायारम्भे नमस्कारः कृतः, अन्यथा प्रश्नाऽनन्तरमेव च नमस्यायां क्रियमाणायामस्तप्रश्नस्य किमुच्यत इति शिष्यबुद्धेर्व्याकुलता स्यादिति पूर्वोक्तशङ्कानिरासमुखेन नमस्कारश्लोकसङ्गतिप्रदर्शनार्थं प्रश्नश्लोका व्याख्याताः, ज्ञानस्वरूपम् इत्यस्मिन्नुपक्रमयन्ये निर्विशेषवस्तुव्यतिरिक्तस्य भ्रान्तिसिद्धत्वदर्शनात्तदनुगुण एवार्थ उत्तरत्र वर्णनीय इति शङ्कापरिहारायोपक्रमोपक्रमभूतैः प्रश्नोत्तरश्लोकैः शास्त्रप्रतिपाद्यः सविभूतिकदेवता-

विशेषः, न तु ज्ञप्तिमात्रमिति शास्त्रतात्पर्यज्ञापनार्थं च प्रश्नश्लोकव्याख्यानं, व्याचिख्यासितश्लोकोक्तभ्रान्त्यन्वयस्य सद्वारकत्वसिद्धये सामानाधिकरण्यं शरीरशरीरिभावनिबन्धनमिति यन्मयमिति मयट्प्रत्ययेन ज्ञापनानार्थं च प्रश्नश्लोका व्याख्यायन्ते तत्र किमयं श्रुतवेदान्तप्रश्नः? उताश्रुतवेदान्तप्रश्न? इति विकल्पे अश्रुतवेदान्तस्य विशेषप्रश्नानुपपत्तिः, श्रुतवेदान्तस्य श्रोतव्याभावात् प्रश्नानुपपत्तिरिति शङ्कायां श्रुतवेदान्तस्य प्रश्न इत्याह—

भा० "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मे"ति जगज्जन्मादिकारणं ब्रह्मेत्यवसिते सति

टी० यतो वा इमानीत्यादिना, अवसिते सतीत्यनेन ब्रह्ममीमांसाश्रवणं कृतमित्युक्तं, श्रुतवेदान्तस्य कथं प्रश्नोपपत्तिरिति शङ्कायां श्रुतवेदान्तस्येतिहासपुराणश्रवणविधिं दर्शयति—

भा० "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यती"ति शास्त्रेणास्यार्थस्य इतिहासपुराणाभ्यामुपबृंहणं कार्यमिति ज्ञायते, उपबृंहणं नाम विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैः स्वावगतवेदवाक्यार्थव्यक्तीकरणम्

टी० "इतिहासे"ति, इतिहासेत्यादिश्लोके वेदशब्दो वेदान्तपरः, वेदोपबृंहणभूतेषु धर्मशास्त्रेतिहासपुराणेषु धर्मशास्त्राणि पूर्वभागोपबृंहणानि, इतिहासपुराणान्युपरितनभागोपबृंहणपराणीति हि विभागः, स च स्मृत्यधिकरणे व्यक्तीभविष्यति। तत्र धर्मशास्त्रेषु ब्रह्मप्रतिपादनं कर्मणां तदाराधनरूपत्वज्ञापनार्थम्। इतिहासपुराणेषु कर्मप्रतिपादनं कर्मणां ब्रह्मोपासनाङ्गत्वज्ञापनार्थम् इतिहासस्य पुराणेभ्योऽभ्यर्हितत्वं विशेषः, "अल्पाच्तर"मिति पुराणशब्दस्य पूर्वनिपाते प्राप्ते अभ्यर्हितं पूर्वं प्रयोक्तव्य.

मिति पूर्वनिपातितस्येतिहासस्याभ्यर्हितत्वप्रतीतिः । अस्य श्लोकस्य प्रथमार्द्धं व्याचष्टे "उपबृंहणाद्यामे"ति, बह्वन्तविशेषणद्वयेनागमोत्थं विवेकजं च ज्ञानमस्तीत्युक्तं, तत्त्वार्थानामिति बहुवचनं कपिलमतादपीतिहासादीनां प्राबल्यद्योतनार्थं, व्यक्तीकरणमज्ञातविशेषैः सह स्वावगतार्थनिष्कर्षः, यथा वेदेन कर्तव्यतया विहितस्य संध्योपासनादेः शरीरशुद्धिप्रकारदन्तधावनस्नानादिविशेषैः सह निष्कर्षः, एवमुपनिषद्भागेऽप्यर्थनिष्कर्षः संपाद्यः उपनिषदर्थनिष्कर्षो ब्रह्मविचारसिद्ध इति नोपबृंहणापेक्षेति शङ्कायामुत्तरार्द्धं व्याचष्टे–

मू० सकलशाखाऽनुगतस्य वाक्यार्थस्याल्पभागश्रवणाद् दुरवगमत्वेन तेन विना निश्चयायोगात् उपबृंहणं हि कार्यमेव

टी० "सकले"ति, पूर्वार्द्धविहितोपबृंहणकार्यतोपपादकमुत्तरार्द्धम् उपबृंहणाद्यामानधीतशाखान्तरार्थैः सहाधीतशाखार्थनिष्कर्षः अतो नोपबृंहणविचारनैरपेक्ष्यमित्यर्थः ।

ननु यथा आपातप्रतीत्या फलवदर्थावगमात्कर्मविचारे तदनन्तरं ब्रह्मविचारे च रागतः प्रवृत्तिः तथा अधीयमानशाखान्तर्गतेन "अनन्ता वै वेदा"इति वाक्येन वेदानामानन्त्यावगमाधीतशाखानवगतानां तदविरुद्धानां विरुद्धानां चार्थानां सम्भवात् "स्मृतेश्च" "अपि स्मर्यते" इत्यादिसूत्रेषु वेदान्तार्थनिर्णयस्योपबृंहणसापेक्षत्वदर्शनाच्चोपबृंहणसापेक्षत्वमवगतो रागतः प्रवृत्तिरुपपद्यते तत्र पूर्वभागोपबृंहणेषु धर्मशास्त्रेषु श्रुतेरुपनिषद्भागोपबृंहणरूपेतिहासपुराणेष्वपि रागात्प्रवृत्तिरिति विधिवैयर्थ्यम्, अप्राप्ते हि शास्त्रार्थवत्त्वम् ।

न च गुरोरेव श्रोतव्यमिति नियमविधिः, अस्मिन्वचने तद्वाचिशब्दाभावात् इतिहासपुराणयोः श्रवणप्रवृत्तस्यैव एतद्वचनार्थज्ञानं तस्मादितिहासपुराणश्रवणे प्रवृत्तिरित्यन्योन्याश्रयश्च अत उपबृंहयेदिति विधिरनुपपन्न इति, सत्यं, भारतादिप्रबन्धविशेषश्रवणाय तन्मध्यगतेनानेन वचनेन न्यायसिद्धं सामान्यत उपबृंहणस्यापेक्षितत्वम् अनूद्यते उपबृंहणं

कार्यमिति ज्ञायत इत्यस्यायमर्थः न्यायसिद्धमुपबृंहणस्य करणीयत्वमनेनापि वचनेन ज्ञायत इति, उपबृंहणनामेत्यादिभाष्येण न्यायप्राप्तिरेव प्रदर्श्यते। यद्वा समन्वयविरोधपरिहारलक्षणाभ्यामेव तत्त्वस्थितेर्निश्चितत्वाद्वस्तुनि विरुद्धाकारासम्भवादधीयमानश्रुतिनिर्णीतविरुद्धार्थप्रतिपादकप्रदेशान्तरसम्भवे वेदस्य भ्रान्तिजल्पितायमानत्वप्रसङ्गाच्च निर्णीततत्त्वविरुद्धार्थप्रतिपादकप्रदेशासम्भवात् ब्रह्मण्यनवगतगुणविभूतिविशेषसद्भावेऽप्युपबृंहणसहस्रैरपि तदियत्ताप्रतिपादनायोगादवगतकतिपयगुणविषयोपासनेष्वन्यतमेनैव पुरुषार्थसिद्ध्युपपत्तेश्चोपबृंहणश्रवणानपेक्षं प्रत्युपबृंहयेदिति विधानं युज्यते।

ननु एवं तर्हि न्यायानुगृहीतवाक्यावगतेष्वर्थेषूपबृंहणनिष्कृष्टव्याभावाद्विष्कृष्टव्यांशस्य सूत्रोदाहृतवचनैरेव निष्कृष्टत्वाच्चोपबृंहणविधिरदृष्टार्थः स्यात्।

न च दृष्टे सम्भवत्यदृष्टकल्पनं न्याय्यं, दृष्टार्थत्वे च वचनं दर्शयति "मामयं प्रहरिष्यती"ति, वेदस्य प्रतारणंनाम तदभिप्रेतविपरीतार्थवर्णनमेव, अतस्तन्निवृत्तिरूपं दृष्टफलं वाचनिकं, तस्मिन् सत्यदृष्टकल्पनमयुक्तं, तर्हि तदेव दृष्टं फलमस्त्विति चेत्तदप्ययुक्तं तत्त्वविपर्यासप्रतिपादनासम्भवस्य त्वयैवोक्तत्वात्, साकल्येन ब्रह्मविभूत्यनवगमस्य समस्ततदवान्तरविशेषानवगमस्य च वेदप्रतारणरूपत्वाभावेन तन्निवृत्तेः फलत्वायोगाद् उच्यते, यद्यपि परतत्त्वतदुपासनप्रतिपादनेषु विपर्यासासम्भवस्तथाऽपि किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् आनो भर प्रमगन्दस्य वेदो नैचा शाखं मघवन्रन्धया न इत्यादिवाक्यप्रतिपन्नप्रमगन्दादिवृत्तान्तस्येव परमात्मसृज्यसुरनरतिर्यगादिविशेषतदुत्पत्तितद्वृत्तविशेषाणां श्रुतिसामान्यप्रतीतत्वेन वाक्याविवक्षितत्वं मन्यमानो अहल्या जारादिवाक्यानां पण्डितमानिभिरितरैरुक्तमर्थं वेदपूर्वभागोपनिषद्भागगतानां मन्त्रार्थवादानामन्यथाऽर्थं मन्यते चेत् अश्रुतोपबृंहणतया वेदं प्रतारयत्येवार्थमिति तत्परिहारायोपबृंहणविधिरुपपद्यत इति, न चान्योन्याश्रयः स्या-

ध्यायविधिवाक्यस्य स्वाध्यायान्तर्भावेऽप्यध्ययनाद्विध्यवगमः, विध्यवगमा-दध्ययनमिति यथा नान्योन्याश्रयः तद्वत् । तत्र हि विध्यभिज्ञपुरुषप्रेरणात्तद-नुष्ठानदर्शनाद्वा माणवकप्रवृत्तिः, एवमुपबृंहणाविध्यभिज्ञविशि[1]ष्टजनवाद-प्रसिद्ध्या तदभिज्ञस्वगुरुवचनेन वा तेनोपबृंहणाधिगमप्रवृत्तपुरुषान्तरदर्श-नाद्वा उपबृंहणाज्ञानस्य सम्पाद्यतात्ज्ञानाच्चिकीर्षोस्य प्रश्नः उपपद्यते, अत उप-बृंहणाविधिरुपपन्नः, तत्र स्वगुरोः पराशरस्य सार्वज्ञ्यप्रसिद्धेस्तेनैव सर्वविद्या-स्य[1]लेषु स्वस्य कृतशिक्षितत्वाच्च मैत्रेयस्य तत्प्रणीतपुराणश्रवणप्रवृत्त्युपपत्तिः पुराणान्तरेभ्योऽस्य पुराणस्य वैषम्यं वदन् प्रश्नानवतारयति—

मू० तत्र पुलस्त्यवशिष्ठवरप्रदानलब्धपरदेवतापारमार्थ्यज्ञानव-तो भगवतः पराशरात्स्वावगतवेदार्थोपबृंहणमिच्छन् मैत्रेयः परिपप्रच्छ "सोऽहमिच्छामि धर्मज्ञ? श्रोतुं त्वत्तो यथा जगत् । बभूव भूयश्च यथा महाभाग? भविष्यति

"यन्मयं च जगद्ब्रह्मन्? यतश्चैतच्चराचरम् ।
लीनमासीद्यथा यत्र लयमेष्यति यत्र च"इत्यादिना, ॥

टी० "तत्रे"ति, अस्य तावत्पुराणरत्नस्य प्राच्योदीच्यादिसर्वविद्वज्जनर्विदितस्य पुराणान्तरेभ्योऽपि प्रसिद्धिप्राचुर्यात धर्मशास्त्रेषु मानवस्येव, व्याकरणेषु पाणिनीयस्येव च, सजातीयप्रबन्धेभ्यः प्रकर्षातिशयो नापह्नोतुं शक्यते, तत एव प्रसिद्धिप्राचुर्यात् कौर्म्मादेरिव नष्टकोशत्वशङ्का दूरोत्सा-रिता, अनतिविस्तरत्वाच्च प्रक्षेपशङ्का नावतरति । अन्यपरोक्तिप्रसिद्धुपरिग्र-हातिशयं चेदं "पठय पराशरेदम्" इति "अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम् । राजसेषु तु माहात्म्यमधिकं ब्रह्मणो विदुः ॥ सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः । तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिं यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा । तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते" इति यम्यग्ज्ञाननिष्पादकसत्त्वमूलत्वादन्यथाज्ञान-

१ स्थानेष्विति तु युक्तम् ।

विपरीतज्ञानहेतुभूतरजस्तमोमूलत्वाभावाद्दुष्टकारणपुराणान्तरसाम्यं न संभावनीयं, सत्त्वस्य यथार्थज्ञानहेतुत्वं रजस्तमसोश्च "सत्त्वात् सञ्जायते ज्ञानम् । "अयथावत्प्रजानाति बुद्धिः सा पार्थ? राजसी" ॥ "सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ? तामसी"ति च प्रसिद्धं "सत्त्वं लघु प्रकाशक-मिष्टमुपष्टम्भकञ्चलं च रजः गुरु वरणकमेव तम" इति "सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता" इति च प्रसिद्धम्

ननु चतुर्मुखशिवादिप्रतिपादकपुराणानां रजस्तमोमूलत्वपरवच-नस्य रजस्तमोमूलत्वेन प्रामाण्याभावात्सात्त्विकपुराणप्राबल्यासिद्धिः, अस्य वचनस्य सत्त्वमूलत्वेन प्रामाण्यं नास्ति अत एवैतद्वचनमात्रस्याप्रामाण्यं वक्तुं युक्तं न बहूनां पुराणानां, भूयसां बलीयस्त्वात्, उच्यते न तावदस्य वचनस्य प्रामाण्ये विमतिर्न्याय्या बाधकादर्शनात्. स्वतस्सिद्धप्रामाण्यास्यानपोदित-त्वात् "योह खलु वाऽस्य राजसोंशः सोऽसौ ब्रह्मचारिणो योऽयं ब्रह्मा, योह खलु वा अस्य सात्त्विकोंशः सोऽसौ ब्रह्मचारिणोयोऽयं विष्णुः, योह खलु वा अस्य तामसोंऽशः सोऽसौ ब्रह्मचारिणो योऽयं रुद्र" इति "महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तक" इति च श्रुत्यानुगुण्येन तत्तद्गुणमयत्वेनावगतस्य तत्तत्त्वस्य तत्तत्कालेषु तत्तद्गुणमयेन ब्रह्मणा तेषु तेषु पुराणेषु प्रतिपादितत्वपरस्य वच-नस्योपपन्नार्थत्वाच्च । सकलशास्त्रार्थव्यवस्थापके भारते च मोक्षधर्मे "जाय-मानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थनि-श्चयः" इत्यादिना भगवत्कटाक्षेण सत्त्वगुणमूलसम्यग्ज्ञाननिश्चयमुक्त्वा-"पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः । रजसा तमसा चास्य मानसं सम-भिप्लुतमि"ति चतुर्मुखशिवयोः कटाक्षेण रजस्तमोमूलकालुष्यप्रतिपादनाच्च चतुर्मुखशिवप्रतिपादकप्रबन्धानां रजस्तमोमूलत्वमुपपद्यते. अस्य वचनस्य रजस्तमोमूलपुराणस्यत्वेऽपि नाप्रामाण्यं शङ्कनीयं ब्रह्मशिवादिप्रतिपादना-भिनिविष्टस्य प्रबन्धस्य भगवत्प्रकर्षाक्षावायहासंभवेनास्य वचनस्य तत्त्वपर-त्वोपपत्तेः, स्वप्रतिपाद्यदेवतायामेव हि वक्तुरायहसंभवो न त्वन्यत्र, तस्मा-च्चास्य वचनस्य कारणदोषसंभवः, यदुक्तमनेकपुराणाप्रामाण्यादेतद्वचनमा-त्राप्रामाण्यं युक्तं, भूयसां बलीयस्त्वादिति, तदयुक्तं साक्षादर्थविरोधाभावात्

न हि विधिशिवप्रतिपादकप्रबन्धानां रजस्तमोमूलत्वमेवेति तेषु पुराणेष्वव-
गम्यते तत्तत्प्रबन्धेष्वेव प्रमाणतया प्रतिपन्नानां तेषां प्रामाण्यं रजस्तमोमू-
लत्वं च विरुद्धमिति परम्परया विरोधः फलितः, तत्र भूयसां बलीयस्त्वमिति
चेत् यदि केवलमेतद्वचनमात्रविरोधेन तेषामप्रामाण्यं तदा स्यादयं दोषः
पुराणानां परस्परविरोधेन सर्वेषामविशेषेण प्रामाण्येऽनुपपन्ने सर्वाप्रामाण्या-
दपि कतिपयप्रामाण्यसिद्ध्यनुगुणनिर्वाहे न्याय्ये सति कस्याप्रामाण्यं कस्य च
प्रामाण्यमित्यपेक्षायां विषयव्यवस्थामात्रपरत्वादस्य वचनस्य, अतोऽनेन
सत्त्वादिमूलत्वे ज्ञापिते सत्यदुष्टमूलैः प्रबन्धैर्दुष्टमूलप्रबन्धबाधः, अतो न
भूयसां बलीयस्त्वनयेन तद्वचनबाधः, भगवत्प्रतिपादकपुराणेभ्यो विधिशि-
वप्रतिपादकपुराणबाहुल्यात्तत्प्राबल्यमिति[1] चेत् इदं तावद्वचनमबाधितम्
इह भूयसां बलीयस्त्वनयानवतारात् एवं बाधकरहितेनानेन वचनेन सत्त्वा-
दिमूलत्वे पुराणानामवगते सति दुष्टमूलपुराणबाहुल्यमदुष्टमूलमेक-
मपि पुराणं बाधितुं प्रभवति, न हि भ्रान्तपुरुषसहस्रवचनैरेकस्याभ्रान्तस्य
वचनं बाध्यते, अतो भगवत्प्रतिपादकत्वेन सत्त्वमूलाच्च कारणाद्दोषः, तथा
पुराणान्तराणामिवास्य बाधकप्रत्ययो न दृश्यते नारायणस्यैव परमकार-
णत्वप्रतिपादनात्, प्रत्यक्षश्रुतिषु हि नारायणस्यैव सामान्यशब्दविशेष-
शब्दाभ्यां परमकारणत्वमुक्त्वा "न चास्य कश्चिज्जनिता न चाधिपः" "न
तत्समश्चाभ्यधिकश्च दृश्यते" "न ह्येतस्मादिति नेत्यन्यत्परमस्ति"
"यस्मात्परं नापरमस्ति किंचि"दिति कारणभूतात्तस्मादन्यस्य परत्वं च
निषिध्यते "न ब्रह्मा नेशानः" "तत्र ब्रह्मा चतुर्मुखोऽजायत" 'त्र्यक्षः शूल-
पाणिः पुरुषो जायत "ततो रुद्र उपस्त्वेष नृम्णः" "विरूपाक्षाय ब्रह्मणः
पुत्राय" "अजस्य नाभावध्येकमर्पितं" "स प्रजापतिरेकः पुष्करपर्णे समभवत्"
"यथाब्जपद्मादभवन्महात्मा प्रजापति"रिति, ब्रह्मशिवयोश्च नारायणा-
दुत्पत्तिः श्रूयते, लैङ्गे तु ब्रह्मविष्णू प्रति "युवां प्रसूतौ गात्रेभ्यो मम पूर्वं सना-
तना'विति रुद्रोक्त्या रुद्राद्धरिचतुर्मुखयोरुत्पत्त्यवगमात्पुराणान्तराणां श्रुति-
विरोधः स्फुटतरः, यद्यपि कैश्चित् त्रयाणां देवानां साम्यमैक्यं चाभ्युपगतं

१ प्रामाण्यमिति चेदिति पाठः ।

तथाऽप्ययं विरोधो दुष्परिहरः तुल्यानामेकीभूतानामपि तेषामुत्पत्तिप्रतिपादने भगवतश्चतुर्मुखशिवयोरुत्पत्तिश्रवणाद्रुद्रादितरयोरुत्पत्तेः क्वचिदपि वाक्ये श्रवणाभावाच्च कारणवाचिशिवादिशब्दानामाकाशादिशब्दानामिव कार्यतयाऽवगतप्रसिद्धरुद्रादिपरत्वाभावाच्च "सर्वे विष्णुमया वेदाः सर्वे विष्णुमया गुणाः। न हि विष्णुसमा काचिद्गतिरन्या विधीयते। इत्येवं सततं वेदा गायन्ते नात्र संशय इति"लैङ्गादावपि वेदानां भगवत्परत्वप्रतिपादकत्वाभ्युपगमाच्च, अतो नारायणस्यैव परमकारणत्वपराभिः प्रत्यक्षश्रुतिभिर्बाधकप्रत्ययवद्भिः पुराणान्तरेभ्यो वैलक्षण्यं स्फुटं, तथा नारायणमेव परमकारणं प्रतिपादयद्भिर्मन्वा[1]दिधर्मशास्त्रैरप्यैकार्थ्यं स्पष्टम् "आपो नारा इति प्रोक्ताः" "तद्विसृष्टः स पुरुषः" "विद्यात्तु पुरुषं परं" "नारायणः परो ऽव्यक्ता"दित्यादिभिर्नारायणस्यैव हि कारणत्वं तैरुच्यते, पुराणान्तराणि तु धर्मशास्त्रविरुद्धानि, तथा वक्तृवैलक्षण्यं च प्रत्यक्षश्रुतिसिद्धं "स होवाच व्यासः पाराशर्यः" इति, अत्र पराशरात्मजत्वेन हि व्यासोत्कर्ष उच्यते, तथा लैङ्गेऽपि पराशरवैलक्षण्यं प्रतीयते यथा तत्र द्वितीयेऽध्याये "पराशरस्यावतारो व्यासस्य च शुकस्य च। विनाशं राक्षसानां तु कृतं वै शक्तिसूनुने"ति अत्र पराशरस्यावतार इत्युक्तिर्हि प्रकर्षातिशयार्था, अन्यथा पराशरस्य चोत्पत्तिर्व्यासस्य च शुकस्य चेत्यपि हि वक्तुं शक्यते पुलस्त्यवसिष्ठवरदानलब्धपरदेवतापारमार्थ्यज्ञानवत्त्वं च महद्वैलक्षण्यं, वरदाने सत्येतत्पुराणप्रामाण्यं तत्प्रामाण्ये तत्प्रतिपन्नवरलाभसत्यत्वमित्यन्योन्याश्रय इति न वाच्यं, वरलाभवचनस्य पराशरो न लब्धवर इति बाधकप्रत्ययाभावेन स्वतस्सिद्धप्रामाण्यस्यानपोदितत्वाल्लैङ्गे च देवतापारमार्थ्यज्ञानलाभः पराशरस्यावगम्यते यथा तत्र द्वितीये ऽध्याये "देवतापारमार्थ्यं च विज्ञानं च प्रसादतः। पुराणकरणं चैव पुलस्त्यस्याज्ञया गुरो"रिति तत्रैव त्रिषष्टितमेऽध्याये ।

"अथ तस्य पुलस्त्यस्य वशिष्टस्य च धीमतः ॥
प्रसादाद् वैष्णवं चक्रे पुराणं वै पराशरः" ।

इति, तदनन्तरं च "षट्प्रकारं समास्तार्थसाधकज्ञानसंश्रयम्। दक्षसा-

१ मानवादिधर्मशास्त्रैरिति तु युक्तः पाठः।

इत्यममितं सर्ववेदार्थसंयुत"मित्यनेनास्य पुराणरत्नस्य सर्ववेदार्थसंयुतत्वमत एव समस्तपुरुषार्थसाधकज्ञानप्रसाधकत्वं चोच्यते, अतो वक्तृवैलक्षण्यं प्रबन्धवैलक्षण्यं च पुराणान्तरमिति तद्रूपद्वयम् इति, इदं चापरं सुमहद्वैलक्षण्यं यत्सामान्यप्रश्नपूर्वकविशेषनिष्ठप्रतिवचनरूपत्वं "सोऽहमिच्छामि धर्मज्ञ? श्रोतुं त्वत्तोयथा जगत् । बभूव भूयश्च यथा महाभाग भविष्यति ।

यन्मयं च जगद् ब्रह्मन्? यतश्चैतश्चराचर"मित्यादिना, सामान्येन पृष्टे "विष्णोः सकाशादुद्भूत"मिति विशेषनिष्ठं प्रतिवचनं ह्यवगम्यते, विशेषे पृष्टे सति प्रतिवचनस्य पृष्टविशेषपक्षपातेन तदुत्कर्षकथनं प्रशंसामात्रपरं न तत्त्वपरमिति शङ्कनीयं स्यात्, सामान्येन पृष्टे सति प्रतिवचनमर्थवशाद्विशेषे पर्यवसितमिति तत्त्वपरत्वमेव स्यात्, अतश्च "तस्माद्भवन्तं पृच्छामः सूत? पौराणिकाऽद्य तु पुराणसंहितां पुण्यां लिङ्गमाहात्म्यसंयुता"मिति विशेषनिष्ठप्रश्नोपक्रमतत्प्रतिवचनरूपपुराणान्तरेभ्यः प्रकर्षातिशयः स्पष्टतमः, एतत्पुराणार्थश्च लैङ्गादिषु क्वचित् क्वचिदङ्गीक्रियते यथा लैङ्गे द्वितीये पुराणार्थानुक्रमणे "सर्वावर्तेषु विष्णोश्च जननं लीलयैव तु । विष्णोः प्रसादाज्जिष्णोश्च विष्णोश्चैव तु संभवः ॥ तत्र, "लीलया चैव कृष्णेन स्वकुलस्य च संहृतिः । जरकास्यच्छलेनैव गमनं स्वेच्छयैव तु" इति भगवदवतारस्य भूलोकपरित्यागस्य च लीलामात्रनिबन्धत्वं हि तत्रोच्यते, अत एव एतत्पुराणार्थस्यान्यत्राभ्युपगन्तव्यत्वादप्रकम्प्यत्वमवगम्यते । तर्ह्येतदेकार्थ्यान्यपि पुराणानि प्रमाणानि स्युरिति चेन्न कार्त्स्न्येनाविरुद्धत्वाभावात्, भगवदुत्कर्षप्रतिपादकांशस्तु आग्रहासंभवादादरणीय इति पूर्वमेवोक्तम्, अस्य च पुराणस्य कार्त्स्न्येनानाग्रहमूलत्वं चोपक्रमगतप्रश्नस्वभावादवगतमिति चोक्तम्, अतोऽन्यत्र बहुग्रहैरप्यादरणीयस्वोक्तार्थत्वमप्रकम्प्यताहेतुः । किञ्च पुराणान्तरेष्विवास्य पुराणस्य न स्वव्याहतार्थप्रतिपादकत्वं दृश्यते कार्त्स्न्येन भगवत्प्रकर्षस्यैवावगमात्, पुराणान्तरेषु व्याघातः प्रतीयते, यथा लैङ्गे "युवां प्रसूतौ गात्रेभ्यो मम पूर्वं सनातनौ । अयं मे दक्षिणे पार्श्वे ब्रह्मा लोकपितामहः । वामपार्श्वे च मे विष्णुर्विश्वात्मा हृदयोद्भवः" इति, तत्र "ततः प्रहृष्टमनाः प्रणिपत्य महेश्वरम् ।

Digitized by Google

प्राह नारायणो देवः सलिङ्गं लिङ्गवर्जितम् ।
यदि प्रीतिः समुत्पन्ना यदि देयो वरश्च नो ॥
भक्तिर्भवतु नो नित्यं त्वयि चाव्यभिचारिणी" ।

इति हरिविरिञ्चयोः शिवादुत्पत्तिस्तदाऽऽराधनवरवरणादिकमुक्तं तत्र, क्वचिच्च

त्वत्कोपसंभवो रुद्रस्तमसा च समावृतः ।
त्वत्प्रसादाज्जगद्धाता रजसा च पितामहः ॥

इति चतुर्मुखशिवयोर्भगवत्प्रसादकोपसंभवत्वमुक्तमिति स्वव्याघातः, न च वसुदेवादेरुत्पत्तिवत्कैलासयात्रादिवच्च रुद्रादुत्पत्तितदाराधनरूपलीलोक्तिरित्यविरोधः पुराणभारतादौ "मनसैव जगत्सृष्टिं संहारं च करोति यः ।

तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः ।
तथाऽपि यो मनुष्याणां धर्मस्तदनुवर्तनम् ॥
कुर्वन् बलवता संधिं हीनैर्युद्धं करोत्यसौ ।
साम चापि प्रदानं च तथा भेदप्रदर्शनम् ॥
करोति दण्डपातं च क्वचिदेव पलायनम् ।
मनुष्यदेहिनां चेष्टामित्येवमनुवर्तते ॥
लीला जगत्पतेस्तस्य छन्दतः संप्रवर्तते ।
ईशन्नपि महायोगी सर्वस्य जगतः प्रभुः ॥
कर्माण्यारभते कर्तुं कीनाश इव दुर्बलः ।
तेन वञ्चयते लोकान् मायायोगेन केशवः ॥
ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवाः" ।

इत्यादिभिरिव तत्र तत्र प्रसक्तापकर्षपरिहारपरवचनादर्शनात्, भारतादिषु दशरथवसुदेवादीनां रामकृष्णाद्यपेक्षया परत्वस्य जगत्कारणत्वादिमुखेन प्रतिपादनाभावादिह भगवदपेक्षया रुद्रपरत्वस्य प्रतिपादनाच्च, अतः स्वव्याघातो दुष्परिहरः ।

न च तथा ऽत्र स्वव्याहतिः प्रतीयत इति, इदं च महद्वैलक्षण्यम् उक्तलक्षणप्रकर्षवतो वैष्णवपुराणस्य कारणदोषबाधकप्रत्ययस्वव्याहति-मत्प्रबन्धान्तरस्य च विरोधे सति पुराणरत्नस्य प्राबल्यमन्येषां च दौर्बल्यं च सुस्पष्टम् । एवं प्रसिद्ध्यतिशयलब्धसजातीयप्रबन्धप्रकर्षवत्त्वात्तत एव नष्टकोशत्वाभावादतिविस्तृततया प्रक्षेपशङ्कारहितत्वादन्यपरोक्तिसिद्धपरिग्रहातिशयवत्त्वात्सामान्यप्रश्नपूर्वप्रतिवचनरूपत्वेनानायहमूलतत्त्वादत एवेदृशवैलक्षण्यरहितकारणदोषबाधकप्रत्ययस्वव्याहतिमत्प्रबन्धान्तराणामेतद्विरोधे सति दौर्बल्यस्यावर्जनीयत्वाच्च श्रीमद्वैष्णवमिदं पुराणं प्रमाणतमम् । एतत्सर्वहेतुजातमभिप्रेत्य प्रधानभूतयुक्तिं कण्ठोक्त्या प्रदर्शयन् तन्मुखेन प्रबन्धवैलक्षण्यं वदन् प्रश्नमवतारयति—

मू० अथ ब्रह्मस्वरूपविशेषतद्विभूतिभेदप्रकारतदाराधनस्वरूपफलविशेषाश्च पृष्टाः, ब्रह्मस्वरूपविशेषप्रश्नेषु यतश्चैतच्चराचरमिति निमित्तोपादानयोः पृष्टत्वात् यन्मयमित्यनेन सृष्टिस्थितिलयकर्मभूतं जगत्किमात्मकमिति पृष्टं, तस्य चोत्तरं "जगच्च स इति, इदं च तादात्म्यमन्तर्यामिरूपेणात्मतया व्याप्तिकृतं, न तु व्याप्यव्यापकयोर्वस्त्वैक्यकृतं यन्मयमिति प्रश्नस्योत्तरत्वाज्जगच्च स इति सामानाधिकरण्यस्य, यन्मयमिति मयट् न विकारार्थः पृथक् प्रश्नवैयर्थ्यात् नापि प्राणमयादिवत् स्वार्थिकः, जगच्च स इत्युत्तरानुपपत्तेः ॥ १ ॥

टी० "तच्चे"ति, पुलस्त्यवसिष्ठवरप्रदानलब्धपरदेवतापारमार्थ्यज्ञानवत इत्यत्र देवतापारमार्थ्य-शब्देन तमः कार्यं धर्म्यन्तरत्वेन धर्म्यन्तरस्य प्रतीतिरूपं विपरीतज्ञानं व्यावर्त्तितम्, अनेन देवतापारमार्थ्यं चेति वचनं स्मारि[1]तं, प्रशंसार्थेन मतुप्प्रत्ययेन रजःकार्यं प्रकारान्तरोपेतस्य तद्विरुद्ध-

१ स्फोरितमिति पा० ।

प्रकारान्तरविशिष्टताप्रतीतिरूपमन्यथाज्ञानं व्यावर्त्तितम्, अनेन यथावदि-त्यस्यार्थः सूचितो भवति, देवता-शब्देन कर्मणा उपासनेन वा आराध्यत्वं फलप्रदत्वं च विवक्षितम्, अनेन सविशेषत्वसिद्धिः, यथावदिति प्रकारकथ-नेनापि सविशेषत्वसिद्धिरिति वरलाभकथनं सविशेषत्वोपपादकमित्य-भिप्रायः, भगवच्छब्देन ज्ञानवत्त्वमुक्तं, वरलाभात्तद्दातिशयसिद्धिः, सोऽहमि-त्यादि सोऽहं-त्वयैव सर्वविद्यासु शिक्षितपूर्वोऽहमिति भावः। धर्मज्ञ-विशेषो ऽस्ति न सतां शिष्यपुत्रयोरित्येवं रूपधर्मज्ञ। यद्वा "आनृशंस्यं परो धर्म" इति धर्मज्ञ आनृशंस्यमाश्रितसंरक्षणपरत्वम् आश्रितेष्वानृशंस्यतेति वचनात् महाभाग? परिपूर्ण कृत्यं हि परसंरक्षणं किंचित्कारमप्यनपेक्ष्य रक्षकत्वमेवेति भावः, यथायतो बभूव ब्रह्मरुद्रादिषु कः कारणमिति ज्ञातुं यत इति प्रश्नः, किं विवर्ताधिष्ठानत्वं कारणत्वम्? उत परिणामित्वं? तत्रापि किं सद्वारकपरिणामित्वमुताद्वारकपरिणामित्वमिति प्रकारभेदेन जिज्ञा-सया यथेति प्रश्नः, कल्पभेदेन सृष्टिवैषम्यशङ्कया भविष्यतीति प्रश्नः वृश्चिकस्य गोमयवृश्चिके।पापानकत्वदर्शनात्, कल्पभेदेन उपादानादिभे-दशङ्का ह्युपपद्यते, तत्रापि यतोयथेतिपदयोः पूर्ववदर्थः, यतो यथा बभू-वेति एकप्रश्नत्वशङ्का यन्मयमिति प्रश्नान्तरव्यवधानेन निरस्यते, यथा कारणं ज्ञातव्यं तथा सृष्टिप्रकारोऽपि पृथग् ज्ञातव्य इति ज्ञापनार्थं ज्ञातव्यत्वे-ऽपि प्राधान्यद्योतनाय प्रकारप्रश्नः पूर्वमेव कृतः, यत इति हेतौ पञ्चमी अतो निमित्तोपादानयोस्सन्त्वेण प्रश्नः, अन्तः स्थित्याद्युपयुक्त आत्मशरीर-भावप्रश्नः "यन्मय"मिति, मयट्प्रत्ययः प्राचुर्यार्थे:, अनेन व्याप्तिर्दर्शिता व्याप्याद्व्यापकप्राचुर्यं हि घटाकाशे दृष्टम् आत्मतया हि व्याप्तिः, आत्म-त्वं च धारकत्वम् अतोऽन्तर्यामिकृतसत्ताऽनुवृत्तिलक्षणस्थितिप्रश्नः फलितः यन्मयं-येनान्तर्यामिणा धारकेण प्रचुरं जगत्स्थितमित्यर्थः उक्तो भवति, अन्तःप्रविश्य प्रशासनेन धारकत्वं स्थितिहेतुत्वमिति हि प्रागेव विशदीकृतं चकारात् बहिर्भूतपोषकारिकृता पोषणादिलक्षणा स्थितिर्मातापित्रादिभिः कार्या इष्टप्रापणानिष्टनिवारणलक्षणा स्थितिश्च पृष्टा भवति, यत इत्यु-पादनस्यापि पृष्टत्वात् मयट् प्राचुर्यार्थ एव।

न च गोबलीवर्दन्यायेन यत इति पञ्चम्यर्थः सङ्कोचयितव्यः, बलीवर्दशब्दवत् मयटोऽनन्यथासिद्धत्वाभावात्सङ्कोचकत्वानुपपत्तेः पदान्तरार्थपरिजिहीर्षया पदान्तरार्थसङ्कोचो गोबलीवर्दनय इति हि न्यायविदः अत्र तु मयटोऽर्थान्तरसम्भवाचायं सङ्कोचकः, यत इति पदं निमित्तमुपादानं च बोधयितुं शक्तं स्थितिप्रश्नोऽपेक्षितश्च अतोऽपेक्षितविधेरनपेक्षितं विधानं दुर्बलं "यतो वा इमानीत्यादि श्रुतावपि यत इति पदेनैव निमित्तोपादानयोरुक्तत्वाच्छ्रुतिच्छायानुविधानाच्च यत इति तन्त्रेण प्रश्न इति. यन्मयमिति स्थितिप्रश्न एव क्रियते, अर्थान्तरस्वीकारे अपेक्षितावचनमनपेक्षितवचनं च स्यात् । नापि स्वार्थिकः मयट्, प्रत्ययस्यार्थवत्त्वे संभवति तत्परित्यागस्यान्याय्यत्वात्, अतो यथोक्त एवार्थः, लयस्थानप्रश्नो लयकारप्रश्नश्च अनधीतशाखान्तरेषु स्थानभेदप्रकारभेदशङ्कया कृतः, देवतान्तरस्य लयस्थानत्वं तत्रापि सद्वारकाद्वारकत्वकार्यभ्रमनिवृत्तिरूपताख्यप्रकारभेदश्च हि शङ्काऽऽस्पदं भवति, भूतभविष्यत्प्रश्नश्च कल्पभेदेन लयस्थानप्रकारभेदशङ्कया कृतः, चकारात् लयकर्तृप्रश्नश्च सूचितः, स च कर्तृभेदशङ्कानिबन्धनः स्वरूपप्रश्नश्लोकद्वयं व्याचिख्यासितश्लोकापेक्षितत्वेनोदाहृत्य आदि–शब्देन प्रश्नान्तरपरश्लोकाः क्रोडीकृता विष्णोस्सकाशादिति श्लोकस्यार्थान्तरप्रश्नोत्तररूपत्वशङ्काव्युदासार्थं तेषां श्लोकानां अर्थं संग्रहेणाह "अत्रे"ति. ब्रह्मस्वरूपेति स्वरूप–शब्दो विभूत्यादिव्यावर्तकः, स्वरूपविशेषशब्दो ब्रह्मादिव्यावर्तकः, विभूतिभेदानां प्रकारो विभूतिभेदप्रकारः, स च ज्योतिश्चक्रभुवनकोशादिप्रश्ने ऽन्तर्गतः, तत्र वर्णाश्रमधर्मादिप्रश्नेन तदाराधनस्वरूपं पृष्टं प्रतिवचने फलविशेषोक्तिदर्शनात्, प्रतिवचनप्रकारेण प्रश्नार्थो विज्ञायत इति नीत्या फलविशेषश्चार्थतः पृष्टो भवतीति पूर्वोक्तेषु प्रश्नेष्वन्तर्भावित इत्यभिप्रायेण फलविशेषाश्च पृष्टा इत्युक्तं, सप्रयोजनमाराधनं पृष्टमिति तत्र तदन्तर्भावः । अयमेवार्थः सकलश्रुतीतिहासपुराणानां प्रतिपाद्य इति भावः । ततः किं प्रस्तुतश्लोकार्थस्येत्यपेक्षायां यन्मयमिति पदस्यार्थं सोपपत्तिकमाह "ब्रह्मस्वरूपे"ति, सृष्टिस्थितिलयकर्मभूतमिति पदं सृष्टिप्रलययोरुक्तत्वेन स्थितिकथनस्यापेक्षितत्वज्ञाप-

नार्थे, स्थितिलय-शब्दाभ्यां रक्षासंहारौ विवक्षितौ स्थितिलययोः प्रयोज्य-व्यापारत्वेन तदाश्रयत्वेन तत्कर्मत्वाभावात् जगतः सृष्टिस्थितिलयकर्मभूतं जगत्स्थित्यर्थं किमात्मकं भवतीति प्रश्नार्थः। ततः किमित्यत्राह "तस्य चे"ति, जगच्च स इति सामाधिकरण्यप्रतिपन्नं तादात्म्यं स्वरूपैक्यलक्षणमाशङ्क्य परिहरति "इदं चे"ति, इदं-सामानाधिकरण्यप्रतिपन्नमित्यर्थः, गगनादौ व्याप्तिमात्रेण तादात्म्यं न दृष्टमिति तद्व्यावृत्त्यर्थम् आत्मत्वं विवृणोति "अन्तर्यामिरूपेणे"ति, अन्तःप्रविश्य नियन्तृत्वं ह्यात्मत्वं व्याप्यव्यापकयोरिति जगद्ब्रह्मणोर्व्याप्यत्वेन व्यापकत्वेन च श्रुतिसिद्धत्वादिति भावः।

न तु वस्त्वैक्यकृतमिति प्रतिज्ञामुपपादयति "यन्मय"मिति, विकारार्थत्वमाशङ्क्य परिहरति "यन्मयमिति मयडि"ति, कुत इत्यत्राह "पृथगि"ति, विकारार्थत्वे उपादानं पृष्टं स्यात्।

न च तत्स्रष्टव्यं यत इति पञ्चम्यन्तपदेन उपादानस्यापि पृष्टत्वात् अतः पृथक् प्रश्नवैयर्थ्यम्।

न च गोबलीवर्दन्यायः, अर्थान्तरसंभवादिति अपेक्षितविधेरनपेक्षितविधानं दुर्बलमिति न्यायश्चाभिप्रेतः। ब्रह्माज्ञानवादिनोऽभिमतं स्वार्थिकत्वपक्षं दूषयति "नापी"ति, न तु भेदाभेदपक्षाभ्युपगतं तत्तु दूषयिष्यते, न ह्यर्थे संभवति निरर्थकत्वाश्रयणमुपपन्नमिति भावः। श्रुतार्थस्वीकारेणाश्रुतकल्पनं ह्युचितं न तु श्रुतपरित्यागः, ब्रह्माज्ञानवादिनाऽभ्युपगतस्य स्वार्थिकत्वस्यासाधारणं दूषणमाह "जगदि"ति, स्वार्थिकत्वपक्षे यदिदं जगत्तत्किमित्युक्तं स्यात् यदिदं जगत्तत्किमित्युक्ते ज्ञातस्य जगद्रूपमात्रस्य प्रष्टव्यत्वायोगात् प्रश्नावैयर्थ्याय जगत्किं सत्यमुत मिथ्ये? ति पृष्टं भवतीत्यभ्युपेतव्यं तत्र मिथ्येत्युत्तरं वक्तव्यं तत्रान्यतराकारोपस्थापके आकारान्तरनिषेधके च शब्दे वक्तव्ये आकारद्वयोपस्थापकं सामानाधिकरण्यमनुपपन्नमित्यर्थः। बाधार्थं सामानाधिकरण्यमिति चेत्तन्नास्ति माता मे वन्ध्येति वत्सामानाधिकरण्यं बाधार्थमिति व्याहतत्वादिति भावः। तर्हि कथमुत्तरं स्यादित्यत्राह—

भू० तदा हि विष्णुरेवेत्युत्तरमभविष्यत् अतः प्राचुर्यार्थे एव

"तत्प्रकृतवचने मयडि"ति मयट्, कृत्स्नं च जगत्तच्छरीर-तया तत्प्रचुरमेव

टी० "तदा ह्री"ति, विष्णुरित्यन्यतराकारोपस्थापकः शब्दः आकारान्तरनिषेधकशब्द एवकारः। साक्षादर्थमाह "अत" इति, अतः—स्वार्थिकत्वविकारार्थत्वयोरनुपपन्नत्वादित्यर्थः। शब्दानुशासनानुमतिं दर्शयति "तदि"ति, प्रकृतं प्रकर्षेण कृतं प्रभूतं प्रचुरमित्यर्थः, अन्नमयो यज्ञः शकटमयी यात्रेति हि तस्योदाहरणम्। किमत्र प्राचुर्यमस्तीत्यत्राह "कृत्स्नञ्चे"ति, अन्तर्बहिश्च व्याप्येत्यादिश्रुतेस्तदुपपन्नमिति भावः। सामानाधिकरण्यस्य शरीरात्मभावनिबन्धनत्वं प्रतिपिपादयिषितमुपसंहरति—

सू० तस्मात्तन्मयमित्यस्य प्रतिवचनं जगच्च स इति, सामानाधिकरण्यं जगद्ब्रह्मणोः शरीरात्मभावनिबन्धनमिति निश्चीयते।

टी० "तस्मादि"ति, तन्मयमित्यस्य प्राचुर्यार्थत्वेन तस्योत्तरत्वाज्जगच्च स इति सामानाधिकरण्यस्य शरीरात्मभावनिबन्धनत्वं, तेन स्वार्थिकत्वनिवृत्त्या तन्मयमिति मयट्प्रत्ययस्य प्राचुर्यार्थत्वमित्यन्योन्याश्रय इति-चेत् नैवं मयट्प्रत्ययस्य स्वार्थिकत्वनिवृत्तेः प्राचुर्यार्थत्वनिर्णयस्य च सामानाधिकरण्यस्य शरीरात्मभावनिबन्धनत्वानपेक्षत्वात् स्वार्थिकत्वं तावदर्थवत्त्वे सम्भवति निरर्थकत्वस्वीकारायोगादपास्तं, जगच्च स इति सामानाधिकरण्येन च अपास्तं स्वार्थिकत्वे सति आकारद्वयोपस्थापकसामानाधिकरण्यस्योत्तरत्वायोगात्, न तु तस्य शरीरात्मभावनिबन्धनत्वायोगात्।

न च सामानाधिकरण्यस्य प्रवृत्तिनिमित्तभूताकारद्वयोपस्थापकत्वं मयट्प्रत्ययस्य स्वार्थिकत्वनिवृत्तिसापेक्षं सामानाधिकरण्यलक्षणस्वभावादेव तस्याकारद्वयोपस्थापकत्वसिद्धेः, अतो मयट्प्रत्ययस्य स्वार्थिकत्वनिवृत्तिः सामानाधिकरण्यस्याकारद्वयोपस्थापकत्वादित्यत्र नान्योन्याश्रयः, एवं स्वार्थिकत्वे व्युदस्ते पृथक् प्रश्नवैयर्थ्येन विकारार्थत्वेऽनुपपन्ने परिशेषाच्च

Digitized by Google

स्थितेः प्रष्टव्यत्वे सति स्थितिस्वाभाव्यादनुशासनानुरोधाच्च मयट्प्रत्ययस्य प्राचुर्यरूपार्थविशेषपरत्वसिद्धिः, ततो जगच्च स इति सामानाधिकरण्यस्य शरीरात्मभावरूपप्रवृत्तिनिमित्तविशेषसिद्धिरिति नान्योन्याश्रयः। एवं सामानाधिकरण्यस्य मृषावाद्यभिमतैक्यपरत्वे मयडानर्थक्यं सामानाधिकरण्यानुपपत्तिश्चेति दूषणद्वयं, स्वरूपैक्यपरत्वेऽर्थविरोधो यन्मयमित्युक्तप्रश्नस्योत्तरत्वानुपपत्तिश्चेति दूषणद्वयं च दर्शितं भवति, स्वोक्तार्थपरत्वानभ्युपगमे दूषणमाह—

सू० अन्यथा निर्विशेषवस्तुप्रतिपादनपरे शास्त्रे ऽभ्युपगम्यमाने सर्वाण्येतानि प्रश्नप्रतिवचनानि न सङ्गच्छन्ते तद्विवरणरूपं कृत्स्नं च शास्त्रं न सङ्गच्छते तथा हि सति प्रपञ्चभ्रमस्य किमधिष्ठानमित्येवंरूपस्यैकस्य प्रश्नस्य निर्विशेषज्ञानमात्रमित्येवंरूपमेकमेवोत्तरं स्यात् जगच्च स इति जगद्ब्रह्मणोरेकद्रव्यत्वपरे च सामानाधिकरण्ये सत्यसङ्कल्पत्वादिगुणैकताननता निखिलहेयप्रत्यनीकता च बाध्येत सर्वाशुभास्पदं च ब्रह्म भवेत्, आत्मशरीरभाव एवेदं सामानाधिकरण्यं मुख्यवृत्तमिति स्थाप्यते।

टी० "अन्यथे"ति, अन्यथा कथं प्रश्नप्रतिवचने स्याताम् इत्यत्राह "तथा हि सती"ति, सामानाधिकरण्यस्य भेदाभेदवाद्यभ्युपगतैकद्रव्यतापरत्वं दूषयति "जगदि"ति, अस्मिन्नपि पक्षे जगद्यन्मयं जगद्यद् द्रव्यमिति पृष्टं स्यात् तदानीं मयड्वैयर्थ्यमस्तीति द्रष्टव्यं, यत इत्युपादानस्य पृष्टत्वात्। अधिकदूषणमाह सत्येतिदिना, सत्यसङ्कल्पेत्यादिना जीवगतदोषः सर्वाशुभेत्यादिना प्रकृतिगतदोषश्च ब्रह्मणि प्रसज्यत इत्युक्तम्। यद्वा उभयलिङ्गकत्वहानिर्विपरीताकारप्राप्तिश्चेत्यर्थः शरीरवाचिपदस्य शरीरिपरत्वे मुख्यत्वं न स्यादित्यत्राह "आत्म शरीरे"ति, स्थाप्यते स्थापयिष्यत इत्यर्थः अनन्तरभावित्वात् स्थाप्यत इत्युक्तम्। एवं प्रकृतश्लोकव्याख्यानोपयिकार्थः

Digitized by Google

प्रपञ्चितः । अथ शास्त्रार्थसंग्रहानन्तरं विस्तरोपक्रमे सप्तश्लोकीं मनस्कार-विषयामवतार्य व्याख्येयश्लोकस्य नमस्कारश्लोकान्तरैः सङ्गतिं दर्शयितुं अविकारायेत्यादीनां षण्णां वाक्यानामार्थानाह—

सू० अतो "विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितं स्थिति-संयमकर्त्ताऽसौ "जगतोऽस्य जगच्च स" इति सङ्ग्रहेणो-क्तमर्थं परः पराणामित्यारभ्य विस्तरेण वक्तुं परब्रह्मभूतं भगवन्तं विष्णुं स्वेनैव

टी० "अत" इति, अतः—प्रश्नप्रतिवचनादिभिः शास्त्रस्य सविभूति-कसगुणवस्तुपरत्वावगमात् सामानाधिकरण्यस्य विशिष्टवस्तुनि मुख्यवृत्त-त्वाच्चेति भावः। अत इत्यस्य व्यष्टिरूपेणावस्थितं च नमस्करोतीत्यनेना-न्वयः । यद्वा शास्त्रवाक्यार्थस्यैवंरूपत्वाद्विष्णोः सकाशादित्यस्य सङ्ग्रहरू-पत्वं, परः पराणामित्यादीनां विस्तररूपत्वं च सिद्धमित्यर्थः । विष्णोः सका-शादित्यत्र सकाशादिति पदं षष्ठ्याः पञ्चम्यर्थत्वसम्पादनार्थं यथा अस्य कृत इत्युक्ते कृते इति शब्दस्य चतुर्थ्यर्थसम्पादनपरत्वं तद्वत् । यद्वा सकाशात् ससङ्कल्पत्वात् काशनं प्रकाशनं सङ्कल्परूपं ज्ञानं तद्वत् इत्यर्थः, अनेन निमित्तत्वसिद्धिः । यद्वा सकाशशब्दः पार्श्ववचनः तेन शरीरमुपलक्षितं "सोऽभिध्याय शरीरात्स्वा"दिति वच्छरीरादित्यर्थः तत्रैव च स्थितमिति लयस्थानप्रश्नस्योत्तरं तत्र स्थितमिति स्थितं—निष्ठाकृतम् अनेन जगतो नित्यत्वमवस्थानामागमापायित्वं च सूचितं लयस्थानप्रश्नस्योत्तरमुक्तम् । अथ लयकर्तृप्रश्नस्य बाह्यस्थितिप्रश्नस्य च उत्तरमाह "स्थिती"ति, जगच्च स इति यन्मयमिति फलितकृत्स्नस्यान्तर्यामिरूपकृतसत्तानुवृत्तिलक्षणस्थितिप्र-श्नस्योत्तरम् । यद्वा यन्मयमिति फलितस्थितिप्रश्नस्यापि स्थितिसंयमकर्त्त-त्वेवोत्तरं जगच्च स इति तु यन्मयमिति कण्ठोक्तस्यार्थस्योत्तरम्, इदं सामानाधिकरण्यमात्मतया व्याप्तिनिबन्धनमिति पूर्वमेवोपपादितम् ।

ननु निष्कर्षकशब्दानां शौक्ल्यादीनां धर्मिपर्यन्तत्वं न दृष्टं यन्मयं जगदित्यनेन जगच्छब्दस्य निष्कर्षकशब्दत्वं दृष्टमिति धर्मिपर्यन्ताभि-

Digitized by Google

धायित्वाभावाज्जगच्च स इति सामानाधिकरण्यमनुपपन्नमिति चेत् उच्यते निष्कर्षकशब्दा हि द्विविधाः नियतनिष्कर्षका वैवक्षिकनिष्कर्षकाश्च तत्र शौक्ल्यादिशब्दा नियतनिष्कर्षकाः, मनुष्यशुक्लादिशब्दा वैवक्षिकनिष्कर्षकाः प्रयोगस्य नियामकत्वात्, अन्यथा निष्कर्षकानिष्कर्षकविभागोऽपि नोपपद्यते, तथा जगच्छब्दोऽपि वैवक्षिकनिष्कर्षक इति तत एव यन्मयमिति वैयधिकरण्येन प्रश्नस्य जगच्च स इति सामानाधिकरण्येनोत्तरमर्थभेदाभावादुपपन्नं, शुक्लगुणस्य आश्रयः कः इति प्रश्नस्य शुक्लः पटः इत्युत्तरवत् एवं संक्षेपेणोक्तस्य वक्ष्यमाणमहाविस्तरस्यार्थस्यैव विस्तररूपेण श्लोकैर्नमस्कारः क्रियत इति नमस्कारश्लोकसङ्गतिः स्वेनैव रूपेणावस्थितम्—

सू० रूपेणावस्थितमविकारायेति श्लोकेन प्रथमं प्रणम्य तमेव हिरण्यगर्भस्यावतारशङ्कररूपचिन्मूर्त्तिप्रधानकालक्षेत्रज्ञसमष्टिव्यष्टिरूपेणावस्थितं च नमस्करोति

न नु प्रकृत्यादिविशिष्टमित्यर्थः, परब्रह्मणो हि हेयसंबन्धाभावो न तु विष्णोरिति शङ्कायां "विष्णुनामा स वेदेषु" "समस्तहेयरहितं विष्ण्वाख्यं परमं पद"मिति वचनात् ब्रह्मण एव विष्णुशब्दवाच्यत्वाद्विष्णोरेव भगवच्छब्दवाच्यत्वाच्च विष्णोर्हेयसंबन्धोऽनुपपन्न इत्यभिप्रायेण परब्रह्मभूतमित्यादिविशेषणमुक्तम् । अविकाराय विकारशब्दो धर्मिपरो धर्मपरश्च "षोडशकश्च विकार" इत्यादिप्रयोगात् स्वयं कस्यचिद्विकारभूतः कर्मभूतो[१] न भवतीत्यविकारः, अनेन कार्याचिद्व्यावृत्तिः । यद्वा विकारोऽवस्था महत्त्वाहङ्कारत्वादिः नित्यं तत्संबन्धिविरहादविकारः, अतो विकारवती प्रकृतिरविकारपदेन व्यावर्त्यते एवं तत्पुरुषबहुव्रीहिभ्याम् अविकारायेति पदेन कार्यकारणरूपोभयावस्थाचिद्व्यावृत्तिः, शुद्धायेति बद्धव्यावृत्तिः, नित्याय शुद्धत्वेन नित्याय अन्यथा अविकारायेत्यनेन पुनरुक्तिः स्यात्, नित्यपदं शुद्धिं विशिंषदेव शुद्धिमतोऽस्तु विशेषणं यथा महोदार इत्यत्र महच्छब्द औदार्यं विशिंषन्नेव दातुर्विशेषणं तद्वत्, अतो मुक्तव्यावृत्तिः, परमात्मन इति नित्यमुक्तव्यावृत्तिः

१ कार्यभूतो न भवतीति पा० ।

ते हि परवन्तः न तु परमाः प्रधानपुरुषव्यक्तकालानां परममिति वक्ष्यमाणत्वादविकारायेत्यादिपदचतुष्टयेन प्रधानपुरुषाव्यक्तकालव्यावृत्तिरिति केचित् । निमेषाद्यवस्थकालस्य व्यक्तस्याप्यविकारपदव्यावर्त्तित्वात्, तथैवविध्यस्यैव प्रामाणिकत्वाद्विशेषणानां तद्भावर्त्तनसमर्थत्वाच्च यथोक्तानामेवार्थानां व्यावर्तितत्वमुचितं विलक्षणविग्रहवत्तयाऽपि समस्तवैलक्षण्यमाह "सदैकरूपरूपाये"ति, प्रथमरूप—शब्दः स्वभाववाची एकस्वभावमित्यर्थः, परव्यूहविभवादिसर्वावस्थासु सकलहेयप्रत्यनीकत्वमङ्गलास्पदत्वादिध्येयत्वादिस्वभावोऽप्रच्युत इत्यर्थः । यद्वा एकरूपं—दिव्यात्मस्वरूपेण समानस्वभावं, तेनापि हेयप्रत्यनीकत्वादिसिद्धिरेभिः पदैरौत्त्यानन्दमयाधिकरणान्तरादित्यविद्यार्था विवचिताः,पूर्वोक्तमात्मत्वं न मृदात्मकोघट इतिवद्भवतीति तद्वैशद्यमवयवशक्त्या क्रियते विष्णुशब्देन सर्वजिष्णवे इति पदेन च, पदद्वयेन नृपनभोव्याप्तिः, अन्तःप्रविश्य नियन्तृत्वं हि शरीरित्वम्, अत एवमात्मत्वं विवृतं भवति विष्णुशब्दस्य रूढत्वाद्देवताविशेषनिर्णयश्च सिद्धः । यद्वा विष्णुशब्देनैव नियमनपर्यन्तव्याप्तिरुक्ता, व्याप्तिकृततद्गतदोषस्पर्शशङ्कां व्युदस्यति "सर्वजिष्णवे"इति, कथं विष्णोः कारणत्वं हिरण्यगर्भादीनां हि सृष्ट्यादिकारणत्वमवगम्यत इत्यत्राह "नम" इति, तत्तच्छरीरको विष्णुरेव सृष्ट्यादिकं करोतीत्यर्थः, रक्षार्थे सर्वभूतानां विष्णुत्वमुपजग्मिवानित्युक्तविभवाख्यावतारविग्रहद्वारा भगवत्पर्यन्तो हरिशब्दः हिरण्यगर्भशङ्करशब्दौ जीवद्वारा भगवत्पर्यन्ताविति "ब्रह्माद्याः सकलादेवा मनुष्याः पशवस्तथा विष्णुमायामहावर्तमोहान्धतमसावृताः" इति हिरण्यगर्भादिषु च ब्रह्मकर्मात्मिका द्विधा इति हिरण्यगर्भो भगवानित्यारभ्य मूर्त्तमेतद्धरेरूपं भावनात्रितयात्मकम् "अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः" इत्याद्येतत्प्रबन्धस्थश्लोकतत्पर्यानुरोधात् "एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ तदादर्शितपन्थानौ सृष्टिसंहारकारकौ । तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित्क्वचिदि"ति भारतादिवचनैकार्थ्याच्चनिश्चीयते,हिरण्यगर्भादिसामानाधिकरण्यं व्याप्तिकृतमिति सूचयति"वासुदेवाये"ति,ब्रह्मशिवमध्यस्थोऽप्यव-

च्युतस्वभाव इत्याह "तारये"ति, यद्वा तेषु त्रिष्वप्ययमेव मोक्षप्रद इत्यर्थः। अथ कस्मादुच्यते तारं यस्मादुच्चार्यमाण एव गर्भजन्म जरामरणसंसारमहाभयात्तारयति तस्मादुच्यते तारमिति श्रुतेः, "ब्रह्मविष्णुशिवा ब्रह्मन्? प्रधाना ब्रह्मशक्तय इत्यादिभिः विष्णोः परं तत्त्वं विष्णोश्चतुर्मुखादिसाम्यं च न शङ्कनीयं, शक्तिरपृथक्सिद्धविशेषणं तच्च धर्मिण्यसमानविभक्तिनिर्दिष्टे धर्मिपर्यन्तस्यापि शब्दस्य धर्ममात्रपरत्वं दृष्टं पटस्य शुक्ल इत्यादिषु, तथा विष्णुशब्दो विशेषणभूतविग्रहमात्रपरः, असमानविभक्तिना ब्रह्मशब्देन धर्मिणः पृथक् निर्दिष्टत्वात्, ब्रह्मणः शक्तयो ब्रह्मशक्तयः अतो ऽसमानविभक्तिनिर्दिष्टत्वमिति। यद्वा भगवतो देवमनुष्यादिशब्दव्यपदेशवत् शक्तिविभूत्यादिशब्दव्यपदेशोऽपि विभूतिसाजात्यादिति, यथाऽऽहुः श्रीवत्साङ्कमिश्राः "सजातीयस्तेषामिति तु विभवाख्यामपि भज" त्विति, अतो यथोक्त एवार्थः। अथ केवलप्रकृतिकारणव्यावृत्त्यर्थं प्रकृतिविशिष्टपरमात्मानं नमस्करोति "एकानेके"ति, कारणावस्थायामेकः कार्यावस्थायामनेकः। अथ धीस्थां कार्यावस्थामाह "स्थूले"ति, तथा बुद्धिस्थां कारणावस्थामाह "अव्यक्ते"ति, तत्राप्यप्रच्युतस्वस्वभावत्वमाह "मुक्तिहेतव" इति, अथ कालविशिष्टमाह "सर्गे"ति, कालस्य वक्ष्यमाणविशेषणोपपत्तेः प्रकरणस्य विशिष्टपरत्वाद्विशेषणान्तरविशिष्टतायाः प्रतिपादितत्वेन कालविशिष्टताकथनपारिशेष्यात् तदप्रतिपादने अपेक्षितविध्यभावप्रसङ्गात् केवलं ब्रह्मस्वरूपकारणपरत्वे अण्डान्तर्गतसर्गादेरुक्तत्वादण्डबहिर्भूततत्त्वसर्गादेर्वक्ष्यमाणत्वाच्च पौनरुक्त्यप्रसङ्गाद्विस्तरे च प्रधानपुरुषव्यक्तकालानां "व्यक्तं विष्णुस्तथाऽव्यक्तं" "पुरुषः काल एव च" तथा पुरुषरूपेण कालरूपेण च स्थितं ब्रह्मा दक्षादयः काल इत्यादिभिर्व्यक्ताव्यक्तादिभिस्सह वक्ष्यमाणत्वादयं श्लोकः कालपर एव, अचिद्विशिष्टवाचिश्लोकानन्तर्यादस्य श्लोकस्य कालपरत्वमुचितम्। उत्तरश्लोकः समष्टिजीवपरव्यष्टिजीवपरश्लोकसाहचर्यात् कालस्य सर्गस्थितिविनाशमूलभूतत्वं ब्रह्मा दक्षादयः कालः विष्णुर्मन्वादयः कालः रुद्रः कालोऽन्तकाद्याश्चेत्यादिषु सिद्धं, जगन्मयः—अवच्छेदकतया अवच्छेद्यतया च जगत्प्रचुरः। अथ क्षेत्रज्ञसमष्ट्यात्मनाऽवस्थितं नमस्करोति "आधारभूतमि"ति, अचेतनस्य चेतनःस्व-

रूपेणाधारभूतः "एवमेवैता भूतमात्रा प्रज्ञामात्रास्वर्पिताः" जीवभूतां महाबाहो ययेदं धार्यते जग"दिति वचनात् अणीयस्त्वं प्रकृतेरपि व्यापनयोग्यसूक्ष्मत्वम्। यद्वा विकासाणुस्वरूपेश्चेत्युक्तप्रकारेण सर्गदशायामिव ज्ञानविकासाभावादणीयस्त्वमेवेत्यर्थः। सर्वभूतस्थं भवतीति भूतं पृथिव्यन्तेषु सर्वभूतेष्ववस्थितम्। अनन्तरं क्षेत्रव्यष्टिविशिष्टं नमस्करोति "ज्ञाने"ति, हिरण्यगर्भेत्यादिभाष्ये निर्दिष्टेष्वर्थेष्वयं श्लोकः किं विशिष्टपरमात्मपर इति शङ्कायां समासान्तर्गतं प्रस्तुतश्लोकार्थं विविच्य दर्शयति—

मू० तत्र ज्ञानस्वरूपमित्ययं श्लोकः क्षेत्रज्ञव्यष्ट्यात्मनाऽवस्थितस्य परमात्मनः स्वभावमात्र तस्मान्नात्र निर्विशेषवस्तुप्रतीतिः, यदि निर्विशेषज्ञानरूपब्रह्माधिष्ठानभ्रमप्रतिपादनपरं शास्त्रं, तर्हि "निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः कथं सर्गादिकर्तृत्वं ब्रह्मणो ऽभ्युपगम्यते", इति चोद्यं "शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः यतो ऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः भवन्ति तपतां श्रेष्ठ? पावकस्य यथोष्णते"ति परिहारश्च न घटते ॥

टी० "तत्रे"ति, परमात्मनः सद्वारक एव प्रमाऽन्वय इत्यर्थः। ततः किमित्यत्राह "तस्मादि"ति, निर्विशेषज्ञानपरत्वे प्रश्नोत्तरवरलाभकथनानुपपत्तिमुखेनोपक्रमविरोध उक्तः। अथोपरितनाऽध्यायगतचोद्यपरिहारानतुगुणत्वमुच्यते "यदी"ति, यद्वा शास्त्रारम्भोपयोगिप्रश्नोत्तरानुपपत्तिरुक्ता इदानीमेतत्प्रश्नोत्तरविशेषानुपपत्तिरुच्यते "यदी"ति, पूर्वाध्याये जुषन् रजोगुणमित्यादिना गुणान्वये कथितेऽपि निर्गुणस्येति चोदयतोऽयमभिप्रायः गुणान्वयस्य स द्वारकत्वात् स्वयं निर्गुण इति निर्विशेषपरत्वे अप्रमेयस्येत्यादिपदवैयर्थ्यं, निर्गुणस्येति पदेनैव निर्विशेषत्वसिद्धेः परिपूर्णत्वादिगुणानभ्युपगमाच्च अप्रमेयादिपदान्तरसमभिव्याहार एव निर्गुणशब्दोपस्थापितनिषेधस्य संकुचितविषयत्वसाधकः। न घटत इति सर्गाद्या भावशक्तय इति सर्व-

शक्तियोगेन चोद्यस्य परिहारान्निर्विशेषपक्षाननुगुणत्वमिति भावः। तर्हि कथं चोद्यपरिहारौ स्यातामित्यत्राह—

सू० तथा हि सति ब्रह्मणो निर्गुणस्य कथं सर्गादिकर्तृत्वं? ब्रह्मणो न पारमार्थिकः सर्गः, अपितु भ्रान्तिकल्पित इति चोद्यपरिहारौ स्याताम् उत्पत्त्यादिकार्यं सत्त्वादिगुणयुक्ताऽपरिपूर्णकर्मवश्येषु दृष्टमिति सत्त्वादिगुणरहितस्य परिपूर्णस्याकर्मवश्यस्य कर्मसंबन्धानर्हस्य कथं सर्गादेः कर्तृत्वमभ्युपगम्यते? इति चोद्यं दृष्टसकलविसजातीयस्य ब्रह्मणो यथोदितस्वभावस्यैव

"तथा हि सती"ति, निर्गुणस्य ब्रह्मण इत्यनेन पदान्तरवैयर्थ्यमभिप्रेतं, निर्विशेषस्य कर्तृत्वानुपपत्तिचोद्ये कृते कर्तृत्वस्य पारमार्थ्ये सति हि तदनुपपत्तिः, अपरमार्थत्वात्तु घटस्वमेव भूषणमिति परिहारो वक्तव्य इत्यर्थः किमर्थाविमौ। चोद्यपरिहारौ यद्ययमर्थो न प्रतिपाद्य इति शङ्कायां स्वयमेव तच्चोद्यपरिहारशरीरमाह "उत्पत्त्यादी"ति, निर्गुणस्येत्यादिविशेषणानां विपरीताकारैः कर्तृत्वस्य व्याप्तिं कथमित्यनेनाभिप्रेतां दर्शयति सत्त्वादिगुणयुक्तस्येत्यादिना, सत्त्वादिगुणयुक्तापरिपूर्णकर्मवश्यत्वानि निर्गुणत्वादीनां यथाक्रमं विपरीताकाराः, अमलात्मन इत्यस्य विपरीताकारोऽपि कर्मवश्येत्यनेनार्थसिद्धः अमलात्मत्वममलस्वभावत्वं कर्मसंबन्धानर्हत्वं तद्विपरीताकारः कर्मसंबन्धार्हत्वं, तच्च कर्मवश्यशब्देनार्थसिद्धं कर्मसंबन्धार्हत्वकार्यं हि कर्मवश्यत्वम्। निर्गुणस्येत्यादिपदानां यथाक्रममर्थमाह सत्त्वादिगुणरहितस्येत्यादिपदैः, कर्मसंबन्धानर्हस्येत्यनेनामलात्मन इति पदं व्याख्यातं भवति। अकर्मवश्यत्वं मुक्तस्यापि विद्यते स पूर्वावस्थायां कर्मसंबन्धित्वात्तदर्हः अतस्तद्व्यावर्तकं कर्म—

सू० जलादिविसजातीयस्याग्न्यादेरौष्ण्यादिशक्तियोगवत्सर्वशक्तियोगो न विरुध्यत इति परिहारः, परमार्थस्त्वमेवैक

इत्याद्यपि न कृत्स्नस्यापारमार्थ्यं वदति अपि तु कृत्स्नस्य तदात्मकतया तद्व्यतिरेकेणाऽवस्थितस्यापारमार्थ्यम्

टी० सम्बन्धानर्हत्वममलात्मत्वम् अकर्मवश्यत्वं कर्मकृतसुखदुःखभाक्त्वाभावः, कर्मवश्यविसजातीयत्वं कर्मसम्बन्धानर्हत्वं सर्गादिकर्तृत्वे गुणत्रयवश्यत्वसापेक्षत्वकर्माधीनफलभाक्त्वकर्मसम्बन्धार्हत्वप्रसङ्ग इति विशेषविरोधप्रसञ्जनेन चोद्यम् अग्नेर्द्रव्यत्वेऽनुष्णत्वप्रसङ्ग इतिवदयं तर्को धर्मिग्राहकप्रमाणबाधितः, अतो विजातीयस्य धर्मिणो विजातीयधर्मवत्त्वं युक्तम् अग्नित्वे सत्यपि वैद्युताग्नेर्जलनिर्वाप्यत्वाभाववत् अतः सर्वविजातीयस्य ब्रह्मणः सर्वशक्तियोग उपपद्यत इति परिहार इत्यर्थः । शक्तयः सर्वभूतानामिति ग्रन्थस्यायमक्षरार्थः अचिन्त्यज्ञानगोचरा अतर्क्यप्रमितिसिद्धाः सर्गाद्याः सर्गादिगोचराः, भावशक्तयः—वस्तुशक्तयः ब्रह्मणो वस्तुशक्तय इति निर्देशो ब्रह्मतादात्म्यमिति वत् । यद्वा ब्रह्मणो भावशक्तयः ब्रह्मणो वस्तुत्वप्रयुक्ताः सत्ताप्रयुक्तानिरुपाधिकाः शक्तय इत्यर्थः । यद्वा भावशब्दः स्वभावपरः स्वाभाविक्यः शक्तय इत्यर्थः । अथ चतुःश्लोकीं व्याचष्टे "परमार्थ" इति, कृत्स्नस्य ब्रह्मपर्यन्तत्वेन तच्छरीरत्वात्कृत्स्न शरीरं ब्रह्मैव परमार्थः, अतत्पर्यन्तो मिथ्येत्यर्थः । जगतः पते इत्याकाशव्यावृत्तिः, येन व्याप्तमिति नृपव्यावृत्तिः, अनेन जगतः शरीरलक्षणं दर्शितं भवति, नियाम्यत्वधार्यत्वशेषत्वेष्वन्यतमं व्याप्यत्वसहचरं हि शरीरलक्षणद्योतकं जगच्छरीरक ? त्वदन्यो मिथ्येत्युक्ते अतत्पर्यन्तस्य स्वतन्त्रवस्त्वन्तरस्यैव मिथ्यात्वं स्यात् न तु जगतच्छरीरभूतस्य, यथा हे भूपते ? त्वदन्यो नास्तीत्युक्ते न भूर्मिथ्या भवति तत्तुल्यराजान्तरस्यैव तु मिथ्यात्वं तद्वत् । यद्वा एकशब्दः प्राधान्यपरः "एकादाकिनि चायसहाय" इत्यत्रासहायपदव्यवच्छेद्यत्वं हि प्राधान्यं ब्रह्मणश्च प्राधान्यं जगत्प्रति शे[1]षित्वरूपं तदानीं नान्योऽस्तीति प्रधानभूतोऽन्यो निषिध्यते, न त्वप्रधानमर्थान्तरम् । उक्तार्थस्योपपादकं व्याप्यत्वप्रतिपादकमुत्तरार्द्धमित्याह "तदेवे" ति, तत्र फलितमर्थमाह "येने" ति, येन—यस्मादित्यर्थः, त्वदन्यः—अत्वदात्मकः त्वयाऽऽत्मतया व्याप्तत्वात् सर्वं त्वदात्मकं त्वच्छरीरमिति त्वदन्यः अत्वदात्मको

१ विशेष्यत्वमिति पा० ।

नास्ति, तस्मात्सर्वशरीरस्त्वमेव परमार्थ इत्यर्थः । तवैष महिमेति श्लोकार्द्धैकदेशश्चोक्तार्थप्रतिपादक इत्याह "अत" इति, महिम्नो व्याप्तिरूपत्वाद् या सर्वव्याप्तिरित्युक्तं न तु व्याप्तौ तात्पर्यात्, व्याप्ते र्महिमत्व एव तात्पर्यम् । यद्वा व्याप्ते रुक्तार्थोपादकत्वं महिमसमभिव्याहारादित्याह—

सू० तदेवोपपादयति "तवैष महिमा येन व्याप्तमेतच्चराचरमिति, येन त्वयेदं चराचरं व्याप्तम् अतस्त्वदात्मकमेवेदं सर्वमिति त्वदन्यः कोऽपि नास्ति अतः सर्वात्मतया त्वमेवैकः परमार्थः अत इदमुच्यते तवैष महिमा या सर्वव्याप्तिरिति अन्यथा तवैषा भ्रान्तिरिति वक्तव्यं जगतः पते ? त्व मित्यादीनां पदानां लक्षणा च स्यात् लीलया महीमुद्धरतो भगवतो महावराहस्य स्तुतिप्रकरणविरोधश्च यतः कृत्स्नं जगत् ज्ञानात्मना त्वयाऽऽत्मतया व्याप्तत्वेन तव मूर्त्तं तस्मात्त्वदात्मकत्वानुभवसाधनयोगविरहिण एतत्केवलदेवमनुष्यादिरूपमिति भ्रान्तिज्ञानेन पश्यन्तीत्याह यदेतद्दृश्यत इति ।

टी० "अत इदमुच्यत" इति, तस्य परप्रातिकूल्यं दर्शयति "अन्यथे"ति, व्याप्यव्याप्त्यादेर्मिथ्यात्वे सर्वव्याप्तिस्तव महिमेति न वाच्यमपि तु भ्रान्तिरिति वक्तव्यमित्यर्थः कृत्स्नापारमार्थ्यपरत्वे दूषणान्तरद्वयमाह "जगतः पते" इति, लक्षणा—अधिष्ठानलक्षणा, ब्रह्मात्मत्वेन स्वतन्त्रतायाः प्रत्यक्षसिद्धत्वात्तद्विरुद्धं ब्रह्मपर्यन्तत्वं न शास्त्रं प्रतिपादयति "आदित्यो यूप" इति वदिति शङ्कायाम् अन्यथा सिद्धाया अपरोक्षरूपाया अपि स्वातन्त्र्यप्रतिपत्तेः परोक्षरूपाप्यनन्यथा सिद्धापारतन्त्र्यप्रतिपत्तिर्बलीयसीत्यभिप्रायेण द्वितीयश्लोकमतारयति "यत" इति, पारतन्त्र्यप्रतिपत्तिः परमात्मप्रतिपत्तिसापेक्षा तदभावात्तत्प्रतिपत्त्यभाव इत्यन्यथा सिद्धा स्वातन्त्र्यप्रतिपत्तिरित्यर्थः "केवलंदेवमनुष्यादिरूप"मिति, परमात्मशरीरत्वरहितजगद्रूपमात्रमित्यर्थः । अयमर्थः, यथा देहात्मभ्रमो ऽपरोक्षोऽपि परोक्षशास्त्रज्ञानेन बाध्यते तथा स्वातन्त्र्यभ्रमोऽपीति देहातिरिक्तं स्वात्मानमप्यजानतः परमात्मपारतन्त्र्याप्रतिपत्तिः किं पुनर्न्यायसिद्धेति च दर्शयितुं तृतीयश्लोकारम्भः, तं व्याचष्टे—

(शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 512. Vol. IX.)

मू० [a]एतेन कीदृशमसिद्धलक्षणं व्यवस्थापितमायुष्मता भवति व्याप्तत्वपक्षधर्मताभ्यामप्रमितोऽसिद्ध इति तावद्विरुद्धादिषु लक्षणं किं नास्ति किं वास्ति यदि नास्ति तदा व्याप्तिपक्षधर्मताभ्यां प्रमिता विरुद्धत्वादयः प्राप्नुवन्ति अथास्ति तदा तेऽप्यसिद्धभेदाः प्राप्ताः अथैतस्मिँल्लक्षणे सत्यपि ते नासिद्धान्तर्भूताः [b]तर्हि लक्षणमिदमतिव्यापकमापन्नम् * [c]अथ यत्र व्याप्तिपक्षधर्मत्वाप्रमितत्वं साक्षादुद्भाव्यते तदसिद्धमित्युच्यते * [d]तर्हि लक्षणान्तरमिदमुक्तं स्यात् [e]न चेदमपि युक्तं [f]यत्र (१)व्याप्तिविरहमात्रमुद्भाव्यते तत्र व्याप्तिपक्षधर्मताप्रमितत्वानां द्वानं मिलितं नोद्भाव्यते इति नासावसिद्धः स्यात् [g]एवं सर्वत्रासिद्धविशेषमुदाहृत्य प्रसङ्गो विधातव्यः ॥

टी० ॥ हेत्वाभासानां व्युत्पादनेनापि नासिद्धलक्षणस्यातिव्याप्तिः परिहृतेत्याह—। [a]"एतेने"ति ॥ [b]"तर्ही"ति । लक्ष्यादन्यत्रानैकान्तिकादिषु लक्षणगमनादित्यर्थः नन्वनैकान्तिकादिषु व्याप्त्यादिभङ्गस्य साक्षादुद्भावनं नास्ति साक्षादुद्भाव्यव्याप्तिपक्षधर्मताप्रमितिविरहत्वस्यासिद्धिलक्षणत्वेनाभिप्रेतत्वादिति शङ्कते—। [c]"अथे"ति । तथाचोद्भावनगर्भं लक्षणान्तरं प्रणयतस्तव प्रतिज्ञाहानिरिति परिहरति—। [d]"तर्ही"ति । ननु प्रतिज्ञाहानिः पुरुषदोषो नतु लक्षणान्तरदोष इत्यत आह—। [e]"न चेदमपी"ति । व्याप्तिपक्षधर्मताप्रमितिविरहाणां मिलितानामुद्भावनं लक्षणत्वेन विव-

(१) स श्यामो मित्रातनयादित्यादावुपाध्युद्भावनेन व्याप्तिविरहमात्रं प्रतिपाद्यते नासावसिद्धः स्यादिति सम्बन्धः ।

Digitized by Google

चितं प्रत्येकोद्भावनं वा आद्यं परिहरति—। [f] "यत्रे"ति—। [g] "एवमि"ति। यत्रापक्षधर्मत्वोद्भावनमात्रं तत्रापि मिलितानुद्भावनादव्याप्तिर्यत्र वा प्रमितिविरहोद्भावनं तत्रापीत्यर्थः तथाच प्रत्येकोद्भावनमात्रे लक्षणागमनादव्याप्तिरितिभावः॥

मू० [a] अथ प्रत्येकमिदं लक्षणं व्याप्त्यप्रमिततया साक्षादुद्भाव्योऽसिद्धः पक्षधर्मतया ऽप्रमिततया चेति तर्ह्यन्योन्योदाहरणाव्याप्तिरित्यव्यापकत्वमुभयोः॥* [b] अथोभयोरप्यसिद्धविशेषलक्षणत्वादन्योन्यविषयाव्यापकता न दोषायेति मन्यसे ?*—न, [c] सामान्यलक्षणे निर्वक्तुमशक्ये कथमिदं विशेषलक्षणमपि घटेत* [d] अथानुमितेरसाधारणहेतुव्यतिरेकोद्भावनं सामान्यलक्षणमस्तु?*—मैवम्, [e] सत्प्रतिपक्षोद्भावनं तथेत्यतिव्याप्तेः [f] भावरूपतया हेतुविशेषणे च निरुपाधित्वव्यतिरेकोद्भावनात्व्याप्तेः [g] स्वरूपासिद्धिः सर्वप्रमाणसाधारणो दोष इति तदुद्भावनाव्याप्तेश्च* [h] अथोच्यते व्याप्तत्वपक्षधर्मत्वाभ्यां प्रमितत्वस्य व्यतिरेको यत्र साक्षादुपन्यस्यते सोऽसिद्ध इति ?*—इदमप्यलक्षणम् अव्यापकत्वात्॥

टी० ॥ द्वितीयमाशङ्क्य दूषयति—। [a] "अथे"ति। तथाच सुतरामव्याप्तिरित्यर्थः॥ ननु तिसृणामसिद्धीनां विशेषलक्षणान्येतानि तथाचान्योन्यानुपग्रहो गुण एव न दोष इति शङ्कते—। [b] "अथे"ति। सामान्यलक्षणज्ञानमन्तरेण विशेषलक्षणजिज्ञासानुदयात्सामान्यलक्षणमेव प्रथममुचितमिति परिहरति—। [c] "सामान्ये"ति। नन्वनुमित्यसाधारणकारणविरहोद्भावनं यत्र सोऽसिद्ध इति सामान्यलक्षणमित्याह—। [d] "अथे"ति। अनुमितेरसाधारणो हेतुर्व्याप्तत्वं पक्षधर्मत्वं तत्प्रमितिश्च तद्विरहोद्भाव-

नमित्यर्थः ॥ असत्प्रतिपक्षितत्वमप्यनुमितेरसाधारणो हेतुरिति तद्विरहो-द्भावनेऽतिव्याप्तिरित्याह—। [e] "सत्प्रतिपक्षे"ति । अनुमित्यसाधारणभावभूतहेतुविरहोद्भावनं विवक्षितमसत्प्रतिपक्षितत्वं च न भावभूतमतो नातिव्याप्तिरिति यदि तदा निरुपाधित्वस्यानुमित्यसाधारणहेतोर्यत्र विरह उद्भाव्यते तत्र व्याप्यत्वासिद्धावव्याप्तिरिति शङ्कोत्तराभ्यामाह—। [f] "भावे"ति ॥ [g] "स्वरूपासिद्धिरि"ति । यद्यप्यनुमित्यसाधारणदोषोद्भावनं न लक्षणं येनाव्याप्तिः स्यात् तथाप्यनुमित्यसाधारणहेतुव्यतिरेकोद्भावनमपि तत्रैव पर्यवस्यतीति तथोक्तम् । [h] "अथे"ति । अनैकान्तिकादौ साक्षादनुमित्यसाधारणहेतुव्यतिरेकोद्भावनं नास्ति किन्त्वनैकान्तिकत्वादिद्वारेति न तत्रातिव्याप्तिरिति भावः । अत्र प्रमितिव्यतिरेकः पूर्वस्माद्भेद इत्यन्ये ।

मू० [a] यत्र व्याप्त्यादिव्यतिरेक उपन्यस्यते [b] तत्र वस्तुगत्या व्याप्तत्वप्रमितेर्व्यतिरेकोऽस्तु नाम नतूपन्यस्यतेऽपि प्रयोजनाभावात्, व्याप्तिव्यतिरेकदर्शनादेवानुमानाङ्गवैकल्यात्मनो दोषस्योद्भावनपर्यवसानात्तस्माद्च प्रमितत्वव्यतिरेकोद्भावनं नास्तीत्यव्यापकत्वं दोषः * [c] ननु विशेषणाद्यभावोऽपि वस्तुतो विशिष्टाभाव एवेति नोक्तदोषः, * न [d] यदि विशेषणाद्यधिकोऽविशिष्टस्तदा तदभावभेदोऽपि स्यात् * अथ नाधिकस्तदा विशेषणाभावान्नान्यस्य विशिष्टाभावतेति * विशेष्याभावस्यापि तथात्वे पृथक् पृथगेव विशिष्टाभावार्थस्तयोरित्यननुगम एव स्वार्थानुमित्यसिद्धाव्याप्तिस्थानुद्भावनादिति ।

टी० ॥ व्याप्तत्वपक्षधर्मत्वप्रकारकप्रमाव्यतिरेकोद्भावनं केवलव्याप्तत्वव्यतिरेकोद्भावने केवलपक्षधर्मत्वव्यतिरेकोद्भावने वा नास्तीत्यत्राव्याप्तिरित्याह—। [a] "यत्रे"ति । यद्यपि प्रमितत्वव्यतिरेकस्तत्रास्ति तथापि

उद्भावनं तत्परः शब्दप्रयोगो वा नास्तीत्याह—। [b]"तत्र वस्तुगत्ये"ति ॥ ननु यत्रापि व्याप्तिविरहोद्भावनमात्रं तत्रापि व्याप्तत्वपक्षधर्मत्वप्रकारकप्रमाव्यतिरेकोद्भावनमस्त्येव विशेषणाभावेऽपि विशिष्टाभावसत्त्वादिति शङ्कते—। [c]"नन्वि"ति । विशिष्टं यत्तद्यदि विशेषणादितो भिन्नं तदा प्रतियोगिभेदात्तदभावभेद इति विशेषणाभावोपन्यासेऽपि न विशिष्टाभावोपन्यास इत्यव्याप्तितादवस्थ्यम् अथ विशेषणविशेष्याभ्यामभिन्नं विशिष्टं तदा विशेषणाभावो यदि विशिष्टाभावस्तदा विशेष्याभावेऽव्याप्तिरित्यननुगमः उभयाभावाभिधानेऽपि प्रत्येकाभावाव्याप्तिरिति स एव दोष इति परिहरति—। [d]"यदी"ति ॥

मू० * [a]अथ ब्रूषे यच्च व्याप्तित्वपक्षधर्मत्वप्रमितेर्व्यतिरेकः साक्षाच्छक्योपन्यासस्तदसिद्धं शक्योपन्यासत्वस्यानुपन्यस्तेऽपि सम्भवान्नाप्यव्यापकतेति * नैतदपि युक्तं, तथाहि [b]शक्योपन्यासत्वं किं शक्यस्वरूपनिर्देशत्वमाचमुत शक्यप्रमापणत्वम् आद्येऽनैकान्तिकादावपि व्याप्तिशून्यत्वं शक्यप्रतिपन्नं भवत्येव द्वितीयेऽपि यदि साक्षादिति प्रत्यक्षेणेत्यर्थस्तदा प्रत्यक्षेण प्रमाणीयत्वं व्याप्तिपक्षधर्मताप्रमितिविरहस्य प्रत्यक्षप्रतियोगिकाभावप्रत्यक्षतावादिमते विरुद्धादावप्यस्तीत्यतिव्याप्तिः अन्यमते न क्वचिदपीति सर्वाव्याप्तिः * [c]अथ व्याप्तिपक्षधर्मताविरहस्यापि प्रत्यक्षप्रमाणीयता विवक्षिता * सा न युक्ता, [d]उक्तलक्षणवाक्यस्य व्याप्तिपक्षधर्मताविरहानभिधायित्वात् [e]तद्विरहेऽपि तात्पर्याभ्युपगमे प्रत्येकसमुदितलक्षणताविकल्पेनाव्यापकतापातात् ॥

Digitized by Google

टी० ॥ पूर्वदोषे सत्येव स्वार्थानुमित्यसिद्धत्वमात्रसङ्ग्रहाय शङ्कते—। [a]"अथ ब्रूषे" इति । साक्षादित्यनैकान्तिकादावतिव्याप्तिवारणाय शक्योपन्यासेति स्वार्थानुमानासिद्धप्राप्तिवारणाय उपन्यासयोग्यतायास्तत्रापि सत्त्वात् अत्र शक्योद्भावनत्वं विरुद्धादावतिव्यापकम् उद्भावनाहंतायास्तत्रावृत्तेः व्याप्तिपक्षधर्मताप्रमितिविरहस्य प्रत्यक्षप्रमाणीयत्वं नैयायिकमते विरुद्धादावतिव्यापकं भट्टमते चासंभव एव लक्षणदोष इत्याह—। [b]"शक्योपन्यासत्वमि"ति । भट्टमतेऽसम्भववारणाय शङ्कते—। [c]"अथे"ति । व्याप्तिपक्षधर्मताविरहस्य तन्मतेऽपि प्रत्यक्षत्वा(१)दित्यर्थः ॥ व्याप्तिपक्षधर्मताप्रमितिविरहान्तर्भावेण लक्षणे प्रमितिविरहान्तर्भाववश्यकतया तदवस्थ एवासम्भवो दोष इत्याह—। [d]"उक्तलक्षणे"ति । ननु व्याप्तिपक्षधर्मताप्रमितिविरह इत्यत्र द्वन्द्वसमाश्रयणाद्व्याप्त्यादिविरहोऽपि तात्पर्यविषय एवेत्यत आह—। [e]"तद्विरहेऽपी"ति । व्याप्तिविरहादीनां यदि प्रत्येकं लक्षणत्वं तदा तदितरत्राव्याप्तिरथ तावतां विरहाणां मिलितमुद्भावनीयत्वेन विवक्षितं तदा प्रत्येकोद्भावनाव्याप्तिरित्यर्थः ॥

मू० (२) [a]अतीन्द्रियपक्षादिविरहे च विषये [b]तदभावादव्यापकतापत्तेः [c]एतेन यदि लिङ्गानपेक्षत्वे साक्षादर्थः सोऽपि निरस्तः* [d]अथोच्यते यच्च व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेकः प्रतिपादनीयान्तरानपेक्षतया तत्प्रमापकस्य लिङ्गस्योपन्यासमन्तरेण शक्योद्भावनस्तदसिद्धमिति? *—॥

(१) ज्ञानस्य प्रत्यक्षत्वे तत्प्रतियोगिकाभावस्यापि प्रत्यक्षत्वं बोद्धव्यं, यद्वा ज्ञानाभावस्याधिकरणप्रत्यक्षात्मरूपत्वात्प्रत्यक्षत्वम् ।

(२) अतीन्द्रियपक्षेतिभावप्रधानतया निर्देशः । अतीन्द्रियपक्षत्वाद्यभाव इत्यर्थः । आदिनातीन्द्रियव्याप्तिपरिग्रहः । अत्रविद्यासागराः । अनित्याः परमाणवः सर्वगतत्वादिति यदा मीमांसकेन प्रयुज्यते तदाऽतीन्द्रियपक्षधर्मत्वविरहस्तथा वन्ध्यासुतश्चतुर्वेदाभिज्ञः ब्राह्मणप्रसूतत्वादित्यतीन्द्रियव्याप्तिविरह एतदुक्तं भवति अतीन्द्रियपक्षहेत्वोः प्रत्यक्षप्रमाणीयत्वाभावात्तद्धर्मं पक्षधर्मत्वव्याप्तिव्यतिरेके प्रत्यक्षप्रमाणीयत्वाभावाद्व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेकः प्रत्यक्षेण शक्योपन्यास इतीत्यभिदधते ।

टी० ॥ सर्वसाधारणं दोषान्तरमाह—। [a]"अतीन्द्रिये"ति ॥ तदभावादि"ति । प्रत्यक्षेण प्रमाणीयत्वाभावादित्यर्थः ॥ [c]"एतेने"ति । विरुद्धाद्यतिव्यापकत्वेन प्रत्येकंमिलितविकल्पेन वेत्यर्थः ॥ भट्टमते प्रमितिविरहस्यानुपलब्धिगम्यतया लिङ्गानपेक्षत्वमन्येषां च प्रत्यक्षवेद्यतया च लिङ्गानपेक्षत्वं तुल्यमिति भावः ॥ उक्तातिव्याप्तिपरिहाराय विशेषणान्तरं शङ्कते—। [d]"अथे"ति । यत्र व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेको लिङ्गस्योपन्यासव्यतिरेकेण शक्योद्भावनस्तत्र हेतु स्तत्प्रमापकस्य प्रतिपादनीयान्तरानपेक्षतयेति नचैवमतिव्याप्तिर्विरुद्धादौ विरुद्धत्वसव्यभिचारत्वादि लिङ्गोपन्यासाच्चाव्याप्तिरतीन्द्रियपक्षधर्मत्वादिविरहे(१), तत्र(२) पक्षादिविरहस्यैव लिङ्गान्तरापेक्षया तदवगमे सति व्याप्त्यादिव्यतिरेकावगमकलिङ्गानुपन्यासादित्यर्थः (३) यद्वा यत्र व्याप्तत्वं पक्षधर्मत्वप्रमितेर्व्यतिरेकः प्रतिपादनीयान्तरानपेक्षतया यस्तत्प्रमापकं लिङ्गं तदुपन्यासव्यतिरेकेणेति संबन्धः विरुद्धा(४)दौ प्रतिपाद्यान्तरानपेक्षविरुद्धत्वाद्युपन्यासान्नातिव्याप्तिर्नवान्तीन्द्रियपक्षधर्मताविरहादावव्याप्तिस्तल्लिङ्गस्य प्रतिपाद्यान्तरापेक्षत्वाद्येन तस्य व्याप्तिर्नावधारिता तं प्रति तस्याः प्रतिपादनीयत्वादित्यर्थः ॥

---

(१) काञ्चनमयः पार्थिवपरमाणुर्गन्धवान् पार्थिवत्वात् पुष्पादिवदित्याद्यतीन्द्रियपरमाण्वादिपक्षकानुमाने पार्थिवत्वादिहेतौ काञ्चनमयत्वविशिष्टपार्थिवपरमाण्वात्मकपक्षधर्मत्वस्याप्यतीन्द्रियत्वेनाऽसिद्धधर्मिकत्वादियत्किञ्चिल्लिङ्गगम्यत्वमेव वाच्यम् तथा चानिरुक्तलक्षणाव्याप्तिरिति पूर्वपक्षण्याभिप्रायः ।

(२) न तत्र पक्षधर्मत्वव्यतिरेकस्य यत्किञ्चिदसिद्धधर्मिकत्वादिलिङ्गगम्यत्वं किन्तु पक्षतावच्छेदकीभूतकाञ्चनमयत्वविशिष्टपार्थिवपरमाण्वात्मकपक्षविरहस्यैव पार्थिवत्वादियत्किञ्चिल्लिङ्गगम्यत्वं तथाच पार्थिवपरमाणुः काञ्चनमयत्वभाववान् पार्थिवत्वाद् घटवदिति प्रथमतः काञ्चनमयत्वाभावविशिष्टं परमाण्वात्मकपक्षविरहमनुमाया हेतोस्तद्धर्मकत्वव्यतिरेकोऽर्थादेवाऽवगम्यते इत्यर्थप्राप्ते तस्मिन्हेत्वन्तरं पुनर्नाभिधेयम् अर्थपौनरुक्त्यापातात् तथाच न लक्षणाऽव्याप्तिरित्याह—तत्रेति ।

(३) नन्वतीन्द्रियपरमाण्वादिपक्षकानुक्तानुमितिस्थलीयपक्षविरहपक्षधर्मत्वविरहयोरुभयोरप्यतीन्द्रियत्वाऽविशेषेण पक्षविरहस्यैव लिङ्गगम्यत्वं न पक्षधर्मत्वविरहस्येत्यत्र न किञ्चिद्विनिगमकमित्यस्वरसात्पक्षधर्मत्वादिव्यतिरेके लिङ्गान्तरोपन्यासव्यतिरेकेणेत्यस्यान्वयमपहाय पक्षधर्मत्वादिव्यतिरेकावगमकलिङ्गं तदाह—यद्वेति ।

(४) आदिपदेन प्रक्रान्तपक्षधर्मत्वाभावादिः संग्राह्यः ।

मू० [a] नैतदप्युपपन्नमतिव्यापकत्वात् [b] तथा हि विरुद्धादावपि शक्यते तावद्विपक्षवृत्तिदण्डभूततर्काभावात् सोपाधितावगन्तुं यदाह [c] "यत्रानुकूलस्तर्को नास्ति सोऽप्रयोजक इति" [d] तस्मात्तेषामप्येवंलक्षणयोगित्वादसिद्धत्वप्रसङ्गः * [e] नच ताद्दशतर्काविषयत्वमपि प्रतिपादनीयान्तरानपेक्षतया व्याप्तिपक्षधर्मताप्रमितिविरहप्रमापकलिङ्गभूतमेवेति वाच्यं ? *— [f] तथा सति विरुद्धत्वादिवत्तस्य हेत्वाभासान्तरत्वप्रसङ्गात् ॥

टी ॥ नेदं लक्षणमतिव्याप्तत्वादिति परिहरति—। [a] "ने"ति । विरुद्धादौ प्रतिपादनीयान्तरानपेक्षविरुद्धत्वादिलिङ्गोपन्यासेन व्याप्तत्वादिप्रमितिव्यतिरेकस्य शक्योद्भावनत्वे कथमतिव्याप्तिरित्यत आह—। [b] "तथा ही"ति । अनित्यः शब्दः कृतकत्वादनित्यः शब्दः प्रमेयत्वादित्यादिविरुद्धादौ विपक्षबाधकतर्काभावादपि व्याप्तिविरहस्य शक्यावगमत्वादतिव्याप्तिरित्यर्थः ॥ विपक्षबाधकतर्काभावो विरुद्धत्वादिवद्व्याप्तिव्यतिरेकगमक इत्यत्रोदयनसंवादमाह—। [c] "यत्रे"ति । अनुकूलतर्कः पक्ष स एव प्रतिकूलो विपक्षे स यत्र हेतुत्वाभिमते नास्ति सोऽप्रयोजको व्याप्तिरहित इत्यर्थः उक्तलक्षणसङ्गृहीतत्वाद्विरुद्धादेरसिद्धान्तर्भावः स्यादित्युपसंहरति—। [d] "तस्मादि"ति । विपक्षबाधकतर्कगोचरत्वं प्रतिपादनीयान्तरानपेक्षव्याप्तिपक्षधर्मताप्रमिति व्यतिरेकलिङ्गमुपन्यस्यते इति नातिव्याप्तिरित्यत आह—। [e] "नचे"ति । कुतो न वाच्यमित्यत आह—। [f] "तथे"ति ॥

मू० * [a] अथोच्यते [b] अथोपन्यस्यमानं तदसिद्धं भवतु [c] साध्यविपरीतव्याप्तत्वादिना तु दूष्यमाणं विरुद्धाद्येव [d] तदुपन्यासप्रकारभेदाच्च भेदव्यवस्था हेत्वाभासानां [e] नह्यच गोत्वाश्वत्वादिवदत्यन्तासङ्कर इष्यते [f] किं नाम

टी ॥ व्याप्त्यादिभङ्गत्वाद्विरुद्धादिवत्तर्काभावेपि हेत्वाभासान्तरं स्याच्च तस्य विरुद्धादावन्तर्भाव(१) एवं सति विरुद्धेनैकान्तादेरन्तर्भावापाताच्चायमतिप्रसङ्गो दोषाय विरुद्धादेरसिद्धलक्षणोपपन्नत्वेनासिद्धत्वस्यापि संभवादिति शङ्कते—। [a]"अथे"ति । तुल्यायां(२) प्रमाणप्रमेयव्यवहारवद् विरुद्धादावसिद्धत्वविरुद्धत्वादिव्यवहारोस्ति प्रवृत्तिनिमित्तभेदाद्वेव हेत्वाभासभेदव्यवस्थेत्यर्थः ॥ [b]"तथे"ति । प्रागुक्तप्रकारपरामर्शस्तर्हि विरुद्धादिलयमियादित्यत आह—। [c]"साध्ये"ति । यत्र साधकतर्काभावेन सोपाधिता गम्यते तदसिद्धं तदेव पुनः साध्यविरुद्धत्वादिना दूष्यमाणं विरुद्धादि भवतीत्यर्थः ॥ उपन्यासभेदेपि वस्तुन एकत्वात्कथं हेत्वाभासव्यवस्थेत्यत आह—। [d]"उपन्यासे"ति । उपन्यासभेदोपाधिक एव हेत्वाभासभेद इत्यर्थः अनौपाधिक एव भेदः कस्माचेष्यते हेत्वाभासानामित्यत आह—। [e]"नह्री"ति । जलमनग्नि धूमवत्त्वादित्यत्र व्याप्त्यादिविरहस्य साध्य विपरीतव्याप्तत्वेन सङ्करात्तथा नित्यः शब्दश्चाक्षुषत्वादित्यादावप्यसिद्धसाङ्कर्यादित्यर्थः उक्तमर्थं सदृष्टान्तमुपपादयितुं परमुखेन पृच्छति—। [f]"किमि"ति ॥

मू० [a] प्रमाणप्रमेयभाववत् प्रकारान्तरासाङ्करमाचमिति ? *— [b] तदप्ययुक्ताभिधानं, [c] वक्तव्यं हि केन प्रकारेणासिद्धत्वं भवति [d] न तावदुक्तलक्षणेन [e] तथा शक्योद्भावनं तस्य विरुद्धाचितप्रकारेणोपन्यस्यमानस्य संभवात् [f] सर्वथा निष्प्रकारस्यासिद्धधर्मिण उद्भावनस्या † शक्यत्वात् [g] नच तथा शक्योद्भावनत्वमप्युद्भाव्यते ऽसिद्धे येन प्रकारभेदव्यवस्थितिरनेन भवेत् ॥

(शेषमग्रे)

(१) 'व्याप्त्यादिभङ्गलिङ्गत्वाऽविशेषादि'ति शेषः ।

(२) अत्र 'तुल्योर्यामि'ति युक्तं पाठमुत्पश्यामः, यथा श्रुतपाठे तु सङ्कीर्णतायामिति पदमध्याहृत्य सङ्कीर्णतायां तुल्यायां सत्यामयमर्थः कथञ्चिदुपवर्णनायः ।

† अत्र मूले बहुषु पुस्तकेषु तदुद्भावनस्येति पाठः, शाङ्कर्य्यामप्येतदर्थं दृष्टा यते तथैव प्रतीकधारणेनापि भाव्यं-'तदुद्भावनस्येति" इति ।

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम् रु०	आ०
१ काशिका पंडितवरवामनादित्यविरचिता		
पूर्वार्धम्	••	॥
उत्तरार्धम्	१०	॥
२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	॥
३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	।)
४ लघुकौमुदी वरदराजकृता	१	=)
५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८	॥
६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४	॥
८ मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	॥
९ शाश्वतधर्मदीपिका	१	॥
१० अमरकोश सटीक	४	॥
११ योगवार्तिकम्	३	।)
१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	॥
१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा-देशाधिपति रचिता	४)	॥
१४ श्रौतपदार्थनिर्वचनम्	३	।)
१५ वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४)	॥

Digitized by Google

CONTENTS.

		Page.
SAMKSHEPAŚÁRÍRAKAM	...	513
ŚÁSTRADÍPIKÁ	...	525
ŚRÍBHÁSHYAM	...	533
KHAṆḌANAKHAṆḌAKHÁDYAM	...	561

Digitized by Google

DEC 27 1887

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 11.] NOVEMBER 1887. [Vol. IX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page* 524. VOL. IX.)

मू० ॥ पश्यन्नपश्यतिगिरा कथयांबभूव
साक्षादनश्वरविनश्वरचिद्विभागम् ॥
तात्पर्यतः श्रुतिवचः स्फुटमेव नैव-
मैश्वर्यवस्तुनि विभागवचःश्रुतिर्नः ॥ १६० ॥

टी० ॥ ननूक्तद्वितीयज्ञाने मानाभावात्प्रतिज्ञामात्रेणोक्तद्वैविध्यादि न सिद्ध्यतीति चेन्न, अहङ्कारतद्धर्मकामसङ्कल्पादीनां धारावाहिकप्रत्ययानां स्वप्नमनोराज्यसुषुप्तीनां च स्वप्रकाशनित्यचैतन्यं विना स्वकाले प्रतिभासायोगात्तेषु च मानप्रवृत्तेरसकृद्विरस्तत्वात्स्वकाले प्रतिभासानङ्गीकारे च तेषां कालान्तरे परामर्शायोगात्तदा तत्साधकं नित्यचैतन्यमावश्यकमित्यभिप्रेत्योक्तज्ञानद्वये वैदिकं प्रति श्रुतिं प्रमाणयति । पश्यन्नपश्यतीति । साक्षान्मुख्यवृत्त्या, उक्तमपि तात्पर्यहीनमुपेक्ष्यं स्यादयं तु न तथेत्याह । तात्पर्यत इति । तेन पदद्वयेन स्फुटमेवेत्येतद्विवृतं सुषुप्तिमधिकृत्य यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति श्रुतिवाक्यं तदा द्वैतं न पश्यतीति यच्च तत्सर्वथा ज्ञानाभावात्किं तु पश्यन्वै तन्न पश्यतीत्यनया गिरा स्वप्रकाशस्वरूपज्ञानं प्रतिपादयदेव द्वैतविषयमिन्द्रियाद्यधीनं सविकल्पकज्ञानं निषेधति, तदा स्वप्रकाशस्वरूपज्ञानसत्त्वे हेतुं चाह । न हीति । द्रष्टुरात्मनः स्वरूपभूतायाः दृष्टेर्द्रष्टुरहङ्कारस्य या दृष्टिः साक्षिरूपा तस्या वा दृष्टेर्विपरिलोपो न विद्यते, अविनाशित्वात्सर्वविनाशसाक्षित्वेन तदनर्हत्वादित्येवं नित्यदृष्टिमुपपाद्य तद्भिन्नदृष्टेर्निर्विवृत्त्युपपादयति । न तु तद्द्वितीयमस्तीत्यादिना । इयं च श्रुतिरुक्तार्थपरा यद्वै तं न जिघ्रतीत्याद्यनन्तरसंदर्भेणास्यैवार्थस्याभ्यासात्, ततश्चोक्तज्ञानद्वैविध्यादौ विमतिर्न कार्येत्यर्थः । एवं ज्ञानदृष्टान्तं सप्रमाणकमङ्गीकृत्य दार्ष्टान्तिकमप्रामाणिकत्वादनङ्गीकार्यमित्याह । नैवमिति ॥ १६१ ॥

Digitized by Google

मू० ॥ एवं न वा अर इति श्रुतमेव तावत्
पुत्राद्युपाधि पुरुषस्य सुखं विनाशि ॥
नित्यं निरन्तरमनन्तमपारमुक्तं
ब्राह्मं सुखं वचनकोटिशतैश्च यत्नात् ॥ १६८ ॥

टी० ॥ इदानीं सुखदृष्टान्तादपि दार्ष्टान्तिके वैषम्यं वक्तुं ज्ञानवत्सुखद्वैविध्यं प्रामाणिकत्वादुपेयत इत्याह । एवं न वा इति । स्रक्चन्दनवस्त्रालङ्कारादिविषयजन्यं विनाशि सुखपदवाच्यमेकमनुभवसिद्धम्, विषयाद्यभावदशायामपि परप्रेमास्पदत्वेनानुमीयमानमात्मरूपं नित्यं चापरं सुखं सिद्धम्. तथा श्रुतितोऽपि तद्द्वैविध्यमुपेयम्. न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्तीत्यादिश्रुतिश्चात्मसुखशेषतया पुत्रादीनां प्रियत्वं वदन्ती तदधीनमनित्यं सुखं दर्शयति, एवं यो वै भूमा तत्सुखं विज्ञानमानन्दं ब्रह्म एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति आनन्दरूपममृतं यद्विभाति आनन्दं ब्रह्मणो विद्वानित्यादिश्रुतिभिः प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्, उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्, सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्, यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः इत्यादिस्मृतिभिश्च नित्यनिरतिशयाद्वितीयपूर्णब्रह्मस्वरूपसुखं च तात्पर्येण दर्शितम् । आनन्दादयः प्रधानस्येति सूत्रमपि तद्विषयमेव, तथा च तद्द्वैविध्यं युक्तमिति भावः ॥ १६८ ॥

मू० ॥ ऐश्वर्यवर्णनमिह द्विविधं न वेदे
नित्यं क्व चित् क्व चिदनित्यमिति प्रतीमः ॥
ऐश्वर्यमात्रकथनं पुनरस्ति मोक्षा-
दर्वाक् मोक्षसमये च न तत्परं तत् ॥ १६९

टी० ॥ इदानीं नैवमैश्वर्यवस्तुनि विभागवचःश्रुतिर्न इत्युक्तं विवृण्वन्सुखादपि वैषम्यं दार्ष्टान्तिकस्याह । ऐश्वर्यवर्णनमिति । न तावदिह लोके नित्यादिरूपेण द्विविधमैश्वर्यं प्रसिद्धं नापि वेदे परावरात्मनो-

र्नित्यानित्यत्वविभागेनैकत्रानेकत्र वा तत्कृतं येन विशेषनिषेधश्रुतिरौपाधिकविषया कल्प्येत्यर्थः । नन्वेष सर्वेश्वर इत्यादिना मोक्षदशायां श्रूयमाणत्वात्तथा ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता इन्द्रो दिव इन्द्र ईशः पृथिव्याः वैवस्वतं सङ्गमनं जनानां यमं राजानमित्यादिना मोक्षादर्वाग्भूमिष्वपि श्रूयमाणत्वान्नित्यानित्यभावेन द्विविधमप्यैश्वर्यं प्रामाणिकमित्याशङ्क्य मोक्षदशायां तदभिधायकार्थवादस्य श्रुत्यन्तरविरोधादिना सामगानादिश्रुतिवदतत्परत्वस्योक्तत्वान्नैवमित्याशयेनाह । ऐश्वर्यमात्रेति ॥ १६९ ॥

मू० ॥ प्रियशिरस्त्वकथा खलु यादृशी
भवति तादृशमेव तदीरणम् ॥
तदनु नेति च नेतिवचःश्रुते-
र्यदपि मोक्षगतं स्तुतये हि तत् ॥ १७० ॥

टी० ॥ ननु पारमेश्वरं निरङ्कुशमैश्वर्यं नेतीत्यादिश्रुत्या न निषेद्धुं शक्यम्, तस्यान्यतोऽप्राप्तस्य निषेधायोगात्, न च श्रुतिप्राप्तस्यैव तस्य निषेध इति वाच्यम्, श्रुतेस्तत्परत्वाभावे तत्प्रापकत्वायोगात्, तस्यास्तत्परत्वे वा तद्विरोधादेव निषेधकश्रुत्या तन्निषेद्धुमशक्यम्, न च सिद्धे वस्तुनि विकल्पोऽवतरति, ततश्च निषेधश्रुतिस्तदतिरिक्तविषयेति तद्विरोधाभावादैश्वर्यश्रुतिस्तत्परेत्याशङ्क्य प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे इति सूत्रावष्टम्भेन परिहारमाह । प्रियशिरस्त्वेति । आनन्दमयस्य ब्रह्मत्वपक्षे विज्ञानमयकोशगतप्रियमोदादिकमुपासनार्थमानन्दमयावयवत्वेन प्रापयन्ती तस्य प्रियमेव शिर इत्यादिका श्रुतिर्न तत्परा तस्यास्तथोपासनपरत्वात्, एवं सत्यकामत्वसत्यसङ्कल्पत्वसंयद्वामत्वादिश्रुतिरपि व्यावहारिकेश्वरेऽनुमानावगतमुपासनार्थं प्रापयन्ती न तत्परा उपासनाविधिपरत्वात्तस्याः, तथा तत्पदवाच्यव्यावहारिकेश्वरेऽवान्तरतात्पर्येण श्रुतिप्रापितमनुमानप्रापितं वा ऐश्वर्यं मुक्तावपि स्तुत्यर्थमनूद्य सृष्ट्यादिश्रुत्यर्थवन्महावाक्यापेक्षिततत्पदलक्ष्यसिद्ध्यर्थं निषेधोपपत्तेर्न मुक्तावैश्वर्यसिद्धिरि-

त्यर्थः । एष सर्वेश्वर इत्यादिश्रुतेः स एष नेतिनेत्यात्मेतिश्रुतिसमभि-व्याहारेणैकवाक्यत्वादपि तन्निषेध आवश्यक इत्याह । तदन्विति । ननु निषेध्यं चेत्तच्च मोक्षे कीर्तनीयं पङ्कप्रक्षालनन्यायापातादित्याशङ्क्याह । यद्यपीति ॥ १७० ॥

मू० ॥ स्वातन्त्र्यमीश्वरगिरा गुणमार्गवृत्ति-
माश्रित्य पूर्वगुरवः प्रतिपादयन्ति ॥
सिंहस्य शौर्यगुणवत् परमेश्वरस्य
स्वातन्त्र्यलक्षणगुणोऽव्यभिचारिरूपः ॥ १७१ ॥

टी० ॥ ननु क्व चिन्निषेधवाक्यसमभिव्याहारं विनाप्यैश्वर्यं परमात्मनो निर्दिश्यते, यथा इदं सर्वमसृजत भीषास्माद्वातः पवते इत्यादौ तत्कथं न वास्तवमित्याशङ्क्य तद्वाक्यानामपि निर्विशेषवस्तुपरत्वं भाष्यकारोक्तरीत्या स्वीकार्यमन्यथा तत्परबहुश्रुतिविरोधापरिहारादित्याशयेनाह । स्वातन्त्र्यमिति । अपारवश्यमित्यर्थः । गुणमार्गवृत्तिं गौणवृत्तिम् । भाष्यकारा हि कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेरित्यधिकरणे इदं सर्वमसृजतेतिवाक्यं स्वातन्त्र्यं दर्शयत्परमात्मानमपरप्रयोज्यत्वेनेश्वरमब्रवीदित्याहुः, तथा चेश्वरशब्दस्य गौण्या वृत्त्या तत्स्वातन्त्र्यमात्रपरत्वात्तदेव सृष्ट्यादिवाक्याभिप्रेतमिति भावः । ननु स्ववाच्याव्यभिचारिगुणयोगमभिप्रेत्यान्यत्र गौणः शब्दः प्रयुज्यते स्वातन्त्र्यं त्वीश्वरशब्दवाच्ये राजपुत्रादौ व्यभिचरतीत्याशङ्क्य मुख्यमैश्वर्यमीश्वरस्यैवेति स एवेश्वरशब्दवाच्यस्तत्र च स्वातन्त्र्यमव्यभिचारीति तद्विषयगौणप्रयोगो युक्त इति सदृष्टान्तमाह । सिंहस्येति ॥ १७१ ॥

मू० ॥ ऐश्वर्यवस्तु परिगृह्य तदत्यजन्तः
सामर्थ्यसिद्धिमुपपादयितुं क्व चिच्च ॥
सर्वेश्वरश्रुतिवचः समुदाहरन्ति
स्वातन्त्र्यलक्षणगुणस्य तदास्थितायाम् ॥ १७२ ॥

टी० ॥ ननु परमात्मन्येवेश्वरशब्दो गौण इतिभाष्यकारैरुक्तं ततः कथं स एव तद्वाच्यः कथं वा स्वातन्त्र्यमित्याशङ्क्याविद्यादशायां तच्छबलस्यैश्वर्यं निरङ्कुशमिति स एवेश्वरशब्दवाच्यस्तद्बलादेव च तस्य स्वातन्त्र्यं सिद्ध्यति स एव निरुपाधिकस्तस्य गौणोऽर्थे इति तत्रापि तत्प्रयोगोपपत्तिरित्याह । ऐश्वर्यवस्त्विति । पूर्वगुरवस्तमस्वितादशायां स्वातन्त्र्यलक्षणगुणस्येश्वरत्वस्यार्थात्सिद्धिमुपपादयितुमैश्वर्यवस्तु परिगृह्य मायोपाधिकं मुख्यमैश्वर्यं स्वीकृत्य तदत्यजन्तस्तदनिराकृत्यैव क्व चित्सगुणप्रकरणे सर्वेश्वरत्वविषयश्रुतिवचः समुदाहरन्तीति सम्बन्धः ॥ १७२ ॥

मू० ॥ सिंहश्रुतिर्न घटते यदि शूरताऽस्य
न स्यात्तथैव परमेश्वरताश्रुतिश्च ॥
नैश्वर्यलक्षणगुणः परमात्मनश्चे-
दित्यर्थलब्धिमभिसंदधते महान्तः ॥ १७३ ॥

टी० ॥ इदानीं सर्वेश्वरश्रुतिसामर्थ्यात्स्वातन्त्र्यसाधनप्रकारं सदृष्टान्तमाह । सिंहश्रुतिरिति । ऐश्वर्यं लक्षणं गमकं यस्य स्वातन्त्र्यलक्षणगुणस्य स तथोक्तः, यथा सिंहत्वव्यापकत्वात् सिंहशब्देनानुक्तमपि शौर्ये तदर्थोऽर्थात्सिद्ध्यति तथा यस्य यं प्रत्यैश्वर्यं तस्य तदपारवश्यमिति व्याप्तेः सर्वावश्यत्वलक्षणस्वातन्त्र्यं विना सर्वेश्वरत्वायोगात्तच्छ्रुतिबलादेवेश्वरेऽनुपचरितस्वातन्त्र्यगुणसिद्धिरित्यर्थः ॥ १७३ ॥

मू० ॥ श्रोतार्थवृत्तिबललभ्यमपीह वस्तु
श्रौतं वदन्ति निकटत्वमनुस्मरन्तः ॥
आपन्नवृष्टिमपि देवमुदीरयन्ति
वर्षन्तमेव हि जना भुवि तादृगेतत् ॥ १७४ ॥

टी० ॥ ननु श्रुतार्थापत्तिगम्यस्य श्रुतत्वाभावादीश्वरे श्रुत्यविरुद्धवस्तुत्वादिलिङ्गकपारतन्त्र्याशङ्का दुर्निरासा स्यादित्याशङ्क्य श्रुतार्थापत्तिगम्यं विना श्रुतार्थस्यैवानिर्वाहाच्छ्रुतिमूलार्थापत्तेः श्रुतितुल्यत्वं श्रुत्यैव

र्पापितमिति न्यायवित्संमतम्, तथा च तद्विरोधेऽप्यनुमानमुदेतुं नार्हतीत्याशयेनाह । श्रोतार्थेति । मुख्यार्थे शब्दस्य या वृत्तिस्तत्सामर्थ्यलभ्यमित्यर्थः । तदव्यवहितस्य तच्छब्देन व्यवहारं दृष्टान्तेनोपपादयति । आसन्नेति । देवं पर्जन्यम् । अत्रेश्वरश्रुतिलक्षितस्यानन्त्यस्य शुद्धात्ममात्रतया विवक्षितत्वाच्च तेन तस्य सगुणत्वापत्तिरित्यपि द्रष्टव्यम् ॥ १७४ ॥

मू० ॥ ऐश्वर्यमज्ञानतिरोहितं यद्
ध्यानादभिव्यज्यत इत्यवोचत् ॥
शरीरिणः सूत्रकृदस्य यत्तु
तदभ्युपेत्योदितमुक्तहेतोः ॥ १७५

टी० ॥ ननु सूत्रकार एव पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययाविति सूत्रेण जीवस्य स्वाभाविकमेवैश्वर्यमविद्यादशायां देहाद्यभिमानवशात्तिरोहितमीश्वरध्यानान्मुक्तावभिव्यज्यते इत्याह, तत्कथं मुक्तौ निर्विशेषत्वमात्मन इति शङ्कां सूत्रकाराभिप्रायप्रदर्शनेन परिहरति । ऐश्वर्यमिति । अस्य शरीरिण इत्यादौ योज्यम् । यत्त्ववोचदिति सम्बन्धः । तत्र हि स्वप्नरथादेः कृप्रकारणाभावेऽपि जीवस्येश्वरांशत्वात्स एव स्वकीयैश्वर्यवशाद्वास्तवमेव स्वप्नप्रपञ्चं सृजतीतिशङ्कायां विद्यमानस्याप्यैश्वर्यस्य तदा तिरोहितत्वाज्जीवस्य तद्वच विचित्रवास्तवप्रपञ्चस्रष्टृत्वमित्यभ्युपगमवादेनोक्तं सूत्रकारेण न स्वसिद्धान्ततया, न स्थानतोऽपि परस्येत्यादिनोक्तश्रुतिन्यायविरोधापातात्, तद्विरोधाभावादेर्दुर्निरूपत्वाच्चेत्यर्थः ॥ १७५ ॥

मू० ॥ अथ वा चितिवत् प्रतीयतां
पुरुषस्येश्वरतापि वास्तवी ॥
यदि किं चन कारणं भवे-
न्न विना सा तदिहाभ्युपेयते ॥ १७६ ॥

टी० ॥ किं च सूत्रोक्तमित्येतावता न वास्तवमैश्वर्यमभ्युपेयं तस्य श्रुतिवत्स्वतः प्रमाणत्वाभावात्प्रमाणापेक्षितन्यायमात्रसूचकत्वाच्च, न च

जीवस्य स्वाभाविकैश्वर्यं किं चित्प्रमाणं न्यायो वा शक्यते वक्तुम्, न चेश्वरांशत्वाज्जीवे तदैश्वर्यमस्तीति वाच्यम्, तस्यैव भेदादिना दुर्निरूपत्वेनासिद्धेः, अंशस्यांशिगतसामर्थ्यवत्त्वानियमाच्च, ईश्वरैश्वर्यस्यापि स्वाभाविकत्वे मानं नेत्युक्तमित्याशयेनाह । अथ वेति । एतदनास्थायाम् । कारणं प्रमाणम् ॥ १७६ ॥

मू० ॥ कामादि तत्र च भवेदितरत्र चेति
यत् सूत्रकारवचनं तदुदीक्षमाणाः ॥
कामादिकेन दहरस्थगुणेन तुल्यं
सर्वेश्वरादिगुणजातमिति प्रतीमः ॥ १७७ ॥

टी० ॥ किं च कामादीतरत्र तत्र चायतनादिभ्य इति सूत्रे छान्दोग्ये अथ यदिदमस्मिन्ब्रह्म पुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश इति प्रस्तुतदहराकाशस्य य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इत्युक्तसत्यकामादिगुणानां बृहदारण्यके स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशान इति परात्मन्युक्तवशित्वादिगुणानां चेतरेतरत्रोपसंहारो वर्णितः, तत्र दहर उत्तरेभ्य इत्युक्तन्यायाद्दहराकाशो ब्रह्मैव तथापि तद्विद्या सगुणब्रह्मविषया तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामानिति कामादिगुणानामपि वेद्यत्वश्रवणाद्बृहदारण्यकेऽपि अत ऊर्ध्वं विमोक्षायैव ब्रूहीति प्रश्नोपक्रमात्स एष नेति नेत्यात्मेत्युपसंहाराच्च तद्विद्या निर्गुणविषया, तथा च भिन्नविद्ययोरुपसंहृतानामेतेषामुपासनं प्रमितिर्वा न प्रयोजनम्, ततश्चोपसंहृतेः कामादिगुणैः सगुणत्वं बृहदारण्यके न विवक्षितं सूत्रकारस्य, एवं वशित्वादिभिरप्युपसंहृतैरिव श्रुतेरपि सगुणत्वं ब्रह्मणो न विवक्षितमिति गम्यत इत्याशयेनाह । कामादीति । उदीक्षमाणा उक्तरीत्या विचारयन्तो वयमित्यर्थः ॥ १७७ ॥

मू० ॥ दहरस्थगुणोपसंहृतेः
स्तुतिमात्रं विरहय्य नापरम् ॥
फलमस्ति परात्मनिश्चिते
वचने वाजिभिरादृते महत् ॥ १७८ ॥

टी० ॥ तर्हि तेषामितरेतरत्रोपसंहारस्य किं फलमित्याशङ्क्य बृहदारण्यके सत्यकामादिगुणोपसंहारस्य परिशेषात् स्तुतिमात्रं फलमिति तावदाह । दहरस्थेति । महत् साक्षात्स्वरूपार्थपर्यवसायि ॥ १७८ ॥

मू० ॥ दहरादुपसंहृतेर्गुणैः
सदृशाश्चेद् वशितादिलक्षणाः ॥
न तदा परमात्मरूपतां
प्रतिपत्तुं कलयाऽपि शक्नुयुः ॥ १७९ ॥

टी० ॥ तथापि वशित्वादिगुणानां वस्तुतत्त्वबोधप्रकरणे श्रुतत्वाद्वस्तुविशेषकत्वमित्याशङ्क्य सूत्रकारेणैव तेषां सत्यकामादिगुणसमानयोगक्षेमत्वाभिधानादुपसंहृतानामिव श्रुतानामपि स्तावकत्वमुक्तविधया स्वातन्त्र्योपलक्षकत्वं चोपेयं न वस्तुस्वभावत्वं केनापि प्रकारेणेत्याशयवानाह । दहरादुपसंहृतेरिति । स्पष्टार्थान्यक्षराणि ॥ १७९ ॥

मू० ॥ परमेश्वरतागुणोऽप्यतः
स्तुतये तस्य परस्य वस्तुनः ॥
परिकीर्तित इत्युपेयता-
मविशेषाद् वशितादिलक्षणैः ॥ १८० ॥

टी० ॥ ननु तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति श्रुतावव्याकृतात् परस्य शुद्धस्य परमेश्वरत्वाभिधानात्तस्य तद्रूपत्वमित्याशङ्क्य वशित्वादिसन्निधिपठितसर्वेश्वरत्वस्यैवात्रापि प्रत्यभिज्ञायमानत्वात्तस्य च पूर्वोक्तविधया स्तावकत्वादिदमपि तथैवेत्याह । परमेश्वरतेति । अतःशब्दार्थं विशदयति । अविशेषादिति ॥ १८० ॥

Digitized by Google

मू० ॥ कारणत्वमपि चित्सुखादिव-
त्तत्स्वरूपमिति किं न गृह्यते ॥
ईश्वरत्वविषये विपश्चितां
पक्षपातकरणे न कारणम् ॥ १८१ ॥

टी० ॥ नन्वीश्वरत्वं प्रतिवेदान्तं बहुशः श्रुतत्वात्तद्ब्रह्मस्वरूपमित्याशङ्क्य कारणत्वसाक्षित्वप्रतिबन्द्या परिहरति श्लोकद्वयेन । कारणत्वमपीति । कारणत्वस्य सापेक्षत्वाच्चिरपेक्षात्मस्वरूपं तदिति न गृह्यत इत्याशङ्क्येश्वरत्वस्यापीशितव्यापेक्षत्वं तुल्यमित्याशयेनाह । ईश्वरत्वविषय इति ॥ १८१ ॥

मू० ॥ साक्षितापि परमात्मनो भवे-
दीश्वरत्ववदियं न संशयः ॥
नित्यसिद्धनिजबोधरूपव-
द्रूपमेव निरुपाधिकं विभोः ॥ १८२ ॥

टी० ॥ इयं श्रुतियुक्तिसिद्धा । साक्षितायाः साक्ष्यसापेक्षत्वाच्च परमात्मस्वरूपत्वमित्यपि न शङ्कनीयम्, उक्तोत्तरत्वादित्याशयेनाह । न संशय इति । इयं साक्षितापि विभोः परमात्मनो निरुपाधिकं रूपमेव भवेदिति सम्बन्धः ॥ १८२ ॥

मू० ॥ एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ॥
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च ॥ १८३ ॥

टी० ॥ साक्षित्वं कारणत्वं च ब्रह्मणः श्रुत्या नैवोक्तमिति वैषम्यमाशङ्क्य तत्र मन्त्रानुदाहरति त्रिभिः । एको देव इत्यादिना । ब्रह्मविष्ण्वादिभेदनिरासाय एक इत्युक्तम्, तस्य जडत्वनिरासाय देव इति, द्योतनस्वभावश्चिद्रूप इत्यर्थः । तस्य ब्रह्माण्डाद्बहिरवस्थितिशङ्कां निराकरो-

ति । सर्वभूतेष्विति । तत्रानुपलम्भविरोधं परिहरति । गूढ इति । तर्हि परिच्छिन्नत्वं नेत्याह । सर्वव्यापीति । तथाप्याकाशादिवत्परात्मत्वशङ्कां वारयति । सर्वभूतान्तरात्मेति । तर्हि जीववत्कर्तृत्वादिसंसारी स्यादित्याह । कर्माध्यक्ष इति । कर्मसु बुद्ध्यादिव्यापारेषु क्रियमाणेषु स्वयं संनिधिमात्रेणाध्यक्ष एव न तु तद्वानित्यर्थः । ततोऽन्यस्य जगदुपादानत्वशङ्कां वारयति । सर्वभूताधिवास इति । सर्वाणि भूतान्यध्यस्ततया वसन्त्यस्मिन्निति स तथोक्तः । जगदाकारेण परिणामित्वं निराकरोति । साक्षीति । साक्ष्यवस्तुनः साक्षिधर्मत्वायोगादाध्यासिकसम्बन्धेनैव तत्साक्षीत्यर्थः । तर्हि साक्षाद्दीक्षणात्साक्षीतीक्षणव्यापारवत्त्वाच्च कौटस्थ्यमिति नेत्याह । चेता, स्वरूपभूतचितिवाभासको न व्यापारद्वारेणेत्यर्थः । तत्र व्यापाराभावे हेतूपरागाभावं हेतुमाह । केवलः, असङ्ग इत्यर्थः । तर्हि सुखादिगुणसम्बन्धादसङ्गत्वं कथमित्याशङ्क्य तस्य तत्स्वरूपत्वाच्च गुणगुणिभावोऽस्तीत्याह । निर्गुण इति । सर्वसाक्षित्वादेव तस्यान्योऽपि भावोऽभावो वा वास्तवो धर्मो नेति चशब्दार्थः ॥ १८३ ॥

मू० ॥ न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ॥
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ॥ १८४ ॥

टी० ॥ जीववद्देहद्वयपरिच्छिन्नत्वं वारयति । न तस्येति । तर्हि तदधीनत्वात्कर्तृत्वादेस्तद्रहितस्य सर्वकर्तृत्वं सर्वज्ञत्वं च कथं स्यात्तदभावे वा कथमीश्वरत्वमिति चेत्तत्राह । न तत्समश्चेति । देहादिपरिच्छेदाभिमानिन एव सर्वज्ञत्वादि दुर्घटं तद्रहितस्य तु स्वातन्त्र्यं ज्ञातृत्वादौ, सम एव न कुतोऽभ्यधिकः, अतः स एव सर्वज्ञः सर्वकर्ता चेति तस्य कारणत्वमीश्वरत्वं च सिद्धमित्यर्थः । देहादिहीनस्य किञ्चित्कर्तृत्वमपि न संभवति कुतः सर्वकर्तृत्वमित्याशङ्क्य यस्य देहाद्यधीनं सामर्थ्यं तस्य तदभावे समर्थ्याभावान्मास्तु कर्तृत्वादि यस्य तु स्वतः

सिद्धा मायाख्या परा निरतिशया विविधा विचित्रकार्यानुकूला शक्तिस्तस्य देहादिना विना किं श्रूयत इत्याह । परास्येति । श्रूयते, मायिनं तु महेश्वरमित्यादौ । तथापि जडया तया कथं सर्वज्ञत्वसिद्धिरित्यत आह । स्वाभाविकीति । ज्ञानस्य स्वरूपभूतस्य यद्बलमनावृतत्वं तेन व्याकृता-व्याकृतसर्वविषयावच्छिन्नस्फुरणरूपफलक्रिया तदभिव्यक्तिः, स्वाभाविकी देहादिनिरपेक्षैव सिद्धा यः सर्वविदित्यादिश्रुतौ, तत ईश्वरत्वादि नानुप-पन्नमित्यर्थः ॥ १८४ ॥

मू० ॥ न तस्य कश्चित् पतिरस्ति लोके
न चेशिता नैव च तस्य लिङ्गम् ॥
स कारणं वै करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः ॥ १८५ ॥

टी० ॥ तथापि तस्य सर्वेश्वरत्वं सर्वकारणत्वं च कथं तस्यापि स्वाम्यन्तरादेः संभवादित्याशङ्क्याह । न तस्य कश्चिदिति । पतिः स्वामी । ईशिता नियन्ता । तदभावे हेतुमाह । नैव चेति । लिङ्गते चेतनोऽनेनेति कार्यकारणसंघातो लिङ्गम्, यो हि देहादिपरिच्छिन्नोऽशना-यादिमान्भवति तस्यैव स्वाम्यादिः संभाव्यते, ईश्वरस्य तु तदभावादेव स्वाम्यन्तराद्यसंभवात्स्वयं सर्वेश्वर इत्यर्थः । सर्वकारणत्वमुपपादयति । स कारणमिति । सर्वकार्यस्येति शेषः । न तस्य कश्चित्पतिरस्तीत्यत्र हेत्वन्तरमाह । करणेति । चक्षुरादिकरणानामधिपाः सूर्यादयस्तेषामप्य-धिष्ठाय पालयिता, अतो न तस्य कश्चित्पतिरस्तीत्यर्थः । सर्वकारणत्वादि निगमयति । न चास्य कश्चिदिति । यतोऽस्य कश्चिज्जनिता नास्ति ततोऽयमेव मूलकारणम्, यतश्चान्योऽधिपो नास्ति ततोऽयं सर्वेश्वर इत्यर्थः ॥

मू० ॥ इति श्रुतिः कारणसाक्षिभाव-
मैश्वर्यवद्वक्ति परस्य पुंसः ॥

अतत्परत्वान्न तदिष्यते चेद्
द्वयं तृतीयं न तथेषितव्यम् ॥ १८६ ॥

टी० ॥ ईश्वरत्ववत्कारणत्वादेः श्रौतत्वं निगमयति । इति श्रुतिरिति । कारणत्वं साक्षित्वं चेति द्वयमन्यपरमन्त्रादिसमर्पितत्वाद्वस्तुस्वभावतया नापेयत इत्याशङ्क्य तृतीयमीश्वरत्वं मन्त्रादिना तेन सहैवोक्तत्वात्तद्वदेव न ग्राह्यमित्याह । अतत्परत्वादित्यादिना ॥ १८६ ॥

मू० ॥ अतत्परत्वं श्रवणस्य तुल्यं
त्रिषु त्रयं तेन विवर्जनीयम् ॥
अथेष्टमेकं त्रयमेषितव्यं
विशेषहेतोरनिरूपणेन ॥ १८७ ॥

टी० ॥ कारणत्वादिश्रवणस्याखण्डैकरसत्वपरश्रुत्यन्तरविरोधादतत्परत्वं चेदीश्वरत्वश्रवणस्यापि तत्तुल्यम्, तेन त्रयमपि वर्जनीयमित्याह । अतत्परत्वमिति । ईश्वरत्वस्याखण्डस्वरूपमात्रत्वात्र श्रुत्यन्तरविरोधश्चेत्कारणत्वाद्यपि तथेष्यताम्, तस्य सापेक्षत्वात्र निरपेक्षवस्तुमात्रत्वं चेदीश्वरत्वस्यापि तत्तुल्यमित्याशयेनाह । अथेष्टमिति ॥ १८७ ॥

मू० ॥ ईशितव्यमनपेक्ष्य नेश्वरो
नेशितव्यमपि तद्वदीश्वरम् ॥
अन्तरेण घटते ततो मृषा
मोहमात्रपरिकल्पितं द्वयम् ॥ १८८ ॥

टी० ॥ तर्हि त्रयमपि वस्तुरूपं सत्यं च भवत्वित्याशङ्क्य तत्र तावदीश्वरेशितव्ययोः परस्परापेक्षत्वेन तद्भावस्य मिथ्यात्वं वदंस्तस्याखण्डवस्तुस्वरूपत्वमयुक्तमित्याशयवानाह । ईशितव्यमिति । ईश्वरो न घटत इति सम्बन्धः, ईश्वरत्वं न सम्भवतीति यावत्, तद्वदीश्वरत्ववदीशितव्यमपीश्वरमन्तरेण न घटते, द्वयोरप्यन्योन्याधीननिरूपणतया परस्परप्रमापेक्षकत्वादुभयोरपि प्रमित्यनुपपत्तेरुभयं भ्रान्तिमात्रसिद्धत्वादनिर्वचनीयमित्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ १८८ ॥

Digitized by Google

मू० ॥ कार्यवस्तु विरहय्य कारणं
न क्व चिद् घटयितुं क्षमेमहि ॥
नापि कारणमपोह्य केवलं
कार्यवस्तु परिकल्पयेमहि ॥ १८६ ॥

टी ॥ एवं कारणत्वमपि सापेक्षत्वात्कार्यवत्कल्पितम्, तथाहि, कारणत्वस्य कार्यानियतपूर्वभावात्मत्वात्कार्यत्वस्य च कारणानियतपश्चाद्भावात्मत्वेन परस्परापेक्षत्वात्पूर्वोत्तरभावयोरपि परस्परापेक्षत्वादित्याह । कार्यवस्त्विति । कारणं तत्त्वम्, तथा च तदपि न वस्तुस्वरूपमिति भावः ॥ १८९ ॥

मू० ॥ साक्ष्यवस्तु परिहृत्य साक्षिता
साक्षिणं च परिहृत्य साक्ष्यता ॥
नेष्यते न घटते च तेन तत्
सव्यपेक्षमुभयं परस्परम् ॥ १६० ॥

टी० ॥ इदानीं साक्षिताया अपि सापेक्षत्वेन कल्पितत्वाच्च वस्तुरूपत्वमित्यभिप्रेत्याह । साक्ष्यवस्त्विति । एकैकं परिहृत्योभयस्याप्यसम्भवे फलितमाह । तेनेति । परस्परापेक्षत्वे फलितमाह । न घटत इति । तदुभयं वस्तुतो न घटते, ततः कल्पितत्वात्साक्षित्वमपि न वस्तुरूपमिति वाक्यार्थः ॥ १९० ॥

मू० ॥ न प्रमेयमपहाय मातृता
नापि मातृविरहे प्रमेयता ॥
मातृमेयरहिता न च प्रमा
न प्रमाणरहितं प्रमाफलम् ॥ १६१ ॥

टी० ॥ ननु मातृमेयादेः परस्परसव्यपेक्षत्वेऽपि सत्यत्ववदीश्वरत्वादेरपि तत्किं न स्यादित्याशङ्क्य दृष्टान्तासिद्धिमभिप्रेत्य तत्राप्युक्तन्यायेन कल्पितत्वं साधयति । न प्रमेयमिति । प्रमारहिते च न मातृमेये

इति चशब्दार्थः । एवं प्रमायाः प्रमाणापेक्षत्वं तस्य च प्रमापेक्षत्वमिति परस्परापेक्षत्वात्सर्वमेतत्कल्पितमित्याशयेनाह । न प्रमाणेति । प्रमैव फलम् ॥ १९१ ॥

मू० ॥ कर्तृ कर्म परिहृत्य नेष्यते
कर्म कर्तृरहितं न च क्व चित् ॥
कर्तृकर्मरहिता न च क्रिया
न क्रियाविरहितं क्रियाफलम् ॥ १९२ ॥

टी० ॥ एवं कर्मादिकारकप्रेरकस्य कर्तृत्वात्कर्तुरीप्सिततमस्य कर्मत्वात्तयोरपि परस्परापेक्षत्वम्, एवं क्रियाकारकयोः क्रियातत्फलयोश्च परस्परापेक्षत्वेन कल्पितत्वाच्च सत्यत्वमित्यभिप्रेत्याह । कर्तृ कर्मेति । क्रियाफलं कार्यम् ॥ १९२ ॥

मू० ॥ सामान्यं न विशेषवस्तुविरहे तस्माद् विना तन्न च
स्वातन्त्र्येण घटामुपाञ्चति ततः सापेक्षमेतद् द्वयम् ॥
यत् सापेक्षमिहेक्षितं भवति तन्मायामयं स्वप्नव-
त्तस्मादीश्वरतादि कल्पितवपुः स्वीकुर्महे न्यायतः ॥ १९३ ॥

टी० ॥ एवं सामान्यविशेषयोरप्यनुवृत्तव्यावृत्तस्वरूपयोः परस्परापेक्षत्वान्मृषात्वमित्याह ।सामान्यमिति । तस्मात् सामान्यात् । तद् विशेषवस्तु । घटां घटनाम् । उपाञ्चति उपगच्छति । आस्तां तावद् यत्परस्परापेक्षं तन् मिथ्येति यद्वेव यत्किंचित्सापेक्षं तत्सर्वं मायिकं किमु परस्परापेक्षमित्याशयेनाह । यत्सापेक्षमिति । फलितं निगमयति । तस्मादिति ॥ १९३ ॥

मू० ॥ अभिन्नता भिन्नतया विरुद्धा
विभिन्नताऽभिन्नतया तथैव ॥
उपाधिभेदे परिकल्प्यतेऽपि
विना पुनस्तं किमुदीरणीयम् ॥ १९४ ॥

Digitized by Google

टी० ॥ किं च किं भिन्नयोरीश्वरेशितव्यभावः, उताभिन्नयोः, भिन्ना-भिन्नयोर्वा, नाद्यः, भिन्नस्येश्वरस्य जीवैः सह सम्बन्धानिरूपणेन तस्य तत्प्रेरणादिरूपेशनानुपपत्तेः, तदभेदपरश्रुत्यादिविरोधाच्च, न द्वितीयः, अत्यन्ताभिन्ने तद्भावायोगादित्यभिप्रेत्य तृतीयेऽपि पक्षे स्वतोऽभिन्नयोर्जीवेश्वरयोर्भेदः किमौपाधिक उत निरुपाधिकः, आद्येऽपि स किं सत्योऽसत्यो वा, सत्यत्वपक्षेऽपि भेदस्यौपाधिकत्वं किमभेदेनाविरोधायोच्यते तत्सत्यत्वाय वा, नान्त्यः, व्याघातादित्यभिप्रेत्याविरोधायेतिपक्षं दूषयति पादत्रयेणाभिन्नतेत्यादिना । वस्तुतोऽभिन्ने वस्तुनि सत्यस्यौपाधिकभेदस्य क्वाप्यदर्शनात्तस्याप्यभेदेन विरोधोऽपरिहार्य इत्यर्थः । औपाधिकभेदस्यासत्यत्वपक्षे तदधीनेश्वरत्वेशितव्यादिभावस्यापि तथात्वापत्तेरिष्टापत्तिमभिप्रेत्य भेदस्यानौपाधिकत्वपक्षे कैमुतिकन्यायेनाभेदेन विरोधं वदंस्तयोरेकत्रासंभवमाह । विनेति । तमुपाधिम्, यदा सोपाधिकस्यापि विरोधस्तदा निरुपाधिकभेदस्याभेदेन विरोध इति किं वक्तव्यम्, ततोऽयमपि पक्षो न संभवतीत्यर्थः ॥ १९४ ॥

मू० ॥ स्वभावतो यन्न मिथुनं विरुद्धं
न तन्निमित्तान्तरतः कदा चित् ॥
उपैति सख्यं परमार्थवृत्त्या
भ्रमादलभ्यं न च किं चिदस्ति ॥ १९५ ॥

टी० ॥ ननु स्वभावतः शीतेऽपि जलेऽग्निसंबन्धादौष्ण्यं सत्यमेव दृष्टं ततोऽपि दाहादिदर्शनात्, एवमौपाधिकोऽपि भेदः सत्यः किं न स्यादित्याशङ्क्य दृष्टान्तासंप्रतिपत्त्या परिहरति । स्वभावत इति । सख्यं सामानाधिकरण्यम्, तत्रापि जलगताग्न्यौष्ण्यस्यैव दाहादिहेतुत्वे सम्भवति जलगतसत्यौष्ण्यादौ मानाभावाच्च तत्र शैत्यौष्ण्ययोः सामानाधिकरण्यमित्यर्थः । तर्हि कथं जलगततयौष्ण्यादिप्रतीतिः, शैत्यं च तद्गतं किमिति न प्रतीयत इति तत्राह । भ्रमादिति । स्वत उष्णाग्निरूपोपाधिसम्बन्धात् स्फटिकलौहित्यादिवद्भ्रमादेव जलादावौष्ण्यादेः प्रतिभासः, तदी-

यशैत्यस्य च स्फटिकशौक्ल्यवदुपाध्यभिभवदोषादप्रतिभासश्च घटते, इतरथा जलगतौष्ण्यशैत्ययोरुत्पत्तिविनाशयोः क्लृप्तकारणानिरूपणात्तयोः प्रतिभासाप्रतिभासौ न स्यातामिति भावः ॥ १९५ ॥

मू० ॥ न रविशार्वरसख्यकृदीक्ष्यते
जगति कश्चिदुपाधिरमोहतः ॥
यदि भवेत् स भवेद् भवतो मतः
स न भवेद् यदि सोऽपि न संभवेत् ॥ १९६ ॥

टी० ॥ ननु त्वन्मत इव भेदाभेदयोः साहित्यं परमतेऽपि किं न स्यादित्याशङ्क्य मन्मते वास्तवाभेदे सत्यपि भेदस्यानिर्वचनीयाविद्याप्रयुक्तत्वेन मिथ्यात्वात्तयोः समसत्ताकत्वाभावेनाविरोधाच्छुक्तौ रजततदभावयोरिव साहित्यं घटते, एवं त्वन्मतेऽप्यनिर्वचनीयमोहोपाधिको भेदः स्वाभाविकस्त्वभेदो जीवेश्वरयोरिति यद्यभ्युपगमस्तदेष्टमिति ब्रूमः, यदि तु मोहातिरिक्तसत्योपाधिकृतो भेदो वास्तव इत्यभ्युपगमः स न सम्भवति समसत्ताकयोर्विरुद्धयोरेकत्रैकदा साहित्यायोगात्तद्घटकोपाधेरेवासम्भवादिति दृष्टान्तेनाह । न रवीति । शार्वरं तमः । अमोहतः मोहातिरेकेण । रविशार्वरयोः साहित्यहेतुरुपाधिरदर्शनादेव मा भूदभिन्ने वस्तुतो भेदघटक उपाधिः किं न स्यादित्याशङ्क्य तस्यापि क्वचाप्यदर्शनात्तत्समानयोगक्षेमत्वमाह । यदि भवेदिति । सोऽपि त्वदभिमतोऽपि ॥ १९६ ॥

मू० ॥ खमपि खादति खण्डितमीक्ष्यते
निजशिरो नयनेन करार्पितम् ॥
किमपि दुर्घटमस्य न विद्यते
यदि विमूढमतिर्भवति स्वयम् ॥ १९७ ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालाध्यापकेन मोहिवेदहरिनाथशर्मणा ।

Digitized by Google

॥ श्रीः ॥

श्रीं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(*Continued from page* 560. Vol. IX.)

श्रु० न केवलं वस्तुनस्त्वदात्मकं जगत् देवमनुष्याद्यात्मकमिति दर्शनमेव भ्रमः, ज्ञानाकाराणामात्मनां देवमनुष्याद्यर्थाकारत्वदर्शनमपि भ्रम इत्याह "ज्ञानस्वरूपमखिल"मिति, ये पुनर्बुद्धिमन्तो ज्ञानस्वरूपात्मविदः सर्वस्य भगवदात्मकत्वानुभवसाधनयोगयोग्यपरिशुद्धमनसश्च ते देवमनुष्यादिप्रकृतिपरिणामविशेषशरीररूपमिदमखिलं जगच्छरीरातिरिक्तज्ञानस्वरूपात्मकं त्वच्छरीरं पश्यन्तीत्याह "ये तु ज्ञानविद" इति,

टी० "न केवल"मिति, चिदचिदात्मके जगति चेतनरूपं जगद्विवक्षितं ज्ञानस्वरूपमखिलं जगदित्ति जगच्छब्देन, यथा "त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्यय"मित्यत्र ज्ञानस्वरूपस्य जडरूपार्थस्वरूपत्वबुद्धिर्भ्रम इत्युक्तेऽर्थस्वरूपस्यार्थस्वरूपत्वबुद्धिर्न भ्रमः स्यादिति च सिद्धं देहात्मभ्रमः संसर्गकृतः जलमुष्णमितिवत् आत्मासाधारणधर्मज्ञानस्फुरणेऽपि तस्यासाधारणत्वाज्ञानात् भ्रमोपपत्तिः, चतुर्थं व्याचष्टे "ये पुनरि"ति, "विज्ञानं चाविज्ञानं चे"ति विज्ञानशब्दस्यात्मवाचित्वात् ज्ञानस्वरूपात्मविद इत्युक्तम् । अबुद्धय इति पूर्वश्लोकोक्तार्थप्रतियोगित्वेन ज्ञानविद इत्युक्तमिति स्मारयति "बुद्धिमन्त" इति, अयोगिन इत्यस्य प्रतियोगित्वेन शुद्धचेतस इत्युक्तमिति सूचयति "योगयोग्य-

परिशुद्धमनस" इति, योगयोग्यत्वे हेतुः परिशुद्धत्वं "मनसा तु विशुद्धेन इति भगवतः साक्षात्काररूपोपासननिष्पत्तिः श्रूयते, मनोविशुद्धिश्च कर्मयोगात् योगेन योग्यतापरिशुद्धिरिति वाऽर्थः, पूर्वश्लोके अखिलजगच्छब्देन चेतनरूपं जगद्विवक्षितम् अस्मिन् श्लोके ऽखिलजगच्छब्देन अचिद्रूपं जगद्विवक्षितं कृत्स्नापारमर्थ्यं विवक्षितमिति पक्षे प्रथमश्लोके संक्षिप्तदूषणमनुक्तदूषणेन सह विस्तरेण सर्वश्लोकसाधारणमाह–

सू० अन्यथा श्लोकानां पौनरुक्त्यं, पदानां लक्षणा, अर्थविरोधः, प्रकरणविरोधः, शास्त्रतात्पर्यविरोधश्च, तस्मात्मपरदेहेषु सतो ऽप्येकमयमित्यत्र सर्वेष्वात्मसु ज्ञानैकाकारतया समानेषु सत्सु देवमनुष्यादिप्रकृतिपरिणामविशेषरूपपिण्डसंसर्गकृतमात्मसु देवाद्याकारेण द्वैतदर्शनमतथ्यमित्युच्यते पिण्डगतमात्मगतमपि द्वैतं न प्रतिषिध्यते देवमनुष्यादिविविधविचित्रपिण्डेषु वर्त्तमानं सर्वमात्मवस्तु समिमित्यर्थः ।

टी० "अन्यथे"ति, स्वान्यभ्रमो देहात्मभ्रमश्चेति विभागाभावेन पौनरुक्त्यमित्यर्थः, लक्षणा–परमेश्वर ? जगतः पते ? तव महिमा त्वमित्यादिशब्दानां लक्षणा त्वं–शब्दो हि स्वाभिमुखाहमर्थान्तर[1]माह अतस्तस्य लाक्षणिकत्वम् अर्थविरोधः प्रत्यक्षादिभिरबाध्यत्वेन सिध्यतोऽसत्यत्वे प्रमाणविरोधः, तिरोधानानुपपत्तिस्तर्कविरोधः, उभयलिङ्गत्वविरोधश्च प्रकरणविरोधः, स्तुतिविरोधः, रामान्तरस्था मुनयः स्तुवन्तीति हि प्रकृतं स्तोतृस्तुत्यद्वैतज्ञानवत्त्वे स्तुत्यनुपपत्तिस्तदभावे च नितरां शास्त्रतात्पर्यविरोधः, उपक्रमोपसंहारावान्तरप्रकरणोपक्रमोपसंहारादिविरोधः । एवमादिभक्तचतुःश्लोकीं परस्परव्यवहितां व्याचष्टे "तस्येत्यादिना, ब्रह्माद्वैतं जीवाद्वैतं चेत्यद्वैतं द्विविधं शास्त्रप्रतिपाद्यं तत्र ब्रह्माद्वैत प्रकाराद्वैतं जीवाद्वैतं

१ स्वाभिमुखाहमर्थवाचीति पा० ।

प्रकाराद्वैतं कोऽत्र नियामक? इति चेत्, उच्यते ब्रह्मप्रकरणेषु सामानाधिकरण्येन ब्रह्माद्वैतप्रतिपादनात् सामानाधिकरण्यस्य च प्रकारभेदविशिष्टप्रकार्यैकत्वपरत्वात् "एकः सन् बहुधा विचार" इति प्रकारबहुत्वस्य कण्ठोक्तत्वादैक्यविधिशेषस्य "नेह नानास्तीत्यादिभेदनिषेधस्य विहितैक्यविरोधिभेदविषयत्वात्सामान्यनिषेधस्य च विहितव्यतिरिक्तविषयत्वेन न प्रकारबहुत्वनिषेधपरत्वात् "न तत्समश्चाभ्यधिकश्च दृश्यते" इति ब्रह्मतुल्यप्रकार्यन्तरनिषेधकण्ठोक्तया च प्रकार्यद्वैतमेव ब्रह्माद्वैतं जीवात्मबहुत्वस्य श्रुतिसिद्धत्वात्, अन्यथा बद्धमुक्तव्यवस्थाऽनुपपत्तेरुपदेशानुपपत्तेः, सुखादिव्यवस्थाऽनुपपत्तेः "पुमान्न देवो न नरो न पशुर्न च पादपः । चतुर्विधोऽपि भेदोऽयं मिथ्याज्ञाननिबन्धनः । देवादिभेदे ऽपध्वस्त इत्यादिभिर्भेदविशेषनिषेधस्य कण्ठोक्तत्वात्, मुक्तानां साम्यवचनात्, "अहं त्वं च तथाऽन्ये च । तत्र त्वमहमप्यत्र तन्मनस्समतामगादीत्यादिप्रकरणकावचनानुरोधादेको व्रीहिरितिवदेकशब्दस्यैकजातीयपरत्वोपपत्तेर्वेत्यमात्यश्लोकस्य शब्दस्वभावाच्च जीवाद्वैतं प्रकाराद्वैतमेव "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामानि"त्यस्य वाक्यस्य कामविधानपरत्वाच्च नित्यत्वबहुत्वयोस्तात्पर्यमस्ति, अस्ति चेत् वाक्यभेदप्रसङ्गादिति चेत् न यदाऽऽग्नेयोऽष्टाकपाल इत्यत्र अष्टाकपालत्वविशिष्टाग्नेयपुरोडाशविधिवद्विशिष्टविधिपरत्वाद्वाक्यस्य, नित्यबहुचेतनविशिष्टकामप्रदानविधिपरं हीदं प्रतीयते, अनित्यानामल्पानां कामप्रदानादपि नित्यानां कामाप्तानां बहूनां कामप्रदाने कथिते हि कामप्रदानस्यातिशयो भवति जीवबहुत्वस्य लोकसिद्धत्वाच्च तत्र शास्त्रतात्पर्यम् "अप्राप्ते हि शास्त्रमर्थव"दिति चेन्न संसृष्टस्य हि बहुत्वप्रतीतिर्लौकिकसिद्धा परिशुद्धात्मस्वरूपबहुत्वस्य लोकसिद्धत्वाभावात् तत्र हि शास्त्रतात्पर्यं सम्भवति, औपाधिकाकारस्यानित्यत्वाविकृष्टस्वरूपस्य नित्यत्वात् नित्यत्वसमानाधिकरणबहुत्वे ऽभिहिते परिशुद्धात्मस्वरूपबहुत्वं स्फुटं भवति, उपदेशोऽपि न सम्भवति गुरुशिष्यान्तरस्येवोपदेशः अभ्रान्तश्चेत् द्वैतप्रतीत्यभावादितरां, द्वैतप्रतीतावपि दर्पणस्थं स्वात्मनः प्रतिबिम्बं प्रति च विवक्षितस्य नोपदेशः सम्भवतीति,

Digitized by Google

सुखदुःखादिव्यवस्थया चात्मभेदसिद्धिः, । ननु सुखदुःखव्यवस्था नाम किं सुखदुःखव्यक्तिबहुत्वं ? मुत तदाश्रयबहुत्वम् ? एकस्यैवानेकसुखव्यक्तिदर्शनात्सुखादिस्वरूपबहुत्वं नात्मैक्यविरोधीति न व्यवस्था, आश्रयभेदश्चेत्साध्याविशिष्टो हेतुरिति चेच्च त्वदुक्तोभयप्रकारविलक्षणत्वाद्व्यवस्थायाः सम्मतिपन्नैकाश्रयेषु सुखदुःखादिषु प्रतिसन्धानं दृष्टं प्रतिबन्धकाभावे सत्येकाश्रयत्वेन सुखादिप्रतिसन्धानाभावो व्यवस्थेति परिहारः तस्येति, एकमयमित्यत्र मयट् स्वार्थिकः । यद्वा एकशब्दो भावप्रधानः ऐक्यं तत्प्रचुरमेकमयं शुद्धावस्थस्यात्मनो ह्यैक्यप्राचुर्यं । न तु संसृष्टस्य तस्य बुद्धिसुखदुःखाद्यान्तरभेदेन देवत्वादिबाह्यभेदेन चैक्यप्राचुर्याभावात् एक–शब्दः समानवाची "एकोव्रीहिः सुनिष्पन्नः सुपुष्टं कुरुते प्रजा" इत्यादिषु तथा प्रयोगदर्शनात्, देवमनुष्यादिप्रकृतिपरिणामविशेषरूपेत्यनेन "दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चात्मनः । पुमाच्च देवो न नरो पशुर्न च पादपः शरीराकृतिभेदस्तु भूपैते कर्मयोनय" इति, वचनयोरैकार्थ्यं दर्शितं "पिण्डः पृथग्यतः पुंस" इति प्राकरणिकवचनं स्मारयति पिण्ड–शब्दः, एकमयमित्यात्मन्येकत्वं विधाय भेदे निषिध्यमाने आत्मस्वरूपभेद एव निषेध्यः स्यादिति चेत्स्यादेवं यदि विधीयमानमेकत्वं व्यक्त्यैक्यं स्यात्तु प्रकार्यैक्यम्[1] अतो भेदनिषेधो वैजात्यनिषेध एवेति भावः । द्वैतिनोऽतथ्यदर्शिन इति सामान्येनोक्ते कथं देवादिद्वैतनिषेध इत्युच्यत इति चेत् कथं सामान्येन द्वैतनिषेधे प्रतीते आत्मद्वैतनिषेध इत्युच्यते न पिण्डात्मनोर्भेदनिषेधः पिण्डात्मनोर्भेदस्य प्रामाणिकत्वादिति चेत् आत्मभेदस्यापि प्रामाणिकत्वाच्च तद्भेदनिषेधः, अपि तु देवादिभेदनिषेध इति भावः । आत्मगतद्वैतमप्रतिषिद्धं चेत् "आत्मा शुद्धोऽक्षरः शान्तः "विज्ञानं यज्ञं तनुत" इत्येकवचनं नोपपद्यते जातावेकवचनं चेद्व्रीहिशब्दे ऽप्येकवचनं स्यादिति शङ्का च देवमनुष्यादीतिपदेन परिहृता देवादिष्ववान्तरभेदविवक्षया विविध–शब्दः, तत्राप्यनेकविधत्वविवक्षया विचित्र–शब्दः, आत्मसु जात्येकत्वादेकवचनं पिण्डेष्ववान्तरजातिबहुत्वाद्बहुवचनमित्यभिप्रायः । साम्ये प्रमाणमाह–

१ तत्तु प्रकारैक्यमिति पा० ।

सू० यथोक्तं भगवता "शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" इति, "निर्दोषं हि समं ब्रह्मे"त्यादिषु तस्यात्मपरदेहेषु सतोऽपीति देहातिरिक्ते वस्तुनि स्वपरविभागस्योक्तत्वात् "यद्यन्योऽस्ति परः कोऽपी"त्यत्रापि नात्मैक्यं प्रतीयते यदि मत्तः कोऽप्यन्य इत्येकस्मिन्नर्थे पर-शब्दान्य-शब्दयोः प्रयोगायोगात्

टी० "यथोक्त"मिति, वस्तुत्वस्य विहितत्वात्साम्यप्रतिपादनाच्चात्मस्वरूपभेदनिषेधोऽनुपपन्न इत्यर्थः, हेत्वन्तरं चाह "तस्ये"ति, अन्यथाऽर्थस्यैवैतच्छ्लोकस्यपदानां व्याघातः स्यादित्यर्थः । उक्तत्वादिति सममित्यर्थः इत्यन्वयः, एकवचनोक्तो हि जातावेकवचनमिति निर्वाहः, अन्यनिषेधपरस्य वचनस्यान्यथा निर्वाहायोगादात्मैकत्वसिद्धिरिति शङ्कायां यद्यन्योऽस्तीत्यादिश्लोकस्यार्थमाह "यदी"ति, एकस्मिन्नर्थे द्वौ द्वौ शब्दौ प्रयुक्तौ स्यातच्चे तेनान्यतरशब्दस्याकारपरत्वादात्मभेदनिषेध इति परिह्रियते तत्र द्वयोः शब्दयोः कोऽर्थ इत्यत्राह—

सू० तत्र पर-शब्दः स्वव्यतिरिक्तात्मवचनः, अन्य-शब्दस्तस्यापि ज्ञानैकाकारत्वादन्याकारत्वप्रतिषेधार्थः, एतदुक्तं भवति यदि मद्व्यतिरिक्तः कोऽप्यात्मा मदाकारभूतज्ञानैकाकारादन्याकारोऽस्ति तदाऽहमेवमाकार अयञ्चान्याकार इति शक्यते व्यपदेष्टुम् ।

टी० "तत्रे"ति, पर-शब्देन धर्मिणमनूद्य तस्य शब्दान्तरोपस्थापिताकारान्तरान्वयो निषिध्यत इत्यर्थः । एषोऽहमयञ्चान्य इति वक्तुमशक्यत्वं कथं प्रत्यक्त्वपराक्त्वे भेदकधर्मौ हि विद्येते? इति चेत् नैवम् प्रत्यक्त्वपराक्त्वयोः स्वपरापेक्षया सर्वात्मनां साधारणतया व्यावर्तकत्वाभावात्पूर्वं देवादिष्वन्यतमोऽयमित्यभिप्रायेण तद्विशेषबुभुत्सया हि सौवीररा-

क्षेत्राद्विभक्तः पृष्टः, अतो देवाद्याकारनिषेधपरा इमे शब्दा इति भावः ।
एवं पदार्थे सति श्लोकेन किमुक्तं भवतीति शङ्कायां वाक्यार्थं योजयति "एतदुक्त"मिति, एव इति शब्दस्यार्थमाह "एवमाकार"इति, अन्य-शब्दार्थमाह "अन्यादृशाकार"इति, आकारैक्यं नामाकाराणां सौसादृश्यमित्यभिप्रायेणैवमाकारः अन्यादृशाकार इत्युक्तम्, अन्यथा स्वरूपमात्रप्रतिपत्तिरेकेनैव पदेन सिद्धेति पदान्तरवैयर्थ्यप्रसङ्गात्पदान्तरमाकारपरमित्यर्थः । अस्यार्थस्य विपर्यये पर्यवसानमुत्तरश्लोकोक्तं सोऽनुदाहृतः तदर्थमाह–

सू० न चैक्यमस्ति सर्वेषां ज्ञानैकाकारत्वेन समानत्वादेवेति वेणुरन्ध्रविभेदेनेत्यत्राप्याकारवैषम्यमात्मनां न स्वरूपकृतमपि तु देवादिपिण्डप्रवेशकृतमित्युपदिश्यते नात्मैक्यं, दृष्टान्ते चानेकरन्ध्रवर्त्तिनां वाय्वंशानां न स्वरूपैक्यम्, अपि त्वाकारसाम्यमेव, तेषां वायुत्वनैकाकाराणां रन्ध्रभेदनिष्क्रमणकृतो हि षड्जादिसंज्ञाभेदः ॥

टी० "न चैव"मिति, अयं हि स श्लोकः "यदा समस्तभूतेषु पुमानेकोऽवस्थितः । तदा हि को भवान् सोऽहमित्येतद्विफलं वच" इति अत्रैकस्य आकारैक्यपरः स्वयंप्रकाशत्वानित्यत्वाणुत्वादिस्सर्वात्मसाधारणः, व्यावर्त्तकदेवाद्याकारस्तु नात्मन्यस्ति व्यावर्त्तकाभावात्तद्वाचिशब्दनिर्देशोऽनुपपन्नः प्रत्यक्त्वपराक्त्वपरोक्षत्वापरोक्षत्वादीनि न व्यावर्त्तकानीति को भवानिति प्रश्नस्तदतिरिक्ताकाराभिप्रायः, न हि भवानिति प्रश्नः भवच्छब्दो धर्मिमात्रपरः, किं शब्दो व्यावर्त्तकदेवाद्याकारपरः, तस्मात्तदतिरिक्ताकाराभावेन न तद्वाचिशब्देन निर्देश उपपद्यत इत्यर्थः । ज्ञानैकाकारत्वेन समानत्वादेवेति पूर्वोक्तादेवेति भावः । उक्तनिर्वाहगोचरं दृष्टान्तमुखेनाद्वैतपरत्वेन परोक्तस्य श्लोकस्यार्थमाह "वेणुरन्ध्रे"ति, स्वत एकाकाराणामुपाधिवशादवान्तरभेदसद्भावमात्रे दृष्टान्तोपन्यासः, अन्यथा सर्वथा साधर्म्याभ्युपगमे हि आत्मनोऽचित्त्वाकाशकार्यत्वादिकमपि स्यात्, तद्धि प्रमा-

थान्तर्विरोधात् त्यज्यते तथा दृष्टान्तगतमाकाशान्तरमपीति भावः । तथाऽसौ परमात्मन इत्युक्ते षड्जादि च सञ्ज्ञाभेदो मा भूदित्यभिप्रायेणाह—

सू० एवमात्मनां देवादिसंज्ञाभेदः, तैजसाप्यपार्थिवद्रव्यांशभूतानां पदार्थानां तत्तद्द्रव्यत्वेनैक्यमेव न स्वरूपैक्यं, तथा वायवीयानामंशानामपि स्वरूपभेदोऽवर्जनीयः ॥

टी० "एवमात्मनां देवादिसञ्ज्ञाभेद" इति, भेदषड्जादिसंज्ञक इति पाठे सत्यपि भेदः षड्जातिसञ्ज्ञाभेद इति व्याख्यातं, दुरवगमषड्जादिरूपभेदप्रतिपत्तिसौकर्यस्य सञ्ज्ञाभेदाधीनत्वादिति भावः । दार्ष्टान्तिकेऽपि तथैव दृष्टान्ते व्यक्तिबहुत्वं किमस्तीति शङ्कायां वाय्वंशानामनेकत्वं वस्तुतर्केण साधयति "तैजसे"ति, स्पर्शवद्द्रव्यत्वादिति भावः । यत्र त्वाकाशदृष्टान्तः तत्र तथाप्येकस्यात्मनो दृष्टान्तत्वेनाकाशमुक्त्वाऽऽत्मान्तरे तथात्वमिति मन्तव्यं "सितनीलादिभेदेन यथैकं दृश्यते नभः । भ्रान्तदृष्टिभिरात्मा हि तथैकस्सन् पृथक्पृथ"गिति नभसः सितनीलादिभेदः शरत्प्रावृट्संध्यासमयेषु मेघोपश्लिष्टस्य तस्य यथा क्रमभावी तथैकस्यात्मनोऽपि देवादिभेदः क्रमभावीति । यद्वा तत्रापि प्रदेशभेदाङ्गीकारेण सर्वात्मनां दृष्टान्तः स्यात् आकाशस्य प्रदेशभेदानभ्युपगमे घटादेर्विभुत्वमाकाशस्याल्पत्वं वा प्रसज्येत् किं घटादेः कृत्स्नाकाशेन सम्बन्ध? उत प्रदेशभेदेन पूर्वस्मिन् पक्षे घटादेर्विभुत्वं माकाशस्यात्मपरिमाणत्वं द्वितीये प्रदेशभेदाङ्गीकार इति वेदान्तिभिर्नभसो निरवयवत्ववादोऽपसिद्धान्तः, वेदान्तेषु तस्यांशभेदेन पञ्चीकरणोपदेशादेकदेशांशेन ,वायुत्वेन परिणामवादादुत्पत्तिलयदर्शनाच्चेति अत एव "घटध्वंसे घटाकाशो न भिन्नो नभसा यथा । ब्रह्मणा देहविध्वंसे विष्ण्वाख्येन तथा पुमा"निति शौनकवचनमपि नभस्यंशभेदाभिप्रायेण जीवस्य परस्मादात्मन औपाधिकवैषम्यविरहे दृष्टान्तसमर्थनपरं वेदितव्यं, यथाऽग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेदिति तथैव साम्यदृष्टान्ताभिधानात् । अथाविभक्तविषमवस्तोकमाह—

मू० सोऽहं स च त्वमिति सर्वात्मनां पूर्वोक्तं ज्ञानाकारं तच्छब्देन परामृश्य तत्सामानाधिकरण्येनाहं त्वमित्यादीनामर्थानां ज्ञानमेवाकार इत्युपसंहरन् देवाद्याकारभेदेनात्मसु भेदमोहं परित्यजेत्याह—

टी० "सोऽह"मिति, पूर्वोक्तमध्यायचतुष्टयोक्तं स इति पदस्य ज्ञानाकारविशिष्टवस्तुवाचित्वेऽपि विशेषणांशे तात्पर्यं दर्शयितुं सर्वात्मनां ज्ञानाकारमिति विशेषणांशस्य निष्कृष्य निर्देशः, अन्यथा तत्सामानाधिकरण्येनेत्यनन्तरोक्तिविरोधात्, ज्ञानमेवाकार इत्युपसंहरविति सोऽहमित्यादिश्लोकानन्तरपूर्वश्लोके "एकं समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोऽन्यदि"ति सर्वात्मनां भगवच्छरीरत्वस्योक्तत्वात् सोऽहमित्यादिश्लोकस्य च भगवदात्मकत्वनिगमनपरत्वशङ्का स्यात्तच्चायुक्तं प्रकरणस्य शरीरात्मविवेकपरत्वात्तन्निगमनस्य चापेक्षितत्वात्तन्निगमनपरश्लोकान्तराभावादपेक्षितविधेरनपेक्षितविधानायोगाच्चात्मनां देहव्यावर्त्तकज्ञानैकाकारत्वनिगमनपरोऽयं श्लोक इत्यभिप्रायः। त्यज भेदमोहमित्यंशस्यार्थमाह "देवाद्याकारभेदेनात्मसु भेदमोहं परित्यजे"दिति, देवादिशब्दो भेदशब्दविवरणरूपः, देहगतदेवत्वाद्याकारभेद आत्मनि भेदमोहहेतुस्तं भेदमोहं परित्यजेत्यर्थः। स्वरूपभेदनिषेधपरत्वेऽनिष्टमाह—

मू० अन्यथा देहाद्यतिरिक्तोपदेश्यस्वरूपेऽहं त्वं सर्वमेतदात्मस्वरूपमिति भेदनिर्देशो न घटते अहंत्वमादि—शब्दानामुपलक्षणेन सर्वमेतदात्मस्वरूपमित्यनेन सामानाधिकरण्यादुपलक्षणत्वमपि न सङ्गच्छते ॥

टी० "अन्यथे"ति, न चाहं त्वमादिशब्दा देहपराः न हि तच्छब्देनात्मानं परामृश्य तेनात्मना देहानामैक्यमुपदिश्यते, नाप्यन्तःकरणपराः न ह्यन्तःकरणानां परमात्मनैक्यं परस्परैक्यं वोपदिश्यते, नापि देहविशिष्टान्तःकरणपराः, न हि देहविशिष्टानामन्तःकरणानामैक्यमुपदिश्यते अतो-

ऽहं त्वमादिशब्दा देहातिरिक्तात्मपरा इत्यभिप्रायेण देहातिरिक्तेन्युक्तम् । "अहं त्वमादिपदानामुपलक्षणत्वादुपलक्ष्ये वस्तुनि न भेद इत्याशङ्क्य परिहरति "अह"मिति, अहं त्वमादीत्यादि–शब्देन सर्वशब्दो विवक्षितः उपलक्ष्येणेत्यौपचारिकनिर्देशः उपलक्ष्यवाचिपदेनेत्यर्थः सर्वमेतदात्मस्वरूपमित्यनेनेति अहं त्वं सर्वमिति त्रयाणामपि पदानात्मस्वरूपशब्देन सामानाधिकरण्यं फलितं तेष्वन्यतमेनाहं त्वमर्थसजातीयार्थवाचिना सर्वमेतदिति पदेनात्मस्वरूपशब्दस्य सामानाधिकरण्यनिर्देशादिति ज्ञापनार्थं सर्वमेतदात्मस्वरूपमित्युपादानं कृतं भाष्ये श्लोके सर्वमेतदात्मस्वरूपमिति प्रदर्शनार्थमुक्तम्, अतोऽहं त्वमादिशब्दानामुपलक्ष्यवाचिकामिमनात्मस्वरूपशब्देन सामानाधिकरण्यादहंत्वमादिशब्दवाच्यानामर्थानामुपलक्षणत्वमसङ्गतं न हि चन्द्रः शाखा सारसः केदार इत्युपलक्षणोपलक्ष्यशब्दवाचिशब्दानां सामानाधिकरण्यं मुख्यतया दृष्टमित्यर्थः, लक्षणाया त्विति चेल्लक्षणैव दोष इति भावः । यद्वा अनेनेति पदमुपलक्ष्यविशेषणं सर्वमेतदात्मस्वरूपमित्यात्मशब्दनिर्दिष्टेनानेनोपलक्ष्येणाहं त्वमादिशब्दानां सामानाधिकरण्यादुपलक्षणत्वमसङ्गतमित्यर्थः, अस्यां योजनायामहं त्वमादिसजातीयार्थवाचिसर्वपदसामानाधिकरण्यनिर्देशस्य हेतुत्वमर्थसिद्धं यद्यहं त्वमादिशब्दा उपलक्ष्यपर्यन्तवृत्तयः तदानीमिवमर्थतया उपलक्ष्यवाचिनाऽत्मस्वरूपमिति पदेन स इति पृथक्सामानाधिकरण्यदर्शनादुपलक्षणवाचकाहंत्वमादिसामानाधिकरण्यवैयर्थ्यमिति अहंशब्दस्यापरोक्षप्रत्यक्त्वं प्रवृत्तिनिमित्तं त्वंशब्दस्य च चेतनत्वे सत्यभिमुखत्वमात्मशब्दस्य च व्यापनक्षमत्वं, स इति पदस्य प्रकृतज्ञाकारः ।

ननु "स च सर्वमेतदात्मस्वरूपमित्यत्र कथमात्मस्वरूपविशेषणस्य तच्छब्दस्य पुँल्लिङ्गत्वम्, उच्यते "आत्मा शुद्धोऽक्षरः शान्त" इत्यादिषु परज्ञानमयत्वेन प्रकृत आत्मा हि तच्छब्देन परामृश्यते अतो न विरोध इति अचित्संसृष्टं देवादिरूपेण प्रतीयमानं सर्वमेतदात्मस्वरूपं ज्ञानैकाकारः स आत्मेत्यर्थः । चतुर्थपादं व्याचष्टे–

मू० सोऽपि यथोपदेशमकरोदित्याह "तत्याज भेदं परमार्थदृष्टि"रिति, कुतस्त्वैष निर्णय इति चेत् देहात्मविवेकविषयत्वादुपदेशस्य, तच्च "पिण्डः पृथग् यतः पुंसः शिरःपाण्यादिलक्षण" इति प्रक्रमात् "विभेदजनके ज्ञान" इति च नात्मस्वरूपैक्यपरं, नापि जीवपरयोरात्मस्वरूपैक्यमुक्तरीत्या निषिद्धम् ॥

टी० "सो पी"ति, न जीवब्रह्माद्वैतपरमिदं प्रकरणं, न चात्मस्वरूपबहुत्वनिषेधपरं, प्रकारैक्यपरमिति कथं ज्ञायते? इत्यभिप्रायेणाह "कुत स्त्वे"ति, परिहरति "देहात्मे"ति, तदपि कुत? इत्यत्राह "तच्चे"ति, देहात्मविवेकपरत्वोपपादनेन जीवपरैक्यपरत्वम् आत्मबहुत्वनिषेधपरत्वं च दत्तोत्तरमेव। अथ शास्त्रोपसंहारगतस्य विभेदजनक इत्यादिश्लोकस्यार्थं वदन् अर्थान्तरपरत्वं व्युदस्यति विभेद इत्यादिना, प्रथमं किमात्मस्वरूपैक्यपरमुत? जीवपरैक्यपरमिति विकल्प्य दूष्यते, अत्र च—शब्दाभावादात्मब्रह्मशब्दयोः समानाधिकरण्यं सम्भावितं, तथा सति ब्रह्मशब्दः शुद्धावस्थापरः स्यात्, एवं शुद्धावस्थाज्जीवस्य भेदो नास्तीति जीवस्वरूपैक्यमुक्तं स्यात्, अतः शङ्काऽऽस्पदं भूतमात्मैक्य परत्वं दूषयति "आत्मे"ति, उक्तरीत्या श्रुतिस्मृत्यर्थापत्तिलौकिकार्थापत्त्यादिभिरित्यर्थः। द्वितीयं पक्षं दूषयति—

मू० जीवपरयोरपि स्वरूपैक्यं देहात्मनोरिव न संभवति तथा च श्रुतिः "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति"

"ऋतं पिबन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्द्धे।

छायातपौ ब्रह्मविदो वदन्ति
पञ्चाग्नयो ये च त्रिणाचिकेताः" ॥

टी० "जीवे"ति, देहात्मनोरिवेति विरुद्धधर्मत्वादित्यर्थः, प्रत्यक्त्व-पराक्त्वजडत्वाजडत्वनित्यत्वपरिणामित्वादिभिर्विरुद्धधर्मैर्यथा देहात्मनो-र्भेदस्तथा जीवपरयोरपि हेयार्हत्वाभर्यलिङ्गत्वनियाम्यत्वनियन्तृत्वादिविरु-द्धधर्मैरैक्यं हि नोपपद्यते । विरुद्धधर्मत्वे प्रमाणमाह "तथे"ति, तथा—विरु-द्धधर्मत्व इत्यर्थः, चो ह्यर्थः, हेतुवाची वक्ष्यमाणहेतूनां पञ्चमी प्रयुक्ता तत्स्थानीयोऽयञ्च—शब्दः समानं वृक्षं शरीरं पिप्पलं कर्मफलम् अभिचाक-शीति स्वयमनशन[1]त्वादाशयितृत्वाच्च भृशं भातीत्यर्थः ।

ननु कथमस्य मन्त्रस्य जीवपरमात्मभेदपरत्वम् ? अन्तःकरणजीव-परो ह्ययं मन्त्रः, पैङ्गिरहस्यब्राह्मणेनास्य मन्त्रस्य तथा व्याख्यात-त्वात् यथा तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाक-शीति ज्ञस्तावेतौ सत्त्वक्षेत्रज्ञाविति स्वाद्वत्तीत्यन्तेन सत्त्वमुक्तम् अभि-चाकशीतीत्यन्तेन वाक्येनानश्नन्नन्योज्ञ इति क्षेत्रज्ञोऽपि पश्यतीत्युक्त-मिति व्याख्यातत्वमवगम्यते, न च सत्त्वशब्दो जीवपरः क्षेत्रशब्दः परमात्मपर इति वाच्यं सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणजीवपरतया प्रसिद्ध-त्वात्, तदेतत्सत्त्वं येन स्वप्नं पश्यति अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञाविति सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणजीवपरत्वेन तत्रैव व्याख्यातत्वाच्च येन पश्यतीति करणत्वप्रतीतेः, सत्त्वं ह्यन्तःकरणं स्वप्नद्रष्टृत्वादितरः क्षेत्रज्ञो हि जीवः, अतो द्वा सुपर्णेति मन्त्रोऽयमन्तः-करणजीवपरः, न तु जीवपरमात्मपर इति उच्यते न तावज्जीवपरमात्म-परत्वमस्य मन्त्रस्यापवदितुं शक्यते अनेन मन्त्रेण तुल्यार्थतया प्रत्यभिज्ञाय-माने समाने वृक्षे पुरुषो निमग्न इत्यनन्तरे मन्त्रे जीवपरमात्मनोः प्रतिपन्नत्वा-दस्य मन्त्रस्य तदेकार्थ्याच्च, समानं वृक्षं परिषस्वजाते समाने वृक्षे पुरुषो-निमग्न इति तयोरैकार्थ्यं हि प्रतीयते समाने वृक्ष इति मन्त्रे स पुरुषो-

---

[1] स्वयमश्नन्त्वादिति पा० ।

जीवः अन्तःकरणस्य पुरुषशब्दवाच्यत्वाभावात्, शोचति मुह्यमानः पश्यति वीतशोक इति पदानामस्वारस्यप्रसङ्गाच्च अन्यश्च परमात्मा ईशशब्दवाच्यत्वात् स्वविषयज्ञानेन वीतशोकत्वहेतुत्वाच्च न केवलमुत्तरमन्त्रैकार्थ्याद् द्वासुपर्णेति मन्त्रस्य जीवपरमात्मपरत्वं, किंतु तस्मिन्नेव स्वाद्वत्ति अनश्नन्नन्य इति भोक्तृत्वाभोक्तृत्वश्रवणाच्च तदवसीयते, चक्षुः श्रोत्रादीनां द्रष्टृत्वादिवदन्तःकरणस्यापि करणत्वादेव भोक्तृत्वं हि न संभवति, जीवस्य च सत्त्वशब्दोक्ते देहपरिष्वङ्गदशायामेव अनश्नत्त्वमपि नोपपद्यते, तर्हि पैङ्गिरहस्यब्राह्मणस्य कोऽर्थः उच्यते सत्त्वं बद्धजीवः द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुष्विति निघण्टुपाठाज्जन्तुपरत्वावगतेर्जन्तुश्चेतनः, प्राणी तु चेतनो जन्मी जन्तुजन्यशरीरिण इति पाठात्, न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणै''रिति प्रयोगात् ''वन्यान्वनेष्विव दुष्टसत्त्वानित्याद्यर्वाचीनप्रयोगाच्च क्षेत्रज्ञशब्दश्चाय परमात्मपरः अर्थान्तरप्रसिद्धाकाशप्राणादिशब्दवदर्थानुपपत्त्या परमात्मपरत्वोपपत्तेः, ''विष्णोर्नामसहस्रमित्युपक्रम्य क्षेत्रज्ञोऽक्षर एव चे''ति प्रयोगात् क्षेत्रं ज्ञानातीत्यवयवार्थस्य तस्मिन्नेव पुष्कलत्वाच्च, मोक्षधर्मे ''ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा ।

प्रविशन्ति द्विजश्रेष्ठ? क्षेत्रज्ञं निर्गुणात्मकम् ।
सर्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्त्वतः ॥
विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः ।
एकश्चरति क्षेत्रेषु स्वैरचारी यथासुखम् ॥
क्षेत्राणि शरीराणि बीजानि च शुभाशुभे ।
तानि वेत्ति स योगात्मा ततःक्षेत्रज्ञ उच्यते'' ॥

इति प्रयोगात्, यस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । यः करोति च कर्माणि स भूतात्मेति चोच्यत'' इति प्रयोगाच्च येन स्वप्नं पश्यति इत्यत्र येनेतीत्थंभावे तृतीया येन विशिष्टः परमात्मा स्वप्नं पश्यतीत्युच्यते ततश्च काठिन्यवान् यो बिभर्त्ति इति पृथिवीद्वारा काठिन्यवत् स्वप्नद्रष्टृत्वं जीवात्मद्वारा परमात्मविशेषणं भवतीति न विरोधः शारीर-

शब्दस्य तस्यैव आत्मेतिवत् स्वव्यतिरिक्तसमस्तचिदचिद्वस्तुशरीरके परमात्मन्युपपद्यते उपद्रष्टेति निरुपाधिकद्रष्टृत्वं च सर्वज्ञस्य तस्यैवोपपद्यते, अतो द्वा सुपर्णेति मन्त्रो जीवपरमात्मपरः ऋतं पिबन्ताविति पानक्रियायां जीवपरयोः प्रयोज्यप्रयोजकभावेनान्वयः पिबन्ताविति शतृप्रत्ययः कर्तृमात्रपरो न कर्तृविशेषपरः, तेन प्रयोज्यप्रयोजकौ द्वावपि कर्तृविशेषाविति तावविशेषेण क्रोडीकृतौ भवतः, अन्यथा अनश्नन्नित्यादिविरोधः स्यात् । यद्वा छत्रिणो गच्छन्तीतिवदजहल्लक्षणा, सुकृतस्य ऋतं फलम् । यद्वा सुकृतस्य लोके इत्यन्वयः तदा सुकृतं तत्फलमुच्यते लक्षणया, एवं पुण्यस्य कर्मणो दूराद्गन्धो वातीत्यत्र एवमनृतादात्मानं जुगुप्सेदिति पुण्यप्रतियोगित्वेनानृत–शब्दप्रयोगात् गुहां हृदयगुहां परमे परार्ध्ये इति लोकविशेषणं जीवपरविशेषणं वा छान्दसत्वाल्लिङ्गव्यत्ययः छायाऽऽतपौ–अज्ञसर्वज्ञौ "ज्ञाज्ञौ द्वावजावीशानीशा"वित्यनेनैकार्थ्यात्, ब्रह्मविदः–अध्यात्मविदः, पञ्चाग्नयः त्रिणाचिकेताश्च कर्मविशेषनिष्ठाः ते वदन्ति यथा "ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः । ते वदन्ति महात्मानं कृष्णं धर्मं सनातन"मिति पिबन्तावित्येतद्विशदयायाह–

सू० अन्तःप्रविष्टः शास्ता जनानां सर्वात्मेत्याद्याः, अस्मिन्नपि शास्त्रे च

स सर्वभूतप्रकृतिं विकारान्
गुणादिदोषांश्च मुने? व्यतीतः ।
अतीतसर्वावरणो ऽखिलात्मा
तेनास्तृतं यद्भुवनान्तराले ॥

समस्तकल्याणगुणात्मकोऽसौ
परः पराणां सकला न यत्र ।
क्लेशादयः सन्ति परावरेशे

अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ।

यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्वगे"ति ।

"भेदव्यपदेशात्" "उभयेऽपि हि भेदेनैनमधीयते" "भेदव्यपदेशाच्चान्यः" "अधिकं तु भेदनिर्देशात्" इत्यादिषु सूत्रेषु च "य आत्मनि तिष्ठन्नात्मनोऽन्तरोऽयमात्मा न वेद" यस्यात्मा शरीरं य आत्मानमन्तरो यमयति" "प्राज्ञेनात्मना सम्परिष्वक्तः प्राज्ञेनात्मनाऽन्वारूढ इत्यादिभिरुभयोरन्योन्यप्रत्यनीकाकारेण स्वरूपनिर्णयात् ।

टी० "अन्तःप्रविष्ट" इति, इत्याद्या श्रुतिरित्यन्वयः, न केवलं श्रुतिस्वारस्यात्, अस्मिन्नपि प्रबन्धे दृश्यते इत्याह "अस्मिन्नपी"ति, स सर्वभूतेत्यादिना हेयप्रत्यनीकत्वकल्याणगुणाकरत्वे कथिते, जीवस्य हेयास्पदत्वमविद्येत्यादिना उक्तं, सर्वगेति भेदव्यपदेशादिति पूर्वेण सम्बन्धः । न तु सूत्रोपादानम्, उपर्यस्य सूत्रस्य विषयवाक्यानुपादानात् उदाहृतपुराणवचनानां हेतुत्वकथनसापेक्षत्वाच्च श्रुतिवाक्यस्य हेतुत्वं हि च-शब्देनोक्तम् उभयेऽपीत्याद्युपात्तसूत्रद्वयस्य विषयवाक्यम् "य आत्मनी"त्य"धिकन्त्व"त्यादिसूत्रस्य विषयवाक्यं "प्राज्ञेने"ति सूत्रेष्वाभिरेवमर्थनिर्णयादित्यर्थं एवमुपनिषत्पुराणसूत्रैर्जीवपरयोर्विरुद्धधर्मत्वमुपपादितम् । अथ ब्रह्मवेद ब्रह्मैव भवतीत्यादिवाक्यानि हृदि निधायास्याऽन्यथासिद्धिं वक्तुं ते—

मू० नापि साधनानुष्ठानेन निर्मुक्ताविद्यस्य परेण स्वरूपैक्यसंभवः, अविद्याश्रयत्वयोग्यस्य तदनर्हत्वासंभवात्

टी० "नापी"ति, तद्दूषयति "अविद्याश्रयत्वे"ति, अविद्याऽऽश्रयत्वयोग्यत्वम् अविद्या-शब्दः समस्तहेयप्रदर्शनार्थः, आश्रय-शब्दः सम्बन्धपरः हेयसम्बन्धात्यन्ताभावानधिकरणत्वं तद्योग्यत्वं हेयसम्बन्धात्यन्ताभावाधिकरणत्वं तदनर्हत्वं च अनश्नन्नन्य इत्यादिश्रुत्या परमात्मनस्तदनर्हत्वं सिद्धं देशकालसन्निकर्षे सत्यपि तदस्पर्शो हि स्वभावसन्निकर्षाभावात्, स्व-

Digitized by Google

भावसन्निकर्षाभाव एव ह्ययोग्यत्वं यथा नभसः छेदनदहनाद्यनर्हत्वम्, अतो छेद्यार्हतदनर्हयोः स्वरूपोप[1]गमेऽपि न स्वरूपैक्यसम्भवः, निग्राह्यस्य पश्चादनुगृहीतस्य निग्राह्यत्वापगमेऽपि निग्रहानुग्रहकर्त्रा पुरुषेण नैकत्वसम्भव इत्यर्थः, कारागृहनिर्मुक्तस्य नियन्त्रा नरपतिना न स्वरूपैक्यं सम्भवतीत्यर्थः । अस्मिन्नर्थे पुराणवचनमाह–

मू० यथोक्तं "परमात्मात्मनोर्योगः परमार्थ इतीष्यते मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यत" इति ॥

टी० "यथोक्तमि"ति, योग–शब्द ऐक्यपरः, अन्यथा अन्यद्रव्यतां नेतीति तत्प्रतिक्षेपानुपपत्तेः, ननु मिथ्यैतदित्युत्तरत्रान्वयः परमात्मनोर्योगः परमार्थः अन्यद् द्रव्यन्तद् द्रव्यताञ्चेतीत्येन् मिथ्येत्यर्थ इति चेन् मैवम् अन्यान्यद्रव्यताऽनुपपत्तेस्सत्यत्वात् इतरथा जडाजडयोस्तादात्म्यप्रसङ्ग आयजुस्सामनिष्पाद्य यज्ञकर्ममतं तवेतिवदिष्यत इत्यनेन पूर्वार्धोक्तार्थस्य परमतत्त्वद्योतनात् अन्यथेष्यत इति पदवैयर्थ्यात् । किञ्च "परमार्थस्तु भूपाल ? सङ्क्षेपाच्छ्रूयतामिति वक्ष्यमाणपक्षव्यतिरिक्तपक्षाणां निराकरणपरत्वाच्च प्रकरणस्य एतच्छ्लोकपूर्वार्धोक्तसमर्थनपरत्वमुत्तरार्धस्य नोपपद्यते धर्माय त्यज्यत इत्यादिभिरन्यैस्तत्तद्वचनानां परमार्थत्वं हि निरस्यते स्वतः प्रकृतार्थे स्वारसस्य एतच्छब्दस्य प्रकृतार्थे सत्यपि वक्ष्यमाणपरत्वाश्रयणमप्ययुक्तम् । किञ्च अन्यद्द्रव्यं तद् द्रव्यतां नैतीति यत् एतन्मिथ्येति हि तदानीमर्थः तथा च सति यतः शब्दस्य स्वारस्यभङ्गः, यतः–शब्दस्य हि हेतुपरत्वं स्वरससिद्धं न तु यच्छब्दवत्प्रकृतार्थशरीरमात्रपरामर्शित्वम् अन्यद्द्रव्यं तद्द्रव्यतां नेतीत्येतन्मिथ्येति यतः ततः एवापरमार्थ इत्यन्वये इति शब्दद्वयाध्याहारप्रसङ्गः स चानध्याहारेण निर्वाहे संभवति नोपपद्यते, यदुच्येत पूर्वं पृथग्भूतयोः, परमात्मात्मनोरैक्यं परमार्थ इष्यत इति चेन्मिथ्यैतत् अन्यद्द्रव्यं हि तद्द्रव्यतां नेतीति यतस्तस्मात्पूर्वमपि परमात्मात्मनो भेदो नास्तीति नेवं पूर्वं भ्रान्त्या पृथग्भूतयोरित्यश्रुतस्यैवाध्याहारप्रसङ्गात्, स चानध्याहारेण निर्वाहे संभ-

१ छेद्योपगमेऽपीति पा० ।

भवति नोपपद्यते। किञ्च तस्मात्पूर्वमपि भेदो नास्तीत्यश्रुतवाक्यान्तराध्याहारेण वाक्यस्य पूरणीयत्वं स्यात् तद्विरपेक्षनिर्वाहे संभवति नोपपद्यते, तस्मात्प्रागपि भेदो नास्तीति वाक्यं नाध्याहर्तव्यं पूर्वं भिन्नयोः परमात्मात्मनोः पश्चादपि भेद इति पक्षनिराकरणमात्रपरत्वाद्वाक्यस्य इति चेत् किं तेन प्रयोजनं पूर्वमप्यैक्यसिद्धिरिति चेत् न पूर्वं पृथग्भूतयोः पश्चादैक्यायोगे ऽभिहिते सति पश्चादपि भेदसिद्धेः, अतः स्वरससिद्ध एव वाक्यार्थः स्वीकार्यः। अथ ब्रह्म वेद ब्रह्मैव भवतीत्यादिवाक्यनिर्वाहं बहुश्रुत्यन्तराविरोधेन च वक्ष्यन्मुक्तस्य साम्यापत्तिमाह—

सू० मुक्तस्य तु तद्धर्मताऽऽपत्तिरेवेति भगवद्गीतायामुक्तम्

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चे"ति।

टी० "मुक्तस्ये"ति, तत्त्वैक्यश्रुतेः प्रतिकूलार्थो सम्यक्श्रुतिर्दर्शयिष्यत इति मत्वा व्याख्येयतया प्रकृतस्योपपत्तिवचनस्य सजातीयं पराभिमतार्थप्रतिकूलार्थस्मृतिवचनं दर्शयति "इदमि"ति, मुक्तपरत्ववैशद्यायोपादानं सर्गेऽपीति, न केवलं शास्त्रान्तरे अत्रापि मुक्तस्य भेदप्रतिपत्तिरस्तीत्याह—

सू० इहापि "आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुने!
विकार्यमात्मनः शक्त्या लोहमाकर्षको यथे"ति आत्मभावमात्मनः स्वभावम्

टी० "इहापी"ति, इह—योगप्रकरणे योगसङ्क्षेपकथनारम्भ इत्यर्थः, "सङ्क्षेपविस्तराभ्यां तु किमन्यत्कथ्यतां तवे"ति ह्युक्तम्, आत्मनः शक्त्या विकार्यमवस्थान्तरं नेयं ध्यायिनमेनं तद् ब्रह्म आत्मभावं नयति आत्मनः शक्त्या विकार्यं लोहमाकर्षको यथेत्यन्वयः, आकर्षको वह्निः दोषमाकर्षतीति व्युत्पत्त्या "यथाग्नि[1]समुत्थितशिखः कक्षं दहति सानिलः। तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिष"मिति ह्युत्तरत्र वक्ष्यते श्रीविष्णुधर्मे च "यथाग्नि सङ्का-

१ यथाऽग्निरुद्धतशिख इति पा०।

स्वनकमपदेशं प्रजायत इति सोऽग्निः आत्मभावं आत्मनः स्वभावं निर्दोषत्वं लोहं नयति तथेत्यर्थः, अयं सम्यगर्थः । यद्वा आत्म—शब्दः स्वभावावी सवन्ययोगव्यतिरेकपरः, यथाऽग्निर्लोहमात्मभावं स्वभावं स्वतःसिद्धरूपं नयति तद्वदित्यर्थः । यद्वा आकर्षकोऽयस्कान्तः लोहमात्मभावं नयति स्वव्यापारं लोहं कारयति स्वमनुकारयति, "स्थितः स्थितामुच्चलितः प्रयाता"मिति वत् अयस्कान्तस्तिष्ठति चेत् लोहस्तिष्ठति गच्छति चेत् तमनुधावति एवं कामाचीकामरूप्यनुसंचरन् सर्वेषु लोकेषु कामचारो भवतीत्यादिश्रुत्यनुगुणं परमात्मा उपासकं स्वचेष्टामनुकारयति समानचेष्टितं करोतीत्यर्थः । यद्वा आत्म—शब्दः स्वभावी निष्कृष्टस्वरूपपरः उपासकं परमात्मा आत्मभावं नयति प्रकृतिसंबन्धराहित्येन शुद्धतां नयति केवलतां नयति यथा अयस्कान्तो दारुनिमग्नं लोहं तस्माद्दारुण उद्धृत्य केवलतां नयति तद्वदित्यर्थः । यद्वा भूप्राप्तावात्मनेपदीति वचनाद्भावशब्दः प्राप्तिवचनः आत्मप्राप्तिं नयति यथा लोहमयस्कान्तः स्वप्राप्तिं नयतीत्यर्थः प्राप्तिं नयतीति निर्देशः ओदनपाकं पचतीतिवत्, जीवस्य परमात्मशक्त्या विकार्यत्वं युक्तं जीवस्य बन्धमोक्षयोर्ज्ञानसंकोचविकासरूपविकारार्हत्वात् । अत्र श्लोके तादात्म्यप्रतिपत्त्यभावं दर्शयति—

सू० न ह्याकर्षकस्वरूपापत्तिराकृष्यमाणस्य, वक्ष्यति च "जगद्व्यापारवर्ज प्रकरणादसन्निहितत्वाच्च" "भोगमात्रसाम्यलिङ्गाच्च" "मुक्तोपसृप्यव्यपदेशाच्चे"ति वृत्ति[1]रपि "जगद्व्यापारवर्जं समानो ज्योतिषे"ति द्रमि[2]डभाष्यकारश्च—"देवतासायुज्यादशरीरस्यापि देवतावत्सर्वार्थसिद्धिः स्या"-दित्याह

१ बोधायनमहर्षिप्रणीता ।

२ द्रमिडाचार्याः प्राचीना विशिष्टाद्वैतमतानुयायिनो येषां मतं शाङ्करव्याख्यासु बहुशो वृत्तिकृतामिव क्वाचित् पराक्रियते ।

Digitized by Google

टी० "न ही"ति, आकर्षकस्वरूपापत्तिराछ्व्यमात्रस्येति निर्देश उक्तः सर्वार्थसाधारण्यात् अग्निसुवर्णदृष्टान्तविवक्षायामाछ्व्यमात्रशब्दो विकार्यपरः समानोज्योतिषेति ज्योतिः परं ब्रह्म "परं ज्योतिरुपसंपद्य अथ यदतः परो दिव्यो ज्योतिर्दीप्यत" इति श्रुतेः द्रमिडेति अशरीरो मुक्तः कर्मकृतशरीराभावात्। सिद्धिरनुभवः। मुक्तौ जीवपरयोर्भेदश्रुतीर्दर्शयति–

सू० श्रुतयश्च "य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवति" "ब्रह्मविदाप्नोति परं" "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति, "एतमानन्दमयमात्मानमुपसङ्क्रम्य इमांल्लोकान् कामान्नीकामरूप्यनुसञ्चरन् स तत्र पर्येति" "रसो वै सः" "रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति यथा नद्यः स्यन्दमानाः समुद्रे ऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं" तथा "विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती"त्याद्याः

टी० "श्रुतयश्चे"ति, आप्नोति परमनुभवतीत्यर्थः, एतद्विवरणरूपं वाक्यं दर्शयति "सोऽश्नुत"इति, अनुसंचरन्नित्यनेन भेदो दर्शितः, "रसो वै स"इत्यनेन साम्यमानन्दित्वाकारेणेत्युक्तं भवति, परमसाम्योपयोगिनीं वैधर्म्यनिवृत्तिं दर्शयति "यथा नद्य"इति, नदीनां नदीत्वाकारप्रहाणेन समुद्रसंसर्गाद्वैधर्म्यप्रहाणेन संसर्गो दृष्टान्ते उपजीव्यः प्राकृतनामरूपप्रहाणपूर्विका हि परमात्मप्राप्तिः

न च तावता भेदनिवृत्तिः, पुरुषमुपैतीति कर्मकर्तृभावावगमात् साम्यापत्तिं दर्शयति "तथे"ति,

ननु परमं साम्यमुपैतीत्यैकार्थ्यापत्तिरुच्यते सम-शब्दस्य समानपर्यायत्वात् समानशब्दवदैक्ये प्रयोगाच्च समशब्दस्यैक्ये प्रयोगो दृश्यते समकालवर्तीत्यादिषु, तथा सम-शब्दपर्यायतया अवगतसमान-शब्दोऽप्यै-

र्थे प्रयुज्यते "समानं वृक्षं परिषस्वजाते" इति एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति च ऐकाधिकरण्यं हि सामानाधिकरण्यम् एकस्मिन्नर्थे इत्युक्तिः ।

टी० तत्पर्यायश्च सम-शब्दः, यद्यपि सादृश्यस्यापि समशब्दोवाचकः तथाऽपि मुक्तिवाक्यस्थसाम्यशब्द ऐक्यपरः, ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुत्यन्तरैकार्थ्यात् लयसायुज्यशब्दश्रवणान्नदीसमुद्रघटाकाशमहाकाशादिदृष्टान्तश्रवणाच्च "साधर्म्यमागता" इति स्मृतिस्तु सगुणप्राप्तिविषया, अन्यथा प्रत्यक्षश्रुतिविरोधे स्वरूपैक्यविषयबहुस्मृतिविरोधे च तद्दौर्बल्यात्, अत ऐक्यापत्तिरेव अनेन वाक्येन प्रतिपादिता, ऐक्यस्य च पारम्यं नाम पुनर्भेदभ्रमप्ररोहविरहितत्वमिति । अत्रोच्यते अत्र साम्य-शब्दः सादृश्यमेवाभिधत्ते न त्वैक्यम्, ऐक्यस्य मुख्यार्थत्वेऽभ्युपगतेऽपि स्वारस्याभावात् सादृश्ये एव हि समशब्दस्य प्रसिद्धिप्राचुर्यं तस्य चापवादाभावे सत्यस्वरसार्थस्वीकारोऽनुपपन्नः, अपवादहेतवश्च त्वदुक्ता अनन्तरमेव परिह्रियन्ते

न च समादिशब्दानामैक्यं मुख्यार्थः, एकत्वविवक्षायामेको घट इत्यादौ प्रयोगाभावात्, मुख्यत्वे हि एकशब्दस्येव प्रतियोगिनिरपेक्षप्रयोगः प्राप्नोति, यस्तु सामानाधिकरण्यं समकालवर्तीत्यादिषु समादिशब्दप्रयोगः स तु साधारण्यार्थः न त्वैक्यार्थः, साधारण्येऽपि प्रयोगो मुख्यः प्रयोगेऽन्यथासिद्धे शक्तिकल्पनाऽनुपपत्तेः, तथा हि अनेकप्रतियोगिकैकरूपसंबन्धवत्त्वं साधारण्यं यथा धनं देवदत्तयज्ञदत्तौ प्रति शेषत्वेन संबन्धितया साधारणं, तयोश्च धनं प्रति शेषितयाऽस्ति सादृश्यं, ताभ्यां संबन्धिधनं तथा नीलत्वोत्पलत्वे अपेक्ष्याधारतया सम्बन्धि द्रव्यं साधारणं तयोश्च द्रव्यं प्रत्याधेयतयाऽस्ति सादृश्यं ताभ्यां सम्बन्धि द्रव्यं तथा द्वाभ्यां संयोगित्वेनावच्छेद्यावच्छेदकभावेन वा सम्बन्धी कालस्तयोः साधारणः तत्कालसम्बन्धित्वाकारेण तयोरपि सादृश्यमस्ति ताभ्यां सम्बन्धिकालः, अतो मिथःसदृशार्थसम्बन्धितया द्रव्यकालादिषु समसमानादिशब्दा लक्षणया वर्तन्त इति मुख्याः । अत ऐक्ये प्रयोगाभावत्सम-शब्दस्यैक्यं न मुख्यार्थः, मुख्यार्थे च सम्भवति लाक्षणिकार्थस्वीकारो नोपपद्यते अतः साम्य-शब्दः सादृश्यमेवाभिधत्ते, मुक्तात्मगोचरसामानाधिकरण्योपपत्तिश्चानन्तरमेव

भाष्ये वक्ष्यते, यदुक्तं सायुज्य-शब्देन मुक्तावभेद इति तदयुक्तं सायुज्यशब्दस्य
समानगुणयोगवाचित्वात् युज्यत इति युक्शब्दो गुणपरः, धर्मिणि हि
गुणः संबध्यते समानगुणकस्सयुक् तस्य भावस्सायुज्यमिति हि व्युत्पत्तिः
प्रयोगविरोधाच्च नैक्यं सायुज्यम् "एतासामेव देवतानां सायुज्यम् सार्ष्टितां
समानलोकतामाप्नोती"ति बह्वीभिर्देवताभिरेकस्य सायुज्यापत्तिः श्रूयते न
ह्येकस्य निरवयवस्यात्मनो बह्वीभिर्देवताभिरैक्यं सम्भवति, क्रमभावित्वा-
दविरोध इति चेत् तर्ह्यग्निनैकीभूतस्य वरुणसायुज्यावस्थायामग्नित्वोपाधेः
प्रहाणादग्नेर्देवताया अभावः स्यात्, अग्नित्वोपाधौ स्थिते वरुणैक्यापत्त्य-
नुपपत्तेः. औपाधिकभेदप्रहाणं ह्यैक्यापत्तिः न तु पूर्वमविद्यमानमैक्यमुत्प-
द्यते अग्नौ स्थित एव ततः पृथग्भूतस्य वरुणसायुज्यमिति चेत् एकीभूतस्य
पृथग्भावो ह्युपाधितः स्यात् उपाधिश्च देहान्तःकरणादिः तत्सम्बन्धस्या-
हेतुकत्वेऽतिसङ्गात् हेतुर्वाच्यः कर्मैव हेतुरितिचेत् अग्निसायुज्याऽऽप-
त्तिदशायां तत्कर्म नष्टं न वा, नष्टं चेत् पुनरुपाध्यनुदयेनाग्नितः पृथग्भा-
वायोगादग्नित्वोपाधेश्चाप्रहाणात्पूर्वोपाधिप्रहाणरूपवरुणसायुज्यापत्तिः
क्रमेणापि नोपपद्यते, अनष्टं चेत् तत्कृतोपाधेरनष्टत्वाच्चाग्निनैक्यापत्ति-
सम्भवः, औपाधिकभेदस्य तत्प्रहाणरूपैक्यापत्तिविरोधित्वात्, अनष्टमपि
तत्कर्माग्निसायुज्यापत्तिदशायां ततो भेदकमुपाधिं न जनयति कर्मणां
कार्यकरत्वस्य कालविशेषनियतत्वादिति चेत्, तथाऽपि व्यवस्थितकर्मविशे-
षपरिष्वक्तस्य जीवस्य तत्कर्मापरिष्वक्तादग्नितस्तदेव कर्म भेदकमिति
नाग्निनैक्यापत्तिरुपपद्यते । किंच पृथिव्येकीभूतपृथग्भूतघटस्येवाग्निनैकीभूत-
पृथग्भूतजीवस्याजत्वनित्यत्वानुपपत्तिश्च अतो भेदे स्थित एव अग्न्यादि-
सायुज्यं, समानलोकतासाहचर्याच्च नैक्यं सायुज्यं, न ह्येकस्य स्वेन समान-
लोकत्वसम्भवः, अतस्तयोः समानलोकत्ववद्भेदे स्थित एव सायुज्यं भवति
समानलोकताप्राप्त्यनन्तरं सायुज्यापत्तिः, न तु युगपदेव अतस्तयोरविरोध
इति चेन्न सायुज्यं सार्ष्टितां समानलोकतामिति सायुज्यस्य पूर्वश्रुतत्वात्,
अर्थक्रमेण पाठक्रमबाध इतिचेन्न अवयवशक्त्युपस्थापितार्थस्य पाठक्रमानुगुण-
त्वादर्थान्तरकल्पनस्याहेतुकत्वाच्च । यदि पाठक्रमबाधार्थं सायुज्यशब्दस्यै-

क्यापत्तिलक्षणार्थविषया रूढिशक्तिः कल्प्यते तदाऽन्योन्याश्रयस्तु स्यात् सायुज्यस्यैक्यापत्तिलक्षणत्वनिश्चये पाठक्रमबाधः, पाठक्रमबाधे सति सायुज्यस्यैक्यापत्तिलक्षणत्वनिश्चय इति, एतेषामेव सलोकतां सायुज्यमश्नुत" इति वाक्यात् पूर्वोदाहृतवाक्यस्यक्रमविरोध इति चेत् न विरुद्धार्थविषयरूढिशक्तेरक्लृप्ततया विरोधास्फुरणात् । किंच "अग्नेर्वा एतानि नामधेयानि अग्नेरेव सायुज्यं सलोकतामाप्नोती"त्यादिवाक्यानि "वायोरेव इन्द्रस्यैव बृहस्पतेरेव प्रजापतेरेव ब्रह्मण एव सायुज्यं सलोकतामाप्नोती"ति भूयसां वाक्यानां बलीयस्त्वात्त्वदुक्तक्रम एव बाध्यः । किंच एतेषामेव सलोकतां सायुज्यमश्नुत अग्नेरेव सायुज्यं सलोकतामाप्नोती"त्यादिवाक्यानि कर्मविशेषार्थवादरूपाणि कर्मफलत्वाच्चाग्न्यादीत्यादिदेवतासायुज्यमनित्यम् अतः कर्मफलावसानेऽग्न्यादिभ्यस्तत्सायुज्यं प्राप्तानां पृथग्भावस्यावर्जनीयत्वाद्रामोपासकजीवभेदस्थितेर्भवतामपीष्टत्वादग्न्यादिसायुज्यदशायामपि भेदस्थितिरवर्जनीया अग्न्यादिसायुज्य गतानां ततः पृथग्भावः पुनरप्युपाधित इति चेत् दत्तमुत्तरं, न चाग्न्यादिसायुज्योक्तिरर्थवादत्वादनादरणीयेति वाच्यम् वेदान्तिभिरर्थवादानां प्रतीयमानार्थे प्रामाण्याभ्युपगमात्, अतो न सायुज्यमैक्यमपि तु समानगुणयोग एव, लयोऽपि न स्वरूपैक्यं, लय-शब्दस्य तदर्थत्वाभावात् प्रयोगानुगुणं शब्दार्थव्यवस्थापनं कार्यमिति नित्यनैमित्तिकमहाप्रलयेष्वपि लय-शब्दः प्रयुज्यते

न च तत्र स्वरूपैक्यापत्तिः, न तावन्नित्यप्रलये स्वर्गनरकादिगमनागमनश्रवणात्, नापि नैमित्तिके पूर्वकल्पप्रलीनानां नारदादीनां प्राग्जन्मप्रत्यभिज्ञानवतामेव पुनरुत्पत्त्यवगमात् नारदेन पूर्वकल्प स्वजन्मवृत्तादिकमिह कल्पेऽभिहितमिति पुराणेष्ववगम्यते, नापि महाप्रलये वैषम्यनैर्घृण्यपरिहाराय जीवनित्यत्वबहुत्वकर्मवासनानां तदानीं विद्यमानताया अभ्युपगन्तव्यत्वात्, तथा "प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभावेतौ लीयेते परमात्मनी"ति वदता भगवता पराशरेणैव हि "हिंसाहिंस्रे मृदुक्रूरे धर्माधर्मावृताऽनृते । तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते" "प्रधानकारणीभूता यतो वै सृज्यशक्तयस्तेषां येषां यानि कर्माणि प्राक्

सृष्टाः प्रतिपेदिरे” इत्यादिभिस्तदानीं सवासनकर्मान्वितजीवबहुत्वं च दर्शितम्, अत एव भेदप्रहाणं च न लय-शब्दार्थः,

न च प्राकृतप्रतिसंचरमोक्षविषयप्रलयशब्दयोरर्थवैरूप्यं वक्तुम् उचितं शक्तिभेदकल्पनामुख्यत्वयोरन्यतरप्रसङ्गात्, न चापि महाप्रलयादिषु लय-शब्दस्यामुख्यत्वं वाच्यम्

बहुष्वर्थेष्वमुख्यत्वाश्रयणादपि मुक्तिविषयमात्रप्रलय-शब्दस्यैवामुख्यत्वाश्रयणोपपत्तेः, अतस्सर्वप्रयोगानुगुणोऽर्थः स्वीकार्यः, अतोऽविसदृशावस्थाप्रहाणेन कारणत्वधर्मिणा द्रव्येण विभागस्यापादानभूतेन संश्लेषो लयः, तस्मादैक्यं न लय-शब्दार्थः, घटाकाशादिदृष्टान्तोपन्यासश्चौपाधिकवैषम्याभावनिबन्धनः, आकाशादितत्त्वानामपि सांशत्वात्तेषां पञ्चीकरणवचनेन प्रदेशभेदवत्ता हि वेदान्तिभिरभ्युपेतव्या, अतो मोक्षविषयासु श्रुतिषु स्वरूपैक्यं क्वचिदपि नावगम्यते । निर्गुणप्राप्तिविषया श्रुति काचिदपि नास्तीत्ययमर्थश्चानन्तरमेव उपपाद्यते, अतःसाधर्म्यस्मरणस्य सगुणप्राप्तिविषयत्वाच्च परममोक्षविषयत्वम् । अन्यथा निर्गुणप्राप्तिविषय-श्रुतिविरोधे स्मृतिदौर्बल्यप्रसङ्गादित्यपि दुरुक्तं, तस्माद्यदा पश्य इत्यादि-वाक्ये साम्य-शब्दः सादृश्यपरः, येनाकारेण साम्यन्तस्याकारस्य निरवधिकत्वं परम-शब्दाभिप्रेतम्, अत इदं वाक्यं परब्रह्मप्राप्तिरूपं परममोक्षं तत्साम्यापत्तिलक्षणमेव प्रतिपादयति । अथ गुणोपासकस्य सगुणब्रह्मप्राप्तिं वदन्त्येताः श्रुतयः, न तु परब्रह्मविदः परब्रह्मप्राप्तिमिति शङ्कायामाह—

सू० परविद्यासु सर्वासु सगुणमेव ब्रह्मोपास्यं, फलं चैकरूपमेव, अतो विद्याविकल्प इति सूत्रकारेणैवानन्दादयः प्रधानस्य विकल्पोऽविशिष्टफलत्वादित्यादिषूक्तम्

टी० “परविद्यास्वि”ति, परविद्यासु-ब्रह्मविद्यास्वित्यर्थः सर्वासु परेण सगुणविषयत्वेन निर्गुणविषयत्वेन चोक्तासु दहरविद्यासद्विद्याऽक्षरविद्यादिष्वित्यर्थः, अदृश्यत्वादिगुणक इति पराविद्यावाक्यविषयसूत्रस्वारस्यात्तस्याः सगुणविषयत्वं प्रतीयते “आनन्दादयः प्रधानस्ये”ति सूत्रमुपास्य-

सगुणत्वायोदाहृतं "विकल्पो विशिष्टफलत्वादि"ति सूत्रं प्राप्यसगुणत्वायोपात्तम्, अयमर्थः परेण निर्गुणविषयत्वेनाभिमतानां सत्यं ज्ञानमानन्दो ब्रह्मेत्यादिवाक्यानामानन्दादिगुणविशिष्टविषयत्वं तेषां च गुणानां सर्वविद्याऽनुयायित्वं चोक्त्वा तास्वेकैकविद्या फलायालमिति विद्याविकल्पोक्तिः, अतः परेण निर्गुणसगुणविषयत्वेनाभिमतासु सद्विद्यादहरविद्यादिषूपास्यं फलं च सगुणमिति सगुणप्राप्त्यतिरेकेण निर्गुणप्राप्तिः प्रमाणशून्या, अतोमुक्तौ भेदपराणां श्रुतीनामन्यथासिद्धिर्नोपपद्यते प्राप्यवैषम्याभावादिति सूत्रकाराभिप्रायविदामुक्तिं दर्शयति—

सू० वाक्यका[1]रेण च सगुणस्यैवोपास्यत्वं विद्याविकल्पश्चोक्तः, "युक्तं तद्गुणकोपासना"दिति भाष्यकृता व्याख्यातं च "यद्यपि सच्चित्त इत्यादिना, ब्रह्म वेद ब्रह्मैव भवतीत्यत्रापि "नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं" "निरञ्जनः परमं साम्यमुपैति" "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत" इत्यादिभिरैकार्थ्यात् प्राक्तनानामरूपाभ्यां विनिर्मुक्तस्य निरस्ततत्कृतभेदस्य ज्ञानैकाकारतया वस्तु[2]प्रकारतोच्यते ॥

टी० "वाक्ये"ति, "युक्तं तद्गुणकोपासनादि"ति युक्तं—गुणयुक्तमेव प्राप्यं कुतः तद्गुणकोपासनादित्यर्थः, विद्या विकल्पश्च तत्रैव द्रष्टव्यः सच्चित्तः—सद्विद्यानिष्ठः । तर्हि मुक्तावभेदश्रुतेः कोऽर्थ इत्यत्राह "ब्रह्मे"ति, "स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवतीति प्रकृतस्य वेदितुर्ब्रह्मपर्यन्तस्वरूपाविर्भावपरमिदं वाक्यमिति यथा सेत्स्यति वक्ष्यते इह त्वर्थान्तरमुच्यते प्राकृतरूपनामप्रहाणज्ञापनाय नामरूपाद्विमुक्त इति श्रुतिरुदाहृता साम्यापत्तिपरत्वार्थं निरञ्जन इति वाक्यमुपात्तं तस्यैव साम्यस्य स्वाभाविकत्वज्ञापकं परं ज्योतिरिति वाक्यं, तर्ह्यमुख्यत्वं स्यादित्यत्राह—

---

१ वाक्यकारश्च द्रमिडाचार्यादपि प्राचीनो विशिष्टाद्वैतवादी टङ्कनाम्ना प्रसिद्धः ।
२ ब्रह्मप्रकारतोच्यत इति पुस्तकान्तरपाठो युक्तः ।

Digitized by Google

भू० प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव यथा सेयं गौरिति अत्रापि "विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव? प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः" इति परब्रह्मध्यानादात्मा परब्रह्मवत्प्रक्षीणाशेषभावनः

टी० "प्रकारैक्ये चे"ति, सोऽयं व्रीहिरित्यादेरुपलक्षणमिदमुदाहरणं यथर्त्तुष्वृतु लिङ्गानि नानारूपाणि पर्य्यये दृश्यन्ते तानि तान्येव तथा भावा युगादिष्वित्यादिप्रयोगो भारतादिषु द्रष्टव्यः, दृष्टान्ते प्रकारैक्येऽपि तत्त्वव्यवहारो मुख्योऽप्यस्वरसः पूर्वदृष्टे गवि व्यक्त्यंशप्रहाणादस्वारस्यं जात्यंशस्य सोसादृश्यलक्षणैक्यान्मुख्यत्वं, दार्ष्टान्तिके तु गङ्गायां घोष इति गङ्गापदवत् कार्त्स्न्येन प्रवृत्तिनिमित्तप्रहाणाभावात्परमात्मनीव प्रवृत्तिनिमित्तपोष्कस्याभावाच्च प्रवृत्तिनिमित्तैकदेशान्वयिनि मुक्तात्मनि मुख्यकोटिरित्यभिप्रायेण मुख्यगुण एवेत्युक्तं, लाक्षणिकगङ्गापदवचात्यन्तामुख्य इत्यर्थः न हि मुक्तस्यापरिच्छिन्नज्ञानानन्दत्वेऽपि जगत्कारणत्वानुगुणं बृहत्त्वं स्वरूपबृहत्त्वं चास्ति आकारैक्येऽपि तत्त्वव्यवहारस्यात्यन्तामुख्यत्वाभावे सोऽयं गौरिति दृष्टान्तः, न केवलं योगसंग्रहारम्भे विस्तरेऽपि अव्यवहितेषु पूर्वश्लोकेषु भेदप्रतिपत्तिरस्तीत्याह "अत्रापी"ति, न केवलं मुक्तिविषयप्रकरणान्तरेषु अस्मिन् प्रकरणेऽपीति वाऽर्थः, अस्मिन् श्लोके तथैवेति ब्रह्मसाधर्म्यादेशे उपयुज्यत तथैवेत्येतद्व्याख्यानं परब्रह्मवदित्याप्रक्षीणाशेषभावनशब्दं व्याचष्टे—

भू० कर्मभावनाब्रह्मभावनोभयभावनेति भावनात्रयरहितः प्रापणीय इत्यभिधाय

"क्षेत्रज्ञः करणी ज्ञानं करणं तस्य वै द्विज?
निष्पाद्य मुक्तिकार्यं वै कृतकृत्यं निवर्त्तये" दिति करणस्य परब्रह्मध्यानरूपस्य प्रक्षीणाशेषभावनात्मस्वरूपप्राप्त्या कृतकृत्यत्वेन निवृत्तिवचनाद्यावत्सिद्ध्यनुष्ठेयमित्युक्तम् ।

टी० "कर्मभावने"ति, परब्रह्मवत्प्रक्षीणाशेषकर्मभावन इति पाठे कर्म-शब्दो यागादिक्रियोपासनासाधारणोऽनुष्ठेयमात्रपरः तदा कर्म-शब्देन त्रिविधा भावभावनेत्यत्र भावशब्दो व्याख्यातो भवति । अत्रायमर्थः प्राप्यपरब्रह्मविषयज्ञानस्य प्रापकत्वाच्छुद्धस्वस्वरूपमपि प्राप्यमिति तदनुसंधेयमिति अयं च व्यतिरेकस्तद्भावभावित्वादित्यधिकरणार्थस्तत्र बन्धस्वरूपं चिन्त्यमिति पूर्वपक्षीकृत्य मुक्तस्वरूपं चिन्त्यमिति हि सिद्धान्तितम् । अस्य श्लोकस्यैकप्रकरणत्वज्ञापनायानन्तरश्लोकोऽपि व्याख्यायते "क्षेत्रज्ञ"इति, यावत् क्षेत्रज्ञावस्थस्तावत् करणी उपासकः तस्य करणज्ञानं करणभूतं ज्ञानं मुक्तिकार्यं निष्पाद्य निवर्तयेच्च तु मुक्तेः पूर्वं निवर्तयेदित्यर्थः, न हि मुक्तस्योपासननिर्वृत्तिर्विधेया, अतो यावन्मोक्षमनुष्ठेयत्वमुक्तमिति भावः । तद्भावभाव-शब्देन ब्रह्मसाम्यापत्तिज्ञापनार्थं विभेदजनके ज्ञान इत्यत्र ज्ञान इति पदच्छेदशङ्काव्युदासार्थं च तद्भावभावमिति श्लोको व्याख्यायते तद्भावेति श्लोके तद्भाव इत्युपमानबहुव्रीहिस्तद्भाव इति पदान्तर्गतो तच्छब्दभावशब्दो व्याख्यातुमाह-

मू० तद्भावभावमापन्नस्तदाऽसौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥

इति मुक्तस्य स्वरूपमाह तद्भावो ब्रह्मणो भावः स्वभावः न तु स्वरूपैक्यं तद्भावभावमापन्न इति द्वितीयभावशब्दानन्वयात्पूर्वोक्तार्थविरोधाच्च यद्ब्रह्मणः प्रक्षीणाशेषभावनत्वं तदापत्तिः तद्भावभावापत्तिः यदैवमापन्नः तदाऽयं परमात्मनाऽभेदी भवति ।

टी० "तद्भाव"इति, भाष्यस्थस्तद्भावशब्दो न बहुव्रीहिः किंतु तत्पुरुषः समासे व्याचिख्यासिते सति बहुव्रीहिविग्रहरूपेण पदोपादानं तच्छब्दभावशब्दमात्रस्य व्याचिख्यासितत्वात् बहुव्रीहिविग्रहरूपेण पदस्यानुपादानं तच्छब्देन ब्रह्मोच्यते प्रथमभावशब्देन स्वभाव उच्यत इत्यर्थः, "भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु । पदार्थमात्रे सत्तायामात्मयोनिस्वभाव-

यो"रिति हि नैघण्टुकाः । यद्वा भाष्यस्थतद्भावशब्दोऽपि बहुव्रीहिर्विग्रहः तद्भावो ब्रह्मणो भावः स्वभाव इति पदे तच्छब्दवाच्यब्रह्मसम्बन्धितया प्रतिपन्नो भावः स्वभाव इत्यर्थः । अथ वा श्लोकेऽपि तद्भावशब्दस्तत्पुरुषः, द्वितीयभाव–शब्दः सत्तावाची । व्यावर्त्यमाह "न त्वि"ति, कुत इत्यत्राह "तद्भावे"ति, हेत्वन्तरमाह "पूर्वोक्तार्थविरोधाच्चे"ति, हेयप्रत्यनीकत्वहेयार्थत्वादिविरोधोऽर्थविरोध एवं शब्दपर्यालोचनयाऽर्थपर्यालोचनया च भाव–शब्दस्य स्वभाववाचित्वमुपपादितम् । स्वभावशब्दवाच्यत्वं च पूर्वश्लोकोक्तं प्रक्षीणाशेषभावनत्वमित्याह "यदि"ति, तच्छब्दसामर्थ्याद् यद्वृत्तमाक्षिप्य व्याचष्टे "यदैव"मिति, अभेदीत्यत्र भेद–शब्दव्याख्यानार्थं भेदशब्दनञ्प्रत्ययाभ्यां विभज्य निर्दिशति–

मू० भेदरहितो भवति ज्ञानैकाकारतया परमात्मनैकप्रकारस्यास्य तस्माद्भेदो देवादिरूपः तदन्वयोऽस्य कर्मरूपाज्ञानमूलः न स्वरूपकृतः, स तु देवादिभेदः परब्रह्मध्यानेन मूलभूताज्ञानरूपे कर्मणि विनष्टे हेत्वभावान्निवर्त्तत इत्यभेदी भवति

टी० "भेदरहितो भवती"ति, यद्वा भेदरहितो भवति न तादात्म्यवानिति भावः, अन्यथा भेदश्च तस्याज्ञानकृत इत्यनन्तरनिर्देशो न घटते देवादिभेदाभावः कथमिति शङ्कायां भेदश्च तस्येत्यादि व्याचष्टे "ज्ञानैकाकारतये"ति, परमात्मना भवत्यभेदीति परमात्मनः प्रस्तुतत्वादात्मनो, ब्रह्मण इत्यत्रापि पञ्चमीविवक्षया च तस्माद्भेद इत्युक्तं, ब्रह्मणो मुक्तात्मनश्चाकारान्तरेण भेदस्य प्रमाणसिद्धत्वान्निरसनीयभेदविशेषस्य वचनान्तरसिद्धत्वाच्च भेदो देवादिरूप इत्युक्तं, कर्मरूपशब्देन ज्ञानशब्दो व्याख्यातः, ज्ञानविरोधीति व्युत्पत्तिरित्यर्थः अविद्यया मृत्युं तीर्त्वेति हि श्रुतिः, अत्राप्यविद्या कर्मसंज्ञाऽन्येति हि पठ्यते अतः किं भेदराहित्यस्येति शङ्कायां भेदश्च तस्याज्ञानकृतो भवेदित्यनेनार्थसिद्धमभिप्रेतकारणाभावं विशदयन् कार्याभावमुपपादयति "स त्वि"ति, भेदस्य देवादिरूपत्वे अज्ञानशब्दस्य च कर्मपरत्वे प्रमाणमाह–

Digitized by Google

मू० यथोक्तम् ।

एकस्वरूपभेदस्तु बाह्यकर्मवृतिप्रजः ।
देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः ॥

इति, एतदेव विवृणोति "विभेदजनके ज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यती" ति, विविधो भेदो विभेदः देवतिर्यङ्मनुष्यस्थावरात्मकः ॥

टी० "यथोक्तमि"ति, आदिभरतचरितेऽयं श्लोकः, तत्र पूर्वं देहेन्द्रियादिबाह्यभेदरहितत्वमात्मन उक्तं, सितनीलेत्यादिना अस्मिन् श्लोके बुद्धिसुखदुःखाद्या आन्तरभेदोऽपि नास्तीत्युच्यते एकस्वरूपेति कर्मैव वृतिः कर्मवृतिः, बाह्यमान्तरं च कर्म द्विविधम् आन्तरमात्मप्रावरणहेतुः कर्म, बाह्यं बहिर्विषयप्रावरणहेतुः कर्म । यद्वा बाह्यमस्वाभाविकं कर्म तदेव वृतिः कर्मतया प्रकर्षेण जात एक स्वरूपभेदः, बाह्यकर्मशरीरद्वारकमेकस्वरूपस्यात्मन आन्तरं भेदं करोतीत्यर्थः । द्वारभूतदेवादिशरीरभेदे नष्टे सति आन्तरभेदो नास्ति । कथं वा देवादिभेदे नष्टे कर्मवृतिहेतुकान्तरभेदनाश इत्यत्राह "आवरणो हि स" इति, सः—निवृत्तदेवादिभेदः आत्मा, कर्मावरणरहितो हीत्यर्थः । यद्वा कर्मवृतिः कर्मजन्या वृतिः शरीरं तत्सम्बन्धेन आन्तरभेदः देवादिभेदेऽपध्वस्ते स नास्ति कथं कर्मजन्मवृतिहेतुक आन्तरभेदो देवादिभेदेऽपध्वस्ते नास्तीत्याह "अनावरणो हि स" इति कर्मजन्यवृतिर्देवादिशरीरभेदे एवेत्यर्थः एतदेव भेदस्य तस्याज्ञानकृतो भवेदित्युक्तमेवार्थं विवृणोतीत्यर्थः, विभेदजनक इत्यादिश्लोके ऽनानावृत्तिः शब्दादित्यधिकरणार्थं उच्यते परस्माद्ब्रह्मण आत्मनो देवादिभेदस्य प्रनष्टस्य पुनरावृत्तिं कः करिष्यतीत्युच्यते, विभेदशब्दं व्याचष्टे "विभेदो विविधोभेद इति-भेदस्य देवादिरूपत्वे प्रमाणान्तरमाह—

मू० यथोक्तं शौनकेनापि "चतुर्विधो विभेदो ऽयं मिथ्याज्ञाननिबन्धन" इति, आत्मनि विज्ञानस्वरूपे देवादिरूपविविधभे-

तद्धेतुभूतकर्माख्याऽज्ञाने परब्रह्मध्यानेनात्यन्तिकं नाशं गते सति हेत्वभावादसन्तं परस्माद्ब्रह्मणः आत्मनो देवादिरूपभेदं कः करिष्यतीत्यर्थः ॥

टी० "यथोक्तमि"ति, मिथ्याज्ञाननिबन्धनः—मिथ्याज्ञानमात्मविषयभ्रान्तिज्ञानं तत्कर्मद्वारा उक्तोक्तदेवादिभेदहेतुरित्यर्थः, अस्योत्तरार्द्धं देवतिर्यङ्मनुष्याख्यस्तथैव नृप? नारक इति व्याख्येयस्य श्लोकस्य वाक्यार्थमाह "आत्मनो"ति, ब्रह्मण इति पदस्य पञ्चम्यन्तत्वसूचनाय परस्मादित्युक्तम्। उभयोरपि पदयोर्वैयधिकरण्येन षष्ठ्यन्तत्वमयुक्तं, च-शब्दाभावात्, अनन्तरपूर्वश्लोके परमात्मना भवत्यभेदीति परमात्मनः प्रतियोगितया निर्देशाच्च, अत एव समानाधिकरणषष्ठ्यन्तत्वमप्ययुक्तं पूर्वापरश्लोकार्थविरोधाच्च पञ्चम्यन्तत्वं षष्ठ्यन्तत्वं च विपर्ययेण स्यादिति चेन्न तथा परब्रह्मणोऽपि हेयार्थत्वापत्तेः स्वाभाविकत्वप्रसङ्गात् अतः परस्मात् ब्रह्मण इत्युक्तम् असन्तम्—सच्छब्दः परमार्थपर्यायः अनाशी परमार्थश्चेत्यत्रैव ह्युक्तम् अनित्यमित्यर्थः, तेन स्वाभाविकमिथ्याभेदव्यावृत्तिः, अनित्यत्वं कादाचित्कत्वम् अनित्यत्वाधेयत्वापेतो देवादिभेदः तं कः करिष्यति न कश्चिदपि, हेत्वभावात् न कर्मरूपहेत्वभावादित्यर्थः, न केवलमेकार्थविषयो ब्राह्मकर्मवृत्तिपक्षः अज्ञानकृतो भवेदिति अज्ञानकर्मशब्दयोः प्रयोगादज्ञानशब्दस्य कर्मार्थत्वम्। अस्मिन् प्रकरणे च कण्ठोक्तमित्याह—

मू० अविद्याकर्मसंज्ञाऽन्येत्यत्रैवोक्तं "क्षेत्रज्ञं चापि मां विद्धी"त्यादिनाऽन्तर्यामिरूपेण सर्वस्यात्मतयैक्याभिधानम्, अन्यथा "क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते उत्तमः पुरुषस्त्वन्य इत्यादिभिर्विरोधः ॥

टी० "अविद्या कर्मसंज्ञाऽन्ये"ति "अत्रैवोक्त"मिति, आत्मन औपाधिकभेद उपाध्यपगमेन नश्यतीति श्लोकार्थः, उपाध्यभावादविद्यमानं भेदं क उत्पादयेदिति वाऽर्थः, अयं श्लोको मृषावादिनामत्यन्तास्वरसः, तथा हि

भेदजनक इत्यत्र जनक–शब्द उत्पादके स्वरसो न त्वध्यासहेतौ अज्ञानशब्दस्य अनिर्वचनीयपरत्वं लोकतः शास्त्रतश्च न व्युत्पन्नं कर्मवाचित्वव्युत्पत्तिरस्मिन् प्रबन्ध एव दर्शिता नाशशब्दस्य बाधवाचित्वममुख्यम्, अखण्डमिति पदं च व्यवच्छेद्याभावादफलम् सतो भेदस्यानभ्युपगमात् तदभ्युपगमे हि तत्साफल्यं करिष्यतीति पदमप्यस्वरसम् अध्यासवाचित्वाभावात् अथाद्वैतपरत्वेन परोक्तं भगवद्गीतावचनं व्याचष्टे "क्षेत्रज्ञं चापी"ति, पराभिमतार्थस्य पूर्वापरविरोधं दर्शयति "अन्यथे"ति, न केवलमुत्तमः पुरुषस्त्वन्य इति भेदप्रतिपादनात्तद्विरोधेन स्वरूपैक्यपरत्वाभावः सामानाधिकरण्योपपादकमन्तर्यामित्वं कण्ठोक्तमपीत्याह—

सू० अन्तर्यामिरूपेण सर्वेषामात्मत्वं तच्चैव भगवताऽभिहितम् ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति सर्वस्य चाहं हृदि सन्निविष्ट इति च अहमात्मा गुडाकेश ? सर्वभूताशयः स्थित इति च तदेवोच्यते भूतशब्दो ह्यात्मपर्यन्तदेहवचनः यतः सर्वेषामयमात्मा तत एव सर्वेषां तच्छरीरतया पृथगवस्थानं प्रतिषिध्यते "न तदस्ति विना यत्स्या"दिति

टी० "अन्तर्यामी"ति, "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ? तिष्ठती"त्यत्र भूत–शब्दस्यात्मपर्यन्तदेहपरत्वं, भ्रामयन् सर्वभूतानीत्यस्योत्तरार्धेनावगम्यते न हिंस्याद्भूतानीत्यादिप्रयोगाच्च "सर्वस्य चाहं हृदि सन्निविष्ट" इत्यत्रापि सर्वशब्दस्यात्मपर्यन्तत्वं "मत्तः स्मृतिर्ज्ञानमपोहनं चे"त्यनेनावगम्यते हृद्देशे हृद्देशस्य आत्मनीत्यर्थः सर्वस्य चाहं हृदीत्यपि तथाऽहमात्मा गुडाकेशेत्यत्राप्यन्तर्यामित्वपरतामाह "अहमि"ति, कुत इत्यत्राह "भूतशब्दो ही"ति, पूर्वं दर्शितसर्वशब्दैकार्थ्याच्चेति भावः । अन्वयरूपेणोक्तस्य सर्वेषां भगवदात्मकत्वस्य शेषभूतोऽयं न तदस्तीति व्यतिरेकनिर्देशस्तदनुगुण एवेत्यभिप्रायेणाह "यतः सर्वेषामि"ति, अविनाभावशब्दस्य सम्बन्धनियमवाचित्वादिति भावः । हेत्वन्तरमाह—

१ आत्मपरत्वमिति पा० ।

मू० भगवद्विभूत्युपसंहारस्थायमिति तथैवाऽभ्युपगन्तव्यं, तत इदमुच्यते "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवं विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि"ति, अतः शास्त्रेषु न निर्विशेषवस्तुप्रतिपादनमस्ति नाप्यर्थजातस्य भ्रान्तत्वप्रतिपादनं, नापि चिदचिदीश्वराणां स्वरूपभेदनिषेधः ॥

टी० "भगवद्वि"ति, "एतां विभूतिं योगं चे"ति प्रक्रमाद्विभूतिपरत्वमवगम्यते अतः उपक्रमानुगुण एव उपसंहार इत्यर्थः, न हि विभूतित्वं विधाय तदेव निषेद्धुं शक्यमिति भावः। प्रकरणस्य विभूतिपरत्वं दर्शयति "यद्यद्वि"ति, विभूतिमत्—नियाम्यवत्, श्रीमत्—भोग्यसमृद्धिमत्, ऊर्जितं—बलवत्, कल्याणगुणारम्भेषु उद्युक्तं तेजः—पराभिभवसामर्थ्यं प्रशासनं तेजोंऽशसम्भवं नियमनशक्तिमत् मदाज्ञालवाधीनमित्यर्थः शास्त्रस्य परोक्तार्थपरत्वाभावमुपसंहरति "अत" इति, अतः श्रुतियोजनाप्रभृतिप्रतिपादितैर्न्यायैरित्यर्थः, भ्रान्तत्वं भ्रान्तिसिद्धत्वं जगद्ब्रह्मणोरेकद्रव्यत्वपक्षे ब्रह्मणः सविशेषत्वं जगतः सत्यत्वं चोपपन्नमिति शङ्काया व्युदासार्थमाह "नापी"ति, चेतनेष्वचिद्धर्मबुद्धिः परतन्त्रेषु स्वतन्त्रबुद्धिरपि भ्रमः न तु स्वरूपभेदधीरित्यभिप्रायेण स्वरूपभेदनिषेध इत्युक्तम्। अथवा मृषावादिनमेवोद्दिश्य जीवपरयोः स्वरूपभेदनिषेधाभावमाह "नापी"ति, अचिदुपादानं दृष्टान्ततया। अथाविद्यां दूषयितुं तद्विषये परोक्तमर्थमनुवदति—

मू० यदप्युच्यते निर्विशेषे स्वयंप्रकाशे वस्तुनि दोषपरिकल्पितमीशेशितृत्वाद्यनन्तविकल्पं सर्वं जगत्, दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयाऽनाद्यविद्या, सा चावश्यमभ्युपगमनीया "अनृतेन हि प्रत्यूढा" इत्यादिभिः श्रुतिभिर्ब्रह्मणः तत्त्वमस्यादिवाक्यसामा-

नाधिकरणावगतजीवैक्याऽनुपपत्त्या च, सा तु न सती भ्रान्तिबाधयोरयोगात् नाप्यसती ख्यातिबाधयोश्चायोगात्, अतः कोटिद्वयविनिर्मुक्तेयमविद्येति तत्त्वविद् इति, तद्युक्तं सा हि किमाश्रित्य भ्रमं जनयतीति वक्तव्यम् ॥

"यद्यपी"ति, निर्विशेषस्य कथं भ्रमसम्भव इत्यत्राह "दोषे"ति, ब्रह्मव्यतिरिक्तदोषोऽस्ति चेत् अद्वैतहानिरित्यत्राह "दोषश्चे"ति, अस्मिन्नर्थे परोक्तश्रुतिस्मृत्यर्थापत्तीर्दर्शयति "अनृतेने"ति, सदसद्विलक्षणत्वमुपपादयति "सा त्वि"ति, भ्रान्तिबाधायोगात्–भ्रान्तिबाधविषयत्वायोगात् प्रमितभ्रान्तिबाधाऽन्यथानुपपत्त्या सदसदनिर्वचनीयत्वमित्यर्थः । सद्भाव एवं भवता मयोक्त इतिवच्च परमतमिति दर्शयितुं तत्त्वविद इत्युक्तम् । दूषयति "तदयुक्तमि"ति, आश्रयानुपपत्तितिरोधानानुपपत्तिस्वरूपानुपपत्त्यनिर्वचनीयत्वानुपपत्तिप्रमाणानुपपत्तिनिवर्त्तकानुपपत्तिनिवर्त्त्यानुपपत्तिभिर्दूषयिष्यन् प्रथममाश्रयानुपपत्तिस्वरूपमाह "सा ही"ति, किमाश्रित्य न किञ्चिदपीत्यर्थः । किं जीवमाश्रित्य ? उत ब्रह्मे ? ति विकल्पाभिप्रायेणाह– (शेषमग्रे)

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या

विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(Continued from page 532. Vol. IX.)

अथ तृतीयाध्याय आरभ्यते ।

प्रतिज्ञाऽधिकरणम् सू० अथातः शेषलक्षणम् ॥ १ ॥

एवं सिद्धे भेदे शेषशेषित्वमिदानीं चिन्त्यते, भिन्नानां हि तत्संभवति नाभिन्नानामिति भेदलक्षणस्य हेतुत्वं, यद्यपि "व्रीहीनवहन्ति" "सोमेन

यजेते"त्यादिषु द्रव्यकर्मणां शेषशेषिभावो न कर्मभेदापेक्षस्तथाऽपि कर्मणा-मपि प्रयाजाऽऽग्नेयादीनां शेषशेषित्वमिहैव वक्तव्यमिति तत्सिद्ध्यर्थं भेदल-क्षणापेक्षणम् । ननु चावघातस्यापि "व्रीहिभिर्यजेते"ति शास्त्रान्तरार्थेन शेषशेषित्वचिन्ता न व्रीहिपदार्थमात्रेण, शास्त्रभेदलक्षणं च पूर्वं वृत्तमिति भवति हेतुत्वं, तत् किं व्रीहीनवहन्ति व्रीहिभिर्यजेतेत्यनयोः शास्त्रयोर्भेदो-ऽस्ति? ओमिति चेत् केन खलु न तावन्निरपेक्षसाध्यभेदोऽत्रास्ति, नाप्यनु-बन्धभेदः, येन शास्त्रभेदः स्यात्, तस्माद्वाक्यान्तरत्वमेवात्र न शास्त्रान्त-रत्वं, न च वाक्यभेदलक्षणं पूर्वं वृत्तं "सोमेन यजेताऽरुणया क्रीणाती"त्या-दिषु वाक्यान्तरत्वमपि नास्ति

ननु तत्रापि ज्योतिष्टोमेन स्वर्गकामो यजेतेति शास्त्रान्तरविहि-ताधिकारसंबन्धस्यैव यागस्य शेषः सोमः, इति चेन्न न हि सोमज्योति-ष्टोमवाक्ययोरनुबन्धसाध्यभेदोऽस्ति उभयत्रापि सोमस्यैव विषयत्वेनानु-बन्धभेदाभावात् निरपेक्षसाध्यभेदाभावाच्च "उद्भिदा यजेत पशुकामः" "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम" इत्यादौ तु स्ववाक्यत एव फले यागस्य द्रव्यदेवतस्य च यागे शेषत्वमिति वाक्यान्तरत्वमपि नास्ति तथैकस्मिन्नेव पदे प्रत्ययार्थभावनामपूर्वं वा प्रति प्रकृत्यर्थस्य यागस्य शेषत्वात्पदभेदोऽपि नास्ति नतरां वाक्यभेदः, नतमां च शास्त्रभेदः, तस्मात्कर्मणामेव शेषशे-षित्वचिन्तार्थं भेदलक्षणापेक्षणम् अतोऽपि न शास्त्रभेदापेक्षा तदभावे-ऽप्यवघाताग्नेयादीनां शेषशेषित्वात्, तस्मात्कर्मभेदानुभाषणमेवैतच्चानाक-र्मलक्षणं वृत्तमिति न तद्द्वारा शास्त्रभेदानुभाषणं तस्येहानुपयोगात् । अत एव कर्मभेद एव पूर्वाध्यायार्थो न शास्त्रभेदः, सोऽत्रेण चातः—शब्देन पूर्ववृत्त-स्येह हेतुत्वमुच्यते, हेतुत्वं च कर्मभेदस्यैव संभवति कर्मभेदस्येत्युक्तम्, अतः सूत्रभाष्यविपरीतं शास्त्रभेदस्याध्यायार्थत्वम् अयुक्तं च अनुबन्धान्तरं हि बुद्ध्यमानस्तदनुबद्धं नियोगान्तरमेव बुद्ध्यते न मध्ये शास्त्रभेदमतो नासौ चो-दनार्थः, अचोदनार्थश्च न विचारमर्हतीति न तद्विचारार्थं भेदलक्षणमि-त्यास्तां तावत्, बहुप्रकारं चेदं शेषलक्षणं वक्ष्यते कः शेष इति स्वरूपं केन हेतुना शेष इति शेष—शब्दप्रवृत्तिनिमित्तं, कथं नियुज्यत इति विनियोगप्र-

कारः श्रुत्यादीनि विनियोगे शेषस्य शेषिणा सहान्वयबोधने कारणानि प्रमाणानि तेषां च विरोधे बलाबलं, विरोधश्च क्वास्ति क्व च नास्ति तदेतत्सर्वमभिसंधाय शेषलक्षणं वक्ष्याम इति सूचितं, तदनेन सूत्रेण श्रोतृबुद्धिसमाधित्सया वक्ष्यमाणार्थप्रदर्शनमात्रं कृतं नात्र पूर्वपक्षेण प्रयोजनम् ।

अथ शेषत्वकारणसहितशेषलक्षणाधिकरणम् ।

सू० शेषः परार्थत्वात् ॥ २ ॥

उक्तं शेषलक्षणं वक्ष्यत इति, तदिदमुच्यते प्रथमं तावदनेन सूत्रेण शेषस्वरूपं हेतुश्च श्रुत्यर्थाभ्यामुच्यते तत्र सूत्रे श्रुत्या हेतुरुच्यते परार्थत्वाच्छेष इति, स्वरूपं त्वर्थात्, यदा हि परार्थत्वं शेष–शब्दप्रवृत्तौ हेतुस्तदा परार्थ एव शेष इति सिद्धं भवति, भाष्ये तु यः परार्थस्तं वयं शेषं ब्रूम इति स्वरूपं श्रुत्युक्तम् अर्थात्तु हेतुरि[1]ति द्रष्टव्यम्, अत्र चाविनाभावादिति लक्षणाभासनिराकरणाय पारार्थ्यं लक्षणमुच्यते केचित्किल येन विना यन्न भवति बीजादिस्तस्याङ्कुरादिः शेष इत्याहुः, तदयुक्तं रूपरसादीनामाग्नेयादीनां च मिथो विनाभावेन शेषत्वापत्तेः प्रयोज्यत्वं शेषत्वम् इत्येतदपि पुरोडाशकपालादिष्वप्रयोज्येष्वपि शेषत्वसंभवादव्यापकम् अन्ये तु यद्यस्मादधिकं विधीयते स तस्य शेष इत्याहुः, तदतिमन्दम् अङ्गप्रधानानां परस्पराधिक्यात्. अन्ये विध्यन्तविहितं शेषमाहुः तदपि विध्यादिविहितानामपि शाखाच्छेदनादीनामङ्गत्वदर्शनात् अयुक्तं, तस्मादुपकारकत्वमेव शेषत्वमित्येतदप्ययुक्तं प्रधानान्यप्यङ्गानामनुष्ठानोपयोगं कुर्वन्ति शेषत्वं गच्छेयुः तस्मात्पारार्थ्यमेवैकं युज्यते शेषलक्षणं, परोद्देशप्रवृत्तिश्च पारार्थ्यमभिधीयते, कथं तर्हि श्रुत्यादिलक्षणं शेषत्वं, न हि सोमेन यजेतेति तृतीयया परोद्देशप्रवृत्तत्वं सोमस्योच्यते करणमात्राभिधानात्, उच्यते न श्रुत्यादयः पारार्थ्यमभिदधतीति ब्रूमः किं तर्हि विधिसहिताः पारार्थ्यं बोधयन्तीति, विधिरपि नाभिधानेन पारार्थ्यं गमयति, किं त्वर्थापत्त्या, स हि चेतनप्रवर्तनाऽऽत्मा, न चानुद्दिष्टफले व्यापारे चेतनः प्रवर्तयितुं शक्यते, इत्यर्थाद्विधिविषयस्य व्यापारस्य फलोद्देशप्रवृत्तताऽवगम्यते,

१ हेतुस्त्वर्थादिति द्रष्टव्यमिति पा० ।

Digitized by Google

फलार्थश्च व्यापारः फलवदेव पुरुषस्याभिलषित इति तत्साधनत्वेन श्रुत्या-
दिभिरवगतानां तत्साधनत्वेन च विधीयमानानां सोमादीनामपि तद्धेतु-
प्रवृत्तिः सिद्धा भवति। तस्माद्युक्तं श्रुत्यादिगम्यं पारार्थ्यलक्षणं शेषत्वमिति।

शेषलक्षणाधिकरणम्। सू० द्रव्यगुणसंस्कारेषु बादरिः ॥ ३ ॥

अत्र शेषत्वस्य विषयकथनेन कः शेष इत्ययमेवांशः प्रपञ्च्यते "बाद-
रिर्द्रव्यसंस्कारगुणेष्वेवाह शेषताम्। श्रुत्यादेर्दर्शनाद्ध्येते कर्मणामुपकारकाः"
उपकारकत्वमेव शेषत्वं, न पारार्थ्यं तस्य बोधकाभावात्, विधिस्तावत्प्रवर्त-
नामात्ररूपो न तादर्थ्यं गमयति, श्रुत्यादयोऽपि साध्यसाधनभावमात्रपरा
न पारार्थ्यं प्रतिपादयन्ति, तस्मादुपकारकत्वमेव शेषत्वं, तच्च दृष्टार्थानां
द्रव्यगुणकर्मणां दर्शनादेवावगम्यते प्रोक्षणादीनां तु श्रुत्यादिभिः, द्वितीया
हि व्रीहीणां प्रोक्षणं प्रति साध्यत्वमभिदधानोपकारमन्तरेण तदनुपपत्ते-
रुपकारं गमयति, न तु यागस्य फलशेषत्वे, फलस्य वा पुरुषशेषत्वे प्रत्यक्ष-
दर्शनं श्रुत्यादयो वा संभवन्ति यजेतेति यागः कर्तव्य एतावदुच्यते, न
तु यागेन फलमिति तदेतत्स्वर्गकामाधिकरणपूर्वपक्षे वक्ष्यामः, स्वर्गोऽपि
काम्यमानात्मना शब्देनोच्यते न स्वात्मार्थः परार्थो वेति, तस्मान्न तयोः
शेषत्वम्, अत एव न पुरुषस्य शेषिता, शेषत्वं तु तस्य द्रव्यत्वादिष्टमेव, तस्मा-
द्द्रव्यगुणसंस्कारेष्वेव शेषत्वमिति, तदेतत्स्वर्गकामाधिकरणपूर्वपक्षवादिना-
बादरेर्मतं, जैमिनिस्तु उपकारलक्षणस्य शेषत्वस्योक्तदोषत्वात्पारार्थ्यमेव
शेषत्वं, तच्च विधिगम्यमिति स्वर्गकामाधिकरणसिद्धान्ते वक्ष्यमाणमभि-
प्रेत्य कर्मणामपि पारार्थ्याच्छेषत्वमाह तदेतत्र सिद्धमिति नात्र किंचि-
त्प्रतिपाद्यं, प्रपञ्चमात्रं त्विह पूर्वोक्तशेषत्वविषयस्य क्रियते, प्रपञ्चं तु कुर्वन्
परमतोपन्यासपुरःसरं स्वमतमुपन्यस्तवान्, एवं फलस्यापि पुरुषशेषत्वं
कामवशादेवावगम्यते विधिवशाच्च, न ह्यस्वार्थं कश्चित्कामयते, यदपि
परार्थं कामयते तदपि परम्परया स्वार्थमेव, अत्र तु परम्पराप्रमाणाभावा-
दात्मा(१)र्थमेति, विधिश्चानात्मार्थफलसाधने प्रवर्तयितुमशक्नुवन् फलस्या-

(१) आत्मार्थतैव गम्यते इति पा०।

त्मार्थेतां गमयति यजेतेति चात्मनेपदनिर्देशात्, तस्माद्यागफलयोरप्यस्ति शेषता, ततश्च पुरुषस्यापि शेषित्वं, न चैवं सर्वतः प्रधानत्वात्पुरुषस्य शेषत्वं नास्तीति मन्तव्यम् आख्यातेन कर्तुर्गुणभूतत्वेनोपादानात् औदुम्बरीसंमानादिषु श्रुत्यैव गुणत्वात् । + फलं च पुरुषार्थत्वात् पुरुषश्च कर्मशेषत्वात् द्विसूत्री +

निर्वपणादीनामर्थेनानुसारेण व्यवस्थितविषयताऽधिकरणम् ।

सू० तेषामर्थेन संबन्धः ॥ ४ ॥

कः शेषः केन हेतुना शेषः इति द्वयमप्युक्तम् । इदानीं कथं च विनियुज्यत इत्ययमंशो निरूप्यते दर्शपूर्णमासयोर्निर्वपणप्रोक्षणावघातादय औषधधर्माः, उत्पवनादय आज्यधर्माः, शाखाहरणादयः सांनाय्यधर्माः, तेषु संशयः किं सर्वे आज्ये औषधे सांनाय्ये च कर्तव्याः? उत यथायोगं व्यवस्थे? ति तदर्थे च किं परमापूर्वप्रयुक्ता एते? किं वाऽवान्तरापूर्वप्रयुक्ताः? इति तत्सिद्ध्यर्थमपि किमवान्तरापूर्वाणि सन्ति? नेति? सत्स्वपि च तेषु किं तानि प्रयोजकानि? किं वा परमापूर्वं? यदाऽपि तानि तदाऽपि किं सर्वाणि सर्वेषां प्रयोजकानि? किं वाऽव्यवस्थेति? किं तावत्प्राप्तम् "एकमेव फलापूर्वं फलस्यैकस्य सिद्धये । कल्प्यं नान्यानि धर्माणां तादर्थ्यात्संकरो भवेत्" अवघातादीनां व्रीह्यादीनां च संबन्धोऽपूर्वसाधनविशेषत्वकृतो न व्रीह्यादिस्वरूपकृतः, तच्चापूर्वं सर्वेषामाग्नेयादीनामेकफलसाधनत्वादेकमेव कल्प्यते न बहूनि, तदर्थश्चावघातस्तदीये हविषि कर्तव्यः, तदीयत्वं चाज्यादीनामप्यविशिष्टम्, अतो यथा व्रीहिषु श्रुतोऽवघातो यवेष्वपि भवति एवमाज्यादिष्वपि भवितुमर्हति सन्तु वाऽवान्तरापूर्वाणि तथाऽपि तानि निष्फलत्वाद्यागस्वरूपवदेव न धर्माणां प्रयोजकानि परमापूर्वं तु फलवत्, अतस्तदेव प्रयोजकं, न चात्र वाङ्कियमन्यायः, तत्र हि दीक्षणीया—शब्दो दीक्षणीयापूर्वं लक्षणयोपस्थापयति, ज्योतिष्टोमापूर्वं तु लक्षितलक्षणेत्यस्ति विप्रकर्षः, अत्र तु परमापूर्वमेवावान्तरापूर्वं च द्वयमप्याग्नेयादिसाध्यमिति न लक्ष(१)णायां विशेषः प्रधानत्वाच्च परमापूर्वमेव प्रयोजकं युक्तम् । यद्यपि चावान्तरापूर्वाण्येव

(१) लक्षणेत्यविशेषः इति पाठान्तरम् ।

प्रयोजकानि तथाऽपि प्रकरणाविशेषात्सर्वाणि सर्वेषां प्रयोजकानि, तस्मात्सङ्कर इति, अत्राऽभिधीयते सन्ति तावदवान्तराणि अपूर्वाणि कुतः "न ह्याग्नेयादिकर्माणि विशरारूणि । तैर्विना संहृत्य परमापूर्वं जनयन्ति स्वरूपतः" तदेतदपूर्वाधिकरणे एवानागतावेक्षणेन प्रतिपादितं, तत्सु च तेषु तादर्थ्यमेवावघातादेर्युक्तं प्रत्यासत्तेः, यद्यपि चाग्नेयादीन्येवोभयत्र कारणं तथाऽपि साक्षादुत्पत्त्यपूर्वे करणत्वं तद्द्वारेण तु परमापूर्वे संबन्धनिमित्ता च लक्षणा, तेन व्रीहिशब्दो यागद्वारेणापूर्वमुपस्थापयन्प्रथमं तावदुत्पत्त्यपूर्वे निपतति, तस्यापि चादृष्टत्वेनाज्ञाततत्प्रकारत्वात्परमापूर्वसिद्ध्योपयिकत्वेन च फलवत्त्वादतिक्रमकारणाभावात्तादर्थ्यमेवावघातादेर्युक्तं, सत्यपि च सर्वेषां प्रकरणाविशेषे श्रुतेर्बलीय(१)स्त्वावगमादसङ्करः, एवं चावघातादेर्दृष्टार्थता भवति, अन्यथा त्वदृष्टार्थता स्यात् । न च क्वचिदपि दृष्टसंभवे तत एव विध्युपपत्तेः अर्थापत्तिपरिक्षयाददृष्टकल्पनया सर्वार्थत्वं युक्तमङ्गीकर्तुम्, अतश्च यद्यपि तावदवहन्तीत्येतावन्मात्रं श्रूयते तथाऽपि दृष्टार्थवशादेव व्यवस्था स्यात्किमुत यदा व्रीह्यादिसंयोगेनैव श्रवणं, तस्माद्यथासंयोगं व्यवस्था,

स्फ्यादीनां संयोगानुसारेण व्यवस्थितत्वाधिकरणम् ।

सू० द्रव्यं चोत्पत्तिसंयोगात्तदर्थमेव चोद्येत ॥ ५ ॥

दर्शपूर्णमासयोः "स्फ्यश्च कपालानि" चेत्याद्युपक्रम्य "तानि वै दश यज्ञायुधानी"ति श्रुतं तथा "स्फ्येनोद्धन्ती"त्यादीन्यपराणि वचनानि तत्र संशयः किं स्फ्यादीनां येन यदस्मिन्प्रकरणे शक्यं तत्सर्वं तेन कर्तव्य? मुत यथासंयोगमुद्धननाद्येवे? ति तत्र यज्ञायुध–शब्दस्य साधनवचनत्वाद्यज्ञसाधनत्वं गम्यमानं साक्षादसंभवदङ्गेष्ववतरदविशेषात्सर्वाङ्गेषु विज्ञायते, उद्धननादिसंयोगस्त्वनेनैव प्राप्तत्वादवयुत्याऽनुवादः, नैतद्युक्तम्, एवं हि बहूनामुद्धननादिवाक्यानामानर्थक्यं स्यात्, न चानुवादत्वमपि संभवति नित्यप्राप्त्यभावात्, न ह्युद्धननं स्फ्येनैव प्राप्तम् अन्येनापि संभवात्

(१) श्रुतेर्व्यवस्थाऽवगमादिति पा० ।

पाक्षिकानुवादत्वे वा नित्यवच्छ्रवणविरोधः, तस्मादेतानि वाक्यानि विधायकानि यज्ञायुध–शब्दवाक्यं त्वेतैरेव प्राप्तार्थत्वाद्धै–शब्दोपबन्धाद्वा-ख्याताभावाच्चानुवादकं, वरं च बहूनामनर्थक्याद्देकानर्थक्यं, न चास्यानर्थक्यं, यज्ञायुधानि संभरन्तीत्यनन्तरश्रुतासादनविधिशेषत्वात् "तस्मादस्यानु-वादत्वादितरे विधयो मताः । तेन स्फ्यादेर्थवत्ता स्यात्कार्येषूद्धननादिषु ।

(शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 568. Vol. IX.)

टी० ॥ स्वारस्यमाह–। [a] "प्रमाणे"ति । इन्द्रियादौ प्रमाकरणत्वेन प्रमाणत्वं तद्विषयत्वेन च प्रमेयत्वं व्यवह्रियते तद्वदित्यर्थः ॥ खण्डनवा-दिनं प्रति प्रमाणप्रमेयवदिति कथं सिद्धवद्दृष्टान्तमुदाहरसीति दूषयति– [b] "तदपी"ति । किंच प्रकारासङ्करमात्रमिति ब्रुवतासिद्धव्यवहारोचितप्र-कारो वक्तव्यः स च वक्तुमशक्य इत्यभिप्रेत्याह–। [c] "वक्तव्यं ही"ति । यत्र च व्याप्यत्वपक्षधर्मत्वप्रमितेर्व्यतिरेको लिङ्गस्योपन्यासव्यतिरेकेण शक्यो-द्भावनः सोऽसिद्ध इत्याशङ्क्याह–। [d] "न तावदि"ति । कुत इत्यत आह–। [e] "तथे"ति । साध्यविरुद्धव्याप्तत्वादिप्रकारेणोपन्यस्य मानस्यापि तथा-नुमानेऽपि तथा शक्योद्भावनत्वमस्तीत्यतिव्याप्तिरेवेत्यर्थः ॥ यत्र साध्यवि-परीतव्याप्तत्वादिप्रकारो नास्ति व्याप्यत्वपक्षधर्मत्वप्रमितेर्व्यतिरेकश्च लि-ङ्गोपन्यासव्यतिरेकेण शक्योद्भावनः सोऽसिद्धप्रकार इत्यत आह–। [f] "स-र्वे"ति । सर्वथा विरुद्धादिप्रकारहीनस्यासिद्धधर्मिण उद्भावनस्य † व्याप्-त्यादिप्रमिति व्यतिरेकोद्भावनस्याशक्यत्वात्क्वचिदसङ्करेऽपि सर्वत्रासाङ्कर्या-भावादित्यर्थः । यद्यपि विरुद्धव्यवहारोचितप्रकारादावपि तथाशक्योद्भा-वनत्वमस्ति तथापि तत्रोद्भाव्यते यत्र तु तदुद्भाव्यते सोऽसिद्ध इति व्यव-स्थेत्यत आह–। [g] "नचे"ति । स्वार्थानुमानेऽसिद्धे व्याप्तेरित्यर्थः ।

ख० * [a] नच शक्योद्भावनपदस्थाने उद्भाव्यमानत्वमिति कृते निस्तारः? *– [b] सोपाधितादयुद्भावने प्रमित्यभावोद्भावनं

† (५६८ द्रष्टव्यम्)

व्यर्थत्वान्न क्रियत इति तदव्यापकत्वं प्रसज्येत इति प्रागेवोक्तत्वादिति। [c] एतेनासिद्धः साध्यसम(१)इति प्रत्युक्तं, [d] यथाकथञ्चित्साध्यसाम्यस्य सर्वसाधारणत्वात् ।

टी० ॥ तर्हि व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेको यत्र लिङ्गोपन्यासव्यतिरेकेणोद्भाव्यमानः सोऽसिद्ध इति कृते निस्सारो विरुद्धादावनुद्भाव्यमानत्वादिति(२)समनन्तरोक्ताव्याप्तिमपश्यन् केवलातिव्याप्तिपरिहारमाशङ्कते यस्तं प्रत्याह—। [a] "नचे"ति । कुतो न निस्सार इत्यत आह—। [b] "सोपाधी"ति । सोपाधित्वं व्याप्त्यभावः व्याप्तिविरहपक्षधर्मताविरहदर्शनेनैवानुमानाङ्गवैकल्यात्मनो दोषस्योद्भावनपर्यवसानाद्वैयर्थ्यात् प्रमित्यभावो नोद्भाव्य इति कृत्वा तस्य लक्षणस्याव्यापकत्वं व्याप्त्यादिविरहमात्रतयोद्भाव्यमानासिद्धं प्रत्यव्यापकत्वं स्यादिति प्रागुक्तमित्यर्थः ॥ इदानीं सूत्र(३)निरुक्तं लक्षणं निरस्यति—। [c] "एतेने"ति । साध्येन हेतोः साम्यं येन केन चिदाकारेण किं वा साम्यविशेष इति विकल्प्य प्रथमं प्रत्याह—। [d] "यथे"ति । अस्तित्वज्ञेयत्वादिना साध्यसाम्यं विरुद्धादावपि तुल्यमित्यर्थः ॥

मू० [a] साम्यविशेषस्योक्तप्रकारपर्यवसानव्यतिरेकेणान्यस्यासम्भवात् । [b] लक्षणान्तरेषु चोक्तदूषणप्रकारा यथासम्भवमिह योजनीया [c] इत्यलं विस्तरेण। [d] अपि चासिद्धलक्षणविशेषणेषु प्रमाणव्यवच्छेदकव्यतिरेकेण यद्व्यवच्छेद्यं किं तत् ।

टी० ॥ यथा साध्यं साध्येन व्याप्ततया न प्रमितमेकत्वात्तथा च पक्षधर्मतया न प्रमितं सन्दिग्धत्वादेवं रूपत्वमिह साम्यं विवक्षितमिति

(१) साध्यसमत्वं च साध्यवत्साधनीयत्वेनापेक्ष्य ।

(२) अनुद्भाव्यमानत्वादिति केवलातिव्याप्तिपरिहारमाशङ्कते—इति सम्बन्धः । अनुद्भाव्यमानत्वात्=लिङ्गोपन्यासव्यतिरेकेण व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेकस्याऽनुद्भाव्यमानत्वादित्यर्थः ।

(३) सूत्रम् "साध्याऽविशिष्टः साध्यत्वात्साध्यसमः" इति न्यायवात्स्यायने प्रथमाध्याये द्वितीयाह्निके एकोनपञ्चाशत्तमम् ।

द्वितीयमाशङ्क्याह—।[a] "साम्ये"ति । एवंविधसाम्यविशेषस्य व्याप्तत्वपक्षधर्मत्वाभ्यां न प्रमित इत्युक्तप्रकारपर्यवसायित्वात्तस्य च खण्डितत्वादित्यर्थः ॥ अनिश्चितपक्षवृत्तिरसिद्ध इत्यादिलक्षणान्तरे को दोषस्तत्राह—।[b] "लक्षणे"ति । व्याप्तत्वपक्षधर्मत्वप्रमिति व्यतिरेकस्य तत्राप्यवश्यं वक्तव्यत्वादुक्तदोषाः प्रादुष्युरेवेति यावत् किञ्चेदमनिश्चितत्वमप्रमितत्वमुत अज्ञातत्वमुत सन्दिग्धत्वमाद्ये दत्तमेवोत्तरं द्वितीये भ्रान्त्यापि पक्षधर्मतया विदिते सोपाधिकादावव्याप्तिस्तृतीये पक्षधर्मत्वादिविरहात्मना निश्चितत्वाद्बाधासिद्धावव्याप्तिर्व्यर्थविशेषणविशेष्यासिद्धादौ चेत्यादि बहु वक्तुं शक्यमपि नोच्यते ग्रन्थगौरवभयादित्युपसंहरति—।[c] "इत्यल"मिति । विरुद्धखण्डनानि प्रस्तावयति—।[d] 'अपि चे"ति । व्याप्तत्वपक्षधर्मत्वप्रमितिव्यतिरेको यत्र लिङ्गस्योपन्यासव्यतिरेकेण शक्योद्भावनस्तदसिद्धमित्यादिलक्षणेषु व्यतिरेक इत्यन्तं विशेषणप्रमाणव्यवच्छेदकं(१)नदतिरिक्तं विशेषणद्वयमस्ति तेन किं व्यावर्त्यं न किञ्चिद्विरुद्धादेरप्राप्त्यसिद्धत्वात् व्यवर्त्तयितुमशक्यत्वादितरेतराश्रयश्च विरुद्धादौ सिद्धे तद्व्यावर्त्तनेनासिद्धसिद्धिरसिद्धसिद्धौ च तद्व्यावृत्तविरुद्धादिसिद्धिरित्याक्षेपाभिप्रायः ॥

मू० [a] केनचिद्विरुद्धं केनचिदन्यदितिचेत्, [b] विरुद्धमेव किमुच्यते,[c] तथा हि साध्यविपरीतव्याप्तो विरुद्ध इत्याहुः,[d] तच [e] साध्यव्यतिरेकेण हि व्याप्तिः [f] कार्त्स्न्येन वानौपाधिको वा स्वाभाविको वा संबन्ध इत्याद्युक्तिभिः सविशेषणः सद्भाव एव निरुच्यते ॥

टी० ॥ क्षिप्तमपि पृष्टं मत्वोत्तरं प्राहेतरः—।[a] "केनचिद्वि"ति । लिङ्गस्योपन्यासव्यतिरेकेणेति विशेषणेन विरुद्धं व्यवच्छेद्यमनैकान्त्यादि च तुल्यत्वात् केनचिच्छक्योद्भावन इत्यनेनान्यदव्यापकत्वं स्वार्थानुमानासिद्ध इत्याशयः विरुद्धस्यैव निरूपणसरणीमधिरोढुमनर्हतया परास्यत्वमित्यभिप्रेत्याह—।[b] "विरुद्धमि"ति । विरुद्धानिरुक्तिमेव प्रतिपादयति—।

(१) प्रमाणव्यवच्छेदकम्=अनुमानात्मकप्रमाणस्य अवच्छेदकम् ।

[c]"तथाही"ति । साध्यस्य विपरीतोऽभावस्तद्विरुद्धो वा धर्मस्तेन व्याप्तो विरुद्ध इत्याहुरुदयनादयः विपर्ययव्याप्तत्वेन निश्चितो विरुद्धो हेत्वाभास इति वचनात् पक्षविपक्षयोरेव वर्तमानो विरुद्ध इति भूषणकृतो लक्षणस्याप्यर्थतो न भेदः विपर्ययसाहचर्यमात्रमनैकान्तेप्यस्तीति तन्निरासाय व्याप्तत्वविशेषणं भङ्क्तुं गमयति– [d]"तच्चे"ति । लक्षणस्य व्यर्थविशेषणतां वक्तु व्याप्तिपदार्थं कथयति–। [e]"साध्ये"ति । साध्यव्यतिरेकेण हेतोर्व्याप्तिरित्यादुक्तिभिः सविशेषणः सहभाव एव निरुच्यते इतिसंबन्धः ॥ [f]"कार्त्स्न्येने"ति । सार्वत्रिक इत्यर्थः सर्वे एते प्रकारा अनुमानप्रस्तावे दर्शिताः आदिपदेन यत्र(१) विपक्षे हेतोर्वृत्तो बाधकमस्ति तयोः सहभावो गृह्यते ॥

सू० [a]तथा सति च साध्यव्यतिरेकेण सामानाधिकरण्यमेवविशेषणविशेषयुक्तं विरुद्धत्वमित्युक्तं स्यात् [b]यदा चैवं तदा साध्यव्यतिरेकेण सामानाधिकरण्यमेव हेतोरगमकत्वे समर्थमिति तन्मात्रमुद्ग्राह्यं वृथा विशेषणप्रक्षेपः तथाचानैकान्तिक एवायं स्यात् * [d]ननु साध्यव्यतिरेकसंबन्धो यद्यपि विरुद्धानैकान्तिकयोर्द्वयोरप्यस्ति ।

टी० ॥ सहभाव एव व्याप्तिपदार्थो निरुच्यतां का नाम वस्तुक्षतिरित्यत आह–। [a]"तथे"ति । साध्याभावेन हेतोः समानाधिकरण्यं साहचर्यसंबन्धो विशेषणकार्त्स्न्यादिना युक्तो व्याप्तिः स्यादित्यर्थः ॥ यदर्थमुपोद्धातः कृतस्तदिदानीं दर्शयति–। [b]"यदे"ति । हेतोः साध्याभावसम्बन्धमात्रस्यैवानुमानाङ्गवैकल्पदोषप्रतिपादनसामर्थ्यात्तस्मात्तन्मात्रमुद्ग्राह्यं नहि भवति साध्याभावसहचरितः साध्याविनाभूतश्चेति ततः कार्त्स्न्येत्यादि विशेषणप्रक्षेपो मुधा यद्यपि व्याप्तिरित्युक्तं निर्विशेषणामेव तथापि दण्डीति वत्तदर्थनिर्वचनेन सविशेषणत्वं तर्हि साध्यस्य व्यतिरेकसहचरितो विरुद्ध इत्येतावन्मात्रं ब्रूमस्तत्राह–। [c]"तथाचे"ति । पक्षत्रय वृत्तेरनैकान्तिकस्यापि साध्यव्यतिरेकसामानाधिकरण्यमस्तीति ततो भेदो न स्यादित्यर्थः ॥ अनैकान्तिके व्यतिरेकसामानाधिकरण्यं तन्मात्रस्य चागमकत्वे प्रयोजकत्वमुक्तमङ्गीकृत्य चोदयति–। [d]"नन्वि"ति । (शेषमग्रे)

(१) यत्र=ययोः साध्यहेत्वोर्मध्ये ।

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम् रु०	आ०
१ काशिका पंडितवरवामनादित्यविरचिता		
पूर्वार्धम्	..	॥
उत्तरार्धम्	१० ..	॥
२ बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२ ..	॥
३ प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१ ..	।)
४ लघुकौमुदी वरदराजकृता	१ ..	=)
५ लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८ ..	॥
६ श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७ वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४ ..	॥
८ मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४ ..	॥
९ शाश्वतधर्मदीपिका	१ ..	॥
१० अमरकोश सटीक..	४ ..	॥
११ योगवार्तिकम्	३ ..	।)
१२ वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१) ..	॥
१३ गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिनगा- देशाधिपति रचिता	४) ..	॥
१४ श्रौतपदार्थनिर्वचनम्	३ ..	।)
१५ वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४) ..	॥

Digitized by Google

CONTENTS.

		Page.
SAṂKSHEPAŚÁRÍRAKAM	...	569
ŚRÍBHÁSHYAM	...	585
ŚÁSTRADÍPIKÁ	...	615
KHAṆḌANAKHAṆḌAKHÁDYAM	...	621

Digitized by Google

JAN 25 1888
LIBRARY

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 12.] DECEMBER 1887. [Vol. IX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1887.

Price, Rs. 9-0 per annum.] [All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सटीकसंक्षेपशारीरकस्य तृतीयोऽध्यायः ।

(*Continued from page* 584. Vol. IX.)

टी० ॥ मोहोऽपि कथमात्मवस्तुन्यनुपपन्नं भेदं घटयेदित्याशङ्क्य न हि दृष्टेऽनुपपन्नं नामेति न्यायेन परिहरति । स्वमपीति । स्वादती-त्यादिक्रियाद्वयं स्वप्नोन्मादादिदशायामिति द्रष्टव्यम् । एवं जागरितेऽपि नभोनैल्यचन्द्रप्रादेशिकत्वादि वस्तुतोऽघटितं मोहादेव घटितमित्यभिप्रे-त्याह । किमपीति ॥ १९७ ॥

मू० ॥ इतश्च निर्भेदकमात्मतत्त्वं
निरूपणे कारणकार्यतादेः ॥
अनादिमायैकनिबन्धनत्वा-
दसंभवादस्य तु वस्तुवृत्त्या ॥ १९८ ॥

टी० ॥ एवमीश्वरेशितव्यभेदस्याविद्यकत्वेन मिथ्यात्वात्तदधीने-श्वरत्वादिकमपि तथेति स्वतो निर्विशेषमात्मतत्त्वमित्युक्तम्, इदानीं यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतिभिर्जगत्कारणत्वप्रतिपत्तेः कथं निर्विशेषत्वमित्याशङ्क्य कारणत्वादेरपि वक्ष्यमाणविधया दुर्निरूपत्वे-नाविद्यकत्वात्तच्छ्रुतेरप्यतत्परत्वात्स्वतः कूटस्थैकरसं वस्त्वित्याह । इत-श्चेति । तमेव हेतुं विवृणोति । कारणेति । तद्विशेषोपादानोपादेयत्वा-दिरादिपदार्थः । मायामात्रनिबन्धनत्वे हेतुरसम्भवादिति । अस्य कार-णकार्यतादेर्वक्ष्यमाणरीत्या निरूपणे वस्तुवृत्त्याऽसम्भवादेवेति सम्बन्धः, तुरवधारणे ॥ १९८ ॥

मू० ॥ असन्न कार्यं गगनप्रसून-
वन्ध्यासुतादेः करणाप्रसिद्धेः ॥
न प्रागसत् कार्यमिति प्रवादः
प्रणश्यते तस्य विरोधहेतोः ॥ १९९ ॥

टी० ॥ तत्र कार्यताया दुर्निरूपत्वात्तन्निरूपितकारणताऽपि तथेति मन्वानोऽसतः सतो वा कार्यत्वमिति विकल्प्य प्रथमं दूषयति । असच्च कार्यमित्यारभ्य सतोऽपि कार्यत्वमयुक्तमित्यन्तेन ग्रन्थेन । कारणमुत्पत्तिरुत्पादनं वा, तदप्रसिद्धेरित्यर्थः । ननूत्पत्तेः पूर्वमसतोऽपि कार्यस्याभावप्रतियोगित्वं बन्ध्यासुतादेर्विशेषोऽस्ति ततस्तदुत्पत्त्याद्युपपद्यत इति चेन्न, निःस्वरूपेऽसति धर्मभूतस्य स्वस्वरूपात्मकस्य वा सतोऽभावप्रतियोगित्वस्याप्यसंभवात्, तस्याप्यसत्त्वेऽसतः कार्यस्य तेन विशेषेण विशेषवत्त्वं न स्यात्, इतरथा बन्ध्यासुतादेरपि तेन विशेषेण तद्वत्त्वप्रसङ्गात्, तत्प्रभाव एवासतः कार्यस्य विशेष इति चेन्न, तस्यासता सम्बन्धाभावेन विशेषत्वायोगात्, न चाभावस्वरूपमेव तत्सम्बन्ध इति वाच्यम्, तथा सति बन्ध्यासुतादेरपि स विशेषः स्यात्, अभावमात्रस्य तद्रूपसम्बन्धस्य च सर्वासत्साधारणत्वात्, किं चासतः कार्यस्याभाव एव बन्ध्यासुतादेरिवासंभवी यस्तस्य विशेषः स्यादिति भावः । ननु बन्ध्यासुतादेरत्यन्तासत्त्वात्तस्योत्पत्तिरभावो वा मास्तु कार्यस्य तूत्पत्तेः प्रागेवासत्त्वादत्यन्तासत्त्वाभावात्तदुत्पत्त्याद्युपपत्तिरिति नेत्याह । न प्रागिति । तत्र किं कार्यस्य सत्त्वासत्त्वे धर्मौ स्वरूपं वा, आद्येऽपि किं भिन्नयोर्धर्मिणोस्ते धर्मावेकस्यैव वा । आद्ये नासतः कार्यत्वसिद्धिः, उत्पन्नस्य सतः कार्यस्य ततोऽन्यत्वात् कार्यस्याप्युत्पत्तेः प्रागसत्त्वं न स्यात्, तदाऽसतस्तस्य ततोऽन्यत्वात् । न द्वितीयः, धर्मिणं विना कादाचित्कधर्माभावेनासत्त्वकाले तद्धर्मिकार्यसत्त्वस्यावश्यकत्वेन तत्र तद्विरोध्यसत्त्वस्यानुपपत्तेः सत्कार्यवादापातात् । नाप्याद्यद्वितीयः, सत्त्वासत्त्वयोर्भिन्नयोर्विरुद्धयोश्चाविरुद्धाभिन्नवस्तुस्वरूपत्वायोगात्, तयोर्भिन्नवस्तुस्वरूपत्वे वा नासतः कार्यत्वसिद्धिरित्यादिनोक्तदोषोऽपरिहार्यः स्यात् । तस्मादसतः कालान्तरसत्त्वायोगाद्यदसत्तत् सर्वदाऽसदेवेति नासतः कार्यत्वसंभावनेत्यर्थः ॥ १९९ ॥

मू० ॥ विशेषणानामसति प्रवृत्ति-
र्न दृश्यते क्वापि न युज्यते च ॥

युधिष्ठिरात् प्रागभवन्नरेन्द्रो

वन्ध्यासुतः शूर इतीह यद्वत् ॥ २०० ॥

टी० ॥ किं चासतः कार्यस्योत्पत्तेः प्रागसदिति प्राक्कालविशेषितत्व-मेव न घटते येन तदत्यन्तासतो व्यावर्त्येत, न हि निरुपाख्यस्यासतः केन चिद्विशेषणेन योग उपपद्यतेऽङ्गीक्रियते वा, इतरथा निरुपाख्यत्वव्याघा-तात्, प्रत्यक्षादिप्रमाणानामन्यतमस्य तत्साधकत्वायोगात्तत्साधकान्यप्रमा-णापत्तेश्चेत्यभिप्रेत्यासतो विशेषणमात्रासंभवं सदृष्टान्तमाह । विशेषणा-नामिति । स्पष्टार्थान्यक्षराणि ॥ २०० ॥

मू० ॥ उत्पत्तिरप्यस्य निरुप्यमाणा

न का चिदागच्छति युक्तिमार्गम् ॥

स्वसत्तया स्वैः समवायिकारणै-

रपीह या स्यात् समवायिताऽस्य ॥ २०१ ॥

टी० ॥ एवमसतः कार्यत्वासंभवमुक्त्वा तदुत्पत्तेरप्यसंभवमाह । उत्पत्तिरपीति द्वयेन । अस्यासत उत्पत्तिर्निरुप्यमाणाऽसत्कार्यवादिभिरने-कधोच्यमाना का चिदपि न युक्तिसहेत्यर्थः । तैरुच्यमानां तामनूद्य तदसंभवं प्रतिजानीते । स्वसत्तयेत्यादिना । अस्य कार्यस्य स्वसत्तया या समवायिता स्यात्कार्ये सत्तायाः समवाय इति यावत्, इह कारणेषु स्वैः समवायिका-रणैः सह या वा समवायिता स्यात्, वार्थोऽपिशब्दः, समवायिकारणगत-बहुत्वं न विवक्षितम्, स्वस्य समवायिकारणसमवायितेति यावत् ॥ २०१ ॥

मू० ॥ असज्जनिः सेत्युपवर्ण्यमानं

सुदुर्घटं न ह्यसतो गुणैर्भिः ॥

सदेव सद्भिः सह सर्ववस्तु

संगच्छते न त्वसदेव सद्भिः ॥ २०२ ॥

टी० ॥ साऽसज्जनिरित्युपवर्ण्यमानं निरुच्यमानमसज्जन्मात्यन्तम-संभवीत्यर्थः । तत्र हेतुः । न हीति । जन्मनः प्रागसतः केनापि सम्ब-

न्धानर्हस्योक्तसत्तादिभिर्युक्ता सम्बन्धो न युज्यत इत्यर्थः । असतः सम्बन्धानर्हत्वे युक्तिमाह । सदेवेति । सम्बन्धस्य सत्सम्बन्धिद्वयपारतन्त्र्यनियमात्तस्यासत्पारतन्त्र्यायोगात्स सतोरेव घटते न सदसतोरित्यर्थः ॥ २०२ ॥

मू० ॥ सती हि सत्तास्य पटस्य दृष्टा
तथैव सन्तः पटतन्तवोऽपि ॥
तया च तैश्चास्य कथं पटस्य
सम्बन्धिता स्यादसतो वदेतत् ॥ २०३ ॥

टी० ॥ ननु त्वन्मते सतो ब्रह्मणोऽसङ्गतया केनापि संबन्धाभावात्तद्वतां च जडानां सत्त्वाभावात्कथं सदेव वस्तु सद्भिः सह सङ्गच्छत इत्युक्तमित्याशङ्क्य परमतेनेदमुक्तमित्यभिप्रेत्य तन्मते सम्बन्धिनः सत्त्वनियमं दर्शयंस्तद्रहितकार्यस्य सम्बन्धासंभवमाह । सती हीत्यादिना । एतद् एतदुत्तरं वदेत्यर्थः ॥ २०३ ॥

मू० ॥ स्वकारणैस्तन्तुभिरेवमस्य
स्वसत्तया चान्वय एव जन्म ॥
तवेष्टमेवं सति जन्म तस्य
न शक्यते वर्णयितुं पटस्य ॥ २०४ ॥

टी० ॥ तर्हि जन्मना लब्धसत्ताकस्य कार्यस्य कारणैः सत्तया चान्वयो भवत्वित्याशङ्क्य तदन्वय एव तज्जन्मेति त्वयोक्तत्वादात्माश्रयतापत्तेर्जन्मैवानुपपन्नं स्यादित्याह । स्वकारणैरिति । अक्षरार्थः स्पष्टः ॥ २०४ ॥

मू० ॥ तदन्वयात् प्रागसतः कथं स्या-
त्तदन्वयो न ह्यसदन्वयाय ॥
सता समर्थं न हि बन्ध्यया त-
त्सुतः समन्वेति कदा चिदत्र ॥ २०५ ॥

टी० ॥ ननु कार्यस्य जन्मनः पूर्वमसत्त्वेऽपि जन्मक्षणे सत्त्वात्तदेव सत्तादिनान्वयात्सदेव सद्भिरन्वेतीति नियमोऽत्रापि घटत इत्याशङ्क्य किं

तदसतो जन्म तत्सत्त्वं किं वा सत्ताद्यन्वय एव तदुभयमिति चेत्तर्हि सत्ताद्यन्वयवतो सत्ताद्यन्वयवतः सत्ताद्यन्वय इत्युक्तं स्यात्तेनाद्युक्तमसत्यनुपपन्नस्यैव जन्मादेः स्वोपपादकत्वायोगादित्यभिप्रेत्य प्रागुक्तमसतः सदन्वयायोग्यत्वं सोदाहरणं स्मारयति । तदन्वयादिति । सत्ताकारणे तच्छब्दाभ्यां परामृश्येते । असत्सता सहान्वयाय न हि समर्थं योग्यमित्यन्वयः । अत्र जगति । किं च कार्यस्य न केवलं सत्तादिसमवाय एव जन्म, तस्य सदा सत्त्वेन तदर्थकारणवैफल्यापातात्, नापि कार्योपलक्षितस्तत्समवायः, उक्तदोषापरिहारात्, तस्मात्कार्यविशिष्टः सत्तादिसमवायः कार्यजन्मेति वाच्यम्, तच्चासतः कार्यस्यानुपपन्नम्, आगन्तुकविशेषणविशिष्टस्य विशेषणसाध्यत्वात्प्रागसतश्च कार्यस्य तत्साधकत्वायोगात्, तस्मादुक्तं जन्मलक्षणमसंभवीति भावः ॥ २०५ ॥

मू० ॥ न च किं चिदन्यदसतो वदितुं
पटवस्तुनोऽथ शक्नीयमितः ॥
जनिशब्दवाच्यमनवद्यतया
तदयुक्तमेवमसदुद्भवनम् ॥ २०६ ॥

टी० ॥ ननु पटस्याद्यसमयसम्बन्ध एव जन्म न सत्तादिसमवायस्तस्य द्वितीयादिक्षणेऽपि सत्त्वादिति नवीनास्तत्राह । न च किं चिदिति । असतः सत्तादिमेवोक्तविधया न चाद्यक्षणेनापि सम्बन्धः सम्भवी । किं चासतः कार्यस्य तेन संयोगस्तावन्न सम्भवति, तस्य संयोगिहेतुकत्वादसतस्तद्धेतुत्वायोगात्, नापि समवायः, अस्य परेणाप्यनङ्गीकारात्, नापि स्वरूपसम्बन्धः, असत्त्वे निःस्वरूपत्वेनोक्तरीत्या स्वरूपासम्भवेन तद्रूपसम्बन्धस्याप्यसम्भवात्, परैर्नैष्टानष्टयोरपि स्वरूपसम्बन्धाङ्गीकाराद्द्वितीयादिक्षणवर्तिकार्यरूपमप्याद्यक्षणेन सह सम्बन्धः स्यादिति तदापि तदुत्पत्त्यापत्तेश्च, स्वरूपसम्बन्धस्यान्यत्रापि दुर्निरूपत्वाच्च, किं च सर्वक्षणस्य स्वपूर्वक्षणोत्तरभावित्वेन तदाद्यत्वं चासम्भवि, न च तत्तदुत्पत्तिक्षण एव तदाद्यक्षण इति वाच्यम्, परस्पराश्रयापातात्, ननु स्वसमानकालीनप-

दार्थप्रतियोगिकध्वंसानाधारक्षणा आद्यक्षणाः कार्यस्येति चेन्न, स्वशब्देना-
द्यक्षणावच्छिन्नकार्याभिधाने परस्पराश्रयापातात्, तत्तत्कार्यमात्राभिधाने च
द्वितीयादिक्षणवर्तिकार्यस्यापि स्वशब्दार्थत्वं स्यात्ततश्च द्वितीयादिक्षण-
वर्तिकार्यसमानकालीनपदार्थप्रतियोगिका ध्वंसास्तृतीयादिक्षणेष्वेव सम्भा-
वितास्तदनाधारत्वं द्वितीयादिक्षणेष्वप्यस्तीति तेऽप्याद्याः क्षणाः स्युस्त-
तश्च जन्मलक्षणे आद्यविशेषणं व्यर्थं स्यात्, स्याच्च द्वितीयादिक्षणस-
म्बन्धेष्वतिव्याप्तिः, किं च स्वसमानकालीनेत्यादिलक्षणे किं तादृशयत्कि-
ञ्चिद्वस्तुप्रतियोगिकध्वंसानाधारत्वं विवक्षितमुत स्वसमानकालीनयाव-
द्वस्तुप्रतियोगिकध्वंसानाधारत्वम्, नाद्यः, पटसमानकालीनस्य कस्य चिद्व-
स्तुनो मासाद्यनन्तरं ध्वंससम्भवात्तदनाधारत्वं पटसम्बन्धिद्वितीयादिक्ष-
णेष्वप्यस्तीति तत्रातिव्याप्तिः स्यात्, द्वितीये यावत्त्वं वस्तुविशेषणं वा
स्याद् ध्वंसविशेषणं वा, नाद्यः, पटसमकालीनाकाशादिसमस्तवस्तूनां
परमते ध्वंसाभावेन तद्घटितलक्षणासम्भवात्, न द्वितीयः, पटसमान-
कालीनदशद्वादशादिवस्तूनां कालान्तरभाविनो यावन्तो ध्वंसास्तदना-
धारत्वं पटीयद्वितीयादिक्षणेष्वप्यस्तीत्युक्तदोषतादवस्थ्यात्, चरमध्वंसस-
मकालीनस्य कस्यापि वस्तुनो ध्वंसाभावेन तदीयाद्यक्षणे तद्घटितलक्षणा-
स्याव्याप्तेश्च, किं च यावदुक्तध्वंसानाधारत्वं नाम किं तदाधारभिन्नत्वं किं
वा ध्वंसात्यन्ताभाववत्त्वम्, आद्ये कल्पान्तरीयादिक्षणानामेव वर्णितध्वं-
साधारत्वसम्भवात्तद्भिन्नत्वं पटीयसर्वक्षणेष्वप्यस्तीति स दोषस्तदवस्थ
एव, द्वितीयेऽपि वर्णितध्वंसात्यन्ताभावानां त्रैकालिकत्वेन पटीयद्विती-
यादिक्षणेष्वावश्यकत्वेन तत्रातिव्याप्तेरपरिहारादित्यलमतिविस्तारेण ।
एतदभिप्रेत्योक्तमन्यज्जनिशब्दवाच्यमनवद्यतया वदितुं न शकनीयं न
श्रावयितव्यमिति । एवमसदुत्पत्तेर्दुर्निरूपत्वमुपपाद्य फलितमाह । तदयु-
क्तमिति ॥ १०६ ॥

मू० ॥ न च वर्णितादपरमत्र भवा-
ननुमन्यते जनिवचोऽर्थमितः ॥

यदि वर्ण्यते किमपि तच भवेत्

स्वमतप्रहाणमलिनीकरणम् ॥ २०७ ॥

टी० ॥ यद्यपि वैशेषिकादिभिर्वर्णितप्रकारेण कार्योत्पत्तिर्दुर्निरूपा तथापि कापिलमतानुवर्तिभिर्निरूप्यमाणात्यन्तानभिव्यक्तस्य कारकाधीनाभिव्यक्तिरित्येवमादिरूपा निरपवादेत्याशङ्क्याऽसत्कार्यवादिभिस्तदनङ्गीकारादगत्याङ्गीकारे वा सत्कार्यवादापत्तेः स्वसिद्धान्तहानिः स्यादित्याह । न चेति । चोऽवधारणे, इतो वैशेषिकादिभिर्वर्णितादपरं जनिवचोऽर्थं जन्म भवानसत्कार्यवादी नैवानुमन्यत इति सम्बन्धः । किमपि तत्र सत्कार्यवादयुक्तिष्वेकमपि लक्षणं यदि त्वया वर्ण्यते तदा स्वमतप्रहाणरूपं मलिनीकरणं दोषस्तव भवेदित्यर्थः ॥ २०७ ॥

मू० ॥ समवायिकारणगणेन तथा

सह सत्तया च पटवस्त्विह यत् ॥

समवैति तत् कणभुगिच्छति त-

ज्जनिशब्दवाच्यमिति नान्यदितः ॥ ७०८ ॥

टी० ॥ तदा कणादोक्तिविरोधादपि सिद्धान्तहानिरित्यभिप्रेत्य तदभिमतजन्मलक्षणमाह । समवायीति । इह जगति पटवस्तु समवायिकारणादिना सह समवैतीति यत्तज्जनिशब्दवाच्यं तस्य पटस्य जन्म इतो नान्यदिति कणभुगिच्छतीति सम्बन्धः ॥ २०८ ॥

मू० ॥ न तदत्र सम्भवति युक्तिवशा-

दुपवर्णितं तदतिविस्तरतः ॥

न च किं चिदन्यदुचितं भवतो

वदितुं स्वपक्षमपरित्यजतः ॥ २०९ ॥

टी० ॥ तद्यतीव तपस्विना तेन महामुनिनोक्तमादरणीयमित्याशङ्क्य तदुक्तेर्मन्वादिस्मृतिवदनुष्ठेयविषयत्वाभावात्सिद्धपदार्थनिर्णयोपयुक्तन्यायमात्रसूत्रकत्वात्तन्न्यायानां चोक्तरीत्या बलवत्प्रतिन्यायपराहतत्वा-

न्मेवमित्याह । न तदचेति । अत्र कार्यं तदुक्तं जन्म न संभवतीति द्वितीयतच्छब्दार्थः । तर्हि तदुक्तं त्यक्त्वान्योक्तमेवाद्रियतामित्याशङ्क्या- सत्कार्यवादिनस्तदयुक्तमुपवर्णितापसिद्धान्तदोषापत्तेरित्याह । न च किं चिदिति ॥ २०९ ॥

मू० ॥ निरूपणायां न यतोऽस्ति कश्चि-
दुत्पत्तिशब्दार्थ इह त्वदीये ॥
पक्षे ततो दुर्घटताप्रसिद्धि-
रसज्जनेरुक्तनयेन तावत् ॥ २१० ॥

टी० ॥ जन्मनः प्रागसतः कार्यस्य जन्मेति पक्षस्योपपादितां दुर्निरूपतामनूद्य फलितमाह । निरूपणायामिति । दुर्घटताप्रसिद्धिः सा सिध्येदित्यर्थः । तावदित्यनेनानन्तरं पक्षान्तरनिराकरणारम्भं सूचयति ॥ २१० ॥

मू० ॥ सतोऽपि कार्यत्वमयुक्तमेव
निरूपणे कारणकृत्यहानेः ॥
न कारणव्यापृतिरत्र शक्या
सतः स्वरूपे वदितुं फलाय ॥ २११ ॥

टी० ॥ इदानीमुत्पत्तेः प्रागपि सत एव कार्यस्योत्पत्तिरिति मतं कारकव्यापारवैयर्थ्यापत्त्या दूषयति । सतोऽपीति । कार्यसिद्धिरेव कारणव्यापारसाध्येति चेत् सा किं कार्यसत्तैव तद्गुणसत्ता वा तदावरणनिवृत्तिर्वा तदभिव्यक्तिर्वा तदनभिव्यक्तिनिरासो वा, नाद्यः, तन्मते कार्यस्वरूपस्य कारणव्यापारात् प्रागपि सत्त्वेन तदसाध्यत्वादित्याह । न कारणेति ॥ २११ ॥

मू० ॥ गुणं क्षिपत् कारणमर्थवत्त्वं
लभेत चेन्नात्र गुणस्य भावात् ॥
न चेद्गुणोऽसत्करणं प्रसक्तं
निरर्थकं कारणकर्म तस्मात् ॥ २१२ ॥

टी० ॥ द्वितीयं शङ्कते । गुणमिति । विपक्षसाधयन् । कार्यवत्त्वनु-योऽपि तत्र प्राक् सदसन्वेति विकल्प्याद्ये कार्यवदसाध्यतेत्याह । नाचे-ति । द्वितीयमनुव्यापसिद्धान्तापातेन दूषयति । न चेद्गुण इति । कारण-व्यापारात् प्रागिति शेषः । उक्तपक्षद्वये कारणव्यापारवैयर्थ्ये फलितमाह । निरर्थकमिति ॥ २१२ ॥

मू० ॥ मलं निरस्यार्थवदिष्यते चेन्

मलोऽपि सन्नैव निरस्य इष्टः ॥

सतोऽविनाशादसतोऽजनेश्च

वृथा ततः कारणमत्र पक्षे ॥ २१३ ॥

टी० ॥ तृतीयमनुवदति । मलमिति । अर्थवत्कारणमित्यनुषङ्गः, असतः सत्त्ववत् सतोऽप्यसत्त्वानङ्गीकारात्तव मते तन्निरासोऽप्ययुक्त इत्याह । मलोऽपीति । सन्मलो निरस्योऽपि नैवेष्ट इति सम्बन्धः, अविना-शादिति छेदः । किं च विनाशोऽपि प्रागसत्त्वा, नाद्यः, असज्जनेस्त-वानिष्टत्वादित्याह । असत इति । अजनेरिति छेदः । न द्वितीयः, प्रागेव सति मलविनाशे कारणकर्मवैयर्थ्यादिति चार्थः । मलनिरासेऽप्यनु-पयोगे फलितमाह । वृथेति ॥ २१३ ॥

मू० ॥ तस्मादभिव्यक्तिकरी न हेतु-

प्रवृत्तिरप्यर्थवती घटेत ॥

न चानभिव्यक्तिनिरासकृत्या

तस्मान्न सत्कार्यवचः प्रशस्तम् ॥ २१४ ॥

टी० ॥ अभिव्यक्त्यनभिव्यक्तिनिरासयोरपि कारणव्यापारात्प्राक् सत्त्वे तद्वैयर्थ्यम् असत्त्वे चापसिद्धान्तापत्तिरिति प्रागुक्तदोषादेव चतुर्थपञ्चम-पक्षावप्यनुपपन्नावित्याह । तस्मादिति । उक्तदोषादित्यर्थः । तर्हि कारण-व्यापारस्यानुपयोग एवास्तु कार्यजन्मनीत्याशङ्क्य स्वप्रक्रियाव्याघातात् सत्कार्यवाद एव त्याज्य इति फलितमाह । तस्मान्नेति ॥ २१४ ॥

Digitized by Google

मू० ॥ नित्या च कारकगणस्य सतो प्रवृत्ति-
र्नित्यं व्यनक्ति सकलं फलमित्यवश्यम् ॥
वक्तव्यमत्र न लयो न सुषुप्तिमूर्च्छे
नो चेन्न सृष्टिरिति कष्टमुपस्थितं वः ॥ २१५ ॥

टी० ॥ किं च सतः कार्यस्याभिव्यक्तिरेव जन्मेति पक्षे तदभिव्यञ्जकारणव्यापारस्य सत्त्वं किं सदातनमुत कदा चिदेव, आद्ये सर्वाभिव्यञ्जकानां नित्यत्वात्तदधीना सर्वकार्याभिव्यक्तिरपि सदा स्यादित्याह । नित्या चेति । द्वितीये कारणव्यापृतेरपि कार्यत्वात्तत्सत्त्वस्य कादाचित्कत्वेऽपसिद्धान्तापात इति चार्थः । फलं कार्यम् । ओमिति चेत्, तत्र वक्तव्यं किं कार्याभिव्यक्तिस्तदुपलब्धेरन्या सैव वा, तत्राद्ये कार्यतदभिव्यक्त्योः सदा सत्त्वापातात्प्रलयकालेऽपि लयो न स्यादित्याह । अत्रेति । अभिव्यक्तेरपि नित्यत्वोपगम इत्यर्थः । तदुपलब्धिरेवाभिव्यक्तिरिति पक्षे तस्या अपि सर्वस्या उक्तरीत्या नित्यत्वापातात्सर्वप्रकारज्ञानोपरमात्मके सुषुप्तिमूर्छे न स्यातामित्याह । सुषुप्तीति । लयाभावे ज्ञानज्ञेयात्मकप्रपञ्चस्य सृष्टिरपि न स्यात्सदा सत्त्वादेव ततश्च कस्य चिदुत्पत्तये नाशाय वा प्रेक्षावतः प्रवृत्त्ययोगात्सत्कार्यवादिनोऽचलस्य जीवनमपि दुर्घटं स्यादित्याशयेनाह । नो चेदिति ॥ २१५ ॥

मू० ॥ वेदान्तवादिसमयेऽपि समानमेत-
च्चोद्यं परैर्न खलु वाच्यमिहाप्रसक्तेः ॥
अस्मन्मते न खलु संव्यवहारमात्रे
मायामये किमपि दूषणमस्ति यस्मात् ॥ २१६ ॥

टी० ॥ ननु वेदान्तिभिरप्यसत उत्पत्त्यनङ्गीकारादर्थात्सत एव तदुत्पाद्यं ततश्च स्वपक्षेऽप्युक्तदोषप्रसक्तेः स परं प्रति नोद्भावनीयः, यत्रोभयोः समो दोष इति न्यायादित्याशङ्क्यास्माभिः सतोऽप्युत्पत्त्यादेरनङ्गीकारात्तत्रोक्तदोषाप्रसक्तेर्मैवमित्याह । वेदान्तेति । तर्हि दृश्यमानमुत्पत्त्यादि कस्येत्याशङ्क्य सत्त्वादिना दुर्निरूपतयाऽनिर्वचनीयस्य नभोनेत्यादि-

वस्तुव्यवहारमात्रालम्बनस्य तद्विति वदन् पक्षद्वयोक्तदोषाप्रसक्तिमुपपादयति । अस्मन्मत इति । यस्मादस्मन्मते पूर्ववर्णितपक्षद्वयदोषाणामप्रसक्तिस्तस्मात् ॥ २१६ ॥

मू० ॥ आषेयवाक्यमपि संव्यवहारमात्रं
कार्यं समस्तमिति नः कथयाम्बभूव ॥
सत्कार्यवादविषयो न हि दोषराशि-
र्मायामये भवितुमुत्सहते विरोधात् ॥ २१७ ॥

टी० ॥ छान्दोग्यवाक्यकारेण ब्रह्मनन्दिनापि पूर्वपक्षेऽसतः सतश्चोत्पत्तौ दोषमुक्त्वा सांव्यवहारिकमायामयत्वपक्षेण समाधानमुक्तम्, नासत उत्पत्तिरनिर्वाच्यत्वान्नापि सतः प्रवृत्त्यानर्थक्यात्सत्त्वाविशेषात्, अभिव्यक्त्यर्थमिति चेन्न, तस्या अपि सत्त्वात्प्रवृत्तिनित्यत्वाच्च सदाऽभिव्यक्तिप्रसङ्गः, न संव्यवहारमात्रत्वादिति तद्वचनं चोक्तन्यायोपोद्बलितवाचारम्भणादिश्रुतिमूलकमवश्यमुपादेयमित्याशयेनाह । आत्रेयवाक्यमिति । अस्मन्मते सत्कार्यवादोक्तदोषाप्रसक्तिं तावदुपपादयति । सत्कार्येति । सद्विलक्षणत्वपक्षे सत्त्वनिबन्धनदोषराहित्यावश्यकत्वात्तद्विरोधात्तद्दोषाप्रसक्तिरित्यभिप्रेत्य विरोधादित्युक्तम् ॥ २१७ ॥

मू० ॥ काणादृदर्शनसमाश्रयदोषराशि-
र्दूरान्निरस्त इह संव्यवहारमात्रे ॥
वेदान्तभूमिकुशलो मुनिरविवंश्य-
स्तेनाह कार्यमिह संव्यवहारमात्रम् ॥ २१८ ॥

टी० ॥ कार्येऽसद्विलक्षणस्याप्यङ्गीकारादसत्कार्यवादपक्षोक्तदोषाणामप्यत्राप्रसक्तिमाह । काणादेति । सत्कार्यवादिभिः कार्यकारणयोरत्यन्तभेदानङ्गीकारात्स वादोऽद्वैतवादस्यपदास्ववत्तथापि तत्रत्यदोषा यदाऽत्र निरस्तास्तदा दूरनिरस्ता अत्यन्तभेदगर्भासत्कार्यवादगतदोषा इत्याशयेन दूरादित्युक्तम् । येनात्र सदसत्पक्षद्वयोक्तदोषासंभवस्तेन ब्रह्मनन्दी सिद्धान्तत्वेन कार्यस्यानिर्वचनीयस्यैवाहेति प्रकृतं निगमयति । वेदान्तेति ॥ २१८ ॥

Digitized by Google

मू० ॥ षष्ठप्रपाठकनिबद्धमुदीरितं य-
त्तत् सत्यमेव खलु सत्यसमाश्रयत्वात् ॥
तत्रैव यत् पुनरुवाच समुद्रफेन-
दृष्टान्तपूर्वकमदो व्यवहारदृष्ट्या ॥ २१८ ॥

टी० ॥ ननु ब्रह्मनन्दिनानेकपक्षाणामुक्तत्वात्तत्र विवर्तपक्षादरणे को हेतुरित्याशङ्क्य छान्दोग्यषष्ठप्रपाठकप्रमेयाद्वितीयसद्वस्तुसिद्धये वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिमुपजीव्य विवर्तवादस्य तेनोक्तत्वात्स एव तदभिमतसिद्धान्त इति स एवादरणीय इत्यभिप्रेत्याह । षष्ठप्रपाठकेति । ननु तत्रैव समुद्रफेनतरङ्गादिदृष्टान्तेन परिणामवादस्यापि तेनोक्तत्वात्कथं सोऽपि नादरणीय इत्याशङ्क्य तेनैव सत्कार्यवादस्योक्तरीत्या दूषितत्वात्तद्वास्तवत्वं नाभिमतं किं तु व्यवहारदृष्टिमाश्रित्याद्वैतसंभावनार्थमित्याशयेनाह । तत्रैवेति ॥ २१९ ॥

मू० ॥ पूर्वं विकारमुपवर्ण्य शनैःशनैस्त-
द्दृष्टिं विसृज्य निकटं परिगृह्य तस्मात् ॥
सर्वं विकारमथ संव्यवहारमात्र-
मद्वैतमेव परिरक्षति वाक्यकारः ॥ २२० ॥

टी० ॥ ननु सर्वभेदरहितमुख्याद्वैतसंभावनाय विवर्तवाद एव सविहित इति स एव वर्णनीयो न भेदसत्यत्वाविरोधी परिणामवादो व्यवहारदृष्टिपालनाय वर्णनीय इत्याशङ्क्यात्यन्तभेदसत्यत्वेऽभिनिविष्टचित्तस्य प्रथमत एव विवर्तवादे प्रवेशो दुर्घट इति तदभिनिवेशत्याजनाय व्यवहारदृष्टिं रक्षता परिणामवादः प्रथमतस्समुपपादितः पश्चात्तद्दृष्टिमपि युक्तिसहस्रेण शनैस्त्याजयित्वा ततोऽपि निकटं विवर्तवादमुपवर्ण्य शुद्धाद्वैतं रक्षति स्म ब्रह्मनन्दी ततस्तस्य परिणामोक्तिरपि युक्तैव सूत्रकारस्येवेत्याशयेनाह । पूर्वं विकारमिति । विसृज्य परित्यज्य तस्माद्विकारवादान्निकटं मुख्याद्वैतसिद्धयेऽन्तरङ्गं सर्वमपि विकारं संव्यवहारमात्रं विवर्तवादमथ पश्चात्परिगृह्य सिद्धान्तत्वेनाङ्गीकृत्यापवाददृष्टिविषयं मुख्याद्वैतमेव सर्वानुपपत्तिपरिहारेण साधयतीत्यर्थः ॥ २२० ॥

Digitized by Google

मू० ॥ अन्तर्गुणा भगवती परदेवतेति
प्रत्यग्गुणेति भगवानपि भाष्यकारः ॥
आह स्म यत्तदिह निर्गुणवस्तुवादे
सङ्गच्छते न तु पुनः सगुणप्रवादे ॥ २२१ ॥

टी० ॥ ब्रह्मनन्दिरचितवाक्यानां सूत्ररूपाणां भाष्यकर्ता द्रविडाचार्योऽप्यद्वयब्रह्मणः प्रत्यगभेदो वाक्यकाराभिप्रेत इति कथयति स्म ततो व्यवसीयते ब्रह्मनन्दिनो विकारवादोऽनभिमत इत्याह । अन्तर्गुणेति । सेयं देवतैक्षतेतिश्रुतिमनुसृत्य परदेवतेति ब्रह्मैवोच्यते । अन्तर्गुणेत्युक्तं विशदयति । प्रत्यग्गुणेति । गुणशब्दः स्वरूपपरः, अन्या देवताः परारूपाः परदेवता तु प्रत्यगात्मरूपा अपरोक्षविदेकरसेत्यर्थः । निर्गुणवस्तुवादे विकारादिसमस्तविशेषरहितं परमार्थत आत्मवस्त्विति मते ॥ २२१ ॥

मू० ॥ न खलु कारणकार्यसमन्वयो
भवति जातु चिदत्र विभिन्नयोः ॥
किमिह सागरसह्यसमाश्रयो
भवति कारणकार्यसमन्वयः ॥ २२२ ॥

टी० ॥ एवं सतोऽसतो वा कार्यत्वासंभवादनिर्वचनीयस्यैव तदिति तद्विरूप्य कारणत्वमप्यनिर्वचनीयं न वास्तवमित्युक्तम्, किं च भिन्नयोरभिन्नयोश्च कार्यकारणभावायोगात्सोऽनिर्वचनीय इत्यभिप्रेत्य भिन्नयोस्तद्भावं निराकरोति । न खल्विति । कारणकार्यशब्दो भावपरो जातु चित्कदा चिदपि । खलुशब्दसूचितां भेदस्य तदभावेन व्याप्तिं दर्शयति । किमिहेति । न च सह्यसागरयोरेकस्य नियतपूर्ववर्तित्वाभावादेव कार्यकारणत्वाभावो न भेदमात्रादिति वाच्यम् । भेदस्य तदभावेनापि व्याप्तत्वाद्द्वयोस्तद्भावस्याप्ययोगादिति भावः ॥ २२२ ॥

मू० ॥ न च तथायमभिन्नसमाश्रयो
भवितुमुत्सहतेऽनभिवीक्षणात् ॥
न हि घटो विदधाति घटं क्व चि-
न्न च पटः पटमित्थमनीक्षणात् ॥ २२३ ॥

टी० ॥ एवं कार्यकारणयोर्भेदेऽपि तद्भावो न युक्त इति सनिदर्शनमाह । न च तथेति । यथायं कार्यकारणभावो भिन्नाश्रितो न सम्भवति तथाऽभिन्नसमाश्रयेऽपि नेत्यर्थः । अनभिव्यक्तमेवोभयसम्मतोदाहरणेन विशदयति । न हीति । विदधाति जनयति ॥ २२३ ॥

मू० ॥ कुर्वत्कारणपक्षमाश्रितवतः कुर्वच्च कुर्वत्कृतं
तत्कुर्वच्च तथाविधान्यकृतमित्येषाऽनवस्था भवेत् ॥
कुर्वद्रूपमकार्यमिष्टमिति चेन्नित्यं जगज्जायतां
नित्यं मा जनि वा विशेषविरहादेतत् समस्तं जगत् ॥ २२४ ॥

टी० ॥ किं च कारणत्वेनाभिमतं वस्तु किं चिद्व्यापारविशिष्टतया कुर्वद्रूपं सत्कार्यजनकमुताकुर्वदुदासीनमेव तथा, आद्ये तत् कुर्वद्रूपमपि कार्यमकार्यं वा, आद्ये कुर्वत्तद्रूपजनकतया कुर्वद्रूपमन्यदुपेयम्, एवं तस्यापि कार्यत्वात्तज्जनकमन्यत्तदुपेयमित्यनवस्थापातान्नैकमपि कार्यं सिध्येदित्याह । कुर्वत्कारणेति । कुर्वद्रूपमकार्यमिति पक्षमुत्थापयति । कुर्वद्रूपमिति । तर्हि तत्सर्वकारणानामस्ति न वा, आद्ये तस्याकार्यस्य सदाभावात्तत्कार्यं सर्वं सदा जायेत, कारणानां तदभावे तु तद्रहितानामजनकत्वात्सर्वं कार्यं कदापि न जायेतेत्याह । नित्यमिति ॥ २२४ ॥

मू० ॥ सर्वं सर्वसमुद्भवाय घटते कुर्वन्न चेत् कारणं
न ह्यस्मिन् क्व चिदस्ति कस्य चिदपि व्यापारवत्ता यतः ॥
तस्मात् कारणकार्यतादि सकलं मायामयं तत्त्वतो
नासीदस्ति भविष्यतीति सकलं चैतन्यशेषं महत् ॥ २२५ ॥

टी० ॥ अकुर्वज्जनकमितिपक्षमतिप्रसङ्गेन दूषयति । सर्वं सर्वेति । घटते घटेतोपयुक्तं स्यादिति यावत्, अस्मिन्पक्ष इति शेषः । क्व चित् कार्ये । ननूदासीनस्याप्यन्वयव्यतिरेकाभ्यां क्व चित् क्व चिदेव कारणत्वग्रहाबोक्तातिप्रसङ्ग इति चेन्न, उदासीनस्य वनस्थदण्डादेरिवान्वयादेरेवाभावात्, न च व्यापारदशायां दण्डत्वादिसामान्यावच्छेदेनैवान्वयादिग्रहात्तेनैवा-

कारणे दण्डादेर्घटादिहेतुत्वमिति वाच्यम्, व्यापाररहितवनस्थदण्डादाव-न्वयाद्यभावनिश्चये सति सामान्येनान्वयादिग्रहस्यैवासम्भवात्, न च तस्येतरकारणसंनिधाने सत्यन्वयादिग्रहाचोक्तदोष इति वाच्यम्, उदा-सीनस्य तत्संनिधेरेवासम्भवाद्व्यापारवत एवान्वयादिना कारणत्वं वक्तव्यम्, व्यापारवतश्च तत्प्रागेव निरस्तमिति मायिकतया मिथ्यैव कारणादीति फलितमाह । तस्मात्कारणेति । मायामयेनापि तेन द्वैतापत्तिरित्या-शङ्क्य पारमार्थिकद्वैतस्य कालत्रयेऽप्यभावान्मायिकस्यापि तत्त्वधीबाध्यत्वा-द्वस्तुतश्चैतन्यमेवाद्वितीयं परिशिष्यत इत्याह । तत्त्वत इति ॥ २२५ ॥

मू० ॥ सकलशक्तिविकल्पनयान्वये
सकलशक्यविकल्पनयान्वयः ॥
सकलशक्यविकल्पनयान्वये
सकलशक्तिविकल्पनयान्वयः ॥ २२६ ॥

टी० ॥ ननु कुर्वत्त्वं विनापि यस्य यत्र शक्तिस्तत्कारणं यत्तु यस्य शक्यं तत्तत्कार्यमिति सर्वत्र कार्यकारणभावनियमसिद्धिरित्याशङ्क्याह । सकलशक्तीति । शक्तिशक्ययोः परस्पराधीननिरूपणत्वात्सकलशक्तीनां वि-कल्पनयेदमत्रैव शक्तमिति व्यवस्थयान्वये सति सकलशक्यानामपि विक-ल्पनयेदमस्यैव शक्यमिति व्यवस्थयान्वयः स्यात्, सकलशक्यानामुक्तव्यव-स्थान्वये सति सकलशक्तीनामप्युक्तव्यवस्थयान्वयो भवेदित्यर्थः ॥ २२६ ॥

मू० ॥ इति परस्परसंश्रयता यदा
वद कथं जगतः परमार्थता ॥
यदि पुनर्जगतोऽपरमार्थता
परममस्ति पदं परमात्मनः ॥ २२७ ॥

टी० ॥ ततः किमित्यत आह । इति परस्परेति । शक्तिशक्यात्म-ककारणकार्यात्मकस्य जगतः परस्पराधीनसिद्धिकतया वस्तुतोऽसम्भवा-न्मायामात्रत्वसिद्धिरित्यर्थः । कार्यकारणात्मकद्वैतस्य मिथ्यात्वे तदधिष्ठा-

Digitized by Google

नमात्मतत्त्वं नित्यशुद्धादिरूपं श्रुतिप्रमाणात्सिध्यतीति फलितमाह । यदि पुनरिति ॥ २२७ ॥

मू० ॥ चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते
सत्यैवास्य जडा परा भगवतः शक्तिस्त्वविद्योच्यते ॥
संसर्गाच्च मिथस्तयोर्भगवतः शक्त्योर्जगज्जायते-
ऽसच्छक्त्या सविकारया भगवतश्चिच्छक्तिरुद्रिच्यते ॥२२८॥

टी० ॥ एवं विवर्तवादेनाविद्यातत्कार्यात्मकजगतोऽपरमार्थत्वाद्वयानन्दं ब्रह्मैव वास्तवमित्युक्तम्, परास्य शक्तिर्विविधैव श्रूयते इति श्रुतेः, जडाजडात्मकानेकशक्तिप्रतिपत्तेर्जडात्मकाविद्याशक्तेरसत्त्वेऽपि चिच्छक्तेः सत्यत्वात्तच्छक्तिमद्वस्त्वपि सत्यमेव तत्परिणामश्च जगदिति ये मन्यन्ते तन्मतमनुवदति । चिच्छक्तिरिति । विमला स्वतोऽविकारा चिच्छक्तिरिति मतं वारयति । चैतन्यमिति । तस्या अपीतरशक्तिवदसत्यत्वमाशङ्क्य चैतन्यस्य सत्यत्वात्तद्रूपा सापि तथैवेत्याह । सत्यैवेति । ननु चिच्छक्तेः कूटस्थत्वादपरायाश्च जडत्वात्कथं ताभ्यां जगज्जनिरित्यत आह । संसर्गादिति । तथापि कूटस्थायाश्चिच्छक्तेः कथं विकार इत्याशङ्क्य स्वतस्तदभावेऽप्यौपाधिकः सम्भवतीत्याह । असच्छक्तीति । उद्रिच्यते विकारात्मनोद्रेकं गच्छतीत्यर्थः ॥ २२८ ॥

मू० ॥ इत्येवं कथयन्ति केचिदपरे श्रद्धालवस्तत् पुनः
कस्यांचिद् भुवि संमतं च विदुषां नेष्टं तु भूम्यन्तरे ॥
कर्मोपास्तिविधानभूमिषु तथा तत् संमतं निर्गुणे
तत्त्वे तत् परवेदवाक्यविषये त्वालोचिते नेष्यते ॥ २२९ ॥

टी० ॥ तन्मतं निगमयति । इत्येवमिति । प्रकारिप्रकारानुवादायेदं पदद्वयम् । तेषामुक्तेऽर्थे न किंचिन्मानमस्ति किं तु स्वगुरुवाक्येषु श्रद्धामात्रेणैवं वदन्तीत्यभिप्रेत्य केचिदिति । उक्तानेव विशदयति । अपर इति । पराऽस्य शक्तिर्विविधेति श्रुतिस्त्वेकस्या एव परायाः मायाशक्तेः कार्यभेदेनैव विविधत्वं वदति । देवात्मशक्तिं स्वगुणैर्निगूढामिति तस्या

Digitized by Google

एव सत्त्वादिगुणमयत्वोक्तेश्चिच्छक्तेर्नैवात्र श्रूयते नाप्यन्यत्रेति भावः । किं च यैरिदं मतं प्रवर्तितं तेषामपि पूर्वोक्तविकारदृष्टिदशायामेवेदमभिमतं शक्तिशक्तिमतोरभेदे वस्तुतद्भावायोगात्, भेदे च ब्रह्मणो जडत्वापत्तेर्विज्ञानमानन्दमित्यादिश्रुतिविरोधाच्च, तस्मादुक्तदृष्टिदशायामिदं युक्तं न विवर्तदृष्टिदशायामित्याह । तत्पुनरिति । कस्यां चिदित्युक्तं विशदयति । कर्मेति । नेष्टमित्युक्तं विवृणोति । निर्गुण इति । निर्गुणतत्त्वपरवाक्यविषयानोचनं न स्यानतोऽपि परस्येत्यत्र प्रदर्शितमिति भावः ॥ २२९ ॥

मू० ॥ मूर्तामूर्ततदुत्थलिङ्गपुरुषव्याप्तिप्रभूता चिति-
वीप्सापूर्वकनेतिनेतिवचनप्रध्वस्तसर्वद्वया ॥
सम्पूर्णे परमे सुखे परिहृताशेषे शिवे शाश्वते
नित्ये शुद्धमहिम्नि तायिनि परे भूम्न्यद्वरे तिष्ठति ॥ २३० ॥

टी० ॥ किं च प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इति सूत्रनिर्णीतमूर्तामूर्तब्राह्मणतात्पर्यादपि भूतभौतिकतद्वासनात्मकसमस्तप्रपञ्चनिषेधेनाद्वयचिदानन्दादिरूपाखण्डब्रह्मण एव परमार्थतया निर्द्धारितत्वादुक्तपरिणामवादस्तत्त्वतो न ग्राह्य इत्याशयेनाह । मूर्तामूर्तेति । तायिनि व्यापके, द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्यादिनाऽध्यात्ममधिभूतं च पृथिव्यप्तेजांसि मूर्तं वाय्वाकाशे अमूर्तमिति सर्वं जगद् द्वैराश्येनोपपाद्य अध्यात्ममधिदैवं चामूर्तरसात्मकं लिङ्गात्मकं पुरुषं चोक्त्वा तस्य हैतस्य पुरुषस्य रूपं यथा माहारजतं वास इत्यादिना तद्वासनामयं स्वप्नादिप्रपञ्चमुपन्यस्य अथात आदेशो नेतिनेतीत्यादिना वीप्सया प्रकृतं समस्तं द्वैतं साक्षात्प्रतिषेधन्ती श्रुतिस्तस्य सर्वस्य मिथ्यात्वमेव दर्शयति, न ह्येतस्मादित्यादिना च प्रतिषेधावधिभूतं रूपि ब्रह्म वास्तवं प्रतिपादयति, ततो न परिणामवादो युक्त इत्यर्थः ॥ २३० ॥

मू० ॥ जगन्महिम्ना न जगत्प्रसिद्धि-
र्न चिन्महिम्नाऽपि जगत्प्रसिद्धिः ॥
न च प्रमाणाज्जगतः प्रसिद्धि-
स्ततोऽस्य मायामयताप्रसिद्धिः ॥ २३१ ॥

Digitized by Google

टी० ॥ ननु सत्यत्वेन प्रसिद्धस्य प्रपञ्चस्य श्रुत्यापि प्रतिषेधो न शक्यः कर्तुं सत्यत्वानुभवविरोधादित्याशङ्क्य स्वतः परतो वा तत्सिद्धेरसम्भवात्स्वतःसिद्धचैतन्ये तादात्म्येनाध्यासादेव तथानुभव इत्यभिप्रेत्य प्रकारान्तरेण तत्सिद्ध्यनुपपत्तिमाह । जगदिति । जडमेयवस्तुसामर्थ्येनेत्यर्थः । तर्हि स्वप्रकाशचैतन्यसामर्थ्यात्तत्प्रसिद्धिर्न होत्याह । न चिन्महिम्नेति । तथाऽपि प्रत्यक्षादिमानबलात्तत्प्रसिद्धिर्नेत्याह । न च प्रमाणादिति । अत्र सर्वत्र हेतूननन्तरमेव वक्ष्यति । कथं तर्हि तत्प्रथेत्याशङ्क्य स्वप्नवद्भ्रान्तिरेव सेत्यभिप्रेत्य तदुपपत्तये जगतोऽनिर्वचनीयमायाविलसितत्वमाह । तत इति ॥ २३१ ॥

मू० ॥ जडत्वहेतोर्न जगन्महिम्ना

न चिन्महिम्ना तदसङ्गभावात् ॥

न च प्रमाणात्तदकारकत्वात्

कृतस्य जाड्यादजडाऽजनेश्च ॥ २३२ ॥

टी० ॥ इदानीं प्रतिज्ञातानर्थान् हेतुभिः साधयति क्रमेण । जडत्वेति । त्रिष्वपि नञ्कारेषु जगतः प्रसिद्धिरित्यनुषञ्जनीयम् । जडानां स्वतः परस्परतया वा सिद्धौ स्वसत्तायां संशयाद्यनुपपत्तिः स्यात्ततो न जगन्महिम्ना तत्सिद्धिः, नापि स्वप्रकाशचिन्महिम्ना तस्याः कूटस्थासङ्गात्मरूपतया वस्तुतो जडसम्बन्धासम्भवेन तत्साधकत्वायोगात्, प्रमाणेनापि स्वरूपेण साधकत्वायोगाज्जडमजडं चोत्पाद्य फलं तत्साधकत्वं वाच्यम्, न च तद्युज्यते तेषां व्यञ्जकत्वेन कारकत्वायोगात्, न च स्वप्रकाशसंविज्जनकत्वमेव व्यञ्जकत्वमिति वाच्यम्, जन्यस्य घटादिवत्स्वप्रकाशत्वायोगात्स्वप्रकाशवस्तुनः कूटस्थतया जन्मायोगाच्चेत्यर्थः ॥ २३२ ॥

मू० ॥ न सङ्करो नापि च संयुतिस्तयो-

र्न चास्ति तद्वत् समवायसम्भवः ॥

ततो न चिच्चैत्यसमन्वयं प्रति

प्रतीयते का चन मूलसङ्गतिः ॥ २३३ ॥

Digitized by Google

टी० ॥ ननु स्वप्रकाशचिन्मात्रेणैव जडप्रसिद्धिः सेत्स्यति, न च तयोः संबन्धाभावः, विषयविषयिभावरूपस्य तस्य सम्भवादित्याशङ्क्य तस्य दृग्दृश्यमात्रप्रयुक्तत्वेऽतिप्रसङ्गात्तत्प्रयोजकतयाऽन्यस्तयोरसाधारणः सम्बन्धो वक्तव्यः, तादात्म्यं संयोगः समवायो वा दृग्दृश्ययोर्न सम्भवति, न चान्यो मुख्यः सम्बन्धोऽस्ति यस्तयोर्विषयविषयिभावसम्बन्धे मूलं भवेदिति तदपेक्षविषयविषयिभावोऽपि नेत्यभिप्रेत्याह । न सङ्ग इति । भेदाभेदयोः सङ्करस्तादात्म्यमिति यावत्, दृशा दृश्यस्याविद्यकं तादात्म्य वेद्यमिति ब्रूमः, वास्तवं तु तादात्म्य प्रत्यक्पराग्भावेन विरोधान्न सम्भवति, भेदाभेदयोरपि परस्परं विरोधात् सङ्करात्मकं न तत् क्वापि सम्भवति, एवमद्रव्यत्वाद्दृशस्तया संयोगोऽपि न घटते, गुणादीनामपि दृश्यानां तदयोगाच्च, नापि सर्वस्य दृश्यस्य दृशा समवायः केन चिदङ्गीक्रियते, तस्याप्रामाणिकत्वेन सर्वत्रासत्त्वाच्च, अतो दृग्दृश्ययोर्मूलसम्बन्धस्य कस्याप्यभावान्न विषयविषयित्वसम्भव इति भावः ॥ २३३ ॥

मू० ॥ न योग्यतामात्रनिबन्धनो भवे-
ज्जडात्मनोरेष विवक्षितोऽन्वयः ॥
तदा हि तस्या अनपायिरूपतः
सदात्मनः स्याद्दनपायिसंसृतिः ॥ २३४ ॥

टी० ॥ ननु दृग्दृश्ययोर्विषयविषयिभावे योग्यतैव मूलसंबन्ध इत्याशङ्क्याह । न योग्यतेति । सा किं तत्स्वरूपमेव तदतिरिक्ता वा, द्वितीयेऽपि सा नित्याऽनित्या वा । न द्वितीयः, तत्कारणानिरूपणात्, कूटस्थासङ्गरूपाया दृशः स्वतः परतो वा तदसंभवाच्चेत्यभिप्रेत्येतरपक्षयोः सदा दृश्यदर्शनापत्तेस्तदधीनसंसृतेः कदाप्यपायो न स्यादित्याह । तदा हीति । तस्या योग्यतायाः ॥ २३४ ॥

मू० ॥ ततो वियन्मुख्यमदो जगज्जडं
चिदात्मनोऽस्यैव विवर्त इष्यताम् ॥
अनाद्यविद्यापटसंवृतात्मन-
स्तदोपलभ्यत्वममुष्य कल्प्यते ॥ २३५ ॥

टी० ॥ ननु स्वरूपसंबन्ध एव दृग्दृश्ययोर्विषयविषयिभावनियामक इति चेन्न, तस्य ज्ञानस्वरूपमात्रत्वेऽतिप्रसङ्गः, घटादिरूपज्ञेयविशेषस्वरूपत्वे चान्यस्य तद्विषयत्वं न स्यात्, तस्य ज्ञेयमात्रस्वरूपत्वेऽप्यतिप्रसङ्गस्तुल्यः, अत एव न ज्ञानज्ञेयोभयस्वरूपत्वम्, तथात्वे उक्तदोषापरिहारात्, ननु संबन्धान्तरमन्तरेण विशिष्टप्रत्ययविषयत्वमेव स्वरूपसंबन्ध इति चेन्न, विशिष्टप्रत्ययत्वस्य संबन्धघटितत्वेनात्माश्रयत्वापातात्, किं च घटितविषयत्वं प्रति विशिष्टप्रत्ययो विशेषणमुपलक्षणं वा स्यात्, आद्ये विशिष्टप्रत्ययविशिष्टविषयत्वरूपसंबन्धावगाहिविशिष्टप्रत्ययस्य विशेषणगोचरत्वमपि स्यात्, न च तदुपपद्यते न वा परैस्तदुपेयते, द्वितीये विषयत्वमात्रं स्वरूपसंबन्ध इत्युक्तं स्यात्, तथा चातिप्रसङ्गोऽपरिहार्यः स्यात्, तस्मादविद्याकृतानिर्वचनीयस्वरूपसंबन्धादेव वियदादिजडप्रपञ्चस्य चिन्महिम्ना प्रसिद्धिर्वक्तव्येति जडस्य सर्वस्य चिद्विवर्तत्वमावश्यकमित्याह । ततो वियदिति । तर्हि सर्वस्यैव चित्यध्यासात्सर्वं सदा तथा प्रतिभासेतेत्याशङ्क्याहृतचैतन्यस्य स्वयमप्यप्रतिभासादन्यभासकत्वं दूरापेतम्, यस्य तु प्रमाणजशुक्तिज्ञानेऽनावृतचित्संबन्धः संभवति तदेव तदा तथा भासत इति तन्नियमोपपत्तिरित्याशयेनाह । अनाद्यविद्येति ॥ २३५ ॥

मू० ॥ संवित्तिभेदतदभावतदीयजन्म-
नाशादयो न खलु मानबलेन लभ्याः ॥
न ह्यस्ति मानमिह किं चन तद् यदस्या
धर्मिस्वरूपविषयीकरणे समर्थम् ॥ २३६ ॥

टी० ॥ ननु संविदो मानफलत्वेन भेदाभावोत्पत्तिनाशादयोऽनुभूयन्ते ततः सा कथं सर्वाधिष्ठानं स्यात्, वियदादिकं वा कथं तद्विवर्त इत्याशङ्क्य तद्भेदादेरुपाधिपरामर्शं विनानवगमात् स तत्रोपाधिकल्पित एव भ्रान्त्याऽनुभूयते न तु प्रमाणात इति पूर्वमेवोपपादितम्, ततः सैव कूटस्थाद्वयादिरूपा सर्वविवर्ताधिष्ठानमिति नोक्तदोष इत्यभिप्रेत्याह । संवि-

स्पीति । किं च स्वप्रकाशरूपायाः संविदः प्रकाशान्तरागोचरत्वात्सा स्वरूपेण भेदादिधर्मित्वेन वा मानान्तराच्च सिध्यति, स्वयं तु स्वसत्तामात्रस्य साधिका न भेदादेरपीति साधकाभावादेव संवित्तिभेदाद्यसिद्धिरित्याह । न ह्यस्तीति ॥ २३६ ॥

मू० ॥ तस्मान्न मानफलता निरुपाधिकस्य
संवेदनस्य घटतेऽविषयत्वहेतोः ॥
एवं च मानफलसिद्धिसमन्वयेन
सिद्धिर्जडस्य जगतो न कदा चिदस्ति ॥ २३७ ॥

टी० ॥ कथं तर्हि संविदो मानफलत्वमित्याशङ्क्य निरुपाधिकायाः संविद उक्तविधया कूटस्थत्वादिसिद्धौ तद्विरोधादुस्तुतो न मानफलत्वमपीत्याह । तस्मादिति । तच्छब्दार्थमेवाह । अविषयत्वेति । उत्पत्त्यादिसाधकमानाविषयत्वादित्यर्थः । उक्तरीत्या स्वप्रकाशसंवेदनस्य मानफलत्वायोगान्मानस्य जडत्वे च जगदान्ध्यप्रसङ्गात् परमते मानफलभूतसंवेदनविषयत्वेन या जडस्य सिद्धिस्तदसत्त्वादिशङ्कानिवृत्तिरङ्गीकृता सा नैव घटत इति फलितमाह । एवं चेति ॥ २३७ ॥

मू० ॥ इतरेतराध्यसनमस्त्वनयो-
रुभयोरतो दृगदृशोरनिशम् ॥
अपरस्परव्यतिकरानुभवा-
दिह शुक्तिकारजतविभ्रमवत् ॥ २३८ ॥

टी० ॥ ननु सिद्धान्तेऽपि प्रत्यक्चैतन्ये पराचो जडस्य सम्बन्धायोगात्कथं चैतन्यमहिम्ना जडप्रसिद्धिः स्यात्, न चासंबद्धमेव चैतन्यं तत्साधकमतिप्रसङ्गात्, परोक्षापरोक्षविभागायोगाच्चेत्याशङ्क्य चिज्जडयोः परस्परतादात्म्याध्यासोपगमादाध्यासिकसम्बन्धादेव जडं साधयच्चैतन्यं वृत्तिविशेषसंसृष्टविषयाभिव्यक्तं सत्तमपरोक्षतयाऽवभासयति, केवलतदाकारवृत्त्यभिव्यक्तं सत् परोक्षतया तमवभासयतीति न किं चिदस्मन्मतेऽनुपपन्नमित्याशयेनाह । इतरेतरेति । सम्बन्धान्तरासंभवोऽतःशब्दार्थः । तथाप्येक-

तराध्यास एव भवतु नेतरेतराध्यास इत्याशङ्क्याध्यस्तमेव हि परिस्फुरति धर्मेष्वित्यादिनोक्तं स्मारयन् घटः स्फुरति सन् घट इत्याद्यनुभवं सदृष्टान्तं तत्सिद्धौ हेतुत्वेनाह । अपरस्येति ॥ २३८ ॥

मू० ॥ संसिद्धा सविलासमोहविषये वस्तुन्यधिष्ठानगो-
नोधारेऽध्यसनस्य वस्तुनि ततोऽस्थाने महान् संभ्रमः ॥
केषां चिन् महतामनूनतमसां पाण्डित्यगर्वोदय-
मन्योन्याध्यसने निरास्पदमिदं शून्यं जगत् स्यादिति॥२३९॥

टी० ॥ चिज्जडयोरितरेतराध्यासेऽध्यस्तयोस्तयोर्मिथ्यात्वाच्छून्यमेव तत्त्वं स्यादिति यदि कश्चिदुक्तानुसन्धानाचतुरः शङ्कते तं प्रति प्रथमाध्यायोक्तं परिहारं स्मारयति । संसिद्धेति । सर्वभ्रमेष्वधिष्ठानाधारयोर्भेदादज्ञातविशेषांशस्याधिष्ठानत्वात्तद्ध्यस्तसमानाधिकृततया प्रतिभासमानसामान्यांशस्याधारत्वादाधारस्यैव प्रतीत्यनुरोधेनाध्यस्तसंसृष्टरूपेण तत्राध्यस्तत्वोपगमात्तेन रूपेण तस्य मिथ्यात्वेऽपि तद्विशेषस्याज्ञातस्याधिष्ठानपदवेदनीयस्याध्यासबाधकतत्त्वधीगोचरस्य सत्यज्ञानादिरूपस्य परमात्मनः परमार्थत्वेन परिशेषाच्च शून्यवादप्रसङ्गः, तदज्ञानादेव केषां चिदस्मन्मते तदापादनमित्यर्थः ॥ २३९ ॥

मू० ॥ कृपणमध्यमपण्डितधियां नृणां
मतिविलासविधाविनयं क्रमात् ॥
परिणतिर्बहुजीवनमस्थिरा
परमपुंसि तमःपरिकल्पना ॥ २४० ॥

टी० ॥ किं च द्वितीयाध्याये पुरुषबुद्धवस्थाभेदेन जगतः परिणामत्वद्विविधविवर्तत्वाश्रयणेन ब्रह्माद्वितीयत्वप्रतिपादनादपि न शून्यवादप्रसङ्ग इत्यभिप्रेत्य तत्रोक्तं श्लोकचतुष्टयमनुवदति । कृपणेति । अत्यन्तभेदाभिनिवेशेनाहमीशादिपरतन्त्रः संसार्येवेति ये दीनधियस्ते कृपणधियः, अत्यन्तभेदवादे कार्यकारणभावाद्यनुपपत्तेस्तं परित्यज्य ब्रह्मपरिणाम एव जगदिति ये मन्यन्ते ते मध्यमधियः, विरोधाद्यनुसन्धानेन तमपि

परित्यज्य ब्रह्मणि मायया ऽध्यस्तमनिर्वचनीयं जगदिति ये मन्यन्ते ते पक्वधियः, एतेषां बुद्धिशुद्ध्यर्थमेवैतत्त्रैविध्यमपेक्ष्य क्रमेणात्यन्तभेदधीत्याजनाय परिणामवादः, परिणामधीत्याजनायानेकजीवाज्ञानकल्पनया विवर्तवादः, तस्यापि त्याजनेन शुद्धचिदानन्दरूपः परमात्मैव स्वाविद्यया स्वप्नादितुल्यं बन्धमनुभवति स्वविद्यया मुच्यत इत्यद्वितीयब्रह्मसत्यतोपपादिता ततो न शून्यताप्रसङ्ग इत्यर्थः ॥ २४० ॥

मू० ॥ श्रुतिवचांसि मुनिस्मरणानि च
दुर्यविशारदगीरपि सर्वशः ॥
त्रयमपेक्ष्य विधाचितयं विना
न हि घटामुपयान्ति कदा चन ॥ २४१ ॥

टी० ॥ परिणामादिदृष्टिकल्पनायां किं मूलमित्याशङ्क्य सच्च त्यच्चाभवत् वाचारम्भणं विकारो नामधेयमित्यादिश्रुतिः, भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् तदनन्यत्वमारम्भणशब्दादिभ्य इत्यादिसूत्राणि, उक्तश्रुतिसूत्रविषयभाष्याणि चात्र मूलमित्याशयेनाह । श्रुतिवचांसीति । त्रयमपेक्ष्य प्रवृत्तानीति शेषः । एतदेव व्यतिरेकमुखेन द्रढयति । विधाचितयमिति ॥ २४१ ॥

मू० ॥ पुरुषमेकमपेक्ष्य च भूमिका-
चितयमस्ति पुरोदितमेव तत् ॥
तदनुसारवशादखिलश्रुति-
स्मृतिवचांसि वयं घटयामहे ॥ २४२ ॥

टी० ॥ आसां दृष्टीनां विरुद्धविषयाणां नानापुरुषनिष्ठानां कथमद्वितीयब्रह्मधीपर्यवसानमित्याशङ्क्यावस्थाभेदमपेक्ष्यैकत्रैव तासां संभवस्योक्तत्वादेषा शङ्का प्रागेव निरस्तेत्याशयेनाह । पुरुषमेकमिति । तदनुसारवशादेकपुरुषवर्तिक्रमिकदृष्टिभेदानुरोधात् ॥ २४२ ॥

मू० ॥ परिणतिं च विवर्तदशाद्वयं
स्थितमनुक्रमतः श्रुतिशासने ॥

अनुशशास मुनिप्रवरः सुधीः
पुरुषबुद्धिमपेक्ष्य यथाक्रमम् ॥ २४३ ॥

टी० ॥ ननु सूत्रकारस्यैव परिणामादिदृष्टित्रयसूत्रणे किं मूलमित्याशङ्क्य श्रुतिवचांसीत्यनेन सूचितं सूत्रमूलं विवृण्वन्विनमयति । परिणतिं चेति । सच्च त्यच्चाभवत् इन्द्रो मायाभिः पुरुरूप ईयते अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतिवाक्यार्थनिर्णयायाद्वैतधीपर्यवसायिदृष्टित्रयं सूत्रयामास सूत्रकार इत्यर्थः ॥ २४३ ॥

मू० ॥ यदि परिणतिरेषा चिद्विवर्तोऽथ वा स्याद्
भवति ननु तदानीं वेदशास्त्रे विरोधः ।
न हि खलु कृतकत्वेऽपौरुषेयत्वहेतु-
र्भवितुमलमियं नो मानता स्वप्रयुक्ता ॥ २४४ ॥

टी० ॥ ननु नामरूपात्मकप्रपञ्चस्य ब्रह्मपरिणामत्वे तद्विवर्तत्वे वा तन्मध्यपातिश्रुतीनामपि ब्रह्मकार्यत्वेन पौरुषेयत्वापत्तेरप्रामाण्यं स्यात्, ततश्च कुतस्तदर्थनिर्णयाय सूत्रप्रणयनमिति मीमांसकंमन्यः शङ्कते । यदि परिणतिरिति । नन्वित्येतदादौ द्रष्टव्यम्, वेद एव शास्त्रं वेदशास्त्रं तत्र विरोधस्तत्प्रामाण्यानुपपत्तिरित्यर्थः । ननु पौरुषेयत्वेऽपि वेदस्य प्रामाण्यं तार्किकैः प्रतिष्ठापितं ततः कथं तदप्रामाण्यापात इत्याशङ्क्य तन्मतस्य निरसिष्यमाणत्वादस्माभिर्वैदिकैरपौरुषेयत्वहेतुका स्वतःप्रमाणतैव वेदस्यास्थीयते सा न तत्पौरुषेयत्वे घटत इत्याह । न हि खल्विति ॥ २४४ ॥

मू० ॥ कणभुगभिमतिर्वा कल्पनीया तदानीं
सुरगुरुमतमेवोपास्यमाहोस्विदुच्चैः ।
इति निपतति चोद्यं ब्रह्मणो विश्वसृष्टि-
र्यदि भवति न चेद् वो नित्यमायाति विश्वम् ॥ २४५ ॥

टी० ॥ ननु सूत्रकारेणैव ब्रह्मणः शास्त्रयोनित्वाभिधानाद्वेदस्य तत्कार्यत्वमपरिहार्यमित्याशङ्क्य तर्हि परतः प्रामाण्यापाताद् वैशेषि-

कादिमतप्रवेशः स्यादित्याह । कणभुगिति । तन्मते वेदवाक्यरचनामूलभूतप्रमाणानिरूपणात्तदपि नाङ्गीक्रियत इत्याशङ्क्य तर्हि वेदाप्रामाण्यापत्तेर्लौकायताद्धिमतप्रवेशः स्यादित्याह । सुरगुरुमतमिति । बृहस्पतिना राजपुत्राणां विमोहनाय कामशास्त्रस्य रचितत्वात्सुरगुरुमतमित्युक्तम् । नामरूपात्मकप्रपञ्चस्य ब्रह्मकार्यत्वे वेदस्य पौरुषेयत्वचोद्यं निगमयति । इतीति । तर्हि वेदस्य ब्रह्मकार्यत्वमेव त्यज्यत इत्याशङ्क्य सदा वेदतत्प्रतिपाद्ययोर्नित्यत्वापातात्सर्गप्रलयादि न स्यादित्याशयेनाह । न चेदिति ॥ २४५ ॥

मू० ॥ ननु सदृशमिदं वश्चोद्यमस्मासु कस्माद्
विनिहितमुभयेषां पूर्वमीमांसकानाम् ॥
अवगतिकृतमेतद् वाचकत्वं पदाना-
मवगतिरियमिष्टा नश्वरी तत्त्वणेन ॥ २४६ ॥

टी० ॥ यदि पुरुषनिर्वर्तितत्वमात्रं वेदस्य पौरुषेयत्वं तद्भाट्टानां प्राभाकराणां च तुल्यं ततश्च तदस्मन्मते दोषत्वेन नोद्भावनीयमिति परिहरति । ननु सदृशमिति । नन्विति निश्चये । अनादिपदसंदर्भस्य वेदत्वाङ्गीकारान्मीमांसकमते तस्य कथं पुरुषनिर्वर्तितत्वं तुल्यमित्याशङ्क्याह । अवगतीति । एकस्यानेकस्य वा वर्णमात्रस्य पदत्वायोगाद् वाचकत्वमेव पदत्वं वर्णानाम्, तच्च क्रमविशेषवद्वर्णविशेषेषु व्युत्पत्तिकालेऽवगम्यते, ततश्च क्रमविशेषघटितत्वात्पदत्वस्य वर्णानां नित्यविभूनां स्वतः क्रमायोगात्प्रत्येकवर्णानुभवगतक्रमारोपवतां तेषां पदत्वं वक्तव्यम्, तदारोपस्य चानित्यतया पुरुषनिर्वर्तितत्वात्तद्घटितं पदमपि तथेति न पदानामनादितेत्यर्थः ॥ २४६ ॥

मू० ॥ अवगतिगतमेवापेक्ष्य पूर्वापरत्व-
प्रतिनियममियं वो वेदता वेदराशेः ॥
वर्णक्रमभवदित्थं वेदशास्त्रं समस्तं
कथमिव तदिदानीं वेदशास्त्रं प्रमाणम् ॥ २४७ ॥

टी० ॥ किं च पदसंदर्भमात्रस्यावेदत्वात्क्रमविशेषवत्पदसंदर्भस्यैव वेदत्वं वक्तव्यम्, न च मीमांसकमते पदेषु स्वतः क्रमोऽस्ति तेन प्रत्येक-पदगोचरधीगतनियतक्रमारोपगतैव पदानां वेदतेति न वेदस्य नित्यत्वम्, पदेष्वानुपूर्वीविशेषारोपस्यानित्यत्वात्तद्घटितवेदस्यापि तद्वश्यम्भावात्त-दधीनाप्रामाण्यमपरिहार्यं स्यादित्याह । अवगतिगतमिति । पदावगति-गतमित्यर्थः । पूर्वापरत्वप्रतिनियमं नियतपूर्वापरीभावम् । इयं प्रतिभा-समाना । वेदराशेः पदसंदर्भस्य ॥ २४७ ॥

मू० ॥ पुरुषमतिनिवेशो नास्ति वेदप्रमेये
विषय इति यदीष्टा मानता स्वप्रयुक्ता ॥
सदृशमिदमिदानीं कारणं मानतायां
परमपुरुषसृष्टे वेदशास्त्रेऽप्यभीष्टम् ॥ २४८ ॥

टी० ॥ उक्तविधया वेदस्यानित्यत्वेऽपि स्वप्रमेयधर्माधर्मादिगोच-रमानान्तरानपेक्षत्वात्स्वगतानुपूर्व्यां पुरुषस्वातन्त्र्याभावादनपेक्षत्वमपौरु-षेयत्वं चेति तत्प्रामाण्यस्य स्वतस्त्वसिद्धिः, उक्तं च, यवतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रतेत्याशयेन शङ्कते । पुरुषमतीति । कार्यस्यापि वेदस्य स्वतःप्रामाण्यप्रयोजकतया यदुक्तं स्वार्थप्रवृत्तमानान्तरानपेक्षत्वादि तत्तस्य ब्रह्मकार्यमतेऽपि तुल्यं तदस्य तन्मते तदप्रामाण्यापादनमसङ्गतमित्याह । सदृशमिदमिति ॥ २४८ ॥

मू० ॥ न हि खलु मतिपूर्वा ब्रह्मणः सृष्टिरिष्टा
निगदितुरिव सृष्टिर्वेदविद्यासु नित्यम् ॥
भवति तु पुनरेषा तस्य निश्वासकल्पा
श्रुतिवचनमपीदं वस्तु वक्ति स्फुटं नः ॥ २४९ ॥

टी० ॥ इदानीमविद्यादशायां सदृशमित्येतदेवोपपादयति । न हीति । वेदविद्यासु सृष्टिरिति सम्बन्धः । ब्रह्मण इति पञ्चमी षष्ठी वा, द्वितीये ब्रह्मणो मतिपूर्वेति योजनीयम् । तदनिष्टत्वस्य वादिप्रसिद्धत्वं निपातद्वयार्थः । ब्रह्मणः सर्वज्ञतया वेदार्थाभिज्ञत्वात् तत्कृता वेदसृष्टिः

कथं तन्मतिपूर्वा न भवेदित्याशङ्क्य तन्मते तस्य तत्सृष्टावप्रयोजक-त्वात्सा न तत्पूर्विकेत्यत्र दृष्टान्तमाह । निगदितुरिति । यथा कस्य-चिद्वेदार्थाभिज्ञस्याप्युपाध्यायस्य वेदवाक्योच्चारणं न तदर्थज्ञानाधीनं किं तु पूर्वमधिगतवेदस्मरणमात्राधीनं केवलपाठकेषु तथैव दर्शनात् एवं ब्रह्म-णोऽपि तदर्थज्ञानं विद्यमानमपि तत्सृष्टावप्रयोजकमित्यर्थः । नित्यं सर्वक-ल्पेषु । तदीयज्ञानस्तत्र तत्प्रयत्नोऽप्यनुपयुक्त इत्याशयेनाह । भवतीति । अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्यादिश्रुतिरुक्तार्थे मानमित्याह । श्रुतिवचनमिति । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवे-त्यादिस्मृतिवचनमप्यर्थः ॥ २४९ ॥

मू० ॥ अपि च पुरुषकर्माद्भुतिकानीन्द्रियाणि

स्फुटमवगमयन्ति स्वंस्वमन्यानपेक्षम् ॥

विषयमिति हि दृष्टं तद्वदिष्टं च तस्मा-

दिह किमपि न चोद्यं वाच्यमेतद्भवद्भिः ॥ २५० ॥

टी० ॥ पुरुषनिर्वर्तितत्वमात्रेण वेदस्य स्वतःप्रामाण्याभावे परम-तेऽपि तदापत्तिरिति पूर्वमुक्तम्, इदानीं मीमांसकं प्रति तस्य हेतोरिन्द्रियेषु व्यभिचरितत्वेनाभासत्वमभिप्रेत्येन्द्रियवदेव वेदस्यापि स्वतः प्रामाण्यं दुर्नि-वारमित्याह । अपि चेति । अदृष्टद्वारा पुरुषकृतानि श्रोत्रादीन्द्रियाणि शब्दादिरूपं स्वस्वासाधारणविषयमन्यमानानपेक्षं यथा स्यात्तथाऽवगमय-न्तीति कार्यवशादेव दृष्टम्, तथा तदिष्टं च भवताम्, ततश्च वेदस्यापि तथा स्वत एव प्रामाण्योपपत्तेर्भवदीयचोद्यायोग इत्यर्थः ॥ २५० ॥

मू० ॥ श्रुतिवचनमनेकं वक्ति तस्येक्षितृत्वं

मतिमदिति ततस्तन्नेष्यते कस्य हेतोः

इति यदि मनुषे तन् मैव मंस्थाः कुतश्चेत् ॥

सकलकरणहीनं ब्रह्म नः शास्ति शास्त्रम् ॥ २५१ ॥

टी० ॥ तदैक्षत बहु स्यां प्रजायेय सोऽकामयत बहु स्यामित्या-दिश्रुतयो वीक्षणपूर्वकं ब्रह्मणो मानसृष्टिमाचक्षाणा मानान्तरापेक्षां वेद-

सृष्टिं सूचयन्ति, मानं विनेत्यत्वानुपपत्तेरिति शङ्कते । श्रुतिवचनमिति । उदाहृतश्रुतिषु मानाधीनेक्षणाश्रवणात्तच्च शङ्कनीयमित्याह । तन्मेवेति । तथापि तस्यानुपपत्त्या मानान्तराधीनमीक्षणमित्युक्तत्वात्कुतस्तस्मिन्निषेध इति शङ्कते । कुतश्चेदिति । न तस्य कार्यं करणं च विद्यते अचक्षुष्कमश्रोत्रमवागमनः अप्राणो ह्यमनाः शुभ्रः असङ्गो ह्ययं पुरुष इत्यादिशास्त्रात्तस्य कार्यकरणराहित्यप्रतिपत्तेर्मानाधीनमीक्षणं तस्यायुक्तमित्याह । सकलेति ॥ २५१ ॥

मू० ॥ चितिगतजडशक्तेराद्य इष्टो विवर्त-
श्चितिनिकटनिवेशाल्लब्धदीप्तिर्जडोऽपि ॥
श्रुतिशिरसि निषक्तैरीक्षणं कथ्यते त-
न्न तु परमपदस्यापीक्षणं बुद्धिवृत्तिः ॥ २५२ ॥

टी० ॥ तर्हि तदैक्षतेत्यादिश्रुतिर्निरालम्बना स्यादित्याशङ्क्य साभासमायावृत्तिरेव तत्रेक्षणं विवक्षितं नास्मदादेरिव मानाधीना बुद्धिवृत्तिस्तस्य बुद्ध्यादिराहित्योक्तेरित्याह । चितिगतेति । मायावृत्तेर्ब्रह्मधर्मत्वं कथमिति शोधयामाह । चितिनिकटेति । चित्यध्यासादित्यर्थः ॥ २५२ ॥

मू० ॥ ननु च डित्थडवित्थपदादिवत्
सकलमेव तु सामयिकं पदम् ॥
अनुमिमीमहि पूर्वनिदर्शना-
दनुमितिर्भवतीति किमद्भुतम् ॥ २५३ ॥

टी० ॥ एवं वेदस्य ब्रह्मजत्वेऽपि स्वार्थगोचरमानान्तरानधीनत्वाद् ब्रह्मणस्तदीयस्वरानुपूर्व्यादौ स्वातन्त्र्याभावाच्च निरपेक्षत्वापौरुषेयत्वाभ्यां स्वत एव प्रमाणं वेद इति श्रुत्वोपरते मीमांसके तदसहमानस्तार्किकः प्रत्यवतिष्ठते । ननु चेति । करचरणादिमत्पिण्डविशेषमुत्पन्नं दृष्ट्वा तद्व्यवहाराय तज्जनकादिना स्वबुद्धिरचितडित्थादिपदं सच सङ्केतितं तदभिधायकं दृष्टम्, ततश्च विवादपदं गोघटादिपदं केन चित् स्वार्थे सङ्केतितं पदत्वाड्डित्थादिपदवदित्यनुमानेन सर्वपदार्थसम्बन्धस्य मानान्तरापे-

Digitized by Google

सत्वसिद्धौ तादृशपदसंदर्भात्मकवेदस्यापि तदपेक्षा दुर्वारेति कथं तस्य निरपेक्षतालक्षणं प्रामाण्यमित्यर्थः । क्वाचित्कदर्शनमात्रेण कथमेतदनुमानमतिप्रसङ्गादित्याशङ्क्य व्यभिचारादर्शनादिदमनुमानमुक्तदृष्टान्तेन कस्य न भवेदित्याह । पूर्वनिदर्शनादिति ॥ २५३ ॥

मू० ॥ अनादिवृद्धव्यवहारलक्षणे
कथं प्रमाणे परिपन्थिनि स्थिते ॥
गवादिशब्दे समयोऽनुमास्यते
डवित्थशब्दादिवदेतदुच्यताम् ॥ २५४ ॥

टी० ॥ डित्यादिपदार्थसम्बन्धस्यागन्तुकत्वमुक्तानुमाने उपाधिः, न च साधनव्यापकता, इदानीं व्यवच्छियमाणगवादिपदार्थसम्बन्धस्यैवानादिवृद्धव्यवहारगोचरत्वेन तस्यानादित्वात्, सर्गाद्यकालीनोऽपि गवादिपदार्थसम्बन्धव्यवहारस्ततः पूर्वकालीनतत्सम्बन्धानुस्मृतिनिबन्धनो गवादिपदार्थसम्बन्धव्यवहारत्वादिदानींतनतद्व्यवहारवदित्यनुमानात्, ततः कृतयुगस्यादौ ब्रह्मपूतो महायशाः सर्वज्ञो धृतिमानृषिः पुनराजायते स्मरतीत्यादिवचनात्सर्गादिभुवां हिरण्यगर्भादीनामीश्वरानुगृहीतानां कल्पान्तरीयपदार्थसम्बन्धानुसन्धानोपपत्तेश्च तत्सम्बन्धस्यानादित्वनिश्चयात्तद्विरोधात्तस्य सर्गकालेऽपि कृतकत्वं वक्तुमशक्यमित्याशयेनाह । अनादिवृद्धेति । वृद्धव्यवहारो लक्षणं लिङ्गं यस्य पदार्थसम्बन्धानादित्वानुमानस्य तत्तथोक्तम् ॥ २५४ ॥

मू० ॥ ततः प्रमाणाभिमतेषु पञ्चसु
प्रमाणमत्रादिषु किं चिदीक्ष्यते ॥
नहीह सम्बन्धकृति तेन तस्य वः
खपुष्पकल्पत्वमभावमानतः ॥ २५५ ॥

टी० ॥ किं च सर्वपदानां तदर्थेषु सङ्केतकर्तरि मानाभावाच्च तदसिद्धिः, तथाहि, स न तावत्प्रत्यक्षेण सिद्ध्यति, अननुभवात्, इतरथा तद्विप्रतिपत्त्यनुपपत्तेः, नाप्यनुमानेन तस्य सोपाधिकत्वेन दूषितत्वात्, उप-

मानं तु सादृश्यादिव्यवस्थितवस्तुविषयं तच्च न शङ्कनीयम्, नाप्यागमेन सर्वपदार्थसम्बन्धानां केन चित्सङ्केतितत्त्वप्रतिपादकवचनादर्शनात्, नाप्यर्थापत्त्या तेन विनानुपपद्यमानवस्तुनोऽभावात्, इदानींतनपदार्थसम्बन्धव्यवहारस्यानादिवृद्धव्यवहाराधीनतया उपपादितत्वात्, तस्माद्भावसाधकप्रमाणेष्वेकस्याप्यभावात्तत्सद्भावो दुर्लभः, प्रत्युत भावसाधकमानपञ्चकानुदयरूपाभावमानात्तदभाव एवेति निश्चीयत इत्याह । सत इति । भावस्येत्यर्थः । सप्तमी निर्धारणार्था । तेन मानपञ्चकानुदयेन । एतत्त्वभावमानत इत्येतद्विशेषणम्, तृतीयाऽर्थे च तसिः ॥ २५५ ॥

मू० ॥ पुरोपलब्धो विषयो न दृश्यते
यदा प्रमाणैरिह भावगोचरैः ॥
तदा तु तत्रानुपलब्धिकारणं
किमप्यभावादपरं हि मृग्यते ॥ २५६ ॥

टी० ॥ ननु रात्रौ विद्यमानान्यपि कानि चिद् वस्तूनि कथमपि नोपलभ्यन्ते, एवं दिवसेऽपि तारकादीनि, तद्वस्ततोऽपि सङ्केतयितुरनुपलम्भोपपत्तेस्तावता कथं तदभावसिद्धिरित्याशङ्क्य दृष्टान्ते पूर्वं पश्चाद्वोपलम्भेन तदभावायोगात्तदोपलम्भप्रतिबन्धकवशादेव तदनुपलम्भो युक्त इत्याह । पुरोपलब्ध इति । एतच्च पश्चादुपलभ्योपलक्षणम् । अनुपलब्धिकारणं तत्प्रयोजकम्, उपलब्धिप्रतिबन्धकमिति यावत् । किमपि दृष्टमदृष्टं वा ॥ २५६ ॥

मू० ॥ अत्यन्तानुपलब्धवस्तुनि पुनर्यः पञ्चकानुद्भव-
स्तस्याभावनिमित्तकः स न पुनस्तत्रापरं कारणम् ॥
अन्विच्छन्ति मनीषिणो न हि शशेऽदृष्टा विषाणास्तिनां
तत्रादर्शनकारणान्तरपरा हेत्वन्तरान्वेषिणः ॥ २५७ ॥

टी० ॥ सर्वपदसङ्केतकर्तरि तु कदापि भावप्रमाणस्य कस्याप्यनुदयात्तदभावनिश्चयोऽवश्यंभावीति सदृष्टान्तमाह । अत्यन्तेति । तस्यात्यन्तानुपलब्धवस्तुनः स मानपञ्चकानुद्भवः, स एव तत्रेति परामृश्यते, अदृष्टेति छेदः, तत्र शशे, अदर्शनस्य शृङ्गादर्शनस्य, कारणान्तरपरा अभावातिरेकिप्रयोजकार्थिनः सन्तस्तज्जिज्ञासवो न हीति सम्बन्धः ॥ २५७ ॥

मू० ॥ विषमदुर्गमदेशसहस्रगः
कथमिवैष नरः समयक्रियाम् ॥
सकलशब्दतदर्थनिवेशिनीं
वद विधातुमलं स्वयमेकलः ॥ २५८ ॥

टी० ॥ किं चादौ सङ्केतकर्त्रा तानिमानि पदानि स्वमुखेनोच्चार्य श्रावयित्वा तेषां तत्तदर्थविशेषु स्वकृतसाङ्केतिकसम्बन्धो ज्ञापनीयः, न च विना शरीरमुच्चारणादि संभवति, न च सङ्केतकर्तृत्वादेव शरीरमपि तस्यानुमीयत इति वाच्यम्, तथापि नानाशरीरे मानाभावाद्दृष्टानुरोधेन तस्यैकमेव शरीरं भवद् भवेत्, न चैकेन शरीरेण सर्वासु शब्दव्यवहारभूमिष्व-तीवोच्चनीचासु गिरिनदीसमुद्रादिभिर्दुर्गमासु युगपत्क्रमेण वा कश्चि-त्कथं गन्तुमलम्, अगच्छन्वा तत्तद्देशवासिनः स्वकृतं साङ्केतिकं सम्बन्धं ग्राहयेत्, तदग्रहे च तेषां शाब्दव्यवहारो न स्यादित्यभिप्रेत्याह । विषमेति । नरदृष्टान्तानुमितस्य नरसाम्यमभिप्रेत्यैव नर इत्युक्तम् ॥ २५८ ॥

मू० ॥ अपि च किं चिदपि प्रतिपादकं
न हि यदा पदमस्ति जगन्मुखे ॥
अनभिधाय पदं न तदा कथं
समयमेष करिष्यति शङ्करः ॥ २५९ ॥

टी० ॥ किं च लोके सङ्केतयिता श्रुतेन शब्दान्तरेण कं चिदर्थं निर्दिश्यायं हित्थ इति व्यवहर्तव्य इति सङ्केतं कुरुते, सर्गाद्यकालीनानां जनानां तु कानन्वयकल्पानामेकत्रापि पदे व्युत्पत्त्यभावात्तान्प्रति पदान्त-रेणार्थविशेषनिर्देशायोगादज्ञाते तस्मिन्पदविशेषस्य सङ्केतोऽशक्यो ग्राह-यितुमित्याह । अपि चेति । जगन्मुखे सर्गाद्यकाले । शङ्कर आनुमानिक ईश्वरः ॥ २५९ ॥

मू० ॥ अभिनयेन करिष्यति चेदयं
समयमेतदतीव हि दुर्घटम् ॥
न हि पदार्थसहस्रविमिश्रिते
गवि तदाऽभिनयात् समयो भवेत् ॥ २६० ॥

नन्वश्रुत्यवान्मति गोघटादिकमङ्गुल्यादिव्यापारविशेषरूपाभिनयेन निर्दिश्य तत्र गवादिपदानां सङ्केतं ग्राहयिष्यतीश्वर इति शङ्कामनूद्यापवदति । अभिनयेनेत्यादिना । हिशब्दसूचितं हेतुमाह । न हीति । गवादेर्नानाविधावयवगुणक्रियासामान्यादिभिः सङ्कीर्णत्वादभिनयेनाप्येकतरनिर्धारणायोगाद् गवादिपदानामर्थविशेषे सबन्धो दुर्बोधः, शब्दार्थविशेषयोरुपस्थितावपि तयोर्वाच्यवाचकभावरूपसम्बन्धविशेषोऽपि दुरवबोधः, तच्चिह्नकाभावादिति भावः ॥ २६० ॥

मू० ॥ अपि च लौकिकमानबलाश्रया-
दधिगते विषये समयो भवेत् ॥
अनुपलब्धसतत्त्वकदेवता-
प्रभृतिकार्थगतः समयः कुतः ॥ २६१ ॥

टी० ॥ किं च शब्दानुगते वस्तुनि शब्दसङ्केतस्य परस्पराश्रयापातेन ग्रहीतुमशक्यत्वान्मानान्तराधिगतेऽर्थे तद्ग्रहो वक्तव्यः, ततश्च धर्माधर्मस्वर्गनिरयदेवतादिपदार्थानां मानान्तरायोग्यत्वात्तेषु सङ्केतग्रहासंभवात्तेषां पदानामबोधकत्वं स्यादित्याह । अपि च लौकिकेति । स्पष्टार्थान्यक्षराणि ॥ २६१ ॥

मू० ॥ अपि च कर्तुरनुस्मरणं भवेद्
यदि चकार पुमान् समयं गिराम् ॥
न खलु कर्तृगबुद्धिबलं विना
व्यवहृतिर्भवति व्यवहर्तरि ॥ २६२ ॥

टी० ॥ किं च सङ्केताधीनव्यवहारस्य तत्कर्तृस्मरणं व्यापकं दृष्टं गवादिशब्दार्थसम्बन्धव्यवहारे तु तदभावाचायं सङ्केताधीन इत्याह । अपि च कर्तुरिति । तस्य व्यापकत्वं विपक्षबाधकप्रदर्शनेनोपपादयति । न खल्विति । सङ्केतकर्तुराप्तत्वस्मरणं तदधीनव्यवहारस्य मूलम्, इतरथा प्रतारकादिकृतत्वाशङ्कया तदधीनव्यवहारो न स्यादित्यर्थः ॥ २६२ ॥

(शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाध्यायस्यावशेषः ।

(*Continued from page* 615. Vol. IX.)

मू० न तावज्जीवमाश्रित्य अविद्यापरिकल्पितत्वाज्जीवभावस्य, नापि ब्रह्माश्रित्य तस्य स्वयंप्रकाशज्ञानरूपत्वेनाविद्याविरोधित्वात्, सा हि ज्ञानबाध्याभिमता

"ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम् ।
अज्ञानं चेत् तिरस्कुर्यात्कः प्रभुस्तन्निवर्तने ॥
ज्ञानं ब्रह्मेति चेद् ज्ञानमज्ञानस्य निवर्तकम् ।
ब्रह्मवत्तत्प्रकाशत्वात्तद् प ह्यनिवर्तकम् ॥
ज्ञानं ब्रह्मेति विज्ञानमस्ति चेत्स्यात्प्रमेयता ।

टी० "न ताव"दिति, जीवे सिद्धे अविद्यासिद्धिः, अविद्यासिद्धौ जीवसिद्धिरित्यन्योन्याश्रयणमित्यर्थः, जीवाज्ञानवादनिरास उत्तरत्र विस्तरेण वक्ष्यत इत्यत्र संक्षिप्तः । अथ ब्रह्माश्रयत्वपक्षं दूषयति "नापी"ति, विरोधित्वं कथ? मित्यत्राह "सा ही"ति, ब्रह्मविषयाज्ञानस्य तत्प्रकाशबाध्यत्वाद्विरोधः । अत्र नाथमुनिभिरुक्तान् श्लोकानाह "ज्ञानरूप"मिति, स्वप्रकाशत्वं विवक्षितं ज्ञाननिवर्त्यत्वे हेतुमाह "मृषात्मक"मिति, न हि स्वरूपज्ञानमज्ञानविरोधि अपि तु प्रमाणज्ञानमेवेति पक्षमनूद्य दूषयति "ज्ञानमि"ति, ब्रह्मवत्तत्प्रकाशत्वात्—स्वरूपानतिरिक्तप्रकाशकत्वादित्यर्थः, न हि शुक्लभास्वरद्रव्ये गृहीते आप्तवाक्यादिभिः शुक्लभास्वरद्रव्यमित्येतावति शतशः प्रतिपन्नेऽपि भ्रमनिवृत्तिः । दूषणान्तरमाह "ज्ञानमि"ति, ततः किमित्यत्राह?—

Digitized by Google

सू० ब्रह्मणोऽननुभूतित्वं त्वदुक्त्यैव प्रसज्यते" ॥
ज्ञानस्वरूपं ब्रह्मेति ज्ञानं तस्या अविद्याया बाधकं न स्वरूपभूतं ज्ञानमिति चेत् न उभयोरपि ब्रह्मस्वरूपप्रकाशत्वे सति अन्यतरस्याविद्याविरोधित्वमन्यतरस्य नेति विशेषानवगमात् ।

टी० "ब्रह्मणा" इति, एषु श्लोकेषु प्रथमश्लोकस्यार्थः पूर्वं ज्ञानबाध्याभिमतेत्यन्तेन भाष्येणोक्तः, द्वितीयश्लोकं व्याचष्टे "ज्ञानस्वरूपमि" ति,ब्रह्मस्वरूपप्रकाशत्वे सति स्वरूपविषयज्ञानत्वे सतीत्यर्थः, विशेषानवगमात्—विषयवैषम्याभावादित्यर्थः । कथं विशेषानवगमः? प्रमाणजन्यत्वविशेषोस्तीति चेत् किं तेन विषयवैषम्यं हि न विद्यते । किंच स्वरूपभूतज्ञानानिवर्त्तकज्ञानस्य विषयवैषम्यमस्ति वा? न वा? अस्ति चेत्सविशेषत्वं नो चेत् स्वरूपमेव निवर्त्तकं स्यात् प्रमाणजन्यज्ञानमनिवर्त्तकं वा स्यात्, पुरोऽवस्थितभास्वरवस्तुविषयज्ञानवत् प्रमाणजन्यत्वं न निवर्त्तकत्वे प्रयोजकम् इदं शुक्लभास्वरद्रव्यमिति वाक्यजन्यस्य ज्ञानस्य निवर्त्तकत्वाभावात्तस्मात् भ्रमसहकारादतिरिक्ताकारविषयत्वं निवर्त्तकत्वे प्रयोजकम्—

ननु विषयवैषम्याभावेऽपि कस्यचित् ज्ञानस्य भ्रमाविरोधित्वं कस्यचिद् भ्रविरोधित्वं च दृष्टमभिज्ञाप्रत्यभिज्ञयोः, अयमेको देवदत्त इत्यभिज्ञाया एकविषयत्वेऽपि पूर्वदृष्टादयमन्य इति पुरुषद्वित्वभ्रमो दृष्टः, प्रत्यभिज्ञायास्तु सोऽयमेको देवदत्त इति देवदत्तैक्यविषयत्वेऽपि द्वित्वविरोधित्वं दृष्टमिति विषयवैषम्याभावेऽपि प्रमाणज्ञानस्य भ्रमनिवर्त्तकत्वं युक्तमिति शङ्कायामाह—

सू० एतदुक्तं भवति ज्ञानस्वरूपं ब्रह्मेत्यनेन ज्ञानेन ब्रह्मणि यः स्वभावोऽवगम्यते स ब्रह्मणः स्वयंप्रकाशत्वेन स्वयमेव प्रकाशत इति अविद्याविरोधित्वे न कश्चिद्विशेषः स्वरूपतद्विषयज्ञानयोरिति । किंच अनुभवरूपस्य ब्रह्मणोऽनुभ-

वान्तराननुभाव्यत्वेन भवतो न तद्विषयज्ञानमस्ति अतोज्ञानमज्ञानविरोधि चेत्स्वयमेव विरोधि भवतीति नास्या ब्रह्माश्रयत्वसंभवः ॥

टी० "एतदुक्त"मिति, सत्यत्वज्ञानत्वादिस्वभावोऽस्तीति चेत् स च स्वरूपानतिरिक्त इति दर्शयितुं स्वभाव–शब्दः, अनेनाभिज्ञाप्रत्यभिज्ञयोरपि विषयवैषम्यमुक्तं भवति, अभिज्ञायामेकस्य धर्मिण एकदेशकालसम्बन्धित्वं प्रतिपन्नं न तु कालद्वयसम्बन्धित्वं तत्तु प्रत्यभिज्ञायां प्रतिपन्नम् एकदेशकालसम्बन्धित्वप्रतीतिर्न द्वित्वविरोधिनी एकस्य धर्मिणः कालद्वयसम्बन्धित्वं देशद्वयसम्बन्धित्वं त्वैक्यं तत्तु द्वित्वविरोधीति तत्प्रतिपत्तिर्द्वित्वभ्रमं निवर्तयति अतस्तत्रापि विषयवैषम्यमस्तीति फलितम् । अथ तृतीयश्लोकार्थस्य विपर्यये पर्यवसानमाह "किन्त्वि"ति, प्रमाणज्ञानत्वं निवर्तकत्वव्यापकम् अतोऽधिष्ठानभूतब्रह्मस्वरूपस्य प्रमाणज्ञानत्वाभावाच्च भ्रमनिवर्तकत्वम् अधिष्ठानत्वात् शुक्त्यादिवत् ब्रह्मस्वरूपं न भ्रमविरोधीति प्रमाणान्तरज्ञानमपेक्षत इति शङ्कामाह–

मू० शुक्त्यादयस्तु स्वयाथात्म्यप्रकाशे स्वयमसमर्थाः स्वाज्ञानाविरोधिनस्तन्निवर्तने च ज्ञानान्तरमपेक्षन्ते, ब्रह्म तु स्वानुभवसिद्धस्वयाथात्म्यमिति स्वाज्ञानविरोध्येव तत एव निवर्तकान्तरं च नापेक्षते । अथोच्येत ब्रह्मव्यतिरिक्तस्य मिथ्यात्वज्ञानमज्ञानविरोधीति न, इदं ब्रह्मव्यतिरिक्तमिथ्यात्वज्ञानं किं ब्रह्मयाथात्म्याज्ञानविरोधि? उत प्रपञ्चसत्यत्वरूपाज्ञानविरोधी? ति विवेचनीयं, न तावद्ब्रह्मयाथात्म्याज्ञानविरोधि–

टी० "शुक्त्यादयस्त्वि"ति, अधिष्ठानत्वस्य ज्ञानान्तरविषयत्वं व्यापकमतो व्यापकनिवृत्त्याऽधिष्ठानत्वनिवृत्तिः अधिष्ठानत्वादेव ब्रह्मस्व-

Digitized by Google

रूपस्फुरणेऽपि प्रमाणान्तरमपेक्ष्येत, नैवं जडत्वादेव शुक्त्यादेः स्वरूपस्फुरणेऽपि प्रमाणान्तरापेक्षा नाधिष्ठानत्वात् अतोऽधिष्ठानत्वं सोपाधिकम् । अत्राजडत्वात्स्वरूपस्फुरणे प्रमाणान्तरापेक्षा नास्तीति चेत् तर्हि जडत्वादेव भ्रमनिवृत्तौ शुक्त्यादेर्ज्ञानान्तरापेक्षा नाधिष्ठानत्वादतस्ततः सोपाधिकं तस्मादजडे तु प्रमाणान्तरापेक्षभ्रमनिवृत्तौ च न स्यादित्यभिप्रायः, शुक्त्यादयस्त्वित्यत्र तु–शब्दो ब्रह्मणः शुक्त्यादिव्यावृत्तिपरः, द्वयी ह्यद्वैतिनाङ्गीकृतिः ब्रह्मविषयप्रमाणं ज्ञानं भ्रमनिवर्तकं प्रपञ्चमिथ्यात्वविषयज्ञानं भ्रमनिवर्तकमिति च, तत्र प्रथमपक्षो दूषितः । अथ द्वितीयपक्षं दूषयितुं शङ्कते "अथोच्यते"ति, दूषयति नेत्यादिना "इदमि"ति,

ननु प्रपञ्चसत्यत्वमज्ञानमित्युच्यते अज्ञानं हि ज्ञानप्रतिबन्धकं न हि प्रपञ्चसत्यत्वं कस्यचित् ज्ञानं प्रतिबध्नाति सत्यम् आच्छादिकाज्ञानमेवं भूतं प्रपञ्चसत्त्वं न श्रुतिभासश्च विक्षेपरूपाज्ञानमिति पराभ्युपगमादेवमुक्तं प्रथमं शिरो दूषयति–

मू० अतद्विषयत्वात्, ज्ञानाज्ञानयोरेकविषयत्वेन हि विरोधः प्रपञ्चमिथ्यात्वज्ञानं तत्सत्यत्वरूपाज्ञानेन विरुध्यते, तेन प्रपञ्चसत्यत्वरूपाज्ञानमेव बाधितमिति ब्रह्मस्वरूपाज्ञानं तिष्ठत्येव, ब्रह्मस्वरूपाज्ञानं नाम तस्य सद्वितीयत्वमेव तत्तु तद्व्यतिरिक्तस्य मिथ्यात्वज्ञानेन निवृत्तं, स्वरूपं तु स्वानुभवसिद्धमिति चेत् न ब्रह्मणो द्वितीयत्वं स्वरूपं स्वानुभवसिद्धमिति तद्विरोधि सद्वितीयत्वरूपाज्ञानं तद्बाधश्च न स्याताम् ।

टी० "अत"दिति, कथमतद्विषयत्वात् ब्रह्मस्वरूपाज्ञानाविरोधित्व ? मित्यत्राह "ज्ञानाज्ञानयोरि"ति, विरोधे हि निवृत्तिरित्यर्थः । द्वितीयं शिरो दूषयति "प्रपञ्चे"ति, प्रपञ्चमिथ्यात्वज्ञानेन ब्रह्मस्वरूपाज्ञाननिवृत्तेः फलितत्वमाशङ्कते "ब्रह्मस्वरूपे"ति, सद्वितीयत्वं सद्वितीयत्वज्ञान-

Digitized by Google

मित्यर्थः, न हि सत्तया सद्वितीयत्वं ब्रह्मस्वरूपाज्ञानं भवति अपारमोघ्यात् सद्वितीयत्वविशिष्टब्रह्मगोचराज्ञाने निवृत्ते विशेष्यांशगोचरमप्यज्ञानं निवृत्तमिति स्वरूपासिद्धिः कथ? मित्यत्राह "स्वरूपं त्वि"ति, दूषयति "ने"ति, अद्वितीयत्वं किं स्वरूप? मुत धर्म? इति विकल्पाभिप्रायेण प्रथमं पक्षं दूषयति "ने"ति, धर्मपक्षे अपसिद्धान्तमाह–

मू० अद्वितीयत्वं धर्म इतिचेत्स्वानुभवरूपस्य ब्रह्मणोऽनुभाव्यधर्मविरहस्य भवनैवोपपादितत्वात्, अतो ज्ञानस्वरूपस्य ब्रह्मणो विरोधादेव नाज्ञानाश्रयत्वं, किं चाविद्यया प्रकाशैकस्वरूपं ब्रह्म तिरोहितमिति वदता स्वरूपनाश एवोक्तः स्यात्, प्रकाशतिरोधानं नाम प्रकाशोत्पत्तिप्रतिबन्धो वा विद्यमानस्य विनाशो वा प्रकाशस्यानुत्पाद्यत्वाभ्युपगमेन प्रकाशतिरोधानं प्रकाशनाश एव ।

टी० "अद्वितीयत्व"मिति, आश्रयानुपपत्तिं निगमयति "अत"इति, विरोधादेव–पूर्वोक्तादेवेत्यर्थः एवमाश्रयानुपपत्तिरुक्ता । अथ तिरोधानानुपपत्तिमाह "किञ्चे"ति,

ननु भवत्पक्षेऽपि क्षेत्रज्ञानां नित्यं स्वरूपस्फुरणमस्तीति तथाऽपि तेष्वपि स्वरूपतिरोधानेन विना देहात्मभ्रम इति तुल्याऽनुपपत्तिः सत्यं स्वरूपस्फुरणमस्त्येव न तस्य तिरोधानमभ्युपगम्यते

न च स्वरूपस्फुरणं भ्रमविरोधि किन्तु नित्यत्वाणुत्वनिरवयवत्वादीन्येव भ्रमविरोधीनि तान्यागमगम्यानि तेषां तिरोधिस्तद्विषयज्ञानप्रसराभावरूपः सङ्कोचः, अतः स्वरूपातिरिक्ताकारान्तरतिरोधानानभ्युपगमाच्चात्मनो नाशप्रसङ्गः, ज्ञानस्यात्मासाधारणाकारस्य स्फुरणात् भ्रमानुपपत्तिरिति चेन्न तस्यासाधारणत्वास्फुरणात् असाधारणतया स्फुरतो धर्मस्य हि भ्रमविरोधित्वं दृष्टं यथा शुक्तित्वादेः, शुक्तित्वं हि शुक्त्यसाधारणतया पूर्वं ज्ञातं पश्चात् भ्रमं निवर्त्तयति न तावत् ज्ञानं देहातिरिक्तात्मासाधारणधर्मत्वेन क्वचिद्दृष्टचरम् अतो न भ्रमः सम्भवति आत्मा-

साधारणधर्मत्वाद्दर्शनाद्भ्यासः, अध्यासाद्साधारणधर्मत्वावहरणमित्य-न्योन्याश्रयोऽनादितया परिहृतः, धर्मभूतस्य ज्ञानस्य नित्यत्वं तिरो-धानं च भवद्भिरभ्युपगतं तदा ज्ञाननाशप्रसङ्ग इति चेन्न ज्ञानं हि द्रव्यं तस्य स्वरूपातिरेकेण सङ्कोचविकासाख्यमवस्थाद्वयमभ्युपेतम् अतस्तत्तिरोधानं कर्मणा तत्सङ्कोचः, तन्निवृत्तिस्तु प्रसरः, स एव प्रकाशः स चानित्यः, तस्य नित्यत्वेऽपि नित्यस्य ज्ञानद्रव्यस्य स्वप्रकाशत्ववादः स्वप्र-काशनरूपप्रसरणार्हत्वनिबन्धनः, अतोऽवस्थाद्वयस्यागमापायित्वात् द्रव्यं नित्यमेव अस्मदवस्थास्थानीयो हि भवतः स्वप्रकाशः स एव स्वरूपं तस्मा-त्तिरोधानं तन्निवृत्तिरेवेतीममर्थमभिप्रेत्य प्रकाशैकस्वरूपं ब्रह्मेत्युक्तम्, अतः स्वरूपातिरेकिप्रकाशतिरोधानाख्यावस्थाद्वयानभ्युपगमात्स्वरूपनाश एव तिरोधानं स्यादित्यर्थः । अथ स्वरूपानुपपत्तिमाह—

सू० अपि च निर्विषया निराश्रया च स्वप्रकाशेयमनुभूतिः स्वा-श्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मानमनुभवतीत्यत्र किमयं स्वाश्रयदोषः परमार्थभूतः ? उतापरमार्थभूत ? इति विवेचनीयं, न तावत्परमार्थः, अनभ्युपगमात्, नाप्यपरमार्थः तथा हि सति द्रष्टृत्वेन वा दृशित्वेन वाभ्युपगमनीयः, न तावद्, दृशिः, दृशिस्वरूपभेदानभ्युपगमात् ।

टी० "अपि चेति," ज्ञातृत्वादीनामपरमार्थतया हि दोषान्तरापेक्षा तद्विहापीति दृष्टान्ततया वक्ष्यमाणाऽनवस्थोपयोगित्वेन निर्विषयेत्यादिप-रिपाटीप्रकटनं कृतम् । यद्वा विषयाश्रयभेदानामसत्त्वप्रतिभासयोरुक्तिर्दोष-कल्पनाकारणत्वेन कृता अनभ्युपगमादिति परमार्थत्वे ह्यद्वैतहानिप्रसङ्ग इति भावः । अपरमार्थपक्षं दूषयितुं कोटित्रयमेव संभावितमित्याह "तथे"ति, अपरमार्थत्वान्मूलदोषान्तरापेक्षयाऽनवस्थेति दूषणं कोटित्रयस्यापि साधारणं दृशित्वपक्षेऽधिकदूषणमस्तीति दर्शयति "न तावदि"ति, किमनवच्छिन्ना दृशिः ? उतावच्छिन्ना ? दृशेरनवच्छिन्नत्वं किं स्वरूपव्यतिरिक्तं ? स्वरूपमेव ?—

ति विकल्पमभिप्रेत्य अनवच्छिन्नपक्षे स्वरूपव्यतिरिक्तपक्षं दूषयति "दृशिस्वरूपभेदानभ्युपगमादि"ति, अनवच्छिन्नदृशिद्वयानभ्युपगमादित्यर्थः । अनवच्छिन्नपक्षे स्वरूपदृशित्वपक्षं दूषयति–

मू० भ्रमाधिष्ठानभूतायास्तु साक्षाद्दृशेर्माध्यमिकपक्षप्रसङ्गेनापारमार्थ्यानभ्युपगमाच्च द्रष्टृदृश्ययोस्तदवच्छिन्नाया दृशेश्च काल्पनिकत्वेन मूलदोषान्तरापेक्षयाऽनवस्था स्यात् । अथैतत्परिजिहीर्षया परमार्थसत्यनुभूतिरेव ब्रह्मस्वरूपा दोष इति चेत् ब्रह्मैव चेद्दोषः प्रपञ्चदर्शनस्यैव तन्मूलं स्यात् किं प्रपञ्चतुल्याविद्यान्तरकल्पनेन, ब्रह्मणो दोषत्वे सति तस्य नित्यत्वेनानिर्मोक्षश्च स्यात्, अतो यावद्ब्रह्मव्यतिरिक्तापारमार्थिकदोषानभ्युपगमः, न तावद्भ्रान्तिरुपपादिता भवति अनिर्वचनीयत्वं च किमभिप्रेतं ? सदसद्विलक्षणत्वमिति चेत् तथाविधस्य वस्तुनः प्रमाणशून्यत्वेनानिर्वचनीयतैव स्यात् ।

टी० ॥ "भ्रमे"ति, अवच्छिन्नदृशिदूषणत्वे वक्ष्यमाणानवस्था अनवच्छिन्नपक्षेऽपि समाना अत्राधिकदूषणद्वयसद्भावात्सा नोक्ता । अवच्छिन्नदृशित्वेन चाभ्युपगमं दूषयति "द्रष्टृदृश्ययोरि"ति, काल्पनिकत्वेनापारमार्थत्वेनेत्यर्थः दोषान्तरापेक्षाहेतुरिदं काल्पनिकत्वम् अवच्छिन्नदृशिपक्षेऽपि स्वरूपतद्व्यतिरिक्तविकल्पे स्वरूपपक्षे तुल्यमनभ्युपगमदूषणं ब्रह्मस्वरूपस्यावच्छिन्नत्वापारमार्थ्यानभ्युपगमात् ततोऽवच्छिन्नपक्षे विकल्पितस्वरूपातिरिक्तपक्षेऽनवस्थोक्ता यथैतदिति अपारमार्थिकत्वेऽनवस्था आपारमार्थत्वे द्वैतहानिरित्येतद्दोषपरिजिहीर्षयेत्यर्थः अनुभूतेरेव दोषत्वाच्चाद्वैतहानिः तस्याः पारमार्थ्याच्चानवस्थेति च भावः । एतद्दूषयति "ब्रह्मैवे"ति, अपारमार्थ्याद्दोषान्तरसापेक्षत्वसाम्यमभिप्रेत्य प्रपञ्चतुल्य–शब्द उक्तः, अतः प्रतिषिद्धोऽभिहितेदू-

षयोरित्यर्थः अनिर्मोक्षप्रसङ्गपरिहाराय ब्रह्मव्यतिरिक्तत्वम्, अनवस्थापरिहा-
राय पारमार्थिकत्वं परैरनवस्था त्रेधा परिहृता जीवाज्ञानवादिनां बीजाङ्कुर-
न्यायात्प्रवाहानादित्वेन परिहृता अविद्यायां जीवः जीवादविद्येति हि त-
न्मतं ब्रह्माज्ञानवादिना स्वरूपानादित्वेन परिहृता उभाभ्यां च दुर्घटत्वेन
परिहृता दुर्घटत्वमविद्याया भूषणं न तु दूषणमिति परमार्थस्य ह्युपपत्त्यपेक्षा
प्रासादनिगरणादिष्वल्पास्येन विपुलप्रासादनिगरणमनुपपन्नमिति युक्तिर्न
प्रवर्त्तते अत उपपत्तिनिरपेक्षत्वमपारमार्थ्यसाधकं दोषस्य स्वरसनिर्वाह-
कत्वेन दोषान्तरनैरपेक्ष्याच्च नानवस्थेति । अत्रोच्यते प्रवाहानादित्वं ब्रह्मा-
ज्ञानवादिनैव दत्तोत्तरं जीवनित्यत्वश्रुतिभिरकृताभ्यागमकृतविप्रणाशरूपप्रसु-
त्यर्थापत्त्या चामोक्षाज्जीवस्य स्थायित्वमिष्टं हीयेतेति अपारमार्थ्येन स्वरूपा-
नादित्वमपि नानवस्थापरिहारः तथा सति माध्यमिकपक्षविजयप्रसङ्गात्
तत्राधिष्ठानस्य भ्रान्तिसिद्धत्वं तस्या भ्रान्तेरधिष्ठानान्तरापेक्षा स्यात् त-
स्यापि भ्रान्तिसिद्धत्वे तथा स्यादित्यनवस्थया ह्यधिष्ठानपारमार्थ्यं सा-
धितं माध्यमिकेनापारमार्थ्यादधिष्ठानस्य स्वरूपानादित्वे स्वीकृते ऽनवस्था
परिहृतेत्यधिष्ठानापारमार्थ्यमेव स्यात् । किंच स्वरूपानादित्वेऽपि मूल-
दोषापेक्षाऽस्त्येव जीवस्यानादित्वेन विद्यापरिकल्पितत्वस्य भवद्भिरङ्गी-
कृतत्वात् दुर्घटत्वं चानुपपन्नं, दुर्घटत्वं नामोपपत्तिनिरपेक्षत्वं तदपारमा-
र्थ्यसाधकं चेदपरमार्थस्य प्रपञ्चस्य दुर्घटत्वेनोपपत्तिनिरपेक्षत्वान्मूलदो-
षापेक्षा च न स्यात्, निवर्त्तकज्ञाने सत्यपि साऽवतिष्ठेत विरोधाच्च तिष्ठ-
तीति चेत् तर्ह्युपपत्त्यनुवर्त्तिन्यविद्या स्यादिति परमार्थत्वप्रयुक्तोपपत्तिर-
परमार्थत्वप्रयुक्तोपपत्तिरिति द्विविधोपपत्तिः, तत्र दुर्घटत्वं नाम परमार्थ-
त्वप्रयुक्तोपपत्तिनिरपेक्षत्वम् अपरमार्थत्वप्रयुक्तोपपत्तिर्हि दोषापेक्षा, अतः प्रप-
ञ्चस्य मूलदोषपरिकल्पनं युक्तमिति चेत्तर्ह्यपरमार्थत्वप्रयुक्तोपपत्तिरूपदोषा-
पेक्षा अपरमार्थभूतदोषस्यापि स्यात् अतो ऽनवस्था तदवस्थैव, दुर्घटत्वम-
नवस्थापरिहारश्चेदधिष्ठानापारमार्थ्येऽनवस्था परिहृता स्यात्, तत्रापरमा-
र्थत्वप्रयुक्तोपपत्तिरवर्जनीयेत्यधिष्ठानान्तरानापेक्षा स्यादेवेत्यनवस्थितिरिति
वक्तव्यं तदत्र दोषेऽपि तुल्यमित्यनवस्था दुष्परिहारा प्रवाहानादित्वपक्षे-

Digitized by Google

ऽप्यधिष्ठानापारमार्थ्येऽप्यनवस्था सुपरिहारा पितृपुत्रादिपरम्परावदधिष्ठानपरम्परानादित्वाभ्युपगमात् जीवाज्ञानवादिनं प्रति ब्रह्माज्ञानवादिना—यदु घटत्वे दूषणमुक्तं तद्ब्रह्माज्ञानेऽपि तुल्यं, यथा अविद्याया दुर्घटत्वं चेन्मुक्तान् परब्रह्म चाश्रयेदविद्या शुद्धस्वरूपं ब्रह्म अशुद्धिस्वरूपाविद्या विरोधाच अयतीति चेत्तर्ह्युपपत्तिमत्यविद्या, तस्मादुक्तान्योन्याश्रयणादिदूषणाव्यापत्तेर्युरिति ह्युक्तं तत्त्वापि तुल्यं, मोक्षेऽपि ब्रह्माश्रयेदविद्या न हि बाधकज्ञाने सत्यपरमार्थभूता ऽविद्या तिष्ठतीति चेत् बाधकसन्निधौ न बाधस्थितिरित्येवंरूपोपपत्तिमत्येवाविद्येत्यस्मदुक्तान्यनवस्थानादिदूषणान्यापत्तेर्युरिति वक्तुं शक्यते दोषस्य स्वपरनिर्वाहकत्वे अधिष्ठानमपि तथा स्यात्, परं प्रत्यधिष्ठानत्वे सिद्धे हि स्वनिर्वाहकत्वमिति चेत्, परं प्रति दोषत्वे सिद्धे हि स्वनिर्वाहकत्वं तदेव नास्तीति तुल्यं स्यात्, अधिष्ठानारोप्ययोर्भेदो दृष्टस्तत्राधिष्ठानस्य स्वपरनिर्वाहकत्वेऽधिष्ठानाध्यस्तयोरैक्यप्रसङ्ग इति चेत् दोषतत्कार्ययोरपि तिमिरचन्द्रद्वित्वयोर्भेदो दृष्टः, दोषस्य स्वपरनिर्वाहकत्वे दोषाध्यस्तयोरैक्यप्रसङ्ग इति तुल्यमित्येतदभिप्रायेण यावद्ब्रह्मव्यतिरिक्तपारमार्थिकदोषानभ्युपगमः न तावद्भ्रान्तिरुपपादिता भवतीत्युक्तं, यच्चोक्तमाचार्यपादैः “स्वरूपानादित्वस्वपरघटने दुर्घटतया । प्रवाहानादित्वं पुनरिति चतस्रो हि गतयः । असत्या विद्याया वदितुमनवस्थापरिहृतौ मतास्त्वेतास्तुल्याः स्फुटमहदधिष्ठानसरणा”विति, अथानिर्वचनीयत्वानुपपत्तिमाह “अनिर्वचनीयत्वं चे”ति, यतायाविद्वत्सन्निधौ दुरुपपादत्वं कथं प्रमाणशून्यत्वमित्यत्राह—

सू० एतदुक्तं भवति सर्वं हि वस्तुजातं प्रतीतिव्यवस्थाप्यं सर्वा च प्रतीतिः सदसदाकारा, सदसदाकारायाः प्रतीतेः सदसद्विलक्षणं विषय इत्यभ्युपगम्यमाने सर्वं सर्वप्रतीतेर्विषयः स्यादिति ।

टी० “एतदुक्तमि”ति, “सर्वं सर्वप्रतीतेर्विषयः स्यादिती”ति, सदसद्विलक्षणमिति या प्रतीतिस्तत्रापि सदसदेव विषयः स्यादित्यर्थः, प्रतीत्यनु-

गुणं हि नीलपीतादि व्यवस्थाप्यते तस्मात्सदसदाकारायाः प्रतीतेः सदाकार एव विषयः न सदसद्विलक्षणं, यथा ख्यातिविवेके "न ह्यन्यदवभास्यमानो विषयः, अवभासनव्यवस्थाप्यत्वं विषयस्येति एकस्य विषयस्य सदसदाकारत्वमनुपपन्नं व्याप्तिविरोधादिति चेत्, सदसद्विलक्षणत्वं च व्याप्तिविरोधादनुपपन्नं सतोऽसद्विलक्षणत्वमसतस्सद्विलक्षणत्वं च हि दृष्टं न त्वेकस्योभयवैलक्षण्यं दृष्टमिति व्याप्तिविरोधः, अयं च विशेषः सदसद्विलक्षणत्वं क्वचिदपि न दृष्टं सदसदात्मकत्वं दृष्टमिति, यथा संवित्सिद्धौ "नासत्प्रतीतेर्बाधाच्च न सदित्यपि यच्च तत् । प्रतीतेरेव सत्त्वं न बाधाच्चासत्कुतो जगदि"ति, अर्थास्थितौ सत्त्वमसत्त्वं वा स्यात् न तद्विलक्षणत्वं सतो घटादेः सदसद्विलक्षणत्वं दृष्टमिति चेत् न तथा सति ब्रह्मणोऽपि सदसद्विलक्षणत्वप्रसङ्गात् अन्यतरत्वसहसदसद्विलक्षणत्वमिष्टमेवेति चेत् तुल्यम् ईदृशं सदसद्वैलक्षण्यं वदता शब्दान्तरेण सत्त्वमेवाङ्गीकृतं भवति अतस्त्वदभिमतं सदसद्विलक्षणत्वं विरोधादपास्तम् अस्तीति प्रतीतिविषयत्वं सत्त्वं नास्तीति विषयत्वं बाधितत्वमिति दैकस्य सत्त्वासत्त्वविरोधस्सदसद्विलक्षणत्वकल्पकश्चेत् सर्वत्र पूर्वपक्षसिद्धान्तप्रतीत्योः परस्परविरुद्धाकारविषयत्वादुभयाकारविलक्षणोऽर्थ एव सिध्यतीति सिद्धान्तसमर्थनवैयर्थ्यं स्यात्, ततश्च भेदस्तु सुनिरूप इति पूर्वपक्षीकृत्य दुर्निरूप इति त्वया सिद्धान्तिते प्रतीतिद्वयविरोधात्सुनिरूपदुर्निरूपविलक्षणः स्यात् एवं संवित्सत्यत्वमिथ्यात्वजडत्वाजडत्वनित्यत्वादिवादेषु पूर्वपक्षसिद्धान्तिताकाराविलक्षणत्वं संविदः स्यात् तच्चानभिमतम्, अतः परस्परविरुद्धाकारप्रतीत्योः प्रतिपक्षाकारवैलक्षण्यकल्पकत्वं व्याप्तिविरुद्धमिति न सदसद्वैलक्षण्यसिद्धिः, तर्हि ख्यातिबाधान्यथानुपपत्तेः कः परिहार उक्त? इति चेत् अन्यथैवोपपत्तिरुक्ता भवति सत्त्वे सत्यन्यथा व्याख्यानादिभिस्सतद्वाद्यभिमतैरेव ख्यातिबाधोपपत्तेः सतः कथं बाधः अन्यत्र ख्यातत्वात्, नन्वन्यत्र सत्त्वेच बाधः, न सत्त्वेऽसत्ख्यातिप्रसङ्ग इति चेच अन्यत्र सत्त्वात्, अन्यत्र सतोऽन्यत्र ख्यातत्वं ह्यन्यथा ख्यातत्वमन्यत्र सतोऽन्यत्र ख्यातिर्दोषवशात् दोषस्यान्यत्र ख्यातिहेतुत्वं न दृष्टमिति

चेत् दोषस्यानिर्वचनीयतावभासहेतुत्वं च न क्वचिदिति यदाऽन्यत्र दृष्टमिति तुल्यं मिथो विरुद्धाप्रतिपन्नाकारवैलक्षण्यमेकस्य विरुद्धमित्येतत्तद्बाधिकम् अख्यातिपक्षे सत्त्वे सति भेदाग्रहेण ख्यातिबाधोपपत्तिः सत एवागृहीतभेदतया ख्यातिः, भेदग्रहश्च बाधः, बाध्यत्वं च प्रवृत्तेः, यथार्थख्यातिपक्षे तु शुक्तिरजतस्याप्यर्थादौ सत्त्वप्राचुर्याभावादस्थिरत्वतदेकानुभाव्यत्वाग्रहस्याच्च ख्यातिबाधोपपत्तिः पुरोवर्तिनि सत एव रजतस्य ख्यातिः शुक्तिप्राचुर्यग्रहो बाधः, तेन प्रवृत्तिर्बाध्या, तद्बाधश्च प्रवृत्त्यनुपपत्तिः अलातचक्रादौ त्वख्यातिपक्षवत्तदुपपत्तिः अतोऽन्यथैवोपपत्तिः सिद्धेत्यनिर्वचनीयत्वकल्पकमयुक्तम्, एवमाश्रयतिरोधानस्वरूपानिर्वचनीयत्वानुपपत्तय उक्ताः । अथ न हि दृष्टेऽनुपपन्नं नामेति न्यायात्प्रमाणसिद्धार्थस्य तर्केण बाधो न युक्त इत्यभिप्रायवता परेण प्रमाणप्रतिज्ञा शङ्क्यते—

मू० अथ स्याद्वस्तुस्वरूपतिरोधानकरमान्तरबाह्यरूपविविधाध्यासोपादानं सदसदनिर्वचनीयमविद्याज्ञानादिपदवाच्यम्

टी० "अथ स्यादि"ति, पूर्वदूषिताकारान् साधयितुमाह "वस्तुस्वरूपे"ति, अनेन तिरोधानमुक्तम् आन्तरबाह्येति स्वरूपम् अध्यासोपादानत्वेन हि मिथ्यात्वं फलितं सदसदित्यनिर्वचनीयत्वं शास्त्रेष्वेतत्प्रतिपादकशब्दप्रत्यभिज्ञानार्थमविद्याज्ञानादिपदवाच्यत्वमित्युक्तं सिद्धान्तिना दूषयिष्यमाणमाकारान्तरमपि साध्यत्वेनाह—

मू० वस्तुयाथात्म्यज्ञाननिवर्त्यं ज्ञानप्रागभावातिरेकेण भावरूपमेव किंचिद्वस्तु प्रत्यक्षानुमानाभ्यां प्रतीयते तदुपहितब्रह्मोपादानस्याविकाशे चिन्मात्रवपुषि तेनैव तिरोहितस्वरूपे प्रत्यगात्मनि अहङ्कारज्ञानज्ञेयविभागरूपोऽध्यासः तस्यैवावस्थाविशेषेणाध्यासरूपे जगति ज्ञानबाध्यसर्परजतादिवस्तुतज्ज्ञानरूपोऽध्यासोऽपि जायते, कृत्स्नस्य

मिथ्यारूपस्य तदुपादानत्वं च मिथ्याभूतस्यार्थस्य मिथ्याभूतमेव ।

ननु च भावरूपमप्यज्ञानं वस्तुयाथात्म्यावभासरूपेण साक्षिचैतन्येन विरुध्यते, नैवं साक्षिचैतन्यं न वस्तुयाथात्म्यविषयम् अपि त्वज्ञानविषयम् अन्यथा मिथ्यार्थावभासानुपपत्तेः, न ह्यज्ञानविषयेण ज्ञानेनाज्ञानं निवर्तत इति न विरोधः ॥

ननु चेदं भावरूपमप्यज्ञानं विषयविशेषव्यावृत्तमेव साक्षिचैतन्यस्य विषयो भवति स विषयः प्रमाणानधीनसिद्धिरिति कथमिव साक्षिचैतन्येनास्मदर्थव्यावृत्तमज्ञानं विषयीक्रियते ॥

टी० "ननु चे"ति, परिहरति "नैवमि"ति, याथात्म्य–शब्देन निष्कृष्टमद्वितीयत्वलक्षणं स्वरूपं विवक्षितं, न हि रजतविषयज्ञानेन रजतं निवर्त्तत इत्यर्थः । प्रपञ्चमिथ्यात्वसिद्धवत्कारेण हेतुमाह "अन्यथे"ति, अन्यथा—साक्षिस्वरूपप्रकाशमात्रस्यैव वस्तुयाथात्म्यविषयत्व इत्यर्थः । अज्ञानविषयत्वमस्तु ततः किं? मित्यत्राह "न ही"ति, न हि रजतज्ञानेन रजतं निवर्त्त्यमित्यर्थः, दृश्यविशेषणस्य रूपादेरपि दृश्यत्वं दृष्टं दृश्याज्ञानावच्छेदकस्यास्मदर्थस्य दृश्यत्वमभ्युपगमादस्मदर्थावच्छिन्नमज्ञानं न विषयीक्रियत इत्यभिप्रायेण पुनश्चोदयति–

"ननु चे"ति विषयविशेषः–अवच्छेदकविशेषः स इति च स एव परामृश्यते, परिहरति–

भू० नैष दोषः सर्वमेव वस्तुजातं ज्ञाततया ऽज्ञाततया वा साक्षिचैतन्यस्य विषयभूतं तत्र जडत्वेन ज्ञाततया सिद्ध्यत एव प्रमाणव्यवधानापेक्षा, अजडस्य तु प्रत्यग्वस्तुनः स्वयंसि-

ह्यतो न प्रमाणव्यवधानापेक्षा, इति सदैवाज्ञानव्यावर्तक-त्वेनावभासो युज्यते, तस्मान्न्यायोपबृंहितेन प्रत्यक्षेण भावरूपमेवाज्ञानं प्रतीयते, तदिदं भावरूपमज्ञानमनु-मानेनापि सिध्यति—

टी० "नैष दोष" इति, अस्मदर्थोऽपि सर्वशब्दवाच्यान्तर्भूतः, ज्ञाततया अज्ञाततया वा ज्ञानान्तरसापेक्षं तन्निरपेक्षं वा साक्षिचैतन्यस्य विषयभूतं साक्षिचैतन्येन प्रतिभातीत्यर्थः, अस्मदर्थस्य साक्षिचैतन्यविषयत्वमौपचारिकं स्वयंप्रकाशस्य स्वविषयत्वायोगात् जडस्य स्वयंप्रकाशत्वायोगात् प्रमाणाधी-नसिद्धि सद्दृश्यविशेषणं भवति, अस्मदर्थस्तु स्वयंप्रकाशतया स्वयमेव सिध्य-च्चज्ञानावच्छेदक इत्यर्थः, दृश्यावच्छेदकत्वाद्दृश्यमिति चोक्तं तज्जडत्वप्रयुक्त-मिति सोपाधिकमिति परिहारः स्यात्, तस्मादभावरूपत्वपक्षे तदभावाच्चे-त्यर्थः, न्यायोपबृंहितेनेति पक्षद्वयेऽपि विरोधतदभावरूपन्यायानुगृहीतेने-त्यर्थः, एवं प्रत्यक्षेण न्यायानुगृहीतेनाज्ञानस्य भावरूपत्वं, न जानामीत्यनेना-त्माश्रयत्वं च सिद्धं शास्त्रेष्वज्ञान–शब्दवाच्यतया पराभिमतकर्मव्यावृत्तिः प्रत्यक्षतया सिद्धा, अस्य च शास्त्रेष्वज्ञानादिशब्दवाच्यत्वं ज्ञानविरोधि-त्वादहमज्ञ इति प्रतिपन्नतया च सिद्धम्। अथ स्वविषयावरणतास्वनिवर्त्य-त्वाभ्यां सहोपपादिताकारविशिष्टं चाज्ञानमनुमानेनापि साध्यते—

मू० विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्त—

टी० विवादाध्यासितमित्यादिना, ज्ञानमित्युक्ते ब्रह्मस्वरूपस्य व-स्त्वन्तरपूर्वकत्वासम्भवात्तद्व्यावृत्त्यर्थं प्रमाणज्ञानमित्युक्तं, तथाऽपि धारा-वाहिकज्ञाने उत्तरोत्तरज्ञानानां सिषाधयिषितवस्त्वन्तरपूर्वकत्वाभावात्त-द्व्यावृत्त्यर्थं विवादाध्यासितमित्युक्तं, तज्ज्ञानं किमित्यपेक्षायां व्यक्त्यर्थं प्रमा-णज्ञानमित्युक्त्वा अयं धर्मिदर्शितः। अथ साध्यधर्ममाह "स्वप्रागभावे"ति, वस्त्वन्तरपूर्वमित्युक्ते घटादिस्वविषयपूर्वकत्वेन सिद्धसाधनं स्यादिति तद्व्या-वृत्त्यर्थमाह "स्वदेशगते"ति, स्वाश्रयगतेत्युक्ते दृष्टान्तस्य साध्यवैकल्यं

Digitized by Google

स्यात् न हि तमोद्दीपगतम् अतः स्वदेशगतेत्युक्तिः । धर्माधर्मव्यावृत्त्यर्थमाह "स्वनिवर्त्त्ये"ति,

ननु कथं स्वनिवर्त्त्य–शब्देन धर्माधर्मव्यावृत्तिः,? ज्ञानोत्पत्तिहेतुभूत-तमवृष्टिहितज्ञानोत्पत्त्या हि नश्यति नैवं सर्वेषां धर्माधर्माणां ज्ञानफलकत्वाभावात्, ज्ञानोत्पादकव्यतिरिक्तधर्माणां पूर्वस्वयो स्वदेशे विद्यमानत्वाच्च । यद्वा स्वनिवर्त्य–पदेन संस्कारव्यावृत्तिः, न हि संस्कारो ज्ञाननिवर्त्यः, भयादिव्यावृत्त्यर्थमाह "स्वविषयावरणे"ति, प्रागभावस्यैवंविधत्वाभावात्प्रागभावत्यार्थमाह "स्वप्रागभावव्यतिरिक्ते"ति, इयं प्रतिलोमव्यावृत्तिः, वस्त्वन्तरपूर्वकमित्युक्ते आभावस्यापि पदार्थत्वेन वस्तुशब्दवाच्यत्वात् तद्व्यावृत्त्यर्थमाह "स्वप्रागभावव्यतिरिक्ते"ति, घटादिस्वविषयाव्यावृत्त्यर्थमाह–

मू० स्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम् अप्रकाशितार्थप्रकाशकत्वादन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति आलोकाभावमात्रं वा ।

टी० "स्वविषयावरणे"ति, कुड्यादिव्यावृत्त्यर्थमाह "स्वनिवर्त्त्ये"ति, वेद्यगतविषयादिव्यक्तिप्रागभावव्यावृत्त्यर्थमाह "स्वदेशगते"ति, प्रमातृज्ञाने निरस्ते वेद्यगतचैतन्यमभिव्यक्तं भवतीति हि तत्परिपाटी, अभिव्यक्तिप्रागभावस्य विषयावरणत्वं प्रकाशविरोधित्वं न तु तत्प्रतिबन्धकत्वमित्यनुलोमव्यावृत्तिः । हेतुमाह "प्रकाशिते"ति, साक्षाद्वा परम्परया वा अबाध्यव्यवहारानुगुण्यहेतुत्व प्रकाशकत्वमिह विवक्षितं साक्षाद्वा परम्परया इत्युक्ते हि दीपप्रभायां ज्ञाने च हेत्वनुगमसिद्धिः इदं रजतमिति ज्ञाने ऽतिव्याप्तिपरिहाराबाध्यव्यवहारानुगुण्यमित्युक्तं, प्रकाशकत्वादित्युक्ते धारावाहिकज्ञाने उत्तरोत्तरज्ञानानां प्रकाशकत्वेऽपि सिषाधयिषितधर्माभावाद्धेतोरनैकान्तिकत्वं स्यादिति तद्व्यावृत्त्यर्थमाह "अप्रकाशितार्थप्रकाशकत्वादि"ति, इन्द्रियेष्वनैकान्तिकत्वव्यावृत्त्यर्थं भासमानत्वे सतीति हेतुर्विशेष्य इति मन्तव्यं, दृष्टान्तमाह "अन्धकार"इति, दीपप्रभावदित्युक्ते उत्तरोत्तरप्रमाणानामप्रकाशितार्थप्रकाशकत्वाभावात्साधनविकलता स्यात् निवर्त्यवस्त्वन्तरपूर्वक-

त्वाभावात्साध्यविकलता च स्यादिति तदुद्धासार्थं प्रथमोत्पन्नप्रदीपभाववदित्युक्तं, तथाऽपि विवादोपस्य तथाविधत्वादर्शनात्तद्व्यावृत्त्यर्थम् ग्रन्थकार इत्युक्तं, दृष्टान्तस्य साध्यविकलता स्यात्तां परिहरति "आलोकेत्यादिना, आलोके सत्यपि उलूकादीनामन्धकारसंभवादनुयायिनमाकारमाह "रूपदर्शनाभावमात्रं वे"ति, यद्वा निमीलितनात्रस्य तमः प्रतिपत्तिनिर्वाहार्थमाह–

टी० "वस्तुयाथात्म्यज्ञाने"ति, तदुपहितेत्याश्रयश्च आन्तराध्यासः कः? बाह्यः कः? कथं चाविद्योपादानत्वेन ब्रह्मण उपादानत्व?मित्यत्राह "तदुपहिते"ति, निष्कृष्टब्रह्मण उपादानत्वानुपपत्तिं सूचयति "अविकारे स्वप्रकाशे चिन्मात्रवपुषि प्रत्यगात्मनी"ति, अविकारत्वात्–स्वप्रकाशत्वात् प्रत्यक्त्वाच्च विकारास्पदजडपराग्रूपपरिणामो नोपपद्यत इत्यर्थः। स्वप्रकाशस्य कथमध्याससंभव? इत्याह "तिरोहितस्वरूपे"ति, तिरोधायकं कि?मित्यत्राह "तेनैवे"ति, तेनैव–अध्यासहेतुनैवेत्यर्थः। अहङ्कारो ज्ञानं चान्तराध्यासः, ज्ञेयं बाह्याध्यासः, अध्यासरूपे–अध्यस्तरूपे कर्मणि कः, तस्यैव–दोषस्यैव, अवस्थाविशेषेण–कादाचित्कावस्थाविशेषेण रज्जुसर्पाद्यध्यासः एवं निष्कृष्टब्रह्मण उपादानत्वानुपपत्तिरुक्ता। दोषस्योपादानत्वे उपपत्तिमाह "कृत्स्नस्ये"ति, सुवर्णजातीयस्य भूषणस्य स्वर्णमेव ह्युपादानं दृष्टं तद्वदिति भावः हेतुबलात्कार्यकारणयोः सजातीयत्वदर्शनलक्षणात्। अथ प्रत्यक्षमाह–

मू० कारणं भवितुमर्हतीति हेतुबलादवगम्यते कारणाज्ञानविषयं प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीत्यपरोक्षावभासः, अयन्तु ज्ञानप्रागभावविषयः, स हि षष्ठप्रमाणगोचरः अयं त्वहं सुखीतिवदपरोक्षः।

टी० "कारणे"ति, अहमज्ञ इत्यस्य विवरणं मामन्यं च न जानामीति अहमज्ञ इत्यज्ञानस्वरूपकीर्तनं, तस्य मामन्यं च जानामीत्याच्छादनरूपकार्यकथनं, कारण–शब्देन कार्यरूपाज्ञानव्यावृत्तिः तस्मात्सौषुप्तिकमज्ञानं विवक्षितं जागरितावस्थायां ये घटाद्यवच्छिन्नमज्ञानं प्रतीयते सवि·

कल्पकप्रत्यक्षेण, सुषुप्तौ तु अनवच्छिन्नकारणाज्ञानप्रतीतिरस्तीति तत्त्वशुद्धि-कारादिभिरुक्तं, जागरितावस्थायामेवाज्ञानानुभवोऽयमिति संप्रदायः, अन्यं च न जानामीत्युक्तेः, न हि स्वापेऽन्यपरामर्शः न जानामीत्याच्छादकतया प्रतीयमानस्याज्ञानस्य कारणत्वात् कारणाज्ञानविषयमित्युक्तम् अपरोक्षाव-भास इति परोक्षरूपानुमानादिप्रमाणव्यावृत्त्यर्थमुक्तं ज्ञानप्रागभावविषयत्व-माशङ्क्य परिहरति "अयन्त्वि"ति, भवत्वयमपि षष्ठप्रमाणविषय इत्याशङ्क्याह "अयं त्वि"ति, परोक्षप्रमाणानि प्रत्यक्षव्यतिरिक्तानि तस्मात्परोक्षप्रमाणविषयभूतमज्ञानं न भवितुमर्हतीत्यर्थः। भावग्राहिप्रमाणे-नाभावस्य वेद्यत्वेऽपि दूषणमाह–

सू० अभावस्य प्रत्यक्षत्वाभ्युपगमेऽप्ययमनुभवो नात्मनि ज्ञाना-भावविषयः, अनुभववेलायामपि ज्ञानस्य विद्यमानत्वात् अविद्यमानत्वे ज्ञानाभावप्रतीत्यनुपपत्तेश्च । एतदुक्तं भवति अहमज्ञ इत्यस्मिन्ननुभवे अहमित्यात्मनो भावधर्मितया ज्ञानस्य च प्रतियोगितयाऽवगतिरस्ति ? वा न वा ? अस्ति-चेद्विरोधादेव न ज्ञानाभावानुभवसम्भवः, नो चेद्धर्मिप्रति-योगिज्ञानसव्यपेक्षो ज्ञानाभावानुभवः सुतरां न सम्भवति ।

टी० "अभावस्ये"ति, हेतुमाह "अनुभवे"ति, अभावस्यानुभववे-लायां ज्ञानं विद्यते न वा? विद्यते चेत् ग्राह्याभावाच्चो भावप्रतीतिः, न चेत् ग्राहकाभावाच्च तदभाव प्रतीतिरित्यर्थः, भावाभावयोरेकविषयत्वे हि विरोधः, अत्र विरोधो नास्तीति अभावविषयज्ञानस्य विद्यमानस्य ग्राह-कत्वात् इतरविषयज्ञानस्याभावप्रतियोगित्वेनाविद्यमानत्वादिति शङ्कां परिहरन् अनुभववेलायां ज्ञानस्य विद्यमानत्वम् अविद्यमानत्वे ज्ञानाभा-वप्रतीति अनुपपत्तिभावरूपत्वेन विरोधाभावं च विवृणोति "एतदुक्तं भव-ती"ति, ज्ञानप्रागभावस्य ग्राह्यत्वे अनिच्छया ऽपि भावाभावयोरेकविषयत्व-मापतितमित्यभिप्रायेणाह "अह"मिति, ज्ञानस्य चेति ज्ञान–शब्द आत्मा-

विषयादिघटादिविषयज्ञानसाधारणः इह भूतले घटो नास्तीत्यादिषु अ-
भावप्रतीतौ प्रतियोगिधर्मिणोर्ज्ञानापेक्षा दृष्टा तस्मादत्राप्यभावधर्मितया-
ऽऽत्मनोऽज्ञानमस्तीति वक्तव्यम् अभावव्यतिरिक्तो ह्यात्मा अतस्तद्विषयज्ञाने
सत्यपि अभावव्यतिरिक्तविषयज्ञानमभावप्रतियोगीति वचनं व्याहतं स्यात्
अभावधर्मिप्रतियोगिरूपाभिमतव्यतिरिक्तविषयज्ञानमभावप्रतियोगि चेत्तदा-
नीमभावप्रतियोगितया ज्ञानस्यापि प्रतीतिरस्तीति वक्तव्यं प्रतीयमानं ज्ञानं
स्वविषयावच्छिन्नं प्रतीयत इति विषयाणामपि प्रतीतिरस्ति, एवमभावप्र-
तियोगिज्ञानावच्छेदकतया विषयेषु ज्ञायमानेषु तद्विषयज्ञानाभावोऽनुपपन्न
इति भावः । अभावस्य प्रमाणान्तरविषयत्वेऽप्युक्तं दूषणमतिदिशति—

(शेषमग्रे)

ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या
विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(Continued from page 621. Vol. IX.)

आरुण्यादिगुणानामर्थैकत्वाधिकरणम् ।

सू० अर्थैकत्वे द्रव्यगुणयोरैक-
कर्म्यान्नियमः स्यात् ॥ ६ ॥

ज्योतिष्टोमे श्रूयते "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाती"-
ति तत्रारुणा-शब्दोऽयमाकृत्यधिकरणन्यायेनान्वयव्यतिरेकाभ्यां च गुण-
वचनः, पिङ्गाक्ष्येकहायनी-शब्दौ तु यौगिकौ सामानाधिकरण्यादेक-
द्रव्यवाचिनौ, गुणाधिक्यफलं च शब्दद्वयं, न चैकेन विहिते परेण
विधिर्न संभवतीति वक्तव्यम्, उभयोरपि श्रुत्यैव द्रव्यवाचकयोर्युगपत्प्र-
वृत्तेः, तदिहारुणिमानं प्रति संदेहः । किमेनं वाक्याद्भित्त्वा प्रकर-
णेन सर्वद्रव्येषु निवेशयामः ? किं वा क्रीणातिना संबध्य तदङ्गं सदे-

कहायिन्यां निविशत इति, तदर्थं च क्रियासाधनत्वं संभवति नेति, तत्र "अमूर्तत्वाद्गुणो नैव क्रियां साधयितुं क्षमः । तस्मात्क्रीणातिना नाऽस्य संभवत्येकवाक्यता" क्रीणातिना च संबध्यमानस्तृतीयासंयोगात्करणकारकं स्यात्, न चामूर्तस्य करणकारकत्वं संभवतीति नास्य क्रियासंबन्ध इति ततः पृथग्भूतः प्रकरणे निविशत इति । ननु प्रकरणे वा कथमस्य निवेशः? न तावत्क्रियाभिः, अमूर्तत्वात्, न च द्रव्यैः कारकस्य द्रव्यसंबन्धाऽनुपपत्तेः अनुपात्तानि चात्र द्रव्याणि कथं तैर्गुणः संबध्येत? । स्यादेतत् तृतीया करणद्रव्याणि प्राकरणिकान्यनूद्य प्रातिपदिकार्थो गुणस्तत्परिच्छेदकत्वेन विधीयते न तु गुणस्य करणत्वं, येन द्रव्यसंबन्धो न स्यात्, तृतीयया चोपादानाद्द्रव्याणां नानुपादानदोष इति, नैतद्युक्तं न हि तृतीया करणीभूतद्रव्याभिधायिनी, विभक्तयो हि कारकशक्तिं निष्कृष्याभिधायकतया क्रियां विशिंषन्ति न तु कृदन्तकरणादिशब्दवत्कारकोपसर्जनं द्रव्यमभिदधति येन गुणस्तत्परिच्छेदकतया संबध्येत । उच्यते प्रातिपदिकमेव गुणवचनमपि लक्षणया द्रव्यं प्रतिपादयति तच्च तृतीयासंयोगात्करणं तदनेन पदेन गुणविशिष्टं द्रव्यं करणभूतं[1] प्रतिपाद्यते तत्र विशेष्याणि करण द्रव्याणि प्रकरणगतान्यनूद्य विशेषणभूतो गुणः परिच्छेदकत्वेन विधीयते येन द्रव्येण किंचित्क्रीयते तेनारुणगुणकेनेति । नन्वेवं लक्षितस्य द्रव्यस्य क्रय एव करणत्वस्य संभवात्किमिति वाक्यभेदः, नानेन लक्षितं द्रव्यान्तरं शक्यं विधातुं श्रौतैकहायन्यवरुद्धत्वात्क्रयस्य, एकहायिनी तु स्वशब्दविहिता न पुनर्लक्षणया विधातुं शक्यते । अथैकहायनीमेवानूद्य तत्रैव गुणो विधीयतां, न भविष्यति वाक्यभेदः, नैवं शक्यं, विधीयते ह्यत्रैकहायनी क्रयं प्रति गुणभूता च स्वार्था च, नासावेकोच्चारणेऽनुवदितुं गुणं प्रति प्रधानीभवितुं परार्थं चोच्चारयितुं शक्येत आवृत्तिप्रसङ्गात्, प्राकरणिकानि तु द्रव्याणि वाक्यान्तरविहितानि शक्यन्ते वाक्यान्तरेणानुवदितुं तस्मात्कृत्स्ने प्रकरणेऽरुणिमा निविशत इति प्राप्ते ब्रूमः, तृतीयया गुणस्यैव करणत्वं क्रयं प्रति विस्पष्टं गम्यते, तच्च द्रव्यद्वारेण युज्यते

१ करणरूपमिति पा० ।

यद्यप्यमूर्तत्वादयं न साक्षात्क्रियां साधयितुमलं तथाऽपि द्रव्यपरिच्छेद-मुखेन शक्नोति साधयितुं न ह्यपरिच्छिन्नद्रव्यं क्रियां साधयति, गुणश्च तत्परिच्छिनत्तीति युक्तमस्य क्रियासाधनत्वं, गुणं हि साधनत्वेन विदधच्छब्दो यथा ह्येतेन शक्यते साधयितुं तथा कुर्यादित्याह. स च द्रव्यपरिच्छेदमुखेन शक्नोति साधयितुं नान्यथा, तेनायमर्थो भवति–अरुणपरिच्छिन्नेन द्रव्येण कुर्यादिति एवं संभवति श्रौतस्यैव गुणस्य क्रयैकवाक्यत्वेन लक्षणा वाक्यभेदश्च न युज्यते, यदा च क्रयार्थत्वं तदा तदीये द्रव्ये निवेशादेकहायन्यामेवास्य निवेशः । ननु वासःप्रभृतीन्यन्यान्यपि क्रयद्रव्याणि तेष्वपि निविशते न तेषां क्रयान्तरद्रव्यत्वात् भिन्ना ह्येते प्रतिवाक्यं क्रियाविधिभेदात्, सर्वे ह्येते विधयो ऽन्योन्यस्मिन्नुत्पत्तिशिष्टद्रव्यावरोधाद्द्रव्यान्तरं विधातुमशक्नुवन्तस्तत्तद्द्रव्यविशिष्टक्रयविधानार्थाः । न च विहितस्य विधानं संभवतीति सिद्धः क्रयभेदः, यदाऽऽह भाष्यकारः "भिन्ने हि वाक्ये एकहायनीसाधनक एकः क्रयोऽवरुद्धो भवति अरुणासाधनकमपि क्रयान्तर"मिति, एवं हि वदन्वाक्यभेदे क्रयभेदं दर्शयति, तेन ये तु गुणकर्मत्वात्क्रयाणां भेदं नेच्छन्ति ते न्यायविरोधाद् भाष्यविरोधाच्चोपेक्षणीयाः. न च गुणकर्मणां भेदो नास्तीति राजाज्ञा, ऐन्द्रवायवादिग्रहाणां भेदस्य पशुसोमाधिकरणे दर्शितत्वात्, अतोऽस्ति क्रयभेदः, क्रयाणां तु विकल्पः स्यादित्यत्राधिकरणे क्रयाणामेव विकल्पसमुच्चयचिन्ता न द्रव्याणामित्यविरोधः ॥

ग्रहैकत्वन्यायः सर्वेषां ग्रहाणां संमार्गार्थाधिकरणम् ।

सू० एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ॥ ७ ॥

एवं त्रिभिरधिकरणैः क्रमेण संस्कारद्रव्यगुणानां यथा संयोगं व्यवस्थोक्ता, संयोग एव त्विदानीं चिन्त्यते किं विवक्षितविशेषणेन शेषिणा शेषस्य संयोगः? किमविवक्षितविशेषणेने?ति एवं हि श्रुतं "ग्रहं संमार्ष्टी"ति तत्र संशयः किमेकस्य ग्रहस्य संमार्गः? उत सर्वेषा?मिति तदर्थं च किमुद्देश्यगता संख्या विवक्षिता? नेति तत्र श्रुतेर्बलात्तत्संख्योपादेयगामिनी विवक्षिता तथोद्देश्यगता ऽप्यविशेषत इति प्राप्तेऽभिधीयते "उद्दे-

श्यलक्षणं जातिर्यद्द्रव्यं लक्ष्यते तया। तस्याक्रमेव संमार्गः सर्वस्येति विनिश्चयः" यदि ग्रहत्वजातेरयं संस्कारः स्यात्ततस्तस्याः प्रतिव्यक्ति समाप्तेः यत्र क्वचिद्द्रव्ये संस्कृते सा संस्कृतैवेति न द्रव्यान्तरे संस्कारः क्रियेत तस्यास्त्वमूर्तत्वादसाधनत्वाच्च तल्लक्षितानां द्रव्याणां ज्योतिष्टोमापूर्वसाधनानामयं संमार्गः, तत्रापि यदि द्रव्याणि संमार्गं प्रति गुणभूतानि स्युः पशुरिव यागं प्रति ततो येन केनापि सिद्धेर्नावश्यं सर्वत्र क्रियेत, न हि यावद्गुणं प्रधानमावर्तयितव्यं प्रयोजनाभावात्, ततश्च कियता द्रव्येणायं संमार्गः कर्तव्य? इत्यपेक्षा भवति तस्यां चापेक्षायां परिच्छेदकत्वेन संख्या विधीयेत पश्वेकत्ववत्, प्रधानानि त्विह द्रव्याणि संमार्गं प्रति द्वितीयानिर्देशात्प्रयोजनवत्त्वाच्च, प्रतिप्रधानं च गुणावृत्तेः सर्वेषां समुच्चितानामयं संस्कार इति निश्चयाच्च परिच्छेदकापेक्षा, तदभावाच्च न संख्या पूर्ववदादत्संख्या, परिच्छेदकतया हि तस्याः क्रियान्वयः, न च परिच्छेदः परिच्छिन्ने संभवतीति द्वाराऽभावाच्च क्रियान्वयः संख्याया विधातुं शक्यते विधीयमानमप्येकत्वं सर्वद्रव्येषु समुच्चयेन संमार्गे प्राप्ते परिसंख्यार्थं स्यात्, सा च त्रिदोषा, न चैकस्मिन्वाक्ये संमार्गविधिः परिसंख्या च संभवति वचनव्यक्तिभेदात्, न चास्य विधिरपि संभवति कुतः? "ग्रहस्य संमृज्येष तत्प्रधानं गुण एव। वा सर्वथा वाक्यभेदः स्यादतो नास्य विधेयता"।

विधीयमानं ह्येकत्वं यदि तावद् ग्रहस्य विधीयते ततो ग्रहसंमार्गसंबन्धो ग्रहैकत्वसंबन्धश्चेत्यर्थद्वयविधानाद्वाक्यभेदः, विहितमपि चैकत्वं ग्रहस्वरूपमात्रोपलक्षणार्थं संमार्गविशेषणमिति सर्वेषां संमार्गः स्यादित्यस्मत्पक्षाविरोध एव। अथ संमार्गान्वितस्य ग्रहस्यैकत्वसंबन्धो विधीयते न स्वरूपमात्रस्य, नैवं शक्यं, न हि संमार्गो ग्रहविशेषणं निर्ज्ञातं हि विशेषणं भवति, संमार्गस्त्विहापूर्वो विधीयते कथमसौ ग्रहविशेषणं? युगपद्वा विधानविशेषणत्वयोरभ्युपगमे वाक्यभेदः, ग्रहं संमृज्यात् यं च संमृज्यात्स एक इति। अथैकत्वविशिष्टस्य ग्रहस्य संमार्ग एकोऽर्थो विधीयते तेन न कश्चित्पूर्वोक्तो दोषः स्यादिति मतं कस्तदा भवति वाक्यार्थः? यद्ग्रहजातीयमेकसंख्यं च द्रव्यं तस्य संमार्ग इति, एवमपि सर्वेषां प्रत्येक-

मेकत्वाद्ग्रहत्वाच्च संमार्गस्य च तद्गुणत्वात्सर्वत्र प्राप्तिः स्यात्, अपि च विभक्त्या युगपत्संख्या कारकं चोच्यते, न तु प्रथमं संख्यां प्रातिपदिकार्थस्याभिधाय पश्चात्तद्विशिष्टस्य कारकत्वं, येनैकत्वविशिष्टस्य ग्रहस्य संमार्गं प्रति कर्मता स्यात् तत्र तावदेकत्वं ग्रहविशेषणम् । अथैतदपि पश्चैकत्ववद्विभक्तिश्रुत्या कारकं सत्क्रिययैव संबध्यते तत्रापि द्वयी गतिः स्यात् एकत्वस्याङ्गं संमार्गः, संमार्गाङ्गं वैकत्वं यदि तावदेकत्वाङ्गं संमार्गः स्यात्ततो ग्रहमेकत्वं चोद्दिश्य संमार्गविधानात्तदुद्देश्ययोश्चोपादेयवत्क्रिया वशीकरणासंभवात्तस्यैकमेव ताभ्यां क्रियासंबन्धात्तदुद्देश्यं वाक्यसमाप्तेर्वाक्यभेदः, पुनरपि च ग्रहस्यैकत्वानपेक्षस्यैव संमार्गान्वयात्सर्वग्रहसंमार्गः स्यादित्यसमत्पक्षसिद्धिः । अथैकत्वं संमार्गस्य गुण इत्युच्यते, तदयुक्तं, न हि द्वितीया गुणत्वं वदति प्राधान्यवाचिनी हि सा । अथ सक्तुवल्लक्षणया गुणत्वमुच्यते न तु श्रुतिसंभवे सा युक्ता । किंच तथा सति ग्रहस्यापि गुणत्वं स्यात्, अथैकत्वस्य गुणत्वं ग्रहस्य च प्राधान्यमुच्यते न तच्छक्यं, कथं हि सकृदुपात्ता द्वितीया विभक्तिर्ग्रहापेक्षया प्राधान्यं श्रुत्याऽभिदध्यात्? एकत्वापेक्षया च गुणत्वं लक्षयेत् तत्र कथंचिदेकत्वं विवक्षितुं शक्यम् ॥

अथ चमसादौ संमार्गाप्रयोगाधिकरणम् ।

सू० संस्काराद्वा गुणानामव्यवस्था स्यात् ॥

किमेकत्ववत्प्रातिपदिकार्थस्याप्यविवक्षितत्वाच्च समानामपि संमार्गः कर्तव्य? उताविवक्षाकारणाभावाद्ग्रहाणामेवे? ति, विचारः तत्र संमार्ष्टीत्येतावत्युक्ते सोमावसेकनिर्हरणप्रयोजनतया सोमपात्राणामित्यवगमाद्ग्रह कस्येत्यपेक्षाऽभावादविवक्षितग्रहग्रहणमेकत्ववदुपलक्षणामात्रम् । अपि च सोमयागस्यैकत्वात्तदपूर्वमप्येकमेव तत्साधननिवेशी च संमार्गः चमसेष्वपि तत्साधनेषु भवितुमर्हति, न ह्यत्र कर्मभेदोऽस्ति येनापूर्वभेदादवघातादिवदव्यवस्था स्यात्, तस्माच्चमसेष्वपि स्यादिति प्राप्तेऽभिधीयते । "न हि ग्रहविवक्षायां वाक्यभेदः प्रसज्यते । यागैकत्वेऽप्यपूर्वाणि भिद्यन्तेऽभ्यासभेदतः" न तावदेकत्वविवक्षावद्ग्रहविवक्षायां वाक्यभेदः, अवश्यं हि संमार्गः कस्यचिद्विधातव्यः, तत्र शब्दोपनीतं

ग्रहमुल्लङ्घ्य न युक्तं यत्सामर्थ्यलभ्यं सोमपात्रमात्रं गम्यते एकस्यापि च याग-स्याभ्यासभेदात्तेषां चापूर्वमन्तरेण संहत्यकारित्वायोगादवश्यं प्रत्यभ्यास-मपूर्वाणि भिद्यन्ते, ततश्च ग्रहशब्दलक्षितापूर्वविशेषनिबन्धनः संमार्गो न च-मसेषु कर्तव्यः ॥

सप्तदशारत्निताया: पशुधर्मताऽधिकरणम्। सू० आनर्थक्यात्तदङ्गेषु ॥

"सप्तदशारत्निर्वाजपेयस्य यूप" इति श्रूयते तत्र संशयः किं सप्तदशारत्नित्वं वाजपेयसाधनभूतोर्द्ध्वपात्रद्वारेण वाजपेयाङ्ग? मुत यूप-द्वारेण पश्वङ्ग? मिति तदर्थे च किं सप्तदशारत्निर्वाजपेयस्येति वचन-व्यक्ति? रुत सप्तदशारत्निर्यूप इति तत्राव्यवहितत्वात्प्रधानत्वात्प्रकरणानुग्र-हाच्च सप्तदशारत्निर्वाजपेयस्येति सम्बन्धः, यद्वा वाजपेयस्येति षष्ठ्या तत्स-म्बन्ध्यूर्द्ध्वपात्रमुद्दिश्य सप्तदशारत्नित्वं विहितं तद्द्वारेण वाजपेयाङ्गं भवतु एवं च वाजपेय-शब्दः श्रुतिवृत्तो भवति यूपसम्बन्धे तु वाजपेयस्य यूपाभावा-त्पशुयागसम्बन्धित्वाद्यूपस्य वाजपेय-शब्दः पशुलक्षणार्थः स्यात्। नन्वितर-त्रापि यूप-शब्दो गौणः स तु न दोषो जघन्यत्वाद्यूप-शब्दस्य, वाजपेयश-ब्दस्य तु मुख्यत्वात्तत्र न लक्षणा युक्ता तस्मादूर्द्ध्वपात्रे निवेशः स्यादेवं यदि यूपेन सम्बन्धे लक्षणा भवेत् "वाजपेयश्रुतेर्नासौ श्रुतिवृत्तैव सा यतः। षष्ठीसम्बन्धमात्रार्थो नाङ्गाङ्गित्वमपेक्षते नाप्यव्यवधिसम्बन्धं देवदत्तस्य नप्तृवत् यूपस्य च पशुद्वारा वाजपेयोपकारतः सम्बन्धमात्रमस्त्येव क्रतुना-ऽतो न लक्षणा ऊर्द्ध्वपात्रेण सम्बन्धे यूपशब्दस्य गौणता चानन्तरेण सम्बन्धः प्रधानेन च सङ्गतिः। प्रक्रियाऽनुग्रहश्चैवं नादृत्यः श्रुतिबाधतः तेन सप्तद-शारत्निर्यूप इत्येव सङ्गतिः सा च प्रकरणाद्वाजपेयसम्बन्धियूपगा तेनायं वाजपेयस्येत्यनुवादो भविष्यति ॥ (शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 624. Vol. IX.)

मू० [a] "तथापि वस्तुगत्या स्वाभाविकोऽसौ विरुद्ध [b] एवेत्येताव-न्मात्रविवक्षया विरुद्धस्यानैकान्तान्द्भेदोपन्यासः?*— [c] नैवं

हृत्तोत्तरत्वात् [d] वस्तुगत्या सन्नप्ययं विशेषो नोद्भावनार्ह इत्युपेक्षणीय इत्युक्तं [e] तथाहि नेदमस्य साधकमेतत्साध्यं प्रति विरुद्धत्वादित्यभिधीयमाने विरुद्धशब्दार्थानिरुक्तौ विशेषणाधिक्यस्योक्तन्यायेन दुष्परिहरत्वात् [f] अत एवानैकान्तिके सन्देहेन प्रत्यवस्थानं विरुद्धे तु व्यतिरेकनिश्चयेनेति विशेषादनयोर्भेदोपन्यास इत्यप्यनवकाशम् ॥

टी० ॥ तर्हि विशेषणवैयर्थ्यमित्यपि न वचनीयं विरुद्धस्यानैकान्ताद्दूषकतयान्तर्वर्त्तिन्या व्याप्तेरुपन्यासादित्याह–। [a] "तथापी"ति ॥ [b] "इत्यन्तावदि"ति । अनुहृयुक्तांश्चविध्याधिको न वक्तफलितमाह–। [c] "मेवमि"ति । दत्तोत्तव्या ज्ञेयत्वादिवद्विपक्षहावापाताविदिति परिहरति–। [d] "वस्त्वि"ति । व्यतिरेकसामानारत्वादिति हेतुरसिद्ध इत्यत आह–। व्यतिरेकसामानाधिकरण्यमेव हेतोरगमकत्वे सामर्थ्यमिति विशेषणप्रक्षेपामुधेत्युक्त मित्यर्थः ॥ नित्यः शब्दः कृतकत्वादात्मवदित्युक्ते कृतकत्वं न नित्यत्वसाधकं विरुद्धत्वादित्युपन्यासे कथं विशेषणवैयर्थ्यमित्यत आह–। [e] "तथाही"ति । साध्यनिश्चयं विरुणद्धीति विरुद्ध इति वक्तव्यं व्याप्तेरपि सार्वत्रिकत्वादिर्विशिष्टसाहचर्यमित्युक्तन्यायेन साहचर्यमात्रस्यागमकत्वसमर्थत्वेन विशेषणाधिक्यं दुष्परिहरमित्यर्थः उक्तामेव नीतिं भङ्ग्यन्तरेणाविदितत्वेन घ्नाति–। [f] "अत" इति । अनेकान्तिके साध्यव्यतिरेकेण व्याप्तिसन्देहेन प्रत्यवस्थानं विरुद्धे तु साध्यव्यतिरेकव्याप्तत्वनिश्चयेन प्रत्यवस्थानमित्येवंरूपविशेषादनैकान्तिकविरुद्धयोर्भेदकथन मत एव विशेषणवैयर्थ्यादेव निरवकाशमित्यर्थः अनैकान्तिको हि साधारणोऽसाधारणश्चेति द्विधा तत्र साधारणः साध्याभाववति पक्षे च साधारणत्वात्समानधर्मतया पक्षे साध्यसन्देहं करोति विरुद्धस्तु व्यतिरेकव्याप्ततया पक्षे साध्याभावनिश्चयं करोतीति तयोर्भेद इति शङ्काकृतोऽभिप्रायः ।

मू० [a] अनुमितिहेतुव्यतिरेको हि [b] अनुमितिहेतुश्चैको व्या-

प्तिः 'अतस्तदुद्भावनस्य दोषत्वात्तावन्मात्रं ग्राह्यं' [d]तच्च हेतुविपक्षसंबन्धोद्भावनमात्रादेव गम्यते '[e]तस्माद[f]नुमितिहेतुव्याप्तिप्रमितिव्यतिरेकबोधनाय संशये व्यतिरेकनिश्चये वा उद्भाव्यमानेऽपि कुतस्तावेवेत्यत्र विपक्षसंबन्धमात्रनियततत्संबन्धावश्योपन्यास्याविति विपक्षसंबन्धमात्रमेवास्तु व्याप्तेस्तत्प्रमितेश्च व्यतिरेकस्य लिङ्गत्वादुद्भाव्यं कृतमितराभ्यामिति ॥

टी० ॥ अत इतिपरामृष्टं विशेषणवैयर्थ्यं दर्शयति—। [a]"अनुमिती"ति अनुमितेर्यत्कारणं तदभावो हेतुदोष इत्यर्थः कस्तर्ह्यनुमितिहेतुर्व्यतिरेको हेतुदोष इत्यत आह—। [b]"अनुमिती"ति । एको व्याप्तिरपरो हेतुः पक्षधर्मतेति यावत् ॥ ततः किमित्यत आह—। [c]"अत" इति । व्याप्तिव्यतिरेकस्य हेतुदोषत्वात्तन्मात्रमुद्भाव्यं तदेव हेतुं दूषयतीत्यर्थः व्याप्तिव्यतिरेकोद्भावनमेव हेतोर्विपक्षसम्बन्धनियमानियमदर्शनाधीनमिति तदुपन्यास इत्यत आह—। [d]"तच्चे"ति । साध्याभावसहचरितः साध्यव्याप्तश्चेत्यसम्भवाद्विपक्षवृत्तित्वदर्शनेनैव व्याप्तिव्यतिरेको गम्यते इत्यर्थः । विपक्षसम्बन्धनियमाभ्यामपि व्याप्तिव्यतिरेको गम्यते इति तावेवोपन्यस्याविति विपरीतं किं न स्यादित्याशङ्क्योपसंहरति—। [e]"तस्मादि"ति । तत्संबन्धमात्रमेवोद्भाव्यमस्तु कृतमलमितराभ्यां व्यतिरेकसंशयनिश्चयाभ्यामिति सम्बन्धः तदुपपादयति—। [f]"अनुमिती"ति । हेतुव्याप्तेस्तत्प्रमितेश्च व्यतिरेकसंशयेनैकान्तिके व्यतिरेकनिश्चये विरुद्धे वोद्भाव्यमाने तावेव संशयनिश्चयौ कुत इति जिज्ञासायां विपक्षसम्बन्धमात्रं विपक्षनियतसम्बन्धश्चावश्योपन्यस्य इति कृत्वा विपक्षसम्बन्धमात्रस्य व्याप्तेस्तत्प्रमितेश्च व्यतिरेकस्य लिङ्गत्वात्तन्मात्रमुद्भाव्यमुपजीव्यत्वाल्लाघवाच्चेत्यर्थः ॥

(शेषमग्रे)

संस्कृतपुस्तकानां सूचीपत्रम् ।

		मूल्यम् रु०	आ०
१	काशिका पंडितवरवामनादित्यविरचिता		
	पूर्वार्धम्	..	.. ॥
	उत्तरार्धम्	१०	.. ॥
२	बालरामायणं नाम नाटकम् श्रीराजशेखरप्रणीतम्	२	.. ॥
३	प्रसन्नराघवं नाम नाटकम् श्रीजयदेवकविप्रणीतम्	१	.. ।)
४	लघुकौमुदी वरदराजकृता	१	.. ≡)
५	लघुकौमुदी श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्ग्लण्डीयभाषायां कृता	८	.. ॥
६	श्रीयुतपंडितवरबालशास्त्रिणो जीवनवृत्तान्तः श्रीगङ्गाधरशास्त्रिणा निरूपितः		≡)
७	वैशेषिकसूत्रनिरूपणम् श्रीयुतगाफ़ाचार्य्येणेङ्ग्लण्डीयभाषायां कृतम्	४	.. ॥
८	मानवधर्म्मप्रकाश अर्थात् मनुस्मृति का हिन्दीभाषा में अनुवाद	४	.. ॥
९	शाश्वतधर्मदीपिका	१	.. ॥
१०	अमरकोश सटीक..	४	.. ॥
११	योगवार्तिकम्	३	.. ।)
१२	वेदान्तसिद्धान्तादर्शः श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)	.. ॥
१३	गोभिलीयगृह्यकर्मप्रकाशिका अन्त्येष्टिदीपिका च श्रीमद्भिन्नगा-देशाधिपति रचिता	४)	.. ॥
१४	शीतपदार्थनिर्वचनम्	३	.. ।)
१५	वाक्यार्थचन्द्रिकापरिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि संशोधिता	४)	.. ॥

Digitized by Google

CONTENTS.

		Page.
SAṂKSHEPAŚÁRÍRAKAM	...	625
ŚRÍBHÁSHYAM	...	657
ŚÁSTRADÍPIKÁ	...	673
KHAṆḌANAKHAṆḌAKHÁDYAM	...	678

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

3 2044 107 352 940